BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 1047, 1056, 1064, 1078, 1094, 1111, 1130 AND 1160.



NITYĀCĀRAPRADĪPAḤ

BY

NARASIṂHA VĀJAPEYIN.

VOL I.

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

CALCUTTA:

PRINTED AT THE SANSKRIT PRESS AND PUBLISHED BY THE ASIATIC SOCIETY OF BENGAL, 57, PARK STREET.

1907.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1047



नित्याचारप्रदीपः ।

NITYĀCĀRA-PRADĪPAḤ

BY

NARASIṂHA VĀJAPEYĪ

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

FASCICULUS I.

CALCUTTA:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1903.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal.

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO., 46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs. 1	8
Advaitachinta Kaustubhe, Fasc. 1 ...	0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each ...	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/ ...	7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each ...	1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1 ...	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each ...	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5 ; Vol. II. Fasc. 1–5 @ 1/ each ...	10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each ...	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–4 ...	1	8
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each ...	1	8
Bṛhaddharma Purāṇa (Text) Fasc 1–6 @ /6/ each ...	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1 ...	0	6
Catadusani Fasc 1 ...	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...	6	0
Çatapatha Brāhmaṇa, Fasc. 1–7 ...	2	10
Çatasāhasrikā Prajnāpāramitā (Text) Fasc. I to 5 @ /6/ each ...	1	14
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25 ; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each ...	19	14
Çlockavartika, (English) Fasc. 1–3 ...	2	4
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–16 @ /6/ each ...	4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each ...	5	10
Çrī Bhāshyam, (Text) Fasc 1–3 @ /6/ each ...	1	2
Dana kriyā kaumudī, Fasc 1--2 @ /6/ ...	0	12
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1–5...	1	14
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each ...	1	8
Kāla Viveka, Fasc. 1–5 ...	1	14
Kātantra, (Text) Fasc 1–6 @ /12/ each ...	4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each ...	10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each ...	3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each ...	2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each ...	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Vol. I, Fasc. 1–9 II, Fasc. 1-5 @ /6/ each	5	4
Manuṭīkā Sangraha, (Text) Fasc. 1–3 @ /6/ each ...	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each ...	4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7--19 @ /6/ each ...	4	14
Nārada Smṛti, (Text) Fasc. 1--3 @ /6/ ...	1	2
Nyāyavārtika, (Text) Fasc. 1--4 @ /6/ ...	1	8
*Nirukta, (Text) Vol. III, Fasc. 1--6 Vol. IV, Fasc. 1--8 @ /6/ each ...	5	4
Nityācāra Paddhatiḥ (Text) Fasc. 1--7 ...	2	10
Nityācārapradīpaḥ (Text) Fasc. 1 ...	0	6
Nyayabinduṭīkā, (Text) ...	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1--6 ; Vol. II, Fasc. 1--3 @ /6/ each ...	3	6
Padumawati Fasc. 1--3 @ 2/ ...	6	0
Pariçiṣṭa Parvan, (Text) Fasc. 1--5 @ /6/ each ...	Rs. 1	14
Prākrita-Paingalam, Fasc. 1--7 @ /6/ each ...	2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1--5 @ /6/ each ...	1	14
Ditto (English) Part II, Fasc. 1 ...	0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1 ...	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /6/ each ...	7	8
Parāçara, Institutes of (English) ...	0	12
Prabandhacintāmaṇi (English) Fasc. 1--3 @ /12/ each ...	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5--10 ; II, 1--6 ; III, 1--7 ; IV, 1--6 ; V, 1–8, @ /6/ each Fasc. ...	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each ...	1	8
Ditto (English) Fasc. 1–3 @ /12/ each ...	2	4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/ each ...	0	12
Sraddha kriyā kaumudī. Fasc. 1-2 @ /6/ ...	0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each ...	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each ...	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1--12 @ /6/ each ...	14	10
Tattrearthadhigama Sutram Fasc. 1 ...	0	6
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/ ...	0	16
Tul'si Sat'sai, (Text) Fasc. 1--5 @ /6/ each ...	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-4 @ /6/ each ...	1	8
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ /12/ ...	4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each ...	5	4
Varsa Krya Kaumudi, Fasc 1--5 @ /6/ each ...	1	14
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--7, @ /6/ each	4	8
Vidhan Parijata, Fasc. I ...	0	10
Viṣṇu Smṛti, (Text) Fasc 1--2 @ /6/ each ...	0	12
Vivādaratnākara, (Text) Fasc. 1--7 @ /6/ each ...	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1--6 @ /6/ ...	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 ...	2	4

Tibetan Series.

Pag-Sam Ṭhi S'iñ, Fasc. 1--4 @ 1/ each ...	4	0
Sher-Phyin, Vol. I, Fasc. 1--5 ; Vol. II, Fasc. 1--3 ; Vol. III, Fasc. 1--5, @ 1/ each ...	13	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1--5 ; Vol. II. Fasc. 1--5 @ 1/ each ...	10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1--13 @ /6/ each ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc 1--3 @ /12/ ...	2	4
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each ...	22	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, Fasc. 1--5, @ 1/12/ each ...	29	12
Akbarnāmah, with Index, (Text) Fasc 1--37 @ 1/ each ...	37	0
Ditto (English) Fasc. 1--8 @ 1/ each ...	8	0
Arabic Bibliography, by Dr. A. Sprenger ...	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1--19 @ /6/ each ...	7	2
Catalogue of Arabic Books and Manuscripts ...	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each ...	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1--21 @ 1/ each ...	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each...	14	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1--4 @ /12/ each ...	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1--9 @ /6/ each ...	3	6
Ditto of Āzādi, (Text) Fasc. 1--4 @ /6/ each ...	1	8
Haft Asmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1--6 @ /12/ each ...	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1--3 @ /6/ each ...	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each ...	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. III, Fasc. 11-12 ; Index to Vol. II, Fasc. 10-12 @ /6/ each ...	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1--5 @ /6/ each ...	1	14

*The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

नित्याचारप्रदीपः।

श्रीमन्नीलाद्रिपतये जगन्नाथाय नमः। श्रीशिवाय नमः।

शाखाभिः सकलाभिरुन्नतमहिमा नीलाद्रिमूलस्थितिः
पीनस्कन्धधृतप्रसूनविभवः स्वानन्दकन्दोदयः।
यः शोणाधरपल्लवोऽथ विबुधैः सेव्यः श्रिया शोभितो
भक्तेभ्यो वितरन् फलं विजयते कोऽप्येष कल्पद्रुमः॥ १॥

एकचूतविपिनस्य नायकं दर्शनच्छयितपुष्पसायकम्।
पुत्रभावगतसिद्धिनायकं[1] संश्रयेऽभिमतसिद्धिदायकम्॥ २॥

रूपं दधत्यतिमनोहरनारसिंहं
दैतेयदारणपरं पुरुषे पुराणे।
श्रेयः समादिशतु सागरसम्भवायाः
सानन्दसस्मित[2]ससम्भ्रमदृङ्निपातः॥ ३॥

कालिन्दीपुलिने कदम्बसुतरोर्मूले मनोजाशुग-
ज्वालाभिः कवलीकृतोऽपि कथमप्याधाय धीरं मनः।
स्वैरं वेणुमुदीरयन्नथ दृशा साकूतमालोकयन्
गोपस्त्रीपरिवेष्टितो दिशतु नः श्रेयः श्रियो नायकः॥ ४॥

(१) A. ०दायकं। (२) B. विस्मित०।

अमत्सरः सत्समयप्रणेता
कौत्सस्य वंशो वसुधावतंसः ।
प्रासादमीमांसकयज्ञयूपै-
र्येनोत्कलो भूषित एष देशः ॥ ५ ॥

प्रासादे स्वकृते हरिं[1] परिचरन्नासीदमुष्मिन् कुले
मीमांसार्णवकर्णधारतरुणो मृत्युञ्जयः पण्डितः ।
विद्याभिः सकलाभिरुज्ज्वलमतिर्यः शुद्धिमुक्तावली-
ग्रन्थेनाखिलमेव पूतमकरोत् स्वीयं कुलञ्चेज्यया ॥ ६ ॥

अमुष्य पुत्रः[2] किल गोपिनाथ-
मिश्रो गुणैर्यस्य वशे वसन्तौ ।
जलेशनारायणनामयोगात्
पुत्रौ तु मित्रावरुणावुपेतौ ॥ ७ ॥

अष्टाब्दे सुकविर्गते च नवमे तर्काब्धिपारङ्गमो
मीमांसाद्वयसत्प्रपञ्चरचनासम्पूर्त्तिकृद् द्वादशे ।
[3]यत्नैरल्पदिनैर्विजित्य विदिशो यः षोड़शे वत्सरे
योगाभ्यासरतः पुराणपुरुषं नारायणः प्राविशत् ॥ ८ ॥

सिद्धेश्वरीदत्तवरा स्वतन्त्रा
षड्दर्शनी यस्य कुले चलासीत् ।
कापीवनेऽह्नीनमखे[4]ऽग्निचेता
जलेश्वरः कृष्णपरायणोऽभूत् ॥ ८ ॥

(१) C. हरं । (२) A. ०नम्रा० । (३) C. जल्पै० । (४) A. B. मखाग्नि० ।

नरसिंहधनञ्जयाभिधावथ[1] गङ्गाधरतोऽन्वखण्डलः ।
तनयाः किल वाजपेयिनोऽस्य च मृत्युञ्जयपञ्चमास्त्विमे ॥१०॥

अद्वैतागममुत्कलेऽवतरयन् संक्षेपशारीरके
कृत्वा वार्त्तिकमध्वरेषु निरतः षण्मासदीक्षाव्रती ।
मीमांसा यत एव वृद्धिमगमत् काश्यां नृसिंहः सुर-
स्रोतस्वत्युदकैकजीवनविधिर्योगेन सिद्धिं गतः ॥ ११ ॥

देवानन्दः सुतोऽस्याजनि कृतचयनो यज्ञविद्याधुरीणो
वेदाभ्यासप्रयासी परिषदि विजये यः कृतः पण्डितेशः ।
नानादेशादुपेताः सुनिपुणमतयः सङ्घशो यस्य शिष्या
मीमांसातर्कविद्याश्रुतिशिखरमतं प्रौढ़मध्यापयन्ति ॥१२॥

अनुजोऽस्य च पौण्डरीकयज्वा[2]
बलभद्रो विदितः श्रुतो नयेन ।
सदृशः श्रुतिमौलिभट्टतन्त्रे
किमु संवत्सरदीक्षया क्रतौ च ॥ १३ ॥

अपरेऽपि नृसिंहसूनव इह चत्वार उदारचेतसः ।
स्वकुलोचितविद्ययोर्जिताः सततं कृष्णकथापरायणाः ॥ १४ ॥

आनन्दपुत्रा वसुतेजसोऽष्टौ वसूत्तमाः किं वसुधामुपेताः ।
यदीयशिष्यादनवाप्तविद्या ये केऽपि तल्लक्षणमज्ञतैव ॥ १५ ॥
[3]सर्व्वे च पुत्रा विगतारिमित्रास्ते वाजपेयादिमखैः पवित्राः ।
काले यथावद्-विहिताग्निहोत्रा महद्भिराशासितसच्चरित्राः ॥१६॥

(१) C. ०धनञ्जयौ बुधावथ० । (२) C. ०याजी । (३) C. सर्व्वेऽपि० ।

ते वामदेवाभिधवर्द्धमानौ
समाधवौ तौ भुवनेशवीरौ ।
धराधरस्थानु गदाधराह्वौ[1]
रविश्च तेषामिह चाष्टमोऽभूत् ॥ १७ ॥

धराधराख्याप्रथितस्य जैमिने-
र्जगन्निवासैकजुषो दशात्मजाः ।
गरिष्ठविघ्नेश्वरनामसंहृतौ
वशिष्ठ एव व्यजनिष्ट पूर्व्वजः ॥ १८ ॥

मुरारि-पीताम्बर-वासुदेव-
नारायण-श्रीपति-केशवाख्याः ।
वक्रेश्वर-श्रीजयदेव-कृष्णाः
स्वाचारविद्यास्तनया नवाम्ये ॥ १९ ॥

[2]मुरारिपूजार्जितविद्ययोर्जितो
मुरारिरासीत् श्रुतिमौलिपारगः ।
निरन्तरं श्रीनरसिंहसेवया
नृसिंहनामाजनि तस्य चात्मजः ॥ २० ॥

श्रीमद्विघ्नेश्वरगुरोः प्राप्तविद्येन तेन च ।
नित्याचारप्रदीपोऽयं नृसिंहेन प्रणीयते ॥ २१ ॥

तत्र निमित्तोद्देशेन विहितं कर्म्म नैमित्तिकम् । तन्मध्ये [3]नियतनैमित्तिकं यत् तन्नित्यमुच्यते । तत्र यावज्जीवमग्निहोत्रं

(१) A. गदाधराख्यौ ०।   (२) C पुरारि ०।
(३) C. निह्नितनिमित्तकं ०।

जुहुयात् । अहरहः सन्ध्यामुपासीत । अहरहर्जुहुयादाकाष्ठात् । अहरहर्भूतेभ्यो बलिं हरेत् । इत्यादि नित्यम् । नियतनिमित्तत्वात् । यत्त्वनियतनिमित्तकं तत् गृहदाहे क्षामवत्या यजेत । रविसंक्रमणे स्नायात् । चन्द्रसूर्य्यग्रहे स्नायात् । इत्यादि । तदनियतनिमित्तत्वान्नैमित्तिकमात्रम् । तत्र यावज्जीवमग्निहोत्रं जुहुयादित्यादौ धातुसम्बन्धाधिकारविहिततन्मूलश्रुत्या धात्वर्थयोर्जीवनहोमयोः सम्बन्धः प्रतीयते । सच नाङ्गाङ्गिभावो जीवनस्य कर्त्तृत्वनिर्व्वाहकत्वस्य लोकसिद्धत्वात् । न च [1]जीवनलक्षितकालस्याङ्गत्वं लक्षणादोषात् । न च जीवनस्य होमोऽङ्गवैयर्थ्यात् । परिशेषान्निमित्तनैमित्तिकभावः सम्बन्धः । गृहदाहादेश्च क्वचित् सप्तमीश्रुत्या [2]नित्यनैमित्तकत्वप्रतीतिः । क्वचित् यत्शब्दोपबन्धनादनुवादबुद्धौ परिशेषादेव निमित्तताप्रतीतिः । निमित्तस्य चैतद्रूपं यत् तस्मिन् सति नैमित्तिकमवश्यं कर्त्तव्यम् । नचैवंरूपत्वे मानाभावो वेदव्याख्यातृसम्प्रदायस्यैव मानत्वात् । यच्चावश्यं कर्त्तव्यं तत्र नानियतकामनाया विषयं स्वर्गादि फलं भवितुमर्हति विरक्तस्य स्वर्गमनिच्छो जीवने गृहदाहे वा निमित्ते सति होम क्षामवत्योरकरणे निमित्तश्रुतिबाधात् । न च सरक्तविषयेयं श्रुतिर्न चैकं प्रतिशिष्यत इति न्यायात् । विश्वजिदादौ निमित्तश्रुत्यभावेन लाघवेन भावरूपस्वर्गफलकल्पनात् । तेन सर्व्वेषां सर्व्वदापेक्षित उपात्तदुरितक्षय एव फलम् । यत्तु वैश्वानरं

(१) C. जीवनस्य होमाङ्गलक्षितस्य कालस्याङ्गत्वं ।
(२) C निमित्तत्वप्रतीतिः ।

द्वादशकपालं निर्वपेत् पुत्रे जाते यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव स तेजस्वीत्यादिफलमार्थवादिकं । तत्रार्थवादप्रामाण्यादेव फलान्तरमिति नैमित्तिकत्वेऽपि नोपात्तदुरितक्षयफलं । नैमित्तिकस्य च होमस्येतिकर्त्तव्यताकाङ्क्षायां प्रकरणादग्निहोत्रेतिकर्त्तव्यता क्षामवत्यादिष्वतिदेशादैष्टिकी विध्यन्तः । तत्र निमित्तश्रुत्या अवश्यकर्त्तव्यत्वेन ज्ञातायां भावनायामङ्गानि सम्बध्यमानानि न सर्व्वाणि सम्बन्धयोग्यानि । न हि गृहदाहे जाते तत्कालं सर्व्वाङ्गसम्पत्तिः सर्व्वस्य । वाक्यान्तरोक्तसायंप्रातःकालावच्छिन्ने वा निमित्ते जीवने सर्व्वाङ्गसम्पत्तिः सर्व्वस्य । तेन यथाशक्तिकृताङ्गसहितानीति सम्बन्धः । न च यथाङ्ग-विनियोग-मधिकार-कल्पनात् सर्व्वाङ्ग-विनियोगानन्तरं सर्व्वाङ्गसम्बन्धस्यैवाधिकार इति । यथान्धपङ्ग्वादिव्यतिरिक्तानामधिकारः । एवं गृहदाह-सायं-जीवनादि-निमित्ते काले यस्य सर्व्वाङ्गसम्पत्तिस्तस्यैवाधिकार इति किं न स्यादिति वाच्यम् । स्यादेवं यद्यङ्गविनियोगानन्तरमवश्यकर्त्तव्यतान्वयः स्यात् । समानवाक्यश्रुतेन निमित्तेन प्रथमं भावनाया अन्वये वाक्यान्तरश्रुतानामङ्गानां पश्चादेवान्वयात् । तेनावश्यकर्त्तव्यतान्वितायां भावनायामङ्गानि सम्बध्यमानानि यथाशक्तिकृतान्येव सम्बध्यन्ते । किञ्च यदि निमित्ते सति किञ्चिदङ्गहानौ नैमित्तिकं न कर्त्तव्यं कोऽर्थोऽवश्यं कर्त्तव्यमिति । अकरणव्यावृत्तिर्हि अवश्यशब्दार्थः । न च निष्फलं कर्त्तव्यं भवति । तेनावश्य[1]शब्दार्थमहिम्ना

(१) C. कर्त्तव्यार्थमहिम्ना ।

अकरणव्यावृत्तिः । कर्त्तव्यताप्रतीत्या च फलवत्त्वं निमित्तश्रुतेरेव गम्यते इत्याशङ्काऽङ्गहीनेऽपि फलम् । [1]अतएवाकरणव्यावृत्तिरकरणे भयात् भयञ्चानिष्टज्ञानादित्यकरणादनिष्टरूप[2]दुरितापूर्व्वद्वारकनरकादिकल्पनमपि निमित्तश्रुतिमूलकमेव । तथाच स्मरन्ति,—

अकुर्व्वन् विहितं कर्म्म निन्दितञ्च समाचरन् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥

इति । नचैतद्वाक्यप्रामाण्यादेव नित्याकरणे प्रत्यवाय इति वाच्यम् । काम्यस्यापि विहितत्वेन काम्याकरणेऽपि प्रत्यवायापत्तेः । न च दुरितानुत्पाद एव नित्यकर्म्मणां फलं स्यादिति वाच्यम् । अनादित्वेन कारणानपेक्षत्वात् । उत्पादनात्मिकायां भावनायामुत्पाद्यस्यैवान्वयात् । तस्मादुपात्तदुरितक्षय एव कर्म्मानुरूपेण नित्यनैमित्तिककर्म्मणां फलम् । यत्तु भविष्यपुराणे,—

फलं विनाप्यनुष्ठानं नित्यानामीष्यते स्फुटम् ।
काम्यानां स्वफलार्थन्तु दोषघातार्थमेव च ॥
नैमित्तिकानां करणे त्रिविधं कर्म्मणां फलम् ।
क्षयं केचिदुपात्तस्य दुरितस्य प्रचक्षते ॥
अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्यते ।
नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिम् ॥

(१) C अत्राकरण ० ।
(२) A. B. दुरितद्वारकं नरकादि ० ।

फलं विना स्वर्गादिकाम्यफलं विना। दोषघातार्थं विद्यमानादियज्ञानां यथापापक्षयार्थम्। नैमित्तिकानामित्यत्र नैमित्तिकपदं निमित्तविहितत्व[1]साम्यान्नित्यनैमित्तिकोभयपरम्। क्षयं केचिदुपात्तस्येति सिद्धान्तः। अन्यत् पक्षविकल्पमात्रम्। अनुषङ्गफलं आयुरादिवक्ष्यमाणफलं तेन भविष्यपुराणस्वरसादप्युपात्तदुरितक्षय एव फलम्। [2]तच्च यथाशक्तिश्रुताङ्गसहितानाम्। नचैवमाधानमध्ययनं विना। शूद्रस्यापि नित्याग्निहोत्राधिकारः स्यात्। आहवनीयकर्म्मज्ञानयोरप्यङ्गत्वेन तत्त्यागेनाङ्गान्तरसहितानां फलजनकत्वादिति वाच्यम्। नैमित्तिकविधिना हि यः कुर्य्यादित्युच्यते तत्र यथाशक्तीतिसम्बन्धः। न चाग्निविद्ययोर्नित्यप्रयोगविधिनानुष्ठानमुच्यते किन्त्वाधानाध्ययनविधिसिद्धयोरनेन स्वीकरणम्। गृहदाहे साङ्गां क्षामवतीं कुर्य्याद् यथाशक्तीत्युक्तेऽग्निविद्ययोः कर्त्तव्यत्वाप्रतीतेरेव न यथाशक्त्या सम्बन्धः। एवं शौचयज्ञोपवीतशिखादेरपि विध्यन्तरसिद्धत्वात् तत्रापि न यथाशक्त्युपबन्धः। एवं देशकालयोरपि स्वतःसिद्धयोरेवाङ्गत्वेन स्वीकारेण कर्त्तव्यत्वमिति। तत्रापि न यथाशक्तीति सम्बध्यते। ब्राह्मणोऽग्नीनादधीतेत्यादौ जातेरनुपादेयत्वात् तत्रापि न यथाशक्तीति। विस्मृतमपि चाङ्गस्मरणाशक्तेरेव विस्मृतमिति तत्त्यागेऽपि भवत्येव फलम्। कदाचित् कस्यचिदंशस्य हानिरित्यत्रा-

(१) C. विहितत्वे।

(२) A. C. अत्रच यथाशक्तिकृताङ्गसहितानाम्।

नुगमकमशक्याङ्गत्वमिति न शक्याङ्गहानौ फलम्। प्रधानस्य तु श्रूयमाणत्वात् तत्रावश्यकर्त्तव्यत्वं प्रतीयत इति प्रधानैकदेशाकरणे न फलम्। अतएव सर्व्वाङ्गत्यागेन प्रधानमात्रानुष्ठाने श्रुतप्रधानाकरणस्यैव दुरितहेतुत्वात् दुरितानुत्पत्तिः। नतु पापक्षयरूपं फलम्। साङ्गादेव फलोत्पत्तेः। यत्तु गौतमस्मरणमशक्तौ मनसाप्येनमाचारमनुपालयेदिति नानेन प्रधानानुष्ठानाभावे फलं प्रत्यवायानुत्पादो वा कथ्यते। किन्तु प्रधानाङ्गेषु च सर्व्वथा सामर्थ्याभावे मनसा तत्कर्म्मचिन्तनं तत्प्रत्याम्नायत्वेन विधीयते। पशुसोमाभावे वैश्वानरीवत्। तेन सर्व्वथा सामर्थ्याभावदशायां कर्म्मानुसन्धानस्यानुकल्परूपत्वमुच्यते। सामर्थ्ये सति तु

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्मते विद्यते फलम्॥

इति न्यायेन न फलं न वा प्रत्यवायपरिहारः। तत् सिद्धं नियतनिमित्तानि कर्म्माणि सन्ध्यावन्दनाग्निहोत्रादीनि नित्यानि। नैमित्तिकेष्वशक्तिकृताङ्गत्यागेऽप्यधिकारः। प्रधानमात्रकरणेऽपि प्रत्यवायानुत्पत्तिः। काम्ये तु सर्व्वाङ्गसम्पत्तावधिकारः। प्रारब्धे काम्येऽङ्गहानौ यस्तप उपेत्य न यथार्थं तपस्यति असमाप्तौ वा विरमेत तत्राग्नेयो विधिश्चान्द्रायणं वेति। श्रुतिश्च यो यक्ष्य इत्युक्त्वा न यजते तत्र त्रैधातवी प्रायश्चित्तिरिति। प्रायश्चित्तविधिकल्पितप्रारब्धमवश्यं समापयेदिति विधौ भाव्यापेक्षायां तत्फलकामनासत्त्वे तदेव कल्प्यते। तदभावे दुरितक्षय इति षष्ठतन्त्ररत्ने निर्णीतमङ्गहानात्तु फलं न्यूनम्। तद् यथा पुत्रकामस्य मनो-

रिष्टौ होतुरपचारादिलानामकन्या जज्ञे इति पुराणेषु लिङ्गदर्शनम्। अन्यथा विगुणकाम्यस्य निष्फलत्वे तत्र भिन्ने जुहोति स्कन्धे जुहोति यदुक्तो यज्ञ आर्त्तिमियाद् गार्हपत्यं चरेद् भूः स्वाहेति जुहुयादित्यङ्गविधिवैयर्थ्यं स्यात्। एवं कालस्यानुपादेयत्वेनान्याङ्गवैलक्षण्येऽपि काले प्रारब्धस्य दैवात् कालातिक्रमेऽकालेऽपि समापनम्। तच्च फलजनकम्।[1] अन्यथा सान्तपनीयातूत्कर्षेदग्निहोत्रं षोड़शीचोक्थ्यसंयोगादित्यादौ विहितकालातिक्रमे क्रमविचारो व्यर्थः स्यात्। नहि निष्फलस्य क्रमोऽङ्गम्। एवं मुख्यकाले करणाशक्तौ गौणकालेऽपि कर्त्तव्यत्वम्।[2] यदाह मण्डनः,—

मुख्यकाले यदावश्यं कर्म्म कर्त्तुं न शक्यते।
गौणकालेऽपि कर्त्तव्यं गौणोऽप्येतादृशो मतः॥

गौणकालस्तु क्वचिद् वाचनिकः। यथा स्मार्त्तहोमे आसायमाहुतेः प्रातराहुतिर्नात्येति। क्वचिन्न्यायमूलः। सायमाहुत्यां हुतायां चेद्दुर्व्वलः स्यात् तदैव प्रातर्होम इत्यादौ।[3] अतएव योगियाज्ञवल्क्यः,—

(१) A C. जननम्।

(२) E. Adds here. यथाह वृद्धमनुः,- मुख्यः कालोऽनुकल्पश्च सर्व्वस्मिन्नपि कर्म्मणि। अन्यथा अपराह्णविहितकर्म्मणः श्राद्धस्य रात्रौ प्रसङ्गाभावात् रात्रौ श्राद्धं न कुर्व्वीत इति निषेधो व्यर्थः। तेन दैवादपराह्णे श्राद्धाकरणे गौणकालत्वेन रात्रौ प्रसङ्गे निषेधसाफल्यम्।

(३) E. Adds here. यदाहुर्याज्ञिकाः शिष्येषु, सजातीयकर्म्मान्तरकालप्राप्तिपर्य्यन्तपूर्व्वकर्म्मणो गौणकालः। तस्मिन् हि प्राप्ते पूर्व्वकर्म्मणोऽतिपातबुद्धिर्भवति।

अज्ञानाद् यदि वा मोहात् प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः[1]॥

स्कान्दे,—

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

तथा ग्रन्थान्तरे,—

यत्र मन्त्रभ्रंशो यज्ञभ्रंशो वा तत्र पुरुषं चिन्तयन् तत्सूक्तं जपेदिति प्रायश्चित्तं विदधाति। मुख्यकालगौणकालयोरकरणमेव दुरितहेतुरिति द्वयोरतिक्रमे। एतेषामाचाराणामेकैकापचारेण गायत्र्यष्टसहस्रजपेन पूतो भवति। वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति वा सामान्येन प्रायश्चित्तम्। विशेषेण तु तत्र तत्र वक्ष्यते।

यत्तु बौधायनः,—

प्राणाग्निहोत्रमन्त्रांस्तु निरुद्धे भोजने जपेत्।
त्रेताग्निहोत्रमन्त्रांस्तु द्रव्याभावे यथा जपेत्॥

इति। तत्रात्यन्ताशक्तस्य महाविपदि मन्त्रजपमात्रेणाग्निहोत्रलोपप्रत्यवायपरिहार इत्याशयः।

मण्डनमिश्रास्तु गौणेष्वेतेषु कालेषु कर्म्म चोदितमाचरेत् प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत् प्रायश्चित्तमकृत्वा वा कर्म्म चोदितमाचरेत् नित्येष्टिमग्निहोत्रं वा भारद्वाजीयभाष्यतः।

(१) B. स्मृतिः।

विष्णुपुराणे,—

वर्णाश्रमाचारवता पुरुषेण परः पुमान्।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः[१] ॥

यच्च मनुः,—

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥

तथा सर्व्वस्नातकधर्म्मानभिधायाह मनुः,—

अनेन विप्रो वृत्तेन वर्त्तयन् वेदशास्त्रवित्।
व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते ॥

इत्यादिकं सन्ध्यावन्दनादेः संयोगपृथक्त्वेन फलान्तरम्।

यत्तु गौतमः—

वर्णाश्रमाः स्वधर्म्मनिष्ठाः प्रत्येककर्म्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुः श्रुतिवित्तवृत्तसुखमेधसो जन्म प्रतिपद्यन्ते[२] विश्वञ्चो विपरीतानि विनश्यन्ति। मेधो वीर्य्यम्। विश्वञ्चो यथेष्टचेष्टाः। विनश्यन्ति पापफलमनुभवन्ति। अत्र तच्छेषेणेति तस्यैव नित्याचारकर्म्मणः शेषेणेति भर्त्तृयज्ञः। तेन दुरितक्षयादिफलान्तरं जन्मान्तरे विशिष्टजन्मलाभ इति तस्य मतम्। भट्टाचार्य्यास्तु प्रथमपादे तस्मादन्येन कर्म्मणेति। गौतमीये तु तच्छेष[३] स्तस्माच्च तदपेक्षयेत्याहुः। तेन नित्यकर्म्मणा पापक्षये

(१) B. कारणम्। E. F. नान्यत् सन्तोषकारणम्।

(२) A. B. प्रतिप्रपद्यन्ते।

(३) A. C. D. तस्माच्चित्ताद्यपेक्षयेत्याहुः।

प्रतिबन्धविगमात् कर्म्मान्तरेण विशिष्टजातिलाभ इत्याशयः। एतेन ततः परिवृत्तौ कर्म्मफलशेषेण जातिं रूपं बलं मेधां प्रज्ञां प्रतिपद्यन्त इत्यापस्तम्बीयं व्याख्यानम्। अत्र च नित्यकर्म्मणां नानाफलसम्बन्धेऽपि योगसिद्ध्यधिकरणन्यायेन एकस्मिन् प्रयोगे एकमेव फलम्।

यत्तु,—

काम्ये कृते नित्यमनुष्ठितं स्यात्।

इति नित्यकाम्याग्निहोत्रयोः सकृदनुष्ठानम्। तत्रायं न्यायः। काम्याग्निहोत्रे 'स्वर्गफलार्थमनुष्ठिते[१] तत्कालेऽग्निहोत्राकरणाभावादकरणनिमित्तदुरितानुत्पत्त्या[२] [३]नित्यसिद्धिर्न तु पापक्षयरूपं नित्यफलम्।

स्वकाले यदकुर्व्वंस्तु करोत्यन्यदचेतनः।
प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते ॥

इत्यस्मिन्नपि पक्षे काम्याग्निहोत्रकालेऽन्यकरणाभावादेव न दुरितोत्पत्तिः।

भगवद्गीतायाम्,—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

(१) D. स्वफलार्थमनुष्ठिते भवति। तत्काले ०

(२) D. दुरितानुत्पत्त्या ०

(३) C. नित्यं सिद्धम्।

तथा,—

यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः।

तथा,—

सर्व्वकर्म्माण्यपि सदा कुर्व्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥

तेन सर्व्वाण्येव कर्म्माणि भगवति श्रीकृष्णे समर्पितानि भगवद्भक्तिरूपत्वेन पापक्षयप्रकर्षं कुर्व्वन्ति। अत्र स्वाध्यायोऽध्येतव्य इति स्वाध्यायस्याध्ययनसंस्कार्य्यत्वावगमात् संस्कारस्य च फलाभावे वैयर्थ्यात् भक्षणयुक्तफलं चमसे यागसम्बन्धद्वारा फलसम्बन्धवत् अधीतस्य स्वाध्यायस्य फलापेक्षायां यत् शक्यते तत्कुर्य्यादिति न्यायेन फलकल्पनादशायामक्षरावाप्तेरानन्तर्य्येऽपि विनाप्यक्षरग्रहणं शिक्षादिना कर्म्मज्ञानेनानुष्ठानेन फलसिद्धेर्व्यभिचारेण फलसाधनत्वेनाज्ञानात् स्वतश्चापुरुषार्थत्वादप्यक्षरावाप्तिर्नाध्ययनफलम्। न च तव्यप्रत्ययस्य कर्म्मणि विधानात् प्राप्यकर्म्मणि प्राप्ते शाब्दत्वेनाक्षराव्याप्तिः फलं स्यादिति वाच्यम्। शाब्दत्वेऽप्यपुरुषार्थसाधनत्वेनाफलत्वात्। यथा व्रीहीन् अवहन्तीत्यत्र श्रुतानामपि व्रीहीणां वैतुष्यस्य वा न फलत्वं किन्त्वपूर्व्वसाधनरूपस्येति तज्जन्यवाक्यार्थीभूतकर्म्मज्ञानस्य तु लिङ्गेन ज्ञात्वा कर्म्माणि कुर्व्वीतेति स्मृत्या यद् विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य्यवत्तरं भवतीति श्रुत्या च क्रतुफलं प्रति पारम्पर्य्येण साधनत्व-प्रतीत्या-ऽक्षरा-वाप्ति-द्वाराध्ययन-जन्यत्वाच्च फलत्वं कल्प्यते। यस्य तु भागस्यार्थज्ञानं नानुष्ठानोपयोगि

न वा ब्रह्मभागजन्यब्रह्मज्ञानवत् स्वतः पुरुषार्थं तदंशेऽध्ययनस्याक्षरावाप्तिद्वारा ब्रह्मयज्ञपारायणाद्युपयोगिसंस्कारपाटवरूपाक्षरधारणमेव फलम्। अध्ययनेन यत् शक्यते तत्कुर्य्यादित्येवमेकरूपेण ज्ञानधारणयोः फलत्वम्। तथाच सति ब्राह्मणादीनां त्रयाणामुपनयनश्रुतेः कांस्यभोजिन्यायेनाध्ययनस्यापि ब्राह्मणादित्रयगामित्वम्। एवञ्च विधिसिद्धज्ञानं वर्णत्रयं लब्ध्वा कृतार्थाः कर्म्मविधयो न शूद्रस्य प्रकारान्तरेण कर्म्मज्ञानमाक्षिप्याधिकारमापादयन्ति तेनार्थात् शूद्राद्यधिकारनिवृत्तिरध्ययनविधिफलं पर्य्यवस्यति। येषान्त्वक्षरग्रहणमेवाध्ययनफलं तेषामक्षरग्रहणे स्वाध्यायनियमेऽपि कर्म्मज्ञानेऽध्ययननियमाभावेन शूद्राधिकारप्रसङ्गो दुर्वारः। अग्न्यभावे-ऽप्यनग्निसाध्यवैदिक-कर्म्मस्वधिकारापत्तेः। रथकारस्योत्तरक्रत्वधिकारापत्तेश्चेति। एवञ्च स्वाध्यायपदस्य स्वशाखापरत्वात् स्वशाखाविहितं यत्कर्म्म वेदादेव ज्ञात्वानुष्ठेयम्। इतरत्तु परिगणितधर्म्मशास्त्रेभ्यो गुरुशिक्षया।

वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्।

इति याज्ञवल्क्यवचनात्। मानवे च,—

विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः।

इत्याद्युक्तवचनम्। योगियाज्ञवल्क्यः,—

वेदांश्चैव सवेदान्तान् वेदाङ्गानि तथा स्मृतीः।
अधीयाद् ब्राह्मणः पूर्व्वं शक्तितोऽन्यानि वा पठेत्॥
आत्मज्ञाननिमित्तानि सिद्धान्तानि च चिन्तयेत्।

तथा,—

अनन्तञ्चाप्रमेयञ्च वेदशास्त्रं समानवम् ।
अध्येतव्यं प्रयत्नेन चतुर्वर्गफलप्रदम् ॥

बृहस्पतिः,—

वेदमध्यापयेद् यत्नात् शास्त्रं मन्वादिकं तथा ।

वशिष्ठः,—

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

एवञ्च वेदवेदाङ्गपुराणेतिहासपञ्चरात्रादिसिद्धान्तधर्म्मशास्त्रेभ्यो-ऽधीतेभ्यो ज्ञात्वा धर्म्मोऽनुष्ठेयः । भट्टाचार्य्याः,—

तस्माद् यान्येव शास्त्राणि वेदमुद्रानतिक्रमात् ।
अवस्थितानि तैरेव ज्ञातो धर्म्मः फलप्रदः ॥
वेदेनैवाभ्यनुज्ञाता येषामेव प्रवक्तृता ।
नित्यानामभिधेयानां मन्वन्तरयुगादिषु ॥
तेषां विपरिवर्त्तेषु कुर्व्वतां धर्म्मसंहिताः ।
वचनानि प्रमाणानि नान्येषामिति निश्चयः ॥

ते च परिगणिताः । यदुक्तं जैमिनिना न शास्त्रपरिमाणत्वा-दिति । परिगणनञ्च यथा मनुः,—

वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

अखिलः साङ्गः । स्मृतिर्मन्वादिः । शीलं स्मृतिश्रुति-[1]

(१) B स्मृति ० ।

प्रत्यक्षदृष्टनिषेधपरिपालनं[1] स्वभावकृतम् । यत्तु भारते अद्रोहः सर्व्वभूतानामित्यादि शीललक्षणमुक्तम् । यच्च हारीतेन ब्रह्मण्यता देवपितृभक्तता सौम्यताऽपरोपतापिताऽनसूयता मृदुताऽपारुष्यमित्याद्युक्तं शीलत्वेन । तत्र ब्रह्मण्यताऽब्रह्मण्यता-व्यावृत्तिरित्येवं निषेधपरिपालनपरमेव । उपलक्षणञ्चैतत् । निषेधव्यावृत्तिमात्रं शीलमित्येव तत्त्वम् । अतएव याज्ञवल्क्येन सम्यक् सङ्कल्पजः काम इति शीलस्वरूपमुक्तम् । सङ्कल्पो निवृत्ति-सङ्कल्पः । तज्जन्यः कामो निवृत्तीच्छा । आचारः श्रुतिस्मृति-प्रत्यक्षदृष्टव्यतिरिक्तधर्म्मानुष्ठानं आत्मतुष्टिधर्म्मसन्देहे निर्णायक-त्वम् । भट्टाचार्य्यैस्तु शिष्टात्मतुष्टिविषयत्वेन पूर्व्वमसदेव धर्म्मत्व-मुत्पद्यते नकुलदन्तस्पृष्टौषधिवत् [इत्युक्तम् ।[2]] एतच्च प्रत्यक्षश्रुति-स्मृत्यविरोधिविषये । याज्ञवल्क्यः,—

पुराणन्यायमीमांसाधर्म्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्द्दश ॥

विष्णुपुराणे,—

आयुर्वेदो धनुर्वेदो गान्धर्व्वो दण्डनीतयः ।

इत्यधिकम् । पुराणान्यष्टादश । विष्णुपुराणे,—

ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ।
तथान्यं नारदीयञ्च मार्कण्डेयञ्च सप्तमम् ॥

(१) A. B. C. D. ० प्रत्यक्षदृष्टनिषेधव्यतिरिक्तनिषेधपरिपालनं ० ।

(२) [ ] C. omits the portion bracketed.

आग्नेयमष्टमञ्चैव भविष्यं नवमं स्मृतम्।
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्॥
वाराहं द्वादशञ्चैव स्कान्दञ्चैव त्रयोदशम्।
चतुर्दशं वामनञ्च कौर्म्मं पञ्चदशं स्मृतम्॥
मात्स्यञ्च गारुड़ञ्चैव ब्रह्माण्डञ्च ततः परम्।

मात्स्ये,—

पाद्मे पुराणे यत्प्रोक्तं नरसिंहोपवर्णनम्।
तदष्टादशसाहस्रं नारसिंहमिहोच्यते॥

प्रसिद्धनारसिंहस्याष्टादशसाहस्रसंख्या यद्यपि नोपलभ्यते किञ्चित्कालक्रमाल्लुप्तमिति प्रतिभाति। तथा,—

नन्दाया यत्र माहात्म्यं कार्त्तिकेयेन वर्ण्यते।
नन्दीपुराणं तल्लोके नन्दाख्यमिति चोच्यते॥

तच्च स्कान्दैकदेशः।

यत्र शाम्बं पुरस्कृत्य भविष्येऽपि कथानकम्।
प्रोच्यते तत्पुनर्लोके शाम्बमेव मुनिव्रतैः॥
एवमादित्यसंज्ञा च तत्रैव परिपाठ्यते।
अष्टादशेभ्यस्तु पृथक् पुराणं यत्तु दृश्यते।
विजानीध्वं मुनिश्रेष्ठास्तदेतेभ्यो विनिर्गतम्॥

विनिर्गतं समुद्भूतम्। यथा कालिकापुराणादीनीति[1] लक्ष्मीधरः। एवञ्च सति भगवत्या इदं भागवतमिति कालिकापुराणं भागवतपदेनोक्तमिति ये वदन्ति ते निरस्ताः। यदि परं प्रसिद्ध-

(१) B. पुराणादीति॰।

भिन्नं पुराणान्तरं भागवतं शङ्क्येत। यच्च वायुपुराणदेवीपुराणादि तदप्येतेष्वन्तर्गतम्। भविष्योत्तरं भविष्यपुराणस्यैकदेशः[1]। कूर्म्मपुराणे उपपुराणान्यष्टादशोक्तानि।

अन्यान्युपपुराणानि मुनिभिः कथितानि वै।
अष्टादशपुराणानि श्रुत्वा संक्षेपतो द्विज[2]॥

इत्युक्त्वा गणितं सनत्कुमारीयं नारसिंहं [3]नन्दीपुराणं शिवधर्म्माख्यं दुर्व्वासःपुराणं नारदीयं कापिलं वामनं औशनसं ब्रह्माण्डं वारुणं कालिका माहेश्वरं शाम्बं[4] सौरं पराशरोक्तं मारीचं भार्गवाख्यम्[5]। ब्रह्मपुराणञ्च कल्पतरौ यद्वाक्यान्याहृतानि तद्व्यतिरिक्तब्रह्मपुराणं पुरुषोत्तममाहात्म्योपबृंहितं हेमाद्र्यादिनिबन्धपरिगृहीतं शिष्टपरिग्रहादेव प्रमाणं तदप्युपपुराणान्तर्गतमेव। न्यायपदं न्यायवैशेषिकपरम्। मीमांसा कर्म्मब्रह्मविषया। धर्म्मशास्त्राणि च याज्ञवल्क्यः,—

वक्तारो धर्म्मशास्त्राणां मनुर्विष्णुर्यमोऽङ्गिराः।
वशिष्ठदक्षसम्बर्त्तशातातपपराशराः॥
आपस्तम्बोशनोव्यासाः कात्यायनबृहस्पती।
गौतमः शङ्खलिखितौ हारीतोऽत्रिरहं तथा॥

(१) B. पुराणैकदेशः।
(२) B. द्विजाः।
(३) A. C. read पाद्मं नारदीयपुराणं in the place of नन्दीपुराणम्।
(४) A. C कौर्म्मं।
(५) A. C. भार्गवाह्वयं।

[1]शङ्खलिखितस्मृतौ प्रचेता गणितः। यमस्मृतौ[2] देवलसुमन्तु-जैमिनि-जमदग्नि-प्रजापति-विश्वामित्र-पैठीनसि-पितामह बौधायन-छागलेय-जावाल-च्यवन-मरीचि-कश्यप-नारद-दक्षाः। एते षट्त्रिंशत्। भविष्यपुराणे,—

मन्वादिस्मृतयो यास्तु षट्त्रिंशत् परिकीर्त्तिताः।

इत्यभिधानात्। योगियाज्ञवल्क्य-वृहन्मनु-वृद्धशातातप-प्रभृतीनि तैरेव कृतानि। एतद्व्यतिरिक्ता या स्मृतय उपलभ्यन्ते शिष्टपरिगृहीताः[3] शुनःशेफशुनःपुच्छकार्ष्णाजिनि--व्याघ्रकण्ठ--जतुकर्ण-लौगाक्षि-व्याघ्रपाद-गर्ग—[4]गार्ग्य-नाड़ीजङ्घपुलस्त्य-पुलह-भृगु-गोतम-शौनक-यज्ञपार्श्व-वैजवाप-शाट्यायन-भीष्मश्लोक--[5]भस्मक्रतु-ऋष्यशृङ्ग-गोभिलाश्वलायन-प्रणीतास्तासामपि तथा स्मृत्यन्तरेषु चेत्यनेन भविष्यपुराण एव परिगणनम्। योगियाज्ञवल्क्यः,—

साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा।
अतिप्रमाणान्येतानि हेतुभिर्न विरोधयेत्॥
साङ्ख्यस्य वक्ता कपिलः परमर्षिः स उच्यते।
हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः॥
पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्।

(१) A. C. शङ्खलिखितौ प्रचेता॰।

(२) A. C. Add here नारदः।

(३) B. शिष्टगृहीताः।

(४) A. C. पार्श्व।

(५) A. C. भीष्मक्रतु॰।

ओंकाराधिकारे तत्रैव,—

पञ्चरात्रे स्थितो ह्येष भगवद्वाचकः स्मृतः।

देवीपुराणे च,—

पञ्चरात्रार्थकुशलो मातृचक्रविशारदः।
स भवेत् साधकश्रेष्ठः

इत्युक्तम्। यच्च भट्टाचार्य्यैः साङ्ख्ययोगपञ्चरात्रशाक्यनिर्ग्रन्थेत्याद्युदाहृत्याप्रमाणमध्ये गणितम्। वेदविरोधोपक्रमाद् वेद[1]विरुद्धवामाचारादिपरपञ्चरात्रपरमेव। साङ्ख्ययोगस्य तु वैधहिंसानिषेधप्रतिपादनांशेन वेदविरोधादेव तदंशेऽप्रामाण्यपरम्। अतएव स्मृतिप्रामाण्यप्रसङ्गे एतेन सामुद्रिकवास्तुविद्यादिव्याख्यातमिति वास्तुविद्यारूपघटनाङ्गमप्रामाण्यं भट्टाचार्य्यैरेव कथितम्। नह्येतन्मत्स्यपुराणविषयम्[2]। पुराणप्रामाण्येन साधितत्वात्। यच्च कल्पतरौ पाञ्चरात्रिकपूजावटनादिकं न लिखितं तत्प्रस्थानान्तरत्वेन। कथमन्यथा

मुक्त्वा तु मम शास्त्राणि शास्त्रमन्यत् प्रभाषते।

तथा—

मम शास्त्रं वहिष्कृत्य अस्माकं यः प्रपद्यते।

इति वराहपुराणीयं भागवतापराधे मम शास्त्रं मदुक्तं पञ्चरात्रमिति कल्पतरावेव व्याख्यातम्। तेन हयशीर्षमयसङ्ग-

(१) A. C. निरुद्ध॰।

(२) B. पुराणादिविषयम्।

हादिघटनाशास्त्राणि प्रपञ्चसारसारदादिमन्त्रागमाश्च पञ्चरात्रत्वेन महाजनपरिगृहीताः सर्व्वदेशीयाविगीताचारविषयाः प्रमाणमेव । भविष्यपुराणे,—

अष्टादश पुराणानि रामस्य चरितं तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत ॥
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते ॥

तत्र विष्णुधर्म्मोत्तरं विष्णुधर्म्मस्य भेद इति न पृथक् निर्द्दिष्टम् । विष्णुधर्म्मोत्तरे,—

एते ये वैष्णवा धर्म्मा दालभ्येन प्रकीर्त्तिताः ।
उत्तरं कथितं तुभ्यं मयैतत् परिपृच्छते ॥

विष्णुरहस्यशिवरहस्यादिकं गृह्यसूत्राणि पञ्चरात्राणि च । भविष्यपुराणे तथा स्मृत्यन्तरेषु चेत्यनेनैवोपात्तानि । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्चेत्यङ्गानि । कल्पपदं कल्पसूत्रोभयपरं माणकादिकं कल्पः कात्यायनलाट्यायनादिकं सूत्रम् । यच्चात्र स्मृतिरत्र श्लोक इति प्रामाणिकानां लिखनं तदपि प्रमाणं श्लोकाः सूत्राणीति काण्वपाठात् । महाभाष्ये च भ्राजा नाम श्लोका इति प्रमाणमुपन्यस्य किन्तु खलु भोः श्लोका अपि प्रमाणमिति पृष्ट्वा महाजनपरिग्रहात् प्रामाण्यं प्रतिपादितम् । यत्तु षट्त्रिंशन्मतादि तत् कैश्चिदेव परिग्रहाद् विगानाच्चाप्रमाणमिति लक्ष्मीधरः । विज्ञानेश्वरादियोगीश्वरलिखनात्तु तद्वाक्यान्यप्याद्रियन्ते । तत्रास्मदादिप्रवृत्तावात्मतुष्टिरेव प्रमाणम् ।

[याज्ञवल्क्यः[१]]

चत्वारो वेदधर्म्मज्ञाः पर्षत् त्रैविद्यमेव वा ।
सा ब्रूते यं स धर्म्मः स्यादेको वाध्यात्मवित्तमः ॥

तेनैतैर्ज्ञात्वा धर्म्मोऽनुष्ठेयः । यत्तु स्मृतिवाक्यसदृशवाक्यान्तरं पुरुषकृतं स्मृतिवाक्यालोचनात् पूर्व्वं न प्रमाणं ततः परं तदेव । तदुक्तं भट्टाचार्य्यैः,—

प्रतिकञ्चुकरूपेण पूर्व्वशास्त्रार्थगोचरम् ।
यदन्यत् क्रियते तस्य धर्म्मं प्रत्यप्रमाणता ॥

इति । एवञ्च स्मार्त्तेष्वपि कर्म्मसूपनयनानन्तरमेवाधिकारः । याज्ञवल्क्यः,—

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्व्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥

इत्युपनयनानन्तर्य्यं शौचाचारान् दर्शयति । षष्ठे जैमिनिः,—अपि वा वेदतुल्यत्वादुपायेन प्रवर्त्तेरन् । स्मृतीनां वेदतुल्यत्वात् । उपायेन उपनयनादूर्द्ध्वं स्मार्त्तधर्म्माः प्रवर्त्तेरन्नित्यर्थः । दक्षः अनुपनीतमधिकृत्य

भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते ।
तस्मिन् काले न दोषोऽस्ति स यावन्नोपनीयते ॥
उपनीतस्य दोषोऽस्ति क्रियमाणैर्विगर्हितैः ।

अनुपनीताधिकारे मनुः,—

नाभिव्याहारयेद् ब्रह्म स्वधा निनयनादृते ।

---

(१) B. omits the portion bracketed.

गौतमः,—प्रागुपनयनात् कामचारवादभक्ष्यः । अहुतादः ब्रह्मचारी । नास्याचमनकल्पो विद्यते । अन्यत्रापमार्जनप्रधावनप्रोक्षणेभ्यः । न तदुपस्पर्शनादशौचम् । नत्वेवैनमग्निहवनबलिहरणयोर्नियुञ्ज्यात् । अहुतादः । न हुतशेषभोजननियमः । ब्रह्मचारी मैथुनं वर्जयेत् । मूत्रपुरीषे न दिङ्नियमाद्यपेक्षा आचमनधर्म्मकं करोति । अपमार्जनमुच्छिष्टानाम् । सोदकेन पाणिना प्रधावनं चालनं मूत्रपुरीषयोः । अशुचिस्पृष्टस्योदकेनाभ्युक्षणम् । एवं कृतेऽस्य स्पर्शनेनाशौचम् ।

ब्राह्मे,—

मातापित्रोरथोच्छिष्टं बालो भुञ्जन् न दूष्यति ।

वृद्धशतातपः,—

प्राक् चूडाकरणाद् बालः प्रागन्नप्राशनाच्छिशुः ।
कुमारः स तु विज्ञेयो यावन्मौञ्जीनिबन्धनम् ।
शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् ।
रजस्वलादिसंस्पर्शे स्नातव्यं तु कुमारकैः ॥

गौतमः,—मद्यं नित्यं ब्राह्मणो वर्जयेदित्यर्थो जातिपुरस्कारप्रवृत्तत्वादनुपनीतस्यापि निषेधः । इदमुपलक्षणं यान्यत्र पतनीयानि तानि वर्जयेत् स्मृत्यन्तरे प्रायश्चित्तदर्शनात् । वस्तुतो द्विजमधिकृत्य ये निषेधास्तेषूपनयनादूर्द्ध्वमधिकारः । जातिमात्रपुरस्कारेण ये प्रतिषेधास्तेषूपनयनात् पूर्व्वमपि । भक्ष्याभक्ष्यादिषु वचनात् पर्य्युदासाज्जातिपुरस्कारप्रवृत्तिनिषेधा अपि न प्रवर्त्तन्ते । स्त्रीशूद्रयोर्विवाहादूर्द्ध्वं स्मार्त्तविधिनिषेधाः । तत्पूर्व्वमनुपनीतधर्म्मा इति । विष्णुस्मरणतन्नामकीर्त्तनादिधर्म्मस्य तु तत्तत्पुराणेभ्यः सर्व्वदशास्वधिकारः । किं बहुना

नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः ।

इति वचनादशौचमध्येऽपि ।

अथ परिभाषा ।

स्मृतिः—

सर्व्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम् ।
नारायणं नमस्कृत्य सर्व्वकर्म्माणि कारयेत् ॥

तथा—

अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तरे शुचिः ॥

छन्दोगपरिशिष्टे कात्यायनः,—

यत्रोपदिश्यते कर्म्म कर्त्तुरङ्गं न चोच्यते[1] ।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः ॥
यत्र दिङ्नियमो नास्ति जपहोमादिकर्म्मसु ।
तिस्रस्तत्र दिशः प्रोक्ता[2] ऐन्द्री सौम्यापराजिताः ॥

सौम्या उत्तरा । अपराजिता ऐशानी । यथा—

आसीन ऊर्द्ध्वः प्रह्वो वा नियमो यत्र नेदृशः ।
तदासीनेन कर्त्तव्यं न प्रह्वेन न तिष्ठता ॥

(१) D. ० तूच्यते । (२) B. प्राप्ता ० ।

तथा,—

मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि।

मानकृद् यजमानः स्यादिति शास्त्रविनिश्चयः[१] ॥

यजुर्विधाने,—

अनादेशे तु संख्याया अयुतं परिकीर्त्तितम्।

शिष्टाः पठन्ति,—

अनिर्द्दिष्टे शतं प्रोक्तं सहस्रमपि वा पुनः।

एषां शक्त्यपेक्षयानुष्ठानम्।

संख्यानुक्तौ शतं साष्टं सहस्रं वा जपादिषु।

नारायणामिदं प्रोक्तं मानं पुरस्क्रियां विना ॥

तापनीयश्रुतौ,—यः प्रणवमधीते स सर्व्वमधीते। अत्र सर्व्व-मन्त्रजपं प्रत्याम्नातत्वेन प्रणवजपो विधीयत इति शङ्कराचार्य्य-व्याख्यानम्। ओंकार इत्युनुवृत्तौ आपस्तम्बः,—यज्ञेषु चैतदादयः प्रणवाः[२]। प्रणवे[३]त्याद्यनुज्ञावचनानि च।

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।

प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥

त्रिमात्रस्तु प्रयोक्तव्यः कर्म्मारम्भेषु सर्व्वशः।

तिस्रः सार्द्धास्तु कर्त्तव्या मात्रा तत्त्वार्थचिन्तकैः[४] ॥

देवताध्यानकाले तु प्लुतं कुर्य्यान्न संशयः।

(१) A. B. शास्त्राद्द विनिश्चयः। (२) E. F. प्रणवाः। (३) E. F. प्रणयेत्या ०। (४) C. D. ० चिन्तनैः।

लोके भूतिकर्म्मसु चैतदादीन्येव वाक्यानि स्युः। यथा पुण्याहं स्वस्ति ऋद्धिमिति। भूतिकर्म्मसु पाणिग्रहणादिषु ओंकारादीनि स्वस्त्यादिवचनानि भवेयुः। यमः,—

पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते।

एतदेव निरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययोः ॥

[१]सम्पूज्य गन्धमाल्याद्यै र्ब्राह्मणान् स्वस्ति वाचयेत्।

धर्म्मे च कर्म्मणि माङ्गल्ये सङ्ग्रामाद्भुतदर्शने ॥

ब्रह्माण्डे,—

आदावन्ते पञ्चभिर्विप्रवर्य्यैः

पुण्याहञ्च स्वस्ति ऋद्धिञ्च वाच्यम्।

दद्यात्तेभ्यो दक्षिणां जातरूपं

वासो धान्यं भोजयेद् ब्राह्मणांश्च ॥

वशिष्ठः,—

स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्म्मणि।

पवित्राणां तथा जाप्ये दाने च विधिचोदिते ॥

स्नानं प्रातः स्नानं तदभावे स्नानान्तरम्।

वायुपुराणे,—

क्रियां यः [२]कुरुते मोहादनाचम्यैव[३] नास्तिकः।

[४]भवन्ति हि वृथा तस्य क्रियाः सर्व्वा न संशयः ॥

(१) A. C. संपूज्य ०। (२) A. C. क्रियते ०। (३) A. C. ० चम्येह ०। (४) A. C. भवन्ति तु तथा तस्य ०।

वशिष्ठः,—

जपहोमोपवासेषु धौतवस्त्रधरो भवेत् ।
अलङ्कृतः शुचिर्मौनी श्राद्धादौ विजितेन्द्रियः ॥

विष्णुपुराणे,—

होमदेवार्चनाद्यासु क्रियास्वाचमने तथा ।
नैकवस्त्रः प्रवर्त्तेत द्विजो वाचनिके जपे ॥

शातातपः,—

सव्यादंशात्परिभ्रष्टं कटिदेशे धृताम्बरम् ।
एकवस्त्रन्तु तं विद्याद् दैवे पित्र्ये च वर्जयेत् ॥

योगियाज्ञवल्क्यः,—

परिधानाद् वहिःकक्षा निबद्धा ह्यासुरी भवेत् ।
धर्म्ये कर्म्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ॥

व्यासः,—

आर्द्रवासास्तु यः कुर्य्याज्जपहोमप्रतिग्रहम् ।
सर्व्वं तद् राक्षसं विद्याद् वहिर्जानु च यत् कृतम् ॥

बौधायनः,—

काषायवासाः कुरुते जपहोमप्रतिग्रहान् ।
न तद्देवगमं भवति हव्यकव्येष्वथो हविः ॥

अत्रार्द्रवस्त्रनिषेधः स्थलकर्म्ममात्रविषयः । तथा वशिष्ठः,—

जले च शुष्कवस्त्रेण स्थले चैवार्द्रवाससा ।
जपो होमस्तथा दानं तत्सर्व्वं निष्फलं भवेत् ॥

जपादिपदं वैदिककर्म्ममात्रोपलक्षणम् । काषायवस्त्रपदं कौपीनाद्युपलक्षणम् । तथा च स्मृत्यन्तरे,—

नग्नः काषायवासाः स्यान्नग्नः कौपीनवानपि ।
नग्नो मलिनवासाः स्यान्नग्नश्चार्द्रपटस्तथा ॥
नग्नो द्विगुणवासाः स्यान्नग्नः स्यूतपटस्तथा ।
अकच्छोऽनुत्तरीयश्च नग्नो वर्ज्यो विवस्त्रवत् ॥

वर्ज्यः कर्म्माधिकारे । मनुबौधायनपैठीनसयः,—

अग्न्यागारे गवां गोष्ठे ब्राह्मणानाञ्च सन्निधौ ।
स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् ।

आपस्तम्बः,—

देवागारे तथा श्राद्धे गवां गोष्ठे तथाध्वरे ।
सन्ध्ययोरुभयोः साधुसङ्गमे गुरुसन्निधौ ॥
अग्न्यागारे विवाहेषु स्वाध्याये भोजने तथा ।
उद्धरेद्दक्षिणं पाणिं ब्राह्मणानाञ्च सन्निधौ ॥

सव्येऽंशे वस्त्रं निधाय दक्षिणं बाहुमुत्तरीयाद् वहिः कुर्य्यादित्यर्थः । एवञ्च द्वितीयाश्रुत्या वस्त्राद् वहिः करणं दक्षिणपाणिसंस्कारः[1] स कर्म्मसौकर्य्यार्थः[2] । न च निष्फलस्य संस्कारविधिरर्थात् कर्म्माङ्गदक्षिणपाणिसंस्कार इति कल्पनादशायां देवागारादिपदोपस्थाप्यदेवार्चनादिकर्म्मसम्बन्धित्वलाभात् । एतद्वाक्योपात्तव्यतिरिक्तकर्म्मसु नायं नियमः । तथा शीतत्राणार्थवस्त्रान्तरादप्युद्धरणमविशेषात् । नह्येतद्वस्त्रसंस्कारो वस्त्रस्या-

(१) B. हस्तसंस्कार ० (२) B. D. स च सौकर्य्यार्थः ।

श्रुतत्वाद् येन फललाभाय कर्म्माङ्गमुत्तरीयमेव गच्छेत्। [1]वस्त्रसंस्कारस्तु लौकिकेनाप्यविशेषात्। अतएवाचमने कण्ठप्रावरण-[2]निषेधार्त्तिवारणार्थं शीतवस्त्रस्यापि दक्षिणांशाद् वहिःकरणम्। भोजनेऽपि प्राणाहुत्यङ्गमेव संस्कारः।

महाभारते,—

अन्यदेव भवेद् वस्त्रं शयनीये सदैवहि।
अन्यद् रथ्यासु देवानामर्चायामन्यदेवहि॥

अत्र शयनकालीनरथ्यापदोक्तयथेष्टलौकिकाचारकालीनवस्त्रयोरन्यत्वविधौ फलकल्पनाप्रसङ्गात् तदनुवादार्थं देवार्चनोपलक्षितवैदिककर्म्मकाले ताभ्यामन्यद् वस्त्रं विधीयते। तेन शयनकालीनवस्त्रं यथेष्टाचारकालीनवस्त्रं कर्म्मकाले त्यक्त्वा वस्त्रान्तरं धार्य्यम्। तथा,—

स्वयं धौतेन कर्त्तव्याः क्रियाः सर्व्वा विपश्चिता।
न निर्णेजकधौतेन नाहतेन कदाचन॥

अत्र स्वयं धौतस्य कर्म्माङ्गत्वेन विधौ निर्णेजकधौतस्य प्रसङ्गाभावात् तन्निषेधो नित्यानुवादस्तुत्यर्थः। न च प्रतिनिधित्वेन प्राप्तस्य निषेधार्थो वाक्यभेदापत्तेः। नापि पुरुषार्थवस्त्रधारणे निषेधो वाक्यभेदादेव। कारुहस्तः सदा शुचिरिति दोषाभावाच्च। केवलं रजकधौतपरिधाने कर्म्मवैगुण्यं पुत्रादिधौत इव स्वयं धौतत्वाभावान्नाधर्म्मः। यत्तु भट्टाचार्य्यैः,—रजकधौतगर्द्दभारूढ़वस्त्रपरिधानं दुराचारमध्ये गणितं तद्गर्द्दभस्पर्शदोषमभिप्रेत्य।

(१) B. D. हस्तसंस्कार०। (२) E. F. निषेधात्तवार०।

गर्द्दभस्यास्पृश्यत्वात्। नचास्पृश्यस्पर्शने पुरुषस्यैव दोष न वस्त्रस्येति वाच्यं [1]चण्डालादिस्पृष्टवस्त्रस्य पुरुषवदेव दुष्टत्वोक्तेः। तदुक्तं भट्टैः,—

पुरुषस्य सचेलस्य स्नानं यस्माद्विधीयते।
तस्मात्पुरुषवद् वस्त्रं न गवाश्वादिवन्मतम्॥

केवलं मूत्रपुरीषलेपानन्नलेपानुच्छिष्टलेपान् रेतसो लेपान् प्रक्षाल्याचम्य प्रयतो भवतीत्यापस्तम्बवचनादन्नपदस्य मूत्रपुरीषादिसाहचर्य्येणाभोज्यान्नपरत्वाद् रजकान्नलिप्तञ्चाधौतं न ग्राह्यम्।

कात्यायनः,—

सदोपवीतिना भाव्यं सदाबद्धशिखेन तु।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्॥

श्रुतिः,—यज्ञोपवीत्येवाधीयीताध्यापयेद्वा जपेद् यजेच्च।

मनुः—

कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत्।
त्रिवृता ग्रन्थिनैकेन तस्यैको ग्रन्थिरिष्यते॥

छन्दोगपरिशिष्टे,—

ऊर्द्ध्वं तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम्।
त्रिवृतञ्चोपवीतं स्यात् त्रिवृता ग्रन्थिना युतम्॥
पृष्ठवंशे च नाभ्याञ्च धृतं यद् विन्दते कटिम्।
यज्ञोपवीतं तज्ज्ञेयं नातिह्रस्वं न चोच्छ्रितम्॥

(१) D. चण्डालादिस्पृष्टस्य वस्त्रस्य०।

वामावर्त्तं त्रिगुणं कृत्वा दक्षिणावर्त्तं नवगुणं कुर्य्यात्। तदेव च त्रिसरं कार्य्यम्। वामस्कन्धे धृतं नाभिपृष्ठवंशयोर्धृतं यथा कटिपर्य्यन्तं प्राप्नोति तावत्परिमाणं कर्त्तव्यमित्यर्थः। आपस्तम्ब,—उपासने गुरूणां वृद्धानामतिथीनां होमे जपकर्म्मणि भोजने च आचमने च स्वाध्याये च यज्ञोपवीती स्यात्। निगमपरिशिष्टे,—वामस्कन्धे यज्ञोपवीतं दैवे। प्राचीनावीतमितरथा पितृपक्षे। नाभ्यादिकण्ठावसक्तमभिचारे निवीतम्। आपृष्ठदेशावलम्बं ग्राम्यधर्म्मेषु। कण्ठपदेन लक्षणया स्कन्ध उक्तः। द्विस्कन्धावसक्तमित्यर्थः। ग्राम्यधर्म्मो मैथुनम्। गोभिलः,—दक्षिणं बाहुमुद्धृत्य सव्येऽंशे प्रतिष्ठापयति दक्षिणं कक्षमवलम्बं भवति एवं यज्ञोपवीती भवति। सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंशे प्रतिष्ठापयति सव्यं कक्षमवलम्बं भवति एवं प्राचीनावीती भवति। मनुः,—निवीती कण्ठमज्जने। शिष्टाः पठन्ति,—

यज्ञोपवीते द्वे धार्य्ये श्रौते स्मार्त्ते च[1] कर्म्मणि।
तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते॥

लघुहारीतः,—

जपे होमे तथा दाने स्वाध्याये पितृतर्पणे।
अशून्यन्तु करं कुर्य्यात् सुवर्णरजतैः कुशैः॥

सुवर्णरजतबहुत्वमवयवापेक्षम्। कुशे तु बहुत्वं वाक्यान्तरपर्य्यालोचनया हस्तद्वयाभिप्रायम्। अत्र न सुवर्णमनर्ग्रं धारयेदिति पर्य्युदासादग्रं शुद्धमेव सुवर्णं कर्म्माङ्गम्।

(१) B. D. स्मार्त्ते तु।

कालिकापुराणे,—

कायस्थेन तु हेम्ना च कर्म्म यत्कुरुते नरः।
आचरेत् तस्य तत्पापं वज्रलेपं भविष्यति॥
अनामिकायां तद्धार्य्यं दक्षिणस्य करस्य तु।

तेनानामिकाव्यतिरिक्तस्थाने स्वर्णधारणे दैवात् पापकरणे तस्य गौरवम्। बहुप्रायश्चित्तापनोद्यं भवति। शुभे रौक्मे च कुण्डले इति मनूक्तकुण्डलद्वयधारणम्। न वह्निर्माल्यं धारयेदन्यत्र रुक्ममय्या इति वशिष्ठोक्तस्नातकधर्म्मरुक्ममालाधारणम्। गुरुणानुज्ञातोऽलङ्करणादीनि गृह्णीयात् यथार्थं चैतानि विभृयादिति हारीतोक्तिः पापाचरणकाले परिहार्य्यम्।

अनामिकायाः प्रथमं पर्व्व स्वर्णेन पूरयेत्।

इति वाक्यदर्शनात् प्रथमपर्व्वस्थाने सुवर्णं धार्य्यम्। तथा,—

तर्जनी रूप्यसंयुक्ता हेमयुक्तात्वनामिका।

इति वाक्यात् समाचाराच्च तर्जन्यां रजतधारणम्।

अथ कुशाः। छन्दोगपरिशिष्टे,—

हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञियाः।
समूलाः पितृदैवत्याः कल्माषा वैश्वदेविकाः॥
ह्रस्वाः प्रचरणीयाः स्युः कुशा दीर्घाश्च बर्हिषः।
दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्म्मसु॥

यज्ञिया दर्शादियज्ञार्थाः। बर्हिषि वेद्यास्तरणादिकुशे दीर्घत्वविधिस्तदन्यत्र प्रचरणेऽनुष्ठाने ह्रस्वाः। यतः कर्म्मविशेषे

दर्भविशेषा हरितादयो विहिता अतः सन्ध्यादिकर्म्मसु दर्भमात्रं पवित्रञ्च यथोक्तलक्षणं सन्ध्याप्रकरणे उक्तम् । तत्र,—

सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः ।

इत्यभिधानात् तथाविधकुशमात्रं ग्राह्यमित्यर्थः । आदिपदेन यज्ञपाकयज्ञपित्र्यव्यतिरिक्तानि कर्म्माणि । ह्रस्वत्वन्तु सन्ध्यादावपि । वर्हिःकार्य्यव्यतिरिक्तानुष्ठानरूपत्वात्[1] । ह्रस्वत्वमरत्निन्यूनत्वम् । दीर्घत्वं तदधिकत्वम् ।

गोकर्णदीर्घहरिताः श्राद्धे साग्राः समूलकाः ।

इति वायुपुराणात् श्राद्धे गोकर्णमात्रत्वह्रस्वत्वम्[2] । अत्र पर्व्व प्रतिलुनातीति श्रुतेः पित्र्यव्यतिरिक्ते सनाभिदलग्रहणम् । पित्र्येऽप्युपमूले छेदितं भवतीति पिण्डपितृयज्ञे महापितृयज्ञे च श्रुतेर्वाजसनेयिनां मूलसमीपे च्छिन्नस्य ग्रहणम् । यत् समूलं तत् पितॄणामिति तैत्तिरीयश्रुतिमूलं छन्दोगपरिशिष्टीयं शाखान्तरविषयम् । गृह्यपरिशिष्टम्[3],—

दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः ।
अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥
ये तु पिण्डास्तृता दर्भा यैः कृतं पितृतर्पणम् ।
अमेध्याशुचिलिप्ता ये तेषां त्यागो विधीयते ॥

लघुहारीतः,—

(१) B. ० स्वरूपत्वात् ।
(२) D. E. F. गोकर्णमात्रत्वं ह्रस्वत्वम् ।
(३) B. D. गृह्यपरिशिष्टीयम् ।

चितौ दर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु ।
स्तरणासनपिण्डेषु षट् कुशान् परिवर्जयेत् ॥
मूत्रोच्छिष्टौ[1] हता ये च तेषां त्यागो विधीयते ।

शिष्टाः पठन्ति,—

वल्मीकोदकछायासु भूमिदग्धाश्च ये कुशाः ।
शूद्रोत्पाटितगोक्षुण्णा आप्लुता श्छेदिता[2] नखैः ॥
ब्रह्मयज्ञे च ये दर्भाः ये दर्भाः पितृकर्म्मणि ।

ते त्याज्या इत्यर्थः । दर्भमात्रस्यायातयामत्वोक्तौ तत्रायमपवादः ।

लघुहारीतः,—

नीवीमध्ये च ये दर्भा ब्रह्मसूत्रे च ये स्थिताः ।
पवित्रांस्तान् विजानीयाद् यथा कायस्तथा कुशाः ॥
[3]अनन्तशयनादूर्द्धं न पठेत् सप्तमं क्रतुम् ।
छेदनं वर्हिरिशानां नारोहेच्चर्म्मपादुके ॥

नकारः काकाक्षिन्यायेन उभयत्रान्वेति । अयं च निषेधः कर्म्मसम्बन्धप्रमाणाभावात् पुरुषार्थः । तेन पुरुषदोषमतिलङ्घ्य छेदने कर्म्मविनियोगे न वैगुण्यम् । मरीचिः,—

मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ।
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ॥

(१) A. C. D. मूत्रोच्छिष्टैः कृता ये च ० ।
(२) A. C. आप्लुताश्छेदिता ० ।
(३) E. F. Add here शिष्टाः पठन्ति,—

नभस्यमावास्या कृष्णादिमासाभिप्रायेणैव। तस्यैव मुख्यत्वात्। तेनानन्तशयनमध्ये तस्याममावास्यायां छेदने न पुरुषदोषः। अत्र छेदिता दर्भा अयातयामा इत्युक्ते अनन्तशयनमध्ये अन्यतिथौ छेदिता यातयामा इत्युक्तं भवति। अन्यथा दर्भमात्रस्यायातयामत्वान्नभस्यामावास्याच्छिन्नेषु अयातयामत्वोक्तिर्व्यर्था स्यात्। न च सामान्यस्य विशेषेणोपसंहारः। लक्षणादोषस्यागतौ स्वीकारात्। तद् यथा दीक्षितः क्रीतराजको[1] भोज्यान्न इत्युक्तम्। पुनश्चाग्निषोमीये संस्थिते यजमानस्य गृहे भोक्तव्यमित्युक्तम्। नानयोरुपसंहारः। किन्तु मध्ये निषेधान्तरकल्पनया व्यवस्थापदआपद् विषयत्वेन। तदुक्तं भट्टैः,—

द्वितीयात्राशनानुज्ञादर्शनादनुमीयते।
भोजनस्य विधिमूल[2]मस्त्वन्योऽप्यान्तरालिकः॥

अथवानन्तशयनमध्ये छेदननिषेधस्यातिक्रमेऽनिष्टफलकल्पनादशायां तत्र छेदितानां यातयामत्वं दोषः कल्प्यते। नभस्यामावास्याच्छिन्नानामयातयामत्वविधानसामर्थ्यात्। अतएवास्मद्देशे चातुर्मास्यच्छिन्नकुशैः सद्य एव कर्म्म कुर्व्वन्ति न दिनान्तरे। तेन [3]सामर्थ्यादिष्टतस्य पवित्रोपग्रहादे र्होमादौ विनियोगेन निरिष्टिकविनियोग इति सिद्धम्। शिष्टाः,—

संग्रहाद् वत्सरं यावच्छुद्धिः स्यादिध्मवर्हिषाम्।
अतःपरं न गृह्णीयाद् यज्ञादौ जपकर्म्मणि॥

(१) C. क्रीतराजको ०। (२) E F. विधिन्यून ०। (३) B. सन्ध्यादिष्टतस्य ०।

छन्दोगपरिशिष्टे—

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥
एतदेव च पिञ्जल्या लक्षणं समुदाहृतम्।

यत्तु,—

चतुर्भिर्दर्भपिञ्जलैर्ब्राह्मणस्य पवित्रकम्।

इति तच्छन्दोगपरिशिष्टविरोधात् प्रामाण्यसन्देहाच्च नादेयम्। एवम्,—

पत्रत्रयेण वा कार्य्यमेकपत्रेण[1] कर्हिचित्।

इति क्वचिल्लिखितमनादेयम्। पराशरः,—

स्नाने दाने जपे होमे दैवे पित्र्ये च कर्म्मणि।
सव्यापसव्यौ कर्त्तव्यौ सपवित्रकरौ[2] द्विजैः॥

शिष्टाः,—

सन्त्यज्य वेष्टरं मार्गं ब्रह्ममार्गविनिर्गतम्।
सकृत्प्रदक्षिणीकृत्य पवित्रमभिधीयते॥
दक्षावर्त्तो भवेद्ब्रह्मा वामावर्त्तस्तु विष्टरः।

इति ग्रन्थिमार्गद्वयम्। तत्र सकृदिति वचनाद्ब्रह्मग्रन्थिरूपता नास्ति। द्विवेष्टने हि ब्रह्मग्रन्थिप्रसिद्धिः; तेन ब्रह्मग्रन्थिव्यतिरिक्तग्रन्थियुक्तपवित्रद्वयं सर्व्वकर्म्माङ्गं कुशवटुरूपम्। यत्तु,—

उभाभ्यामेव पाणिभ्यां विप्रैर्दर्भपवित्रकौ।
धारणीयौ प्रयत्नेन ब्रह्मग्रन्थिसमन्वितौ॥

(१) D. E. F. कार्य्यं नैकपत्रेण ०। (२) D. सपवित्रौ करौ ०।

इति। तत्

ब्रह्मयज्ञे जपे होमे ब्रह्मग्रन्थिर्विधीयते।

इति विधौ कुत्र ब्रह्मग्रन्थिरित्यपेक्षायाम्। हस्तद्वयपवित्रयोर्ब्रह्मग्रन्थिविधिपरमिति न कुशवटुरूपे सर्व्वकर्म्माङ्गपवित्रे ब्रह्मग्रन्थिप्रसङ्गः। एवम्

भोजने वर्त्तुलं प्रोक्तमेवमाचमने स्मृतम्।

इति वटुपरमेव।

ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनं चरेत्।

इति निषेधो ब्रह्मग्रन्थिविषयः।

न भुञ्जीयान्नचाचामेत् ब्रह्मग्रन्थौ करे स्थिते।

इति वचनात् ब्रह्मयज्ञजपाङ्गाचमने ब्रह्मग्रन्थेः प्रधानानुज्ञानादनुज्ञा। शिष्टाः,—

अनामिकायाः प्रथमं पर्व्व स्वर्णेन पूरयेत्।

द्वितीयं दर्भसंयुक्तं कार्य्यं विप्रेण नित्यशः॥

इति मध्यपर्व्वणि कुशधारणं पुरुषार्थं कर्म्माङ्गत्वाविशेषात्। कामनाभेदे तु,—

अग्रपर्व्वस्थिते दर्भे तपःसिद्धिः सदैव हि।

मध्ये चैव प्रजाकामो मूले सर्व्वार्थसाधनम्॥

छन्दोगपरिशिष्टे,—

सव्ये पाणौ कुशान् कृत्वा कुर्य्यादाचमनक्रियाम्।

सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः॥

इदञ्च सन्ध्योपक्रमेऽभिधानात् सन्ध्याङ्गमेव। तत्रायमर्थः।

अन्यत्र [1]सव्यपाणावपि पवित्रकम्। इह तु सन्ध्याकर्म्मणि सव्यपाणौ बहवः कुशाः करणीयाः। आचमनक्रियामिति सन्ध्योपक्रमाचमनानुवादादाचमनादिकां सन्ध्याक्रियामित्यर्थः। तेन दक्षिणकरे कुशनिवृत्तिः। तस्यैव विवरणं सव्यः सोपग्रह इति। उप समीपे गृह्यन्ते मार्जनाद्युपयोगिनः कुशा इत्युपग्रहः। तेन बहुकुशधारणं दृष्टार्थमित्युक्तम्। दक्षिणः सपवित्रक इति तु ग्रन्थियुक्तपवित्रनिवृत्त्यर्थं पुनर्वचनम्। अत्र यद्यपि ब्रह्मयज्ञजपहोमेषु ब्रह्मग्रन्थियुक्तपवित्रस्य विशेषविधिस्तथापि

दर्भः पवित्रमित्युक्तमतः सन्ध्यादिकर्म्मणि।

इत्यत्रादिशब्दोपादानादादिशब्दस्य च प्रकारान्तरेण बुद्धिस्थवाचकत्वाद् बुद्धिस्थस्य च सर्व्वनामवद्विशेषात्मनोपस्थितेः वामहस्तबहुदर्भाः दक्षिणहस्तपवित्रञ्चादिशब्दोक्तेषु जपहोमस्वाध्यायादिषु विहितमिति ब्रह्मग्रन्थियुक्तपवित्रद्वयं पवित्रोपग्रहरूपञ्च तुल्यबलत्वाद् वैकल्पिकमेव। तेन ब्रह्मग्रन्थिं विनापि पवित्रोपग्रहाभ्यां ब्रह्मयज्ञाद्यवैगुण्यम्। केवलं ब्रह्मयज्ञजपहोमव्यतिरिक्तेन ब्रह्मग्रन्थिप्रसङ्गः।

अशून्यन्तु करं कुर्य्यात् सुवर्णरजतैः कुशैः।

इति वचनात् करद्वयकुशधारणस्य कर्म्माङ्गत्वम्। आचमनेऽपि

वामहस्तस्थिते दर्भे दक्षिणेनोदकं पिबेत्।

रक्तापानसमं ज्ञेयं प्रायश्चित्तीयते द्विजः॥

इति व्यासवाक्यं केवलवामहस्तगतकुशनिषेधकम्।

(1) D. सव्ये पाणावपि ०।

उभयत्र स्थिते दर्भे समाचामति यो द्विजः ।
सोमपानसमं ज्ञेयं भुंक्ते यज्ञफलं तथा ॥

इति तस्यैव वचनात्। समाचाराच्च ग्रन्थिरहितकुशधारणं मध्यमानामिकयोः। यत्तु कात्यायनः,—साद्ये हस्तैकसाध्ये कर्म्मणि वेदोपग्रहः। अन्यत्र सोपग्रहः। कुशैरसत्सु। इति असत्सु वेदस्कोरेषु[1] कुशोपग्रहविधिः। स श्रौताग्निहोत्रादिस्मार्त्त-स्थालीपाकादिविषयः। इदं पुरुषार्थमपि कुशधारणम्।

कुशहस्तः सदा तिष्ठेद् ब्राह्मणो दम्भवर्जितः ।

इति वचनात्। तथा मनुः धारयेदित्यनुवृत्तौ,—

यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले ।

अत्र वेदः कुशमुष्टिः। अत्र ब्रह्मयज्ञादाविन्द्रियोपस्पर्शनं दर्भैरित्याद्युपयोगार्थम्। तेन वामहस्ते कुशमुष्टिः पुरुषार्थधारणे।

तिलकधारणम् ।

स्नातश्च वर्णकं हृद्यं नित्यं कुर्य्याद् विशांपते ।
प्रियङ्गुचन्दनाभ्यां वा बिल्वेन तगरेण वा ॥

तथा—

अशुचिर्वाप्यनाचारः पापं वा यदि चिन्तयेत् ।
शुचिरेव भवेन्नित्यमूर्द्ध्वपुण्ड्राङ्कितो नरः ॥

(१). E. F. वेदस्फोरेषु।

तथाच शौचसम्पादकत्वेन सर्व्वकर्म्माङ्गत्वम्। फलवत्त्वात् पुरुषार्थत्वञ्च।

यच्छरीरं मनुष्याणामूर्द्ध्वपुण्ड्रविवर्जितम् ।
द्रष्टव्यं नैव यत्[1] किञ्चित् श्मशानसदृशं हि तत् ॥
ऊर्द्ध्वपुण्ड्राङ्कितो नित्यं ब्रह्मलोके महीयते ।

आपस्तम्बः,—द्वादशाङ्गुलदीर्घं दशाङ्गुलदीर्घं वा षड़ङ्गुल-विस्तृतं[2] मत्स्याकृति कूर्म्माकृति वा। एतच्च फलातिशयार्थम्। सामान्यतस्तु

उत्तमो मध्यमो हीनश्चतुस्त्रिद्व्यङ्गुलैः क्रमात् ।
वर्त्तिदीपाकृतिं वापि वेणुपत्राकृतिं तथा ॥
पद्मस्य मुकुलाकारं कुमुदस्योत्पलस्य च ।

अथवा—

ललाटे दण्डवत् कुर्य्यात् हृदये कमलाकृतिम् ।
वेणुपत्राकृतिं बाह्वोः कुर्य्यादन्यत्र दीपवत् ॥

इत्याकाराणि।

ललाटे केशवं विद्यान्नारायणमथोदरे ।
माधवं हृदये चैव गोविन्दं कण्ठकूपके ॥
[3]हृदये दक्षिणे पार्श्वे विष्णवे नम उच्यते ।
[4]तद्वत्पार्श्वे बाहुमूले स्मरेद् वै मधुसूदनम् ॥

---

(१) A. C. तत् ०।
(२) A. C. विस्तरम्।
(३) D. उदरे दक्षिणे ०।
(४) B. D. तत्पार्श्वे बाहुमूले तु स्मरेद् ०।

त्रिविक्रमं कण्ठपार्श्वे वामे कुक्षौ च[1] वामनम्।
श्रीधरं बाहुके वामे हृषीकेशन्तु कण्ठके॥
पृष्ठतः पद्मनाभं तु दामोदरं ककुद्यपि।
लक्ष्मीं वक्षस्थले देवीं वासुदेवञ्च मूर्द्धनि॥
नामानि द्वादशैतानि नमस्कारयुतानि च।
प्रयुञ्जीत हरिं ध्यात्वा वासुदेवेति मूर्द्धनि॥

इत्येवं विहितस्थानमन्त्राणि। अत्र गङ्गामृत्तिकाद्येव तिलक-द्रव्यम्। महाभारते,—

जाह्नवीतीरसम्भूतां मृदं मूर्द्ध्नि बिभर्त्ति यः।
बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम्॥

विष्णुधर्म्मे,—

तुलसीकाष्ठसम्भूतचन्दनेन विलेपनम्।

तथा—

चन्दनं धूपशेषञ्च सर्व्वपापापहारकः[2]।

इति। एतदपि तिलकरूपत्वेऽप्यविरोधात् तिलकार्थे ग्राह्यम्। स्मृत्यन्तरे,—

चन्दनेन मृदा वापि कुर्य्यात् पञ्च ललामकम्।
ललाटकण्ठहृद्बाह्वोः सर्व्वकल्मषनाशनम्॥
ललाटे वासुदेवाख्यं कण्ठे विष्णुमथाव्ययम्।
प्रद्युम्नञ्चानिरुद्धञ्च बाह्वो र्हृदि तथाच्युतम्॥

(१) B. ० कुक्षौ तु ०।
(२) A. C. D. ० हारकम्। E. F. सर्व्वरोगापहारकः।

तथा,—

गङ्गातीरमृदा चैव स्नात्वा कुर्य्याल्ललामकम्।
ललाटे वासुदेवाख्यं कण्ठे श्रीपुरुषोत्तमम्॥
नाभौ नारायणं स्मृत्वा सर्व्वपापैः प्रमुच्यते।

तत्र तिलकद्रव्ये द्वारवतीमृत्तिकारूपे फलविशेषः। कर्म्मणि फलातिशयश्च[1]। तथाच स्कन्दपुराणे,—

यो धारयेद् द्वारवतीसमुद्भवां
सदा पवित्रां कलिकल्मषापहाम्।
नित्यं ललाटे हरिमन्त्रसंयुतां
यमं न पश्येद् यदि पापसंयुतः॥
ग्रहा न हिंसन्ति न रक्षसां गणाः
यक्षाः पिशाचोरगभूतदानवाः।
यस्यान्तकाले खग गोपिचन्दनं
बाह्वो ललाटे हृदि मस्तके च॥
प्रयाति लोकं कमलालयाप्रभोः
स बालघाती यदि ब्रह्महा नरः।
यो मृत्तिकां द्वारवतीसमुद्भवां
करे समादाय ललाटपट्टके।
करोति नित्यं तनुशुद्धिहेतोः
क्रियाफलं कोटिगुणं लभेत सः॥

(१) D. कर्म्मफलातिशयश्च।

क्रियाविहीनं यदि मन्त्रवर्जितं
श्रद्धाविहीनं यदि भक्तिवर्जितम् ।
कृत्वा ललाटे यदि गोपिचन्दनं
करोति तत्कर्म्म सदाक्षयं बुधाः ॥

तुलसीप्रक्रमे,[1]—

तन्मृदा रचितं पुण्ड्रं ललाटे सर्व्वसिद्धिदम् ।
मुमुक्षुस्तु सदा कुर्य्यात् प्रदेशिन्या यथाक्रमम् ॥

इति वचनात्

सर्व्वान् कामानभिलषन् सदानामिकया बुधः ।

इति वाक्यदर्शनात् प्रदेशिन्यानामिकया वा ग्रहणम् ।

[2]नारायणायुधैर्युक्तं कृत्वात्मानं कलौ युगे ।
कुरुते पुण्यकर्म्माणि मेरुतुल्यानि तानि तु ॥
चक्राङ्किततनुर्भूत्वा यः श्राद्धं कुरुते नरः ।
तत्सर्व्वं प्रतिगृह्णाति गयायान्तु गदाधरः ॥

इति वचनात् सर्व्वकर्म्मानुष्ठाने फलातिशयार्थं शङ्खचक्रादिधारणमङ्गभूतम् । वचनान्तरात् पुरुषार्थञ्च । तथाच स्मरन्ति,—

नारायणायुधैर्नित्यं भूषितो यस्य विग्रहः ।
पापकोटिप्रयुक्तस्य तस्य किं कुरुते यमः ॥

यत्तु निषेधवचनं पठन्ति,—

एकजातिरयं धर्म्मो न द्विजातेः कथञ्चन ।

(१) D. Adds here. स्कान्दपुराणे,—

(२) D. Adds here. एवम्,—And E. F. पद्मपुराणे.—

इति ।

उपवीतादिवद्धार्य्याः शङ्खचक्रादयः सदा ।
ब्राह्मणस्य विशेषेण वैष्णवस्य च तद्भवेत् ॥
चक्राङ्किततनुर्विप्रो भुङ्क्ते यस्य च वेश्मनि ।
तदन्नं स्वयमश्नाति पितृभिः सह केशवः ॥

इति वचनाद् ब्राह्मणव्यतिरिक्तद्विजातेः क्षत्रियवैश्ययोर्निषेधः । तेनैकजातेः शूद्रस्य ब्राह्मणस्य च चक्रादिधारणं विहितं न क्षत्रियवैश्ययोः । तयोरपि विहितप्रतिषेधाद् विकल्पः ।

एतैर्भागवतैश्चिह्नैः कलिकाले द्विजातयः ।

इति लिखनात्[1] । तल्लिखनञ्च[2] ।

विलिखेद् देवचिह्नानि तुलसीगोपिकामृदा ।

इति वचनात् तुलसीमृदा गोपीचन्दनेन वा । यच्च,—

[3][शङ्खं चक्रञ्च यः कुर्य्यान्मृदा कार्ष्णायसेन च ।
स शूद्रवद् वहिष्कार्य्यः सर्व्वस्माद् द्विजकर्म्मणः ॥

तत्रापि कार्ष्णायससाहचर्य्यान्मृत्पदमपि विम्बपरम् । तेन कृत्वा काष्ठमयं विम्बमिति विहितकाष्ठमयविम्बाभावे प्रतिनिधित्वेन प्राप्तयोर्मृन्मयलोहविम्बयोर्निषेधः । तेन ताम्रादिना प्रतिनिधित्वेन करणे न दोषः । तेन,—

दक्षिणे तु करे विप्रो विभृयाद् वै सुदर्शनम् ।
सव्ये शङ्खञ्च विभृयादेवं ब्रह्मविदो विदुः ॥

(१) A. C. D. इति लिङ्गात् । (३) D. Omits the portion bracketed.

(२) A. तल्लिङ्गनञ्च ।

शङ्खोपरि कृते पद्मे प्रत्यहं दक्षिणे करे ।
वामे गदाधरश्चक्री वासुदेवः स्वयं भवेत् ॥

इति वचनादुभयत्रोभयं धार्य्यं न च विकल्पः । [1]ऐकार्थाज्ञानात् । तथा,—

सर्व्वाङ्गं चिह्नितं यस्य नारायणकरायुधैः ।]
वैष्णवत्वं कृतं तस्य पापं न प्रविशेद्‌ हृदि ॥

इति वचनात् सर्व्वाङ्गे ग्राह्यम् ।

अत्र मन्त्रः ।

पाञ्चजन्य निजध्वानध्वस्तपातकसञ्चय ।
त्राहि मां पापिनं घोरं संसारार्णवपातिनम् ॥
सुदर्शन निज[2]ज्योतिर्ध्वस्तपातकसञ्चय ।
अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय ॥
संसारभयभीतानां योगिनामभयङ्करः ।
पद्महस्तेन यो देवो योगेशस्तं नमाम्यहम् ॥

पद्ममन्त्रः ।

ब्रह्माण्डभुवनारम्भमूलस्तम्भगदाधर[3] ।
कौमोदकी करे यस्य तं नमामि गदाधरम् ॥

गदामन्त्रः ।[4]

(१) B. एकार्थां ० ।
(२) A. B. C. द्योतध्वस्त ० ।
(३) B. C. गदाधरः ।
(४) A. C. गदाधरमन्त्रः ।

[1]कृष्णमुद्राधारणम् ।

कृष्णनामाङ्किता मुद्रा अष्टाक्षरसमन्विता ।
शङ्खाद्यैरायुधैर्युक्ता स्वर्णरौप्यमयी तथा ॥
यस्य पुंसः करे नित्यं तत्समो नास्ति वैष्णवः ।
कृष्णमुद्राप्रयुक्तश्च करोति पितृदैवतम् ।
[2]नित्यं नैमित्तिकं काम्यं सर्व्वं भवति चाक्षयम् ॥

[इति वचनात् पुरुषार्थं कर्म्माङ्गञ्च ।][3]

अथ रुद्राक्षधारणम् ।

रुद्राक्षं धारयेन्नित्यं सन्ध्यादिषु च कर्म्मसु ।
अरुद्राक्षधरो भूत्वा यद्‌ यत् कर्म्म च वैदिकम् ॥
करोति जपहोमादि तत् सर्व्वं निष्फलं भवेत् ।

इति वचनात् सर्व्ववैदिककर्म्माङ्गं रुद्राक्षधारणम् । पुरुषार्थञ्च संयोगपृथक्त्वात् । तथाच शिष्टाः,—

पुण्यानां परमं पुण्यं पवित्रं पापनाशनम् ।
रुद्राक्षधारणं श्रेष्ठमिहलोके परत्र च ॥
मूर्खो वाप्यन्त्यजातो वा युक्तो वा सर्व्वपातकैः ।
रुद्राक्षं धारयेद्‌ यस्तु स रुद्रो नात्र संशयः ॥

(१) A. B. C. कृष्णमुद्रा ।
(२) A. C. नित्यं नैमित्ति काम्यं यत् सर्व्वं ० ।
(३) A. B. C. Omit the portion bracketed.

धारणस्थानञ्च ।

हस्ते बाहौ तथा कण्ठे मूर्द्ध्नि रुद्राक्षधारणात् ।
अबध्यः सर्व्वभूतानां रुद्रवद् विचरेद् भुवि ॥
सर्व्वपापविनिर्मुक्तः [1]स याति परमां गतिम् ।
यज्ञोपवीतस्थाने च विप्राणां धारणं हितम् ।
दशकोटिगुणं पुण्यं धारणाल्लभते जपे ॥

तत्र विप्राणां यज्ञोपवीतस्थाने धारणं जपाश्रयम् । [तच्च][2] दशकोटिगुणफलरूपकाम्यफलार्थम् । तेन पुरुषार्थधारणे कर्म्मान्तराङ्गधारणे जपेऽप्युक्तकामनां विना धारणे न यज्ञोपवीतस्थाननियमः । तत्र विशेषः,—

यावत् षोड़शवक्त्रान्तमेकवक्त्रादितः स्थिताः ।
दुर्लभस्त्वेकवक्त्रस्तु तथैकादश षोड़श ॥
त्रिचतुःपञ्च[3]मुखाः सुलभाः शेषाश्च मध्यमाः ।
एकवक्त्रः शिवः साक्षाद् ब्रह्महत्यां व्यपोहति ।
भक्तरन्धनकाले तु स्थाल्यूर्द्ध्वं स्थाप्यते यदि ।
अग्निस्तम्भस्तदा नूनमेकवक्त्रस्य लक्षणम् ॥
स्रोतसि प्रतिस्रोतश्च स च याति मुहुर्मुहुः ।
स च यावच्छरीरस्थस्तावन्मृत्युर्न बाधते ॥
द्विवक्त्रो गोबधं हन्यात् त्रिवक्त्रः स्त्रीबधं तथा ।
चतुर्वक्त्रो नरबधं मोचयेन्नात्र संशयः ॥

---

(१) B. D. स गच्छति परां गतिम् । (३) B. ० वक्त्राः । C. मुख्याः ।
(२) A. C. Omit the portion bracketed.

अगम्यागमनञ्चैव अभक्ष्यस्य च भक्षणम् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥
[1]षड्वक्त्रं कार्त्तिके यस्तु धारयेद् दक्षिणे करे ।
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥
सप्तवक्त्रमैश्वर्य्यदं महापातकनाशनम् ।
जीवेद् वर्षशतं साष्टमष्टवक्त्रस्य धारणात् ॥
नश्यन्ति सर्व्वपापानि न विघ्नः कुत्रचिद् भवेत् ।
नववक्त्रं वामबाहौ धारणान्मुक्तिदं मतम् ॥
लक्षकोटिसहस्रञ्च ब्रह्महत्यां करोति यः ।
तत्सर्व्वं दहते शीघ्रं दशवक्त्रस्य धारणात् ॥
तथैकादशवक्त्रस्य शिखायामेव धारणात् ।
सर्व्वं दुष्टाश्च नश्यन्ति वाजिमेधसहस्रजम्[2] ॥
तथा द्वादशवक्त्रस्य कण्ठदेशे च धारणात् ।
नचैवाग्निभयं तस्य न च व्याधिः प्रवर्त्तते ॥
गोमेधफलसौभाग्ये[3] हिंसापापक्षयस्तथा ।
तत्त्रयोदशवक्त्रस्य कण्ठदेशे च धारणात् ॥
सर्व्वकामफलावाप्तिः सर्व्वपापक्षयस्तथा ।
वक्त्रं चतुर्द्दशं यस्य पुण्येन प्राप्यते यदि ॥

---

(१) A. B. C. षड्वक्त्रः कार्त्तिके यस्तु धारणाद् ० ।
(२) B. D. सहस्रकम् ।
(३) B. ० सौभाग्यं ।

धारयेत् सततं मूर्द्ध्नि सर्व्वपापप्रणाशनम्।
अमन्त्रधारणादेषां गुणा एते प्रकीर्त्तिताः॥
समन्त्रं धारयेद् यस्तु फलं वक्तुं न शक्यते।

एवञ्चामन्त्रधारणेऽप्युक्तफलसिद्धिः। फलवाक्ये [सर्व्वकामदश्च][1] मन्त्रसम्बन्धाश्रवणेनामन्त्रधारणफलवाक्यस्य स्तुतित्वायोगात्।

यत्तु,—

विना मन्त्रेण यो धत्ते स याति नरकं ध्रुवम्।

इति तत्समन्त्रकविधिप्ररोचनार्थममन्त्रकनिन्दारूपमेव। उदितहोमप्रशंसार्थमनुदितनिन्दा यथा।

प्रातः प्रातरनृतं ते वदन्ति
पुरोदयाज्जुह्वति येऽग्निहोत्रम्।

इति। तदुक्तं नहि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते[2] अपि तर्हि स्तुत्यं स्तोतुम्।

अमन्त्रधारणेऽपि प्रतिष्ठा कार्य्या। साचैवम्,—

पञ्चामृतं पञ्चगव्यमघोरञ्च तथा मनुः।
एतैः प्रतिष्ठा रुद्राक्षे धारयेत्तु जपेच्च तान्[3]॥

अघोरमन्त्रेण पञ्चामृतपञ्चगव्याभ्यां स्नापन[4]पूर्व्वकं धारयेत्। जपेऽक्षमालां वा कुर्य्यादित्यर्थः।

(१) B. D. Omit the portion bracketed. (३) C. जपे च तान्।
(२) C. प्रवर्त्तन्ते ०। (४) A. B. C. D. स्नान ०।

समन्त्रधारणे उक्तप्रतिष्ठानन्तरं मन्त्रेण धारणम्। मन्त्रः,— ॐ ह्रं क्रीं। क्रः ह्रं लं गं माक्रा यो ल मां च मां ईं ॐ क्रीं। श्रीं वीं श्रीं हं श्रीं क्रीं। श्रीं हां ह्रं क्रीं। क्ष्टं क्ष्टं। श्रीं ह्रं श्रीं श्रीं। श्रीं ह्रं श्रीं च्लीं श्रीं क्रीं। वा हुं सं नमः। श्रीं ऐं श्रीं श्रीं श्रीं क्रीं श्रीं हं श्रीं क्ष्टं। ॐ वं श्रीं ह्रं श्रीं स्वः। श्रीं च्रीं। श्रीं श्रीं श्रीं चं। इति मन्त्रान् प्रत्येकमष्टोत्तरशतं तदर्द्धं वा जप्त्वा धारयेत्। तथा,—

रुद्राक्षान् कण्ठदेशे दशनपरिमितान् मस्तके विंशती द्वे
षट् षट् कर्णोपकण्ठे करयुगलगतान् द्वादशद्वादशैव।
बाह्वोरिन्दोः कलाभिः पृथगभिगदिता ह्येकमेकं शिखायां
वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः॥

पद्माक्षधारणम्।

तदपि कर्म्माङ्गं पुरुषार्थञ्च। तथाच शिष्टाः,—

पद्माक्षं धारयेद् यस्तु[1] विशेषेण जपादिषु।
अश्वमेधफलं प्राप्य विष्णुलोके महीयते॥

ये शङ्खचक्रपरिचिह्नितबाहुमूलाः
कण्ठावलम्बिसरसीरुहबीजमालाः।
ये वा ललाटफलको[2]ल्लसदूर्द्ध्वपुण्ड्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति॥

(१) D. नित्यं ०। (२) A. C. ० पट्टको ०।

इति वचनात्कण्ठे धारणं कर्म्माङ्गं फलार्थञ्च ।

अथ धात्रीफलधारणम् ।

धात्रीफलकृतां मालां कण्ठे वहति मानवः ।
सोऽश्वमेधायुतं पुण्यं यामे यामे लभेन्नरः ॥

इति वचनात् फलार्थमेव ।

अथ तुलसीकाष्ठधारणम्[१] ।

तत्र शिष्टाः,—

तुलसीकाष्ठमालया भूषितः पुण्यमाचरन् ।
पितॄणां देवतानाञ्च कृतं कोटिगुणं भवेत् ॥

इति वचनाद् यत्र क्वापि धारणं कर्म्माङ्गम् । शिरसि बाह्वी च धारणं फलार्थम् ।

तुलसीकाष्ठसम्भूतं शीर्षे बाह्वी च भूषणम् ।
वहति यस्तु वै मर्त्त्यो देहे तस्य सदा हरिः ॥

इति वचनात् । [२]तच्च विष्णवे समर्प्य धार्य्यम् ।

निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो नित्यं तस्य वै नास्ति पातकम् ॥

तथा—

(१) B. D. ग्रहणम् ।
(२) B. ततः ।

तुलसीकाष्ठमालान्तु कण्ठे लग्नां वहेत्तु यः ।
अशुचिर्वाप्यनाचारो[१] मामेवैति न संशयः ॥

स्कान्दपुराणे,—

तुलसीकाष्ठसम्भूता माला धार्य्या सदा मया[२] ।

इति चन्द्रशर्म्मणा प्रतिज्ञानाद् वैष्णवेनावश्यं धार्य्या । अधारणे च दोषः,—

धारयन्ति न ये मालां तुलसीकाष्ठसम्भवाम् ।
नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना हरेः ॥

अथ विष्णुनिर्म्माल्यधारणम् ।

तदपि धर्म्माचरणे फलातिशयार्थम् । [स्कान्दे,—][३]

यः कृत्वा तुलसीपत्रं शिरसा विष्णुतत्परः ।
करोति धर्म्मकर्म्माणि[४] फलमाप्नोति चाक्षयम् ॥

इति वचनात् । पुरुषार्थञ्च फलश्रवणात् ।

विष्णुमूर्द्ध्नि स्थितं पुष्पं शिरसा यो वहेन्नरः ।
अपर्य्युषितपापः स्याद् यावद् युगचतुष्टयम् ॥
विष्णोरङ्गात् परिभ्रष्टं मालतीकुसुमं[५] खग ।
यो धारयति शिरसा सर्व्वधर्म्मफलं लभेत् ॥

(१) C. ० प्यनाचान्तो ० ।
(२) A. B. D. मया सदा ।
(३) A. C. Omit the portion bracketed.
(४) A. B. D. ० कार्य्याणि ० ।
(५) D. तुलसीकुसुमं ० ।

यस्य नाभिस्थितं पत्रं मुखे शिरसि कर्णयोः ।
तुलसीसम्भवं नित्यं तीर्थैस्तस्य मखैश्च किम् ॥
तुलसीदलमालान्तु कृष्णोत्तीर्णां वहेत्तु यः ।
पत्रे पत्रेऽश्वमेधानां दशानां लभते फलम् ॥
अहोरात्रस्थितं यस्य पत्रं तुलसीसम्भवम् ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥

इति वचनादहोरात्रधारणे मूत्रपुरीषादिकालेऽपि धार्य्यम् ।

द्रोणाब्जपत्रश्रीवृक्षपत्रं मूर्द्ध्नि न धारयेत् ।
न च जिघ्रेन्नचाक्रामेत् तद्वीजं न च भक्षयेत् ॥

स्कान्दे,—

निर्म्माल्यं शिरसा धार्य्यं त्वदीयं सादरं मया ।

इति वैष्णवप्रतिज्ञालिखनात् तेनावश्यं धार्य्यम् ।

शिखाबन्धनम् ।

विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ।

इति कात्यायनवचनात् शिखाबन्धनं कर्म्माङ्गम् । अतएव कात्यायनः स्नाने बद्धशिखीत्यनुवादः । एवञ्च सति

गङ्गायां भास्करक्षेत्रे मातापित्रोर्मृतेऽहनि ।
मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः ॥

इति यन्मुण्डनविधानं तत्रापि शिखावर्जनमेव मुण्डनम् ।

अतएव कात्यायनः केशश्मश्रू वपते वाशिखमिति शिखां वर्जयित्वा केशश्मश्रुवपनस्य दर्शाङ्गत्वमाह । सर्व्वदेशेष्वित्थमेव समाचारः ।

यत्र तु यते र्ब्रह्मचारिणो मुण्डनं शिखा वेति विकल्पश्रवणं तत्र पक्षे तदभावात् कर्म्मसु तदीयेषु बद्धशिखत्वं पक्षे नाङ्गम् ।

एवं नीचकेशनखश्मश्रुः तथा कॢप्तकेशनखश्मश्रुरिति मनुयाज्ञवल्क्योक्तेः अमूढ़श्मश्रुर्नाकस्मादिति च स्मृतेः स्नातकधर्म्मत्वेन केशनीचत्वार्थं वपने कर्त्तव्ये शिखावर्जितमेव[1] कर्त्तव्यम् ।

ननु संवत्सरं ब्रह्मचर्य्यमवपनञ्च केशान्त इति पारस्करेण यावज्जीवमवपनमुक्तं केशान्तादूर्द्ध्वं कथमन्तरा क्षौरम् । मैवम् । संवत्सरपदस्य ब्रह्मचर्य्यवदवपनेऽपि सम्बन्धात् । अतएव द्वादशरात्रं षड्रात्रं त्रिरात्रमन्तत इत्यादावपि ब्रह्मचर्य्यावपनयोरपि[2] सम्बन्धः । तेनावपने यावज्जीवपदाध्याहारे मानाभावः । आपस्तम्बः[3]—न समावृत्तो वापयेदन्यत्र विहाराद् वापयेदित्येक इति विकल्पमाह । कॢप्तकेशनखश्मश्रुरित्यत्र मेधातिथिना कल्पनं छेदनमिति व्याख्याय तच्च न नियमतः किन्तु स्नानादिसौकर्य्यार्थमतएव शुचिरित्युक्तम् । एवञ्च दीर्घकेशत्वेऽपि स्नानसहिष्णोर्न वपननियम इति व्याख्यातम् । दानधर्म्मे,—

केशश्मश्रूधारयतामग्र्या भवति सन्ततिः ।

इत्यभिधानादवपनं काम्यम् । अतएव ज्योतिःशास्त्रे नित्य-

---

(१) B. ० वर्जनमेव ० ।
(२) D. ० वपनयोर्द्वयोः ।
(३) B. D. आपस्तम्बस्तु ।

क्षौरेऽनुकूलविधानम् । धर्म्मशास्त्रे च तिथिविशेषे क्षौरनिषेधः । कर्म्माङ्गेष्वप्यसम्भवात् पुरुषार्थप्राप्तक्षौरविषयः । पैठीनसिः,—न पर्व्वसु तैलं क्षौरं मैथुनं मांसमित्युपेयात् । वृद्धशातातपः,—

षष्ठ्यष्टमी अमावास्या उभे पक्षे चतुर्द्दशी ।
अत्र सन्निहितं पापं तैले मांसे क्षुरे भगे ॥

वामनपुराणे,—क्षौरं रिक्तासु वर्जयेत्[1] । तथा [क्षौरं शुक्रे वर्ज्यमित्यर्थः । तथा,—][2]

क्षौरं विशाखास्वभिजित्सु वर्ज्यम् ।
देवकार्य्ये पितृश्राद्धे रवेरंशपरिक्षये ।
क्षुरकर्म्म न कुर्व्वीत जन्ममासे च जन्मभे ॥

न चैवमादिषु विशेषनिषेधो दोषातिशयार्थः । दोषातिशयकल्पनाया अदृष्टकल्पनात्वेन तदपेक्षया पारस्करवाक्ये अवपनविधौ संवत्सरपदसम्बन्धकल्पनाया एव लघुत्वात् । तद् यथा नामार्थाख्यातार्थयोः फलपदान्वयविचारे नामार्थस्य फलान्वये धात्वर्थस्य नामार्थं प्रति दृष्टोपकाराभावेनादृष्टद्वारा तदुपकारकत्वप्रसङ्ग इत्यदृष्टान्तरकल्पनाभिया धात्वर्थस्य फलान्वयो नामार्थस्तु धात्वर्थं निवर्त्तयन् तदुपकारक इति कल्प्यते । तदुक्तम्,—

बह्वदृष्टप्रसङ्गाद्धि धर्म्मो नेष्टः पदे पदे ।
नाम्नः फलेन सम्बन्धे परिहारो न तस्य च ॥

(१) A. C. क्षौरञ्च रिक्तासु परिवर्जयेत् ।
(२) B. D. Omit the portion bracketed.

इति । एवमिह । बौधायनः,—कर्म्मयुक्तो नाभेरधः स्पर्शनं वर्जयेत् । करेणेत्यर्थः । योगियाज्ञवल्क्यः —

रौद्रपैत्रासुरान् मन्त्रान् तथा चैवाभिचारिकान् ।
व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेत् ॥

छन्दोगपरिशिष्टे,—

पित्र्यमन्त्रानुद्रवणे आत्मालम्भे अवेक्षणे ।
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥
मार्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसम्भवे ।
निमित्तेष्वेषु सर्व्वेषु कर्म्म कुर्व्वन्नपः स्पृशेत् ॥

पित्र्यमन्त्रानुद्रवणे पित्र्यमन्त्रोच्चारणे । आत्मालम्भः आत्माधिष्ठानहृदयालम्भो यज्ञादौ । अवेक्षणं हृदयस्यैव । आक्रुष्टे परुषभाषणे । योगियाज्ञवल्क्यः,—

यदि वाग्यमलोपः स्याद् व्रतादिषु कथञ्चन ।
व्याहरेद् वैष्णवं मन्त्रं स्मरेद् वा विष्णुमव्ययम् ॥

तथा,—

न कुर्य्यात् कस्यचित् पीड़ां कर्म्मणा मनसा गिरा ।
आचरन्नभिषेकन्तु कर्म्माण्यन्यान्यथाचरन् ॥

वायुपुराणे,—

दानं प्रतिग्रहो होमो भोजनं बलिरेव च ।
साङ्गुष्ठेन सदा कार्य्यमसुरेभ्योऽन्यथा भवेत् ॥

साङ्गुष्ठेन अङ्गुलिसहिताङ्गुष्ठेन ।

एतान्येव च कार्य्याणि दानादीनि विशेषतः ।
अन्तर्जानु विशेषेण तद्वदाचमनं नृप ॥

अन्तर्जानु जानुनोर्मध्ये यथा बाहू भवतः । बौधायनः,—

भोजनं हवनं दानमुपहारः प्रतिग्रहः ।
बहिर्जानु न कार्य्याणि तद्वदाचमनं स्मृतम् ॥

शाट्यायनः,—

दानमाचमनं होमं भोजनं देवतार्च्चनम् ।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायपितृकर्म्मणी[1] ॥
आसनारूढ़पादस्तु जान्वोर्वा जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते ॥

मार्कण्डेयपुराणे,—

सूर्य्योदयं विना नैव स्नानदानादिकाः क्रियाः ।
अग्नेर्विहरणञ्चैव कृत्लभावस्य लक्ष्यते ॥

अत्र सूर्य्योदयपदेन उषःकालो लक्ष्यते । तं विना रात्रौ स्नानदानादिकं न कार्य्यमिति लक्ष्मीधरः । वस्तुतः सूर्य्योदयप्राक्कालीनप्रभातकृत्ये विशेषविहितेतरकर्म्मसु[2]

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।

(१) B. ० पितृतर्पणे ।
(२) B. विशेषविहितप्रभातकृत्येतरकर्म्मसु ० । D. ० सूर्य्योदयप्राक्कालीनविशेषविहितप्रभातकृत्येतरकर्म्मसु ।

इति नाधिकार इति सूर्य्योदयपदेनोषःकाललक्षणाबीजं प्रयोजनं च न दृश्यते[1] । अङ्गिराः,—

सन्ध्ययोरुभयोर्जप्ये भोजने दन्तधावने ।
पितृकार्य्ये च दैवे च तथा मूत्रपुरीषयोः ॥
गुरूणां सन्निधौ दाने योगे चैव विशेषतः ।
एषु मौनं समातिष्ठन् स्वर्गमाप्नोति मानवः ॥

भविष्यपुराणे,—

सम्यक्संसाधनं कर्म्म कर्त्तव्यमधिकारिणा ।
निष्कामेन सदा पार्थ काम्यं कामान्वितेन तु ॥
आचारयुक्तः श्रद्धावान् देशिकोऽध्यात्मवित्तमः ।
कर्म्मणां फलमाप्नोति न्यायार्जितधनश्च यः ॥

सम्यक्संसाधनं यथाविहितसाधनम् । अधिकारिणा प्रत्यवायपरिहारार्थिना । निष्कामेन स्वर्गपश्वादिकाम्यानभिलाषुकेण । अध्यात्मवित्तमः परलोकफलभागिन्यात्मनि दृढ़प्रत्ययवान् । योगियाज्ञवल्क्यः,—

ॐकारो व्याहृतयो गायत्री सशिरास्तथा ।
वैदिकञ्च तथा ब्रह्म अव्लिङ्गान्यघमर्षणम् ॥
प्राणायामस्तथा सन्ध्या मार्जनान्तर्जलं जपः ।
सर्व्वमेवहि कर्त्तव्यं ब्राह्मणे र्ब्रह्मचिन्तकैः ॥

वैदिकञ्च तथा ब्रह्मेत्यन्यदपि यद् ब्रह्मप्रतिपादकं मन्त्र-

(१) B. D. प्रयोजनं च दृश्यते ।

वाक्यम् । अत्रोङ्कारादिपदेन तत्साध्यं कर्म्म लक्ष्यते । तेन सर्व्वकर्म्मणां ब्रह्मचिन्ताङ्गत्वेन विधानं सायुज्यफलाय ।

विधिदृष्टन्तु यत्कर्म्म करोत्यविधिना तु यः ।
फलं न किञ्चिदाप्नोति क्लेशमात्रं हि तस्य तत् ॥

छन्दोगानुक्रमण्याम्,—छन्दोदैवतमार्षञ्च विज्ञाय यत्किञ्चिज्जपहोमादिकं करोति तस्य फलमश्नुते । तथा कर्म्मारम्भे मन्त्राणां देवता वेदितव्या । योगियाज्ञवल्क्यः,—

आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥
अविदित्वा तु यः कुर्य्याद् याजनाध्यापनं जपम् ।
होममन्तर्जलादीनि तस्य चाल्पफलं भवेत् ॥
आपद्यते स्थाणुगतिं स्वयञ्चापि प्रमीयते ।
यातयामानि छन्दांसि भवन्त्यल्पफलानि च ॥

तेन छन्दोदेवतार्षविनियोगमात्रज्ञाने सम्पूर्णं फलं तदज्ञानेऽल्पफलं नतु फलानुत्पत्तिः । स्थाणुगतेरापत्तिः प्रमीतत्वञ्चार्थवादमात्रकम् । यत्तु ऋष्यादिस्मरणकाले शिरसि मुखे हृदये च हस्तन्यासं कुर्व्वन्ति तत्समाचारमूलकम् ।

ऋषि र्गुरुत्वात् शिरसैव धार्य्य-
श्छन्दोऽक्षरत्वाद् रसनागतं स्यात् ।
धियावगन्तव्यतया सदैव
हृदि प्रदिष्टा मनुदेवता तु ॥

इति प्रपञ्चसारवाक्यं प्रस्थानान्तरत्वेऽपि समाचारादेवाद्रियत इत्याहुः । यत्तु तत्रैव

यस्तु जानाति तत्वेन आर्षं छन्दश्च दैवतम् ।
विनियोगं ब्राह्मणञ्च मन्त्रार्थज्ञानमेव च ॥

इति ब्राह्मणमन्त्रार्थज्ञानयोरपि ज्ञानमुपयोगित्वेनोक्तं तत्

श्रियञ्च लभते सोऽत्र धर्म्ममायुश्च विन्दति ।
दिव्यं वर्षसहस्रन्तु स्वस्थाने ऋषिभिः सह ॥
सन्तिष्ठते तु तैः सार्द्धं तत्तुल्यश्चैव जायते ।

इति फलविशेषार्थमेव यद्यपि ऋष्यादिज्ञानं [1]क्रियारूपफलसाधनाय नाश्रयमपेक्षते । तदुक्तं

आत्मनो ह्यक्रियारूपैर्गुणैराश्रियते क्रिया ।

इति । तथापि

एवं पञ्चविधं योगं जप्यकाले ह्यनुस्मरेत् ।
होमे चान्तर्जले योगे स्वाध्याये याजने व्रते[2] ॥

इति फलार्थस्यापि ऋष्यादिपञ्चयोगज्ञानस्य जप्यादिकाल एव कालः । तद् यथा यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीतेति क्रियारूपस्यापि सौभरस्य फलसाधनायाश्रयानपेक्षणेऽपि वाक्योपात्तसोमाङ्गस्तुतिकालीनस्य फलसाधनत्वम् । तत्र

येन यदृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै ।
मन्त्रेण तस्य तत् प्रोक्तमृषेर्भावस्तदार्षकम् ॥

(१) B. D. क्रियाफलसाधनाश्रयमेवापद्यते । (२) B. D. ० तथा ।

छन्दोगायत्र्यादिरक्षरन्यासः[1]। यं मन्त्रः प्रधानेन वदति सा देवता। विनियोगस्तु,—

पुराकल्पे समुत्पन्ना मन्त्राः कर्म्मार्थं एव च।
अनेनेदन्तु कर्त्तव्यं विनियोगः स उच्यते[2] ॥

इति वचनात् प्रस्तुते श्रौते स्मार्त्ते वा कर्म्मणि विनियोगः। न च पुराकल्प इति वचनात् श्रौतविनियोगस्यैव स्मार्त्तेऽपि स्मरणं स्मार्त्तविनियोगस्यापि पुराकल्पे समुत्पन्नत्वादनादित्वाविशेषात्। यत्तु तत्रैव वचनम्,—

अश्वमेधावभृथे विनियोगोऽस्य कथ्यते।

इति तदुदाहरणमात्रप्रदर्शनपरम्। न हि दृष्टे सत्यदृष्टकल्पना। अन्ये तु,—सन्ध्योपक्रमे तैत्तिरीयश्रुतिगतगायत्र्यार्थादिकथने उपनयने [3]विनियोगकथनात् श्रौतविनियोग एव विनियोग इत्याहुः।

निरुक्तं यत्तु मन्त्रस्य समुत्पत्तिप्रयोजनम्।
अधिष्ठानं श्रुतिश्चैव ब्राह्मणञ्चाभिधीयते ॥

निरुक्तं निर्वचनम्। अधिष्ठानं आश्रयः। एतत् प्रत्येकयुक्तं वाक्यं ब्राह्मणम्। एतज्ज्ञानमदृष्टार्थद्वारा मन्त्रार्थज्ञानलिङ्गादेव कर्म्माङ्गम्। योगियाज्ञवल्क्यवचनस्यान्यपरत्वेऽपि

अविदित्वा तु मन्त्रार्थं यत् किञ्चित् कर्म्म नाचरेत्।

(१) A. विन्यासः।

(२) A. C. ० विनियोगस्तु उच्यते।

(३) B. D. विनियोग इति वचनात् श्रौतविनियोगपदेन उच्यते इत्याहुः।

इति स्मृत्यन्तरात्।

न च श्रौतकर्म्मस्वेव मन्त्राधिकरणोक्तनीत्यामन्त्रार्थज्ञानोपयोगो न स्मार्त्तकर्म्मस्विति वाच्यम्। तल्लिङ्गैरर्च्चयेन्मन्त्रैरित्यादौ तल्लिङ्गपदादिवैयर्थ्यापत्तेः। यथाकथञ्चित् दृष्टसम्भवेऽदृष्टकल्पनानुपपत्तेः। विनियोगबलेनाव्यक्तलिङ्गानामिषेत्वेत्यादिना छिनद्मीत्यादिपदाध्याहारकल्पनेन दृष्टार्थत्ववत्। ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र गौण्याहृत्यार्थपरत्ववच्च। स्मार्त्तकर्म्मस्वपि यथाकथञ्चित् कर्म्मस्मारकत्वं सर्व्वतः कल्पनीयम्। शन्नोदेवीरित्यस्य शनिपूजायां विनियोगे शनेरस्मारकत्वेऽपि पूजाफलशान्तिप्रकाशकत्वेन कर्म्मस्मारकत्वसम्भवात्। तेन मन्त्रार्थज्ञाने वैगुण्यं स्यादेव। यच्च याज्ञिकाः पठन्ति,—

खाते लूने तथा च्छिन्ने सान्नाय्ये मार्त्तिके तथा।
पश्चान्मन्त्राः प्रयोक्तव्या मन्त्रा यज्ञार्थसाधकाः ॥

इति। नैतावता मन्त्राणामदृष्टार्थता किन्तु दृष्टार्थानां क्रियाणां खननादीनां कार्य्यस्य पूर्व्वनिर्वृत्तत्वेऽपि[1] कियदप्यंशमसिद्धं कर्त्तुमिदानीं क्रिया। तत्र मन्त्रस्य दृष्टार्थतैव। क्रियायाश्च सिद्धेऽपि कार्य्ये नियमादृष्टसिद्ध्यर्थं पुनरनुष्ठानमिति।

हारीतः,—आचमनहोमतर्पणानि प्राजापत्येन कुर्य्यात्। मार्जनार्च्चनबलिकर्म्मभोजनानि दैवेन। पित्र्यञ्च पित्र्येण। प्रतिग्रहमाग्नेयेन प्रतिगृह्णीयात्।

(१) D. पूर्व्ववृत्तत्वेऽपि ०।

कमण्डलूपस्पर्शनं दधिप्राशनमेव वा ।
सोमतीर्थेन राजेन्द्र सदा कुर्य्याद् विचक्षणः ॥

मार्कण्डेयपुराणे,—

नान्दीमुखानां कुर्व्वीत प्राज्ञः पिण्डोदकक्रियाम् ।
प्राजापत्येन तीर्थेन यच्च किञ्चित् प्रजापतेः ॥

मनुः,—

ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ॥

ब्राह्मे,—लाजादिहवनं सोमतीर्थेन विहितम् । बीजवपनं चयनादौ च । याज्ञवल्क्यः,—

कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य यत् ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥

हारीतः,—अङ्गुष्ठस्योत्तरे रेखा ब्राह्मं तीर्थम् । कनिष्ठिकायाः पश्चात् प्राजापत्यम् । अग्रेऽङ्गुलीनां दैवम् । अङ्गुष्ठप्रदेशिन्यो-[१]रन्तरा पित्र्यम् । मध्ये आग्नेयम् । [मध्ये पाणिमध्ये ।][२] अङ्गुल्यग्रेषु मानुषम् ।

अङ्गुष्ठमूले च तथा प्राजापत्यं प्रकीर्त्तितम् ।

योगियाज्ञवल्क्यः,—मध्ये सौम्यं प्रतिष्ठितम् । बौधायनः,—अङ्गुलीमूलं दैवमङ्गुल्यग्रमार्षम् । एवं कनिष्ठिकामूलस्य प्राजापत्यकायदैवसंज्ञा । हस्तमध्यस्याग्नेयसौम्यब्रह्मतीर्थसंज्ञा । अङ्गु-

(१) A. C. रन्तरा ० ।
(२) B. Omits the portion bracketed.

ल्यग्रस्य दैवमानुष्यार्षसंज्ञा । तर्जन्यङ्गुष्ठमध्यस्य पितृतीर्थसंज्ञे-त्युक्तम् । छन्दोगपरिशिष्टे,—

अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्म्मकारिणाम् ।
अक्रिया च परोक्ता च तृतीया चान्यथाक्रिया ॥
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु[१] यः ।
कर्त्तुमिच्छति दुर्म्मेधा मोघं[२]तस्य तु चेष्टितम् ॥
यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मसु ॥

परोक्ता परशाखोक्ता । अन्यथाक्रिया विहितेतरप्रकारेणा-नुष्ठानम् । परशाखोक्ताकरणे शाखान्तराधिकरणविरोधमाशङ्क्योक्तं स्वशाखाश्रयमुत्सृज्येति । तेन स्वशाखोक्तसम्भवे तद्विरोधि परशाखोक्तं न ग्राह्यम् । तस्यैव व्याख्या यन्नाम्नातमित्यादिना । यद्यपि शाखान्तराधिकरणे स्वशाखाविहितमङ्गं परशाखाविहितञ्च तुल्यबलमेवोक्तम् । तथाच उदितहोमे प्रायश्चित्तविधाने विरोध-माशङ्क्य प्रायश्चित्तं विधानेन[३] प्रक्रमाङ्गाद् विनियोगेन इति सूत्राभ्यां येनानुदिते होष्यामीति[४]प्रक्रान्तं तेनोदये सति प्रायश्चित्तं कर्त्तव्यम् । न त्वनुदितहोमिनामुदयकालो नाङ्गमित्युक्तम् । तथा न चैकं प्रतिशिष्यत इत्यत्र न च यत् काठके अग्निहोत्राङ्गं तत् काठकीयमग्निहोत्रे प्रतिशिष्यते किन्तु तैत्तिरीयस्यापीत्युक्तम् ।

(१) D. ० यञ्च ० ।
(२) D. तत् तस्य चेष्टितम् ।
(३) A B. निमित्तेन ।
(४) B प्रकारान्तरेणोदये सति ० ।

तथापि न्यायतस्तावदेवमेव। केवलं परशाखागतकर्म्मनिषेधवचनस्य निरवकाशत्वात्। [1]स्वशाखानुष्ठानसम्भवे [[2]परशाखाश्रितं नानुष्ठेयम्। अनुदितहोमानुष्ठानसम्भवे] उदितहोमो नानुष्ठेयः। तदसम्भवमालोच्योदिते होष्यामीति प्रक्रम्योदितहोमेऽपि वाजसनेयिनां न च कर्म्मवैगुण्यम्। अतएव बलाबलाधिकरणे स्वशाखाश्रयेण परशाखाश्रयं बाध्यत इति यदुक्तं तदपि मुख्यानुकल्पपरमेव। स्वशाखाश्रयसम्भवे परशाखाश्रयं न कर्त्तव्यमित्यर्थः। यथाग्निषोमीयस्य पशोरतिदेशेनान्वाहार्य्यदक्षिणा यद्यप्यङ्गं तथापि [3]सोमदक्षिणया प्रसङ्गसिद्धेरननुष्ठानमेव। परशाखाश्रितस्याङ्गत्वेऽपि स्वशाखाश्रितसम्भवे नानुष्ठानम्। यद्यप्येकशतमध्वर्य्युशाखानां सहस्रं सामशाखानामिति तावतां ज्ञानाभावे कथं कर्म्मानुष्ठानमिति भाति तथापि कल्पाध्ययनस्यापि विहितत्वात् तस्य दृष्टद्वारकल्पने परशाखागताङ्गोपसंहारस्वशाखागतसन्देहनिवृत्तिपरत्वात्। कल्पसूत्रेषु यावदङ्गमुपनिबद्धं तावतापि कर्म्मसादुगुण्यम्। तथा वाजसनेयिपञ्चदशशाखोपसंहारेण कात्यायनसूत्रं [4]तदुक्ताङ्गानुष्ठानेन काण्वमाध्यन्दिनादिवाजसनेयिनां कर्म्मसादुगुण्यम्। यजुःशाखान्तरे तैत्तिरीयादौ श्रुतमप्यङ्गं त्याज्यम्। शाखान्तरन्यायः पञ्चदशशाखाविषयः। यद्वा तैत्तिरीयागतमप्यङ्गं सति सम्भवे क्रियमाणं फलातिशयार्थं

(१) B. स्वशाखाश्रयानुष्ठान०।

(२) B. D. Omit the portion bracketed.

(३) B. सोमदक्षिणायां प्रसङ्गसिद्धेरनुष्ठानमेव०:

(४) D. तदुक्तानुष्ठानेन०।

शाखान्तरन्यायप्रयोजनम्। अतएव कात्यायनेन भक्षेहिमेवेति वा यथालिङ्गमिति तैत्तिरीयभक्ष्यमन्त्रो वैकल्पिकत्वेन [1]सोमभक्षणे दर्शितः। यत्तु काण्वश्रुतौ वैकङ्कतीस्रुवाः कथिताः कात्यायनेन शाखान्तरानुसाराद् वारुणाद्धोमसंयुक्तानीति वारुणी कथिता। तथा दीक्षायामदीक्षिष्टाऽयं ब्राह्मण इति काण्वश्रुतौ कात्यायनेन दीक्षितोऽयं ब्राह्मण इत्युच्चैस्त्रिर्जपेदिति मन्त्रान्तरमुक्तम्। तथाविधेषु मुख्यत्वात् स्वशाखाश्रयं कर्त्तुमुचितं कल्पसूत्रस्य वाजसनेयिशाखान्तरे सावकाशत्वादिति प्रतिभाति। तदुत्सृज्य सूत्रोक्तकरणे च शाखान्तरीयस्यानुकल्परूपत्वान्मुख्यासम्भवे चानुकल्पस्यापि कार्य्यत्वात् स्यादेव फलम्। कथं मुख्यासम्भवे इति चेत्—इत्थम्,—किं स्वशाखागतत्वात् कल्पोक्तत्यागेन श्रुत्युक्तं कार्य्यं किं वा

वेदार्थो यः स्वयं ज्ञातस्तत्राज्ञानं भवेदपि।
ऋषिभिर्निश्चिते तत्र का शङ्का स्यान्मनीषिणाम्॥

इत्यादिव्यासवचनरीत्या स्वशाखागतस्य कल्पानुपसंहृतत्वेन निर्विचिकित्स्यमज्ञानान्न कार्य्यं वेति सन्देहेन स्वशाखोक्ते मुख्ये करणासामर्थ्यमस्त्वेवेति स्यादेव फलम्। यस्य तु निर्विचिकित्स्यः [2]श्रुत्युक्तेन कर्त्तव्यतानिश्चयो व्यासवचनस्य [3]स्तुतिप्रशंसार्थवचनत्वात् न च परम्परानुष्ठानाभिज्ञयाज्ञिकनिवारणप्रतिबन्धोऽस्ति स

(१) B. सोम०।

(२) D. श्रुत्युक्ते।

(३) D. स्तुतिप्रशंसार्थत्वात्।

कुर्य्यादेव वैकङ्कतीं स्रुवां दीक्षायां [चादीक्षितायं] ब्राह्मण इति मन्त्रजपम्। मुख्यानुष्ठानाच्च प्राप्नुयादेव फलम्। यत्तु

येनास्य पितरो याता येन याताः पितामहाः।
तेन गच्छेत् सतां मार्गं तेन गच्छन् तरिष्यति॥

इति मनुवचनं तद् वैकल्पिकेषु समेषु पूर्व्वपरिगृहीतग्रहणविषयं नतु मुख्यानुकल्पविषयम्। श्रुत्यर्थव्याख्यासन्देहेऽन्यतरपक्षपरिग्रहविषयं चेति मेधातिथिना व्याख्यातम्। एवञ्च सति बहुवेदगतन्यायविवेकज्ञो यदब्रवीत्

कात्यायनो न तद् वाच्यमन्याय्यमिति मादृशैः।
वेदादृतेऽपि कुर्व्वन्ति कल्पैः कर्म्माणि याज्ञिकाः॥

इत्यादिवार्त्तिकमप्यनुकल्पाभिप्रायं व्याख्येयम्। स्मृतीनां तु सर्व्वासां सर्व्वं प्रति प्रामाण्यं होलाकाधिकरणे प्रतिपादितम्। तत्र सर्व्वशाखास्वेकाग्निहोत्रवत् किं सर्व्वस्मृतिष्वेकमेव सन्ध्याकर्म्म किं वा भिन्नमिति सन्देहे सर्व्वस्मृतीनां तुल्याध्येतृकत्वेन क्वचित् सन्ध्याकर्म्मोत्पत्तिविधौ स्मृत्यन्तरे तद् विधिवैयर्थ्यान्न च शाखान्तरन्यायः तुल्याध्येतृकतावशात्।

सर्व्वशाखाविधित्वं हि स्थितमध्येतृभेदतः।

इत्युक्तदिशा प्रतिस्मृतिभिन्नमेव कर्म्मेति प्राप्ते अभेदहेतोः प्रत्यभिज्ञानस्य सत्त्वेन क्वचित् कर्म्मानुवादेन गुणविधिरिति। यथा त्रिष्वपि वेदेषु तुल्याध्येतृकेष्वेकमेव ज्योतिष्टोमकर्म्मभूय-

(१) B. Omits the portion bracketed.

स्त्वेनोभयश्रुतीति न्यायात् तथा सर्व्वस्मृतिष्वेकमेव [1]सन्ध्याकर्म्म। तदङ्गानि सर्व्वेभ्यो ज्ञात्वा कार्य्याणि। न चैवं सति सर्व्वस्मृत्यनुसरणं विना सन्ध्याकर्म्माद्यकरणप्रसङ्गः। श्रुत्यर्थोपसंहारे कल्पसूत्रवत् स्मृत्यर्थस्याप्यनुष्ठानाय पूर्व्वपूर्व्वशिष्टनिबन्धानामेवोपसंहारफलानामादरणीयत्वात्। तथाच मनुः,—

दशावरा वा परिषद् यं धर्म्मं परिकल्पयेत्।
त्र्यवरा वापि वृत्तस्थास्तं धर्म्मं न विचालयेत्॥

[2][परिकल्पयेदिति।] अनुष्ठानक्षमनिर्णयविषयं कुर्य्यात्। पर्षल्लक्षणं तत्रैव,—

त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः।
त्रयश्चाश्रमिणः पूर्व्वे पर्षदेषा दशावरा॥

त्रयश्चाश्रमिणः पूर्व्वे वृद्धा ब्रह्मचारिणं विना। ब्रह्मचर्य्याश्रमादूर्द्ध्वमित्यङ्गिरोवचनात्। धर्म्मपाठकः

अनेन धर्म्मशास्त्रज्ञः प्रोच्यते धर्म्मपाठकः।

इत्यङ्गिराः। एवं सति पूर्व्वपूर्व्वधर्म्मशास्त्रनिपुणमहानुभावपर्षद्भिर्यावदङ्गोपेतं नानास्मृतिपर्य्यालोचनया निर्णीतं तदधिकमङ्गञ्चेत् प्रामाणिके स्मृत्यन्तरे संप्रति दृश्यते तदकरणेऽपि न वैगुण्यम्। शाखान्तरन्यायाङ्गत्वादङ्गाधिक्यात् करणे फलातिशयः। एतदेवाभिप्रेत्य भविष्यपुराणे स्मर्य्यते

अदृष्टार्थविकल्पस्तु व्यवस्थासम्भवेऽसति।
स्मृतिशास्त्रविकल्पः स्यादाकाङ्क्षापूरणे सति॥

(१) B. D. सन्ध्यादिकर्म्म। (२) B. Omits the portion bracketed.

व्यवस्थायाः सम्भवः सम्भावना तस्यामसत्यामदृष्टार्थस्य स्मृत्यर्थस्य विकल्पः। तद्यथा

कुर्य्यात् कृताञ्जलिर्वापि ऊर्द्ध्वबाहुरथापि वा।

इति सूर्य्योपस्थाने विकल्पश्रुतावपि सायंप्रातःप्राञ्जलिर्मध्याह्ने ऊर्द्ध्वबाहुरिति वाक्यान्तराद् व्यवस्था। यत्र तु न व्यवस्थासम्भवः अघमर्षणसूक्तं त्रिः सकृद् वा जपेदित्यादौ तत्र यथेच्छविकल्पः। तथा स्मृतिशास्त्रस्याधिकबोधकस्य विकल्पः स्यात् पूर्व्वस्मृत्या क्रियमाणस्य कर्म्मण आकाङ्क्षापूरणे सति। यथा योगियाज्ञवल्क्यस्यानुसारेण सन्ध्याकर्म्मणि क्रियमाणे शङ्खस्मृतेर्मार्जनानन्तरं

व्याहृतीः कीर्त्तयेदेवं तथैवाक्षरमव्ययम्।

इति व्याहृतित्रयप्रणवजपविधानम्। न हि प्रणवव्याहृतिजपं प्रत्याकाङ्क्षास्ति मानाभावात्। आकाङ्क्षायान्त्वपूर्णायां स्मृत्यन्तरोक्तं नित्यवदनुष्ठेयम्। तद् यथा योगियाज्ञवल्कीये

प्राणस्यायमनं कृत्वा आचामेत् प्रयतोऽपि सन्।

इति याज्ञवल्क्येन सन्ध्याप्राणायामानन्तरमाचमनमात्रमुक्तं न तत्र मन्त्रः। अस्ति चाचमनस्य जलसाध्यस्य स्मारकमन्त्राकाङ्क्षा तेन शङ्खस्मृतौ

उपस्पृशेत् ततः पश्चान्मन्त्रेणानेन मन्त्रवित्।

इति अन्तश्चरसीत्यादि मन्त्रविधानं साकाङ्क्षत्वान्नित्यवदेव ग्राह्यम्। एवमन्यत्र कल्पनीयम्।

उपनयनादिगृह्योक्तकर्म्मविषये तु गृह्यपरिशिष्टम्,—

बह्वल्पं वा स्वगृह्योक्तं यस्य यावत् प्रकीर्त्तितम्।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतो भवेत्॥

गृह्योक्तानामपि स्थालीपाकादीनां शाखान्तरन्यायेन सर्व्वोपसंहारः। कपालं भगालमिति ब्रूयादित्यादिस्नातकव्रतानां होलाकाधिकरणन्यायेन सर्व्वसाधारणत्वान्नैतद्वाक्यविषयत्वं परिशेषात्।

यच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत्।
तच्छाखाध्ययनं कुर्य्यात्

इति स्मृतेः संस्काराणां स्वशाखाध्ययनाङ्गत्वादितरशाखासंस्कारं परिगृह्यान्तरगताङ्गस्यानङ्गत्वादेव नापेक्षा। तेन न्यायमूलमेवेदं वचनं [1][विकल्पं वेत्युपनयनादिकर्म्मविषयम्।] छन्दोगपरिशिष्टे,—

प्रवृत्तमन्यथा कुर्य्याद् यदि [2]मोहात् कथञ्चन।
यत्रैतदन्यथा जातं तदारभ्य समापयेत्[3]॥
समाप्ते यदि जानीयान्मयैतदन्यथाकृतम्।
तावदेव पुनः कुर्य्यान्नावृत्तिः सर्व्वकर्म्मणः॥
प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः।
तदङ्गस्याक्रियायान्तु नावृत्ति र्न च तत्क्रिया॥

(१) B. D. Omit the portion bracketed.

(२) A. C. होमादि किञ्चन।

(३) C. समाचरेत्।

अन्यथा [1]मन्त्रक्रमाद्यन्यत्वम्। क्रियायाः करणे सत्येव। प्रधानस्याक्रिया अकरणम्। अत्रापि समाप्त इति सम्बन्धः। कर्म्ममध्ये प्रधानाकरणे तावन्मात्रं कृत्वा तदुदीच्यङ्गप्रभृतिकरणं न पूर्व्वाङ्गावृत्तिः। तदपि क्रमान्यत्वादन्यथाकरणरूपमेव। समाप्तौ तु प्रधानाकरणज्ञाने साङ्गप्रधानस्य पुनः करणमित्यर्थः। अङ्गाकरणं समाप्तौ ज्ञातं चेन्नावृत्ति र्न च तत्क्रिया किन्तु प्रायश्चित्तमित्यर्थः। मध्येत्वङ्गाकरणज्ञानमन्यथाकरणमेव। यत्तु शतपथश्रुतौ स यदि मन्येत न्यूनं मे [2]यज्ञमभूदिति प्रजननं म एतत् प्रजनिष्य इत्येव [3]तदुपासीत। अथ यदि मन्येतातिरिक्तं मे यज्ञेऽभूदिति[4] श्रियै म एतदामाश्रीस्तेजसा यशसा ब्रह्मवर्चसेन परिवृतो गमिष्यामीत्येव तदुपासीतेति चोक्त्वान्ते सर्वोह्वैवमेतां यज्ञस्य समृद्धिं वेद सर्व्वसमृद्धेनैवास्य यज्ञेनेष्टं भवति। तेन एतादृशोपासनाविशेषादेव न्यूनादिसमाधानमुपासनाङ्गाश्रयणात् तदुक्तमिति न्यायाद् यावज्जीवम्। भास्कराचार्य्यमतेन संवत्सरं वा। जैमिनिः, उदगयनपूर्व्वपक्षाहःपूर्व्वाह्णेषु दैवानि स्मृतिरूपान्यार्थदर्शनात्। अत्रोपनयनादीन्युदाहरणमिति शवरस्वामी। अत्र दक्षिणायनकृष्णपक्षादिषु विशेषविहितकर्म्मव्यतिरेकेणाविशेषविहितानीति

(१) A. मन्त्रजपाद्यन्यत्वम्।

(२) A. B. D. यज्ञेऽभूदिति ०।

(३) A. तन्मुपासीत C. तन्नुपासीत।

(४) D. Reads here—पशव्यं म एतत् पशुमान् भविष्यामीत्येव तदुपासीताथ यदि मन्येत संकसुकं मे यज्ञेऽभूदिति ०।

सम्बध्यते। वस्तुतो यान्येवोदगयनादिषु विहितानि स्मृत्यन्तरेषु तद्विषयमेवेदम्। तथा इतरेषु तु पित्र्याणि। दक्षिणायनकृष्णपक्षापराह्णेषु काम्यानि पित्र्याणीत्यर्थः। ज्योतिःशास्त्रे,—

तिथिनैकेन दिवसश्चान्द्रमानेन कीर्त्तितः।
अहोरात्रेण चैकेन सावनो दिवसः स्मृतः॥
रविराश्यंशभोगेन सौरो दिवस उच्यते।
चन्द्रनक्षत्रयोगेन नाक्षत्रो दिवसः स्मृतः॥
चतुर्विधैश्च दिवसै र्मासोऽपि स्याच्चतुर्विधः।
सौरः संक्रान्त्यवच्छिन्नः सावनस्त्रिंशता दिनैः॥
चान्द्रो राकान्तदर्शान्तो नाक्षत्रो भान्त उच्यते।
रवेर्द्वादशराशीनां भोगः सौराब्द उच्यते॥
शतानि त्रीणि षष्ठ्यन्तदिवसानां तु सावनः।
त्रिंशत्तिथ्यात्मकैश्चान्द्रो मासै र्द्वादशभि र्भवेत्॥
सप्तविंशतिभै र्भाब्दो मासै र्द्वादशभि र्भवेत्।
बृहस्पतेरेकराशिभोगोऽब्दश्च बृहस्पतेः॥

तथा,—

वेदव्रतवृषोत्सर्गमेखलोद्वाहमङ्गलम्।
सौरमानेन कर्त्तव्यमभिषेकं नवाब्दिकम्॥

अब्दायनन्तु ग्रहचारकर्म्म सौरेण। सत्राणि तु सावनेन। सत्रशब्दोऽत्राहःसंख्यावच्छिन्नयज्ञपरः। अह्नो मुहूर्त्ता यामाः प्रायश्चित्तोपवासाश्च आयुर्दायश्च नृणां गमनागमने च सावनान्मानात्।

शतानन्दः,—

[1][चूड़ार्वाक् मङ्गलं कर्म्म मलमासेऽपि कारयेत् ।]

तेषां सावनमानेन ऋषिभिः परिकीर्त्तितम् ॥

जाते मृतौ चाशौचस्य दिनमात्रे[2] च सावनम् ।

नचत्रव्रतकल्पेषु नाचत्रं मानमिष्यते ॥

षष्टाब्दादिविधानञ्च [3]बार्हस्पत्याह दृश्यते ।

पितामहः,—

आब्दिके पितृकार्य्ये च मासश्चन्द्रमसः स्मृतः ।

तेन सौरसावनविहितं यत् कर्म्म तद्व्यतिरिक्तं यदाब्दिकं वर्षविहितं व्रतपूजादिकं पितृकार्य्यञ्च श्राद्धादिकं चान्द्रमासे कर्त्तव्यमित्यर्थः । तथा यत्तावत्तिथिविशेषविहितमुपजीव्य विहितं यच्चैत्रादिमासपुरस्कारेण विहितं तत्रावश्यं चान्द्रमासादरः । तिथेश्चान्द्रत्वात् । चैत्रादिपदञ्च चान्द्र एव मुख्यम् । लोकप्रसिद्धेः व्याकरणस्मृतेश्च । नचत्रेण युक्तः काल इति विहिताणप्रत्ययेन मघायुक्तां माघीं व्युत्पाद्य साऽस्मिन् पौर्णमासीति विहिताण-प्रत्ययान्तरेण माघो मास इति व्युत्पत्तेः

पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा ।

नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥

इति कोषाच्च । यद्यपि कदाचिन्माघपौर्णमास्यां न मघा-

(१) D. Omits the portion bracketed.

(२) D. दिनमात्रञ्च ० ।

(३) D. बार्हस्पत्याब्द उच्यते ।

योगः कदाचिच्च फल्गुन्यामपि मघायोग इति व्यभिचारस्तथापि मघायोगयोग्यतैव निमित्तम् । योग्यता यद्यप्यन्यत्र तथापीह तावदस्ति । यथोद्भिदादिपदस्य योगरूढ़त्वम् । तदुक्तमर्थापत्ति-वशेन एतद्गतमेवोद्भेदनं निमित्तम् । चान्द्रस्य दर्शान्तत्वेऽपि दर्शान्तचान्द्रो न मघादिशब्दवाच्यः । माघी पौर्णमासी यत्र स माघ इति [1]यो नाम तस्य दर्शान्ते बाधात् । सौरस्य तु [2]माघादि-शब्दवाच्यत्वसमर्थनसाहसं लोकवेदाधिकरणविरोधमपश्यतामतीव भ्रान्तिविजृम्भितम् । यत्तु,—गमेर्डो गच्छतीति गौरितिवत् साधुत्वार्थमनुशासनमिति तदपि मन्दम् ।

यत्रार्थस्य विसंवादः प्रत्यक्षेण प्रतीयते ।

स्वरसंस्कारमात्रार्थात् तत्र व्याकरणस्मृतिः ॥

इति भट्टाः । न चात्रार्थविसंवादः श्रौणादिकेषु हि यथा-कथञ्चिद्व्युत्पादनं स्वरसंस्कारार्थं [3]नार्थपरत्वनियमस्तद्भितेषु [4]सर्व्वे-त्रार्थपरत्वमाश्रितमिति स्वमनीषामात्रेण निराकरणमशक्यमेव । प्रसिद्धयौगिकाहीनप्रोचणीशब्दादिष्वपि व्यभिचारस्य दर्शयितुं शक्यत्वेनायौगिकत्वेऽहीनो वा प्रकरणाद् गौणः । प्रोचणीष्वर्थ-संयोगादित्यधिकरणविरोधः स्यात् । एवञ्च सति श्रुतिस्मृतिषु दर्शान्तचान्द्रे माघादिशब्दयोगो गौण एव यथा कृते शब्दार्थे लोकादवगते व्यक्तौ प्रयोगो वेदेऽपि लाचणिकः । यासौ वैशाखस्य सामावास्या रोहिण्या सम्पद्यत इति श्रुतौ दर्शान्त-

(१) D. योगस्य दर्शान्ते ० ।

(२) D. माघादित्वसमर्थन ० ।

(३) B. नान्यपरत्व ० ।

(४) B. सर्व्वत्रान्यपरत्व ० ।

वैशाख एव रोहिण्यमावास्यायोगाद् वैशाखशब्दो गौणः। एषा वै संवत्सरस्य प्रथमा रात्रिर्या फाल्गुनी पौर्णमासी योत्तरा एषोत्तमा या पूर्व्वेति पूर्व्वायां पौर्णमास्यां मुख्य एव फाल्गुनीशब्दः। ब्रह्मपुराणे कार्त्तिकपौर्णमासीपर्य्यन्तकृत्यमभिधाय

मार्गशीर्षस्य मासस्य प्रारम्भे प्रतिपद्यपि।

नववर्षसमारम्भो देवैः कृतयुगे कृतः॥

इति पौर्णमास एव मुख्यः कथितः। श्रुतिश्च,—चतुर्षु चतुर्षु मासेषु [1]चातुर्मास्य या इति पौर्णमासान्तमासमभिप्रेत्य। एवं "तयर्त्त्वन्ति द्विजोऽध्वरे"रिति मानवे। ऋत्वन्ते चातुर्मास्य विधानं पौर्णमासान्त एव पौर्णमासान्ते मधुश्च माधवश्च वासन्तिको ऋतुरिति श्रुते ऋतुशब्दः।

दयार्थं सर्व्वभूतानां वर्षास्वेकत्र संवसेत्

इति मनुना यतिधर्म्मे वर्षाशब्दोऽपि पौर्णम्यन्ते प्रयुक्तो लक्ष्यते। अश्वमेधप्रकरणे च वसन्त एवाभ्यारभेतेत्युपक्रम्य सा या फाल्गुनी पौर्णमासी भवति तस्यै पुरस्तात् षड़हे वा सप्ताहे वर्त्विजः उपसमापयन्तीति पौर्णमास्यन्ते वसन्तशब्दः प्रयुक्तः। तेन मेषगरविसंक्रान्तिर्मासि यत्र तच्चैत्रम्। एवं वैशाखाद्या वृषादिसंक्रान्तियोगेनेति ब्रह्मगुप्तवचनम्। चैत्रादिपदस्य रूढ़िशक्तिप्रदर्शनपरं न योगनिषेधपरं योगरूढ़ित्वद्योतनाय। सौरपरत्वे संक्रान्तिपदवैयर्थ्यम्। मेषगरवित्वेन सौरत्वात्।

(१) D. चातुर्म्मास्ययाजीति पौर्णमासान्तमभिप्रेत्य।

किञ्च

एकसंज्ञौ यदा मासौ स्यातां संवत्सरे क्वचित्।

आषाढ़स्तु द्विभो मासः।

द्विराषाढ़ः सविज्ञेय इत्यादिनिर्देशाः सौरे न घटन्ते। नहि सौरे मासवृद्धिरस्ति। एवञ्च तपश्च तपस्यश्च शैशिरावृतू। मधुश्च माधवश्च वासन्तिकावृतू। शुक्रश्च शुचिश्च ग्रैष्मावृतू। अथैतदुदगयनं देवानां दिनमिति श्रुतिनिर्द्देशे सौरे तपस्तपस्यादिपदं गौणपरमेव। लोकवेदाधिकरणानुरोधादित्यवधेयम्। यद् वा चान्द्रमासे होता षड़् ऋतून् कल्पयतीति श्रुतेः ऋतोर्विस्तरेण चैतद् वर्षप्रदीपे प्रपञ्चितमस्माभिः। एवञ्च सति

माघकार्त्तिकयोश्चैव चान्द्रमासौ विधीयते।

इति वचने मुख्यत्वात् पौर्णमास्यन्तमासग्रहणम्। माघस्नानादिकं[1] कृष्णादिमासे कार्य्यम्। यत्तु पारस्करः,—

अमावास्यापरिच्छिन्नो मासः स्याद् ब्राह्मणस्य तु।

संक्रान्तिपौर्णमासाभ्यां तथा क्षत्रियवैश्ययोः॥

इति तत्कर्म्मविशेषमासव्यवस्थावचनविरोधादत्र[2] कर्म्मणि दर्शान्तमासविधिः। यथा—

माघासिते पञ्चदशी कदाचि-

दुपैति योगं यदि वारुणेन[3]।

(१) A. C. माघस्नानम्।

(२) A. B. D. ॰ द् यत्र ॰।

(३) A. B. दारुणेन।

इति । शतभिषायुक्तमाघदर्शे श्राद्धविधानं तद् ब्राह्मणस्याधिकारार्थकं[1]मित्यर्थः । एवं सौरे यद् विशेषविहितं क्षत्रियस्य प्रशस्तम् । पौर्णमास्यन्तमासकर्त्तव्यं वैश्यस्याधिकफलदमित्यर्थः । हारीतः,[2]

मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत् ।
तत्रोत्तरोत्तमा ग्राह्या पूर्व्वात् तस्मान्मलिम्लुचः ॥

मासादितिथे वर्षादितिथेश्च द्वैधे यत्कर्म्मारब्धव्यं तत्कर्म्मयुक्तकालस्य दिनद्वये सम्भव इत्यर्थः । वृद्धयाज्ञवल्क्यः,—

कर्म्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्म्माणि कुर्व्वीत ह्रासवृद्धी न कारणम् ॥

तथाच लक्ष्मीधरः,—देवपितृकृत्ययोः पूर्व्वाह्णापराह्णयोर्विहितत्वात् तत्काले विहिततिथ्यादरः । यत्तु वराहपुराणे,—

सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः ।
वर्द्धमानस्य पक्षस्य ह्रासे त्वस्तमुपस्थिते ॥

इति वर्द्धमानस्य पक्षस्येति तिथिवृद्धावित्यर्थः । तेनोदयकालीना तिथिरहोरात्रकार्य्यक्षमेत्यर्थः । एवं यास्तमने तिथिः सा तिथिक्षयेऽहोरात्रकार्य्यक्षमेत्यर्थः । [3]इदञ्चोपवासाद्यहोरात्रसाध्यकर्म्मविषयम् । यत्र तु[4]

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥

(१) B. D. अधिकफलदमित्यर्थः ।
(२) B. D. स्मृति॰ ।
(३) B. D. एवञ्चो॰ ।
(४) A. C. तत्र तु ।

दिनद्वये कर्म्मकालाभावे बोद्धव्यम् । द्वैधन्तु तिथेर्न यथाकथञ्चित् किन्तु त्रिमुहूर्त्तादिरूपत्वेन । पैठीनसिः,—

पक्षद्वयेऽपि तिथय स्तिथिं पूर्व्वां तथोत्तराम् ।
त्रिभिर्मुहूर्त्तै र्विध्यन्ति सामान्योऽयं विधिः स्मृतः ॥

स्कान्दे,—

नागो द्वादशनाड़ीभिर्दिक् पञ्चदशभि स्तथा ।
भूताष्टादशनाड़ीभि र्दूषयत्युत्तरां तिथिम् ॥
चतुर्द्दशी पञ्चदशी दशमी च तथा तिथिः ।
पूर्व्वां तिथिं दूषयति त्रिभिरेव मुहूर्त्तकैः ॥

एकादशीविषये तु निगमे,—

सर्व्वप्रकारवेधोऽयमुपवासस्य दूषकः ।
सार्द्धसप्तमुहूर्त्तैस्तु वेधोऽन्यत्र व्रतान्तरे ॥

शिवरात्रिजन्माष्टमीविषये वेधो वक्ष्यते ।

श्रावण्यां पौर्णमास्यां[1] वा प्रतिपत् षण्मुहूर्त्तकैः ।
विद्धा स्याच्छन्दसां तत्रोपाकर्म्मोत्सर्जनं भवेत् ॥

एवं द्वैधे निर्णयः । निगमः,—

युग्माग्नियुगभूतेषु षण्मुन्योर्वसुरन्ध्रयोः ।
रुद्रेण द्वादशीयुक्ता चतुर्द्दश्या च पूर्णिमा ॥
प्रतिपदाप्यमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद् व्यस्तं महादोषं हन्ति पुण्यं पुराकृतम् ॥

(१) D. ॰प्रौष्ठपद्यां॰ ।

युग्मं द्वितीया । अग्निस्तृतीया । युगं चतुर्थी । भूतं पञ्चमी । षट् षष्ठी । मुनिः सप्तमी । वसुरष्टमी । रन्ध्रं नवमी । रुद्र एकादशी । एषु सप्तयुग्मेषु पूर्व्वतिथिरुत्तरविद्धा ग्राह्या । उत्तरतिथिश्च पूर्व्वविद्धा ग्राह्या । बृहस्पतिः,—

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्द्दशी ।
अमावास्या द्वितीया च ता उपोष्याः परान्विताः ॥

गार्ग्यः,—

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्द्दशी ।
पूर्व्वविद्धा तु कर्त्तव्या परविद्धा न कुत्रचित् ॥

फैठीनसिः,—

पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्त्तव्या साम्मुखी तिथिः ॥

साम्मुखी सायाह्नव्यापिनी । कौर्म्मे,—

नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः ।
कामविद्धो भवेद् विष्णु र्न ग्राह्यास्ते तु वासराः ॥

कामस्त्रयोदशी । विष्णुर्द्वादशी । एतानि चोपवासविषयाणि ।

पूर्व्वविद्धायाम्—

यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्म्मसु ॥

इति देवलवचनात् प्रातःकाले तिथ्यभावेऽप्यारम्भः । अत्र माधवाचार्य्यसंग्रहश्लोकाः,—

सोदयत्रिमुहूर्त्तायां कुर्य्याद् दानं व्रतानि च ।
उभयत्र तथात्वे तु[1] पूर्व्वेद्युस्तदनुष्ठितम्[2] ॥
परत्रैव तथात्वं चेत् पूर्व्वा ग्राह्या तिथिक्षये ।
तिथेः साम्ये च वृद्धौ च गृह्यतां तिथिरुत्तरा ॥
पूर्व्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा ।
सा द्वितीया परोपोष्या पूर्व्वविद्धा ततोऽपरा[3] ॥
रम्भात्तृतीया पूर्व्वा स्यादुत्तरा स्याद् व्रतान्तरे ।
परेऽह्नि नास्ति चेत् पूर्व्वविद्धाप्यस्तु व्रतान्तरे ॥
मुहूर्त्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे ।
शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् ॥
चतुर्थी तु परोपोष्या गणनाथव्रते पुनः ।
मध्याह्नव्यापिनी पूज्या तद्वन्नागचतुर्थ्यपि ॥
परेद्युरेव मध्याह्नव्याप्तौ विघ्नस्य सोत्तरा ।
अन्यथा पूर्व्वविद्धैव [4]मातृयोगप्रशस्तितः ॥
पूर्व्वेद्युरेव तद्व्याप्तौ पूर्व्वा सर्पप्रिया तिथिः ।
नोचेत् सर्पस्य पञ्चम्या योगोऽत्यन्तं प्रशस्यते ॥
सर्व्वत्र पञ्चमी पूर्व्वा ग्राह्या स्कन्दव्रते परा ।
नागविद्धा स्कन्दषष्ठी सा निषिद्धा व्रतान्तरे ॥

---

(१) B. तिथित्वेन ० ।
(२) A. C. ० दनुष्ठितः ।
(३) B. पूर्व्वविद्धां ततोऽपराः ।
(४) A. मातृयोग ० ।

उत्तरस्या अलाभे तु नागविद्धापि गृह्यते।
सप्तमी पूर्व्वविद्धैव व्रतेषु निखिलेष्वपि॥
अलाभे पूर्व्वविद्धायाः परविद्धापि गृह्यताम्।
व्रतमात्रेऽष्टमी कृष्णा पूर्व्वा शुक्लाष्टमी परा॥
दूर्व्वाष्टमी तु शुक्लापि पूर्व्वविद्धा विधीयते।
पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवे॥
नवमी पूर्व्वविद्धैव पक्षयोरुभयोरपि।
कृष्णा पूर्व्वोत्तरा शुक्ला दशम्येवं व्यवस्थिता॥
कलाकाष्ठादि[1]वेधोऽपि ग्राह्य एकादशीव्रते।
अरुणोदयवेधोऽपि[2] वर्ज्यो वैष्णवदीक्षितैः॥
सार्द्धसप्तमुहूर्त्तैस्तु वेधोऽन्यत्र व्रतान्तरे।
द्वादशी पूर्व्वविद्धैव व्रतेषु निखिलेष्वपि॥
शुक्ला त्रयोदशी पूर्व्वा परा कृष्णत्रयोदशी।
अलाभे सापि पूर्व्वैव परानङ्गत्रयोदशी॥
या शुक्ला गृह्यते पूर्व्वा गृह्यतां सा पराह्णिकी।
चतुर्द्दश्युत्तरा शुक्ला पूर्व्वा कृष्णचतुर्द्दशी॥
[3][उदये द्विमुहूर्त्तापि ग्राह्या नक्तव्रते तिथिः।]
शुक्लापि रात्रियुक्ता स्याच्चैत्रश्रावणमासयोः॥

---

(१) D. भेदोऽपि ०।
(२) D. ० वेधोऽत्र ०।
(३) D. Omits the portion bracketed.

शुक्ला सदापि पूर्व्वैव यदि स्यादापराह्णिकी।
पर्व्वप्रतिपदोः सन्धिर्मध्याह्ने वा ततः पुरा॥
अन्वाधानं पूर्व्वदिने यागः सन्धिदिने भवेत्।
ऊर्द्ध्वं मध्याह्नतः सन्धावन्वाधानं च तद्दिने॥
इष्टिं परदिने कुर्य्यादन्यो वाजसनेयिनः।
यस्तु वाजसनेयी स्यात् तस्य सन्धिदिनात् पुरा॥
न क्वाप्यन्वाहितिः किन्तु सदा सन्धिदिने हि सा।
सन्धिश्चेत् सङ्गवादूर्द्ध्वमर्व्वागावर्त्तनाद् रवेः॥
सा पौर्णमासी विज्ञेया सद्यः कालविधौ तिथिः।
वृद्धिः प्रतिपदो यास्ति तदर्द्धं पर्व्वणि क्षिपेत्॥
क्षयस्यार्द्धं तथा हित्वा सन्धिर्निर्णीयतां[1] सदा।
[2]इष्ट्यादि विकृतिः सर्व्वा पर्व्वण्येवेति निश्चयः॥
यस्मिन्नस्तमियाद् भानुस्तन्नक्षत्रमुपोषणम्।
मुख्यं [3]तस्यासम्भवेन ग्रहीतव्यं निशीथयुक्॥
उपवासे यदृक्षं स्यात् तद्धि नक्तैकभक्तयोः।
उदये त्रिमुहूर्त्तस्थं नक्षत्रं व्रतदानयोः॥
दिनद्वये तथात्वे तु पूर्व्वं स्याद् बलवत्तरम्।
श्रवणन्तूत्तरं ग्राह्यमुपाकरणकर्म्मणि॥

---

(१) B. D. निश्चीयतां।
(२) B. इष्ट्यादि विकृतिः ०।
(३) A. तस्याभवेत् तत्र षष्ठी ० C. तस्याभवेत् तस्य षष्ठी ०। D. तस्या-सम्भवे तु ०।

[1]पित्रेऽपि तिथिवत् सर्व्वो नक्षत्रस्य विनिर्णयः ।
पूर्व्वं स्यादुपवासादावुत्तरो व्रतदानयोः॥
करणं यद्दिने तत्तु ग्राह्यं रात्रौ यदा तदा ।
दिनद्वयैकभक्ताभ्यामुपवासः प्रसिध्यति ॥
वारेषु संशयाभावात् ग्रहीतव्यं यथास्थितम् ।

स्कन्दपुराणे,—

तिथीनामेव सर्व्वासामुपवासव्रतादिषु ।
तिथ्यन्ते पारणं कुर्य्यात् विना शिवचतुर्द्दशीम् ॥

[-पूर्व्वविद्धायान्तु[2]]

तिथ्यन्ते चैव भान्ते च पारणं यत्र चोद्यते ।
यामत्रयोर्द्ध्ववर्त्तिन्यां प्रातरेवहि पारणम् ॥

देवलः,—

दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तं न्यूनं ग्रासत्रयेण तु ॥

ब्राह्मे,—

मध्याह्नव्यापिनी ग्राह्या एवभक्तव्रते तिथिः ।

भविष्यपुराणे,—

मुहूर्त्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः ।
नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप ॥

(१) B. पित्र्यऽन्तु ०। D. पित्र्ये तु ०।
(२) B. Omits the portion bracketed.

स्मृत्यन्तरे,—

नक्तं निशायां कुर्व्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्य्यात् तत्सदिवाकरम् ॥

वत्सः,—

प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः ।

स्कान्दे,—

प्रदोषव्यापिनी ग्राह्या दिवा नक्तं विधीयते ।
आत्मनो द्विगुणां छायामतिक्रामति भास्करे ॥

सूर्य्यव्रते विशेषः कौर्म्मे,—

नरस्य द्विगुणां छायामतिक्रामेद् यदा रविः ।
तदा सौरं चरेन्नक्तं न सक्तन्निशि भोजनम् ॥
उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद् रविः ।
युज्यते यत्र निशि वा शशिना सहितं यदा ॥

स्कान्दे,—

तदेवोपवसेदृक्षं यन्निशीथादधो भवेत् ।
उपवासे यथैव स्यात् तथा नक्तैकभक्तयोः ॥

पद्मपुराणे,[1]—

दिवारात्रिव्रतं यत् स्यादेकस्यामेव चेत् तिथौ ।
तस्यामुभययोगिन्यामाचरेच्च व्रतं व्रती ॥

(१) A. C. पुराणे ।

व्यासः,—

एकोद्दिष्टादिवृद्ध्यादौ वृद्धिक्षयादिचोदना ।
द्वितीयादिकयुग्मानां पूज्यता नियमादिषु ॥

[[1]पित्र्ये क्षयवृद्धिप्राधान्येन निर्णयः । दैवे युग्माग्नीत्यादिशास्त्रनिर्णयः । गोभिलः,—

खर्व्वो दर्पो तथा हिंसा त्रिविधं तिथिलक्षणम् ।
खर्व्वदर्पौ परे ग्राह्यौ हिंसा स्यात् पूर्व्वकालिकी ॥

मात्स्ये,—

देवकार्य्याणि पूर्व्वाह्णे मनुष्याणान्तु मध्यमे ।
पितॄणामपराह्णे तु कार्य्याण्येतानि यत्नतः ॥

त्रेधा विभागो नायं पक्षः ।] पञ्चधाविभागं व्यास आह,—

मुहूर्त्तास्तु त्रयः प्रातस्तावानेव तु सङ्गवः ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णश्च तादृशः ॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् सर्व्वकर्म्मबहिष्कृतः ।

त्रिधाविभागोऽमावास्याश्राद्धादौ । प्रत्याब्दिके पञ्चधाविभागः ।
हारितः,—

आमश्राद्धन्तु पूर्व्वाह्णे एकोद्दिष्टन्तु मध्यमे ।
पार्व्वणञ्चापराह्णे तु प्रातर्वृद्धिनिमित्तकम् ॥

मात्स्ये,—

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा ।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥

(१) B. Omits the portion bracketed.

ऊर्द्ध्वं मुहूर्त्तात् कुतपाद् यन्मुहूर्त्तचतुष्टयम् ।
मुहूर्त्तपञ्चकं वापि स्वधाभवनमिष्यते ॥

प्रत्याब्दिकपार्व्वणविषयमिदम् । माधवाचार्य्यव्यवस्था

एकोद्दिष्टे तु मध्याह्ने युक्ता स्यादेकभुक्तिवत्[1] ।
एकदेशे समाव्याप्तौ क्षये पूर्व्वान्यथोत्तरा ॥
कुतपाद्यपराह्णान्तव्याप्तिरब्दिक उत्तमा ।
तदभावेऽपराह्णस्य व्यापिका गृह्यतां तिथिः ॥
क्षये पूर्व्वोत्तरा वृद्धौ व्याप्तिश्चेदपराह्णयोः ।
न ग्राह्यौ तिथिगौ वृद्धिक्षयादूर्द्ध्वं तिथेस्तु तौ ॥
साम्ये तूर्द्ध्वं तिथिर्ग्राह्या परविद्धा च वृद्धिमत् ।
न स्पृशत्यपराह्णौ चेत् पूर्व्वा स्यात् कुतपा वृथा ॥
वैषम्येणैकदेशस्य प्राप्तौ ग्राह्या महत्त्वतः ।
साम्येन चेत् क्षये पूर्व्वा परा स्याद् वृद्धिसाम्ययोः ॥
[2]वृद्धिसाम्यक्षमा ग्राह्या स्तोर्थगा नोर्द्ध्वगा इह ।

दर्शश्राद्धे छन्दोगपरिशिष्टे,—

पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयेंऽशे नातिसन्ध्यासमीपतः ॥

चतुर्द्दश्यष्टमांशे क्षयः । अमावास्याष्टमांशे वृद्ध्यारम्भः ।

(१) B. देकभक्तवत् ।

(२) A. वृद्धिसाम्यक्षया ग्राह्यतिथिनाशोर्द्ध्वगा इह । C. वृद्धिसाम्यक्षया ग्राह्यतिथिना चोर्द्ध्वगा इह । D. वृद्धिसाम्यक्षया ग्राह्यास्तिथिगा नोर्द्ध्वगा इह ।

चतुर्द्दश्यष्टमांश[1]मारभ्याष्टमांशात् पूर्व्वं श्राद्धकालः । मार्गशीर्षामावास्यायां [2][ज्यैष्ठामावास्यायां] चतुर्द्दश्यष्टमांशेन क्षयः । किन्त्वमावास्यायामेव । अधिकमाससंवत्सरे तु तयोरप्यमावास्ययोश्चतुर्द्दश्यष्टमांशे क्षयारम्भः । एवञ्च सति चन्द्रक्षययुक्तापराह्णे श्राद्धम् ।

तदुक्तम्,—

अमावास्यां प्रतीक्षेत तदन्ते वापि निर्वपेत् ।

तदन्ते चतुर्द्दश्यन्ते । तथा—

वर्द्धमानाममावास्यां लक्षयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वापि पितृयज्ञस्ततो भवेत् ॥

चन्द्रक्षयाभावेऽप्युत्तरदिने विशेषवचनात् ।

अथ कर्म्मानर्हकालाः ।

ब्रह्मसिद्धान्ते,—

चान्द्रो मासो ह्यसंक्रान्तो मलमासः प्रकीर्त्तितः ।

ज्योतिःसिद्धान्ते,—

असंक्रान्तमासोऽधिमासः स्फुटः स्यात्
द्विसंक्रान्तमासः क्षयाख्यः कदापि ।

(१) D. ॰मारभ्यामावास्याष्टमांशात् ॰ ।

(२) D. Omits the portion bracketed.

क्षयः कार्त्तिकादित्रये नान्यदा स्यात्
तदा वर्षमध्येऽधिमासद्वयं स्यात् ॥

अधिमासद्वयं—असंक्रान्तमासद्वयम् ।

अत्र माधवीये,—

अधिमासो द्विसंक्रान्तः सोऽन्तर्भवति चोत्तरे ।
असंक्रान्ताविकवर्षे द्वौ चेत् संसर्प आदिमः ॥
क्षयमासो द्विसंक्रान्तः स चांहस्पतिसंज्ञकः ।
क्षयस्त्याज्या विवाहादौ संसर्पांहस्पती उभौ ॥
शुद्धौ श्रौते तथा स्मार्त्ते मलमासो विविच्यते ।
काम्यारम्भं तत्समाप्तिं मलमासे विवर्ज्जयेत् ॥
आरब्धं मलमासात् प्राक् कृच्छ्रं सत्रादिकञ्च यत् ।
तत् समाप्यं सावनस्य मानस्यान्यत्र लङ्घनात् ॥
आरम्भस्य समाप्तेश्च मध्ये स्याच्चेन्मलिम्लुचः ।
प्रवृत्तमखिलं काम्यं तदानुष्ठेयमेव तु ॥
कारीर्य्यादि तु यत् काम्यं तस्यारम्भसमापने ।
कार्य्ये कालविलम्बस्य प्रतीक्षाया असम्भवात् ॥
अनन्यगतिकं नित्यमग्निहोत्रादि न त्यजेत् ।
गत्यन्तरयुतं नित्यं सोमयागादि वर्ज्जयेत् ॥
अगति ग्रहणस्नानं जातेष्टिर्मृतसूतकम्[1] ।
द्वयं [त्रयं] नैमित्तिकं तस्य व्यवस्था नित्यवन्मता ॥

(१) A. B. C. D. ॰ सूतिसूतिका ।

शुद्धमासमृतानां स्यान्मलिने प्रथमाब्दिकम् ॥

मलमासमृतानान्तु मले स्यादाब्दिकान्तरम् ।

बृहस्पतिः,—

बाले वा यदि वा वृद्धे शुक्रे चास्तमुपागते ।

मलमास इवैतानि वर्जयेद्देवदर्शनम् ॥

अत्र मलमास इवैतानि वर्ज्जयेदितिदृष्टान्तोपादानात् मलमासे यावन्निषिद्धं तत्सर्व्वमिह निषिध्यते । सकलकाम्यवर्जनादिकमपि । [तथा][1]

अपूर्व्वदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवे ।

मलमासेऽप्यनावृत्ततीर्थयात्रां विवर्जयेत् ॥

शौनकः,—

स्नानं तीर्थगतं व्रतक्षुरमहादानप्रतिष्ठादिकं

सिंहस्थे विबुधार्चिते न शुभदं कर्त्तुस्तथा सूर्य्यगे ।

विबुधार्चिते बृहस्पतौ । सूर्य्यगे गुर्व्वादित्ये । शातातपः,—

माघ एव यदा माघी सिंहे चैव यदा गुरुः ।

व्रतं क्षौरं तथोद्वाहं गृहकर्म्म च वर्जयेत् ॥

शतानन्दस्तु,—

माघे च माघी यदि पौर्णमासी

तस्यां तिथौ[2] सिंहगते च जीवे ।

(१) A. C. Omit the portion bracketed.

(२) A. B. C. विधौ

नोद्वाहकर्म्मात्र च कामरूपे

समाचरेद् याम्यदिशि प्रशस्तम् ॥

महामाघीं विनैवाह माण्डव्यः सिंहगे गुरौ ।

विवाहवर्जं कर्म्माणि कुर्य्यादिति वचः शृणु ॥

श्रुतिविधव्रतचूड़ानवगृहयज्ञप्रतिष्ठाद्याः[1] ।

रविभवनस्थे जीवे कार्य्या वर्ज्यो विवाहस्तु ॥

कल्पतरौ तु,—[2]

सिंहसंस्थं गुरुं शक्र सर्व्वारम्भेषु वर्जयेत् ।

प्रारब्धञ्च न सिध्येत महाभयकरं भवेत् ॥

पुत्रभ्रातृकलत्राणि हन्यात् शीघ्रं न संशयः ।

कारको व्रजते नाशं सन्तानः क्षीयते चिरात् ॥

देवारामतड़ागेषु प्रपोद्यानगृहेषु च ।

सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्जयेत् ॥

इति प्रतिष्ठादौ मकरबृहस्पतिरपि वर्जनीय उक्तः ।

पुनः शतानन्दः,—

गुरुभार्गवयोरेको यदि स्यादुदितो युवा ।

विवाहवर्ज्यमन्यानि कुर्य्यादित्याह चाङ्गिराः ॥

एतदुक्तं भवेद् यत्र बाले वृद्धेऽस्तगे भृगौ ।

अग्न्याधेयादिकं सर्व्वं वर्जयेन्मलमासवत् ॥

(१) B. ० प्रतिष्ठार्थाः ।

(२) E. F. Add here. देवीपुराणे,—

गुरावस्तं गते वर्ज्याः प्रतिष्ठोद्वाहमेखलाः।
गृहारम्भप्रवेशौ च चूड़ेत्येवं षड़ेव तु॥
अग्न्याधेयादिकं सर्व्वं गुरावस्तं गतेऽपि च।
कुर्व्वीत तन्निषेधोक्तेरभावादिति निश्चितम्॥
रविस्थराशिं सन्त्यज्य[1] उदितः स्याद् युवा[2] गुरुः।
रविराशिसमेतोऽपि कदाचिदुदितो युवा॥

गुर्व्वादित्येऽपि गुरूदये कार्य्यं गृहादीति गम्यते। उत्तर-सौरे,—

गुरोर्मध्यमसंक्रान्तिहीनश्चान्द्रोऽधिवत्सरः।
वर्ज्यानि तत्र यज्ञार्थ[3]-प्रतिष्ठादीनि नाकिनाम्॥
स्फुटसंक्रान्तिहीनश्चेत्कोऽप्याहुरधिमासवत्॥

चान्द्रसंवत्सरमध्ये मध्यगणनया स्फुटगणनया गुरुसञ्चाराभावे इदं बोध्यम्। ज्योतिःशास्त्रे,—

कृत्वातिचारं यदि पूर्व्वराशिं
नायाति मन्त्री विबुधाधिपस्य[4]।
दानं विवाहं व्रतबन्धगेहं
सर्व्वं तदा हन्ति मतं मुनीनाम्॥

शतानन्दः,—जीवस्य पूर्व्वराशिफलप्रदत्वेन कर्म्मानर्हत्वं तत्तु लुप्तसंवत्सरत्वं च नास्तीत्याह,—

(१) B. सन्त्यक्तं।
(२) B. दिवा ०।
(३) B. ० यज्ञार्थ ०।
(४) B. D. वसुधाधिपस्य।

सत्यं विवाहयज्ञादिविषयं वचनं च तत्[1]।
[2]किन्तु नष्टहृतावाप्तौ मनोरथवचः शृणु॥
यथाचारगताः सर्व्वे ग्रहाः स्युः स्वफलप्रदाः।
नष्टप्राप्तौ तु फलदः पूर्व्वराशिगतो गुरुः॥

लुप्तसंवत्सराधिकसंवत्सरमकरबृहस्पतिषु कर्म्मकरणसमाचाराः शिष्टाचारमूलत्वादाद्रियन्ते।

सर्व्वकर्म्माङ्गत्वेन द्रव्यशुद्धिरभिधीयते।

द्रव्यशुद्धिश्च कर्म्माङ्गद्रव्यसंस्कारः प्रक्षालनादिक्रियाजन्योऽदृष्टरूपोऽतिशयः। क्षालनादिक्रिया विधेया। शोधनक्रिया च न कर्म्माङ्गं प्रकरणाद्यभावात्। नचैवमाधानवत्। स्वकृतशोधन-जन्याया एव शुद्धेः कर्म्माङ्गत्वप्रसङ्गः। आदधीतेत्यात्मनेपदवदिह नियामकाभावात्। न च शास्त्रफलं प्रयोक्तरीतिनीत्या विधेश्च स्वगामिफलत्वावगमात् परकृतशुद्धेर्न कर्म्माङ्गत्वम्। विधिवशाद्धि कर्त्तुः स्वकीयं फलम्। तच्चेहापि। परद्रव्यशोधनकर्त्तुर्दासस्य द्रव्यशुद्धिरूपं फलं स्वस्य[3] वेतनलाभोपयोगित्वात् स्वकीयमेव। मेधातिथिस्तु नात्र शोधनक्रियाविधिर्विध्यश्रवणात् किन्तु [4]सव्या-पसव्यविभागवत् सरस्वतीविनशनप्लक्षप्रस्रवणादिदेश[5]विभागकथन-

(१) E. F. ० यत्।
(२) A. B. C. किञ्चित् ०।
(३) B. D. तस्य ०।
(४) A. B. C. शब्दापशब्दविभाग ०।
(५) B. वेग ०।

वत् कर्म्मापेक्षितत्वात् सिद्धार्थकथनमप्येतत् प्रमाणम् । शुद्धेः कर्म्म कुर्य्यादित्युक्ते न ज्ञायते के शुद्धा इति तत्रैवमुपतिष्ठते भस्मनाद्भिर्मृदा चैव शुद्धिरित्यादि ।

भूशुद्धिः ।

देवलः,—

यत्र प्रसूयते नारी म्रियते दह्यतेऽपि वा ।
चाण्डालाध्युषितं यच्च यत्र विष्ठादिसङ्गतिः ॥
एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्त्तिता ।
श्वशूकरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत् ॥
अङ्गारतुषकेशास्थिभस्माद्यैर्मलिना भवेत् ।

एवं शोध्या भूमिस्त्रिधा । तत्र शुद्धिमाह । यत्र मनुष्या दह्यन्ते यच्च चाण्डालैरध्युषितं तयोर्दहनकालक्षेपगोक्रमणसेकोल्लेखैः शुद्धिः । यत्र मनुष्या जायन्ते वा म्रियन्ते यत्रात्यन्तविष्ठादिसङ्गतिः तासां दाहवर्जितैस्तैरेव शुद्धिः । श्वशूकरखरैश्चिरमध्युषिताया गोक्रमणसेकोल्लेखैस्त्रिभिः । उष्ट्रग्रामकुक्कुटादिभिश्चिरमध्युषितायाः सेकोल्लेखाभ्यां शुद्धिः । सेकश्चोदकेन गोमूत्रेण वेति मेधातिथिः । अङ्गारतुषादिभिश्चिरमध्युषिताया उल्लेखनेन । मार्जनानुलेपने सर्व्वत्र समुच्चीयेते । याज्ञवल्क्यः,—गृहं मार्जनलेपनात् । पृथगुपादानात् प्रत्यहं तयोः क्रियेति विज्ञानेश्वरः । स्मृत्यन्तरे,—अतिशयोपघाते तक्षणं सूर्य्यरश्म्यनुप्रवेशोऽग्निज्वाला-

दर्शनमिति मेधातिथिः । बौधायनः,—अनेकोद्धार्य्ये दारुशैले भूमिसमे इष्टकाश्च सङ्कीर्णीकृताः । अनेकैरेव पुरुषैरुत्तोलयितुं यद्-दारुणि वा शिलायां शक्तिरित्यर्थः । मनुः,—

ग्रामाद् दण्डशतं त्यक्त्वा नगराच्च चतुर्गुणम् ।
भूमिः सर्व्वत्र शुद्धा स्याद् यत्र लेपो न दृश्यते ॥

शिष्टाः,—

ब्राह्मणावसथे भूमिर्गवां गोष्ठे च या भवेत् ।
मेध्या वै सर्व्वदा भूमिर्देवागारे तथैव च ॥

अत्र देवागारशुद्धत्वोक्त्या सुधालिप्तस्यापि शुद्धत्वमुक्तं गोमयलिप्त इव सुधालिप्तेऽपि भूशुद्ध्यनपायात् । अतएव मार्जनोपार्जनैर्वेश्मेति मानवीये । उपार्जनं सुधागोमयादिभिरुपलेपनमिति मेधातिथिः । चूर्णस्यास्थिमयत्वात् पञ्चनखव्यतिरिक्तास्थ्नां क्षालनादेव शुद्धेः कर्म्मार्हत्वम् ।

याज्ञवल्क्यः,—

रथ्याकर्द्दमतोयानि स्पृष्टान्यन्त्यजवायसैः ।
मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च ॥

धवलगृहादीनि । नात्र प्रोक्षणं तृणादिगृहे प्रोक्षणम् ।

[1]सौवर्णराजताब्जानामूर्द्ध्वपात्रग्रहाश्मनाम् ।
शाकरज्जुमूलफलवासोविदलचर्म्मणाम् ॥
पात्राणां चमसानाञ्च वारिणा शुद्धिरिष्यते ।

---

(१) B. D. सुवर्णराजता ० ।

अब्जं मुक्ताफलशङ्खशुक्त्यादि। वैदलं वैणवसूर्पादि।

चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा।
स्फ्यसूर्पाजिनधान्यानां मुषलोदूखलानसाम्॥

मनुः—

निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुद्ध्यति।
अब्जमश्ममयञ्चैव राजतञ्चानुपस्कृतम्॥

अत्यन्तानुपहतम्।

प्रोक्षणं संहतानाञ्च बहूनां धान्यवाससाम्।

संहतानां कठिनानाम्। अथवा [1]सजातीयद्रव्यसमुदायरूपाणाम्। वासोग्रहणं शाकचर्म्मादेरप्युपलक्षणम्। स्मृतिः,—

वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे।
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति॥

अल्पानान्तु क्षालनमेव। अनेकपुरुषवाह्यानां धान्यराशिवस्त्रगृहप्रभृतीनां प्रोक्षणमेवेति प्राञ्चः। सलेपानां शुद्धिमाह मनुः,—

तैजसानां मणीनाञ्च सर्व्वस्याश्ममयस्य च।
भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः॥

तथा,—

ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च।
शौचं यथार्हं कर्त्तव्यं क्षाराम्लोदकवारिभिः॥

(१) A. C. सजतीयसमुदायद्रव्यरूपाणाम्।

Sanskrit.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1056.



नित्याचारप्रदीपः ।

NITYĀCĀRA-PRADĪPAḤ

BY

NARASIMHA VĀJAPEYĪ.

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬACĀRYYA.

FASCICULUS II.

CALCUTTA:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1903.

Pariçiṣta Parvan, (Text) Fasc. 1--5 @ /6/ each	Rs. 1	14
Prākrita-Paingalam, Fasc. 1--7 @ /6/ each	2	10
Prithivirāj Rāsa. (Text) Part II, Fasc. 1--5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1--3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5--10 ; II, 1--6 ; III, 1--7 ; IV, 1--6 ; V, 1--8, @ /6/ each Fasc.	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1--4 @ /6/ each	1	8
Ditto (English) Fasc. 1--3 @ /12/ each	2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/ each	0	12
Sraddha kriyā kaumudī. Fasc. 1-3 @ /6/	1	2
*Taittereya Saṁhitā, (Text) Fasc. 14--45 @ /6/ each	1	2
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1--19 @ /6/ each	7	2
Tantravarteka (English) Fasc. 1	0	12
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1--9, Vol II, Fasc. 1--10, Vol. III, Fasc. 1--2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1--12 @ /6/ each	14	10
Tattvarthadhigama Sutram Fasc. 1	0	6
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/	0	16
Tul'si Sat'sai, (Text) Fasc. 1--5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each ...	2	4
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1--14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc 1--5 @ /6/ each	1	14
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--7, @ /6/ each	4	8
Vidhan Parijata, Fasc. 1--2	0	12
Viṣṇu Smṛti, (Text) Fasc 1--2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1--7 @ /6/ each	2	10
Vṛhannāradiya Purāṇa, (Text) Fasc. 1--6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1--6	2	4

Tibetan Series.

Pag-Sam Ṭhi S'iñ, Fasc. 1--4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1--5 ; Vol. II, Fasc. 1--3 ; Vol. III, Fasc. 1--5, @ 1/ each	13	0
Rtogs *brjod d*pag *h*khri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1--5 ; Vol. II. Fasc. 1--5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1--13 @ /6/ each	4	14
Al-Muqaddasi (English) Vol. I, Fasc 1--3 @ /12/	2	4
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, Fasc. 1--5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1--37 @ 1/ each	37	0
Ditto (English) Fasc. 1--8 @ 1/ each	8	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1--19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1--21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1--14 @ 1/ each	14	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1--4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1--9 @ /6/ each	3	6
Ditto of Āzādi, (Text) Fasc. 1--4 @ /6/ each	1	8
Haft Asmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1--6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1--3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. III, Fasc. 11-12 ; Index to Vol. II, Fasc. 10-12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1--5 @ /6/ each	1	14

*The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal.

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ... Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1 ...	0	6
*Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each ...	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III. Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6/ ...	7	8
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each ...	1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1 ...	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each ...	1	14
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each ...	10	0
*Bhāmatī, (Text) Fasc 4-8 @ /6/ each ...	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-4 ...	1	8
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each ...	1	8
Bṛhaddharma Purāṇa (Text) Fasc 1-6 @ /6/ each ...	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1 ...	0	6
Catadusani Fasc 1 ...	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1-3 @ 2/ each ...	6	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. I ...	3	0
Çatasāhasrikā Prajnāpāramitā (Text) Fasc. I to 5 @ /6/ each ...	1	14
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25 ; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each ...	19	14
Çlockavartika, (English) Fasc. 1-4 ...	3	0
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-16 @ /6/ each ...	4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each ...	5	10
Çrī Bhāshyam, (Text) Fasc 1-3 @ /6/ each ...	1	2
Dana kriyā kaumudī, Fasc 1--2 @ /6/ ...	0	12
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-6...	2	4
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each ...	1	8
Kāla Viveka, Fasc. 1-5 ...	1	14
Kātantra, (Text) Fasc 1-6 @ /12/ each ...	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each ...	10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each ...	3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each...	2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each ...	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Vol. I, Fasc. 1-9 II, Fasc. 1-9 @ /6/ each	6	12
Manuṭikā Sangraha, (Text) Fasc. 1-3 @ /6/ each ...	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-6 @ /12 each ...	4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each ...	4	14
Nārada Smṛti, (Text) Fasc. 1--3 @ /6/ ...	1	2
Nyāyavārtika, (Text) Fasc. 1--4 @ /6/ ...	1	8
*Nirukta, (Text) Vol. III, Fasc. 1--6 Vol. IV, Fasc. 1--8 @ /6/ each ...	5	4
Nityācāra Paddhatiḥ (Text) Fasc. 1--7 ...	2	10
Nityācārapradīpaḥ (Text) Fasc. 1-2 ...	0	12
Nyayabinduṭikā, (Text) ...	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1--6 ; Vol. II, Fasc. 1--3 @ /6/ each ...	3	6
Padumawati Fasc. 1--3 @ 2/ ...	6	0

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1--15 @ /6/ each ... Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and Index ; Vol. III, Fasc. 1 @ /12/ each ...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each ...	7	2
Ma'āṣir-i-' Ālamgīrī, (Text), Fasc. 1--6 @ /6/ each ...	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1 ...	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1--2 @ /12/ each ...	1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1--5 @ /6/ each ...	1	14
Ditto (English) Fasc. 1--3 ...	2	4
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1--5 @ /6/ each ...	1	14
Ditto (English) Fasc. 1--14 @ /12/ each ...	10	8
Ditto Index ...	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1--7 @ /6/ each ...	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1--6 @ /6/ each ...	2	4
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each ...	3	0
Wis-o-Rāmīn, (Text) Fasc. 1--5 @ /6/ each ...	1	14
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /6/ each ...	6	6
Tuzuk-i-Jahāngīrī, (Eng) Fasc. 1 ...	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each ... 50 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No. ; and from 1870 to date @ /8/ per No.
3. JOURNAL of the Assiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1170 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8) 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
   A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ... 4 0
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) ... 2 0
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) ... 4 0
   Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., ... 4 0
   J.A.S.B., 1882) ... 3 0
5. Anīs-ul-Musharraḥīn ... 3 0
6. Catalogue of Fossil Vertebrata ... 3 8
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion 32 0
8. Ināyah, a Commentary on the Hidāyah, Vols. II, and IV, @ 16/ each... 2 0
9. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ... 4 0
10. Khizānatu-l-'ilm ... 40 0
11. Mahābhārata, Vols. III and IV, @ 20/ each ...
12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each ... 18 0
    ... 4 0
13. Sharaya-ool-Islām ... 10 0
14. Tibetan Dictionary, by Csoma de Körös ... 8 0
15. Ditto Grammar " " ... 3 0
16. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ ...
17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson ... 1 0
18. Memoir on maps illustrating the Ancient Geography of Kasmir by M. A. Stein PH.D., Jl. Extra No. 2 of 1899... ... 4 0

Notices of Sanskrit Manuscripts, Fasc. 1--29 @ 1/ each ... 29 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

13--11--03.

Books are supplied by V.P.P.

त्रपुरङ्गम्। कृष्णशकुनिमुखावमृष्टं निर्लिखेत्[1] पात्रम्।

श्वापदमुखावमृष्टं न प्रयुञ्जीत पात्रम्। मार्जारमुखावमृष्टे

मार्जारश्चैव दर्व्वी च मारुतश्च सदा शुचिः।

इति वचनान्न दोषः। मनुः,—

गवाघ्रातानि कांस्यानि श्वकाकोपहतानि च।

[शुद्ध्यन्ति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि च[2]॥]

अङ्गिराः,—गण्डूषपादशौचयोः कांस्यपात्रे करणे षण्मासं यावद् भूमौ निक्षिप्य पुनरग्नौ करणम्। शूद्रभोजने कांस्यस्य चतुर्भिर्मार्जनैः[3]। अग्नौ च निक्षेपात्। अप्रक्षालितहस्तेन ग्रहणे गोशृङ्गेण स्पर्शनाच्छुद्धिः। बौधायनः,—मूत्रपुरीषरेतःप्रभृत्युपहतानां पुनः पाको गोमूत्रेण वा सप्तरात्रं वासो महीमयानाम्।[4] हारीतः,—श्वचाण्डालोदक्यादिस्पर्शे निर्लेपयोरपि त्रिः सप्तकृत्वः परिमार्जनम्। शङ्खः,—तैजसानां कुणपरेतोमूत्रपुरीषोपहतानामावर्त्तनमुल्लेखनमथवा त्रिः सप्तकृत्वः परिमार्जनम्। आवर्त्तनं चिरकालं मूत्रादिसंसर्गे। [आकारनाशः सद्यः[5]।] अत्राम्लादीनां न नियमो यस्य येनोपहन्यत इति शास्त्रान्तरात्। [विष्णुः,—शारीरैर्मलैर्मद्यैः सुराभिर्वा यदुपहतं तदत्यन्तोपहतम्। सर्व्व-

(१) A. C. निर्लिपेत् ०। E. F. न प्रयुञ्जीत ०।

(२) B. Omits the portion bracketed.

(३) C. चतुर्मार्जनैः।

(४) A. C. Add here. महामहानद्यां वा।

(५) A. Omits the portion bracketed.

लोहमयभाण्डमग्नौ प्रतप्तं शुध्येत्। अश्ममयमश्ममयं मणिमयञ्च सप्तरात्रं महीनिखननेन। दन्तशृङ्गास्थिमयं तक्षणेन। दारवं मृन्मयं च जह्यात्।

[1]अत्यन्तोपहतस्यैव वस्त्रं चालितं यन्न वर्ज्यते तच्छिन्द्यात्। लोहभाण्डं यन्त्वाष्टधातुमयम्।][2] याज्ञवल्क्यः,—

तक्षणं दारुशृङ्गास्थ्नां गोबालैः फलसम्भुवाम्।

अस्थिपदं दन्तस्याप्युपलक्षणम्। [3]स्पृश्यानां शृङ्गास्थिदन्तानां हस्तिमहिषादिसम्बन्धिनाम्। तथा,—

उषरोदकगोमूत्रैः शुध्यत्याविककौशिकम्।

सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा॥

उषरमृत्तिकासहितेन उदकेन गोमूत्रेण वा आविकमूर्णाभवं कम्बलादि कौशिकं कृमिकोशोत्थं पट्टादि। अंशुपट्टं वल्कलतन्तुकृतम्। कुतपः पर्व्वतीयच्छागरोमनिर्मितः कम्बलः। तथा सगौरसर्षपैः क्षौमम्। अल्पोपघाते तु देवलः

ऊर्णकौशेयकुतपपट्टक्षौमदुकूलजाः।

अल्पशौचा भवन्त्येते शोषणप्रोक्षणादिभिः॥

क्षौमवदेव शाणस्य समानयोनित्वात्। हारीतः,—आदित्यैर्जीर्णमयानाम्। [यमः,—

(१) A. C. अत्यन्तोपहतस्य वस्त्रं चालितं यच्च बर्द्धते तच्छिन्द्यात्। लोह०।

(२) B. Omit the portion bracketed.

(३) A. B. C. शृङ्गाणां ०।

कृष्णाजिनादीनां बालैर्बालानामङ्कुराम्भसा।

बालानां चामरादीनाम्[1]।] मनुः,—

क्षौमवत् शङ्खशृङ्गाणामस्थिदन्तमयस्य च।

शुद्धिर्विजानता कार्य्या गोमूत्रेणोदकेन वा॥

देवलः—

तूलिकामुपधानञ्च पुष्परक्ताम्बरं तथा।

शोषयित्वातपे किञ्चित् करैः [2]सम्मार्जयेन्मुहुः॥

पश्चाच्च वारिणा प्रोक्ष्य नियुञ्जीत स्वकर्म्मणि।

तान्यप्यतिमलिष्ठानि यथावत् परिशोधयेत्॥

पुष्परक्तानीति हरिद्रारक्तस्याप्युपलक्षणम्। शङ्खः,—रागद्रव्याणि शुचीनि प्रोक्षितानि। एतच्च रागलोपभयान्माञ्जिष्ठादौ तु चालनमेव। मनुः,—पुनः पाकान्महीमयम्।

शङ्खः,—

मद्यैर्मूत्रपुरीषैर्वा ष्ठीवनैः पूयशोणितैः।

संसृष्टं नैव शुध्येत[3] पुनः पाकान्महीमयम्॥

तत्र परित्याग इत्यर्थः। तथा,—

द्रवाणाञ्चैव सर्व्वेषां शुद्धिरुत्पवनं स्मृतम्।

कीटाद्युपघाते च वस्त्रेणाच्छाद्य गालनम्। अशुद्धान्तरे शुद्धिः प्लावो द्रवस्य क्षिति जले भाण्डस्यैव मज्जनम्। भाण्डदोषे

(१) B. D. Omit the portion bracketed.

(२) B. D. सम्मार्जयन् ०।

(३) B. शुध्यन्ति ०।

बौधायनः,—मधूदकपयस्तद्विकाराः पात्रात् पात्रान्तरनयने शुद्धाः । मनुः,—

प्रोक्षणात् तृणकाष्ठञ्च पलाशञ्चैव शुद्ध्यति ।

[देवलः,—

सर्व्वद्रवाणां[1] पक्वानां लवणस्य गुड़स्य च ।
नान्यत् प्रोक्तं परित्यागादशुद्धानामिति स्थितिः ॥

तदत्यन्तोपघाते । वृद्धशातातपः,—

तापनं घृततैलानां प्लावनं गोरसस्य च ।
तन्मात्रमुद्धृतं शुद्धेत् कठिनञ्च पयो दधि ॥
अविलीनं तथा सर्पिर्विलीनं श्रपणेन च ।

ब्राह्मे,—

द्रवद्रव्याणि भूरीणि परिप्लाव्यानि चाम्भसा ।
शस्यानि व्रीहयश्चैव शाकमूलफलानि च ॥
त्यक्त्वा तु दूषितं भागं परिप्लाव्य जलेन तु ।

विष्णुः,—प्रोक्षणेनैव पुस्तकम् ।[2]] याज्ञवल्क्यः —

रश्मिरग्नीरजश्छाया गौरश्वो वसुधानिलः ।
विप्रुषो मक्षिका स्पर्शे वत्सः प्रस्नवणे शुचिः ॥

रजः श्वादिव्यतिरिक्तस्य ।

(१) A. सर्व्वद्रव्याणां ० ।

(२) B. D. Omit the portion bracketed.

श्वकाकोष्ट्रखरोलूकशूकरग्राम्यपक्षिणाम् ।
अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयते ॥

सम्मार्जनीस्त्रीपादरजश्चैवम् । अश्वग्रहणं हस्तिनोऽश्वतरस्याप्युपलक्षणम् । विप्रुषः क्षीरादिविन्दवः । एते स्पर्शे शुद्धाः ।

अजाश्वं मुखतो मेध्यं न गौर्न नरजा मलाः ।
पन्थानश्च विशुद्ध्यन्ति सोमसूर्य्यांशुमारुतैः ॥
मुखजा विप्रुषो मेध्यास्तथाचमनविन्दवः ।
श्मश्रु चास्यगतं दन्तलग्नं त्यक्त्वा ततः शुचिः ॥

[तथा,—

कारुहस्तः शुचिः पण्यं भैक्ष्यं योषिन्मुखं तथा ।

मनुः,—शकुनिः फलपातने श्वा मृगग्रहणे शुचिः ।[1]]
शकुनिरमेध्यभुग्व्यतिरिक्तः । श्वपदं व्याघ्रादेरुपलक्षणम् ।

तथा,—

पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् ।
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुद्ध्यति ॥

एतदन्नविषयम् । अवधूतं मुखश्वासहतम् । अवक्षुतं क्षुतसन्निहितम् ।[2] सजलं भस्म मृद्वापि प्रक्षेप्तव्यमिति याज्ञवल्क्यः ।
मनुः,—

(१) B. Omits the portion bracketed.

(२) A, C. संविहितम् ।

यावन्नापैत्यमेध्याक्तो गन्धो लेपश्च तत्कृतः।

तावन्मृद्वार्य्युपादेयं सर्व्वासु द्रव्यशुद्धिषु ॥

लेपस्तत्कृत इति वचनात् कुङ्कुमादिगन्धलेपस्य पूर्व्वस्थस्य सत्वेऽपि नाशौचम्।

तथा,—

त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्।

अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥

यददृष्टत्वेनादृष्टमज्ञातम्। केनापि प्रमाणेन यत्र दोषो न ज्ञात इत्यर्थः। दोषशङ्कायां निर्णिक्तं चालितम्। शुद्धौ कृताया-मपि शङ्कायां वाचा प्रशंसायां शुद्धिरित्यर्थः।

याज्ञवल्क्यः,—

शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम्।

प्रकृतिस्थं रूपरसान्तरमनापन्नम्। महीगतं नाशुद्धभूमि-गतम्। आकाशस्थमपि शुद्धमेव। इदं गोतृप्तिचमं चेत् शुचि।

आचमनार्हं देवलः,—

उद्धृता अपि शुद्ध्यन्ति शुद्धैः पात्रैः समुद्धृताः।

एकरात्रोषिता आपस्त्याज्याः शुद्धा अपि स्वयम् ॥

[तथा,—

कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेत्।

कश्मलशब्दादियुक्तं यत्र तत्र तीर्थान्तराज्जलं ग्राह्यम्।[१]]

(१) B. D. Omits the portion bracketed.

शातातपः,—

अन्त्यैरपि कृते कूपे तड़ागेषु सरःसु च।

एषु स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते ॥

[१]स्मृत्यन्तरे,—

वापीकूपतड़ागेषु दूषितेषु सरःसु च।

उद्धृत्य वै कुम्भशतं पञ्चगव्येन शुद्ध्यति ॥

मृतपञ्चनखात् कूपादत्यन्तोपहतात् तथा।

अपः समुद्धरेत् सर्व्वाः शेषं वस्त्रेण शोधयेत् ॥

[वह्निप्रज्वालनं कृत्वा कूपे पक्केष्टकाचिते।

पञ्चगव्यं न्यसेत् पश्चान्नवतोयं समुद्धरेत्[२] ॥]

जलाशयेषु चान्येषु स्थावरेषु चरेषु च।

कूपवत् कथिता शुद्धि र्महत्सु च न दूषणम् ॥

[दशरात्रेण शुद्ध्यतीत्यधिकृत्य यमः,—भूमिष्ठञ्च नवोदकम्। ब्राह्मे,—नवखातजलं दशरात्रेण शुद्ध्यति[३]।]

तथा,—

आसनं शयनं यानं जायापत्यं कमण्डलुः।

शुचीन्यात्मन एतानि परेषामशुचीनि तु ॥

गोतमः,

(१) E. F. Here add :—

रुधिरश्लेष्मविण्मूत्रक्षीरजोमद्यमेव च।

एभिस्तु दूषिते कूपे कुम्भानां षष्टिमुद्धरेत् ॥

(२,३) B. D. Omit the portions bracketed.

आसनं शयनं यानमन्तर्द्धाय समाचरेत्।

परकीयमित्यर्थः। वस्त्रे निर्णिज्याशक्ताविति परकीयस्य निर्णेजने नाधिकारः। तथा पादौ शुचिर्ब्राह्मणानाम्। एतच्च[1] पदा स्पृष्टञ्च कामत इति यदशुद्धत्वं तस्यापवादः। इति द्रव्य-शुद्धिः।

अथ कर्त्तृशुद्धिः।

देवलः,—

जनने मरणे नित्यमशौचमनुधावति।
सपिण्डान् पितृबन्धूंश्च यत्र क्वचन तिष्ठतः॥
अशौचं द्विविधं प्रोक्तं वाह्यमाभ्यन्तरं तथा।

तत्राभ्यन्तरमुपलक्षणम्। वाह्यशरीरस्य कर्म्मानर्हत्वम्। [2]तदीयस्वत्वाश्रयद्रव्याशुद्धिश्चेति द्विविधा। सपिण्डाश्च मात्स्ये,—

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्॥

मनुः,—

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।
समानोदकभावस्तु जन्मनाम्नोरवेदने॥

---

(१) B. D. एतत् ०।
(२) E. F. तदीयस्वत्वाश्रयणशुद्धशुद्धिश्चेति द्विधा।

स्वप्रपितामहस्य यः प्रपितामहस्तदन्वये यावन्तः सप्तमास्ते स्वस्य सपिण्डा इति मेधातिथिः। बृहस्पतिः,—

समानोदकभावस्तु निवर्त्तेताचतुर्द्दशात्।

एतत्

मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते।

इति बृहस्पतिवचनादनादेयम्। चतुर्द्दशपुरुषादूर्द्धं जन्मनामज्ञानेऽपि न समानोदकभाव इति विकल्प इत्येके। इदञ्च जननं मरणञ्च ज्ञातमेवाशौचनिमित्तम्। आदित्यपुराणे,—

अपि दातृग्रहीत्रोश्च सूतके मृतकेऽपि वा।
अविज्ञाते न दोषः स्यात् श्राद्धादिषु कथञ्चन॥

न चैवं विदेशमरणे ज्ञानावधिदशरात्रप्रसङ्गः।

अन्यदेशमृतं ज्ञातिं श्रुत्वा पुत्रस्य जन्म च।
अनिर्गते दशाहे तु शेषाहोभिर्विशुद्ध्यति॥

इति बृहस्पतिवचनात्। एवञ्च सति—

एकेनापि परिज्ञाते[1] भोक्तुर्दोषमुपावहेत्।

इति दातुरज्ञानेऽन्नस्यादुष्टत्वेऽपि वचनाद्दोषः। एवम्,—

अनग्निमत उत्क्रान्तेः साग्नेः संस्कारकर्म्मणः।
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथातिथि॥

इत्यङ्गिरःस्मरणादग्निमतो दाहात् पूर्व्वमशौचाभावः।

---

(१) D. ० प्रतिज्ञाते ०।

जातुकर्ण्यः,—

एकाग्नेर्मरणादूर्द्ध्वमशौचं श्राद्धमेव च ।
यस्य तु त्रयमग्नीनां तस्योर्द्ध्वं दाहकर्म्मणः ॥
ऊर्द्ध्वं त्रिपक्षाद् यत् श्राद्धं मृताहन्येव तद् भवेत् ॥
[1]अधस्तु कारयेद् दाहादाहिताग्नेर्द्विजन्मनः ॥

एवञ्च पुत्रस्य दाहादूर्द्ध्वमशौचं ज्ञातीनाञ्च मरणादूर्द्ध्वमिति व्यवस्थापक्षोऽपि शुद्धिगुच्छलिखितो नादेयः । एवमाहिताग्नेर्देवाल्लौकिकाग्निना दाहेऽपि पश्चात् श्रौताग्निना यदास्थिदाहस्ततः प्रभृत्येवाशौचम् । तत्पूर्व्वमशौचं नास्ति । एवञ्च दम्पत्योः पूर्व्वमृतस्य वैतानेन दाहेऽपि [2]पश्चान्मृतस्येति वचनान्तरेणारणिजन्यलौकिकाग्निना दाहेऽपि मरणदिनावध्येवाशौचम् । अशौचे च कर्म्मणां न निषेधो येन विहितप्रतिषेधे विकल्पः स्यात् किन्तु पर्य्युदासः । तदयमर्थः । यत्सन्ध्यामुपासीत तदन्यत्राशौचदिनेभ्यः । कर्म्मविधीनां शेषः । [3][जावालः,—]

सन्ध्यां पञ्चमहायज्ञं नैत्यिकं स्मृतिकर्म्म च ।
तन्मध्ये हापयेत् तेषां दशाहान्ते पुनः क्रिया ॥

नैत्यिकं स्मृतिकर्म्मेत्यनेन नैमित्तिकमप्युपलक्ष्यते । तथाच कालिदासचयनिनः स्मार्त्तञ्च कर्म्म त्रिधा त्याज्यमिति । त्रिधा नित्यं नैमित्तिकं काम्यञ्च । एवञ्च सति

न च नैमित्तिकोच्छेदः कर्त्तव्योहि कथञ्चन ।

(१) D. अधस्तात् कार ० । (३) D. Omits the portion bracketed.
(२) D पश्चान्मृतवचनान्तरेणा ० ।

इति वाक्यस्य प्रामाण्येऽपि सूतकादिमध्यपतितजातकर्म्मादिसञ्चयनादिश्राद्धपरमेव । यमशङ्खौ,—

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म्म च ।
प्रेतपिण्डक्रियावर्जमशौचे विनिवर्त्तते ॥

तेनाष्टकामावास्यादिश्राद्धं पितृकर्म्मत्वान्निवर्त्तते । [1]मासिकवार्षिकश्राद्धयोर्वचनान्तरादशौचानन्तरं क्रिया । ऋष्यशृङ्गः,—

[2]शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते ।
सा तिथिस्तस्य कार्य्या वै नत्वन्या तु कदाचन ॥

इति । तथा,—

मासिकार्थे तु संप्राप्ते कदाचिन्मृतसूतके ।
वदन्ति शुद्धौ तत्कार्य्यं दर्शे वापि[3] मनीषिणः ॥

त्रिपक्षाद्युपलक्षणञ्चैतत् । ग्रहणे स्नानं दानं वचनान्तरादशौचेऽपि स्यादिति वक्ष्यते । संक्रान्तिस्नानदानादिकं वर्ज्यम् ।

यत्तु,—

अस्नाताशी मलं भुंक्ते अजपी पूयशोणितम् ।

इति वाक्याद् भोजननिमित्तयोर्जपस्नानयोरशौचेऽपि कार्य्यत्वमिति तन्न नैमित्तिकानामपि निषिद्धत्वात् ।

सूतके मन्त्रवत्कर्म्म स्मार्त्तं नैव समाचरेत् ।
आपोशानद्वयं मुक्ता तथा प्राणाहुतीरपि ॥

(१) B. D. मासिकवार्षिकयोः श्राद्धयो ० ।
(२) B. D. शुद्धभूतेन ० ।
(३) A. C. ० दर्शेनापि ० ।

इति सर्व्वत्यागस्मरणाच्च विण्मूत्रोत्सर्गनिमित्तशौचचण्डालादिस्पर्शननिमित्तस्य च स्नानस्यामन्त्रकत्वान्न प्रतिप्रसवः। किञ्च शक्तविषये न मुहूर्त्तमप्यप्रयतः स्यादित्यापस्तम्बस्मृतेः निषेधपरिपालनरूपेण शौचस्य कर्त्तव्यत्वम्। [नतु नैमित्तिकत्वात्।][1] एतेन कृत्वा वा ब्रह्महा शुचिरित्यादौ महापापप्रायश्चित्ते[2] शौचपदप्रयोगान्न मुहूर्त्तमप्यप्रयतः स्यादिति निषेधपरिपालनरूपेणाशौचेऽपि प्रायश्चित्तमिति निरस्तम्।

शौचलक्षणमित्याहुर्मृदम्भोगोमयादिभिः।

इत्यादिना शौचस्य मलक्षालनाचमनरूपत्वेन पापप्रायश्चित्ते शौचत्वाभावात्। नहि कर्म्मार्हतापादकमात्रं शौचं[3] सपिण्डीकरणे शौचपदाप्रयोगादशौचनिरासप्रतीक्षणाच्च।

पितरौ प्रमितौ यस्य देहस्तस्याशुचिर्भवेत्।
न दैवं नापि पित्र्यं स्याद् यावत् पूर्णो न वत्सरः॥

इति कर्म्मानर्हतावचनात्।

सपिण्डीकरणादूर्द्ध्वं प्रेतः पार्व्वणभाग् यतः।
वृद्धिपूर्त्तेष्टियोग्यश्च गृहस्थश्च ततो भवेत्॥

इति सपिण्डीकरणस्य कर्म्मार्हतापादकत्वात्[4]। शौचरूपत्वे चास्याशुचित्वविलम्बनिषेधभयेन सूतकेऽपि कार्य्यतापत्तिः।

(१) D. Omits the portion bracketed.

(२) B. D. प्रायश्चित्ते।

(३) B. A. C. ० मात्रशौचम् ०।

(४) B D. ० सम्पादकत्वात्।

जातेष्टेश्चाशौचापगमप्रतीक्षाविचारश्चतुर्थाध्याये विरुद्धः[1] स्यात्। नैमित्तिकस्य वसन्ते वसन्ते ज्योतिषा यजेतेत्यस्याशौचे कर्त्तव्यत्वं स्यादिति। छन्दोगपरिशिष्टे,—

सूतके कर्म्मणां त्यागः सन्ध्यादीनां विधीयते।
होमः श्रौते तु कर्त्तव्यः पक्वान्नेनाथवा फलैः॥
अकृतं हावयेत् स्मार्त्ते तदभावे कृताकृतम्।
कृतमोदनशक्त्वादि तण्डुलादि कृताकृतम्॥
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः।
सूतके च प्रवासे च स्वाशक्तौ श्राद्धभोजने॥
एवमादिनिमित्तेषु हावयेदिति योजयेत्[2]।

सन्ध्यानिषेधे पैठीनसिः,—सावित्र्याञ्जलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्य्यं नमस्कुर्य्यात्। एतावत् कार्य्यम्। देवलः,—

जन्महानौ वितानस्य कर्म्मत्यागो न विद्यते।
शालाग्नौ केवलो[3] होमः कार्य्य एवान्यगोत्रजैः॥

केवलशब्दाद् [4]यज्ञादिपिण्डपितृयज्ञयोर्निषेधः।

पिण्डयज्ञं चरुं होममसगोत्रेण कारयेत्।

इति जातूकर्ण्यवचनात् चरुपिण्डयज्ञयोर्विकल्पः। पौर्णमासे चरौ कृते त्वमावास्यायामशौचपाते त्वारब्धत्वात् समा-

(१) B. विशुद्धः ०।

(२) B. ० हावयेद् विनियोजयेत्।

(३) B. ० केवले ०।

(४) D. ० पञ्चादिपिण्डयज्ञयोर्निषेधः।

पनमेव। पारस्करः,—नित्यानि निवर्त्तेरन् वैतानवर्जम्। वैतानिकानि नित्यानि दर्शपौर्णमासाग्रयणाग्निहोत्रचातुर्म्मास्यादीनि। निरूढ़िपशुबन्धहोमयोः पर्व्वान्तरसावकाशत्वान्नाशौचेऽनुष्ठानम्[1]। आग्रयणमप्यन्तिमपर्व्वपर्य्यन्ते गतमनन्यगतिकत्वादन्ते कार्य्यम्। व्याघ्रपादः,—

श्रौते कर्म्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात्।

अशौचमध्ये ऋत्विक् यजमानश्चेत्यर्थः। मनुः,—

न च तत्कर्म्म कुर्व्वाणः सनाभ्योऽप्यशुचिर्भवेत्।

सनाभ्यः सपिण्डः। तत्कर्म्म श्रौतेष्वार्त्त्विज्यम्। प्रवासश्चाशौचे निषिद्ध एव। आत्ययिककार्य्ये च शुद्धिविधानादेव विपत्तौ प्रवासे कार्य्येऽग्न्युपस्थानं कार्य्यम्। प्रवेशोपस्थानञ्च पर्व्वादिसन्निधावावश्यकत्वात् कार्य्यमेव। स्कान्दे चन्द्रशर्म्मणो वैष्णवार्च्चाप्रतिज्ञायाम्,—

मया भक्त्या प्रकर्त्तव्यं प्रत्यहं पूजनं तव।

इति यावज्जीवसङ्कल्पनात् विष्णुपूजाऽशौचेऽपि कार्य्या।

असपिण्डगृहे नीत्वा पूजनीयः सदाशिवः।

इति प्रामाणिकलिखनात् [2]देवतान्तरपूजान्येन कारयितव्या। यद्यपि हयशीर्षे,—

प्रतिष्ठितार्च्चा न त्याज्या यावज्जीवं तदर्चनम्।

(१) A. C. ० रनुष्ठानम्।

(२) A. C. देवान्तर ०।

इत्यविशेषेणोक्तं तथापि देवतान्तरपूजनं ब्राह्मणान्तरद्वारैव।[1] छन्दोगपरिशिष्टे,—

न त्यजेत् सूतके कर्म्म ब्रह्मचारी स्वकं क्वचित्।
न दीक्षणात् परं यज्ञे न कृच्छ्रादितपश्चरन्॥

आदिपदं प्रारब्धकर्म्मोपलक्षणम्। विष्णुः,—न देवप्रतिष्ठाविवाहयोः पूर्व्वसंवृतयोः। याज्ञवल्क्यः,—

ऋत्विजां दीक्षितानाञ्च यज्ञे कर्म्माणि कुर्व्वताम्।
[2]यतिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा॥
दाने विवाहे यज्ञे च सङ्ग्रामे देशविप्लवे।
आपद्यपि तु कष्टायां सद्यः शौचं विधीयते॥

ब्राह्मे,—

निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित्॥

इदञ्च सहस्रनामादिजपकर्म्मणि वरणस्याप्युपलक्षणम्। तत्रापि वृतस्य नाशौचम्। स्मृतिः,—

प्रारम्भो वरणं यागे[3] सङ्कल्पो व्रतजापयोः।
नान्दीमुखं विवाहादौ श्राद्धे तु स्यात् पचिक्रिया[4]॥

(१) D. ब्राह्मणान्तरद्वारेणैव।

(२) B. C. D. सती ०।

(३) B. यज्ञे ०।

(४) A. प्रतिक्रिया। B. श्राद्धे पाकपरिष्क्रिया।

ब्राह्मे,—

अकालमृत्यो: शान्त्यर्थं महादाने च रोगिणाम्।

महादानपदं शान्तिमात्रोपलक्षणम्।

दुर्भिक्षे प्राणरक्षार्थं कृतयज्ञस्य देहिनः।

राष्ट्रभङ्गे स्थितस्याथ पुत्रदारांश्च रक्षतः॥

ग्रहोपतापशान्त्यर्थं क्रियमाणे च कर्म्मणि।

तथोपसर्गात् सन्देहं रक्षमाणस्य नो भवेत्॥

नित्यं व्रतपरस्यापि कृच्छ्रचान्द्रायणादिषु।

निवृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने॥

सततं कृच्छ्राद्याचरणशीलस्य कृच्छ्रारम्भेऽप्यशौचं नास्ति। कृच्छ्रहोमादिसमाप्तौ ब्राह्मणभोजनकर्म्मणि दातुर्भोक्तुश्च नाशौचम्।

पैठीनसिः,—

विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्म्मणि।

न तत्र सूतकं तद्वत्कर्म्म यज्ञादि कारयेत्॥

अनापद्यपि। प्रजापतिः,—

अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्।

कर्त्तुस्तात्कालिकी शुद्धिः पूर्व्वाशौचं न बाधकम्॥

एवं प्रेतक्रिया या तु पूर्व्वाशौचं न बाधकम्।

हारीतः,—प्राङ्नाड़ीच्छेदनात् संस्कारपुण्यार्थान् कुर्व्वन्ति। संस्कारं जातकर्म्म। पुण्यार्थां दानादयः। शङ्खलिखितौ,—कुमारप्रसवे नाड्यामच्छिन्नायां गुड़तिलहिरण्यवस्त्रप्रावरणगोधान्यप्रतिग्रहेष्वदोषः। मनुः,—

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते।

यदन्नमत्ति तेषान्तु दशाहेन विशुद्ध्यति॥

यमः,—

सूतके तु कुलस्यान्नमदोषं मनुरब्रवीत्।

स्वकुलस्य स्वयं भोज्यमित्यर्थः। षट्त्रिंशन्मते,—

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके।

परैरन्नं प्रदातव्यं भोक्तव्यञ्च द्विजोत्तमैः॥

भुञ्जानेषु तु विप्रेषु त्वन्तरा मृतसूतके।

अन्यगेहोदकाचान्ताः सर्व्वे ते शुचयः स्मृताः॥

अङ्गिराः,—

अशौचं यस्य संसर्गाज्जायते गृहमेधिनः।

क्रियास्तत्र न लुप्यन्ते गृह्याणां न च तद्भवेत्॥

[1]अन्यगोत्रमातुलादिनिमित्ताशौचं परकीयशवस्पर्शादिनिमित्ताशौचं यस्य तत् तस्य स्वस्यैव न तु तद्गृहस्थपुत्रादीनाम्। वैश्वदेवक्रिया च न लुप्यते पुत्रादिनैव कार्य्या सर्व्वार्थत्वादित्यर्थः।

एवम्,—

पितरौ प्रमितौ यस्य देहस्तस्याशुचिर्भवेत्।

न दैवं नापि पित्र्यं स्याद् यावत् पूर्णो[2] न वत्सरः॥

(१) B. D. असगोत्र०।

(२) C. पूर्ण्यो०।

पितुरब्दमशौचं स्यात् षण्मासान् मातुरेव च ।
मासत्रयन्तु भार्य्यायास्तदर्द्धं भ्रातृपुत्रयोः ॥

इति सामान्यतोऽशौचस्मरणेऽपि

तथैव काम्यं यत्कर्म्म वत्सरात् प्रथमादृते ।

इति स्मृतेः काम्येष्वनधिकारो न नित्यनैमित्तिके । सपिण्डीकरणादूर्द्ध्वं काम्येऽधिकारः संवत्सरमध्येऽपि ।

सपिण्डीकरणादूर्द्ध्वं प्रेतः पार्व्वणभाग् यतः ।
वृद्धिपूर्त्तेष्टियोग्यश्च गृहस्थश्च ततो भवेत् ॥

इति वचनात् । केवलम्

दीपदानं गयाश्राद्धं [1]पिण्डश्चापरपाक्षिकम् ।
प्रथमेऽब्दे न कुर्व्वीत योजनेऽपि क्षते सति ॥

अङ्गाशौचम् ।

सम्बर्त्तः,—

ततः सञ्चयनादूर्द्ध्वमङ्गस्पर्शो विधीयते ।

ततः पूर्व्वमङ्गाशौचमुक्तम् । अङ्गिराः,—

चतुर्थेऽहनि कर्त्तव्यः संस्पर्शो ब्राह्मणस्य तु ।
क्षत्रस्य पञ्चमे ज्ञेयः सप्तमे च तथा विशः ॥
शूद्रस्य दशमेऽप्येवं खण्डाशौचे विभागतः ।

---

(१) D. ० श्चाद्धा ० ।

देवलः,—

अशौचकालाद् विज्ञेयं स्पर्शनन्तु त्रिभागतः ।

अशौचयोः सन्निपातेऽप्यङ्गाशौचम् । ब्राह्मे,—

सर्व्वमङ्गमसंस्पृश्यं तत्र स्यात् सूतके सति ।

सूतकमध्ये सूतके नितरां मृतकमध्ये मृतौ । अङ्गिराः,—

सूतके सूतकीवर्जं संस्पर्शो नैव दूष्यति ।

शङ्खलिखितौ,—स्नानोपस्पर्शनादेव पिता शुचिः ।

अथ शुद्धिः ।

मनुः,—

शुद्ध्येद् विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥

ब्राह्मे,—

शौचाशौचं प्रकुर्व्वीरन् शूद्रवद् वर्णसङ्कराः ।

सङ्करा अनुलोमजाः । प्रतिलोमजास्तु विध्यनधिकारिणः । मूत्रपुरीषोत्सर्गवत् मलापकर्षं कुर्य्युरित्याहुः । अङ्गिराः,—

सर्व्वेषामेव वर्णानां सूतके मृतके तथा ।
दशाहाच्छुद्धिरथवा इति शातातपोऽब्रवीत् ॥

पराशरः,—

एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः ।

त्र्यहात् केवलवेदस्तु निर्गुणो दशभिर्दिनैः ।
तथा सम्पर्कवृत्तानां न प्रेतं नैव सूतकम् ॥

मनुः,—

दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
अर्वाक् सञ्चयनादस्थ्नां त्र्यहमेकाहमेव वा ॥

एते च कुसूल-कुम्भी-धान्यक त्र्यैहिकाश्वस्तनिकवृत्तिमत्-क्रमेणाशौचकालाः ।[1] ब्राह्मे,—

षण्मासाभ्यन्तरं यावद् गर्भस्रावो भवेद् यदि ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥
अत ऊर्द्ध्वं स्वजात्युक्तमशौचं तासु विद्यते ।
सद्यःशौचं सपिण्डानां गर्भस्य पतने सति ॥

तासामिति बहुवचनात् स्वजात्युक्तमितिलिङ्गात् सर्व्ववर्ण-साधारणमिदम् । तेन पञ्चमषष्ठयोर्गर्भपाते कुलस्य सद्यः शुद्धिः । हारीतः,—जातमृते मृतजाते वा कुलस्य त्रिरात्रम् । इदं सप्तमाष्टममासविषयं जातशब्दात् । स्मृतिः—

आचतुर्थाद् भवेद् स्रावः पातः पञ्चमषष्ठयोः ।
अपप्रसवसंज्ञा तु सप्तमाष्टममासयोः ॥

---

(१) D. Here adds—

एतत् सर्व्वं युगान्तरविषयम् । हारीतः,—

दशाह एव विप्रस्य सपिण्डमरणे सति ।
कल्पान्तराणि कुर्व्वाणः कलौ स्यान्मोहकिल्विषी ॥

तेन गुणतारतम्यादिनाशौचसङ्कोचो न कलौ । अत्र मरणग्रहणं जन्मनोऽप्युपलक्षणं विप्रग्रहणं क्षत्रादेरपि ।

तेन जातशब्दलिङ्गात् सपिण्डानां त्रिरात्राशौचं सप्तमाष्टम-मासविषयमेव । ब्राह्मवचनान्मातुः [षष्ठादूर्द्ध्वं][1] दशरात्रं सर्व्वत्र । सप्तमाष्टमयोरपि बालजीवने सर्व्वेषां दशरात्रम् । पुनर्हारीतः,—जातमृते मृतजाते वा सपिण्डानां दशाहम् । इदं [2]नवम-दशममासविषयम् । सप्तमाष्टममासयोस्त्र्यहाशौचविषयत्वात् । [3]नवमादिमासविषयमृतजाते पारस्करः,—

गर्भे यदि विपत्तिः स्याद् दशाहं सूतकं भवेत् ।

नवमादिमासजातमृतौ कौर्म्मे,—

जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः ।
मातुश्च सूतकं तस्मात् पिता त्वस्पृश्य एव च ॥
सद्यःशौचं सपिण्डानां कर्त्तव्यं सोदरस्य च ।

अत्र पित्रोर्दशरात्रं सपिण्डानां सद्यः । वचनात् पितुरप्यङ्गा-शौचं दशाहान्तम् । कात्यायनः,—

अनिर्वृत्ते दशाहे तु पञ्चत्वं यदि गच्छति ।
सद्य एव विशुद्धिः स्यान्न प्रेतं नैव सूतकम् ॥

प्रचेताः,—

मुहूर्त्तं जीवितो बालो यदि पञ्चत्वमृच्छति ।
मातुः शुद्धिर्दशाहेन सद्यःशौचास्तु गोत्रिणः ॥

---

(१) D. Omits the portion bracketed.

(२) E. F. नवमदशमादिमास ° ।

(३) E. F. नवमादिविषममासमृतजाते ° ।

मुहूर्त्तपदं नाड़ीच्छेदोपलक्षणम् । नाड़ीच्छेदनात् पूर्व्वन्तु बालमरणे जातमृते मृतजाते वा सपिण्डानां दशाहमिति हारीतोक्तेः ।

दशाहाभ्यन्तरे बाले प्रमिते[1] तस्य बान्धवैः ।
शावाशौचं न कर्त्तव्यं सूत्यशौचं विधीयते ॥

इति ब्रह्मानुवचनाच्च सपिण्डानां दशरात्रमेव । जातमात्रस्येति कौर्म्मवचनात् नाड़ीच्छेदनात् पूर्व्वमपि सद्यःशौचमिति विकल्पो देशकुलाचारव्यवस्थितः । विज्ञानेश्वरेण तु पञ्चमषष्ठयोर्गर्भपाते कुलस्य त्रिरात्रं [2]सप्तमाष्टमादिषु जातमृते मृतजाते वा विशेषाद् दशरात्रम् । दशरात्रैर्बालमरणेऽपि कुलस्य सूतकाशौचमिति स्मृत्यन्तरसंवादेन व्यवस्थापितम् । यमजजननेऽप्येकस्य जीवनेऽन्यस्य मृतौ समानो न्यायः । एकस्य मृतजननेऽन्यस्य जातमृतौ पित्रोर्दशाहं सपिण्डानां सद्यः शुद्धिर्मृते बलीयस्त्वात् । गर्भस्रावे तु पितुः स्नानमात्रम् । पैठीनसिः,—सूतिकां पुत्रवतीं विंशतिरात्रेण कर्म्म कारयेत् मासेन स्त्रीजननीम् ।

बालाद्यशौचम् ।

कौर्म्मे,—

अजातदन्तमरणे पित्रोरेकाहमिष्यते ।
जातदन्ते त्रिरात्रं स्यादिति शास्त्रविनिश्चयः ॥

(१) C. प्रस्थिते ० । (२) B. D. सप्तमादिषु ० ।

सपिण्डानान्तु शङ्खः,—प्राङ्नामकरणात् सद्यःशौचम् ।

याज्ञवल्क्यः,—

आदन्तजन्मनः सद्य आचूड़ान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशाद् दशरात्रमतःपरम् ॥

अत्र दन्तजन्मादयः कालोपलक्षका इति लक्ष्मीधरः । षण्मासो दन्तजन्मकालः । तत्र दन्तानुत्पत्तावपि बालमरणेऽहरशौचम् । एवं तृतीयोऽब्दश्चूड़ाकालः । तत्र चूड़ाया अकरणेऽपि त्रिरात्रम् । प्रथमवर्षस्य चूड़ाकालत्वेऽपि दन्तजन्मानन्तरं [तत्र][1] चूड़ाकरणाभावेन त्रिरात्रम् । दन्तजाते त्वकृतचूड़ेऽहोरात्रमिति विष्णुस्मृतेः ।

अतएव—

यद्यप्यकृतचूड़ोऽपि जातदन्तश्च संस्थितः ।
दाहयित्वा तथाप्येनमशौचं त्र्यहमाचरेत् ॥

इत्यङ्गिरःस्मरणं त्रिवर्षचूड़ाकरणाभावे बोध्यम् । एवं द्विमासाधिकषड्वर्षादूर्द्ध्वमुपनयनकालः । तत्रोपनयनाभावेऽपि सम्पूर्णाशौचम् । तथा च ब्राह्मे,—

अनुपनीतो विप्रस्तु राजा चैवाधनुर्ग्रहः ।
अगृहीतप्रतोदस्तु वैश्यः शूद्रस्त्ववस्त्रधृक् ।
म्रियते यत्र तत्र स्यादशौचं त्र्यहमेव तु ॥
द्विजन्मनामयं कालस्त्रयाणान्तु षड़ाब्दिकः ।
पञ्चाब्दिकस्तु शूद्राणां स्वजात्युक्तमतःपरम् ॥

(१) B. D. Omit the portion bracketed.

अत्र हि गर्भाष्टमवर्षे ब्राह्मणादित्रयाणामुपनयनवनुर्ग्रहण-प्रतोदग्रहणकालः । [शूद्रस्य षष्ठे वस्त्रग्रहणकालः ।][1] ततः पूर्व्वं बालमृतौ त्रिरात्रम् । तदूर्द्ध्वं बालमरणे सम्पूर्णाशौचमित्युक्तम् । एवञ्चोपनयनस्य कालोपलक्षकत्वमुक्तं भवति । एवं दन्तजन्मादिषु बोध्यम् । यदि तु,—चतुर्थपञ्चममासे दन्तजन्म संदृश्यते चूड़ोपनयनयोरपि निमित्तान्तरेण स्वकालात् पूर्व्वं करणं यथा ब्रह्मवर्च्चसकामस्य पञ्चमे । तत्र जावालः,—

व्रतचूड़ादिकानान्तु प्रतीतिषु यथाक्रमम् ।
दशाहत्र्यहएकाहैः शुद्ध्यन्त्यपि हि निर्गुणाः ॥

अकालेऽपि तत्प्रतीतौ यथोक्ताशौचम् । अद्विवर्षस्य दाहः पाक्षिकः । दाहपक्षे उदकदानमपि । द्विवर्षादूर्द्ध्वं दाहनियमः ।

कन्याशौचम् ।

कौर्म्मे,—

अजातदन्तमरणे पित्रोरेकाहमुच्यते ।

यत्तु याज्ञवल्कीयं अहस्त्वदन्तकन्यास्विति तदपरिनीतकन्यामृतौ सपिण्डाशौचपरमिति । शुद्धिचन्द्रिकाकारस्याजातदन्तकन्यापरत्वव्याख्या किंमूलेति न विद्मः । दन्तजन्मोर्द्ध्वं स्मृत्यन्तरे,—

(१) B. Omits the portion bracketed.

अप्रत्तासु च प्रत्तासु संस्कृतासंस्कृतासु च ।
मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधि ॥

कन्यामरणाधिकारे कौर्म्मे,—

आदन्तात् सोदरे सद्य आचूड़ादेकरात्रकम् ।
आप्रदानात् त्रिरात्रं स्यादिति शास्त्रविनिश्चयः ॥

सपिण्डानान्तु ब्राह्मे,—

आजन्मनस्तु चूड़ान्तं सद्यःशौचं विधीयते ।
ततो वाग्दानपर्य्यन्तं भवेदेकाहमेव च ।
अतःपरं प्रवृद्धानां त्रिरात्रमिति निश्चयः ॥

वाग्दानोत्कर्षे वाग्दानात् पूर्व्वं तत्कालेऽपि त्रिरात्रमित्यर्थः ।

वाग्दाने तु कृते तत्र ज्ञेयं चोभयतः समम् ।

उभयतः पितृकुले भर्त्तृकुले च । बृहस्पतिः,—

पाणिग्रहणिका मन्त्रा भर्त्तृगोत्रापहारकाः ।
भर्त्तृगोत्रेण नारीणां देयं पिण्डोदकं ततः ॥

एवं सप्तपदीकरणानन्तरम् । तत्पूर्व्वं त्रिरात्रमुभयतः ।

यद्यप्यादिपुराणे,—

सापिण्ड्यं स्यात्तु कन्यानामदत्तानां त्रिपूरुषम् ।

इत्युक्तं तथापि मन्वर्थविरोधादनादरसमाचारः । ब्राह्मे,—

पित्रा दत्ता तु या कन्या स्वातन्त्र्यादन्यमाश्रिता ।

यं यं श्रितवती भूयस्तस्याशौचं भवेत् त्र्यहम् ।
मृतायां वा प्रसूतायां नान्येषामिति निश्चयः ॥
पदे च सप्तमे [1]काचिद् बलाद् यदि धृता भवेत् ।
स्वामिगोत्रं भवेत् तस्यास्तच्च भूयो विशिष्यते ।
पैतृकत्वं प्रसूतायां ततः पौर्व्विकभर्त्तृकम् ।

तथा,—

आदावन्यस्य दत्तायां कुत्रचित्[2] पुत्रयोर्द्वयोः ।
पितुस्तत्र त्रिरात्रं स्यादेकरात्रं सपिण्डिनाम् ॥

पुत्रयोरिति [3]वचनादुभयजनितपुत्रायाः पुत्रमरणे प्रसवे द्वितीयपितुस्त्रिरात्रम् । मरीचिः,—

मात्रैकया द्विपितृकौ भ्रातरावन्यगामिनौ ।
एकाहः सूतके प्रोक्तं त्रिरात्रं मृतके तयोः ॥

पित्रा सह तिष्ठतोः पैतृकम् । मात्रा सह मातृकम् । [4][अविभक्तयोरपि मातृकम् ।] ब्राह्मे,—अपरिणीता या रजस्वला तन्मृतौ पितुर्दशरात्रम् । [विष्णुः,—पत्नीनां दासीनां दासानामानुलोम्येन स्वामितुल्यमशौचम् ।][5] स्मृतिः,—

(१) D. ॰ काचिद् बाला यदि ॰ ।
(२) B. D. कदाचित् ॰ ।
(३) A. B. C. वचनादुभयत्र जनित ॰ ।
(४) A. B. C. Omit the portion bracketed.
(५) B. D. Omit the portion bracketed.

मृते सूते च दासीनां दासानाञ्चैव कामतः ।
स्वामितुल्यं भवेच्छौचं मृते स्वामिनि तत्[1] स्वकम् ॥

ब्राह्मे शङ्खः —

अनौरसेषु पुत्रेषु भार्य्यास्वन्यगतासु च ।
परपूर्व्वासु च स्त्रीषु त्रिरात्रात् शुद्धिरिष्यते ॥

क्वचिच्च—

पुत्रिकायास्तु दत्तायाः प्रसवे मरणे तथा ।
पितुश्च दशरात्रं स्यादेकाहश्च सपिण्डिनाम् ॥

व्याघ्रपादः,—

तुल्यं वयसि सर्व्वेषामतिक्रान्ते तथैव च ।
उपनीते तु विषमं तस्मिन्नेवातिकालजम् ॥

वयोनिमित्ताशौचाल्पत्वम् । दशाहातिक्रमे त्रिरात्राद्यशौचम् । अतिकालजं पुरुषपरम्परातिक्रमजं समानोदकाशौचम् । तथातिकालजं अन्तरा जन्ममरणाशौचं प्रोषितशेषकालाशौचञ्चोपनीतविषयेऽपि । सर्व्वमेतत् सर्व्ववर्णसाधारणम् । उपनीताशौचमेव वर्णक्रमेण विषममित्यर्थः । समानजातीयाशौचसन्निपाते विष्णुः,—जननाशौचमध्ये यद्यपरं जननं स्यात् पूर्व्वाशौचव्यपगमे शुद्धिः । रात्रिशेषे द्वाभ्यां प्रभाते दिनत्रयेण । अशौचमध्ये ज्ञातिमरणेऽप्येवम् । ज्ञातिमरणमध्ये मृतकान्त-

(१) C. तु ॰ ।

ऽपि पूर्व्वशेषेण शुद्धिः। रात्रिशेषे द्वाभ्यां प्रभाते दिनत्रयेण। रात्रिशेषो दशमाहः। प्रभातपदेन तदहः कल्यम्। एवं दशमेऽहनि तदुषसि सजातीयनिमित्त[1]ग्रहणे द्वित्रिदिनवृद्ध्या शुद्धिर्यद्यपि स्मृतिषु विहिता तथापि न वर्द्धयेदघाहानीति मनुना निषिद्धा। तथाच विहितप्रतिषेधाद्विकल्पः। तदुक्तं भट्टैः,—

अथवान्तर्यदाशौचनिमित्तं किञ्चिदापतेत्।
तत्र शेषेण या शुद्धिस्तच्छेषोऽयं भविष्यति॥
न वर्द्धयेद् दशाहानि निमित्तादागतान्यपि।

विकल्पे च सति यथादेशाचारं व्यवस्थेति। अस्मद्देशे दशमाहस्तत्प्रभातश्रवणे द्वित्रिदिनवृद्धिर्नाद्रियते। देवलः,—

परतः परतः शुद्धिरघवृद्धौ विधीयते।
स्याच्चेत् तत्पञ्चमादह्नः पूर्व्वेणाप्यनुशिष्यते॥

सपिण्डाशौचमेव द्विविधं भवति। किञ्चिदघवृद्धिरहितं किञ्चिदघवृद्धिमत्। सपिण्डमध्येऽपि सहोदरभ्रातृपितृव्यतत्पुत्रसूतकमन्तरङ्गम्। तथा भार्य्यायाः पत्युः। पत्युश्च भार्य्यायाः। तथा सपिण्डत्वाविशेषेऽपि विद्यायज्ञसदाचारवयोवृद्धत्वादिगुणवतः जननमरणे गुरुतरमशौचम्। एवमन्तरङ्गत्वकृतं गुणवत्त्वकृतञ्चाशौचस्य गुरुत्वम्। एवञ्च सति पूर्व्वस्याघवृद्धिरहितस्याशौचस्योत्पन्नस्य पूर्व्वभागे कथितद्विधाघवृद्धिमदशौचान्तरपाते पूर्व्वेण शुद्धिः। द्वितीयभागे तादृशाघवृद्धिमदशौचपाते द्वितीयेन शुद्धिः। तदुत्तरभागपतितमप्यशौचं

(१) D. ० निमित्तश्रवणे ०।

द्विधाकृत्वा तद्भागद्वये तदपेक्षयाधिकाघवृद्धिमदशौचपाते पूर्व्वं चेत् पूर्व्वेण परतः परेणेत्येवं शुद्धिः। एवं ततः परमपि विचार्य्यमिति परतः परत इति वीप्सया दर्शितम्।

तथा च ब्राह्मे,—

[1]आद्यं भागद्वयं यावन्मृतकस्य तु सूतके।
द्वितीये पतिते चाद्यान्मृतकात् शुद्धिरिष्यते॥
अत ऊर्द्धं द्वितीयात्तु सूतकात्तु शुचिः स्मृतः।
एवमेव विचार्य्यं स्यान्मृतके मृतकान्तरे॥

एतदपि न वर्द्धयेदघाहानीत्यनेन निषिद्धत्वाद् वैकल्पिकं यथाचारं देशेषु व्यवस्थितमिति नास्मद्देशे विचार्य्यते। अन्तरङ्गगुणभावेन[2] शुद्धिविचारः कलौ नास्तीत्यप्याहुः। अङ्गिराः,—

अनिर्दशाहे जनने पश्चात् स्यान्मरणं यदि।
प्रेतमुद्दिश्य कर्त्तव्यं तत्राशौचं स्वबन्धुभिः॥

देवलः,—

मरणोत्पत्तियोगे तु गरीयो मरणं भवेत्।

ब्राह्मे,—

शवेन शुद्ध्यते सूति र्न सूतिः शवशोधिका।

तदेतत् सर्व्वमालोच्योक्तम्,—

दीर्घाल्पापि पुरा परापि सततं सूतेर्मृतिः शोधिका।

(१) E. F. आद्यं भागद्वयं यावत् सूतकस्य तु सूतके।
द्वितीये पतिते चाद्यात् सूतकात् शुद्धिरिष्यते॥

(२) B. D. गुणवद्द्भावेन ०।

[इति ।][1]

खल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद् यदि ।

न च पूर्व्वेण शुद्धिः स्यात् खकालेनैव शुद्ध्यति ॥

इत्युशनसोक्तं सजातीयविषयम् । खल्पकालीनमरणाशौचस्य दीर्घकालसूतकं बाधकमिति हारलताकारव्यवस्था नादेया ।

वृहन्मनुः,—

गुरुणा लघु शुद्ध्येत लघुना नैव तद्गुरुः ।

सजातीयदीर्घाल्पकालीनशौचविषयमिदमपि । वृद्धात्रिः,—

सूतकाद् द्विगुणं शावं शावाद् द्विगुणमार्त्तवम् ।

आर्त्तवाद् द्विगुणा सूति स्ततोऽधि[2] शवदाहकः ॥

दाहकः दाहादिप्रेतकर्म्मकर्त्ता । स्मृत्यन्तरे,—

शेषाहोभिर्विशुद्ध्येत उदक्यां सूतिकां विना ।

सर्व्वत्र पूर्व्वाशौचेन शुद्धौ सूतिकां रजखलां क्रियाकर्त्तारं त्यक्त्वान्येषां शुद्धिरित्यर्थः । विगतन्तु विदेशस्थं कौर्म्मे,—

देशान्तरगतं श्रुत्वा सूतकं शावमेव च ।

तावदप्रयतो मर्त्त्यो यावत् शेषं समाप्यते ॥

शेषं अशौचदिनशेषम् । यत्तु स्मृत्यन्तरे गिरिनदीव्यवहित-षष्टियोजनाद्यात्मकदेशान्तरमरणे सद्यःशौचविधानं तदत्र समाचाराबाद्रियते । मनुः,—

अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् ।

(१) A. C. Omit the portion bracketed.

(२) B. स्ततोधि ° ।

वृद्धवशिष्ठः,—

मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा ।

अहस्तु नवमादर्वागूर्द्धं स्नानेन शुद्ध्यति ॥

इति । एतच्चातिक्रान्ताशौचं मृतके न सूतके । अस्मद्देशे समाचाराभावान्न व्यवस्थाप्यते । अतएव विज्ञानेश्वरो नानादिवस-शोधकवाक्यान्युदाहृत्य समाचाराभावादेतानि न व्यवस्थाप्यन्त इत्युक्तम् ।

पित्राद्यशौचे विशेषः ।

पैठीनसिः,—

पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः ।

श्रुत्वा तद्दिनमारभ्य दशाहं मृतकी भवेत् ॥

आग्नेये,—

[1]पितृमातृप्रपाते तु आर्द्रवासा ह्युपोषितः ।

अतीतेऽब्देऽपि कुर्व्वीत प्रेतकार्य्यं यथाविधि ॥

स्मृत्यन्तरे,—

मातर्य्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ।

पितुः शेषेण शुद्धिः स्यान्मातुः कुर्य्यात्तु पक्षिणीम् ॥

मातरि मृतायां पश्चात् पितृमरणे उत्तरभाविनापि पितृमरणेनैव शुद्धिः । द्वयोरेकादशाहकृत्यं पितुरेकादशाहे कार्य्य-

(१) D. पितृमातृप्रघाते तु ° ।

[मिति विज्ञानेश्वरः ।][1] पितृमरणाशौचमध्ये पश्चान्मातृमरणेऽपि[2] पितुरशौचं समाप्य पश्चात् पक्षिणीं प्रक्षिप्य शुद्धिः । न पूर्व्वशेषमात्रेण दशाहानन्तरम् ।[3] स्मृतिः,—

पितृपत्न्यामतीतायां मातृवर्जं द्विजोत्तम ।
संवत्सरे व्यतीते तु त्रिरात्रमशुचिर्भवेत् ॥

संवत्सरात् पूर्व्वं दशरात्रमित्यर्थः । अङ्गिरा यमश्च,—

द्विसन्ध्यं सद्य इत्याहु स्त्रिसन्ध्यमहरुच्यते ।
एकरात्रिर्दिने द्वे च पक्षिणीत्यभिधीयते ॥

त्रिरात्राशौचम् ।

हारीतः,—एकाहमसपिण्डतः । अनुपनीतपरम् । जावालः,—समानोदकानां त्र्यहम् । कौर्म्मे,—मातामहश्वश्रुश्वशुरमरणे त्रिरात्रम् । प्रचेताः,—मातृष्वसृमातुलयो ऋत्विजि त्रिरात्रम् । गोतमः,—[4]आचार्य्यपूर्व्वस्त्रीयाज्यशिष्येषु चैवम् । अङ्गिराः,—दौहित्रे भगिनीपुत्रे त्रिरात्रम् । एतेषां मातामहादिभगिनी-

---

(१) A. C. D. Omit the portion bracketed.

(२) D. ० मरणे तु ० ।

(३) B. D. Add here पक्षिणीं समाप्य द्वयोरेकादशाहकृत्यं कार्य्यमिति विज्ञानेश्वरः ।

(४) B. D. आचार्य्यतत्पूर्व्व ० ।

सुतान्तानां स्वगृहे स्थितानां मरणे त्रिरात्रम् । [1]स्वगृहे तु त्रिरात्रं स्यादित्यङ्गिरोवचनात् । एतेषामेव स्वगृहादन्यत्र मृतानां संस्कृते पक्षिणी रात्रिरिति [2]तद्वचनबलादेव पक्षिणी । मनुः,—

श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत् ।
अश्रोत्रियेत्वहः कृत्स्नं

उपसम्पन्ने स्वगृहस्थे । वशिष्ठः,—प्रत्तानां स्त्रीणां त्रिरात्रमशौचम् । पित्रोरित्यर्थः । बृहस्पतिः,—पित्रोर्मरणे विन्नानां [3]स्त्रीणां त्रिरात्रम् । कश्यपः,—अनशनजलाग्न्यादिप्रमादहतानां त्रिरात्राशुद्धिमाह । तथा [4]रणे पराङ्मुखहते लोष्टलगुड़ादिडिम्बाहवहते तु त्र्यहम् । सम्मुखहतस्यापि कालान्तरमृतौ त्र्यहम् । शुनःपुच्छः,—

अग्न्यादिना विपन्नस्य चातुर्व्वर्णस्य रोगिणः ।
सपिण्डास्तस्य शुद्ध्यन्ति त्रिरात्रेण न संशयः ॥

गोतमः,—प्राणान्तिकप्रायश्चित्ते त्र्यहम् । [5]प्रमादादग्न्यादिना मरणे सम्पूर्णाशौच[6]मङ्गिरसोक्तं सगुणमृतविषयम् ।

---

(१) D. स्वगृहेषु त्रिरात्रं ० ।
(२) D. ० तद्वचनादेव ० ।
(३) D. दुहितृणां ।
(४) D. मरणे ० ।
(५) D. प्रमादादग्न्यादिमरणे ० ।
(६) D. ० मङ्गिरः प्रोक्तं ० ।

पक्षिणी ।

मनुः,--

श्वशुरयोर्भगिन्याश्च मातुलान्याश्च मातुले ।

पित्रोः श्वसरि च प्रेते पक्षिणीं क्षपयेन्निशाम् ॥

मनुः,--शिष्यर्त्विक्बान्धवेषु च पक्षिणीत्यर्थः । बान्धवानाह

कात्यायनः,—

आत्ममातुः स्वसुः पुत्रा आत्मपितुः स्वसुः सुताः ।

आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥

पितुः पितुः स्वसुः पुत्राः पितुर्मातुः स्वसुः सुताः ।

पितृमातुलपुत्राश्च विज्ञेया पितृबान्धवाः ॥

मातुर्मातुः स्वसुः पुत्रा मातुः पितुः स्वसुः सुताः ।

मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ।

एतेषु पक्षिणीत्यर्थः ।

एकाहः ।

विष्णुः,——आचार्य्यपत्नीपुत्रोपाध्यायमातुलमातुःस्वसृश्वशुर-[1]सहाध्यायिशिष्येष्वेकरात्रेण । अत्र श्वशुरादिपदं विदूरपरम् ।[2]

अहरित्यनुवृत्तौ जावालः,—

मातृबन्धौ गुरौ मित्रे मण्डलाधिपतौ तथा ।

---

(१) D. श्वश्रुसहा ० ।

(२) A. दूरपरम् ।

मनुः,--

सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम् ।

प्रेते राजनि सज्योतिर्य्यस्य स्याद्विषये स्थितिः ॥

सूर्य्यज्योतिर्मृतौ यावत्सूर्य्यालोकमशौचम् । एवं नक्षत्रज्योतिषि मरणे यावन्नक्षत्रदर्शनम् ।

सद्यः ।

डिम्बाहवहतानाञ्च तथैव प्राणसत्रिणाम् ।

नदीश्वापददंष्ट्रिभ्यः सद्यःशौचं विधीयते ॥

सद्यःशौचं स्नानमात्रम् । द्वे सन्ध्ये सद्य [1]इत्यस्य नादरः ।

एतच्च बुद्धिपूर्व्वमरणे । पराशरः,--

विषोद्बन्धनशस्त्रेण आत्मानं योऽभिघातयेत् ।

मृतोऽमेध्येन लेप्तव्यो नान्यं संस्कारमर्हति ॥

[2]पतितानां न दाहः स्यान्नान्त्येष्टि[3]र्न च सञ्चयः ।

न चाश्रुपातः पिण्डो वा कार्य्यः श्राद्धादिकं तथा ॥

षट्त्रिंशन्मते,--

गोब्राह्मणहतानाञ्च पतितानां तथैव च ।

---

(१) B. इत्यनादरः । D. इति नादरः ।

(२) D. Here adds.—ब्राह्मे,—पतितानां ० ।

(३) D. ० र्नास्थिसञ्चयः ।

ऊर्द्ध्वं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्ध्वदेहिकम् ॥

नारायणबलिपूर्व्वकमित्यर्थः। सुमन्तुः,—अग्निजलसङ्ग्राम-देशान्तरस्थसन्न्यास्यनशनिमहाध्वनिकानामुदकदानं कार्य्यं सद्यः शौचं भवति। सन्न्यासिमरणे पुत्रस्यापि तद्दिने उदकदानमात्रं[1] श्रवणे सद्यःशौचमेव। महाध्वनिको महाप्रस्थानमृतः।

विष्णुपुराणे,—

मित्रे जामातरि प्रेते दौहित्रे भगिनीपतौ।

श्यालके तत्सुते चैव सद्यः शौचेन शुध्यति ॥

मित्रे वैवाहिकव्यतिरिक्ते। कौर्म्मे,—

देशान्तरमृते चैव क्लीवे वैखानसे यतौ।

सद्यः शौचं समाख्यातं श्यालादिमरणे तथा ॥

आदिशब्देनाभिचारमृतानां ग्रहणम्।

ब्रह्मचारिणि भूपे च शतौ शिल्पिनि दीक्षिते।

नाशौचमित्यर्थः। कात्यायनः,—

अशौचं कर्म्मणोऽन्ते स्यात् त्र्यहं वा ब्रह्मचारिणाम्।

[तथा,—

आदिष्टा नोदकं कुर्य्यादाव्रतस्य समापनात्।

समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत् ॥

तथा,—

आचार्य्यपित्रुपाध्यायान् निर्हृत्यापि व्रती व्रती।

शकटान्नञ्च नाश्नीयान्न च तैः सह संवसेत् ॥

(१) A उदकमात्रदानं।

आदिष्टा ब्रह्मचारी। पितृपदमेकशेषात् पितृमातृपरम्। [1]आचार्य्यादिव्यतिरिक्तप्रेते कार्य्यं न कार्य्यम्। शकटान्नं प्रेतान्नम्।][2] पराशरः—

कारवः शिल्पिनो दासा वैद्यामात्यास्तथैव च।

राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्त्तिताः ॥

दातारो नियमी चैव[3] ब्रह्मविद्ब्रह्मचारिणौ।

दातारो नित्यदातारः। एवं नियमाः।[4] बौधायनः,—परशवोपस्पर्शनेऽनभिसन्धिपूर्व्वकं सचेलोऽपः स्पृष्ट्वा शुचिर्भवति। अभिसन्धिपूर्व्वके त्रिरात्रम्। अभिसन्धिर्धनग्रहणादि। तथा पुष्पवतीशवस्पर्शने त्रिरात्रम्। मनुः,—

शवं तत्स्पर्शकञ्चैव स्पृष्ट्वा स्नानेन शुद्ध्यति।

याज्ञवल्क्यः,—

प्रवेशनादिकं कर्म्म प्रेतसंस्पर्शनामपि।

नारं स्पृष्ट्वास्थि सस्नेहं सवासा जलमाविशेत् ॥

आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च।[5]

विजातीयास्थि वशिष्ठः,—मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रम्। अस्निग्धे त्वहोरात्रम्। गोतमः,[6]—अवरश्चेत् पूर्व्वं वर्णमुपस्पृशेत्

(१) E. F. आचार्य्यादिव्यतिरिक्ततया तत् कार्य्यं न कार्य्यम्।
(२) B. D. Omit the portion bracketed.
(३) A. C. नियमाश्चैव ०।
(४) D. ० नियमः।
(५) B. भिद्यते C. मीक्ष्यते।
(६) B D. गौतमः।

पूर्व्वो वाऽवरं तदा स्वजात्युक्तमशौचम्। उपस्पर्शनं निर्हरणम्। बृहस्पतिः,—

यस्तैः सहासपिण्डोऽपि प्रकुर्य्यात् शयनासनम्।

स दशाहेन शुद्ध्यति। सजातीयविषयमिदम्। सर्व्वे वर्णाः सजातीयं दग्ध्वा त्र्यहमशौचिनः। विजातीयञ्च निर्दह्यावरजातिवत्। मूल्येन सजातीयं परजातीयं सर्व्वथा। मनुः,—प्रेतानुगमने सचेलस्नानं वह्न्युपस्पर्शनं घृतप्राशनम्। शूद्रशवानुगमने पराशरोक्तं त्रिरात्राशौचम्। क्षत्रियवैश्यशवानुगमने वशिष्ठोक्तमेकाहः। ब्राह्मे,—

मृतस्य यावदस्थीनि ब्राह्मणस्याहृतान्यपि।

तावत् तद्बान्धवस्तत्र रौति चेत् स्नानतः शुचिः॥

ऊर्द्ध्वमाचमनम्। अस्थिसञ्चयनात् पूर्व्वं क्षत्रवैश्यशवे रोदनेऽहः। तदूर्द्ध्वं सचेलस्नानम्। अनस्थिसंस्थिते शूद्रे रोदने त्रिरात्रं तदूर्द्ध्वमेकाहः। कात्यायनः,—

अस्थ्नामलाभे पर्णानां शकलान् पूर्व्वया वृता।

दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकम्॥

इदमाहिताग्निविषयम्। दाहादूर्द्ध्वमाहिताग्नेरशौच[1]मित्यस्यैवानुवादः। [यत्तु][2] ब्राह्मे,—अनाहिताग्नेर्देहस्तु दाह्यो वाह्याग्निनेत्युपक्रम्य पर्णनरदाहमुक्त्वा

(१) D. ० मित्यस्यानुवादः।

(२) D. Omits the portion bracketed.

एवं पर्णनरे दग्धे त्रिरात्रमशुचिर्भवेत्।

इति वचनं पर्णदाहे निमित्ते त्रिरात्राशौचविधायकम्। श्रौताग्नेरपि [1]पर्णदाहोत्तराशौचस्य समान[2]विषयत्वेन बाधकम्। निरग्नेस्तु दशाहमध्ये पर्णदाहे मरणज्ञानावधिकस्याशौचस्य भिन्नविषयकतया पर्णदहननिमित्ताशौचेन बाधः। किन्त्वशौचसन्निपातन्यायेन दशरात्रस्य बहुकालीनत्वेन दाहनिमित्तत्रिरात्रबाधकत्वम्। न च दाहनिमित्तकत्रिरात्रं दशरात्रबाधकं किं न स्यादिति वाच्यम्। निरग्नेर्दशाहोर्द्ध्वपतितपर्णदाहसावकाशत्वेन भिन्नविषयतया बाधकत्वासम्भवात्। श्रौताग्नेस्तु दाहावध्यशौचस्य समानत्वाद् बाधकत्वमित्युक्तम्। आतुरसन्न्यासिमरणेऽपि सद्यःशौचमिति केचित्। वस्तुतः सुमन्तुवचने सन्न्यासिपदोपादानेऽपि सन्न्यस्ते सद्यःशौचं विधीयत इति वचनात्। सन्न्यस्तपदे निष्ठान्ते साङ्गप्रधानक्रियोपरमप्रतीतेः। दीक्षितनियमे साङ्गदीक्षाव्यापारोपरमप्रतीतिवत्। सर्व्वेतिकर्त्तव्यतायुक्तसन्न्यासस्यापवर्गे सन्न्यस्तत्वमिति। तदुक्तं परेण,—वेदनादीक्षितः स्यात् सर्व्वैर्दीक्षाभिः सम्बन्धादित्यत्र पञ्चमे। तथाहिताग्निधर्म्माः [3]साङ्गाभिधानाभिनिर्वृत्त्यनन्तरमेव। तदुक्तं संस्कृते कर्म्मसंस्काराणां तदर्थत्वादित्यपि पञ्चमे। प्रैषोच्चारणमात्रे सन्न्यस्तत्वाभावादपवादाभावेन दशाहाशौचमेव। अतएव साङ्गप्रधानाभिनिर्वृत्त्या-

(१) D. पर्णदाहे त्रिरात्रस्य समानविषयत्वेन ०।

(२) A. ० विषयत्वबाधकम्।

हिताग्नित्वमिति तन्मध्यमरणे नाहिताग्निविधिः । एवं सुमन्तुवचने सन्न्यासिपदं सन्न्यस्तपरमिति प्रतिभाति ।

सर्व्वौषधिगणः ।

विष्णुपुराणे,—

व्रीहयः सयवा माषा गोधूमा अणवस्तिलाः ।
प्रियङ्गुसप्तमा ह्येते अष्टमाः सकुलत्थकाः ॥
श्यामाकास्त्वथ नीवारा [1]जर्त्तिलाः सगवेधुकाः ॥
तथा वेणुयवाः प्रोक्तास्तथा मर्कटका मुने ॥
[2]ग्राम्यारण्यास्तृता ह्येता औषध्यस्तु चतुर्द्दश ।

[3]जर्त्तिलाः पर्व्वततिलाः । स्कान्दे,—

यवगोधूमधान्यानि तिलाः कङ्गुकुलत्थकाः ।
माषा मुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः ॥[4]
गवेधुकाः सनीवारा आढ़क्योऽथ कुलत्थिकाः ।
चणकास्तिलकाश्चेति धान्यान्यष्टादशैव तु ॥

---

(१) B. जम्भलाः ० ।
(२) E. F. ग्राम्यारण्याः स्मृता ह्येता ० ।
(३) B. जम्भलाः ।
(४) A. निष्पावाश्चत्थसर्षपाः ।

निष्पावः सितसिम्बिः । आढ़की तितुड़ी । छन्दोगपरिशिष्टे,—

व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः[1] ॥

तथा,—

कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दनम् ।
शठीचम्पकमुस्तञ्च सर्व्वौषधिगणः स्मृतः ॥

गारुड़े,—

कर्पूरं चन्दनं दर्पं कुङ्कुमञ्च समांसकम् ।
सर्व्वगन्धमिति प्रोक्तं समस्तसुरदुर्लभम् ॥

दर्पः कस्तूरिका ।

कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा ।
कक्कोलञ्च भवेदेभिः पञ्चभिर्यक्षकर्द्दमः ॥
कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैकं शशिनः स्याच्चतुः समम् ॥

शशिनः कर्पूरस्य । कालिकापुराणे,—

कनकं कुलिशं नीलं पद्मरागञ्च मौक्तिकम् ।

एतानि पञ्चरत्नानि । आदित्यपुराणे,—

कनकं रजतं मुक्ता राजावर्त्तप्रवालकम् ।

---

(१) C. ० धारिणः ।

पञ्चरत्नमुक्तम्। तथा,—

अभावे सर्व्वरत्नानां हेम सर्व्वत्र योजयेत्।

ब्रह्माण्डे,—

अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः।
पञ्चभङ्गा इति प्रोक्ताः सर्व्वकर्म्मसु शोभनाः॥

शिवधर्म्मे,—

पञ्चामृतं दधिक्षीरशितामधुघृतं नृप।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
पञ्चगव्यमिति प्रोक्तं सर्व्वपापप्रणाशनम्॥

याज्ञवल्क्यः,—

जालसूर्य्यमरीचिस्थं त्रसरेणू रजः स्मृतम्।
तेऽष्टौ लिख्या तु तास्तिस्रो राजसर्षप उच्यते॥
गौरस्ते तु त्रयः षट् ते यवो मध्यस्तु ते त्रयः।
कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोड़श॥
पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्त्तितम्।
द्वे कृष्णले रूप्यमाषो धरणं षोड़शैव ते।
शतमानन्तु दशभिर्धरणैः पलमेव च।
निष्कं सुवर्णाश्चत्वारस्ताम्रिकः कार्षिकः पणः॥

रूप्यस्य सुवर्णमानाद्भिन्नं मानमित्यभिप्रायेणाह द्वे कृष्णले रूप्यमाषः। सुवर्णस्य द्वितीया संज्ञा कर्षक इति सुवर्णमानमितं ताम्रं पण उच्यते। ताम्रकर्षकृता मुद्रेति बृहस्पतिवचनात्।

नारदः,—

(१)कार्षापणो दक्षिणस्यां दिशि रौप्ये प्रवर्त्तते।
पणैर्निबद्धः पूर्व्वस्यां षोड़शैव पणस्य तु॥

एवं ताम्रषोड़शकर्षेण कार्षापणः। लौकिकमाढ़द्वाविंशन्मितं ताम्रमित्यर्थः।

काकणी तु चतुर्भागो माषकस्य पलस्य च।

माषकचतुर्भागे पलचतुर्भागे च काकणीशब्दो मानार्थ इत्यर्थः। विष्णुगुप्तः,—रूप्यपलं दश धरणिकं तत्पलानां शतं तुला तुलाविंशतिभिर्भारः। अष्टाढ़मितं रूप्यं पलं तच्छतं तुलेत्यर्थः। तथा,—

दीनारो रोपकैरष्टाविंशत्या परिकीर्त्तितः।

सुवर्णस्य सप्ततितमो भागो रोपक उच्यते। विष्णुधर्म्मोत्तरे,—

पलञ्च कुड़वः प्रस्थ आढ़को द्रोण एव च।
धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः॥
द्रोणैः षोड़शभिः खारी विंशत्या कुम्भ उच्यते।
कुम्भैस्तु दशभि र्वाहो धान्यसंख्याः प्रकीर्त्तिताः॥

---

(१) The original text of नारदस्मृति published by the A. S. B. reads :—

कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्त्तते।
पणैर्निबद्धः पूर्व्वस्यां विंशतिस्तु पणाः स तु॥

See page 229 verse 57.

गोपथब्राह्मणे,—

पञ्चकृष्णलको माषस्तैश्चतुःपञ्चभिः पलम्।
पलैर्द्वात्रिंशभिः प्रस्थो मागधेषु प्रकीर्त्तितः॥
आढ़कस्तैश्चतुर्भिस्तु द्रोणः स्याच्चतुराढ़कः।

अत्र लौकिकाष्टाढ़मितपलं तेन द्वात्रिंशत्पलैः प्रस्थम्। एवञ्च प्रस्थषोड़शपलत्वं षोड़शमात्रात्मकपलाभिप्रायम्। वैद्यशास्त्रे तथैव व्यवहारात्। तथा,—

खारिद्रोणाढकः प्रस्थः कुड़वश्च पलं पिचुः।
माशको माषकश्चेति यथापूर्व्वं चतुर्गुणाः॥

द्रवद्रव्यविषये स्कान्दे,—

पलद्वयेन प्रसृतं द्विगुणं कुड़वं मतम्।
चतुर्भिः कुड़वैः प्रस्थ आढकस्तैश्चतुर्गुणैः॥
चतुर्गुणो भवेद् द्रोण इत्येतद् द्रवमाणकम्।

भूमानम्।

आगमे,—

त्रसरेणुरथ रेणुर्वालाग्रं तदनु लिख्या च।
यूका यवोऽङ्गुलमिति परिमाणानि क्रमशोऽष्टगुणानि।

आदित्यपुराणे—एतादृशमङ्गुलिमुक्त्वा

द्वादशाङ्गुलमात्रो वै वितस्तिस्तु प्रकीर्त्तितः।
अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते॥

तालः स्मृतो मध्यमया गोकर्णाख्यस्त्वनामया।
कनिष्ठया वितस्तिस्तु द्वादशाङ्गुलिकः स्मृतः॥
रत्निस्त्वङ्गुलिपर्व्वाणि विज्ञेयस्त्वेकविंशतिः।
चत्वारि विंशतिश्चैव हस्तः स्यादङ्गुलानि तु॥
किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिंशदङ्गुलिः।
षट्नवत्यङ्गुलैश्चैव धनुर्द्दण्डः प्रकीर्त्तितः॥
धनुर्द्दण्डयुगं नाली वेदा न्यूने यवाङ्गुलैः।
[धनुषा त्रिंशतानल्पमाहुः संख्याविदो जनाः॥][1]
धनुःसहस्रे द्वे वापि गव्यूतिरुपदिश्यते।
अष्टौ धनुःसहस्राणि योजनन्तु प्रकीर्त्तितम्॥

मार्कण्डेये,—

क्रोशो धनुःसहस्रे द्वे गव्यूतिश्च चतुर्गुणा।

[बृहस्पतिः,—][2]

दशहस्तेन दण्डेन त्रिंशद्दण्डानि वर्त्तनम्[3]।
दश तान्येव गोचर्म्ममानमाह प्रजापतिः॥

वशिष्ठः,—

दशहस्तेन दण्डेन दशवंशान् समन्ततः।
पञ्चकाभ्यधिकान् दद्यादेतद् गोचर्म्म चोच्यते॥

---

(१) B. Omits the portion bracketed.

(२) D. Omits the portion bracketed

(३) C. • वर्त्तकम्।

मन्त्रदीक्षाद्युपयुक्तमण्डपादिकं लिख्यते।

तत्रादौ दिक्साधनम्। कात्यायनः,—समे शङ्कुं [1]निखाय शङ्कुसम्मितया रज्ज्वा [2]मण्डपं परिलिख्य यत्र रेखयोः शङ्क्वग्रच्छाया निपतति सा प्राची।

घटनागमे,—

सारदखदिराद्येन दारुणा द्वादशाङ्गुलः।
मूले षडङ्गुलस्थूलः शङ्कुः स्याद् द्वादशाङ्गुलः॥
क्रमेण ह्रस्वश्चाग्रेऽसौ यवमात्रः प्रकीर्त्तितः।
तं समे भूतले न्यस्य शङ्कुं तत्परितः क्रमात्॥
द्वादशाङ्गुलमानेन वृत्तान्यष्टौ समालिखेत्।
शङ्कुच्छायां वृत्तरेखां प्रविशन्तीं प्रतीचीतः॥
प्राच्यां विनिष्क्रमन्तीं चाप्यङ्कयेद् विषुवे गुरुः।
प्रथमे मण्डले चिह्नात् प्राची स्याद् विषुवेऽन्यदा॥
षसवत्यङ्गुलिमिते त्वष्टमे मण्डले क्रमात्।
षसवत्याध्रुवा[3] प्राची ततो हीना चलत्यपि॥
विन्दुद्वये सूत्रदानात् पूर्व्वरेखा प्रसिद्ध्यति।
विन्दुद्वयान्तरालस्थं सूत्रं नीत्वास्य मूलकम्॥
पूर्व्वविन्दौ च संस्थाप्य तदग्रान्मण्डलं लिखेत्।
एवं पश्चिमविन्दौ तन्मूलं दत्त्वा च मण्डलम्॥

(१) D. निधाय०। (२) D. मण्डलं०। (३) A. ध्रुवा०।

मण्डलयोर्यत्र योगो दक्षिणोत्तरयोर्भवेत्।
तत्र सूत्रप्रदानेन रेखा स्याद् दक्षिणोत्तरा॥

सूर्य्यसिद्धान्ते,—

शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे।
तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत्॥
तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्वादशाङ्गुलम्॥
तच्छायाग्रं स्पृशेद् यत्र वृत्ते पूर्व्वापरार्धयोः।
तत्र विन्दू विधायोभौ वृत्ते पूर्व्वापराभिधौ॥
तन्मध्ये तिमिना रेखा कर्त्तव्या दक्षिणोत्तरा।
याम्योत्तरदिशोर्मध्ये तिमिना पूर्व्वपश्चिमा॥
दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि।

यत्र च्छायाग्रसंस्पर्शनस्थानस्थविन्दुद्वयान्तरालम्बितसूत्रेण विन्दुद्वये मण्डलद्वयं तत्र मण्डलद्वयसम्बन्धान्मत्स्यो दृश्यते तन्मत्स्यमुखपुच्छसूत्रा दक्षिणोत्तरं रेखा। विन्दुद्वयान्तरा तस्यां रेखायां चिह्नं कृत्वा तच्चिह्ना दक्षिणोत्तरयोर्विन्दुद्वयान्तरालम्बितसूत्रार्द्धमानेनवचिह्नद्वयं तच्चिह्नद्वयान्तरालम्बितसूत्रे तच्चिह्नद्वयवेष्टनेन मण्डलद्वयं कार्य्यं तन्मण्डलद्वयसन्निपातेन मत्स्यो दृश्यते तन्मत्स्यमुखपुच्छयो रेखा कार्य्या सा पूर्व्वापररेखा। विदिक्साधनं वक्ष्यते। स्मृत्यन्तरे,—

कृत्तिकारोहिणीपुष्याचित्रास्वात्योर्यदन्तरम्।
एतत् प्राच्या दिशो रूपं युगमात्रोदितेऽम्बरे॥

युगमात्रं षड़शीत्यङ्गुलम्।

उदीची ध्रुववेधेन मत्स्यवेधेन वा भवेत्।

दीक्षामहादानलक्षहोमाद्युपयुक्तमण्डपे शारदानुसारेण वास्तुपूजा।

आचार्य्यस्तु षष्टिपदमितं मण्डलं कृत्वा कोणसूत्रद्वयं दत्वा पञ्चवर्णैनालङ्कृत्य मध्यकोष्ठचतुष्टये ब्रह्माणं तत्पूर्व्वादिषु कोष्ठ-द्वन्द्वचतुष्के क्रमेणार्य्यमणं विवस्वन्तं मित्रं महीधरं ब्रह्मचतुष्पदा-ग्न्यादिकोणार्द्धकोष्ठद्वन्द्वेषु क्रमेण सावित्रं सवितारं इन्द्रमिन्द्रजयं रुद्रं रुद्रजयं आपं आपवत्सं तद्बहिःकोणार्द्धकोष्ठसहितकोष्ठद्वन्द्वेषु प्राच्यां शर्व्वं गुहं दक्षिणेऽर्य्यमणं जम्भकं पश्चिमे पिलिपिञ्जं चरकं उत्तरे विदारीं पूतनाम्। अन्तिमपंक्तौ कोणार्द्धकोष्ठमादायाष्टाष्ट-पदेषु ईशानपर्ज्जन्यजयन्तशक्रभास्करसत्यभृशान्तरीक्षान् प्राच्याम्। अग्निपूषवितथगृहक्षतगन्धर्व्वभृङ्गराजमृगान् दक्षिणे। निर्ऋति-दौवारिकसुग्रीववरुणपुष्पदन्तासुरशोषरोगान् पश्चिमे। वायु-नागमुख्यसोमभल्लाटार्गलमुख्यदित्यदितय उत्तरे। पूजयित्वा पयोऽन्नेन बलिदानम्। ब्रह्मादिभ्यः क्रमेण एष पयोऽन्नबलि-र्ब्रह्मणे नम इति मन्त्रैः। एतावन्मात्रम्। गृह्यादौ मत्स्य-पुराणोक्तो वास्तुबलिः। सोऽग्रे वक्ष्यते। अयं वास्तुबलिः सर्व्व-सम्मतः। तत्र दीक्षायां प्रपञ्चसारानुसारेण पञ्चसप्तनवहस्त-मितो वा मण्डपः। अयुतादिहोमत्रये अष्टषोड़शचतुर्विंशति-हस्तः। प्रतिष्ठासु,—

> दशाष्टहस्तं हीनन्तु मध्यं द्वादशषोड़शम्।
> चतुर्विंशतिहस्तं स्यादुत्तमं द्विजपुङ्गव॥

> धूमनिर्गमनोपेतं विचित्रस्तम्भनिर्मितम्।

शारदायाम्,—

> षोड़शस्तम्भसंयुक्तं चत्वारस्तेषु मध्यगाः।
> अष्टहस्तसमुच्छ्रायाः संस्थाप्या द्वादशान्ततः॥
> पञ्चहस्तप्रमाणास्ते निश्छिद्रा ऋजवः समाः।
> यद्वा मण्डपविस्तारस्यार्द्धा चत्वार उच्छ्रिताः॥
> चूड़ान्विताश्च तेषाञ्च बलीका मूर्द्ध्नि सुस्थिताः।
> मण्डपस्य त्रिभागेण स्तम्भा द्वादश चान्ततः॥
> तत् पञ्चमांशं निखनेन्मेदिन्यां मन्त्रवित्तमः।

चूड़ान्विता बलीकाप्रवेशनोचितशिखान्विताः। बलीका च श्रेणीस्थापनोचितान्युत्तरासङ्गदारुणि।

> द्वारेषु तोरणानि स्युः क्रमात् क्षीरमहीरुहाम्।
> अश्वत्थोदुम्बरप्लक्षवटशाखाकृतानि च॥
> पञ्चहस्तप्रमाणान्ते सप्तहस्तास्तथोत्तमे।
> तिर्य्यक्फलकमानं स्यात् स्तम्भानामूर्द्ध्वमानतः॥

अर्द्धमानं पञ्चांशं प्रोतं त्यक्त्वा दृश्यमानस्तम्भस्योर्द्ध्वमान-मित्यर्थः।

> द्विहस्तमन्तरालं स्यान्मध्यमे च षड़ङ्गुलम्।
> अधिकं चोत्तमे तद्वद् द्वादशाङ्गुलमुच्यते॥

हयशीर्षे,—

वर्त्तुलं चतुरस्रं वा तोरणं परिकल्पयेत् ।

चतुःपञ्चाङ्गुलं कुर्य्याद् द्वैगुण्यं[1] तोरणस्य च ॥

नवाष्टदशभिर्वापि कुर्य्याद् द्वादशभिस्तथा ।

द्वैगुण्यमित्यर्थः ।

मस्तके द्वादशांशेन शङ्खचक्रगदाम्बुजम् ।

प्रागादिक्रमयोगेन न्यसेत् तेषां स्वदारुतः ॥

हयशीर्षे,—

त्रिभागेनाथवार्द्धेन कुर्य्याद् वेदीं सुशोभनाम् ।

द्वादशाङ्गुलमुत्सेधा[2] विन्यसेत् परिकीर्त्तिता ॥

चतुरङ्गुलया हृद्या मध्यमोत्तमयोर्भवेत् ।

पक्केष्टकचितां वेदीं सुधालेपेन सुप्रभाम् ॥

योगशिवीये,—

विस्तारार्कांशतः कुर्य्यादेष्टिकीमुपजङ्घिकाम् ।

मण्डपप्रान्तेषु स्तम्भवहिरित्यर्थः । मण्डपे पूर्व्वादिषु ध्वजाः ।

अरुणोऽग्निर्निभश्चैव कृष्णः शुक्लोऽथ पीतकः ।

रक्तवर्णस्तथा श्वेतः सर्व्ववर्णस्तथैव च ॥

मध्ये सिन्दूरसदृशं ध्वजं [3]समभिकल्पयेत् ।

[4]पञ्चहस्ता ध्वजाः कार्य्या विस्तारे षोड़शाङ्गुलाः ॥

मयः,—

द्वादशाङ्गुलविस्तीर्णा विन्यसेत् त्रिकरायतिः ।

(१) C. वैपुल्यं ० । (३) B. D. सम्यक् प्रकल्पयेत् ।
(२) B. ० संच्छेया ० । (४) B. पञ्चवर्णध्वजाः ० ।

एते च मण्डपस्य वाह्ये तोरणवहिः सप्तहस्तदण्डे [1]भूमिगे बन्धनीयाः । तथा प्रतिस्तम्भं लोकेशवर्णाः सप्तहस्ताः पताकाः द्वादशाङ्गुलविस्तीर्णा भूमिप्रोतदशहस्तदण्डेन बन्धनीयाः । ध्वजपताकयोर्दण्डा वंशमयाः । नवचित्रवस्त्रेण वितानं शुक्लेन मध्ये पद्मभूषितं मण्डपमानमुत्तमं वेदीमानं मध्यमं मण्डलमानं कनीयसम् । कलशाः,—सुवर्णरौप्यौडुम्बराः स्युर्जलातकसुपूरिताः (?) । [2]अष्टाविंशत्यधिकशतपलपूराश्च मृन्मयाः । अवक्राः स्फोटरहिताः । कालमण्डलवर्ज्जिताः ।

अथ कुण्डानि ।

देवीपुराणे,—

वेदीपादान्तरं त्यक्त्वा कुण्डानि नव पञ्च वा ।

कुण्डवेद्यन्तरालं वेदीचतुर्थांशमितमित्यर्थः । शारदातिलके वेदीवाह्यं मण्डलावशिष्टं त्रिधा विभज्य मध्येऽंशे कुण्डानीत्युक्तम् । [नारदीये][3] कुण्डवेद्यन्तरालं सपादकरमात्रमुक्तम् ।

चतुरस्रं योनिमर्द्धचन्द्रं त्र्यस्रं सुवृत्तकम् ।

षड़स्रं पङ्कजाकारमष्टास्रं प्राक्क्रमेण तु ॥

आचार्य्यकुण्डं मध्ये स्याद् गौरीपतिमहेशयोः ।

चतुःकुण्डानि दिक्षु स्युरीशाने पञ्चमो भवेत् ॥

(१) भूमिगतेषु ० । D. ० दण्डेषु भूमिषु ० ।
(२) A. B. अष्टाविंशाधिक ० ।
(३) B. D. Omits the portion bracketed.

मन्त्वागमे,—चतुरस्रार्द्धचन्द्रत्र्यस्रपद्माकाराणि [दिक्षु। घटनागमे,—चतुरस्रार्द्धचन्द्रवृत्तपद्माकाराणि][1] [2]प्रागादिदिक्षु। अथ प्रपञ्चसारे,--अथवा दिशि कुण्डमुत्तरस्यां प्रविदध्या[3]च्चतुर्हस्तमेकमेव।

अथ कुण्डनिर्म्माणम्।

छन्दोगपरिशिष्टे,—

अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते।
तत्र तत्र वृहत्पर्व्वग्रन्थिभिर्म्मिनुयात् सदा॥

शारदातिलके,—

कर्त्तुर्दक्षिणहस्तस्य मध्यमाङ्गुलिपर्व्वणः।
मध्यस्य दीर्घमानेन मानाङ्गुलमुदीरितम्॥

कात्यायनः,—

अङ्गुलस्य प्रमाणन्तु षट्यवाः [4]पार्श्वसङ्गताः।

छन्दोगपरिशिष्टाङ्गुलं स्मार्त्तग्रहयज्ञादिविषयम्। मध्यपर्व्वाङ्गुलं तान्त्रिकविषयम्। षट्यवाङ्गुलं श्रौतमानविषयम्। यवाष्टाङ्गुलन्तु साधारणत्वादनारभ्य विधानात् सर्व्वत्र वैकल्पिकम्। मध्यमाङ्गुलिकूर्परयोर्मध्ये प्रामाणिकः कर इति बौधायनोक्तं

(१) A. Omits the portion bracketed.
(२) D. प्रागादिषु।
(३) D. ० च्चतुरस्रमेकमेव।
(४) D. ० पार्श्वसम्मिताः।

स्मार्त्तविषयमेव। यत्तु कात्यायनवचनम्,—यजमानेनोर्द्ध्वबाहुना समस्थितेन प्रपदस्थितेन वा पुरुषसम्मितरज्जुमित्या तस्य पञ्चमांशः करः तस्य चतुर्विंशाङ्गुलमिति तदग्निचयनस्थलमानाधिकारात् तद्विषयमेव। अत्र सर्व्वकुण्डानां ऋजुस्थानज्ञानाय मण्डपे द्वारमध्ये शङ्कुं दत्त्वा दक्षिणोत्तरसूत्रदानम्। [एवं पूर्व्वपश्चाद्द्वारमध्ये शङ्क्वोः सूत्रदानेन पश्चिमोत्तरसूत्रदानम्। एवं कोणसूत्रद्वयदानम्।][1] तेषु सूत्रेषु च वेदीपादान्तरं त्यक्त्वा वेदीवाह्यं त्रिधा विभज्य मध्यभागे वा दिक्षु विदिक्षु च कुण्डानि।

चतुरस्रं शारदायाम्,—

हस्तमात्रमितां भूमिं पूर्व्ववत् परिसूत्रयेत्।
समन्तात् कुण्ड[2]मेतस्याश्चतुरस्रं सुशोभनम्॥

दिक्साधनोक्तरीत्या प्राचीरेखादक्षिणरेखयोः साधनं मध्यद्वादशाङ्गुले चतुर्दिक्षु लाञ्छनम्। तल्लाञ्छनोपरि[3]सूत्रमूलदानेन द्वादशाङ्गुलमितरज्जुभ्रामणेन चतुर्दिक्षु मण्डलं मण्डलद्वयसन्निपातस्थाने कोणचिह्नम्। तेषु सूत्रचतुष्कदानाच्चतुरस्रम्। एतदेवोक्तं सूर्य्यसिद्धान्ते दिङ्मध्यमत्स्यैः संसाध्या विदिश इति। हयशीर्षे च पूर्व्वस्यां दिश्युदङ्मुखयोनिकम्। आग्नेये योनिकुण्डम्। तत्र,—

(१) A. Omits the portion bracketed.
(२) A. ० मेव स्याच्च ०।
(३) A. द्वादशाङ्गुलमितसूत्रदानेन चतुर्द्दिक्षुमण्डलं ०।

चतुरस्रे करमिते [1]अङ्गुलानां समन्ततः ।
षट्सप्तत्युत्तरा पञ्चशती क्षेत्रस्य विद्यते ॥
तथा योन्यादिकुण्डानि तावत्क्षेत्रमितानि च ।
मूलभूतमतस्तेषां चतुरस्रं लिखेद् बुधः ॥

तथाच तन्त्रराजे,—

चतुरस्रेऽभितो या च व्यक्ता भूस्त्वान्यतस्तथा ।
लभ्यते सर्व्वकुण्डेषु तेन सर्व्वाणि सर्व्वतः ॥

तथाच शारदातिलकादौ योन्यादिकुण्डलक्षणं चतुरस्रं न्यूनक्षेत्रत्वा[2]दनादेयमिति रामवाजपेयिदेवेन्द्राश्रमादयः । तत्त्व-युक्तं [3]चतुरस्रस्यास्य शास्त्रस्य कुण्डान्तरे सावकाशत्वान्निरव-काशशारदातिलककाठिन्ययुक्तयोन्यादिकुण्डलक्षणस्य बाधक-त्वासम्भवात् तद्बलेनान्यथा व्याख्यानादिपरत्वकल्पनानुपपत्तेः । अन्यथा यज्जुहोति तदाहवनीय इत्यादि [4]सामान्यस्य शास्त्रस्य बाधभयेन पदे जुहोतीत्यादावपि पदस्थाहवनीये जुहोतीत्येवं लक्षणाकल्पनापत्तेः । तेन सम्भवे चतुरस्रे साम्यं विकल्पो वा । शारदातिलके योनिकुण्डम्,—

चतुरस्रीकृतं क्षेत्रं पञ्चधा विभजेत् सुधीः ।
न्यसेत् पुरस्तादेकांशं कोणार्द्धार्द्धप्रमाणतः ॥

(१) B. ० ऽङ्गुलानान्तु समन्ततः । D. ऽङ्गुलानाञ्च समन्ततः ।
(२) D. ० दनादरणीयमिति ० ।
(३) B. चतुरस्रस्य च शास्त्रस्य ० ।
(४) ० A. B. D. सामान्यशास्त्रस्य ० ।

भ्रामयेत् तेन मानेन तथान्यदपि साधकः ।
सूत्रयुग्मं ततो दद्यात् कुण्डं योनिनिभं भवेत् ॥

चतुरस्रीकृतक्षेत्रस्य ब्रह्मसूत्रं चतुर्विंशाङ्गुलम् । तस्य पञ्चमो-ऽंशो यूकात्रयाधिकषट्-यवसहितमङ्गुलचतुष्टयम् । पूर्व्वभागे ब्रह्मसूत्रेण तावद् वर्द्धनीयम् । नैर्ऋतकोणे कोणसूत्रचतुर्थांशे लाञ्छयित्वा तल्लाञ्छनन्यस्तमूलसूत्रस्याग्रचतुरस्रपश्चिमरेखामध्ये दत्वा परिभ्राम्य मण्डलं कार्य्यम् । [एवं वायव्ये मण्डलं कार्य्यम् ।][1] पश्चिमरेखामध्यं मण्डलद्वयसन्निपातस्थानम् । कोणस्था च मण्डलरेखा । ब्रह्मसूत्रप्रागग्रान्मण्डलद्वयस्पर्शरेखा-द्वयं दक्षिणोत्तरयोः । एवमश्वत्थपत्राभं योनिकुण्डम् । अत्र दक्षिणे योनिरुदङ्मुखी

प्रागग्नियाम्यकुण्डेषु प्रोक्ता योनिरुदङ्मुखी ।

इति वचनात् । एवञ्च ब्रह्मसूत्रे यूकात्रयाधिक्यं परित्यज्या-ष्टविंशयववर्द्धनं श्रेणोशोनविंशतियववर्द्धनेन मण्डलं राम-वाजपेयिनो देवेन्द्राश्रमस्य च नादरणीयम् । योनिकुण्डम् । शारदायाम्,—

चतुरस्रीकृतं क्षेत्रं दशधा विभजेत् पुनः ।
एकमेकं त्यजेदंशमध ऊर्द्ध्वञ्च मन्त्रवित् ॥
ज्यासूत्रं पातयेदग्रे तन्मानाद् भ्रामयेत् ततः ।
अर्द्धचन्द्रनिभं कुण्डं रमणीयं ततो भवेत् ॥

(१) A. B. C. Omit the portionbracketed.

चतुर्विंशाङ्गुलमितदक्षिणोत्तरकुण्डसूत्रस्य दशधाभागेन दशमोऽंशः। पञ्चलिख्याधिकैकयूकायुक्तयवत्रयसहितमङ्गुलद्वयमिति न दक्षिणोत्तरयोरेकैकांशत्यागे मध्यसूत्रं लिख्यापञ्चकयुक्तयूकाधिकोनविंशाङ्गुलमितं भवति। उदङ्मुखस्य कर्त्तुरग्रे मध्यदक्षिणोत्तरसूत्रस्य दक्षिणाग्रे पूर्व्वपश्चिमायतं ज्यासूत्रम्। [दक्षिणोत्तरायतसूत्रदक्षिणपाते सूत्रमूलं दत्वा तस्य सूत्रस्योत्तराग्रे सूत्राग्रं दत्वा भ्रमणेनार्द्धचन्द्रम्।][1] [दक्षिणे मण्डलमुत्तरे।][2] देवेन्द्राग्रमेण ज्यासूत्रं पश्चिमे मण्डलं पूर्व्वे दर्शितम्। अस्य दक्षिणस्था उदङ्मुखी योनिः। शारदातिलके,—

> चतुर्द्धा भेदिते क्षेत्रे न्यसेदुभयपार्श्वयोः।
> एकैकमंशं तन्मानादग्रतो लाञ्छयेत् ततः॥
> सूत्रद्वयं बुधः कुर्यात् त्र्यस्रं कुण्डमुदाहृतम्।

पश्चिमसूत्रस्य दक्षिणे षडङ्गुलवृद्ध्या चिह्नम्। एवमुत्तरे। यथा पूर्व्वापरायतकुण्डमध्यसूत्रस्य पूर्व्वदिशि षडङ्गुलवृद्ध्या चिह्नम्। तेषु सूत्रत्रयदानात् त्र्यस्रम्। अस्य पश्चिमे योनिः।

(१) A. B. C. Omit the portion bracketed.

(२) D. Omits the portion bracketed.

वृत्तकुण्डः।

त्रिपुरासारे,—

> दिग्गजाभ्यधिकपंक्तिभागतः क्षेत्रतो निशितधीर्वहिर्न्यसेत्
> भागमेकमनेन सर्व्वतो भ्रामयेद् भवति वृत्तमुत्तमम्॥

दिग्गजाधिकपंक्तिभागः अष्टादशभागः। पञ्चयूकाधिकयवद्वययुक्तमेकाङ्गुलम्। चतुर्द्दिक्षु तावद् वर्द्धयित्वा कुण्डमध्ये सूत्रं दत्वा वर्द्धितांशे सूत्राग्रं दत्वा भ्रामणेन वृत्तं कुण्डम्। पश्चिमेऽस्य योनिः। शारदातिलके,—

> अष्टधा विभजेत् क्षेत्रं मध्यसूत्रस्य पार्श्वयोः।
> भागं न्यसेदेकमेकं मानेनानेन मध्यतः॥
> कुर्य्यात् पार्श्वद्वये मत्स्यचतुष्कं तन्त्रवित्तमः।
> सूत्रषट्कं ततो दद्यात् षडस्रं कुण्डमुत्तमम्॥

हस्तमितकुण्डस्य दक्षिणोत्तरमध्यसूत्रचतुर्विंशाङ्गुलं तस्याष्टमांशमङ्गुलत्रयम्। दक्षिणोत्तरपार्श्वयोः प्रत्येकं वर्द्धयित्वा चिह्नं कार्य्यम्। तत्र दक्षिणचिह्ने सूत्रमूलं दत्वा कुण्डमध्ये सूत्रान्तरदानेन पञ्चदशाङ्गुलमितरज्जुभ्रामणेन वृत्तम्। एवं कुण्डमध्ये सूत्रमूलं दत्वा [दक्षिणचिह्ने सूत्राग्रं दत्वा][1] भ्रामयित्वा वृत्तं कार्य्यम्। तथाच वृत्तद्वयसन्निपातस्थाने पूर्व्वाग्नेयमध्ये एको मत्स्यः। नैर्ऋतपश्चिममध्येऽपरो मत्स्य इति मत्स्यद्वयसिद्धिः। पुनश्च उत्तरचिह्ने सूत्रमूलं दत्त्वा कुण्डमध्ये सूत्राग्रप्रदानेन भ्राम-

(१) D. Omits the portion bracketed.

यित्वा वृत्तं कुण्डमध्ये सूत्रमूलं दत्वा उत्तरचिह्नसूत्राग्रं दत्वा भ्रामणेन वृत्तम्। वृत्तद्वयसन्निपातस्थाने पूर्व्वेशानमध्ये एको मत्स्यः। वायव्यपश्चिममध्ये चापरो मत्स्यः। एवं मत्स्यचतुष्टयम्। मत्स्ययोरुपरि एकं सूत्रम्। मत्स्याद् दक्षिणचिह्नं यावत् सूत्रम्। दक्षिणचिह्नात् पश्चिमनैर्ऋतमध्ये मत्स्यपर्य्यन्तं सूत्रम्। प्रतीच्यां मत्स्ययोरुपरि सूत्रम्। तन्मत्स्यादुत्तरचिह्नं प्रतिसूत्रम्। उत्तर-चिह्नात् [1]पूर्व्वेशानमध्ये मत्स्यं प्रतिसूत्रम्। तत् सूत्रषट्कमध्ये षड़स्रं कुण्डम्। [2]एवं वायव्ये पश्चिमे योनिः।

पद्मकुण्डम्।

शारदातिलके,—

> चतुरस्रीकृतं क्षेत्रं विभज्याष्टादशांशतः।
> [3]एकं भागञ्च विन्यस्य भ्रामयेत् तेन वर्त्तुलम्॥
> वृत्तानि कर्णिकादीनां वहिस्त्रीणि प्रकल्पयेत्।
> पद्मकुण्डमिदं प्रोक्तं विलोचनमनोहरम्॥

अत्र खाताद् वहिः केशरादिपत्रान्तं खातन्तु कर्णिकास्थाने। तद् वहिः कण्ठमेखलादि। [4]यदाह कामिके,—

(१) D. पूर्व्वेशानमध्यमत्स्यं प्रतिसूत्रम्।
(२) A. B. D. इदं०
(३) D. एकं भागं वह्निर्न्यस्य भ्रामयेत्०
(४) A. C. D. यदा।

> चतुरस्राष्टभागेन कर्णिका स्याद् विभागशः।
> वहिस्त्वेकेन भागेन केशराणि प्रकल्पयेत्॥
> तृतीये दलमध्यानि तुरीये दलकोटयः।
> भ्रामणात् पद्मकुण्डं स्याद् दलाग्रं दर्शयेद्वहिः॥

वहिश्चतुरस्रक्षेत्राद् वहिरष्टमांशेन दलाग्राणि वृत्तरेखा च। एवञ्चाष्टमांशवृद्ध्या मण्डलं कृत्वा तन्मध्ये कर्णिकार्थं भागद्वयेन वृत्तम्। केशरार्थमुभयतो भागद्वयेन वृत्तं दलमध्यार्थ-मुभयतो भागद्वयेन वृत्तं दलकोट्यर्थमुभयतो भागद्वयेन वृत्तमिति कृत्वा कर्णिकास्थाने खननकाले एकांशेनोच्चता कार्य्या। अतएव पद्मकुण्डे नाभिर्नास्ति। पत्राकारपरित्यागेन केशरस्थानावधि-खननम्। पत्रमध्ये केशरद्वयदर्शनम्। अनुपातरीत्या खनने दलाग्रं कण्ठसमभूमौ दर्शयित्वा तत्र कण्ठस्ततो मेखला। पद्ममुत्तरे पश्चिमेऽस्य योनिः। हेमाद्रिदानप्रकाशादिस्वरसादेवं लिखितम्।

अष्टास्रम्।

शारदातिलके,—

> पूर्व्वोक्तं विभजेत् क्षेत्रं चतुर्विंशतिभागतः।
> एकभागं वहिर्न्यस्य चतुरस्रं प्रकल्पयेत्॥
> अन्तस्थचतुरस्रस्य कोणार्द्धार्द्धप्रमाणतः।
> वाह्यस्य चतुरस्रस्य कोणाभ्यां प्रतिलाञ्छयेत्॥

दिशं प्रति यथान्यायमष्टौ सूत्राणि पातयेत्।
अष्टास्रं कुण्डमेतद्धि तन्त्रविद्भिरुदाहृतम्॥

कामिके तु द्वादशभागस्यैकं भागं वह्निर्व्यस्येत्युक्तम्। तेनाष्टाविंशत्यङ्गुलं वाह्यचतुरस्रम्। शारदामते षड्विंशाङ्गुलम्। तत्र चान्तस्थचतुरस्रकोणार्द्धार्द्धं चतुर्य्यवाधिकमङ्गुलाष्टकम्। तेन मानेन कोणपार्श्वेषु चिह्नाष्टकम्। अन्तस्थचतुरस्रं मार्जयित्वा वाह्यचतुरस्रस्य पूर्व्वचिह्नाद् दक्षिणचिह्नं प्रतिसूत्रे दत्ते वह्निकोणं त्यक्त्वा कुण्डस्याग्नेये सूत्रम्। एवं प्रतिकोणं विदिक्-सूत्रदाने कोणप्रोञ्छनम्। अस्य पश्चिमे योनिः। अथ विज्ञानललिते त्रिपुरासारसमुच्चये चाधिकं कुण्डद्वयम्।

पञ्चास्रम्।

विज्ञानललिते,—

सप्तमांशं वह्निर्व्यस्य कृत्वा वृत्तमिह भ्रमात्।
चतुर्थभागन्यूनेन पूर्व्वक्षेत्रेण सम्मितैः॥

धनुर्ज्याकृतिभिः पञ्चसूत्रैः पञ्चास्रकुण्डकम्[1]॥ हस्तकुण्डमध्यसूत्रस्य सप्तमो भागः। अङ्गुलत्रयं त्रयो यवा यूकात्रयञ्च। चतुरस्रं चतुर्द्दिक्षु दत्वा तत्र सूत्राग्रदानेन वृत्तं कार्य्यम्। पूर्व्वक्षेत्रस्य चतुर्विंशाङ्गुलस्य चतुर्थभागन्यूनेनाष्टाङ्गुलेन सम्मितानि पञ्च सूत्राणि [वृत्तस्पृष्टोभयान्तानि धनुर्ज्याकृतीनि समन्ताद् वृत्त-

(१) C ॰ कुण्डसत्तमम्।

मध्ये दत्वा सूत्रद्वयस्थाने कोणं कल्पयित्वा वृत्तरेखां चतुरस्रां च मार्जयित्वा पञ्चसूत्रं रक्षयित्वा पञ्चसूत्रपरिच्छिन्नं पञ्चास्रकुण्डं][1] वृत्तमध्ये दत्वा यत्र वृत्तस्थं सूत्रद्वयसन्निपातस्थानं तत्कोणमिति पञ्च कोणानि तानि च सूत्राणि [2]धनुर्ज्याकाराणि। वृत्तरेखा धनुः। वृत्तरेखाञ्च प्रोञ्छयित्वा पञ्चसूत्रलक्षणेन वृत्तं पञ्चधा विभागं कृत्वा पञ्च चिह्नानि कृत्वा तेषु चिह्नात् चिह्नान्तरं यावत् एकसूत्रं [एवमन्यानि चत्वारि सूत्राणीति।][3] पञ्चसूत्रपरिच्छिन्नं पञ्चास्रं कुण्डं वायव्यकोणे वैकल्पिकम्। भूतग्रहशान्त्यर्थहोमे शस्तमिदम्।

सप्तास्रम्।

त्रिपुरासारसमुच्चये,—

क्षेत्रव्यासे दशांशैर्वह्निरिह विनिधायैकमंशञ्च वृत्तं
मानेनैतेन कृत्वा पुनरपि च चतुःषष्टिभागीकृते तु।
[4]उक्त्वा यावत्प्रमाणं दृढमतिरमुना सत्रिकैस्त्रिंशदंशैः
कुर्य्यात्सप्तास्रकुण्डं भवति हि तदिदं सप्तसूत्रप्रयोगात्॥

(१) A. B. D. Omit the portion bracketed.

(२) D. धनुर्गुणाकाराणि।

(३) D. Omits the portion bracketed.

(४) त्रिपुरासारसमुच्चय Published by Rasik Mohan reads पट्टायामप्रमाणं दृढमति ॰ See page 30 verse no. 14.

हस्तचतुरस्रस्य सार्द्धयूकाधिकयवत्रययुक्ताङ्गुलद्वयं दशमांशं चतुरस्रं वहिर्विन्यस्य तत्र सूत्राग्रदानेन वृत्तं कृत्वा चतुरस्रस्य चतुःषष्टिभागान् कृत्वा यवत्रयमितस्य तस्य भागस्य त्रयस्त्रिंशता यवत्रयाधिकद्वादशाङ्गुलमानेन सप्तसूत्राणि वृत्तरेखास्पृष्टोभयान्तानि धनुर्ज्याकृतीनि वृत्तमध्ये समन्तात् दत्वा सूत्रद्वयसन्निपातस्थाने कोणं कल्पयित्वा [1]मण्डलं रेखाञ्च चतुरस्रञ्च सम्मार्ज्य सप्तास्रम्। विज्ञानललितेऽप्येवम्। तन्त्रान्तरेऽपि,—

चतुःषष्टिषु भागेषु त्रयस्त्रिंशांशमानतः।
वृत्ते निधाय चिह्नानि सप्तसूत्राणि पातयेत्॥

इदमीशानेऽष्टास्रेण सह वैकल्पिकम्। पश्चिमेऽस्य योनिः। अभिचारशान्त्यर्थहोमे शस्तमिदम्।

कण्ठमानम्।

कालोत्तरे,—

खाताद्बाह्येऽङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधिः।

द्विहस्तादिकुण्डेषु [2]कुण्डचतुर्विंशांशोऽङ्गुलम्। एवं मेखलादावपि। तथा च मोहनचूड़ोत्तरे,[3]—

चतुर्विंशतिमं भागमङ्गुलिं [4]परिकल्पयेत्।
चतुर्विंशाङ्गुलं हस्तं कुण्डानां परिकल्पयेत्॥

---

(१) D. मण्डलरेखाञ्च चतुरस्रञ्च सम्मार्ज्य ०।
(२) D. कुण्डचतुर्विंशा ०।
(३) A. B. मोहचूड़ोत्तरे।
(४) D. ० परिकल्पत।

हस्तमात्रं खनेत्तीर्य्यगूर्द्ध्वं मेखलया सह।

एवञ्च कण्ठाद्यङ्गुलमानं कुण्डचतुर्विंशांशरूपपारिभाषिकाङ्गुलपरम्। खातं द्वैधम्। शारदादिमते [1]मेखलां विना।

यावान् कुण्डस्य विस्तारः खननं तावदीरितम्।
मेखलासहितः खातः [2]पक्षो बहुसुसम्मतः॥

प्रतिष्ठासारे,—

पञ्चत्रिमेखलोच्छ्रायं ज्ञात्वा शेषमधः खनेत्।

विश्वकर्म्मा,—

व्यासात् खातः करः प्रोक्तो निम्नस्तिथ्यङ्गुलेन तु।

तिथ्यङ्गुलानि पञ्चदशाङ्गुलानि। मेखलोच्छ्रायो नवाङ्गुलाभिप्रायेण। वशिष्ठसंहितायाम्,—

वितस्तिद्वयखातं यत्कुण्डः स चतुरङ्गुलम्।
विप्राणां क्षत्रियाणां तदङ्गुलित्रयसंयुतम्॥
वैश्यानां द्व्यङ्गुलाधिक्यं शूद्राणां हस्तमात्रकम्।

इति तत्राशस्त्यपरम्। सामान्यवचनानां वैयर्थ्यप्रसङ्गात्।

मेखलालक्षणमुक्तं कामिके,—

[3]क्षेत्रार्कांशेन तस्यौष्ठस्तथा वेदर्त्तुभागतः।
मेखला पृथुतोच्छ्रायैः कुण्डाकारा तु मेखला॥
सर्व्वेषां सा तु कर्त्तव्या मेखलैका च लाघवात्।

---

(१) D. ० मेखलादिना।
(२) D. ० पक्षोऽत्र बहुसम्मतः।
(३) D. पत्राकांशेन ०।

अस्य मते हस्तकुण्डेऽङ्गुलद्वयं कण्ठः। षड़ङ्गुलविस्तृतचतुरङ्गुलोच्छ्राया चैका मेखला सर्व्वकुण्डेषु। पिङ्गलामते तु,—

एका षड़ङ्गुलोत्सेधविस्तारा मेखला मता।

उन्नतापि षड़ङ्गुला। [1]द्वित्रिमेखलं क्रियासारे,—

नाभियोनिसमायुक्तं कुण्डं श्रेष्ठं त्रिमेखलम्।
मध्यं द्विमेखलं कुण्डं नीचं स्यादेकमेखलम्॥

एतेनाशक्तविषयत्वेनैकद्विमेखलपक्षः। कामिके तु लाघवादिति कर्म्मलाघवं प्राप्यैका मेखला।

एकमेखलकं कुण्डं शस्तं संक्षेपकर्म्मणि।

इति ग्रन्थान्तरात्। यत्तु सोमशम्भुतन्त्रे,—

[2]त्रिमेखलं द्विजे कुण्डं क्षत्रियस्य द्विमेखलम्।
मेखलैका तु वैश्यस्य

इति। तत् तेषां विशेषफलदमित्येवं [3]रूपमेव।

मेखलानां त्रयं वापि द्वयमेकमथापि वा।

इत्यविशेषेण वायुसंहितापाठात्। वैश्यः सप्तदशसामिधेनीरनुब्रूयादितिवन्निरवकाशत्वाभावात्। द्विमेखलापक्षे च त्रिमेखलस्य द्वितीयतृतीयमेखलाद्वयमिति सम्प्रदायः। लक्षणसंग्रहे,—

प्रथमा द्व्यङ्गुलव्यासा उन्नता सा [4]नवाङ्गुला।
मध्या तु त्र्यङ्गुला बाह्ये तृतीया द्व्यङ्गुला मता॥

(१) A. D. द्विमेखलम्। B. त्रिमेखलम्।
(२) C. द्विमेखलं ०
(३) D. ० परमेव।
(४) D. ० नवाङ्गुलैः।

एकहस्तद्विहस्तादिसर्व्वकुण्डेषु कुण्डविस्तारचतुर्विंशभागात्मकेनाङ्गुलेन प्रथमा। कुण्डसन्निहिता मेखला द्व्यङ्गुला चतुरङ्गुलविस्तृता। नवाङ्गुलोच्चा। मध्या बाह्यपार्श्वे त्र्यङ्गुलविस्तृता षड़ङ्गुलोत्सेधा। तृतीया द्व्यङ्गुलविस्तारा त्र्यङ्गुलोत्सेधेत्यर्थः। तदुक्तमन्यत्र—खाते चतुर्विंशतिधाविभाजिते समन्ततः कण्ठबहिश्च मेखला [1]तिस्रश्चतस्रः क्षणभागविस्तृता नवत्युत्तरांशत उन्नता मताः। तथा पञ्चमेखलापक्षे तत्रैव

मेखलाः पञ्च वा कार्य्या षट्पञ्चद्वित्रिपञ्चकैः।
भागैर्विस्तारतो ज्ञेया उन्नता या नवाङ्गुलैः॥

तत्पञ्चमांशोना द्वितीया पञ्चमांशद्वयोना तृतीया पञ्चमांशत्रयोना चतुर्थी पञ्चमांशचतुष्टयोना पञ्चमीत्याहुः।

अथ योनिः।

प्रपञ्चसारे,—

योनिस्तत्पश्चिमस्यामथ दिशि चतुरस्रस्थलारब्धनाला[2]
तन्मध्योल्लासिरन्ध्रोपरि विरचिताश्वत्थपत्रानुकारा। (?)
उत्सेधायामकाभ्यां प्रकृतिविकृतिसंज्ञाङ्गुलाष्टाङ्गुला स्याद्विस्तृत्याद्वादशार्द्धाङ्गुलमितनमिताग्रा निविष्टे च कुण्डे॥

(१) C. तिस्रश्चतुस्रक्षणभाग ०।
(२) A. ० लब्धजाला। B. ० लब्धनाला। C. ० लब्धनार्था।

शारदायाम्,—

अष्टारत्नैकहस्तानां कुण्डानां योनिरीरिता ।
षट्चतुर्द्वग्रङ्गुलायामविस्तारोन्नतिशालिनी ॥
एकाङ्गुलन्तु योन्यग्रं कुर्य्यादीषदधोमुखम् ।

[1]तथा—

कुण्डार्द्धेनायता योनिस्तत्त्रिभागेण विस्तृता ।
कुण्डाष्टमांशेनोच्चा सा मूले कुम्भद्वयोपमा ॥
क्रमात् सङ्कोचमापन्ना बोधिपत्रनिभा च सा ।
योनेरन्तर्बिलं वाह्येऽजिनांशक्षतमेखला ॥
खलादारभ्य नालं स्यात् योनिमूलस्य धारणे ।
नालमेखलयोर्मध्ये रन्ध्रं योनेरधस्तथा ॥
रन्ध्रं परिधिमार्गार्थं द्वितीयमेखलोपरि ।

तथा—

कुण्डानां कल्पयेदन्तर्नाभिमम्बुजसन्निभम् ।
तत् तत् कुण्डानुरूपं वा मानमस्य निगद्यते ॥
अष्टारत्नैकहस्तानां नाभिरुत्सेधतारतः ।
नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्द्धयेत् ॥
योनिकुण्डे योनिमब्जकुण्डे नाभिञ्च वर्जयेत् ।

शारदायाम्,—

(१) E. F. Reads before it—अन्यत्र च,—
सर्व्वकुण्डेषु योनिः स्यात् कुण्डस्यार्द्धं न दीर्घतः ।
then तथा,—०

सर्व्वसिद्धिकरं कुण्डं चतुरस्रमुदाहृतम् ।
पुत्रप्रदं योनिकुण्डमर्द्धचन्द्रं शुभप्रदम् ॥

शत्रुक्षये त्र्यस्रम् । वर्त्तुलं शान्तौ । छेदने मारणे षडस्रम् । पद्माभं पुष्टिदम् । अष्टास्रं रोगशान्तौ । इदञ्च गुणफलार्थम् । तथासत्याश्रयालाभे वाक्येनाश्रयदाने वाक्यभेदापत्तेः । किन्तु यथा हिंसीति वृष्टिकामाय निधनं कुर्य्याद् दुर्गत्यन्नाद्यकामायेति[1] तत् तत् फलकसौभरे निधनव्यवस्था । एवं तत् तत् फलकहोमे कुण्डव्यवस्था ।

विप्राणां चतुरस्रं स्याद् राज्ञां वर्त्तुलमिष्यते ।
वैश्यानामर्द्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम् ।

वैश्यः सप्तदशसामिधेनीरनुब्रूयादितिवत् कर्त्तृविशेषनिमित्तेन विशेषविधिः । चतुरस्रन्तु सर्व्वेषामिति वचनाद् वैकल्पिकम् । एतेन

स्त्रीणां [2]वर्णानि राजेन्द्र योन्याकाराणि कारयेत् ।

इति लैङ्गोक्तं[3] व्याख्यातम् । स्त्रीणां यजमानरूपाणाम् । तथा मुष्टिमानं शतार्द्धे शतेऽरत्निमितम् । सहस्रे हस्तमितम् । द्विहस्तमयुते । चतुर्हस्तं लक्षे । दशलक्षे षट्करम् । कोट्यामष्टकरं स्मृतम् । अथवा

(१) D. Here adds स्वर्गकामायेति ।
(२) D. ० कुण्डानि ० ।
(३) C. लैङ्गेनोक्तम् ।

एकहस्तमितं कुण्डमेकलक्षे विधीयते ।
हस्तानां दशकं यावत् तावद्धस्तेन वर्द्धयेत् ॥
[1]दशहस्तमितं कोटिहोमे ।

द्विहस्तादिकुण्डविधिः ।

समचतुरस्रस्याक्षयारज्जुर्द्विकरणीति कात्यायनेन यद्यपि हस्तमात्रचतुरस्रस्य कोणसूत्रं मध्यसूत्रं कृत्वा द्विहस्तक्षेत्रं साधितम् । तथा प्रमाणं तिर्य्यक् द्विकरणायामस्तस्याक्षयारज्जुस्त्रिकरणीति । यस्य क्षेत्रस्यैकहस्तादिरूपस्य त्रैगुण्यं चिकीर्षितं तत् प्रमाणं तिर्य्यक्सूत्रं तत् कोणसूत्रञ्चायामसूत्रं कृत्वा चतुरस्रं कृत्वा तस्य कोणसूत्रेण मितं चतुरस्रं त्रिहस्तक्षेत्रमुक्तं तथापि तस्य कुण्डविषयशास्त्रत्वाभावात् । कुण्डविषये द्विहस्तादिविधिः [2]एकहस्तद्वैगुण्यपर इति ।

हस्तक्षेत्रे द्व्यङ्गुलानां षट्सप्तत्या सहैव हि ।[3]
शतानि पञ्च विद्यन्ते तन्मूलं मध्यसूत्रकम् ॥
[4]चतुर्विंशत्यङ्गुलानि विदध्याद् द्विकरे पुनः ।
अङ्गुलानि द्विपञ्चाशदेकादशशतानि च ॥
तन्मूलमुच्यते दीर्घा चतुष्कं चार्द्धसंयुतम् ।

---

(१) D. दशलक्षमितं कोटिहोमे ।
(२) D. क्षेत्रद्वैगुण्यपर इति ।
(३) C. ० सदैव हि ।
(४) C. चत्वारिंशत्तत्त्रयङ्गुलानि ० ।

[1]चतस्रश्च यथा यूका यवाः सप्त तथैव च ॥
अङ्गुलानि त्रयस्त्रिंशन्मानं सूत्रे तु मध्यमे ।

एवं [2]त्रिहस्तस्य मध्यसूत्रम् । अङ्गुलान्येकचत्वारिंशत् चतुर्यवा यूकाचतुष्टयं किञ्चिदूनं लिख्याचतुष्टयं चतुर्हस्तक्षेत्रस्य मध्यसूत्रम् । अष्टचत्वारिंशदङ्गुलानि । पञ्चहस्तक्षेत्रे मध्यसूत्रं त्रिपञ्चाशदङ्गुलानि । पञ्च यवाः षट् लिख्याः । षट्करे अष्टपञ्चाशदङ्गुलानि । षट्यवाः किञ्चिद्भागाधिकयूकाद्वयं सप्तहस्ते मध्यसूत्रं त्रिषष्ट्यङ्गुलं चतुर्यवाः । अष्टकरे मध्यसूत्रं सप्तषष्ट्यङ्गुलानि सप्तयवाः किञ्चिदूनाः । नवहस्ते ब्रह्मसूत्रं द्विसप्तत्यङ्गुलानि दशहस्ते ब्रह्मसूत्रं पञ्चसप्तत्यङ्गुलानि सप्तयवाः एका यूका लिख्याचतुष्टयञ्च । न्यूनाधिक्यपरिहाराय तथा यत्नः कार्य्यः । विश्वकर्म्मा,—

खातेऽधिके भवेद् रोगी हीने धेनुधनक्षयः ।
वक्रतुण्डे तु सन्तापो मरणं छिन्नमेखले ।
मेखलारहिते शोकोऽप्यधिके वित्तसंक्षयः ॥
भार्य्याविनाशनं कुण्डं प्रोक्तं योन्या विनाकृतम् ।
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्जितम् ॥
मानाधिके भवेन्मृत्युर्मानहीने दरिद्रता ।
न्यूनाधिकप्रमाणं यत् कुण्डं झर्झरमेखलम् ॥
शृङ्गाररहितं यच्च यजमानविनाशकृत् ।

---

(१) B. ततस्तस्र ० ।
(२) D. द्विहस्तस्य ० ।

शृङ्गारपदं योनिपरम् । क्रियासारे,—

क्षत्रियोऽथ समर्थो यः कुण्डं ताम्रेण बन्धयेत् ।

तदभावे इष्टकाभिर्वा सम्बध्य सुवृत्तं तथा समर्थो ब्राह्मणादिरपि । त्रिपुरासारे,—

[1]नित्यनैमित्तिके होमे हस्तमात्राणि बालुकाः ।

स्थण्डिलानि चतुरङ्गुलोच्चान्येकाङ्गुलोच्चानि वा चतुरस्रयोनिवृत्ताद्याकाराणीत्युक्तम् । शारदातिलके,—

नित्यं नैमित्तिकं [3]होमं स्थण्डिले वा समाचरेत् ।

हस्तमात्रेण तत् कार्य्यं बालुकाभिः सुशोभनम् ॥

अङ्गुलोत्सेधसंयुक्तं[2] चतुरस्रं सुशोभनम् ।

महादानाधिकारे लैङ्गे स्थण्डिलं केवलन्तु वा । अयुतादिहोमे स्थण्डिलस्यापि द्विहस्तादिवृद्धिरूहनीया । प्रतिष्ठादिकर्म्मसु हयशीर्षोक्तकुण्डानि चतुरस्रार्द्धचन्द्रवृत्तपद्माष्टास्राणि । सौरकाण्डे चतुरस्रसाधनमुक्त्वा

खातं कुण्डस्य कर्त्तव्यं मेखलोच्छ्रायसम्मितम् [3]।

अङ्गुलद्वितयं त्यक्त्वा मेखला चतुरङ्गुला ॥

कर्त्तव्या प्रथमा रम्या चतुरङ्गुलमुच्छ्रिता ।

अङ्गुलद्वितयं त्यक्त्वा मेखला कर्त्तव्येतिच्छेदः । तेन चतुरङ्गुला प्रथमेति सम्बन्धः । प्रथमा च प्रथमवहिरावरणरूपा ।

अष्टाङ्गुला द्वितीया च तृतीया द्वादशाङ्गुला ।

---

(१) D. नित्ये नैमित्तिके ० । (२) B. D. ० संयुतम् ।

(३) D. ० कर्म्म ० ।

तृतीया कुण्डपार्श्वस्था ।

सर्व्वासामेव विस्तारं कुर्व्वीत चतुरङ्गुलम् ।

केचित्तु यथाश्रुतशब्दस्वरसात् कुण्डपार्श्वे चतुरङ्गुलोच्चेति वदन्ति । [अन्येतु][1]

योनिं दशाङ्गुला कार्य्या पश्चिमाशाव्यवस्थिता ।

अश्वत्थपत्रसदृशा षट्चतुर्द्व्यङ्गुलाग्रका ॥

किञ्चित्कण्ठे निविष्टा सा गजोष्ठसदृशीमता ।

नाभिर्भागं परित्यज्य कार्य्या कुण्डस्य मेखला ॥

नाभिरत्र योनिः ।

एकमेखलकं कुण्डं शस्तं संक्षेपकर्म्मणि ।

अथार्द्धचन्द्रकुण्डम् ।

सौरे,—

चतुरस्रे समे क्षेत्रे चतुःकोष्ठीकृते गुरुः ।

मध्ये सूत्रन्तु संस्थाप्य कोणे संस्थापयेत् ततः ॥

ततो यदतिरिच्येत तदर्द्धं गृह्य लाञ्छयेत् ।

पूर्व्वतः पश्चिमे चैव त्यक्त्वोदीचीञ्च भ्रामयेत् ॥

[2]अयमर्थः—हस्तमात्रं चतुरस्रं चतुःकोष्ठं कृत्वा तस्य मध्ये हस्तमात्रसूत्रं दत्वा तदेव सूत्रं कोणे दत्वा ततश्चतुर्विंशाङ्गुलसूत्रात् कोणपर्य्यन्तं सूत्रशून्यं यावत् क्षेत्रमवशिष्टं दशाङ्गुलात्मकं तदर्द्धं

---

(१) A. C. D. Omit the portion bracketed. D. Reads here तथा ।

(२) D. Here reads तेन दक्षिणे धनुराकार उत्तरे ज्यासूत्रम् । अयमर्थः ०

पञ्चाङ्गुलं सूत्राद् गृहीत्वा सूत्रशून्यक्षेत्रे प्रवेश्य सूत्रे लाञ्छयेत्। [तथाचोनविंशाङ्गुले सूत्रे लाञ्छनं भवति।][1] तथाचोनविंशाङ्गुलमितरज्जुमूलं चतुरस्रोत्तरसूत्रमध्ये दत्त्वा तत्सूत्राग्रेण पूर्व्वतः पश्चिमपर्य्यन्तं मण्डलम्। एवञ्चोत्तरे [2]रज्जुसूत्रमष्टत्रिंशाङ्गुलं धनुर्विस्तार ऊनविंशाङ्गुलं भवति। चतुःकोष्ठकरणं सूत्रस्य कोणपाते रज्जुप्रज्ञानार्थम्।

अथ वृत्तकुण्डम्।

सौरकाण्डे,—

> चतुरस्रेसमे कुण्डे पूर्व्ववत्परिकल्पयेत्।
> कुण्डार्द्धे कर्णभागार्द्धं दिशि स्थाप्य विचक्षणः।
> भ्रामयेत्पूर्णचन्द्राभं कुण्डं स्यात् सुमनोहरम्॥

अयमर्थः—चतुरस्रं चतुःकोष्ठं कृत्वा कुण्डार्द्धे कुण्डप्रान्तसूत्रे [द्वादशाङ्गुलमिते][3] [कर्णभागार्द्धे][4] चतुःकोष्ठकरणसामर्थ्याचतुःकोष्ठैककोष्ठकोणसूत्रस्य भागश्चतुर्थोऽंशस्तदर्द्धं यवाङ्गुलद्वयरूपं कुण्डप्रान्तसूत्रात् वर्द्धयित्वा यवाधिकचतुर्द्दशाङ्गुलसूत्रमूलं चतुरस्रमध्ये स्थाप्य तदग्रं दिशि स्थाप्य भ्रामयेत्।

(१) D. Omits the portion bracketed.

(२) D. ज्यासूत्रमष्ट०।

(३) B. C. D. Omit the portion bracketed.

(४) A. Omit the portion bracketed. D. कर्णभागार्द्धे सूत्रे द्वादशाङ्गुलमिते चतुः०।

पद्मकुण्डम्।

तत्रैव,—

> वर्त्तुले मेखलायाञ्च कुर्य्यात् पद्मदलानि च।
> षोड़शातिसुरम्याणि यथाशोभान्वितानि च॥
> पद्माभमेवं कुण्डं [1]तद्भवेदतिमनोहरम्।

अस्य पश्चिमे योनिः।

अथाष्टास्रम्।

ईशाने। तत्रैव,—

> चतुरस्रे समे क्षेत्रे परिधीकर्णभूषिते।
> अष्टास्रं वर्द्धयेद् येन विधिना तच्छृणुष्व मे॥
> कर्णात्कर्णगतं सूत्रं [2]समस्यात्यात् समं बुधः।
> कुण्डार्द्धसूत्रमानेन कर्णसूत्राणि लाञ्छयेत्॥
> एकत्र लाञ्छने स्थाप्य सूत्रं कुण्डार्द्धसम्मितम्।
> लाञ्छयेज्जीवरेखासु ततस्तेन विचक्षणः॥
> लाञ्छनान्निर्गतान् दिक्षु ततोऽन्यानि समालिखेत्।
> परिध्याख्यानि सूत्राणि दिग्विदिक्षु समन्ततः॥
> अष्टास्रमेवं कुण्डं तु कथितं तत्त्ववेदिभिः॥
> अथवा पद्ममालिख्य हस्तमात्रं समन्ततः।
> पद्मवत् खातयेत्कुण्डमष्टास्रं [3]सुमनोहरम्॥

(१) B. ०तु०। (३) D. ०तु मनोहरम्।

(२) E. F. समास्याल्यात्०

कर्णसूत्राणीतिबहुवचनात् कुण्डमध्यात् कोणसूत्रोपरि कुण्डार्द्धसूत्रं पातयित्वा तदन्ते चिह्नं कार्य्यम्। एवं चतुःकोणे कृत्वा तेषु चिह्नेषु कुण्डार्द्धसूत्रस्य मध्यं यथा भवति एवं विदिक्समरेखयोः पातयित्वा

चतुरस्राद्‌ वहिर्यत्र सूत्राग्रं तत्र लाञ्छयेत्।

जीवरेखास्विति निमित्तसप्तमी जीवरेखानिमित्तम्। क्षेत्रवृद्धार्थत्वात् करिष्यमाणरेखा जीवरेखा। ततस्तेषु चिह्नेषु दिक्षु सूत्रचतुष्टयं विदिक्षु च सूत्रचतुष्टयमिति सूत्राष्टमिति। कोणप्रोञ्छनेन जीवरेखामध्यरेखाप्रोञ्छनेनाष्टास्रं भवति। नात्र चतुरस्रसमानक्षेत्रतानियमः। पद्मवत्खातपक्षे सर्व्वथाऽसम्भवात्। इत्यष्टास्रम्। अत्र पद्मवत्खातपक्षेऽपि मेखला वृत्तरूपैव न तु पद्मदलानुरूपेण पद्मनिर्गतत्वात्[1]। प्रतिष्ठागमे च कुण्डमध्ये नाभिविधानाभावात् नाभिर्नास्ति। अन्यत् सर्व्वं मन्त्रागमवदवगन्तव्यम्। स्थण्डिलं घटनागमेनोक्तमेव। अत्यन्तासम्भवे मन्त्रागमादेवानुसर्त्तव्यम्।

अथ मण्डलम्।

शारदातिलके पूर्व्वापरायताः सप्तदश रेखाः पश्चिमोत्तरायतास्तावत्यः। तेष्वभितः षोड़शकोष्ठव्यवस्थया षट्‌पञ्चाशदधिकशतद्वयमितानि पदानि जायन्ते। मध्ये षट्त्रिंशत्पदैः पद्मम्। पद्मपार्श्वे

(१) A. पद्मस्थवृत्तनिर्गतत्वात्। B. D. पद्मवृत्तमिर्गतत्वात्।

एकपंक्त्याभितः पीठं तद्बाह्ये पंक्तिद्वयेन वीथिम्। अवशिष्टपद्माभ्यां मध्ये द्वारं षट्पदैः। तत्पार्श्वद्वये च चतुर्भिश्चतुर्भिः शोभा। पदषट्केन कोणमेवं चतुर्दिक्षु। पद्मक्षेत्रस्य द्वादशभागमभितः सन्त्यज्य मध्ये वृत्तत्रयं समान्तरम्। [1]वृत्तमध्ये कर्णिका। द्वितीयं केशरस्थानं तृतीयं पत्रस्थानं त्यक्तांशेन दलाग्राणि। मध्यवृत्ते युग्मशः केशरषोड़शकरणम्। वाह्यवृत्तेः केशराग्रे सूत्रमूलं दत्वा वृत्तवाह्यरेखायां सूत्राग्रं दत्वार्द्ध[2]चन्द्राकृतिकरणम्। अर्द्धचन्द्राष्टसन्धिस्थाने मध्यवृत्ते रज्जुरेखाकरणम्। त्यक्तांशप्रान्ते वृत्तं कृत्वा दलाग्राष्टलिखनमनुपातरीत्या। पद्मपार्श्वे अपीठपंक्तौ [3][पदत्रयमुपान्ते।] कोणचतुष्के पत्रत्रयमेकीकृत्य पीठपादकरणम्। अवशिष्टपदैरेकीकृतैः प्रतिदिशं पीठपात्राणि। वीथिपदपंक्तिद्वयस्य पदानां प्रतिपंक्त्येकीकरणम्। अन्त्यपंक्तौ [4][पदचतुष्कमुपान्ते पंक्तौ] पदद्वयमिति षट्पदैर्द्वारम्। द्वारपार्श्वयोरुपान्त्यपंक्तौ पदत्रयमन्त्यपंक्तौ च पदमिति चतुष्पदैः शोभा। तत्पार्श्वयोरन्त्यपंक्तौ पदत्रयमुपान्ते पदमेकमिति चतुःकोष्ठेनोपशोभाद्वयम्। पंक्तिद्वयपार्श्वे पदद्वयसहिते कण्ठकोष्ठे कोणम्[5]। एवं चतुर्दिक्षु। रजसांशे विशेषः[6]। कर्णिकाः पीतवर्णाः केशराः पीतरक्ताः

(१) D. मध्यवृत्ते ०

(२) B. ० चन्द्राकृतिकरणपश्चार्द्धचन्द्राष्ट ०

(३) A. C. Omit the portion bracketed.

(४) D. Omits the portion bracketed.

(५) A. B. D. पंक्तिद्वयपार्श्वपदद्वयसहितकोणकोष्ठेन कोणम्।

(६) A. रजसां पात्रे विशेषः।

केवलारुणवर्णा वा। शुक्लानि पत्राणि पत्रसन्धीनि श्यामलानि। पीतरक्तकर्णिकापक्षे कृष्णवर्णदलसन्धयः। पत्राण्यरुणानि। पीठपादा अरुणाः। पीठपत्राणि [1]पीतानि शुक्लानि कृष्णानि वा। वीथिषु पत्रपुष्पफलयुक्तकल्पलता नानावर्णेन। द्वाराणि शुक्लानि। शोभा रक्ताः। उपशोभाः पीताः। कृष्णानि कोणानि। शुक्लरक्तकृष्णवर्णा रेखास्तिस्रो वहिः। अङ्गुलोत्सेधविस्ताराः। समा रेखाः शुक्लाः। एतत् सर्व्वतोभद्रमण्डलम्। मण्डलरजांसि तत्रैवोक्तानि। पीतं हरिद्राचूर्णं व्रीहियवादितण्डुलचूर्णं शुक्लं कुसुमचूर्णं रक्तं दग्धपुलाकजं कृष्णं विल्वादिपत्रजं श्यामम्। यत्तु मण्डलाधिकारे देवीपुराणे,—मुक्ताफलचूर्णं शुक्लं प्रबालचूर्णं मरकतचूर्णं वा रक्तं पुष्परागचूर्णं कुङ्कुमचूर्णं वा पीतं नीलमणिचूर्णं कृष्णं मरकतचूर्णं श्याममित्युक्तं तन्महाव्यविषयमेव। तत्रैव शालिपिष्टकचूर्णैर्वा यवगोधूमजैरित्यादिप्रकारान्तरकथनात्।

स्रुक्स्रुवलक्षणम्।

शारदातिलके, देवीपुराणे च,—अश्वत्थपलाशवैकङ्कतखदिरभवं तदन्यक्षीरशाखिभवं वा काष्ठं हस्तमितं ग्राह्यम्। देवीपुराणे तु सार्द्धहस्तं स्रुगर्थे। तस्य षट्त्रिंशता भागः। विंशत्यंशैर्दण्डः। वेदी चाष्टभिः। एकांशेन कण्ठः। सप्तभागेन मुखम्।

(१) D. अरुणानि शुक्लानि ०

[1]दण्डस्य मूले त्रिभागेण कुम्भः। तथा दण्डमूलाग्रयो खण्डी। कण्ठो युगांशेनांशद्वयेन। यमांशेनांशद्वयेन तथा दण्डस्य बाह्योवेंष्टनरज्जुपरिमाणम्। षड्भिरंशैर्वेदी। मध्ये एकांशेन वृत्तरूपा कर्णिका। तद्वहिरंशेन खातरूपं वृत्तम्। खातस्य गभीरता त्र्यंशेन। तद्वहिरर्द्धांशेन वृत्तम्। वहिःपद्मदलान्यंशेन। अर्द्धांशेन परितो मेखला। [षड्भिरंशे][2] वेंद्याः पृष्ठे कूर्म्माकृतिः। कण्ठस्य विस्तारो वेदीत्र्यंशेन। वेदीविस्तारं त्रिधा विभज्य तस्य मध्यभागसमः कण्ठविस्तारः। मुखस्यापि कण्ठसमो विस्तारः। मुखे वेदीगर्त्तप्रभृतिकनिष्ठाङ्गुलिमितो घृतनिर्गममार्गः। मुखस्य परितोऽर्द्धांशेन मेखला। मुखपृष्ठभागे हंसस्य हस्तिनो वराहस्य वा मुखं लेख्यम्। स्रुचश्चतुर्भिरंशैः स्रुवः। देवीपुराणे,—हस्तमितः। अस्य द्वाविंशत्यंशेन दण्डः। तस्या बाह्योवेंष्टनमंशचतुष्टयेन। अंशद्वयेन शिरः। तन्मध्ये घृतकर्षपूर[3]योग्यं खातं पङ्के मृगपदाकारम्। मध्ये भित्तिः। दण्डमूलाग्रयोर्गण्डश्च स्यात्। अंशद्वयेन [4]कङ्कणभूषिता च सा। खण्डीशब्दश्च कङ्कणावच्छिन्नदण्डैकदेशवाचकः।

(१) D. Here reads दण्डस्य मूले त्रिभागेण मुखम्। दण्डस्य मूले त्रिभागेण कुम्भः। दण्डस्याग्रे चतुर्थभागेन कुम्भः। तथा दण्डस्य ०

(२) A. Omits the portion bracketed.

(३) A. ० पूरण ०

(४) D. कङ्कणशोभिता च सा।

श्रौतस्मार्त्तयोः स्रुवलक्षणम्।

स्रुवोऽरत्निमात्रोऽङ्गुष्ठपर्व्वमात्रः पुष्करः। बाहुमात्रः स्रुचः पाणिमात्रा पुष्करा। त्वग्विला हंसमात्रप्रसेका। वैकङ्कतो यज्ञकर[1] इति वचनात् वैकङ्कती। प्रणीतापात्रं वारुणम्। चतुरङ्गुलविलञ्चमसवत् संवृत्तं वारुणमेवारत्निमात्रम्। स्फ्योऽस्याकृतिः खादिरोऽरत्निमात्र [2]उल्लेखनार्थः। उलूखलं जानुमात्रं वारुणम्। मुषलं वारुणमेव यथेच्छमानम्। प्रतिष्ठाद्यर्थन्तु हयशीर्षे,—

हस्तमात्रं स्रुवं कुर्य्याच्चटुकेन समन्वितम्।
तस्मात् तदङ्गुलं वृत्तं कार्य्यं निम्नं यथा भवेत्॥
यज्ञे तु गोष्पदं यावत् कुर्य्यान्निम्नं तथाकृतिम्।
अङ्गुष्ठकपरीणाहं स्रुवदण्डं प्रकल्पयेत्॥

चटुकेनेति स्रुवशिरसि मण्डलाकारं चटुकं कृत्वा तदुपरि द्व्यङ्गुलं वर्त्तुलं कृत्वा तन्मध्ये यज्ञे गोष्पदाकारं मध्यभित्तिसहितं खातं कुर्य्यादित्यर्थः।

स्रुक्लक्षणम्।

तत्रैव,—

स्रुचं कुर्य्यात्तु होमार्थे बाहुदण्डमितं सदा।
सप्ताङ्गुलप्रविस्तारं चतुरस्रं समन्ततः॥

(१) A. वैकङ्कतो यज्ञावचर॰ D. वैकङ्कतो यज्ञवर॰

(२) A. D. लेखनार्थः।

पञ्चाङ्गुलानि विस्तारं[1] कुर्य्याद् वा चतुरस्रकम्।
त्रिभागेण ततो वृत्तं कुर्य्याद् गर्त्तन्तु[2] मध्यतः॥
खनेत् त्र्यङ्गुलं निम्नं तिर्य्यगूर्द्ध्वं समन्ततः।
यवद्वयं परित्यज्य कुर्य्याद् वै मेखलात्रयम्॥
अर्द्धाङ्गुलप्रविस्तारं [3]तद्बाह्यं शोभयेत् ततः।
[4]तथा शोभानुरूपेण चतुः [5]कोष्ठेषु सर्व्वतः॥
त्रिभागविस्तरं कण्ठं स्रुचोऽङ्गुष्ठ[6]समायतम्।
तत्समं विस्तृतञ्चाग्रे मुखं तस्य षड़ङ्गुलम्॥
आयामे च तथा कुर्य्यात् [7]कण्ठान्तेन त्रिविस्तरम्।
आज्यनिर्गमणं मध्ये तद्धि कुर्य्यात् षड़ङ्गुलम्॥
तन्मानेनैव तन्निम्नं क्रमाद् यावद्द्विरङ्गुलम्।
कुर्य्यात् कण्ठे तु शुषिरं विशेद् यावत् कनीयसी॥
स्रुच एवं कृतायाश्च मूलं कुर्य्यात् सुशोभनम्।
दण्डन्तु कारयेच्छेषमवक्रं निर्व्रणं शुभम्॥
कलसं कारयेन्मूले वेष्टनञ्च षड़ङ्गुलम्।
स्रुङ्मूले मकरास्यन्तु कारयेत् सुमनोहरम्॥
शेषमन्यच्च कर्त्तव्यं यथाशोभानुरूपतः।

स्रुगर्थे सप्ताङ्गुलपञ्चाङ्गुलान्यतमविस्तारं चतुरस्रं वेदी

(१) A. B D. पञ्चाङ्गुलप्रविस्तारं॰

(२) B. D. ॰वृत्तञ्च॰

(३) D. तद्द्वारं शोभ॰

(४) D. यथा॰

(५) D. ॰कोणेषु॰

(६) A. ॰ऽङ्गुल॰

(७) A. ॰कण्ठान्ते द्वित्रिविस्तरम्।

ततस्त्रिभागेण तृतीयांशेन मध्ये वृत्तरूपं खातम्। गर्त्तस्य गभीरत्वं त्र्यङ्गुलम्। गर्त्तविस्तारोऽपि पचे त्र्यङ्गुलः। गर्त्तस्य समन्ततः यवद्वयं परित्यज्य मेखलात्रयम्। अर्द्धाङ्गुलविस्तृता मेखला। कोणेष्ववशिष्टस्थाने पुष्पादिलिखनेन शोभा। वेदीतृतीयांश-विस्तृतं वेदिलग्नं कण्ठम्। दैर्घ्यमङ्गुष्ठमितम्। तदनन्तरं षड़-ङ्गुलदीर्घं मुखम्। मुखस्य विस्तारोऽग्रे कण्ठसमः। मूले पञ्चाङ्गुलवेदीपचे द्व्यङ्गुलं सप्ताङ्गुलवेदीपचे त्र्यङ्गुलम्। तद्धि मुख-रूपं षड़ङ्गुलम्। मध्ये आज्यनिर्गमणम्। आज्यं निर्गम्यते अनेनेति व्युत्पत्त्या तदुपयोगिखातमित्यर्थः। मुखस्य द्व्यङ्गुल-पर्य्यन्तं खातं तन्मानेन तन्निम्नम्। तन्मानविस्तारं तन्माननिम्नञ्च। उपरि खातस्य निम्नविस्तारयोरनियमः। कण्ठे शुषिरं कनिष्ठा-ङ्गुलिमितम्। स्रुचो दण्डस्य वेष्टनं षड़ङ्गुलम्।

तत्रैव,—

स्रुवार्थे खदिरं शस्तं चन्दनं मधुकं तथा।
चम्पकं चूतकं सौषं पालाशं समिदेव च॥
अन्येऽपि याज्ञिका वृक्षाः शस्यन्ते सारवद्दृढ़ाः।
द्वादशाङ्गुलविस्तारं कारयेच्च समं बुधः॥
मूले षड़ङ्गुलं दण्डं कुर्य्यात् समतलं शुभम्।
अष्टाङ्गुलप्रविस्तारं द्वादशाङ्गुलमायतम्॥
उल्लेखनार्थं कुर्व्वीत खड्गं[1] हस्तमितं शुभम्।

(१) B. खन्तु ०

अथ जपधर्म्माः।

योगियाज्ञवल्क्यः,—

गृहेष्वेकगुणं जाप्यं नद्यान्तु त्रिगुणं[1] स्मृतम्।
गवां गोष्ठे दशगुणमग्न्यागारे दशाधिकम्[2]॥
सिद्धक्षेत्रे पुण्यतीर्थे देवतायाश्च सन्निधौ।
सहस्रशतकोटीनामनन्तं विष्णु[3]सन्निधौ॥

पञ्चरात्रे,—

पुण्यक्षेत्रं नदीतीरं गुहा पर्व्वतमस्तकम्।
तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम्॥
उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः।
तुलसीकाननं गोष्ठं वृक्षशून्यः शिवालयः॥
अश्वत्थामलकीमूलं गोशाला तीर्थ[4]मध्यतः।
देवतायतनं तीरं[5] समुद्रस्य निजं गृहम्॥
गुरूणां सन्निधानञ्च चित्तैकाग्रस्थलं तथा।

(१) B. द्विगुणं ० D. नद्यादौ द्विगुणं ०
(२) B. D. ० शताधिकम्।
(३) B. D. ० शिव ०
(४) A. ० जल ०
(५) A. ० कूलं।

आसनानि।

पञ्चरात्रे,—

सर्व्वसिद्ध्यै व्याघ्रचर्म्म मोक्षसिद्ध्यै मृगाजिनम्।
वस्त्रासनं रोगहरं वेत्रजं वैश्यकर्म्मणि[1]॥
[2]विद्वेषे जाम्बुकं प्रोक्तं कम्बलं दुःखमोचनम्
अभिचारे कृष्णवर्णं रक्तं वश्यादिकर्म्मणि॥
शान्तिके धवलं प्रोक्तं चित्रकं सर्व्वकर्म्मसु।
स्तम्भने गजचर्म्म स्यान्मारणे माहिषं तथा॥
मेषचर्म्म तथोच्चाटे खड्गिजं वैश्यकर्म्मणि।
विद्वेषे जाम्बुकं प्रोक्तं भवेद् गोचर्म्म शान्तिके॥
वंशासने च दारिद्र्यं दौर्भाग्यं दारुजासने।
धरण्यां दुःखसम्भूतिः[3] पाषाणे व्याधिसम्भवः॥
तृणासने यशोहानिः पल्लवे चित्तविभ्रमः।
इष्टकायामथाधिः स्यादेतत् साधारणे जपे॥
[4]कुशाजिनाम्बरेणापि चतुरस्रं समन्ततः।
एकहस्तं द्विहस्तं वा चतुरङ्गुलमुन्नतम्॥

(१) A. B. D. ० श्रीविवर्द्धनम्।
(२) B. D. कौशेयं पुष्टिदं प्रोक्तं कम्बलं दुःखमोचनम्। A. कौशेयं पुष्टिदं प्रोक्तं ०
(३) A. B. D. सम्पत्तिः ०।
(४) A. कृष्णाजि ०।

[1]पद्मकं स्वस्तिकं वीरं सिद्धञ्चेति चतुष्टयम्।
जपे प्रशस्तमित्युक्तमासनं मुनिसत्तमैः॥

स्मृतिः,—

सहस्रगुणितो ज्ञेय ऊर्द्ध्वपुण्ड्रवतो जपः।
ब्राह्मणस्योर्द्ध्वपुण्ड्रं स्यात् क्षत्रियस्यार्द्धचन्द्रिका॥
वैश्यः पुण्ड्रं तथा कुर्य्याच्छूद्रस्यापि त्रिपुण्ड्रकम्।

अत्र ब्राह्मणस्योर्द्ध्वपुण्ड्रं जपाङ्गतया विधीयते। तेन पुरुषार्थ-भस्मत्रिपुण्ड्रकस्य न बाधः।

अक्षमाला।

योगियाज्ञवल्क्यः,—

स्फाटिकेन्द्राक्षरुद्राक्षैः पुत्रञ्जीवसमुद्भवैः।
अक्षमाला प्रकर्त्तव्या प्रशस्ताप्युत्तरोत्तरा॥
कोट्यादिका भवेद् वृद्धिरक्षमालाविशेषतः।
जपस्य क्रियमाणस्य तस्माच्छ्रेष्ठः परः परः॥

स्फटिकापेक्षया इन्द्राक्षे कोटिगुणं फलम्। रुद्राक्षे इन्द्राक्षादर्वुदगुणमित्यादिरूपेण। तथा

अभावे त्वक्षमालायाः कुशग्रन्थ्याथ पाणिना।

इति। शिवपुराणे,—

(१) D. Adds तथा,—

अङ्गुल्या जपसंख्यानमेवमेकगुणं स्मृतम्।
रेखयाष्टगुणं विद्यात् पुत्रञ्जीवैर्दशाधिकम्॥
शतं स्यात् शङ्खमालाभिः प्रवालैश्च सहस्रकम्।
स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते॥
पद्माक्षैर्दशलक्षन्तु सौवर्णैः कोटिरुच्यते।
कुशग्रन्थ्याथ रुद्राक्षैरनन्तगुणितं भवेत्॥

अन्यत्र च,—चतुर्वर्गाप्तये पद्माक्षमाला शत्रुनाशाय वा [1][अणिमादिगुणाप्तये वा] मोक्षाय च। सर्व्वकामाप्तये रुद्राक्षाणि मोक्षाय च। स्फाटिकैर्मौक्तिकैरक्षमाला राज्यदा सौभाग्यदा च। रुद्राक्षमाला राज्यदा। पुत्रञ्जीवमाला पुत्रदा। कुशग्रन्थ्या पापक्षयो मोक्षश्च। अरिष्टरूप्यमाला शान्तिके। स्वर्णरजतमाला सर्व्वकामदा। प्रवालमाला धनलाभाय। मुक्ताभिः [2]पुत्राश्च। शङ्खैर्यशः। ताम्रमाला मेधावीर्य्यतेजःप्रदा। रत्नैर्विभूतिः। [3]तथा नारदकल्पे—अष्टाक्षरे विशेषः,—

कुशबन्धैर्जपेद् विप्रः सुवर्णरजतैर्नृपः।
पुत्रञ्जीवैर्जपेद् वैश्यः पद्माक्षैः शूद्र[4] एव च॥

(१) D. Omits the portion bracketed.

(२) A. B. D. स्त्रीपुत्राश्च।

(३) A. तथा अष्टाक्षरे विशेषः,—कुशबन्धैर्विप्रः सुवर्णरजतैर्नृपः पुत्रञ्जीवैर्वैश्यः पद्माक्षैः सर्व्वे। नारसिंहे •

(४) B D. सर्व्व एव च।

नारसिंहे,—कोटिभिर्वेत्तु रुद्राक्षपद्माक्षैः।

वैष्णवे तुलसीमाला गजदन्तैर्गणेश्वरे।

इन्द्राक्षैस्त्रिपुरायाः। सारस्वते पद्मरागैः प्रवालैर्वा।

गर्द्दभाश्ववराहाणां दन्तैस्तैराभिचारिके।

नीलसारस्वते महाशङ्खैः। सर्व्वैरुद्राक्षादिभिर्मोक्षाय। मातृकया मन्त्रसिद्धिः। अत्र कोट्यादिका वृद्धिरिति याज्ञवल्क्योयगुणफलमविरुद्धसर्व्वपापक्षयाणां वृद्धिमभिप्रेत्य। अन्यत्र कामनाभेदेन व्यवस्थितानां न वृद्धिः सजातीयापेक्षत्वात्। भविष्यपुराणे,—

सर्व्वासामक्षमालानां जपे यत् फलमुच्यते।
तत् फलं शतमादेयं जपेनाङ्गुलिपर्व्वभिः॥

एतत् सर्व्वमङ्गलामन्त्रपरम्। तत्प्रकरणादित्याहुः।

अभावे त्वक्षमालायाः कुशग्रन्थ्याथ पाणिना।

इत्यनुकल्पत्वविधानात्। अत्राङ्गुलिजपादष्टगुणो रेखाभिर्जप इति पाणिजपो द्वेधा। रेखापदमत्र पर्व्वपरमेव।

अनामिकाया मध्यादि मध्यादधः क्रमेण तु।
तर्ज्जन्या आदिपर्व्वान्त अक्षमाला प्रकीर्त्तिता॥

इति स्मृत्यन्तरात्। रेखासु चैव सर्व्वासु न च मध्यमाद्यपर्व्वणोरिति रेखानिषेधाच्च। तेनाङ्गुलिभिरविशेषात् पञ्चभिर्गणनम्। पर्व्वभिर्वा यथोक्तम्। मध्यमाद्यपर्व्वद्वयं मेरुः।

अङ्गुलीर्न वियुञ्जीत किञ्चित् सङ्कोचयेत् तलम्।

इति वचनादङ्गुलीनां निःसन्धितां सम्पाद्य पर्व्वगणना कार्य्या ।

[1]रुद्राचे विशेषः,—

एकवक्त्रैस्त्रिवक्त्रैश्च चतुर्वक्त्रैश्च पञ्चभिः ।
षड्वक्त्रै र्वाथ कर्त्तव्यं तस्मान्मिश्रैस्तु वर्जयेत् ॥
अनुलोमविलोमस्थैर्विन्दुयुङ्मातृकाचरैः ।
सविन्दुकैः साष्टवर्गैः क्लृप्तया वर्णमालया ॥
प्रत्येकं वर्णयुङ्मन्त्राः क्लृप्ताः स्युः चिप्रसिद्धिदाः ।

अक्षमालाग्रथनम् ।

कृतनित्यक्रियो यथोक्तान्यचाणि कीटादिदोषरहितानि नातिस्थूलकृशानि रुद्राक्षाणि कपिलानि वृत्तानि दृढ़ानि [2]कर्कट-संयुतानि अष्टोत्तरशतान्युत्तममालार्थं शतार्द्धमितानि मध्यमे तदर्द्धमितानि कनिष्ठे । धर्म्मार्थं त्रिंशत् । मोचार्थं पञ्चविंशतिः । अभिचारे षोड़श । पुष्ट्यर्थे सप्तविंशतिः । चतुःपञ्चाशत् काम्य-कर्म्मणि । अष्टोत्तरशतैः सर्व्वसिद्धिः । क्वचिच्च

शतं वाथ तदर्द्धं वा सर्व्वसाधारणे जपे ।

एतानि सम्पाद्य सूत्रञ्च

सर्व्वासामचमालानां सूत्रं कार्पासिकं स्मृतम् ।
शुक्लं कृष्णं तथा रक्तं शान्तिवश्याभिचारिके ॥

---

(१) C. रुद्राचै र्विशेषः ।

(२) D. कर्किसंयुतानि ।

पद्मसूत्रं पट्टसूत्रं चौमं कार्पासिकं [1]तथा ।
द्विजस्त्रिनिर्म्मितं सूत्रं त्रिगुणं त्रिगुणीकृतम् ॥

इति सूत्रञ्च सम्पाद्य पञ्चगव्यैः सूत्रमचांश्च प्रचाल्य नवभि-रश्वत्थपत्रैर्निर्म्मिते पद्माकारे पत्रे स्थापयेत् । प्रणवं शक्तिबीजं मातृकां सूत्रे मणिषु च विन्यसेत् । मूलमन्त्रेण सूत्रे मणिषु निजेष्टदेवस्य पूजनम् । तेनैव तिलसर्पिषा होमः । होमाशक्तौ द्विगुणजपः ।

ततो ग्रथनम् ।

मुखे मुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत् ।
[एकैकमणिमध्ये तु ब्रह्मग्रन्थिं प्रकल्पयेत् ॥][2]

इत्येवंरूपेण गोपुच्छसदृशी सर्पाकारा वा कार्य्या । तत्-सजातीयमेकं मेरुत्वेन कल्पयेत् । कालोत्तरे तु,—

मेरुहीनाचमाला वा कर्त्तव्या च प्रयत्नतः ।
भवेच्छतगुणं पुण्यं न दोषो मेरुलङ्घने ॥

आग्नेयेऽपि,—

समेरु मेरुहीनं वा जप्यसूत्रन्तु कारयेत् ।

---

(१) A. ० तु वा ।

(२) B. D. Omit the portion bracketed

अथाक्षमालाप्रतिष्ठा।

त्रिरात्रं पञ्चरात्रं वा पञ्चगव्येऽधिवासनम्।

शुभदिने पञ्चगव्येन प्रोक्ष्य गन्धतोयेन प्रोक्षणम्। शुभपात्रे अवस्थाप्य कवचेनावगुण्ठ्य धेनुमुद्रयामृतीकृत्यास्त्रेण रक्षणम्। मूलमन्त्रस्याक्षमालायां न्यासः। तेनैव तत्रेष्टदेवतापूजनम्। तिलसर्पिषा होमः। होमाशक्तौ जपः। तत्त्वसारसंहितायाम्,—

प्रतिष्ठामक्षसूत्रेषु रक्षां विद्यासु च शृणु।
आलिख्य चतुरस्रन्तु रजसा मण्डलं भुवि।
पद्ममध्येऽत्र वा लिख्य पूज्यस्योपरि विन्यसेत्॥
सौवर्णं राजतञ्चान्यद् विपुलं पात्रमुत्तमम्।

अन्यत् ताम्रादि।

पात्रन्तु तत्र यत्तत्त्वं तेन सर्व्वाः क्रिया भवेत्।

यत्तत्त्वं या या देवता तत्तन्मन्त्रेण सर्व्वा वक्ष्यमाणक्रियाः।

अस्त्रेण पूरयेत् पात्रं शालितण्डुलकैः शुभैः॥
तस्योपरि लिखेत् पद्ममष्टपत्रं सकर्णिकम्।
अश्वत्थस्य तु पत्राणि पद्मपत्रेषु विन्यसेत्॥

लिखितपद्माष्टपत्रेष्वष्टावश्वत्थपत्राणीत्यर्थः।

तत् पुनर्गन्धपुष्पाद्यैः पूज्य तन्मध्यतो न्यसेत्।
[1][पञ्चरत्नानि हैमं वा अक्षसूत्रं ततो न्यसेत्॥]

(१) D Omits the portion bracketed.

अभ्युक्ष्य मूलमन्त्रेण पुनः शुद्धोदकेन च।
सम्पूज्य मूलमन्त्रेण तत्त्वन्यासञ्च कारयेत्॥
प्रतिग्रन्थि प्रतिमणीन् त्रिःकृत्वो वैकशोऽपि वा।
स्पृशन् मन्त्रजपं कुर्य्यात् तत्त्वन्यासोऽयमीरितः॥
पुनः पञ्चोपचारेण पूज्य मुद्रां प्रदर्श्य च।
अक्षमालां समादद्याद्धर्म्मकामार्थमोक्षदाम्॥

मुद्रा च तत्तद्देवतामुद्रा। अत्राप्यधिवासनप्रवृत्तिः। तद्विधिः। त्रिदिनं पञ्चदिनं वा पञ्चगव्येऽधिवास्य शुभदिने स्वस्ति वाच्य संकल्प्य उपलिप्ते चतुरस्रमध्ये यथोक्तं पद्मं लिखित्वा पद्माय नम इति पूजयित्वा तदुपरि सौवर्णं राजतं तदभावे ताम्रादिपात्रं वा विन्यस्य तत्पात्रं शुभैः शालितण्डुलैरस्त्रेणापूर्य्य शालितण्डुलोपरि सकर्णिकमष्टदलपद्मं लिखित्वा तत्पद्मपत्रेष्वष्टावश्वत्थपत्राणि विन्यस्य तत् पत्रं पद्माय नम इति गन्धपुष्पाद्यैः पञ्चभिः सम्पूज्य तत्र पञ्चरत्नं स्वर्णं वा विन्यस्य तदुपरि अक्षसूत्रं विन्यस्य पञ्चगव्येन शुद्धोदकेन च क्रमात् प्रोक्ष्य तत्र मूलमन्त्रेणेष्टदेवं सम्पूज्य प्रतिग्रन्थि प्रत्यक्षञ्च स्पृशन् सकृत् त्रिर्वा मूलमन्त्रं जप्त्वा तत्र पुनरिष्टदेवं पञ्चोपचारैः सम्पूज्य तन्मुद्राः प्रदर्शयेत्। ततोऽक्षमालां गुरुहस्ते दत्त्वा गुरुदत्तां प्रतिगृह्णीयात्। शान्तिकरणमच्छिद्रावधारणञ्च। शैवे तु विशेषः,—

क्षालयेद् पञ्चगव्येन सद्योजातेन सज्जलैः।
चन्दनागुरुगन्धाद्यैर्वामदेवेन घर्षयेत्[1]॥

(१) A. ० चार्चयेत्।

[1]पूजयेत् तामघोरेण लेपयेत् पुरुषेण तु ।
मन्त्रयेत् पञ्चमेनैव प्रत्येकन्तु शतं शतम् ॥
मेरुञ्च पञ्चमेनैव मन्त्रेणैव च मन्त्रयेत् ।

इति ।

जीर्णे सूत्रे पुनः पत्रे ग्रथयित्वा शतं जपेत् ।
नवे सूत्रे तथा च्छिन्ने सहस्रं जप उच्यते ॥
जपान्यकाले तां मालां पूजयित्वा तु गोपयेत् ।
अक्षमालाञ्च मुद्राञ्च गुरोरपि न दर्शयेत् ॥
प्रमादात् पतिते हस्तात् शतमष्टोत्तरं जपेत् ।

तथा करभ्रंशे गन्धवारिणा क्षालनम् । गायत्रीं शतं जप्त्वा नमस्कृत्य स्थापनम् । अशुचिस्पर्शे तीर्थोदकेन क्षालनम् । नोच्छिष्टेन स्पर्शः स्त्रीणां हस्ते न कारयेत् । शूद्रस्पर्शे तु पुनः संस्कारः ।

आकाशे स्थापनं कुर्य्याद् यदीच्छेत् परमां गतिम् ।
अङ्गुष्ठेन जपेज्जाप्यमन्यैरङ्गुलिभिः सह ॥

अन्याङ्गुलयस्तर्जनीवर्जिताः । तर्जनीवर्जिताभिरिति प्रपञ्चसारात् । अतएव,—

तर्जन्यङ्गुष्ठयोगेन जपं कुर्य्याच्च वाचिकम् ।

वाचिकजपस्य द्वेषोच्चाटनादिगतस्य तर्जनीयोगोऽङ्गम् । क्वचिच्च

तर्जन्यङ्गुष्ठयोगेन विद्वेषोच्चाटने जपेत् ।

---

(१) A. धूपयेत्ता ०

इति स्फुटं वाक्यम् । तथा

अङ्गुष्ठस्याक्षमालां चालयेन्मध्यमाग्रतः ।
तर्जन्या न स्पृशेत् सोऽयं मुक्तिदो गणनाक्रमः ॥
भुक्तौ मुक्तौ तथाकृष्टौ मध्यमायां जपेत् सुधीः ।

अनामिकाङ्गुष्ठयोगात् स्तम्भने । कनिष्ठाङ्गुष्ठयोगान्मारणे ।

तथा,—

अनामाङ्गुष्ठमाक्रम्य जपं कुर्य्यात्तु मानसम् ।
मध्यमाङ्गुष्ठमाक्रम्य जपं कुर्य्यादुपांशुकम् ॥

जपभेदाः ।

नरसिंहपुराणे,—

यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः ।
मन्त्रमुच्चारयेद् व्यक्तं जपयज्ञः स वाचिकः[1] ॥
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयेत् ।
[2]किञ्चिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः ॥
धिया यदक्षरश्रेण्या वर्णाद् वर्णं पदात् पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ॥
त्रयाणां जपयज्ञानां श्रेयः स्यादुत्तरोत्तरम् ।

शब्दचिन्तनं जपः । अर्थचिन्तनं तदङ्गम् । मानसं द्वैधमुक्तं

---

(१) C. ० स उच्यते ।

(२) A. B. C. कचिच्छब्दं ०

पुरश्चरणचन्द्रिकायाम्,—

जिह्वया चिन्तयेन्मन्त्रं मनसा केवलेन वा ।

योगियाज्ञवल्क्यः,—

उपांशुजपयुक्तस्य संख्या शतगुणं भवेत् ।
साहस्रो मानसः प्रोक्तो यस्माद्ध्यानसमो हि सः ॥

अन्यच्च

उच्चैर्जपाद् विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः ॥

[एवञ्च सति][1]

मानसः सिद्धिकामैस्तु पुष्टिकामैरुपांशुकः ।
वाचिको मारणे चैव प्रशस्तो जप ईरितः ॥

इति प्राशस्त्यपरं न व्यवस्थापरम् । योगियाज्ञवल्क्यः,—

न चंक्रमन् न विहसन् न पार्श्वमवलोकयन् ।
न चाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥
न पदा पदमाक्रम्य न चैव हि तथा करौ ।
न चासमाहितमना न च संश्रावयन् जपेत् ॥
उत्तिष्ठन् वीक्षमाणोऽर्कं जपं कुर्य्यात् समाहितः ।
अन्यथा प्राङ्मुखः कुर्य्यात् वक्ष्यमाणक्रमेण तु ॥
प्राक्कूलेषु कुशेष्वेवमासीनः स्वासने शुभे ।

तथा,—

(१) B. D. Omit the portion bracketed.

ध्यायेत्तु मनसा मन्त्रं जिह्वोष्ठौ न च चालयेत् ।
न कम्पयेच्छिरोग्रीवं दन्तान्नैव प्रकाशयेत् ॥

तथा,—

स्त्रीशूद्रपतितांश्चैव रासभञ्च रजस्वलाम् ।
जपकाले न भाषेत व्रतहोमादिकेषु च ॥
तूष्णीमासीत च जपंश्चाण्डालपतितादिकान् ।
दृष्ट्वा तान् वार्य्युपस्पृश्याभाष्य स्नात्वा पुनर्जपेत् ॥
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान् मन्त्रान् यथोत्साहं पावमानीश्च शक्तितः ॥
यदि वाग्यमलोपः स्याद् व्रतादिषु कथञ्चन ।
व्याहरेद् वैष्णवं मन्त्रं स्मरेद् वा विष्णुमव्ययम् ॥

कौर्म्मे,—

गुह्यका राक्षसाः सिद्धा हरन्ति प्रसभं भयात् ।
एकान्तेषु शुभे देशे तस्माज्जप्यं समाचरेत् ॥

अङ्गिराः,—

असंख्यातन्तु यज्जप्यं तत् सर्व्वं निष्फलं भवेत् ।

इति जपसाधारणधर्म्माः । [तान्त्रिकाः साधारणधर्म्मा वक्ष्यन्ते ।][1]

(१) B. D. Omit the portion bracketed.

अथ होमपरिभाषा।

होमो नाम देवतोद्देशेन द्रव्यत्यागः प्रक्षेपार्थकः। तदुक्तं [1]यदा तु चोदनाद्रव्यदेवताक्रियासमुदाये कृतार्थत्वात् तदुक्तेः श्रवणाज्जुहोतेरासेचनार्थकत्वात् द्रव्यदेवताक्रियाणां समाहारः। द्रव्यदेवताक्रिया क्रिया च त्यागः। आसेचनं प्रक्षेपः। तेन जुहोतीत्युक्ते एतदुक्तं भवति। देवतां चतुर्थ्यन्त्यपदेनाभिधाय द्रव्यं न ममेति बुद्धिं कृत्वाग्नौ प्रक्षिपेदिति। तदन्यत् सर्व्वं तदङ्गम्। छन्दोगपरिशिष्टे,—

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते।

[2]मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः॥

मन्त्रस्य देवतायाश्चानादेशे प्रजापतिर्देवता प्राजापत्यो मन्त्रश्च समस्ता व्याहृतयः। मन्त्रविधाने देवतानां स्थाने मन्त्रवर्णकी[3] देवता। मन्त्रस्यास्पष्टलिङ्गत्वे तु देवतानामनादेशे अग्निरिन्द्रः प्रजापतिरिति याज्ञवल्क्योक्तं ग्राह्यम्। देवताज्ञाने मन्त्रानादेशे तु गारुड़े,—

प्रणवादिनमोऽन्तञ्च चतुर्थ्यन्तञ्च सत्तम।

देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्त्तितः॥

विष्णुधर्म्मोत्तरे,—

(१) A. यजति चोदना देवता ० C. यजन्ति ये जना द्रव्य ० D. यजन्ति चोदना ० रासेचनार्थकः स्यात्। द्रव्य ० समाचारः।

(२) B. D. Here read इति। मन्त्रस्य ०

(३) A. ० वर्णिका ०

मन्त्रेणोङ्कारपूतेन स्वाहान्तेन विचक्षणः।

मन्त्रावसाने जुहुयाद् ध्यायन् वै मन्त्रदेवताम्॥

छन्दोगपरिशिष्टे,—

पाण्याहुतिर्द्वादशपर्व्वपूरिका

द्रवादिना चेत् स्रुवमात्रपूरिका।

दैवेन तीर्थेन च हूयते हविः

स्वङ्गारिणि स्वर्च्चिषि तच्च पावके॥

गोभिलः,—

गोवक्त्रवत्करं कुर्य्यात् तर्जनीकन्यसाहते।

अधोमुखेन तेनैव व्रीह्यादीन् होमयेत्ततः॥

पञ्चरात्रे,—

होमे मुद्रात्रयं प्रोक्तं मृगी हंसीच शूकरी।

करसङ्कोचः शूकरी हंसी मुक्तकनिष्ठिका॥

मुक्ता कनिष्ठातर्जन्यौ मृगीमुद्रा प्रदर्शिता।

शान्तिपौष्टिककर्म्मार्थं मृगी हंसी प्रकीर्त्तिता॥

आभिचारिककर्म्मार्थं शूकरी कथिता बुधैः॥

कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम्।

उक्तानि पञ्चगव्यानि तत्समानि मनीषिभिः॥

तत्समं मधुदुग्धान्नमर्घ्यपात्रमुदाहृतम्।

दधि प्रसृतिमात्रं स्याल्लाजाः स्युर्मुष्टिसम्मिताः॥

पृथुकास्तत्प्रमाणाः स्युः शक्तवोऽपि तथोदिताः।

गुड़ं पलार्द्धमानं स्यात् शर्करा हि तथा स्मृता॥

ग्रासार्द्धं चरुमानं स्यादिचुः पर्व्वावधिः स्मृतः।
एकैकं पत्रपुष्पाणि तथापूपानि कल्पयेत्॥
कदलीफलनारङ्गफलान्येकैकशो विदुः।
मातुलुङ्गं चतुःखण्डं पनसं दशधाकृतम्॥
अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः।
त्रिधाकृतं फलं वैल्वं कपित्थं खण्डितं द्विधा॥
[1][उर्व्वारुकफलं होमे गदितं खण्डितं त्रिधा।]
फलान्यन्यानि खण्डानि समिधः स्युर्दशाङ्गुलाः॥
दुर्व्वात्रयं समुद्दिष्टं गुलुची चतुरङ्गुला।
व्रीहयो मुष्टिमात्राः स्युर्मुद्गा माशा यवा अपि॥
तण्डुलाः स्युस्तदर्द्धांशाः कोद्रवा मुष्टिसम्मिताः।
गोधूमरक्तकलमा विहिता मुष्टिमानतः॥
तिलाश्चुलुकमात्रा[2]स्युः सर्षपास्तत्प्रमाणकाः।
शुक्तिप्रमाणं लवणं मरीचान्येकविंशतिः॥
पुरं वदरमानं स्याद्रामठं तत्समं स्मृतम्।

पुरं गुग्गुलम्।

चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमानि च।
तिन्तिड़ीबीज[3]मानानि समुद्दिष्टानि देशिकैः॥

(१) D. Omits the portion bracketed.
(२) B. ० मात्राः ०।
(३) A. B. ० फल ०।

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1064.



नित्याचारप्रदीपः ।

NITYĀCĀRA-PRADĪPAḤ

BY

NARASIṂHA VĀJAPEYĪ.

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬACĀRYYA.

FASCICULUS III.

CALCUTTA:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1904.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal.

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ... Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1 ...	0	6
*Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each ...	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III. Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6/ ...		
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each ...	7	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 ...	1	14
Aṣtasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...	0	12
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each ...	2	4
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each ...	1	14
*Bhāmatī, (Text) Fasc 4-8 @ /6/ each ...	10	0
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-4 ...	1	14
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each ...	1	8
Bṛhaddharma Purāṇa (Text) Fasc 1-6 @ /6/ each ...	1	8
Bodhicaryavatara of Cantidevi, Fasc. 1 ...	2	4
Catadusani Fasc 1 ...	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1-3 @ 2/ each ...	0	6
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-2 ...	6	0
Çatasāhasrikā Prajnāpāramitā (Text) Fasc. 1 to 5 @ /6/ each ...	3	6
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25 ; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each ...	1	14
Çlockavartika, (English) Fasc. 1-4 ...	19	14
*Çrauta Sūtra of Āpastamba (Text) Fasc. 4-16 @ /6/ each ...	3	0
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each ...	4	14
Çrī Bhāshyam, (Text) Fasc 1-3 @ /6/ each ...	5	10
Dana kriyā kaumudī, Fasc 1--2 @ /6/ ...	1	2
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-6...	0	12
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each ...	2	4
Kāla Viveka, Fasc. 1-6 ...	1	8
Kātantra, (Text) Fasc 1-6 @ /12/ each ...	2	4
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each ...	4	8
Kūrma Purāṇa, (Text) Fasc 1-9 @ /6/ each ...	10	8
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each...	3	6
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each ...	2	4
Mahā-bhāṣya-pradīpōdyōta, (Text) Vol. I, Fasc. 1-9 II, Fasc. 1-10 @ /6/ each	4	2
Manuṭikā Sangraha, (Text) Fasc. 1-3 @ /6/ each	7	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-7 @ /12 each ...	1	2
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each ...	5	4
Nārada Smṛti, (Text) Fasc. 1--3 @ /6/ ...	4	14
Nyāyavārtika, (Text) Fasc. 1--4 @ /6/ ...	1	2
*Nirukta, (Text) Vol. III Fasc. 1--6 Vol. IV, Fasc. 1--8 @ /6/ each ...	1	8
Nityācāra Paddhatiḥ (Text) Fasc. 1--7 ...	5	4
Nityācārapradīpaḥ (Text) Fasc. 1-3 ...	2	10
Nyayabinduṭikā, (Text) ...	1	2
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1--6 ; Vol. II, Fasc. 1--3 @ /6/ each ...	0	10
Padumawati Fasc. 1--3 @ 2/ ...	3	6
...	6	0

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1--15 @ /6/ each ... Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and Index ; Vol. III, Fasc. 1 @ /12/ each ...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1- 19 @ /6/ each ...	7	2
Ma'āṣir-i-' Ālamgīrī, (Text), Fasc. 1--6 @ /6/ each ...	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1 ...	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1--2 @ /12/ each ...	1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1--5 @ /6/ each ...	1	14
Ditto (English) Fasc. 1--3 ...	2	4
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1--5 @ /6/ each ...	1	14
Ditto (English) Fasc. 1--14 @ /12/ each ...	10	8
Ditto Index ...	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1--7 @ /6/ each ...	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif. (Text) Fasc. 1--6 @ /6/ each ...	2	4
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each ...	3	0
Wīs-o-Rāmīn, (Text) Fasc. 1--5 @ /6/ each ...	1	14
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /6/ each ...	6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1 ...	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each ...	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Assiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1170 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8) 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ...	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) ...	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) ...	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882) ...	4	0
5.	Anīs-ul-Musharrahīn ...	3	0
6.	Catalogue of Fossil Vertebrata ...	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II, and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm ...	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each ...	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each ...	18	0
13.	Sharaya-ool-Islām ...	4	0
14.	Tibetan Dictionary, by Csoma de Körös ...	10	0
15.	Ditto Grammar " " ...	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/ ...	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson ...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kasmir by M. A. Stein PH.D., Jl. Extra No. 2 of 1899 ...	4	0

Notices of Sanskrit Manuscripts, Fasc. 1--29 @ 1/ each ...	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

17--1--04.

Books are supplied by V.P.P.

वैश्वानरं स्थितं ध्यायेत्समिद्धोमेषु साधकः।
शयानमाज्यहोमेषु निषण्णं शेषवस्तुषु॥
आस्ये तु होमयेद्वह्नेर्विपश्चित्सर्व्वकर्म्मसु।
कर्णहोमे भवेद्व्याधिर्नेत्रेऽन्धत्व[1]मुदाहृतम्॥
नासिकायां मनःपीड़ा मस्तके धनसंचयः।

तथा,—

स्वर्णसिन्दूरबालार्ककुङ्कुमक्षौद्रसन्निभः।
हिरण्यरेतसो वर्णः शोभनः परिकीर्त्तितः॥
भेरीवारिदहस्तीन्द्रध्वनिर्वह्नेः शुभावहः।
नागचम्पकपुन्नागपाटलीयूथिकानिभः॥
पद्मेन्दीवरकल्हारसर्पिर्गुग्गुलसन्निभः।
पावकस्य शुभो गन्ध इत्युक्तं तत्त्ववेदिभिः॥
प्रदक्षिणार्च्चिर्निष्कम्पस्छत्राभः श्वसनः शिखी।
शुभदो यजमानस्य राज्यस्यापि विशेषतः॥
कुन्देन्दुधवलो धूमो वह्नेः प्राप्तः शुभावहः।
कृष्णः कृष्णगतिर्वर्णो यजमानं विनाशयेत्॥
श्वेतो राष्ट्रं[2]निहन्यात्तु वायसस्वरसन्निभः।
खरस्वरसमो वह्नेर्ध्वनिः सर्व्वविनाशनः॥
पूतिगन्धो हुतवहो होतुर्दुःखप्रदो भवेत्।
छिन्ना वृत्ता शिखा कुर्य्यान्मृत्युं धनपरिक्षयम्॥

---

(१) D. ० मुदीरितम्।
(२) D. निहन्त्याशु ०

शुकपक्षनिभो धूमः पारावतसमप्रभः ।
हानिं तुरगजातीनां गवाञ्च कुरुते चिरात् ॥
एवंविधेष्वरिष्टेषु प्रायश्चित्ताय देशिकः ।
मूलेनाज्येन जुहुयात् पञ्चविंशतिसंख्यया ॥

छन्दोगपरिशिष्टे,—

अङ्गुष्ठादधिका ग्राह्या समित् स्थूलतया क्वचित् ।
[1]न विशीर्णा त्वचा चैव न सकीटा न पाटिता ॥
प्रादेशान्नाधिका नोना न तथा स्याद्द्विशाखिका ।
न सपर्णा न निर्वीर्य्या होमेषु तद्विजानता ॥

ब्राह्मे,—

पलाशाश्वत्थन्यग्रोधप्लक्षवैकङ्कतोद्भवाः ।
काश्मर्य्योदुम्बरौ बिल्वश्चन्दनः सरलस्तथा ॥
सालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः ।

मरीचिः,—

प्रागग्राः समिधो ज्ञेयास्ताश्च कामेषु पाटिताः ।
शान्त्यर्थेषु सशल्कार्द्रा विपरीता जिघांसतः ॥
विशीर्णा विदला ह्रस्वा वक्राः [2]सशुषिराः कृशाः ।
दीर्घा स्थूला [3]घुणैर्जुष्टाः सर्व्वसिद्धिविनाशकाः ॥
[4]नाशुष्कक्लिन्नपूतिभिर्दारुभिरग्निसिद्धितः ।

(१) B. न विवर्णत्वचा चैव ०। (४) D. Here reads हारीतः,—नाशुष्क ०
(२) C. सशिशिराः ० D. शिशुशिराः ०
(३) A. C. ० गुणै ०।

आपस्तम्बः —नाप्रोक्षितमग्नावादध्यात् । भविष्यपुराणे,—

भूमौ स्थितेन पात्रेण विष्टब्धेन च पाणिना ।
वामेन यदुशार्दूल [1]नान्तरीक्षेण हूयते ॥

छन्दोगपरिशिष्टे,—

योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः ।
मन्दाग्निरामयावी च दरिद्रश्चाभिजायते ॥
जुह्वंश्च हुतश्चैव[2] पाणिशूर्पस्य दारुभिः ।
न कुर्य्यादग्निधमनं कुर्य्यात्तु व्यजनादिना ।
मुखेनैव धमेदग्निं मुखाद् ह्येषो व्यजायत ॥
नाग्निं मुखेनेति तु यल्लौकिके योजयन्ति तत् ।

कौर्म्मे,—वस्त्रेण नैवोपधमेत् । आदित्यपुराणे,—

क्षुत्तृट्क्रोधत्वरायुक्तो मन्त्रहीनं जुहोति यः ।
अप्रवृद्धे सधूमे वा सोऽन्धः स्यादन्यजन्मनि ॥

अथानुकल्पप्रतिनिधिविचारः ।

अनुकल्पो नाम यत्र साधनमविशेषेण विधीयते तदसम्भवे साधनान्तरं विधीयते। यथा खादिरो यूपो भवति इति विधाय खादिराभावे पालाश इति सोमे। यत्र व्रीहिभिर्यजेतेति

(१) B. C. D. ० नान्तरीक्षे च ०।
(२) A. B. D. ० हुते चैव ०।

व्रीह्यादिसाधनविधौ तदसम्भवे कर्म्मलोपप्रसङ्गे तत्सदृशं द्रव्यान्तरं साधनमुपादीयते स्वोत्प्रेक्षया तत्र प्रतिनिधिः। यथा नित्यकर्म्मणि व्रीह्यपचारे नीवारादिः। तत्र प्रतिनिधौ विधिव्यापारो नास्ति अनुकल्पे त्वस्ति। यत्र तु सोमाभावे पूतिकानभिषुणुयादिति श्रूयते तत्र सोमाभावे सादृश्येन पूतिकाः प्राप्ता एवं किन्तु पूतिकावदन्येऽपि सोमसदृशास्तत्र पूतिका नियम्यन्ते। एवं काम्येषु यद्यपि सर्व्वाङ्गसम्पत्तावधिकार इति न प्रतिनिधिसम्भवस्तत्राप्यारम्भानन्तरमवश्यसमापनीयत्वात् प्रतिनिधिप्रवेशः। अनुकल्पस्य तु शास्त्रीयसाधनत्वादनुकल्पमादायाप्यारम्भः।

केवलं,—

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य [1]दुर्म्मतेर्विद्यते फलम्॥

इति मुख्यकल्पसम्भवे नानुकल्पाधिकारः। छन्दोगपरिशिष्टे,—

यथोक्तवस्त्वसम्पत्तौ कार्य्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः॥

व्रीहयः षष्टिकाः। पैठीनसिः,—काण्डमूलपर्णपुष्पफलप्ररोहरस[2]गन्धानां सादृश्येन प्रतिनिधिं कुर्य्यात्। सर्व्वालाभे यवः प्रतिनिधिर्भवति। काण्डं नालं प्ररोहा अङ्कुराः। मैत्रायणीयपरिशिष्टे,—घृतमाज्यार्थे प्रतिनिधिः। तदभावे दधि पयो वा

(१) A. B. C. ० दुर्गते ०।
(२) D. ० गन्धादीनां।

तण्डुलपिष्टयवपिष्टनाभिः सममाज्यार्थान् कुर्व्वन्ति। दर्भास्तरणार्थे काशः प्रतिनिधिस्तदभावे [1]यववतीभिः काण्डवतीभिरोषधीभिस्तरणार्थान् कुर्व्वन्ति। कटोशीरवन्दनोपनलवल्वजावोलय-(?)वर्जम्। इध्मार्थे पलाशाश्वत्थखदिरलोहितकोदुम्बराणाम्। तदभावे सर्व्ववनस्पतीनाम्। तिन्दुकनीपबिल्वराजवृक्षशाल्मलीरजतककपित्थकोविदार[2]हरीतकश्लेष्मातकसर्व्वकण्टकिवर्जम्। कटादयस्तृणविशेषाः। राजवृक्षः करवाल इति कान्यकुब्जे प्रसिद्धः। [3]तथा व्रीहियवौ पुरोडाशार्थे [4]तदभावे तुषवतीभिस्तण्डुलवतीभिरोषधीभिः पुरोडाशार्थान् कुर्व्वन्ति। कुशूलशाकमासमसूरकुरवक(?)कोद्रवकोरदूषकवर्जम्। दक्षिणालाभे फलानां मूलानां दक्षिणां ददाति न त्वेवं यजेत।

बौधायनः,—

आज्यहोमेषु सर्व्वत्र गव्यमेव घृतं स्मृतम्।
तदभावे माहिष्यन्तु आजमाविकमेव वा॥
तदभावेऽपि तैलं स्यात् तदभावेऽपि जर्त्तिलम्।
तदभावेऽपि कौसुम्भं तदभावेऽपि सार्षपम्॥

इति। वृद्धपराशरः,—

(१) A. B. B. यव (:) प्रतिनिधिः। ताभिः काण्डवतीभि ०।
(२) D. ० विभीतकश्लेष्मा ०।
(३) A. B. C. यथा ०।
(४) D. तदलाभे ०।

दर्भैर्लोहितदर्भैश्च काशवीरणवल्वजैः।
शुकधान्यतृणैर्वापि दर्भं कार्य्यं श्रिये बुधैः॥

एवञ्च वल्वजादिनिषेधस्तरणकार्य्ये न सर्व्वत्र कुशकार्य्ये।

अथ प्रतिनिध्यपवादः।

जैमिनिः,—[1]न देवाग्निशब्दक्रियमन्यार्थसंयोगात् [2]देवतावधिगम्यासादृश्येन न प्रतिनिधिः। स्मरणस्यैवास्मरणे सादृश्याज्ञानेक: प्रतिनिधिः। अग्नेराहवनीयादेरलौकिकस्य सादृश्याज्ञानान्न प्रतिनिधिः। अग्न्यभावे विप्रपाणिजलाकीर्णविधानमनुकल्पमेव। शब्दो मन्त्रो नास्य प्रतिनिधिः स्मरणास्मरणयोर्वैयर्थ्यात्। क्रियाणां यागहोमादीनां न प्रतिनिधिः। अदृष्टार्थत्वात्।

कप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे।
इष्टिं वैश्वानरीं कुर्य्यात्

इत्यनुकल्परूपमेव। तथा प्रतिषिद्धञ्च न प्रतिनिधीयते। दर्शे व्रीहियवविधेरेव माषादिनिवृत्तेरयज्ञिया माषा इति निषेधः प्रतिनिधिप्राप्तस्यैव। तथा स्वामिनः फलसमवायात् फलस्य कर्म्मयोगित्वात् स्वामिनः प्रतिनिधिर्नास्ति। सत्रे तु यजमानमरणे सप्तदशसंख्यपुरुषकर्त्तृत्वस्याङ्गत्वेन कर्त्तृत्वांशेन प्रतिनिधिः। तथा प्रतिनिधिना कर्म्मोपक्रमे प्रतिनिध्यपचारे

---

(१) B न दैवताग्नि०

(२) B. देवतावधिगम्यात् साद्दश्येन० A. देवतावधिगम्यात् तत्साद्दश्येन०।

तत्सदृशं नोपादेयम्। किन्तु मुख्यसदृशं प्रतिनिध्यन्तरम्। तदुक्तं न प्रतिनिधौ समत्वात्। वैकल्पिके तु व्रीहिणा कर्म्मोपक्रमे व्रीह्यपचारे यवलाभेऽपि न यवादरः किन्तु व्रीहिः प्रतिनिधिर्यवस्य तत्प्रयोगेऽङ्गत्वात्। प्रतिनिधिना कर्म्मारम्भे प्रतिनिधौ कतिपयसंस्कारेऽपि मुख्यलाभे मुख्येनैव प्रधानकर्म्म। प्रधानसमाप्तौ मुख्यलाभेऽपि न संस्कारलाभाय मुख्यादरः। द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात्। संस्कारसमर्थस्यापि मुख्यस्य ग्रहणम्। मुख्यप्रयोजनासमर्थत्वे प्रतिनिध्यादरः। [1]तथा हि व्यवधानमात्रयोग्यव्रीहिलाभेऽपि न प्रतिनिध्यादरः। तथा—

मुख्यकालानुरोधेन गौणमप्यस्तु साधनम्।
न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणम्॥

वृद्धिश्राद्धम्।

शातातपः,—

नानिष्ट्वा तु पितॄन् श्राद्धे वैदिकं किञ्चिदाचरेत्।
तत्रापि मातरः पूर्व्वं पूजनीयाः प्रयत्नतः॥

विष्णुपुराणे,—

कन्यापुत्त्रविवाहेषु प्रवेशे [2]नववेश्मनः।
नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा॥

---

(१) D. तथाह्यवदानमात्रयोग्य०।

(२) D. नववेश्मनि।

सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत्प्रयतो गृही ॥

चूड़ाकर्म्मादिक इत्यादिशब्दः संस्कारमात्रोपलक्षणः । तेन बहिर्निष्क्रामणान्नप्राशनचूड़ादिकेष्वपि च श्राद्धम् । तथा,—

यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः ।
पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत् ॥

अत्र महादानादौ यज्ञशब्दप्रयोगाद् वृद्धिश्राद्धमित्याहुः । यद्यपि शातातपेन वैदिककर्म्ममात्रे वृद्धिश्राद्धमुक्तं तथापि विष्णुपुराणीयवाक्योपात्तवैदिककर्म्मपरं वैदिकपदम् । पुरोडाशं चतुर्द्धा करोतीत्याग्नेयं चतुर्द्धा करोतीत्येतेनोपसंहारवत् ।

एवञ्च छन्दोगपरिशिष्टे,—

नाष्टकासु भवेत् श्राद्धं न श्राद्धे श्राद्धमिष्यते ।
न सोष्यन्तीजातकर्म्मप्रोषितागतकर्म्मसु ॥
वृहत्सत्रक्षुद्रपशुपुष्ट्यर्थं परिविश्यतोः ।
सूर्य्येन्द्वोः कर्म्मणीये च तयोः श्राद्धं न विद्यते ॥

इति प्रतिषेधोऽत्यन्ताप्राप्तविषयत्वान्नित्यानुवादः । अतएव यथाप्राप्तानुवादत्वाज्जातकर्म्मणि तिलपूर्णपात्रश्राद्धविधानादन्नश्राद्धप्रतिषेधात् तस्यानुवादः । [1]इत्वां अतितिष्ठया सन्तिष्ठत इत्युक्तेऽनुयाजान् यजन्तीत्यस्य नित्यानुवादत्ववत् । तथा—

(१) D. इत्वान्तातिथ्या सन्तिष्ठत ० ।

विवाहादिः कर्म्मगणो य उक्तो
गर्भाधानं शुश्रुम यस्य चान्ते ।
विवाहादावेकमेवात्र कुर्य्या-
च्छ्राद्धं नादौ कर्म्मणः कर्म्मणः स्यात् ॥

इति गर्भाधाने निषेधोऽपि नित्यानुवाद एव । केवलं

असकृद् यानि कर्म्माणि क्रियन्ते कर्म्मकारिणा ।
प्रतिप्रयोगं नैताः स्युर्म्मातरः श्राद्धमेव च ॥
आधानहोमयोश्चैव वैश्वदेवे तथैव च ।
बलिकर्म्मणि दर्शे च पौर्णमासे तथैव च ॥
नवयज्ञे च यज्ञाज्ञा वदन्त्येवं मनीषिणः ।

इति वाक्योपात्तकर्म्मणां पुनः प्रयोगे न श्राद्धम् । सोमयागे तु,—पुनः पुनः प्रयोगेऽपि श्राद्धं भवत्येव । तथा,—

प्रदोषे श्राद्धमेकं स्याद् योनिष्कालप्रवेशयोः । (?)
न श्राद्धं युज्यते कर्त्तुं प्रथमे पुष्टिकर्म्मणि ॥
हलाभियोगादिषु तु षट्कं कुर्य्यात् पृथक् पृथक् ।
[न दशाग्रन्थिके नैव विषवद्दष्टकर्म्मणि ॥
क्रमिदष्टचिकित्सायां नैव शेषेषु विद्यते ।

एष्वपि निषेधो नित्यानुवाद एव[1] ।] तथा,—

गणशः क्रियमाणे तु मातृणां पूजनं सकृत् ।

इति । यानि कर्म्माणि विधिवशेनार्थवशेन वा एकस्मिन्नेव

(१) B. Omits the portion bracketed.

दिने क्रियन्ते। यथा आधानं होमश्च यद्वोत्कृष्य क्रियमाणं जातकर्म्मादि तत्र न्यायेन सकृदेव करणं प्राप्तमनूद्यते। वह्निः प्रयोगगतत्वेन सर्व्वान् प्रत्यवशिष्टत्वादिति। वस्तुतोऽथातो गोभिलोक्तानामित्युपक्रमेऽभिधाय छन्दोगपरिशिष्टे,—

कर्म्मादिषु च सर्व्वेषु मातरः सगणाधिपाः।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः।
यत्र यत्र भवेच्छ्राद्धं तत्र तत्र तु मातरः॥

इति गोभिलोक्तगृह्यकर्म्ममात्रे वृद्धिश्राद्धं विधीयत इति। श्राद्धादिष्वपि तदुक्तेः प्रसङ्गान्निषेधः। गृह्यान्तरकर्म्मणां शाखान्तरन्यायेन तदभिन्नान्येवेति तत्रापि श्राद्धविधिनिषेधौ। एवं विष्णुपुराणीयं स्मृत्यन्तरं कतिपयेषु प्रापकमिति न तदतिरिक्तगृह्यकर्म्मस्वप्राप्तिरिति। भविष्यपुराणे,—

गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह।
आत्मदेवता कुलदेवता इति पाठस्तु बहुसम्मतः।
पूज्याश्चित्रेऽथवार्च्चायां वरदाभयपाणयः।

इति। [1]अक्षतपुञ्जेषु वा छन्दोगपरिशिष्टात्। सगणाधिपा इति वचनाद् गणपतिना सहाष्टादश। बह्वृचपरिशिष्टे,—

आदौ विनायकः पूज्यः अन्ते तु[2] कुलदेवता।

(१) B. अक्षतपुष्पेषु वा ० A. अक्षतयुक्तेषु वा ०।
(२) A. C. D. ० च ०।

छन्दोगपरिशिष्टे,—

कुड्यलग्नां वसोर्धारां सप्तवारान् घृतेन तु।
कारयेत् पञ्चवारान् वा नातिनीचां न चोच्छ्रिताम्॥
आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः।

अथ मधुपर्कः।

तत्र पारस्करः,—षडर्घ्या भवन्ति आचार्य्यो ऋत्विक् वैवाह्यो राजा प्रियः स्नातक इति। प्रतिसंवत्सरानर्हयेयुर्यक्ष्यमाणास्तु ऋत्विजः। आसनमाहार्य्याह साधु भवानास्तामर्चयिष्यामो भवन्तमिति। आहरन्ति विष्टरं पाद्यं पादार्थमुदकमर्घ्यमाचमनीयं मधुपर्कं दधिमधुघृतमपिहितं कांस्यं कांस्येनेति। अन्यस्त्रिस्त्रिः प्राह विष्टरादीन्। विष्टरं प्रतिगृह्णाति वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्य्यः। इमं तमभितिष्ठामि यो माकश्चाभिदासति। एनमभ्युपविशति पादयोरन्यं विष्टरमासनाय। सव्यं पादं प्रक्षाल्य दक्षिणपादं प्रक्षालयति ब्राह्मणश्चेद् दक्षिणं प्रथमम्। विराजो दोहोसि विराजो दोहमसीय मयि पाद्यायै विराजो दोह इति। अर्घ्यं प्रतिगृह्णाति आपः स्थ युष्माभिः सर्व्वान् कामानवाप्नुवानीति निनयन्नभिमन्त्रयते समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टास्माकं वीरा मापरासेचि मत्पय इति। [1]आचामति

(१) D. आचमनमिति।

आमागन् यशसा संसृजवर्चसा तं माकुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टं तनूनामिति। मित्रस्य त्वेति मधुपर्कं प्रतीक्षते। देवस्यत्वेति प्रतिगृह्णाति। सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रचालयति नमस्यावाश्यायान्यशने यत्त आविद्धं तत्ते निष्कृन्तामि अनामिकयाङ्गुष्ठेन त्रिर्निक्षिपति। तस्य त्रिः प्राश्नाति। यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽशानीति। मधुमतीभिर्वा प्रत्यृचम्। पुत्रायान्तेवासिने चोत्तरत आसीनायोच्छिष्टं दद्यात्। सर्व्वं प्राश्नीयाद् वा। संचरे निनये वाचम्य प्राणान् संस्पृशति वाङ्म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलं उर्व्वोरोजो मेऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सहेत्याचान्तोदकाय गां समादाय गौरिति त्रिः प्राह। प्रत्याह माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्टेति। मम चामुष्य च पाप्मानि हतोसीति यद्यालभेत। यद्युत्सृजेत मम चामुष्य च पाप्माहत ओमुत्सृजत तृणान्यत्तु इति ब्रूयात्। नचैवामागुंसोर्घ्यः (?) स्यात् अधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात्। यद्यसकृत् संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतिः। तत्र साधु भवानिति यजमानस्य वचनम्। अर्चयतेत्युत्तरं आसने उपवेशनं विष्टरः पादार्थमुदकं पुनर्विष्टरः अर्घ्यः आचमनीयं मधुपर्क इति। स्थापयित्वा। अन्येन यजमानपुरुषेण विष्टरो विष्टरो विष्टर इति त्रिरुक्ते प्रतिगृह्यतामिति यजमानः।

प्रतिगृह्णामीति विष्टरग्रहणम्। मन्त्रेण तत्रोपवेशनम्। एवमन्यत्र। नसोर्मे प्राणोऽस्त्वित्यादिप्रयोगः। यज्ञविवाहादन्यत्र गोरुत्सर्गालम्भयोर्विकल्पः। यज्ञे विवाहे चालम्भनियमः। केवलं निषेधात् कलौ वर्जनम्। उत्सर्गपक्षे गौरिति त्रिरुक्त्वा गोरुपस्थानम्। माता रुद्राणामित्यादिमन्त्रस्य ओमुत्सृजत तृणान्यत्त्वित्यस्य जपः। यज्ञविवाहयोर्न गोरुपस्थानं न वा जपः।

छन्दोगपरिशिष्टे,—

कतिभिस्तु भवेद् ब्रह्मा कतिभिर्विष्टरो मतः।
पञ्चाशद्भिर्भवेद् ब्रह्मा तदर्द्धेन तु विष्टरः॥
ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः॥

यज्ञपार्श्वे,—

गर्भाधानादिसंस्कारे ब्राह्मणान् भोजयेद् दश।
आवसथ्ये त्रयोविंशमग्न्याधेये शतात् परम्॥
आग्रयणे प्रायश्चित्ते ब्राह्मणान् दश पञ्च च।
सहस्रं भोजयेत् सोमे ब्राह्मणानां शतं पशौ॥
चातुर्म्मास्ये च चत्वारि तथा पञ्च सुराग्रहे।
अयुतं वाजपेये तु अश्वमेधे चतुर्गुणम्॥

चत्वारि शतानि सुराग्रहे सौत्रामण्याम्। मैत्रायणीयपरिशिष्याम्,—दक्षिणाभावे फलानां मूलानां भक्ष्याणां वा दद्यान्न त्वेवं यजेत। एवं अदक्षिणम्। उक्तदक्षिणासम्भवे अनुकल्पः।

छन्दोगपरिशिष्टम्,—

ब्रह्मणे दक्षिणा देया या च यत्रोपदिश्यते ।
कर्म्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत् ॥
यावत्तावत्तु भोक्तुश्च तृप्तिरन्नेन जायते ।
नापरार्द्धमतः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥

[1][गोभिलः,—

अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ [2]तु पुष्कलम् ।
पुष्कलानि च चत्वारि पूर्णपात्रं प्रचक्षते ॥

तथा,—कांस्यं चमसं वान्नस्य पूरयित्वा कृतस्य वाऽकृतस्य वा अपिवा [3]फलानामेव एकं पूर्णपात्रमाचक्षते । इति शक्त्यपेक्षया परिमाणविशेषाः । छन्दोगपरिशिष्टे,—

विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत् ।]
स्वयञ्चेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत् ॥

यत्र कर्म्मणि या दक्षिणा सा ब्रह्मणे देया । अन्यश्चेद्धौत्रं कुर्य्यात् होमं कुर्य्यात् तदा आम्नातदक्षिणार्द्धं ब्रह्मणे देयम् । अर्द्धञ्च होमकर्त्रे । स्वयमुभयं ब्रह्मत्वं होतृत्वञ्च यदि यजमानः कुर्य्यात् तदा अन्यस्मै ब्राह्मणाय दक्षिणां दद्यात् । तेन स्मार्त्त-कर्म्मसु स्वयं कर्त्तृत्वं मुख्यमित्युक्तं भवति ।

(१) A. B. Read the portion bracketed after सुराग्रहे सौत्रामण्यां
(२) D. ० च ०
(३) D. पञ्चानामेवं पूर्णपात्र ०

अथाङ्कुरार्पणविधिः ।

शारदातिलके,—

दीक्षायामभिषेके च नववेश्मप्रवेशने ।
उत्सवेषु च सर्व्वेषु विदध्यादङ्कुरार्पणम् ॥
मण्डपस्योत्तरे भागे शालां पूर्व्वोत्तरायताम् ।
[1]गूढ़ां कुर्य्यात् ततस्तस्यां मण्डलं रचयेत् सुधीः ॥
पञ्चहस्तप्रमाणानि पञ्चसूत्राणि पातयेत् ।
पूर्व्वापरायतान्येषामन्तरं द्वादशाङ्गुलम् ।
दक्षिणोत्तरसूत्राणि तद्वदेकादशार्पयेत् ॥
पदानि तत्र जायन्ते चत्वारिंशत् प्रमार्जयेत् ।
पंक्त्या वीथीश्चतस्रस्तु चतुष्कोभयपार्श्वयोः ॥
वीथ्यौ द्वे द्वे चतुःकोष्ठत्रयमत्रावशिष्यते ।
पदानि रञ्जयेत् तानि श्वेतपीतारुणासितैः ॥
रजोभिः श्यामलेनाथ वीथीरारचयेत् सुधीः ।
पात्राणि [2]त्रिविधान्यस्मिन्नङ्कुरार्पणकर्म्मणि ॥
पालिकाः पञ्च मुख्याश्च शरावाश्च चतुःक्रमात् ।
प्रोक्ताः स्युः सर्व्वतन्त्रज्ञैर्हरिब्रह्मशिवात्मकाः ॥
एषामुत्सेध उन्नेयः षोड़शद्वादशाष्टभिः ।
अङ्गुलैः क्रमशस्तानि शुभान्यावेष्ट्य तन्तुना ॥

(१) D. सुखं कुर्य्यात् ०
(२) D त्रिविधान्याङ्करङ्कुरा ०

प्रक्षाल्य देशिकस्तेषु पात्रेष्वाहितशालिषु ।
सगन्धदर्भकूर्चेषु पश्चिमादि निवेशयेत् ॥
करीषवालुकामृद्भिस्तानि पात्राणि पूरयेत् ।
सुधाबीजेन बीजानि दुग्धे प्रक्षाल्य मन्त्रवित् ॥
मूलमन्त्राभिजप्तानि पञ्चघोषपुरःसरम् ।
आशीर्व्वादैर्द्विजातीनां मङ्गलाचारपूर्व्वकम् ॥
निर्वपेत् तेषु पात्रेषु देशिको यतमानसः ।
शालिश्यामाढ़कीमुद्गतिलनिष्पावसर्षपाः ॥
कुलत्थकङ्गुमाषाश्च बीजान्यङ्कुरकर्म्मणि ।
हरिद्राभिः समभ्युक्ष्य वस्त्रैराच्छाद्य देशिकः ॥
बलिं त्रिविधपात्राणां दिक्षु पूर्व्वादितः क्षिपेत् ।
[1]प्रणवाद्यैर्नमोऽन्त्यैश्च रात्रौ रात्रीशनामभिः ॥
भूतानि पितरो यक्षा नागा ब्रह्मा शिवो हरिः ।
सप्तानामपि रात्रीणां देवताः समुदीरिताः ॥
भूतेभ्यः स्यु र्लाजतिलहरिद्रादधिशक्तवः ।
सान्नाः पितृभ्यः सतिलास्तण्डुलाः परिकीर्त्तिताः ॥
करम्भलाजा यक्षेभ्यो नारिकेलोदकान्वितम् ।
शक्तुपिष्टञ्च नागेभ्यो ब्रह्मणे पङ्कजाक्षतम् ॥
सापूपमन्नं शर्व्वाय विष्णवे स्याद् गुड़ोदनम् ।
ततो लोकेश्वरेभ्योऽपि विधिवद्विकिरेद्बलिम् ॥

(१) A. B. C. प्रणवादिनमो ०

[सप्तदिनात्पूर्व्वमारम्भे सप्त देवताः क्रमेण। नव दिनात्पूर्व्वमारम्भे हरयेऽधिकदिनद्वये बलिः।[1]]

अथ ग्रहयज्ञः।

स च बहुप्रयाससाध्यकर्म्माङ्गम्। ग्रहयज्ञाधिकारे मत्स्यपुराणे—

विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्म्मसु ।
निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च ॥

याज्ञवल्क्यः,—

एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।
कर्म्मणा फलमाप्नोति [2]श्रियञ्चाप्नोत्यनुत्तमाम् ॥

ग्रहयज्ञश्चतुर्विधः। ग्रहातिथ्योऽयुतहोमो लक्षहोमः कोटिहोमश्च तत्र ग्रहातिथ्यो याज्ञवल्क्यकात्यायनबह्वृचगृह्याद्युक्तः। तत्र यद्यपि याज्ञवल्कीय आज्यहोमोऽधिदैवत-प्रत्यधिदैवतहोमश्च नोक्तस्तथाप्ययुतहोमादेवातिदिश्यते। न च निराकाङ्क्षत्वेनातिदेशानपेक्ष्यत्वम्। ग्रहवर्ण-ग्रहस्थान-ग्रहस्थापन-दिगभिमुखत्वादीनां याज्ञवल्क्यानुक्तत्वेन तदर्थमतिदेशापेक्षायामधिदैवतादीनामप्यतिदेशात्। नचैवं व्याहृतिकरणकतिल[3]होमातिदेशप्रसङ्गः

(१) B. D. Omit the portion bracketed.
(२) D. श्रियं प्राप्नो ०।
(३) B. ० होमादिप्रसङ्गः।

[1]प्रधानत्वेनातिदेशायोग्यत्वात्। अधिदैवतहोमादीनां त्वङ्गत्वेनातिदेशसम्भवात्। अतएव कल्पतरुकारेणोक्तं [2]ग्रहातिथ्यो ग्रहाणां स्थापनदेशाश्च मध्ये तु भास्करं विद्यादित्यादिनाऽयुत होमे वक्ष्यत इति। अतएव यावत्सन्निपातसमाम्नानलक्षणमपूर्व्वतालिङ्गं ग्रहातिथ्ये नास्ति ग्रहवर्णवेशादीनामनाम्नानात्। यथाहि प्रयाजादौ यावत्सन्निपातिद्रव्यसंस्कारविधिसत्त्वादव्यक्तचोदनात्वेऽपि न सोमधर्म्मातिदेशः। नैवमिह। यथाहि दर्शपौर्णमासपशुसोमप्रवर्ग्यादौ यावत्सन्निपातिसमाम्नानानपेक्षत्वान्न कस्यचिद्धर्म्मग्राहकत्वमिह तु वैषम्यम्। चोदनालिङ्गमूलयुक्तमस्त्वेव।

स्मृतिशास्त्रविकल्पः स्यादाकाङ्क्षापूरणे सति।

तत्रापीयमेव युक्तिः। किञ्च [3]ग्रहातिथ्ये बह्वृचगृह्ये एकैकस्याष्टसहस्रमष्टशतम्। अष्टाविंशति समिध आज्यञ्च हुत्वोपहारान् दद्यादित्याज्यहोमः समिद्धोमसमो विहितः। अपिच दानविवेके ग्रहातिथ्ये कात्यायनोक्तत्वेनाधिदेवतप्रत्यधिदेवता दर्शिताः। आश्वलायनेनाग्न्यादयोऽधिदेवता रुद्रादयः प्रत्यधिदेवता इति क्रमभेदेन दर्शिताः। एवञ्चाष्टहस्तशालावृद्धिश्राद्धमधुपर्कहस्तमात्रैकहस्तकुण्डकलसस्थापनवितानबन्धनाभिषेकादि-

(१) A. B. D. तस्य प्रधानत्वे ०।

(२) A. C. यज्ञातिथ्ये। यज्ञानां ०

(३) D. Here reads—शाखान्तराधिकरणन्यायेन बह्वृचगृह्यं याज्ञवल्कीयञ्च कर्म्म न भिद्यते। अस्ति च बह्वृचगृह्ये एकैकस्या ०।

कमत्राप्यतिदेशेन प्रवर्त्तत एव। अधिकदक्षिणा न प्रवर्त्तते दक्षिणाम्नानात्। भूर्धेनुर्दक्षिणेत्यादावधिकदक्षिणा न प्रवर्त्तते। किञ्च नारदेन ग्रहमन्त्रेण षट्त्रिंशत्संख्यकः समिद्धोमः। अधिदेवतमन्त्रेण तावत्संख्यघृतहोमः। प्रत्यधिदैवतमन्त्रेण तावांश्चरुहोम इति पक्षान्तरं दर्शयताधिदेवतादिसद्भावो ग्रहातिथ्ये दर्शितः। अत्र दाक्षिणात्यनिबन्धेषु ग्रहेभ्यः शतहोमेऽधिदेवतादिभ्यो दश दश तिस्रस्तिस्र इतिग्रहापेक्षयाधिदेवतादिभ्यो न्यूनपक्षो दर्शितः।

अथ प्रयोगः।

यजमानताराचन्द्रशुद्धौ शुभलग्ने कार्य्यः। औत्सुक्ये शुभमूहूर्त्तेऽपि वा प्रारम्भः। पूर्व्वदिने ऋत्विक्-यजमानानां हविष्यभोजनम्। प्रातर्नित्यकृत्यानन्तरं गणपत्यादिपूजा स्वस्तिवाचनं सङ्कल्पः—अमुककामोऽहं ग्रहातिथ्याख्यग्रहयज्ञेन यक्ष्य इति। मातृपूजा। वसोर्धारा। आयुष्यमन्त्रजपः। वृद्धिश्राद्धम्। नामगोत्रोच्चारणेन अस्मिन् ग्रहयज्ञे ऋत्विक् भवेति द्वयोर्वरणम्। मधुपर्कः।

आचार्य्यकर्म्म।

यजमानगृहेशानप्रदेशे शिवायतने वा प्रागुदक्प्रवणे समचतुरस्राष्टहस्तमण्डपकरणम्। तत्राश्वत्थोदुम्बरप्लक्षवटशाखाभि-

स्तोरणचतुष्टयम् । तस्येशाने हस्तमात्रखातविस्तारं समचतुरस्रं कुण्डम् । तत्र [1]चतुरङ्गुलोच्छ्रायविस्तारा सर्व्वत्र[2] समा एका मेखला । पश्चिमे मेखलोपरि द्वादशाङ्गुलदीर्घा षट्सप्तान्यतमाङ्गुलविस्तृता कूर्म्मपृष्ठोन्नतमध्याङ्गुलोच्छ्रितप्रान्ता गजोष्ठसदृशी अश्वत्थपत्रनिभा वा योनिः । कुण्डेशाने देवस्थापनाय वेदी । हस्तविस्तता वितस्त्युच्छ्राया चतुरस्रा उदक्-प्रवणा वप्रद्वयवृता[3] कार्य्या । प्रथमो वप्रो द्व्यङ्गुलोच्छ्रायः द्वितीयस्त्र्यङ्गुलोच्छ्रायः । द्वावप्यङ्गुलविस्तारौ । आत्ययिककार्य्ये गृहादावेकशालां कल्पयित्वा हस्तमात्रे चतुरङ्गुलोच्छ्रिते [वा][4] बालुकास्थण्डिले होमः । -ग्रहवेदिरुक्तरूपैव । कुण्डमुपलिप्य बालुकाभिः [5]प्रपूर्य्य देवीपुराणोक्तमन्त्रैः परिसमूहनादिपञ्चभूसंस्कारं कृत्वाग्निस्थापनम् । अथ वेद्याः पश्चिमे उपविश्य पूजा । वेद्या मध्ये पूर्व्वापरायतसूत्रद्वयं दक्षिणोत्तरायतसूत्रद्वयञ्च दत्वा नवधा विभागः । [6]मध्ये ताम्रवर्णतण्डुलैर्मण्डलाकारं कृत्वा सूर्य्यस्थापनम् । आग्नेये शुक्लतण्डुलैश्चतुरस्रं सोमस्य । दक्षिणे रक्ततण्डुलैस्त्रिकोणं भौमस्य । ईशाने

(१) A. B. C. चतुरङ्गुलोच्चविस्तारा ।

(२) A. सर्व्वतः ० D. सर्व्वत्रैका मेखला ।

(३) B. D. ० युता ० ।

(४) A. B. C. Omit the portion bracketed.

(५) D. प्रकीर्य्य ।

(६) D. मध्यभागे ० ।

पीततण्डुलैर्बाणाकारं बुधस्य । उत्तरे पीततण्डुलै दीर्घचतुरस्रं गुरोः । पूर्व्वे शुक्लतण्डुलैः पञ्चकोणं शुक्रस्य । पश्चिमे कृष्णतण्डुलैर्धनुराकृति शनेः । नैर्ऋते कृष्णतण्डुलैः सूर्पाकृति राहोः । वायव्ये धूम्रतण्डुलैर्ध्वजाकृति केतोः । एवं स्थानं कृत्वा मध्ये ताम्रमयपूर्व्वाभिमुखसूर्य्यप्रतिमास्थापनम् । स्फटिक[1][रजत]रक्तचन्दनस्वर्णमयरजतलोहसीसकांस्यमयानां सोमाद्यष्टप्रतिमानां सूर्य्याभिमुखानां स्वस्वमण्डले स्थापनम् । चित्रघटानां वा स्थापनम् । स्वस्वगन्धैर्वा लिखनम् । ग्रहदक्षिणेऽधिदेवताः । वामे प्रत्यधिदेवताः । [2]राहूत्तरे विनायकः । शनेरुत्तरे दुर्गा । सूर्य्योत्तरे वायुः । राहुदक्षिणे आकाशः । केतुदक्षिणेऽश्विनौ । एताः प्रतिमाः शिल्पशास्त्रप्रसिद्धद्रव्यमयाश्चित्रलिखिता गन्धमया वा ।

अथावाहनम् ।

[3]रक्ततण्डुलपुष्पाण्यादाय

पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वरथसंस्थश्च द्विभुजः स्यात् सदा रविः ॥

(१) A. B. C. Omit the portion bracketed.

(२) D. राहोर्दक्षिणे आकाशः । केतोर्दक्षिणे ० ।

(३) A. B. C सित ० ।

इति ध्यात्वा ओँ भूर्भुवः स्वः कलिङ्गदेशोद्भवं काश्यपगोत्रं धनिष्ठानक्षत्रं रक्तवर्णं ईश्वराधिदैवतं अग्निप्रत्यधिदैवतं कपिलनामाग्निकं सूर्य्यभट्टारकमावाहयामि सूर्य्यभट्टारक इहागच्छ इह तिष्ठ

कलिङ्गदेशसम्भूत दाड़िमीकुसुमप्रभ ।
काश्यपान्वय मार्त्तण्ड मण्डलेऽत्रागतो भव ॥

एवं श्वेतं श्वेतवस्त्रं दशाश्वरथं हेमभूषणं गदावरदपाणिं द्विभुजं सोमं ध्यात्वा ओँ भूर्भुवः स्वः यमुनातीरसञ्जातमात्रेयगोत्रं रोहिणीनक्षत्रं श्वेतवर्णमुमाधिदैवतमप्प्रत्यधिदैवतं पिङ्गलनामाग्निकं सोममावाहयामि सोमभट्टारक इहागच्छ इह तिष्ठ

[1]भिण्डीरपिण्डसंकाश यमुनातीरसम्भव ।
आत्रेयगोत्र शीतांशो मण्डलेऽत्रागतो भव ॥

[2]एवं रक्तमाल्याम्बरधरं शक्तिशूलगदाधरपाणिं मेषस्थं भौमं ध्यात्वा ओँ भूर्भुवः स्वः अवन्तीपुरसञ्जातं भारद्वाजसगोत्रं स्वातीनक्षत्रं रक्तवर्णं स्कन्दाधिदैवतं क्षितिप्रत्यधिदैवतं धूम्रनामाग्निकं भौमभट्टारकमावाहयामि भौमभट्टारक इहागच्छ इह तिष्ठ

(१) A. भण्डार ० B. भिङ्गार ०

(२) D. रक्तपुष्पतण्डुलं गृहीत्वा दक्षिणे भौमं मेषसंस्थं रक्तमाल्याम्बरधरं चतुर्भुजं दक्षिणाधःक्रमेण वरखड्गशक्तिगदाधरं अवन्तीदेशसञ्जातं स्वातीनक्षत्रं भरद्वाजसगोत्रं स्कन्दाधिदैवतं भूमिप्रत्यधिदैवतं धूम्रनामाग्निकं ० ।

[1]सुरेन्द्रगोपवर्णाभ अवन्तीदेशसम्भव ।
भारद्वाज महीपुत्र मण्डलेऽत्रागतो भव ॥

एवं पीतमाल्याम्बरधरं कर्णिकारप्रभं खड्गचर्म्मगदावरकरं बुधं ध्यात्वा ओँ भूर्भुवः स्वः मगधदेशसञ्जातमात्रेयगोत्रं विशाखानक्षत्रं पीतवर्णं [2]हर्य्यधिदैवतं विष्णुप्रत्यधिदैवतं जठरनामाग्निकं बुधभट्टारकमावाहयामि बुधभट्टारक इहागच्छ इह तिष्ठ इत्यावाह्य

विशुद्धकाञ्चनाभास मगधोद्भव सोमज ।
आत्रेयगोत्र सर्व्वज्ञ मण्डलेऽत्रागतो भव ॥

एवं [3]पीतं दण्डवराक्षसूत्रकमण्डलुधरं बृहस्पतिं ध्यात्वा ओँ भूर्भुवः स्वः सिन्धुदेशसञ्जातं आङ्गिरसगोत्रं उत्तरफल्गुनीनक्षत्रं पीतवर्णं ब्रह्माधिदैवतमिन्द्रप्रत्यधिदैवतं शिखिनामाग्निकं बृहस्पतिभट्टारकमावाहयामि बृहस्पतिभट्टारक इहागच्छ इह तिष्ठ इत्यावाह्य

गुरो गोरोचनाभास सिन्धुदेशसमुद्भव ।
अङ्गिरोऽन्वयसम्भूत मण्डलेऽत्रागतो भव ॥

एवं [4]श्वेतवर्णं दण्डाक्षसूत्रवरकमण्डलुधरं शुक्रं ध्यात्वा ओँ

(१) D. ओँ भुर्भुवः स्वः । सुरेन्द्रगोप ० ।

(२) D. विष्णुधिदैवतं ० ।

(३) B. पीताम्बराक्षसूत्रकमण्डलुधरं ० D. पीतं वराक्ष ० ।

(४) A. सितं दण्डाक्ष ० C. पीतं दण्डाक्ष ० ।

भूर्भुवः स्वः [1]भोजकट(क)देशसञ्जातं भार्गवसगोत्रं पुष्यानक्षत्रं शुक्लवर्णमिन्द्राधिदैवत[2]मिन्द्राणीप्रत्यधिदैवतं हाटकनामाग्निकं शुक्रभट्टारकमावाहयामि शुक्रभट्टारक इहागच्छ इह तिष्ठेत्यावाह्य

[3]महिषीक्षीरवर्णाभ भृगो न्यग्रोधसम्भव।
भार्गवान्वय दैत्येन्द्र मण्डलेऽत्रागतो भव॥

एवं [4]इन्द्रनीलवर्णं शूलवरबाणधनुर्द्धरं गृध्रस्थं शनिं ध्यात्वा ओं भूर्भुवः स्वः सौराष्ट्रदेशसञ्जातं काश्यपसगोत्रं कृत्तिकानक्षत्रं कृष्णवर्णं यमाधिदैवतं प्रजापतिप्रत्यधिदैवतं महातेजोनामाग्निकं शनैश्वरभट्टारकमावाहयामि शनैश्वरभट्टारक इहागच्छ इह तिष्ठेत्यावाह्य

नीलाञ्जनचयाभास सौराष्ट्रदेशसम्भव।
काश्यपान्वयसञ्जात मण्डलेऽत्रागतो भव॥

करालवदनं खड्गशूलाभयवरहस्तं नीलसिंहासनस्थं राहुं ध्यात्वा ओं भूर्भुवः स्वः मलयाद्रिसञ्जातं [5]पाठीनसगोत्रं भरणीनक्षत्रं कृष्णवर्णं कालाधिदैवतं सर्पप्रत्यधिदैवतं हुताशननामाग्निकं राहुभट्टारकमावाहयामि राहुभट्टारक इहागच्छ इह तिष्ठेत्यावाह्य—

(१) B. भोजरावटदेश °। D. भोगवट्ट।
(२) B. °मिन्द्राग्निप्रत्य° C. °मिन्द्राणीप्रत्य°।
(३) B. D. माहिषक्षीर°।
(४) A. दैत्येन्द्रनीलवर्णं°।
(५) A. पाठीनगोत्रं।

कृष्णाम्बुधरसङ्काश मलयाचलसम्भव।
पाठीनगोत्र सोमारे मण्डलेऽत्रागतो भव॥

धूम्रं विकृताननं गदावरहस्तं गृध्रस्थं केतुं ध्यात्वा ओं भूर्भुवः स्वः अन्तर्वेदिसमुद्भवं जैमिनिसगोत्रं अश्लेषानक्षत्रं धूम्रवर्णं चित्रगुप्ताधिदैवतं ब्रह्मप्रत्यधिदैवतं [1]रौद्रनामाग्निकं केतुभट्टारकमावाहयामि केतुभट्टारक इहागच्छ इह तिष्ठेत्यावाह्य

[2]पलालधूम्रवर्णाभ अन्तर्वेदिसमुद्भव।
जैमिन्यन्वयसम्भूत मण्डलेऽत्रागतोभव॥

इति ग्रहावाहनम्।

अथाधिदेवतावाहनम्।

ओं भूर्भुवः स्व ईश्वरमावाहयामीति सूर्यदक्षिणभागे। एवमुमास्कन्दहरिब्रह्मेन्द्रयमकालचित्रगुप्तानामधिदेवतानां सोमादिग्रहदक्षहस्तभागे आवाहनम्। एवम्,—

अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवता।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदैवतम्॥

इति सूर्यादिग्रहाणां वामभागे क्रमेण प्रत्यधिदेवतावाहनम्। राहोरुत्तरे विनायकावाहनम्। शनेरुत्तरे दुर्गावाहनम्। सूर्यो-

(१) धूम्रनामाग्निकं।
(२) C. पलाशधूमसङ्काश°।

त्तरे वायोः । राहोर्दक्षिणे आकाशावाहनम् । केतोर्दक्षिणेऽश्विनयोरावाहनम् । सर्व्वेषां शुक्लपुष्पाक्षतै र्व्याहृतिभिरावाहनम् । ग्रहाणां याज्ञवल्क्योक्तमन्त्रैः पूजा । अधिदेवतादीनां मत्स्यपुराणोक्तमन्त्रैः । सर्व्वेषां स्वनामचतुर्थ्यन्त्यमन्त्रेण वा ।

षोड़शोपचाराः ।

आसनं सम्भवे स्वस्वमण्डलाकारं यथासम्भवं वा । स्वागतम् । पाद्यं—श्यामाकदूर्व्वाब्जविष्णुक्रान्ताभिः । गन्धपुष्पाक्षतयवकुशाग्रतिलश्वेतसर्षपदूर्व्वापयःफलयुक्तमुदकमर्घ्यः । आचमनीयम्—जातिलवङ्गकक्कोलयुक्तं जलम् । दधिमधुघृतं कांस्ये कांस्यापिहितं मधुपर्कः । पुष्पगन्धयुक्तजलं पुनराचमनीयम् । गन्धपुष्पयुक्तमुदकं स्नानीयम् । सम्भवे पञ्चामृतञ्च । वस्त्राणि । रवे रक्तं चन्द्रशुक्रयोः शुक्लं [1]भौमस्यातिरक्तं बुधगुर्व्वोः पीतं शनिराह्वोः कृष्णं केतोर्धूम्रम् । आभरणम्—यथावर्णरत्ननिर्म्मितम् । सौवर्णं वा सर्व्वेषाम् । गन्धः,—सूर्य्यभौमयो रक्तचन्दनम् । चन्द्रशुक्रयोः शुक्लचन्दनम् । बुधगुर्व्वोः कुङ्कुमचन्दनम् । शनिराहुकेतूनां कस्तूरिकागन्धः । यथालाभं वा सर्व्वेषाम् । जवापाटलिपलाशादिरक्तपुष्पाणि रविभौमयोः । शुक्लजातिमल्लिकादीनि सोमशुक्रयोः । पीतकुरुण्टकादीनि बुधबृहस्पत्योः । कृष्णापराजिताकृष्णतुलसीप्रभृतीनि शनि-

(१) D. भौमस्य रक्तं ।

राह्वोः । धूम्रवर्णसिन्धुवारजवाविशेषार्क[1]वकुलानि केतोः । कुन्दुरुधूपो रवेः । मयूरशिखा विधोः । सर्ज्जरसो भौमस्य । अगुरुर्बुधस्य । बृहस्पतेस्तुरस्कम् । शुक्रस्य बिल्वसारम् । शनेर्गुग्गुलुः । राहोर्मदः । केतोर्लाक्षा । एवं विधानामसम्भवे सर्व्वेषां गुग्गुलुः । दीपो घृतेन तिलतैलेन वा । नैवेद्यानि यथावर्णं बलय इति वचनात् रक्तवर्णपिष्टादियुक्तमन्नं गुड़ान्नञ्च रवेः । शुक्लवर्णपिष्टकादियुक्तमन्नं पायसञ्च सोमस्य । हविष्यान्नं रक्तवर्णपुलिकादिभक्ष्यसहितं भौमस्य । पीतवर्णपिष्टकादियुक्तं क्षीरोदनं बुधस्य । पीतवर्णपिष्टकयुक्तमन्नं दध्योदनं गुरोः । शुक्लवर्णपिष्टकादियुक्तमेव माषान्नसहितमन्नं शुक्रस्य । कृष्णवर्णपिष्टकादियुक्तमेव तिलपिष्टमिश्रमन्नं सघृतं शनेः । कृष्णवर्णफलपिष्टकयुक्तं छागमांसयुक्तमन्नं राहोः । धूम्रवर्णफलपिष्टकयुक्तमन्नं चित्रान्नञ्च [2]केतोः । अजाक्षीरस्विन्नतिलतण्डुलसर्पिषा अजाकर्णरक्त[3]युक्तं चित्रान्नमधिदेवतानाम् । वस्त्राणि । शुक्लगन्धपुष्पधूपदीपा यथासम्भवं शास्त्रोक्ताः । नैवेद्यं यथालाभफलमूलभक्ष्यादिमृष्टान्नम् । ताम्बूलं सर्व्वेषाम् । पूजाच सर्व्वेषां पदार्थानुसमयेन । ग्रहानन्तरमधिदेवतास्ततः प्रत्यधिदेवतास्ततो विनायकादयः पूजनीयाः । वक्ष्यमाणनवग्रहस्तोत्रेण स्तुतिस्ततः प्रणामः । [4][तत्र मन्त्राः,—]

(१) B. D. ०वकुलादीनि ० ।

(२) D. राहोः ।

(३) D. ० युक्तचित्रान्नं केतोः । अधिदेवतादीनां वस्त्राणि शुक्ल ० ।

(४) D. Omits the portion bracketed.

दाड़िमीपुष्पसङ्काशं काश्यपेयं कलिङ्गजम्।
धनिष्ठातारकं देवं मार्त्तण्डं प्रणमाम्यहम्॥
यमुनातीरसञ्जातमात्रेयं चौरसम्भवम्।
रोहिणीतारकं देवं सुधांशुं प्रणमाम्यहम्॥
अवन्तीदेशसम्भूतं भारद्वाजसगोत्रकम्।
लोहितं स्वातिनक्षत्रं भूसूनुं प्रणमाम्यहम्।
विशुद्धकाञ्चनाभासमात्रेयसमगोत्रजम्।
विशाखातारकं देवं सोमजं प्रणमाम्यहम्॥
अङ्गिरोगोत्रसम्भूतमुत्तराफाल्गुनीयकम्।
सिन्धुदेशोद्भवं पुण्यं वाक्पतिं प्रणमाम्यहम्॥
[1]भोजकटकसम्भूतं भार्गवेयं सिताङ्गजम्।
पुष्यतारोद्भवं देवं दैत्येन्द्रं प्रणमाम्यहम्॥
[2]सौराष्ट्रदेशसम्भूतं कृष्णं काश्यपगोत्रजम्।
कृत्तिकातारकं देवं सौरिं तं प्रणमाम्यहम्॥
[3]मलयाचलसम्भूतं पाठीनान्वयसम्भवम्।
भरणीतारकं देवं स्वर्भानुं प्रणमाम्यहम्॥
[4]पलालधूमसङ्काशमन्तर्वेदिसमुद्भवम्।
अश्लेषातारकं देवं केतुं तं प्रणमाम्यहम्॥

(१) D. भोगवट्टसमुद्भूतं ०।
(२) D. सौराष्ट्रदेशजननं कृष्णं ०।
(३) B. D. मलयाद्रिसमुद्भूतं ०।
(४) D. जैमिन्यन्वयसम्भूतं कुशद्वीपसमुद्भवम्।

इति मन्त्रैः प्रत्येकं दण्डवत् प्रणामः। वेद्या उपरि फलपुष्पयुक्तपञ्चवर्णवितानबन्धनम्।

अथ कलसस्थापनम्।

धान्यमसीति मन्त्रेण धान्याधारकल्पनम्। तत्र तीर्थजलपूर्णकुम्भस्थापनम्। कलशश्च [2]कालमण्डलरन्ध्रशून्यः। वह्निर्दध्यक्षतविभूषितः। भूरसीति सप्तमृत्तिकाप्रक्षेपः। अश्वस्थानगजस्थान(रथ्या)वल्मीकनदीसङ्गमाकृत्रिमजलाशयरूपक्ह्रदगोगोष्ठ--सम्भवाः सप्त मृदः। यदा बध्नन्निति पञ्चरत्नप्रक्षेपः। या ओषधीरिति सर्व्वौषधिप्रक्षेपः। गन्धद्वारेति चन्दनम्। श्रीश्च त इति पुष्पम्। वनस्पतेव सृजोप इति (चूत)वटाश्वत्थोदुम्बरप्लक्षपल्लवानां निधानम्। यदश्वाय इति वस्त्रद्वयेनावेष्टनम्। पूर्णादर्व्वीति कुम्भोपरितण्डुलपूर्णशरावस्थापनम्। याः फलिनीति नारिकेलफलम्। वरुणस्योत्तम्भनमिति वरुणस्थापनम्।

गङ्गाद्याः सरितः सर्व्वाः समुद्राश्च सरांसि च।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥

इति तीर्थावाहनम्। देवीपुराणोक्तमन्त्रैस्तदुक्तदेवतास्मरणपूर्व्वकं ब्रह्मोपवेशनाद्याज्यभागान्तं तत्र ब्रह्मोपवेशनप्रणीताप्रण-

(१) B. मलयाद्रिसमुद्भूतं ०
(२) A. B. ० कालमण्डलः रन्ध्रशून्यः ०

यनपरिस्तरणं कृत्वा पात्रासादनम्। सूर्पं हविर्ग्रहणी[1]। पवित्रच्छेदनानि पवित्रे आज्यस्थाली द्वात्रिंशच्चरुस्थाल्याः सम्मार्जनकुशाः उपयमनकुशाः तिस्रः समिधः स्रुवः आज्यं व्रीहयो यवा वा दक्षिणा। सूर्पं गृहीत्वा सूर्पे हविर्ग्रहणीं दत्वा वामहस्ते गृहीत्वा व्रीहिभ्यः [2]प्रतिदैवतं चतुर्मुष्टिग्रहणम्। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पुष्णो हस्ताभ्यां सूर्य्याय जुष्टं गृह्णामीति मन्त्रेण मुष्टित्रयं तूष्णीं चतुर्थम्। एवमन्येषां ग्रहाणाम्। [3]ततोऽधिदेवतानां ततः प्रत्यधिदेवतानां ततो विनायकादीनाम्। भूमौ स्थापनम्। पवित्रकरणम्। प्रोक्षणी संस्कारः। एवमाज्यप्रोक्षणानन्तरं सूर्य्याय त्वा जुष्टं प्रोक्षामीत्यादिद्वात्रिंशन्मन्त्रैर्हविःप्रोक्षणम्। कृष्णाजिनमास्तीर्य्य तदुपरि उदूखलं निधाय हविर्निर्वापः। मुषलावधानम्। अवघातः। निःपवनम्। [4]तुषनिरसनम्। त्रिः फलीकरणम्। [5]द्वात्रिंशधा विभज्य इदं सूर्य्यस्येत्यादिमन्त्रैर्यथादैवतं निर्देशः। आज्यनिर्वापः। सोदकचरुपात्रेषु चरुतण्डुलप्रक्षेपः। आज्याधिश्रयणं [6]ब्रह्मणः। सूर्य्यचरोराचार्य्येणाधिश्रयणं विशेषचरूणां ब्राह्मणान्तरैः पर्य्यग्नि-

(१) B. D. हविर्ग्रहणी सूर्पं।

(२) B. D. प्रत्यधिदैवतं।

(३) D. ततोऽधिदैवतप्रत्यधिदैवतविनायकादीनां प्रत्येकम्। भूमौ ०।

(४) A. C. तुषनिरासः।

(५) D. द्वात्रिंशद्विभज्य।

(६) B. D. ब्रह्मणः शेषचरूणां ब्राह्मणान्तरैः पर्य्यग्निकरणं स्रुवं ०

करणम्। स्रुवं प्रतप्य संमृज्य पुनः प्रतप्याभ्युक्ष्याज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीनामुत्पवनम्। अभिघार्य्यचरूनुद्वास्योपयमनकुशानादाय समिधोऽभ्याधाय पर्य्युक्ष्याग्निं संयुज्य प्रजापतये इन्द्रायाग्नये सोमायान्तरीक्षाय हुत्वा [1]भूः स्वाहा भुवः स्वाहा स्वः स्वाहेति होमः। इत्यग्निमुखम्। पुण्याहवाचनम्। आदित्यहोमाङ्गत्वेन कपिलनामाग्निपूजनम्। मध्वाज्यदध्यक्तानां मध्वाज्यपयोक्तानां वा वक्ष्यमाणसमिधां होमः। अर्कसमिधामष्टसहस्रमष्टशतमष्टाविंशति वा होमः। आकृष्टेन इति मन्त्रेण। समिद्धोमसमाप्तौ आज्यादपि समित्समानसंख्यो होमः। आज्यहोमसमाप्तौ चरोरपि समित्समानसंख्यो होमः। अनामिकामध्यमातर्जन्यग्रपर्व्वभिरधोमुखैश्चरुहोमः। सोमहोमाङ्गत्वेन कपिलनामाग्नि[2]पूजा। इमं देवा इति मन्त्रेण पलाशसमिधां पूर्व्ववत्संख्यो होमः। [3]चरुहोमश्च तत्संख्यः। भौमहोमाङ्गत्वेन धूम्रनामाग्निपूजनम्। अग्निर्मूर्द्धादिव इति खदिरसमिद्धोमः। [4]तत आज्यचरुहोमौ। बुधहोमाङ्गत्वेन जठरनामाग्निपूजनम्। उद्बुध्यस्वेतिमन्त्रेण पूर्व्ववदपामार्गसमिद्धोमः। आज्यहोमश्चरुहोमश्च। बृहस्पतिहोमाङ्गत्वेन शिखिनामाग्निपूजनम्। बृहस्पतेऽतीति मन्त्रेण पिप्पलसमिद्धोमः। आज्यहोम-

(१) D. भूर्भुवः स्वरितिव्याहृतित्रयहोमः। इत्यग्नि ०।

(२) D. ० पूजनम्।

(३) D. तत्राज्यहोमश्चरुहोमश्च तावत्सङ्ख्यकः। भौम ०।

(४) D. तत्राज्य ०।

स्चरुहोमश्च। शुक्रहोमाङ्गत्वेन हाटकनामाग्निपूजनम्। अन्नात् परिस्रुत इति मन्त्रेण उदुम्बरसमिद्धोमः। आज्यचरुहोमौ। शनिहोमाङ्गत्वेन महातेजो-नामाग्निपूजनम्। शन्नोदेवीरिति शमीसमिद्धोमः। आज्यचरुहोमौ। राहुहोमाङ्गत्वेन हुताशन-नामाग्निपूजनं काण्डात् काण्डा[1]दित्यनेन दूर्व्वासमिद्धोमः। [2][तत आज्यचरुहोमौ।] केतुहोमाङ्गत्वेन रौद्रनामाग्निपूजनं केतुं कृण्वन्निति मन्त्रेण कुशसमिद्धोमः। आज्यचरुहोमौ। एवं ग्रहहोमं समाप्य अधिदैवतप्रत्यधिदैवतहोमः। पलाश-समिधः सर्व्वेषाम्। सम्भवे ग्रहहोमसमसंख्योऽधिदेवताहोमः। असम्भवे ग्रहेभ्यः सहस्रहोमोऽधिदेवादिभ्यः शतं ग्रहेभ्यः शतहोमेऽधिदेवतादिभ्योऽष्टाविंशतिः। अष्टाविंशतिहोमेऽधि-देवतादिभ्यस्तिस्रः। एकैका वा। दुस्थग्रहस्य सहस्रहोमेऽन्येषां शतम्। अधिदेवतादीनां ततो न्यूनत्वम्। [3]आवोराजानमिति ईश्वरस्य [4]चरुणा होमः। आपोहिष्ठेत्युमायाः। स्योना पृथ्वीति स्कन्दस्य। इदं विष्णुरिति हरेः। [5]त्वमित्सुप्रथा

(१) D. ० दितिमन्त्रेण दूर्व्वा ०।

(२) D. Omits the portion bracketed.

(३) B. तमीशानमिति मन्त्रेण ईश्वरस्य समिदाज्यहोमः। D. तमीशानमिति मन्त्रेण ईश्वरस्य समिदाज्यचरुहोमः।

(४) A. समिदाज्यचरुहोमः।

(५) D. आब्रह्मन्निति ब्रह्मणः।

इति ब्रह्मणः। [1][[2]त्रातारमिन्द्रमितीन्द्रस्य। आयं गौरिति यमस्य। ब्रह्मजिन्वतमिति कालस्य। अनाज्ञातं यदज्ञातमिति चित्रगुप्तस्य।

अथ प्रत्यधिदैवतहोमः।

अग्निं दूतमित्यग्नेः। उदुत्तममित्यपाम्। पृथिव्यन्तरीक्ष-मिति क्षितेः। सहस्रशीर्षेति विष्णोः। इन्द्रायेन्द्र इतीन्द्रस्य। उत्तानपर्णे सुभगे इतीन्द्राण्याः। प्रजापते नत्वदिति प्रजापतेः। नमोऽस्तु सर्पेभ्य इति सर्पाणाम्। एष ब्रह्माय ऋत्विज इति ब्रह्मणः।

अथ विनायकादीनाम्।

आतेन इन्द्र इति विनायकस्य। जातवेदसे सुनवाम सोममिति दुर्गायाः। क्राणा शिशुर्महीनामिति वायोः।

(१) B. Reads in the place of bracketed portin. सजोति इन्द्रस्य यमेन दत्तमिति यमस्य कालस्य कार्षिवसीति चित्रगुप्तस्य चित्रावसो इति अग्निं दूत-मित्यग्नेः। उदुत्तममित्यपां। भूरसीति भूमेः। सहस्रशीर्षेति विष्णोः। त्रातार-मिन्द्रमितीन्द्रस्य। इन्द्राण्यैवीरितीन्द्राण्याः। प्रजापते नत्वदिति प्रजापतेः। नमोऽस्तुसर्पेभ्य इति सर्पाणां ब्रह्मयज्ञानमिति ब्रह्मणः। गणानां त्वेति विना-यकस्य। इंहस्व देवीति दुर्गायाः। ओनोनियुभिरिति वायोः। तमीशानमित्या-काशस्य। विश्वे अस्या इत्यश्विन्योः। तत्रा ० D. सजोषा इन्द्र इति इन्द्रस्य। यमेन दत्त इति यमस्य। वातोवा इति वायोः। कालस्य कार्षिरसी(ति) चित्र-गुप्तचित्रावसोरिति। अग्निं दूतमित्यग्नेः then follows the reading of Ms. B.

(२) A. C. इन्द्रमिन्द्रे वेति इन्द्रस्य।

[1]तमीशान इति आकाशस्य। [2]विश्वे अस्या इत्यश्विनयोः। अत्रा]धिदेवतादीनां पलाशसमिध एव भूपालादिनिबन्धप्रामाण्यात्। अधिदेवताप्रत्यधिदेवतादीनां स्वस्वग्रहसमिधः [3][इति केचित्।] दानप्रकाशादौ दिक्पालहोम उक्तः क्वचिदस्मद्देशेऽपि [4]समाचारः। सर्व्वचरूणामुत्तरार्द्धेभ्यः सोमं राजानमिति स्विष्टकृद्धोमः। ततो भूरादिप्राजापत्यान्ता नवाहुतयः।

पूर्णाहुतिः।

चतुर्गृहीतमाज्यं गृहीत्वा स्रुक्पूरणम्। गन्धपुष्पाक्षतसमिद्ग्रहणम्। मूर्द्धानं दिव इत्यनेन स्वाहावौषडन्तेन होमः। वेदीशान उपविष्टं यजमानं हेमस्रग्भूषणं स्थापितकलसोदकेन स्नापयेयुः। ओं

सहस्राक्षं शतधारमृषिभिः पावनं कृतम्।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते॥
भगन्ते वरुणो राजा भगं सूर्य्यो बृहस्पतिः।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः॥
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि।
ललाटे कर्णयोरक्ष्णोरापस्ते घ्नन्तु ते सदा॥

(१) A. C. आदित्यवत्सस्य रेतस इति आकाशस्य।
(२) A. C. सम उषा इत्यश्विनयोः। E. F. शषो उषा इत्य ०
(३) D. Omits the portion bracketed.
(४) A. B. C. समाचारात्।

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणः प्रभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय [1]ते।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
[2]ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा बुद्धिर्लज्जा क्रिया मतिः।
पुष्टिः श्रद्धा क्षमा शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः समाहिताः।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
देवदानवगन्धर्व्वा यक्षराक्षस[3]किन्नराः॥
ऋषयो मुनयो गावो देवमातर एव च।
देवपत्न्यो ध्रुवो नागा दैत्याश्चाप्सरसां गणाः॥
अस्त्राणि सर्व्वशास्त्राणि राजानो वाहनानि च।
[4]औषधानि च रत्नानि कालस्यावयवाश्च ये॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एते त्वामभिषिञ्चन्तु सर्व्वकामार्थसिद्धये॥

(१) D. च।
(२) D. ब्रह्मणा सहिताः शेषा दिक् ०।
(३) D. ० पन्नगाः।
(४) A. ओषधीनि च ०।

अश्विन्यौ भैषज्येन। इत्यादिना। एवं मन्त्रेण स्नापयित्वा तूष्णीं सर्व्वौषधिसर्व्वगन्धजलैः स्नापयेयुः। यजमानः [१]शुक्लमाल्याम्बरधरो गन्धानुलेपनो दक्षिणां दद्यात्।

धेनुः शङ्खस्तथानड्वान् हेम वासो हयस्तथा।
कृष्णा गौरायसश्छाग एता वै दक्षिणा क्रमात्॥

अविशेषोक्तोऽपि रक्ता धेनुः। रक्तोऽनड्वान्। पीतं वासः। बह्वृचगृह्यपाठात्। बुधे रजतस्वर्णयोर्विकल्पः। इमां रक्तां धेनुं [२]भवद्भ्यां ददानि सूर्य्यः प्रीयतामित्यादिवाक्येनाचार्य्य[३]ब्रह्मणोरेकैकस्य दानम्। आचार्य्याय वा देयम्। दक्षिणा ब्रह्मणे किञ्चिद्देयमित्येके। एतद्-दक्षिणासम्भवे भूहिरण्यादिद्रव्यान्तरं वा। इदं हिरण्यं भवद्भ्यां ददानि [४]सूर्य्यादयः प्रीयन्तामित्यादि। वस्त्रमाल्यादिभिराचार्य्यब्रह्मणोस्तोषणम्। यज्ञोपकरणमाचार्य्यस्य। अथ यजमानोऽग्निं प्रदक्षिणीकृत्य वेदीसमीपे उपविश्य ग्रहाधिदेवप्रत्यधिदेवविनायकादीन् पूजयेत्। [नमस्कुर्य्याच्च[५]।]

यान्तु देवगणाः सर्व्वे पूजामादाय पार्थिवात्।
इष्टभोगप्रदानार्थं पुनरागमनाय च॥

(१) A. शुक्लमाल्यानुलेपनो दक्षिणां ०। D. शुक्लमाल्याम्बरगन्धानुलेपनो ०
(२) D. भवद्भ्यो।
(३) A. B. C. ब्राह्मणयो ०।
(४) D. सूर्य्यः प्रीयता ०।
(५) B. D. Omit the portion bracketed.

यथाशक्ति ब्राह्मणभोजनम्। शान्तिकरणम्। [१]इति ग्रहातिथ्याख्यग्रहयज्ञः।

यदा तु स्वल्पवित्तः सर्व्वग्रहदक्षिणादानासमर्थः सर्व्वग्रहहोमसम्भारासमर्थश्च दुःस्थग्रहं द्वौ वा त्रीन् वा दुःस्थग्रहान् विशेषेण होमबलिदक्षिणादिभिः सन्तोष्य शेषेभ्यः स्वल्पपूजाहोमादि कुर्य्यात्। अथवा दुःस्थद्वित्रिचतुर्ग्रहमात्रस्वस्वाधिदैवतप्रत्यधिदैवतविनायकादिपञ्चकसहितं होमादिभिः पूजयेत् न ग्रहान्तरं मात्स्ये वचनात्।

दानप्रकाशे,—

तस्माद्दातुमशक्तोऽसौ दक्षिणाश्चान्नमेव च।
जपैः प्रणामैः स्तोत्रैश्च तोषयेत् तर्पयेद् ग्रहान्॥

जपप्रणामस्तोत्रतर्पणानि ग्रहपूजापूर्व्वकाणि ब्राह्मणद्वारा कार्य्याणि होमतुल्यसंख्यानि। तदन्ते ग्रहदक्षिणा। यथाशक्ति हिरण्यादि वा। इति परिभाषा।

दक्षः,—

उदयास्तमयं यावन्न विप्रः क्षणिको भवेत्।
नित्यनैमित्तिकैर्युक्तः काम्यैश्चान्यैरगर्हितैः॥
स्वकं कर्म्म परित्यज्य यदन्यत् कुरुते द्विजः।
अज्ञानाद् [२]यदि वा लोभात् स तेन पतितो भवेत्॥

तत्र कालविभागक्रमञ्च स एवाह

(१) B. D. Here add अच्छिद्रावधारणम्।
(२) D. अथवा ०।

उक्तं कर्म्म क्रमो नोक्तो न कालस्तत एव हि ।
द्विजानान्तु हितार्थाय दक्षस्तु स्वयमब्रवीत् ॥
दिवसस्याद्यभागे तु [1]कृत्यं तस्योपदिश्यते ।
द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा ॥
षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक् ।
विभागेष्वेषु यत्कर्म्म तत्प्रवक्ष्याम्यशेषतः ॥
नैमित्तिकानि काम्यानि निपतन्ति यदा यदा ।
तदा तदा तु कार्य्याणि [2]न कालस्तु विधीयते ॥

उक्तं कर्म्म मन्वादिभिः । क्रमो नोक्तस्तैरेव । यतः कर्म्ममात्रमुक्तमतएव कालोऽपि नोक्तः । दक्षस्तु स्वयमब्रवीत् कालं क्रमञ्च । अत्र

दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते ।

इत्यनेन उपदिश्यत इत्याख्यानेन तत्तद् वक्ष्यमाणकर्म्मणां क्रमो विधीयते । क्रमवतां स्वरूपं वक्ष्यमाणवचनैः

द्वितीये च तथा भागे वेदाभ्यासो विधीयते ।

इत्याद्यैरेवावगम्यते । [3][विभागेष्वेषु यत्कर्म्म तत् प्रवक्ष्यामीति साकाङ्क्षत्वात् ।] वक्ष्यमाणवचनैस्तु कालविधिः । तत्र क्रमस्यापि विधाने प्राप्ते [4]कर्म्मण्यनेकगुणविधानाद् वाक्यभेदा-

(१) D. चेयं कर्म्मोपदिश्यते ।
(२) D. तत्कालस्तु ० ।
(३) A. B. C. Omit the portion bracketed.
(४) D. कर्म्मण्यनेकविधानात् ।

पत्तेः । न च तत्र क्रमोऽर्थप्राप्तः । इहोपक्रमे क्रमकालयोर्द्वयोर्विधेयत्वप्रतीतेः । अतएव क्रमविधाने कालोऽर्थप्राप्त इति निरस्तम् । नित्येषु कालविधानाभावे नैमित्तिककाम्येषु "न कालस्तु विधीयत" इति वचनासङ्गतेः । नित्यकर्म्मणामेवाष्टधाविभागकालोऽङ्गं न काम्यनैमित्तिकयोरित्येव हि तस्यार्थः । न चानुपादेयकालं प्रति प्रकरणान्तरे कर्म्मविधाने कर्म्मभेदप्रसङ्गः । उक्तं कर्म्मेत्यनेन मन्वाद्युक्तकर्म्मप्रत्यभिज्ञानात् । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेत्यादौ यथा कर्म्मान्तरत्वे रूपालाभ एवमिहापि फलकल्पनाप्रसङ्गश्चाधिकः । किञ्च उक्तं कर्म्मेत्यनेन मन्वाद्युक्तकर्म्मानुवादो विधेयसम्बन्धार्थ इति ज्ञातम् । तदुद्दिश्य किं विधेयमित्येव नावगतम् । तच्छब्दान्तरा[1]क्रमकालरूपमित्यवगम्यते । तच्चैकवाक्येनाशक्यमिति नानावाक्यैरित्यवगम्यते । तेन न कर्म्मभेदसम्भावनापि । यथा तस्मात् तपस्ते पनात्(?)त्रयो वेदा अजायन्त इत्युपक्रम्य वेदस्य श्रुतौ तदुद्दिश्य किञ्चिद् विधेयमित्याकाङ्क्षायां उच्चैरृपक्रियत [2]इति निगमनैरुच्चैस्त्वविधिमात्रं गृह्यते । रूपादिपदं वेदपरमेव वेदा एवोद्देश्यकोट्यां न रूपादयः । एवमिहापि मन्वाद्युक्त[3]कर्म्मणामेवाप्राप्तक्रमकालविधानम् । न चैवं पारणादौ भोजनापकर्षेऽपि स्वकाले तर्पणादिक्रियाप्रसङ्गः

(१) D. कर्म्मकाल ० ।
(२) B. D. इति निशम्य नैरुच्चैस्त्वविधिमात्रं ०
(३) B. D. कर्म्मणामेव । प्राप्तक्रमकाले विधानम् ।

क्रमस्य विधेयत्वेऽपि [१]कालदुर्व्वलत्वादिति वाच्यम् । बौधायनेन सर्व्वावश्यकावसाने भोजनविधानात् । न चैतदपि क्रमरूपं [२]कालाद् दुर्व्वलं सर्व्वावश्यकपदस्य भोजनप्राक्कालीननित्यकर्म्म-परत्वादावश्यकत्वेन दक्षस्मृतिसापेक्षत्वात् तेनैव भोजनस्य तदुत्तरस्य सिद्धौ यस्य वैयर्थ्यभयेन भोजनप्रकरणबाधेन तत्पूर्व्वकर्म्मसु भोजनाभावस्याधिकारसम्पादनपरत्वात् । एवञ्च दैवात् तर्पणादि-विलम्बे पञ्चमभाग आगते तर्पणात् पूर्व्वं भोजनप्रसङ्गः प्रत्युक्तः । अत्र दिवसस्याद्यभाग इति वचनात् उदयास्तमयं यावदिति वचनाच्च दिवसस्याष्टधा विभागः [न तूषःकालप्रदोषप्रवेशने-नाष्टधा विभागः[३] ।]

अतएव,—

अष्टमे लोकयात्रा तु वहिः सन्ध्या ततःपरम् ।

इत्यष्टमभागानन्तरं सन्ध्योक्ता । न चैवम्,—

उषःकाले तु संप्राप्ते शौचं तत्र विधीयते ।

इत्युषःकालादिषु कर्म्मविधानमप्रतिज्ञातोक्तं स्यादिति वाच्यम् । विभागकथनात् पूर्व्वमेव

प्रातरुत्थाय कर्त्तव्यं यद् द्विजेन दिने दिने ।

तत् सर्व्वं संप्रवक्ष्यामि

(१) A. C. कालाद् दुर्व्वलत्वा०

(२) B. कालदुर्व्वलं०

(३) A. B. D. Omit the portion bracketed.

इति सर्व्वेषामादावेव प्रतिज्ञानात् । अन्यथा यामद्वयं शयान इति रात्रेरष्टधाविभागभिन्नायाः कर्म्मकथनस्यासङ्गतेः ।

तत्र रात्रेरन्तिमे यामे शयनादुत्थानम् ।

नमोऽस्तु प्रियदत्तायै तव चेति दिने दिने ।

भूमिमाक्रमते प्रातः शयनादुत्थितश्च यः ।

स सर्व्वकामतृप्तात्मा सुखं याति यमालयम् ॥

इति मन्त्रपाठपूर्व्वकं भूमौ पादन्यासः । वस्त्रान्तरं परिधाय [१]लालादिप्रोञ्छनपादप्रक्षालनादिशुद्धिसम्पादनम् ।

सर्व्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम् ।

नारायणं नमस्कृत्य सर्व्वकर्म्माणि कारयेत् ॥

इतिवचनात् प्रथमं नारायणनमस्कारः ।

शयनादुत्थितो यस्तु कीर्त्तयेन्मधुसूदनम् ।

कीर्त्तनात् तस्य पापानि नाशमायान्त्यशेषतः ॥

इतिवचनान्मधुसूदननामकीर्त्तनम् । अथ करिष्यमाण-यावत्-कर्म्मणां भगवते समर्पणम् ।

यदुच्छ्वासादिकं कर्म्म तत् त्वया प्रेरितो हरे ।

करिष्यामि त्वदाज्ञेयमिति विज्ञापनं मम ॥

साधु वासाधु वा कर्म्म यद् यदाचरितं मया ।

तत् सर्व्वं भगवन् विष्णो गृहाणाराधनं परम् ॥

(१) A. ललाटादिप्रोञ्छन०

प्रातः प्रबोधितो विष्णो हृषीकेशेन यत् त्वया ।
यद् यत्कार्य्यमीशान तत् करोमि तवाज्ञया ॥

त्रैलोक्यचैतन्यमयादिदेव
श्रीनाथ विष्णो भगवन् प्रसीद ।
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्त्तयिष्ये ॥
संसारयात्रामनुवर्त्तमानं
त्वदाज्ञया श्रीनृहरेऽन्तरात्मन् ।
[1]स्पर्द्धातिरस्कारकलिप्रमाद-
भयानि मां नाभिभवन्तु भूमन् ॥
जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः ।
केनापि देवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करिष्ये ॥

दक्षः,—

प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् ।

इति वचनाद् वेदाभ्यासः कार्य्यः ।

ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥

(१) B. स्पर्द्धातिरस्कार ० ।

[1]ब्राह्मो मुहूर्त्तो रात्रेः पश्चिमयाम इति स्मृतिरत्नमालाकारः ।

विष्णुपुराणे,—

ब्राह्मे मुहूर्त्ते स्वस्थे च मानसे मतिमान् नृप ।
विबुद्धश्चिन्तयेद्धर्म्ममर्थं तदविरोधनम् ॥
अपीड़या तयोः कामं

तेन पश्चिमे यामे किञ्चिद् वेदाभ्यासं कृत्वानुष्ठानार्थं धर्म्मं सोपायं चिन्तयित्वा धर्म्माविरोधेनार्थं सोपायं चिन्तयित्वा तयोरविरोधेन कामं चिन्तयित्वा वेदतत्त्वार्थस्य ब्रह्मणो ध्यानं [2][कर्त्तव्यम् ।] अतएव तस्य ब्राह्म इति समाख्या ब्रह्मणोऽयं ध्यानौपायिकस्तेन ब्राह्मः । समाख्यापि प्रमाणमङ्गविनियोगे ।

यत्तु,—

[3]रात्रेस्तुरीययामस्य मुहूर्त्तो यस्तृतीयकः ।
स ब्राह्म इति विज्ञेयो विहितः संप्रबोधने ॥

इति तद् रोगादिना प्रबोधासहत्वेऽनुकल्परूपं बोध्यम् । निराकारध्यानाशक्तस्य [4]साकारस्य विष्णोर्ध्यानम् । योगाभ्यासश्चात्र वक्ष्यमाणविधिना [5]कर्त्तव्यः ।

(१) B. ब्राह्मो मुहूर्त्तो रात्रेः पश्चिमे याम इति स्मृति ०
(२) B. D. कार्य्यम् । A. Omits the portion bracketed.
(३) D. रात्रेः पश्चिमयामस्य ० ।
(४) B. ० साकारस्य ध्यानं योगाभ्यासस्य वक्ष्यमाणविधिना कर्त्तव्यं यथा ब्राह्मो मुहूर्त्ते ० ।
(५) A. वक्तव्यः ।

तथा—

ब्राह्मे मुहूर्त्ते बुध्येत स्मरेद् देववरान् ऋषीन्।

एवञ्च प्रातरुत्थाय यः पठेदित्यादिरूपेण यत्र[1] स्तोत्रेषु तदपि पठनीयम्। भगवन्नामकीर्त्तनं कियत्कालं कर्त्तव्यम्। एषां मन्त्रविशेषविहितत्वात् सन्ध्याहीनोऽशुचिरित्येतद्दोषाप्रसङ्गः।

महाभारते,—

सततं कीर्त्तयन्तो मां यतन्तश्च दृढ़व्रताः।

नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥

विष्णुपुराणे,—

यन्नामकीर्त्तनं पुंसां विलायनमनुत्तमम्।

मैत्रेयाशेषपापानां धातूनामिव पावकः॥

तथा,—

यस्मिन् न्यस्तमतिर्न्न याति नरकं स्वर्गोऽपि यच्चिन्तने

विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः।

मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः

किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्त्तिते॥

विष्णुधर्म्मोत्तरे,—

आर्त्ता विशीर्णा विषयाभिभूता

घोरेषु च व्याधिषु [2]पच्यमानाः।

(१) B. D. Omit यत्र।

(२) B. ० वर्त्तमानाः।

सङ्कीर्त्त्य नारायणशब्दमात्रं

विमुक्तदुःखाः सुखिनो [1]भवन्ति॥

तथा,—

मङ्गल्यं सर्व्वपापघ्नमायुष्यं कीर्त्तिवर्द्धनम्।

भुक्तिमुक्तिप्रदं पुंसां वासुदेवस्य कीर्त्तनम्॥

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन्।

यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्त्य केशवम्॥

विष्णुधर्म्मे,—

नामसङ्कीर्त्तनं विष्णोः क्षुतप्रस्खलनादिषु।

यः करोति महाभाग तस्य तुष्यति केशवः॥

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।

कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्॥

विष्णुपुराणे,—

कमलनयन वासुदेव विष्णो

धरणिधराच्युत शङ्खचक्रपाणे।

भवशरणमितीरयन्ति ये वै

त्यज भट दूरतरेण तानपापान्॥

तथा,—

अवशेनापि यन्नाम्नि कीर्त्तिते सर्व्वपातकैः।

पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव॥

(१) D. ० भवन्तु।

क्वचिच्च,—

साङ्केत्यं पारिहास्यं वा स्तोभ्यं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥

तेन भक्तियद्धाव्यतिरेकेण कीर्त्तनमात्रादेव पापक्षयः।

यावज्जीवं प्रणवमथवा व्याहरेद् रौद्रियं वा
[1]याजुर्वेद्यं वसतिमथवा वारणस्यां विदध्यात्।
त्यक्त्वा लज्जां कलिकलुषमलच्छेदकानीरयेद् वा
विष्णोर्नामान्यनिशममृतप्राप्तिरेषा चतुर्द्धा॥

अत्र नामकीर्त्तनस्य मुक्तिहेतुत्वं सत्वशुद्धिद्वारा ज्ञानोत्पादकत्वेन बोध्यं तच्चाशौचेऽपि कार्य्यम्। तदुक्तम्,—

चक्रायुधस्य नामानि सदा सर्व्वत्र कीर्त्तयेत्।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः॥

नारसिंहे,—

इति सङ्कीर्त्तिते विष्णौ नारकैर्भक्तिपूर्व्वकम्।
नारकी यातना सर्व्वा तेषां नष्टा च तत्क्षणात्॥

अत्यन्ताशुचीनां नारकिणामप्यधिकारदर्शनात्। [2]नृसिंहकल्पे,—

यदि स्यादशुचिस्तत्र स्मरेन्मन्त्रं न तूच्चरेत्।
मनो हि सर्व्वजन्तूनां सर्व्वदैव शुचि स्मृतम्॥

(१) A. यावज्जीवं वसति ० B. याजुर्वेदं ०
(२) E. F. यद्वा नृसिंह ०

इति मनसा वाशौचे। लेपाशौचे मनसा। सूतकादौ नैवेति व्यवस्था। तेन नाशुचिर्देवर्षिपितृनामानि कीर्त्तयेदिति लेपाशौचविषयम्।

औषधे चिन्तयेद् विष्णुं भोजने च जनार्द्दनम्।
शयने पद्मनाभञ्च मैथुने च[1] प्रजापतिम्॥
सङ्ग्रामे चक्रिणं देवं प्रवासे च त्रिविक्रमम्।
[2]नारायणमसुत्यागे श्रीधरं प्रियसङ्गमे॥
दुःस्वप्ने स्मर गोविन्दं विपत्तौ मधुसूदनम्।
[3]कानने नरसिंहन्तु पर्व्वते रघुनन्दनम्॥
जलमध्ये च वाराहं पावके जलशायिनम्।
मायासु वामनं देवं सर्व्वकार्य्ये च माधवम्॥
इति षोड़शनामानि प्रातरुत्थाय यः पठेत्।
सर्व्वकार्य्यमवाप्नोति विष्णुलोकं [4]च गच्छति॥

एषां [5]तत्तत्काले विधानादेव नाशौचदोषः। तथा,—

वासुदेवाच्युतानन्त सत्याज पुरुषोत्तम।
परमेश्वरेत्याद्यैश्च स्तौति नामभिरच्युतम्।
विभक्तभावं भगवान् विमुक्तो यात्यधोक्षजम्॥

(१) B. विवाहे च ०।
(२) B. C. D. नारायणं प्राणत्यागे ०।
(३) A. Reads "अन्धकारे नरसिंहं कानने रघुनन्दनम्।" After जलमध्ये e.t.c.
(४) C. ० स ०।
(५) B. D. तत्र काले ०।

विष्णुधर्म्मे,—

धर्म्मगुप् धर्म्मकृद्धर्म्मी धर्म्मात्मा धर्म्मवित् शुचिः ।
शुचिषद्विष्णुयज्ञाद्यः पुष्कराक्षो ह्यधोक्षजः ॥
शुचिश्रवाः शिपिविष्टो यज्ञेशो यज्ञभावनः ।
नाम्नामित्येव[1]मादीनां समुच्चारणतो नरः ॥
धर्म्मं महान्तमाप्नोति पापबन्धक्षयं तथा ।
श्रीदः श्रीशः श्रीनिवासः [2]श्रीधरः श्रीनिकेतनः ॥
[3]श्रियः पतिः श्रीपरमः श्रीमान् श्रीवत्सलाञ्छनः ।
नृसिंहो [4]दुष्टशमनो जयो विष्णुस्त्रिविक्रमः ॥
स्तुतः प्रयच्छति चार्थमेवमादिभिरच्युतः ।
कामः कामप्रदः कान्तः कामपालस्तथा हरिः ॥
आनन्दो माधवश्चैव कामसंसिद्धये जपेत् ।
रामः [5]परशुरामश्च नृसिंहो विष्णुरेव च ॥
त्रिविक्रमश्चैव[6]मादीनि जप्यानि विजिगीषुभिः ।
विद्यामभ्यसता नित्यं जप्तव्यः पुरुषोत्तमः ॥
दामोदरं बन्धगतो नित्यमेव जपेन्नरः ।
केशवं पुण्डरीकाक्षं नित्यबाधासु संस्मरेत् ॥

(१) B. ० मादीनामुच्चारणयुतो नरः ।
(२) B. D. ० श्रीनिधिः ० ।
(३) A. श्रियः प्रीतिः ० ।
(४) E. F. ० दुःखशमनो ०
(५) A परमरामश्च ० ।
(६) C. ० मादीन् जप्यानि ० ।

भयेष्वन्येषु सर्व्वेषु हृषीकेशं सदा स्मरेत् ।
अच्युतञ्चामृतञ्चैव स्मरेदौषधकर्म्मणि ॥
भ्राजिष्णुमग्निहानौ च [1]जपेदालम्बने स्थितः ।
सङ्ग्रामाभिमुखो गच्छन् संस्मरेदपराजितम् ॥
पाताले नरसिंहञ्च जले क्रोड़तनुं स्मरेत् ।
चक्रिणं गदिनञ्चैव शार्ङ्गिणं खड्गिनं तथा ॥
क्षेमार्थी प्रवसन्नित्यं दिक्षु प्राच्यादिषु स्मरेत् ।
अजितं गदिनं सर्व्वं सर्व्वेशं व्यवहारतः ॥

व्यवहारे ऋणादिप्रयोग[2]विवादे ।

नारायणं सर्व्वकालं क्षुतप्रस्खलनादिषु ।
ग्रहनक्षत्रपीड़ासु चौरव्याघ्रादिसङ्कटे ॥
अटवीष्वन्धकारे च नरसिंहमनुस्मरेत् ।
तरत्यखिलदुःखानि तापार्त्तो जलशायिनम् ॥
गरुड़ध्वजानुस्मरणाद्विषवीर्य्यं प्रणश्यति ।
स्नाने देवार्च्चने होमे प्रणिपाते प्रदक्षिणे ॥
कीर्त्तयेद्भगवन्नाम वासुदेवेति नित्यशः ।
स्थापने [3]चात्र धान्यादेरपध्याने च दुष्टजे ॥
क्रियेत तन्मना भूत्वा अच्युतानन्तकीर्त्तनम् ।
नारायणं शार्ङ्गधरं श्रीधरं पुरुषोत्तमम् ॥

(१) A. D. ० जपेदालम्बनस्थितः । B. ० जपेदाम्बनस्थितिः ।
(२) B. D. ० वादे ।
(३) A. ० शतधान्यादे ० ।

वामनं शङ्खिनञ्चैव दुःस्वप्नेषु च कीर्त्तयेत्।
एकार्णवेऽहिपर्य्यङ्के शयानं हि परं स्मरेत्॥
वाय्वग्निग्रहदाहादिप्रवृत्तिमुपलभ्य च।
विद्यार्थी मोहविभ्रान्तचित्तो ह्यश्वशिरः स्मरेत्॥
बलभद्रं सम्पदर्थी मारकर्म्मणि [1]चिन्तयेत्।
[2]जगत्स्थितिमपत्यार्थी सुप्रजाख्यं विवाहकृत्॥
श्रीशं सर्व्वाभ्युदयिके सर्व्वानिष्टेष्वशोककम्।
मृत्युकाले च तच्चित्तो वासुदेवं जपेद्बुधः॥
सर्व्वार्थशक्तियुक्तस्य वासुदेवस्य चक्रिणः।
यथाभिरोचते नाम तत् सर्व्वार्थेषु कीर्त्तयेत्॥
सर्व्वाण्येतानि नामानि परस्य ब्रह्मणो यतः।

एवम्,—

कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते।
भस्मीभवन्ति राजेन्द्र महापातककोटयः॥

तथा,—

प्राणकान्तारपाथेयं संसारव्याधिभेषजम्।
दुःखशोकपरित्राणं हरिरित्यक्षरद्वयम्॥
[जितं तेन जितं तेन जितं [3]तेनेति निश्चितम्।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम्॥][4]

(१) D. ॰कीर्त्तयेत्।
(२) D. जगत्स्तुतिमपत्या॰।
(३) D. ॰तेन सुनिश्चितम्।
(४) A Omit the portion bracketed.

नरसिंह नरसिंह नरसिंह जनार्द्दन।
वासुदेव हृषीकेश त्राहि मां भवसागरात्॥

श्रीशब्दपूर्व्वं [1]जयशब्दमध्यं
जयद्वयानन्तरमेतदेव।
त्रिःसप्तकृत्वो नरसिंहनाम
[2]जपन्निहन्याद् द्विजकोटिहत्याम्॥

तथा,—

ध्यायन् कृते जपन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम्॥

तथा,—

तन्नास्ति कर्म्मजं लोके वाग्जं मानसमेव च।
यत्तु न क्षीयते पापं कलौ गोविन्दकीर्त्तनात्॥
गोविन्देति तथा प्रोक्तं भक्त्या वा भक्तिवर्जितैः।
हरते सर्व्वपापानि कल्पान्ताग्निरिवोत्थितः॥

अत्र भक्तिराराध्यत्वज्ञानपूर्व्वकमाराध्ये स्वात्मसमर्पणम्। न च भज सेवायामिति स्मृतेः सेवैव भक्तिः। भक्त्या समाराधयते भक्त्या पूजयते भक्त्या स्तौतीत्यादौ पौनरुक्त्यापत्तेः। [3]नापि भावः प्रीतीरतिरित्यादिपर्य्यायवाच्यः पदार्थविशेषो भक्तिर्गोपीनां च

(१) B. C. ॰जयशब्दपूर्व्वं॰।
(२) A. ॰जप्तुर्निहन्याद्॰।
(३) B. यदि भावः॰। D. यदि भावः प्रीतिरिति पर्य्यायवाच्यः॰।

यथा श्रीकृष्ण इति वाच्यं लोके कामिन्यादौ तथाभाववतो भक्तत्वाप्रसिद्धेः। लोकवेदाधिकरणन्यायविरोधापत्तेः। अतएव तदेकशरणत्वं भक्तिरिति गीताभाष्ये शङ्कराचार्य्यैर्व्याख्यातम्।

यत्तु विष्णुपुराणे,—

या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु॥

यच्च पाद्मे,—

युवतीनां यथा यूनि यूनाञ्च युवती यथा।
मनोऽभिरमते तद्वन्मनो मे [1]रमतां त्वयि॥

इति। गीतायाम्,—

कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च।

इति। नैतावता रतेर्भक्तित्वं किन्तु रतेरनवच्छिन्नतच्चिन्ताध्यायकत्वेन बहुतरपापचयहेतुत्वात् भक्तित्वाभावेऽपि पुरुषार्थसाधनत्वेन स्वतः प्रियरूपत्वेन च प्रार्थनीयत्वम्। यथा शिशुपालस्य निरतिशयद्वेषः श्रीकृष्णसन्ततानुस्मरणहेतुत्वात् तस्य मुक्तिप्रदोऽपि न भक्तिः। एवं गोपीनां प्रेमापि सन्ततानुस्मरणहेतुत्वाद् भक्तिरूपत्वाभावेऽपि।

तच्चिन्ताविपुलाह्लादक्षीणपुण्यचयास्तथा।
तदप्राप्तिमहादुःखविलीनाशेषपातका॥

(१) C. D. ० रमते ०।

चिन्तयन्ति जगत्सूतिं परब्रह्मस्वरूपिणम्।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥

इतिविधया मुक्तिरूपफलसाधनम्। अन्यथा शिशुपालद्वेषस्यापि भक्तित्वापत्तेः। किञ्च साहित्यशास्त्रे,—

सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रस्थायी च भाव इत्यभिधीयते॥

इति देवादिविषयरतेरेव भावत्वम्। गोपीनां पुनः श्रीकृष्णविषयरतेर्निरुपमरमणीयप्रियतमविषयत्वेन तच्चरितास्वादस्य सम्भोगविप्रलम्भशृङ्गारमध्यपातित्वमिति न भक्तित्वसम्भावनापि। न चाराध्यत्वज्ञानमेव भक्तिरिति वाच्यं निर्व्यापारस्य परमेश्वरे आराध्यत्वज्ञानेऽपि भक्तित्वाप्रसिद्धेः। नापि स्वात्मसमर्पणमात्रं भक्तिः कार्य्यानुरोधेन नीचे स्वात्मसमर्पणे भक्तित्वाप्रसिद्धेः। तथा च भगवद्वाक्यम्,—

सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्व्वपापेभ्यो मोचयिष्यामि मा शुचः॥

तथा,—

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुञ्च तत्वेन प्रवेष्टुञ्च परन्तप॥

तथा,—

माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥

यत्तु,—

ये च धर्म्मामृतमिदं यथोक्तं पर्य्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे मताः॥

इति। नानेन धर्म्माणां भक्तित्वम्। स्वात्मसमर्पणापरपर्य्यायतत्परमत्वस्य [1]धर्म्मानुष्ठानत्वे तु [2]फलजनकत्वेनातिशय[3]भक्तित्वादतीवभक्तत्वम्। एवं ज्ञानित्वात् सैव मे मत इत्यादीनि व्याख्येयानि। तदेवंविधभक्तियोगेन कृतस्य नामकीर्त्तनस्य बहुतरपापक्षयहेतुत्वं भक्तिं विनापि कृतस्य पापक्षयहेतुत्वं वचनप्रामाण्यादेवावगम्यते। नचाबुद्धिपूर्व्वकृतस्यानिच्छाकृतस्य भगवन्नामकीर्त्तनस्य पापक्षयहेतुत्वे उपदेशवैयर्थ्यं शास्त्रस्य ज्ञानेच्छाद्वारा प्रवृत्तिफलत्वादिति वाच्यम्। हितैषिभिर्ज्ञात्वा [4]कस्यानिच्छोरपि प्रवर्त्तयितुं शास्त्रव्यापारात्। यथा स्वाध्यायविधेः पितृद्वारा माणवकप्रवृत्तिफलत्वमिति सर्व्वञ्चैतदस्माभिर्विस्तरेण भक्तिप्रदीपे प्रपञ्चितमिति नेह प्रणीयते। तदेवं नामकीर्त्तनरूपाणि स्नानसन्ध्याद्यधिकार[5]सम्पादनानपेक्षणाच्छयनादुत्थानमात्रे कर्त्तव्यानि। यानि तु स्तोत्ररूपाणि जपरूपाणि वा प्रातरुत्थाय कर्त्तव्यत्वेन विहितानि तानि

(१) D. धर्म्मानुष्ठानत्वहेतुफलजनक ०।
(२) B. ० फलयोगेनातिशय ०।
(३) A. ० भजित्वादतीव ०।
(४) A. B. C. ज्ञानस्यानिच्छो ०।
(५) B. ० सम्पादकानपेक्षया ०।

स्नातोऽधिकारी भवति दैवे पित्रे च कर्म्मणि।
सन्ध्याहीनोऽशुचिर्विप्रो नित्य—

मित्यादिवाक्यात् सन्ध्योत्तरं कर्त्तव्यानि। उत्थानानन्तरमात्रकर्त्तव्यत्वेन लेपाशौचापनयनवस्त्रपरिवर्त्तनादिव्यवधानस्यापि दोषत्वापत्तेः। नहि सत्रादुदवसाय पृष्ठसवनीयेन यजेरन्नित्यादौ कालशौचाद्यनादरेणानन्तर्य्यमाद्रियत इति। छन्दोगपरिशिष्टे,—

पापिष्ठं दुर्भगां दीनं नग्नमुत्कृत्तनासिकम्।
प्रातरुत्थाय यः पश्येत् तत्कलेरुपलक्षणम्॥
श्रोत्रियं सुभगां गाञ्च अग्निमग्निचितं तथा।
प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥

एवम्,—

कल्यमुत्थाय यो मर्त्त्यः संस्पृशेद् गां घृतं दधि।
सर्षपांश्च प्रियङ्गुञ्च कल्मषात् स प्रमुच्यते॥

कल्यमुत्थायेति वचनादुषसि स्नानाद्यप्रतीक्षाप्रतीतिः।

विष्णुपुराणे,—

ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः॥

मैत्रं विड्-विसर्गः। मित्रोऽपाने समाश्रित इति वचनात्। अत्र भोजनाश्रितदिङ्नियमवद् देशकालनियमः पुरुषार्थः। [1]स च नित्यकर्म्ममध्यपाठात्तन्न्यायेन दुरितक्षयफलः। न [2]परिसंख्या

(१) A. स च पुरुषार्थनित्यकर्म्म ०।
(२) B. ० परिसंख्यातिदोषदुष्टत्वादेव।

त्रिदोषदुष्टत्वादेव। अतएव देवलेन सन्ध्याकाले निषेधः स्मर्य्यते। अन्यथा कल्यव्यतिरिक्तकाले निषेधादेव सन्ध्यायामपि निषेधात् पृथङ्निषेधो दोषातिशयार्थः कल्प्येत तच्च गौरवम्। एवञ्चान्य-दाकरणे दोषाभावः। सन्ध्यायामप्यावेगे कर्त्तव्यम्। [1]पक्वाशयाख्य स्थानच्युतस्यावेगकरत्वात्। स्थानाच्चैव मलास्रुता इत्यशौचकर-त्वात्। नाशुचिः क्षणमपि तिष्ठेदिति शौचस्य विधेयत्वेनावेगे सति सन्ध्यायामुत्सर्गस्य विहितत्वान्न [2]निषेधविषयत्वम्। आप-स्तम्बः,—[3]दूरादावसथान्मूत्रपुरीषे कुर्य्याद् दक्षिणां दिशं गत्वेति शेषः। अस्तमिते बहिर्ग्रामादाराच्चावसथान्मूत्रपुरीषे वर्जयेत्। आराद् दूरे। विष्णुपुराणे,—

अयज्ञियैस्तृणैः काष्ठैः पत्रैर्लोष्टैरथापि वा।
आस्तीर्य्य वसुधाञ्चैव वस्त्रप्रावृतमस्तकः॥

हारीतः,—घ्राणास्ये संवेष्टयित्वा मूर्द्धानं ग्रीवायामासज्य [4]दक्षिणबाहुपार्श्वे कमण्डलुमाधाय उत्सर्गं कुर्य्यात्। घ्राणास्ययो-र्वेष्टनं वस्त्रादिना। शाङ्खायनगृह्यम्,—यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा। एतेनात्र नोत्तरीयनियमः। मनु,—

तिरस्कृत्योच्चरेत्काष्ठं पत्रं लोष्टं तृणानि वा।
नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः॥

(१) A. B. शब्दाशयाख्य ०।
(२) D. निषेधविहितत्वम्।
(३) D. दूरादावसथाग्निं मूत्र ०।
(४) D. बाहुदक्षिणपार्श्वे कमण्डलुमादाय उत्सर्गं ०।

संवीताङ्गः—कण्ठसक्तयज्ञोपवीतः। संवीतं मानुषमिति तैत्तिरीयश्रुतेः। बौधायनः,—शुष्कतृणमयज्ञियं काष्ठं लोष्टं वा तिरस्कृत्य। मेहनानुवृत्तौ वायुपुराणे,—

शुष्कैस्तृणैर्वा काष्ठैर्वा पत्रैर्वेणुदलेन वा।
मृन्मयैर्भाजनैर्वापि अन्तर्द्धाय वसुन्धराम्॥

यमः,—

प्राङ्मुखस्तु पूर्व्वाह्णे अपराह्णे तु प्राङ्मुखः।
उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः॥

[1][देवलः,—

सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः।]
विण्मूत्रमुत्सृजेन्नित्यं सन्ध्यासु परिवर्जयेत्॥

अत्रेयं व्यवस्था—देवलवचनात् त्रिमुहूर्त्तात्मकप्रातः-सायं-कालयोरुदग्दक्षिणामुखत्वम्। यमस्मृतेस्त्रिमुहूर्त्तादूर्द्ध्वं पूर्व्वाह्ण-घटिकाद्वये प्रत्यङ्मुखत्वम्। सायाह्नत्रिमुहूर्त्ताधोघटिकाद्वये प्राङ्मुखत्वं मध्याह्ने उदङ्मुखत्वं रात्रौ दक्षिणामुखत्वमिति। गौतमः,—न वाय्वग्निविप्रादित्यापोदेवता गाश्च प्रतिपश्यन् मूत्र-पुरीषामेध्यान्युत्सृजेत्। एतत्-सम्मुखो न कुर्य्यादित्यर्थः। याज्ञवल्क्यः,—

न प्रत्यग्न्यर्कगोसोमवाय्वग्निस्त्रीद्विजन्मनः।

एतेषामुत्सर्गमार्गाभिमुख्यं वर्ज्यम्। यमः,—प्रतिपन्यानमेव च।

(१) A. B. C. Omit the portion bracketed.

मेहयन्ति य एतांश्च ते भवन्ति गतायुषः।

अत्र पूर्व्वाह्णे प्रत्यङ्मुखत्वे आवरणादिना व्यवधानमित्येव-मन्यत्र[1]। मनुः,—

छायायामन्धकारे वा रात्रावहनि वा द्विजः।
यथासुखमुखः कुर्य्यात्प्राणबाधभयेषु च॥

हारीतः,—

आहारञ्च रहः कुर्य्यान्निर्हारञ्चैव सर्व्वशः।

निर्हारं—मूत्रपुरीषोत्सर्गम्। मनुः,—

न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥

चित्यामग्निचयने।

न जीर्णदेवायतने न वल्मीके कदाचन।
ससत्त्वेषु च गर्त्तेषु न गच्छन्नापि च स्थितः॥

गमनस्थाननिषेधे प्रह्वत्वस्यानिषेधः। उपविष्ट एव कुर्य्या-दित्यर्थः।

न नदीतीरमासाद्य न च पर्व्वतमस्तके।

पुनः पर्व्वतमस्तकनिषेधो दोषातिशयार्थः। नचाग्नेयं चतुर्द्धा करोतीति श्रुत्वा यथा पुरोडाशं चतुर्द्धा करोतीति सामान्यश्रुतिराग्नेये विशेषे उपसंह्रियते तथेह किं न स्यादिति

(१) D. ० मन्यत्।

वाच्यम्। तत्र शाखाद्वयवाक्ययोः पुरुषभेदेन सार्थकत्वात् तथा इह त्वेकग्रन्थे वाक्यद्वयमित्येकवैयर्थ्यभयेनादृष्टातिशयकल्पना। पर्व्वतमस्तकयोरवयवावयवित्वभेदाच्च नोपसंहारः। देवलः,—

वापीकूपनदीगोष्ठचैत्याम्भःपथिभस्मसु।
अग्नौ काम्ये श्मशाने वा विण्मुत्रं न समाचरेत्॥

चैत्यो ग्रामप्रसिद्धो वृक्षः। काम्यः कमनीयप्रदेशः। यमः,—

पल्वलानि तड़ागानि नदीप्रस्रवणानि च।
नखगोमयभस्मानि फालकृष्टञ्च वर्जयेत्॥
तुषाङ्गारकपालानि देवतायतनानि च।
राजमार्गश्मशानानि चैत्राणि च मलानि च॥
उपरुद्धो न सेवेत च्छायादृश्यं चतुष्पथम्।

दृश्यं शोभितम्।

उदकञ्चोदकान्तञ्च पन्थानञ्च विवर्जयेत्।
वर्जयेद् वृक्षमूलानि चैत्यस्तम्भविलानि च॥

राजमार्गचतुष्पथनिषेधो दोषातिशयार्थः। हारीतः,—न चत्वरोपद्वारयोर्मूत्रपुरीषे कुर्य्यात्। न तीर्थे न शस्यपूर्णे न यज्ञभूमौ यज्ञियानां वृक्षाणामधस्तात्। तीर्थं जलावतरणमार्गः। वशिष्टः,—नोप्ते न शाद्वलोपजीव्यच्छायासु। शाद्वलः हरितः स्निग्धो भूभागः। विष्णुः,—नोषरे न परशुचौ तथा नाकाशे। आकाशे अट्टालिकादौ। यद्वा

यथाकाशः स्मृतो भौमस्तस्मान्नासंवृते क्वचित्।
कुर्य्यान्मूत्रं पुरीषं वा न भुञ्जीत स्वपेन्न च॥

इति वायुपुराणवचनादसंवृतदेश एवाकाशपदार्थः। छाया-धिकारे आपस्तम्बः,—स्वाञ्च न मेहेत। स्वां छायां प्रतीत्यर्थः। न सोपानत्को मूत्रपुरीषे कुर्य्यात्। यमः,—

प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्।
दृष्ट्वा सूर्य्यं निरीक्षेत गामग्निं ब्राह्मणं तथा॥

तच्च शौचानन्तरम्। अशुचेस्तु सूर्य्यादिदर्शने

दृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्।
गात्राणि चैव सर्व्वाणि [1]नाभिं पाणितले नहि॥

इति प्रायश्चित्तं मनूक्तम्। कामतोऽधिकप्रायश्चित्तम्।

---

[2]शौचम्।

हारीतः,—गुदं लोष्टेन प्रमृजीत शुष्ककाष्ठेन वा।

यमः,—

शुद्ध्यर्थञ्च त्रिभिः काष्ठैस्तृणैर्वापि निघर्षयेत्।

आपस्तम्बः,—[3]अश्मानं कं लोष्टमार्द्रौषधिवनस्पतीन् दूर्व्वा-माच्छिद्य मूत्रपुरीषयोः शोधनं वर्जयेत्। गौतमेन पर्णेन निघर्षणं निषिद्धम्। व्यासः,—

अश्ममूलफलाङ्गारैरुन्मृज्यान्नास्थिवर्हिषाम्।

---

(१) D नाभिपाणितले न तु।

(२) D. अ(थ)शौचम्।

(३) B. D. अश्मानं लोष्टमात्रौषधिवनस्पतीदूर्व्वामाच्छिद्य मूत्रपुरीषयोः शुद्ध्यर्थं वर्जयेत्।

एवं शुष्ककाष्ठेन गुदमार्जनम्। तदभावे अश्ममूलफलाङ्गा-रास्थिकुशार्द्रौषधिवनस्पतिदूर्व्वालोष्टव्यतिरिक्तेन द्रव्येण। तदभावे लोष्टेन गुदमार्जनम्। लोष्टस्य विहितनिषेधादनुकल्पत्वम्।

ब्रह्माण्डपुराणे,—

उद्धृतोदकमादाय मृत्तिकाञ्चैव वाग्यतः।
उदङ्मुखो दिवा कुर्य्याद् रात्रौ चेद्दक्षिणामुखः॥

शौचमिति सम्बन्धः।

आहरेन्मृत्तिकां विप्रः कूलात् ससिकतां तथा।
नाखूत्कृष्टान्न वल्मीकान्न पांशुलान्न कर्द्दमात्॥
न मार्गान्नोषराच्चैव शौचशिष्टात्परस्य च।

विष्णुपुराणे,—

वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम्॥
अन्तःप्राण्यवपन्नाञ्च हलोत्खाताञ्च पार्थिव।

शातातपः,—

[1]शुचौ देशे तु संग्राह्या शर्कराश्मादिवर्जिता।
रक्ता गौरा तथा श्वेता मृत्तिका त्रिविधा स्मृता॥
न मृदं नोदकं वापि निशायां [2]न च गोमयम्।

---

(१) D. शुचौदेशे तु संग्राह्याः शर्कराश्मादिवर्जिताः।
रक्ता गौरास्तथा श्वेता मृत्तिकास्त्रिविधा मताः॥

(२) D. च न गोमयम्।

न गोमूत्रं प्रदोषे च गृह्णीयाद् बुद्धिमान् नरः।

अष्टाङ्गुलानि खानित्वा उद्धरेत्तु मृदं [1]ततः॥

इति पठन्ति तस्य प्रामाण्येऽपि दृष्टार्थत्वाय यत्राशुद्धिशङ्का [2]तत उद्धरणे तद्बोध्यम्। [3]प्रकरणाविशेषेऽपि दृष्टार्थत्वाय व्रीह्यादिसम्बन्ध इवावघातादेः। अन्यथा शौचशिष्टादिनिषेधोऽप्राप्तत्वाद् व्यर्थः स्यात्। देवलः,—

आशौचान्नोत्सृजेत् शिश्नं प्रस्रावोच्चारयोः स्वयम्।

याज्ञवल्क्यः,—गृहीतशिश्नश्चोत्थाय अन्यत्रोपविश्य शौचं कुर्यादित्यर्थः। शिष्टाः,—

धर्म्मविद् दक्षिणं हस्तमधःशौचे न योजयेत्।

तथैव वामहस्तेन नाभेरूर्द्ध्वं न शोधयेत्॥

वामहस्तेन शौचम्। ब्राह्मे,—

सुनिर्णिक्ते मृदं दद्यान्मृदन्ते त्वप एव च।

सुनिर्णिक्ते काष्ठादिघर्षणेन सम्यक्क्षालिते। दक्षः,—

एका लिङ्गे तु सव्ये त्रिरुभयोर्मृद्द्वयं स्मृतम्।

सव्ये वामे। उभयोर्हस्तयोः। [4]एतत्

मूत्रे शौचं समाख्यातं शुक्रे तु द्विगुणं स्मृतम्॥

---

(१) B. ० तथा।

(२) D. तत्र।

(३) D. प्रकरणविशे ०

(४) C. एतत्तु।

[1][मनुः,—]

एका लिङ्गे गुदे [2]तिस्रो दश वामकरे तथा।

उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥

दक्षः,—

[3]अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका भवेत्।

द्वितीया च तृतीया च तदर्द्धार्द्धप्रमाणतः॥

[4]लिङ्गेऽप्यत्र समाख्याता त्रिपर्व्वी पूर्य्यते यथा।

आर्द्रामलकमानेन मृदं गात्रविशोधनम्॥

इति वाक्यात् शेषमृत्तिकापरिमाणं तन्मात्रम्। हारीतः,— षट् पृष्ठे। [5]पृष्ठे वामहस्तपृष्ठे। शङ्खः,—

तिस्रस्तु मृत्तिका देया कृत्वा नखविशोधनम्।

शङ्खः,—लिङ्गे द्वे एकेन गन्धलेपानुवृत्तौ। एवमुत्तरत्राधिकसंख्यत्वे बोध्यम्। पैठीनसिः,—अपाने पञ्च। शङ्खः,—मेहने सप्त। [6]त्रयेणाशुचौ पञ्च। पञ्चभिः शुद्ध्यभावे सप्त देया इत्यर्थः। यमः— वामे पाणौ चतुर्द्दश। शङ्खः,—

एकस्मिन् विंशतिर्हस्ते द्वयोर्देयाश्चतुर्द्दश।

---

(१) A. B. C. Omit the portion bracketed.

(२) D. ० तिस्रस्तथा वामकरे दश।

(३) D. अर्द्धप्रसृतिमात्राभिः प्रथमा ०

(४) D. लिङ्गेऽप्यर्द्धसमा ०

(५) D. वामहस्तस्य पृष्ठे।

(६) A B. त्रयेणाशुद्धौ ०।

ब्राह्मे,—

[1]द्वाविंश वामहस्ते तु। द्वयोः षोड़श पुनः सप्त च।

देवलः—

यावत् साध्विति मन्येत तावत् शौचं विधीयते।
प्रमाणं शौचसंख्याया न शिष्टैरनुमन्यते॥

[2][संख्यामात्रेण न तुष्टिः।]

गन्धलेपानुवृत्तौ न्यूनसंख्यां त्यक्त्वाधिकसंख्याश्रयणम्। तावताप्यनुवृत्तौ पुनरन्तिममृत्संख्या[3][ऽभ्यसनीया]। न्यूनसंख्यया गन्धलेपक्षये विहितसंख्यापर्य्यन्तं कर्त्तव्यम्। तदुक्तं दक्षेण,—

न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता।

हारीतः,—तिसृभिः पादौ प्रक्षाल्य गोमयेन मृदा कमण्डलुं परिमृज्य पूर्व्ववदुपस्पृश्य आदित्यं सोममग्निं वीक्षेत। शङ्खलिखितौ,—आचम्य ईशानं मनसा ध्यायेत्। ईशानः सर्व्वेश्वरो विष्णुः। स्मृत्वा विष्णुं सनातनमिति ब्रह्मपुराणात्। सोमसूर्य्याग्निवीक्षणं यथासम्भवम्। विष्णुस्मरणञ्च विण्मूत्रशुक्रशौचाङ्गम्।

नक्ताचमनमात्रे। दक्षः,—

यथोक्तन्तु दिवाशौचमर्द्धं रात्रौ विधीयते।
आतुरस्य तदर्द्धं स्यात् तदर्द्धञ्च पथि स्मृतम्॥

आतुरोऽत्र जलसंसर्गवर्द्धिष्णुरोगवान्। स्वस्थस्य चतुर्थांश

(१) D. द्वात्रिंशद् वाम ०

(२) A. B. C. Omit the portion bracketed.

(३) A. B. C. Omit the portion brac eted.

आतुरस्य दिवा रात्रौ च। एवं पथिकस्यानातुरस्य दिवा रात्रौ च तदष्टमांशेन शुद्धिः। मनुः,—

एतत् शौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्।
त्रिगुणञ्च वनस्थानां यतीनाञ्च चतुर्गुणम्॥

शङ्खः,—

शौचमेतद् गृहस्थानां तथा गुरुनिवासिनाम्।
द्विगुणं स्याद् वनस्थानां यतीनां त्रिगुणं भवेत्॥

एतच्छौचं विण्मूत्रोत्सर्गनिमित्तम्। [1]विण्मूत्रलेपे तु मृज्जलाभ्यां शुद्धिः न संख्यानियमः। मनुः—मृद्वार्य्यादेयमर्थवदित्युक्त्वा

दैहिकानां मलानाञ्च शुद्धिषु द्वादशस्वपि।

तथा,—

वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविन्नखाः।
श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः॥

अत्र,—

षण्णां क्रमेण चैतेषां शुद्धिरुक्ता मनीषिभिः।
मृद्वारिणा तु पूर्व्वेषामितरेषान्तु वारिणा॥

इति वाक्यात् समाचारः। अत्रोद्धृतोदकासम्भवेऽनुद्धृतेनापि। तथा च पठन्ति,—

कुर्य्यादनुद्धृतेनापि यदि निर्जन्तुकं जलम्।
वितस्तिमात्रं सन्त्यज्य कुर्य्यात् शौचं जलाशयात्॥

(१) D. विण्मूत्रलेपने तु मृज्जलाभ्यां शुचिः ०

क्वचिच्च,—

[1]अरत्निमात्रं सन्त्यज्य कुर्य्याद् वारिण्यनुद्धृते ।

इति। केवलम्,—

क्षिप्राम्नावशुचिद्रव्यं तथैवाम्भसि वा पुनः ।
मासमात्रं व्रतं कुर्य्यात्

इति गुरुदोषाज्जले शौचोदकपरिहाराय यत्नः कार्य्यः। मृन्मयकमण्डलुसम्भवेऽप्येतन्न कार्य्यम्। कमण्डलुशब्दो ह्याकार-निमित्तः। तथा च मेधातिथिः,—आकारनिमित्तः कमण्डलुशब्दो न जातिनिमित्तः। तेन मृन्मयस्य सौवर्णस्य राजतस्य वा तथैव शुद्धिः। ताम्रगड्डुकादिकमपि कमण्डलुरेव। केवलं तस्य शौचे यत्नः कार्य्यः। बौधायनः,—

कमण्डलुं परिहरेत् सर्व्वावस्थोऽप्यशौचतः ।
न चैवं कुत्सयेद् विद्वान् [2]न च शङ्केन्न दूषयेत् ॥

तथा,—

तस्माच्छौचं ततः कृत्वा परिमृज्य कमण्डलुम् ।
पर्य्यग्निकरणं [3]ह्येतद्दूर्द्दन्तत्परिमार्जनम् ॥

हस्तपरिमार्जनमुच्छिष्ट-पुरुषसंयोग-निमित्तं कमण्डलु-संस्कारः। मूत्रादिलेपे तु कमण्डलुर्यद्द्रव्यजातस्तदुक्तं शौचम्।

(१) D. वितस्तिमात्रं ०
(२) B. D. न शङ्केच्च च दूषयेत्।
(३) D. ह्येतद्दवस्त्रपरिमार्जनं। (?)

एवञ्च सति धारणञ्च कमण्डलोरिति निषेधः काष्ठस्य समा-चारमूलकः।

इति शौचम्।

अथाचमनम्।

देवलः,—

शौचलक्षणमित्याहुर्मृदम्भोगोमयादिभिः ।
लेपे स्नेहे च गन्धे च व्यपकृष्टे सुदूरतः ॥
पश्चादाचमनं वापि शौचार्थं वक्ष्यते विधिः ।

गोमयेन शरीरोपघातशुद्धिर्वक्ष्यते। तद्विषयं गोमयग्रहणम्। एतेनाचमनानन्तरमेव कर्म्मार्हतालक्षणं शौचं सिद्धं भवति। देवलः,—

प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः ।
उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः ॥

दैवकर्म्माचमनाङ्गपादप्रक्षालने प्राङ्मुखत्वमुदङ्मुखत्वञ्च वै-कल्पिकम्। एवं पित्र्याचमनाङ्गपादप्रक्षालने दक्षिणामुखत्वं प्राङ्मुखत्वञ्चैव वैकल्पिकमित्यर्थः। प्रत्यक्पादावनेजनमिति त्वापस्तम्बीयमाचमनार्थक्रियमाणव्यतिरिक्तविषयम्।

तथा,—

इत्येवमङ्गिराजानु प्रक्षाल्य चरणौ पृथक् ।
हस्तौ चामणिबन्धाभ्यां पश्चादासीत संयतः ॥

तथा,—

शिखां बद्ध्वा वसित्वा द्वे निर्णिक्ते वाससी शुभे।

तूष्णीं भूत्वा समाधाय नोद्गच्छन् न विलोकयन्॥

उद्गच्छन् उत्तिष्ठन् विलोकयन् दिश इति शङ्खस्मृतिः।

न गच्छन्न शयानश्च न चलन्न परान् स्पृशन्।

न हसन् नैवाकलयन्नात्मानं न विलोकयन्॥

आकलयन् कम्पमानः। आत्मानं हृदयं विलोकयन्निति स्वार्थे निच्।

केशान्नीवीमधः कायमस्पृशन् धरणीमपि।

[1][सोपानत्को जलस्थो वा मुक्तकेशोऽपि वा नरः।

उष्णीषी वापि नाचामेद् वस्त्रेणावेष्ट्य वा शिरः॥]

अथातः प्रथमात् तीर्थाद् दक्षिणात् त्रिः पिबेत् समम्॥

अशब्दमनवस्रावमबहिर्जान्वबुद्बुदम्।

प्रथमात् तीर्थात् ब्राह्मतीर्थात्।

द्विस्ततोऽङ्गुष्ठमूलेन परिमृज्यात् ततो मुखम्।

नाग्राङ्गुल्या न पृष्ठैर्वा परिमृज्यात् कथञ्चन॥

आपस्तम्बः,—तिष्ठन् प्रह्वो वा नाचामेत्। मरीचिः— न यानासनस्थो न पादुकस्थः। मरीचिः,—

भुक्त्वासनस्थोऽप्याचामेन्नान्यकाले कदाचन।

---

(1) A. B. C. Omit the portion bracketed

व्यासः,—

शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा।

अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्॥

तथा,—

सोपनत्को जलस्थो वा मुक्तकेशोऽपि वा नरः।

उष्णीषी वापि नाचामेद् वस्त्रेणावेष्ट्य वा शिरः॥

[1]गौतमः,—वाग्यतो हृदयस्पृशस्त्रिश्चतुर्वा अप आचामेत्। [2]त्रिश्चतुर्वेति भावशुद्ध्यपेक्षया। हृदयगामिन्योऽपः।

[3]भविष्ये,—

समौ च चरणौ कृत्वा तथा बद्धशिखो नृप।

घनाङ्गुलिकरं कृत्वा [4]एकाग्रसुमना द्विजः॥

नारसिंहे,—

दक्षिणन्तु करं कृत्वा गोकर्णाकृतिवत् पुनः।

त्रिः पिबेद् वीक्षितं तोयं आस्यं द्विः परिमार्जयेत्।

दक्ष,—

संहत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात् ततो मुखम्।

संहताभिस्त्रिभिः पूर्व्वमास्यमेवमुपस्पृशेत्॥॥

---

(1) D. गौतमः,—

(2) D. त्रिचतुर्वेति भावशुद्ध्यपेक्षायाम्।

(3) B. D. भविष्यपुराणे।

(4) D. एकाग्रः सुमना ०

मुखं संवृत्य [1]प्रमृज्यात् । एवम्,—संवृत्यास्यमुपस्पृशेत् ।

आपस्तम्बः,—त्रिरोष्ठौ परिमृजेत् द्विरित्येके । सकृदुपस्पृशेत् द्विरित्येके । दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेन्द्रियाण्युपस्पृशेत् । पादौ शिरश्च प्रोक्षयेदित्यन्वयः । सकृदुपस्पृशेदोष्ठाविति सम्बन्धः । ओष्ठ[2]स्पर्शादनन्तरं दक्षः,—

अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् ।
अङ्गुष्ठानामिकाभ्यान्तु चक्षुः श्रोत्रे पुनः पुनः ॥
नाभिं कनिष्ठाङ्गुष्ठाभ्यां हृदयन्तु तलेन वै ।
[3]सर्वाभिस्तु शिरः पश्चाद् बाहू चाग्रेण संस्पृशेत् ॥

प्रदेशिनी तर्ज्जनी । अत्र आस्यं स्पृष्ट्वा पश्चाद् घ्राणं तदनन्तरं चक्षुषी पुनः श्रोत्रे पुनर्नाभिमित्यर्थः । [4]नतु चक्षुःश्रोत्रयोः स्पर्शनावृत्तिरिति [5]भ्रमः कार्य्यः । नाभिस्पर्शानन्तरं व्यासः,—पुनरपश्च संस्पृशेत् । हृदयस्पर्शादनन्तरं चात्मालम्भादुदकस्पर्शनम् ।

भविष्ये,—

यद्भूमावुदकं वीर समुत्सृजति मानवः ।
वासुकिप्रमुखान् नागान् तेन प्रीणाति पार्थिव ॥

शिष्टाः पठन्ति,—

तावन्नोपस्पृशेद् विद्वान् यावत्सव्येन न स्पृशेत् ।

---

(१) D. संमृज्यात् ।
(२) B. D. संस्पर्शनानन्तरं दक्षः ।
(३) D. सर्वाभिश्च ०
(४) A. B. C. अनन्तरं चक्षुः ०
(५) A. B. C. न भ्रमः

मनुः,—

ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ॥

ब्राह्मतीर्थस्य व्रणादिदोषे इदमनुकल्परूपं कायत्रैदशिकाभ्यामिति ।

अपः पाणिनखस्पृष्टाः पिबेदाचामति द्विजः ।
सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥

इति वचनान्नखस्पर्शपरिहारः कार्य्यः । कमण्डलूपस्पर्शनं सोमतीर्थेनेति [1]हारीतवचनादुद्धृतोदकेन कमण्डलोर्गृहीतेनाचमने सोमतीर्थाख्येन करमध्येन । [2]कमण्डलुशब्दस्य संस्थानवचन इत्युक्तं तेन ताम्रपात्रादिभ्योऽपि ग्रहणे तथा मन्तव्यम् ।

अतएव स्मरन्ति,—

कांस्येनायसपात्रेण त्रपुसीसकपित्तलैः ।
आचान्तः शतकृत्वोऽपि नैव शुद्धिमवाप्नुयात् ॥

कांस्यादिपात्राणामाकारेण [3]कमण्डलुत्वेन प्रसङ्गे निषेधः । अन्यथा प्रसङ्गाभावात् । आचामेदित्यनुवृत्तौ शङ्खलिखितौ,—उद्धृतपरिपूताभिरद्भिरवेक्षिताभिरनधिश्रिताभिरबुद्बुदाभिः शूद्राशुच्येकपाण्यावर्जिताभिः शूद्रावर्जिताभिरशुच्यावर्जिताभिरेकपाण्यावर्जि-

---

(१) B. D. ० हारीतस्य वचनाद् ० ।
(२) A. कमण्डलुशब्दस्य संस्कारमित्युक्तम् ।
(३) B. कमण्डलुप्रसङ्गनिषेधः । D कमण्डलुप्रसङ्गे निषेधः ।

ताभिश्च नाचामेत् । परिपूतत्वमपद्रव्यनिरासेन । आपस्तम्बः,— भूमिगतास्वप्स्वाचम्य प्रयतो भवति यद्वा प्रयत आचामेत् । एतेन स्वयमाहृतेनाचमनं नाशुद्धिहेतु । वशिष्ठः,—

तस्मादुदकपाणिभ्यां परिमृज्य कमण्डलुम् ।
पर्य्यग्निकरणं ह्येतत् मनुराह प्रजापतिः ॥
कृत्वा चावश्यकार्य्याणि आचामेत् प्रयतस्ततः ।

ततः कमण्डलोः । आपस्तम्बः,—न वर्षधारास्वाचामेत् । तथा प्रदरोदके । तत्राभिश्वाकारणात् । प्रदरः स्वयं दीर्णो भूभागः । अकारणाद् व्याधिव्यतिरेकेण । वशिष्ठः,—प्रदरादपि या आपस्तर्पणसमर्थाः स्युर्न वर्णरसदुष्टा याः स्युरशुभागमाः । बौधायनः,—पादप्रक्षालनात् शेषेण नाचामेत् यदाचामेद् भूमौ स्रावयित्वाचामेत् । आपस्तम्बः,—अग्न्युदकशेषेण वृथा कर्म्माणि कुर्य्यात् । आचामेद् वा [1]पाणिसंक्षुब्धोदकेन नाचामेत् । अग्निपर्य्युक्षणार्थोपात्तजलशेषेणेत्यर्थः । विष्णुः,—

हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ।
शुद्धेरन् स्त्री च शूद्रश्च [2]सकृत्स्पृष्टाभिरन्ततः ॥

अन्ततः ओष्ठप्रान्ते । ब्राह्मे स्त्रीशूद्राधिकारे,—क्षालनाच्च करोष्ठयोः । शूद्राधिकारे [3]गोतमः,—आचमनार्थे पाद[4]प्रक्षालनमेवैके ।

(१) D. पाणिसंक्षुब्धोदके नाचामेत् ।
(२) D. सकृत् स्पृष्टाद्भि ०
(३) D. गौतमः,—
(४) D. क्षालन ०

आचमनक्रमः ।

दक्षिणपूर्व्वक्रमेण पादप्रक्षालनं प्राङ्मुखत्वेन । [1]पित्र्याचमनाङ्गपादप्रक्षालनमुदङ्मुखत्वेन वा । आमणिबन्धात् पाणिप्रक्षालनम् । शिखाबन्धनम् । यज्ञोपवीतानुसन्धानम् । वासोद्वयधारणम् । उष्णीषशिरःकण्ठप्रावरणपरीहारः । उपानत् पादुकत्यागः । भोजनान्तराचमनव्यतिरिक्ताचमने आसनत्यागः । न प्रौढ़पादत्वम् । [2][शुचिदेशे पादद्वयदानम् ।] दिशां हृदयस्य चानवलोकनम् । गमनोत्थानप्रह्वताशयनकम्पनहासत्वरात्यागः । केशनीवीनाभ्यधोभागपरदेहभूमीनां हस्तेन स्पर्शनपरीहारः । स्नानाङ्गाचमनेऽन्तरेकं वहिरेकं पादं दत्वा । पुरुषार्थाचमनेऽप्यार्द्रवस्त्रस्य जलमध्येऽपि जानुदघ्ने तदधिके वा । वाग्यतः समाहितचित्तः प्रसन्नचेता भवेत् । उर्व्वोररत्निकरणम् । संहताङ्गुलि गोकर्णाकृति हस्तकरणम् । कांस्यायसत्रपुसीसपित्तलव्यतिरिक्तस्वकीयदारुमृत्तैजसान्यतमकमण्डलोरसम्भवे सम्मृज्य परकीयस्य वामहस्ते धारणम् । तत्र [3]वामहस्तशूद्रानीतव्यतिरिक्तपरजनानीतजलधारणम् । दिवोद्धृतमेव । असम्भवे अग्निदर्शनपूर्व्वक[4]रात्र्युद्धृतमपि । क्षौदवुद्वुदवर्षधाराद्रव्यान्तरसंसर्ग-

(१) D. पित्र्याचमनाङ्गपादप्रक्षालनं दक्षिणाभिमुखत्वेन वा । दैवकर्म्माङ्गमाचमनार्थं पादप्रक्षालनमुदङ्मुखत्वेन वा । आमणि ०
(२) D. Omits the portion bracketed.
(३) D. वामहस्तशूद्रव्यतिरिक्तशुद्धपरजनानीतजलधारणम् ।
(४) D. रात्रावानीतमपि ।

दूषितपादक्षालनशेषव्यतिरिक्तम्। असम्भवे पादक्षालनशेषमवस्रावितैकदेशं नखसंस्पृष्टाग्निपर्य्युक्षणशेषप्रदरोदकभिन्नं प्रदरादपि गोतृप्तिसमर्थादविकृतरसगन्धं जलं कमण्डलोर्हस्ते कार्य्यम्। वामहस्तेन दक्षिणहस्तस्पर्शनम्। तोयस्य वीक्षणम्। करमध्येन सोमतीर्थेन पानम्। यथा हृदयं यावद् गच्छति। एवं द्विरपरं त्रिर्वा। भूमिष्ठादीदृशोदकं गोकर्णाकृतिहस्तेनादायाङ्गुष्ठकनिष्ठाभ्यां किञ्चिदवस्राव्य ब्राह्मतीर्थेन पानम्। तदसम्भवे प्राजापत्येन। तस्याप्यसम्भवे नखस्पर्शपरीहारेण दैवतीर्थेन पानम्। कमण्डलोराचमने सोमतीर्थनियमः। मुखं संवृत्याङ्गुष्ठमूलेन द्विः परिमार्जनं त्रिर्वा। भोक्ष्यमाणस्य द्विरेव। ततः सव्यपाणेः पादयोः शिरसः क्रमेण प्रोक्षणम्। मुखं संवृत्य संहतमध्याङ्गुलित्रयेण द्विः सकृद् वा स्पर्शनम्। भोक्ष्यमाणस्य सकृत्। तर्ज्जन्यङ्गुष्ठाभ्यां नासिकयोः। अनामिकाङ्गुष्ठाभ्यां नेत्रयोः श्रोत्रयोश्च। कनिष्ठाङ्गुष्ठाभ्यां नाभिं स्पृष्ट्वा जलस्पर्शनम्। सर्व्वाङ्गुलिभिः शिरः अङ्गुल्यग्रेण बाहुमूलद्वयस्पर्शनम्। भूमौ किञ्चिदुदकप्रक्षेपः। इन्द्रियस्पर्शनशेषजलस्य सव्यपाणौ प्रक्षेपः। ततः सर्व्वेश्वरस्य विष्णोः स्मरणम्। आदित्यसोमाग्नीनां यथासम्भवमीक्षणम्। एतच्च पुरीषोत्सर्गाचमनाङ्गं [1]न सर्व्वत्र। देवलः,—

रेतोमूत्रशकृन्मोक्षे भोजनेऽध्वपरिश्रमे।
शौचमेवंविधं प्रोक्तमीषच्चान्यत्र वर्त्तते॥

(१) D. सर्व्वत्र न।

उक्तनिमित्तपञ्चकातिरिक्तनिमित्ते किञ्चिदङ्गसहितमप्याचमनं सगुणं भवति केवलं शिरःकण्ठप्रावरणमुक्तकच्छशिखायज्ञोपवीतत्वपादशौचानामावश्यकत्वम्। एतैर्विनाचमनं शुद्धिकरं न भवति। उक्तपञ्चनिमित्ते सर्व्वाङ्गादर इत्याहुः।

अथाचमननिमित्तानि।

ब्राह्मे,—

क्षुते श्लेष्मपरित्यागेऽधीते वा भक्षिते सति।
अववर्णस्य संलापे स्वप्ने वा दन्तधावने॥
आचम्य प्रयतो भूत्वा ततः शुद्धो भवेन्नरः।

अधीते पाठे। [1]अववर्णस्य चण्डालादेः। हारीतः,—रथ्यामाक्रम्य कृतमूत्रपुरीषो भोक्ष्यन् (भोक्ष्यमाणः) वा पाणिपादं प्रक्षाल्याचामेत्। पैठीनसिः,—उच्छिष्टरेतोमूत्रस्पर्शे उत्सृज्याचम्य प्रयतो भवति त्रिः प्रक्षाल्य च तं देशम्। तं देशमुच्छिष्टादिलिप्तम्। बौधायनः,—नीवीं विस्रंस्य परिधायोपस्पृशेत्।

वायुपुराणे,—

निष्ठीविते तथाभ्यङ्गे तथा पादावसेचने।
उच्छिष्टस्य च सम्भाषादशुच्यप्रयतस्य वा॥
सन्देहेषु च सर्व्वेषु शिखां मुक्त्वा तथैव च।
विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत्॥

(१) B. D. अवर्णश्चाण्डालादिः।

सन्देहः आचमनं कृतं न वा। आचमननिमित्तं नवेति च।

तथा,—

उच्छिष्टस्य च संस्पर्शे [1]दर्शने चान्त्यवासिनाम्।

मनुः,—अध्येष्यमाणश्चाचामेत्। आपस्तम्बः,—रिक्तपाणिर्वायसमुद्यम्य अप उपस्पृशेत्। तथा,—श्यावातपर्य्यन्तावोष्ठौ चोपस्पृश्य। श्यावातपर्य्यन्तावलोमकौ। यमः,—

उत्तीर्य्योदकमाचम्य अवतीर्य्य उपस्पृशेत्।

उत्तीर्य्य जलान्निष्क्रम्य। अवतीर्य्य जले प्रविश्य। हारीतः,—"नोत्तरेदनुपस्पृश्य" उत्तरेत् सन्तरेत्। देवलः;—

यदश्मः शौचनिर्मुक्तं क्षितिं प्राप्य विनश्यति।

प्रक्षाल्याशुचिलिप्तञ्च स्पृष्ट्वाचम्य विशुद्ध्यति॥

शौचनिर्मुक्तं [2]शौचस्थानादन्यत्र गतम्। संवर्त्तः,—

चर्म्मारं रजकं वेणं धीवरं नटमेव च।

एतान् स्पृष्ट्वा नरो मोहादाचामेत् प्रयतोऽपि सन्॥

आपस्तम्बः,—सिंहाणिकाद्यालम्भे लोहितस्य केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चालम्भे महापथं गत्वाऽमेध्यञ्चोपस्पृश्याप्रयतञ्च मनुष्यं नीवीं च परिधायाप उपस्पृशेत्। आर्द्रं वा शकृदोषधिं भूमिं वा। अमेध्यं चतुर्विधम्। देवलः,—

दूषितं वर्ज्जितं दुष्टं कश्मलञ्चेति लिङ्गिनाम्।

चतुर्विधममेध्यं स्यात् सर्व्वं व्याख्यास्यते पुनः॥

(१) B. D. ० दर्शनेऽप्यन्त्यवासिनाम्।

(२) D. शौचगात्रादन्यगतम्।

शुच्यप्यशुचिसंस्पृष्टं द्रव्यं दूषितमुच्यते।

अभक्ष्याभोज्यापेयानि वर्जितानीह चक्षते॥

त्यक्ताः पतितचाण्डाला ग्रामकुक्कुटशूकरौ।

श्वा च नित्यं विवर्ज्याः स्युः षडेते धर्म्मतः समाः॥

सव्रणः सूतिकासूतीमत्तोन्मत्तरजस्वलाः।

मृतबन्धुरशुद्धश्च वर्ज्याश्चाष्टौ स्वकालतः॥

नेत्रास्यु विप्रुषः केशा निरस्तं नखलोम च।

आर्द्रं चर्म्मास्रगित्येतद् दुष्टमाहुर्मनीषिणः॥

मानुषास्थि शवं विष्ठां रेतो मूत्रार्त्तवानि च।

कुणपः पूयमित्येतत् कश्मलं समुदाहृतम्॥

दूषिते प्रोक्षणेनापि शुद्धिरुक्ता विधानतः।

दुष्टे मार्जनसंस्कारैः कश्मले सर्व्वथा भवेत्॥

लेपापकर्षणादिभिर्यथोक्तशुद्धेः पूर्व्वं स्पर्शनमाचमननिमित्तम्। सव्रणोऽत्र कुष्ठभगन्दरादिरोगयुक्तः। सूती प्रसवकारयित्री। मत्तो मादकभक्षणेन। उन्मत्त उन्मादरोगी। मृतबन्धुर्मृतकाशौची। [1]एतेषां यथोक्तशुद्धेः पूर्व्वं स्पर्शनमाचमननिमित्तम्। अत्र सव्रण इति वचनात् क्षताशौचं केचिदिच्छन्ति तत्र दुष्टव्रणविषयत्वेनोपपत्तौ व्रणमात्रेऽशौचकल्पनानवकाशात्। दन्त[2]लग्नाधिकारे च देवलवचनम्,—

(१) D. एषां ०।

(२) D. ० लग्नाधिकारे देवल ०।

न तत्र बहुशः कुर्य्याद् यत्नमुद्धरणे पुनः।
भवेदशौचमत्यर्थं तृणवेधाद् व्रणे क्षते ॥

इति रुधिरस्य मुखप्रवेशादत्यन्ताशौचप्रतिपादनार्थम्। कालिकापुराणवचनात्तु न क्वचिन्निबन्धे क्वचिद्देशे चादरो दृश्यत इति [1]क्षेपशङ्कै(व)नावतिष्ठते। देवलः,—

ततः [2]शरीरश्रोत्रेभ्यो मलनिःस्यन्दविस्रवात्।
अन्नादीनां प्रवेशाच्च स्यादशुद्धिर्विशेषतः ॥

तथा,—

शौचलक्षणमित्याहुर्मृदम्भोगोमयादिभिः।
लेपे स्नेहे च गन्धे च व्यपकृष्टे सुदूरतः ॥
पश्चादाचमनं चेति शौचार्थं कथ्यते विधिः।

[3]शरीरश्रोत्रेभ्यः शरीरच्छिद्रेभ्यः। मलं द्वादशविधम्। निःस्यन्दो लालादि। तयोर्विस्रवः स्थानाच्चलनम्। अन्नादीनां प्रवेशो मुखद्वारा। [4]तेन भोजनादावशुद्धिराचमनेनापोह्यते। एतदाचमनं त्रिविधम्,—शुद्ध्यर्थं नैमित्तिकं कर्म्माङ्गञ्च। तत्र शुद्ध्यर्थाचमननिमित्तानि,—स्वकीयविण्मूत्ररेतसामुत्सर्गः। तेषां स्पर्शनम्। अशौचोदकतदार्द्रभूमिस्पर्शनम्। क्षुतम्। श्लेष्मत्यागः। भोजनम्। पानम्। चाण्डालादिभाषणम्। निद्रा। दन्तधावनम्। अनृतभाषणम्। [5][परुषभाषणम्।] वस्त्रपरिवर्त्तनम्। रथ्याक्रम-

(१) A. B. C. क्षेपशङ्कैवावतिष्ठते। (४) D. तत्र न भोजनादा ०।
(२) D. शरीरस्रोतोभ्यो ०। (५) D. Omits the portion bracketed.
(३) D. शरीरस्रोतोभ्यः ०।

णम्। द्वादशविधमलानां स्वस्थानात् प्रच्यवनम्। मानुषेतरनिःस्नेहपञ्चनखास्थिस्पर्शनम्। निर्लोमोष्ठादिदेशस्पर्शनम्। उच्छिष्टब्राह्मणस्पर्शनम्। बुद्धिपूर्व्वकातिक्षुद्रनिःस्नेहमानुषास्थिस्पर्शनम्। चाण्डालादिस्पर्शनम्। चाण्डालादिस्पृष्टस्य बुद्धिपूर्व्वं स्पर्शनम्। अमेध्यलेपप्रदेशस्य त्रिःक्षालनपूर्व्वकमाचमननिमित्तत्वम्। अस्थिसञ्चयनादूर्द्ध्वं रोदनम्। जलाशयप्रवेशः। तत उत्तरणम्। भुक्तमात्रवमनं चाण्डालोदक्यासूतकीपतितशवतत्स्पृष्टस्पर्शनम्। परकीयशुक्रादिद्वादशविधमलस्पर्शनम्। रथ्याकर्द्दमस्पर्शनम्। भास-काक-वलाक-वानर-मार्जारखरोष्ट्र-श्व-शूकर-कुक्कुट-वराह-चेल-निर्णेजक-रजक-चर्म्मकृद्व्याधकैवर्त्ततैलकृत्सुराविक्रयिनटनपुंसक-वेश्यानां स्पर्शनम्।

नाभेरूर्द्ध्वं करौ मुक्त्वा यदङ्गमुपहन्यते।
तत्र स्नानमधस्तात्तु क्षालनेनैव शुद्ध्यति ॥

इति वचना[1]दुत्तमाङ्गे स्नानमधिकम्। एवञ्च,—

एभिर्यदङ्गं संस्पृष्टं शिरोवर्ज्यं द्विजातिषु।

इत्यत्र शिरःपदं नाभ्यूर्द्ध्वभागपरमेव। तथाचमनकृताकृतसन्देहः। आचमननिमित्तसन्देहश्च। एतानि [2]शुद्ध्यर्थाचमननिमित्तानि।

(१) D. ० दुत्तमाङ्गस्नान ०।
(२) D. शुद्ध्यर्थान्याचमन ०।

अथ पुरुषार्थाचमननिमित्तानि।

व्यासः,—श्रमकृतविकृतश्वासः। ब्राह्मणस्पर्शनम्। अग्निस्पर्शनम्। गोस्पर्शनम्। लोष्टादिरहितस्य हस्तस्य पश्चिमं प्रत्युद्गमः। पादप्रक्षालनम्। शिखाबन्धनम्। नीवीविश्रंशनम्। वस्त्रपरिधानम्। यज्ञोपवीतबहिष्करणम्। स्नानं भोजनारम्भः। उच्छिष्टदोषरहितताम्बूलादिभक्षणम्। शयनारम्भः। श्मशानाक्रमणम्। अभ्यङ्गस्याशुचिकरत्वे मानाभावादेव तत्राचमनं पुरुषार्थः। [1]श्मशानाक्रमणं नाशुद्धिकरम्।

न च मेध्यतरं किञ्चित् श्मशानादिह विद्यते।

इति दानधर्म्मवचनात्। एतेषु निमित्तेष्वाच[2]मनस्य दुरितक्षयः फलम्। कर्म्माङ्गाचमनञ्च सामान्यतः

क्रियां यः कुरुते मोहादनाचम्येह नास्तिकः।

इति वायुपुराणोक्तम्। विशेषतश्च

प्राणस्यायमनं कृत्वा आचामेत् प्रयतोऽपि सन्।

इत्यादौ सन्ध्यान्तर्गतप्राणायामस्य निमित्तत्वम्। तत्त्वसागरसंहितायाम्,—

अर्च्चयित्वा महेशानमनाचम्य क्रियान्तरम्।
कुर्व्वन् किल्बिषमाप्नोति सत्यमीश्वरभाषितम्॥

(१) D. श्मशानाक्रमणमपि नाशुद्धि०।
(२) D. ०मनस्योपात्तदुरित०।

तथा,—

आदित्यञ्च गणाध्यक्षं क्षेत्रपालञ्च पार्व्वतीम्।
आराध्याचमनं कार्य्यं सुधिया [1]कार्य्यसिद्धये॥
लङ्घयित्वा च निर्म्माल्यमेतेषां त्रिदशाधिप।
सद्य आचमनं कार्य्यं कर्म्मान्तरविशुद्धये॥

इत्यादौ [2]कर्म्माङ्गमाचमनम्। तथा श्राद्धे [3]पिण्डदानादौ कर्म्माङ्गमाचमनम्। अतएव पैतृके दक्षिणामुख इति पादक्षालने दिङ्नियम उक्तः। यत्तु शुद्ध्यर्थाचमनमेव कर्म्माङ्गं न पृथक् कर्म्माङ्गमाचमनमस्ति। अतएव शिष्टाः कोपाधिकरणे,—

वेदैरिव ह्यनाचम्य कुर्व्वतो विगुणी भवेत्।
तामेव सगुणां कर्त्तुं शुद्ध्या न व्यवधास्यते॥

इति शुद्ध्यर्थाचमनस्य [4]क्रमविरोधो विचारितः। तद्युक्तं तत्र तत्र कर्म्माङ्गाचमनमध्ययनाङ्गमेव। एवञ्च क्षुतादौ शुद्ध्यर्थाचमनस्यापि न व्यवधायकत्वमित्यतिशयार्थम्। शुद्धेः कर्म्माङ्गत्वेऽपि तदर्थाचमनस्य न कर्म्माङ्गत्वम्। आहवनीयस्य कर्म्माङ्गत्वेऽप्या-

(१) D. ०कर्म्मसिद्धये।
(२) D. कर्म्माङ्गाचमनम्।
(३) D. पिण्डदानार्घ्यदानादौ कर्म्माङ्गाचमनम्।
(४) B. क्रमविशेषो०। D. क्रमविशेषो विचारितः। तदुक्तं तत्र कर्म्माङ्गाचमनस्य दर्शितत्वात्। अतएव भाष्यकारेणापत्तौ न कर्त्तव्यमित्यविशेषेणाङ्गत्वबोधकं स्मरणमित्युदाहृतम्। वार्त्तिककारेण ब्रह्मयज्ञाङ्गमाचमनं जपमात्राङ्गमित्युक्तम्। अतएवाध्येष्यमाणस्यारम्भे प्रयतः सन्नित्यध्ययनारम्भे आचमनमध्ययनाङ्गमेव। एवञ्च०।

धानस्य न कर्म्माङ्गत्ववत् । अतएव विध्यन्तरसिद्धत्वादशौचस्य च यथाशक्त्युपबन्धविषयत्वमिति । व्रीह्याद्यपचार इव शौचापचारे न कर्म्माधिकारः । न चैवं निरग्नेरिवाशुद्धस्याधिकाराभावादग्निहोत्राद्यकरणे दोषाभावः स्यादिति वाच्यम् । शक्तिविषये न मुहूर्त्तमप्यप्रयतः स्यादित्यापस्तम्बवचनादशुचेरेव स्थानस्याधर्म्महेतुत्वादग्निहोत्रादिलोपवत् । शौचविलम्बे त्रिरात्रोपवासादिविधानाच्च । एवञ्च दैवान्मुख्यगौणकालयोः शौचाभावे कर्म्मलोपदोषो नास्ति । अशुच्यवस्थानदोषः स्यादेव । अशक्तौ नाशुचित्वदोषोऽपि । मुख्यकाले शुद्ध्यभावे गौणकाले शुद्धौ कर्म्माधिकारः स्यादेव । मुख्यकालेऽसन्निहिताग्नेर्गौणकालेऽग्निहोत्रवत् । यथा च शौचस्य [1]वैदिककर्म्मत्वेऽपि जननाद्यशौचेऽपि कर्त्तव्यत्वं तथा च तत्रैवोक्तम् ।

अथ द्विराचमननिमित्तानि ।

याज्ञवल्क्यः—

स्नात्वा पीत्वा क्षुते सुप्ते भुक्ते रथ्योपसर्पणे ।
आचान्तः पुनराचामेत् [2]वासोऽपि परिधाय च ॥

आपस्तम्बः,—भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेत् । द्विः परिमृजेत् । सकृदुपस्पृशेत् । भोजनपूर्व्वाचमने द्विः परिमार्जननियमः । अन्यत्र द्विस्त्रिर्वा । ओष्ठस्पर्शनमत्र सकृदन्यत्र सकृत्

(१) C. विदितकर्म्म° ।

(२) B वासोऽन्यद्° ।

[1]त्रिर्वा । पैठीनसिः,—कलिलकासश्वासापगमे रथ्याचत्वरश्मशानाक्रान्तेष्वाचान्तः पुनराचामेत् । कलिलं कठिनं श्लेष्म । श्वासो व्यायामादिकाले [2]विकृतः । चत्वरं [3]भृत्यादीनां बलिदानस्थानम् । शङ्खलिखितौ,—मूत्रपुरीषष्ठीवनादिषु शुक्तवाक्याभिधानेषु पुनरुपस्पृशेत् । शुक्तं परुषम् । आदिपदं शुक्रोत्सर्गस्याप्युपलक्षणम् । द्विराचमनाधिकारे वशिष्ठः,—

ओष्ठौ संस्पृश्य च तथा यत्र स्यातामलोमकौ ।

स्नानम् । पानम् । क्षुतम् । श्वासः । भोजनान्तः । रथ्योपसर्पणम् । वस्त्रपरिधानम् । भोजनारम्भः । कठिनश्लेष्मत्यागः । कासः । विकृतश्वासः । चत्वराक्रमणम् । श्मशानाक्रमणम् । मूत्रोत्सर्गः । पुरीषोत्सर्गः । ष्ठीवनम् । शुक्रोत्सर्गः । परुषवाक्याभिधानम् । इत्यष्टादश द्विराचमननिमित्तानि । शुद्ध्यर्थे नैमित्तिके च यथासम्भवम् । [4]तत्र द्विराचामेदिति द्वित्वविधौ विधेस्त्वंशविशिष्टभावनाविषयत्वादितिकर्त्तव्यताया अपि द्वित्वं विधीयत इतीन्द्रियस्पर्शनमपि द्विः कर्त्तव्यमित्याहुः । वस्तुतो विधेर्भावनाविषयत्वेऽपि द्विराचामेदित्यत्रेतिकर्त्तव्यतांशस्याश्रवणेन धात्वर्थ[5]मात्रोपदेशेनैव द्वित्वविधिः । न चाचमनानुवादेन द्वित्वविधावाचमनेऽङ्गसाहित्यमुद्दिश्य विशेषणं विवक्षार्हम् । तथा च सति न तौ पशौ करोतीत्याज्यभागनिषेधस्य पश्वङ्गपुरोडाशे प्रसङ्गात् ।

(१) D. द्विर्वा ।

(२) A. B. C. विस्तृतः ।

(३) A. भूपादीनां° ।

(४) D. अत्र ।

(५) D. मात्रोद्देशेनैव° ।

किञ्च यथाथर्व्वणादौ काम्या इष्टयस्ता उपांशु कर्त्तव्या न तौ पशौ करोति। दीक्षाः सोमस्य दक्षिणाः सौमस्येत्यादौ सर्व्वत्रेतिकर्त्तव्यताकप्रधानभावनायां विध्यन्वयेऽङ्गानामप्युपांशुत्वमाज्यभागनिषेधो दक्षिणासम्बन्धश्च स्यादिति तत्तदधिकरणविरोधः। ननु चाचान्तः पुनराचामेदिति क्तप्रत्ययस्य क्रियोपरमवाचित्वे [1]साङ्गाचमनक्रियोपरमवतः पुनराचमने कर्त्तृत्वविधानात् पूर्व्वाचमनस्येन्द्रियस्पर्शादिसमाप्तावेव पुनराचमनं विधीयत इति चेत् न क्तदन्तानां भावनानभिधायित्वेन [2]धात्वर्थापवर्गविशिष्टस्यैव कर्त्तृत्वात्। नह्यभिषुत्य हुत्वा भक्षयतीत्याद्यभिषवहोमकर्त्तुर्भक्षणविधानेऽपि साङ्गहोमभावनोत्तरं भक्षणम्। किन्तु होमाभिषवधात्वर्थमात्रोत्तरत्वेन विध्युपपत्तावर्थाक्षिप्तभावनोत्तरत्वं न विधीयते। यत्त्वग्निं चित्वा सौत्रामण्या यजेतेत्यत्र साङ्गाभिनिवृत्तिः शब्दार्थस्तत्राग्निमिति द्वितीयाश्रुत्या चयनसंस्कार्य्यत्वमग्निस्थलस्य ज्ञातमिति साङ्गादेव संस्कारोत्पत्तेस्तथात्वम्। एवमाहिताग्निर्नानृतं वदेदिति कर्म्मणि निष्ठाप्रत्ययात् साङ्गाधाननिवृत्तिः शब्दार्थः। यत्तु दीक्षितधर्म्माणां साङ्गदीक्षापवर्गेऽनुष्ठानमिति तत्र [3]दीक्षितत्वस्यालौकिकसंस्काररूपत्वात् साङ्गक्रियोपरम एव तत्संस्कारादिति विशेषः। नाचान्तत्वमलौकिकं मानाभावात्। किञ्च तथा सति पादप्रक्षालनमप्यावर्त्तेत। न च वहिः-

(१) A. B. C. आचमन ०।

(२) C. धात्वर्थापसर्गविशिष्ट ०। D. धात्वर्थापवर्गविमर्षमात्रविशिष्ट ०।

(३) D. दीक्षितत्वस्य लौकिक ०।

प्रयोगाङ्गत्वादनावृत्तिः। तथात्वेऽपि भावनान्तर्गतत्वेन द्विरावृत्तिविधौ तत् तत्रानुपपत्तेरिति। देवलः,—

रेतोमूत्रशकृन्मोक्षे भोजनेऽध्वपरिश्रमे।
शौचमेवंविधं प्रोक्तमीषच्चान्यत्र वर्त्तते॥

[1][शौचमाचमनम्।] रेतोमूत्रशकृन्मोक्षे भोजनाध्वगमनेषु यथोक्त[2]सर्व्वाङ्गोपेताचमननियमः। उक्तपञ्चनिमित्तादन्यत्र किञ्चिदङ्गसहितानुष्ठानेऽप्यवैगुण्यम्। यद्यपि नित्यत्वेन यथाशक्त्यङ्गोपसंहारः सिद्ध एव तथापि वचनात् शक्तिकृताङ्गहानेऽप्यवैगुण्यम्। केवलम्,—

शिरः प्रावृत्य कण्ठञ्च मुक्तकच्छशिखोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्॥

इति व्यासवचनात्। तथा,—विना यज्ञोपवीतेन, वहिर्जानुरेकहस्तार्पितैर्जलैः सोपानत्कस्तिष्ठन्नैव शुद्धिमवाप्नुयादिति भविष्यपुराणादिति।

कांस्येनायसपात्रेण त्रपुसीसकपित्तलैः।
आचान्तः शतकृत्वोऽपि नैव शुद्धिमवाप्नुयात्॥

इति च। एतेषामङ्गानां सर्व्वत्रावश्यकत्वमित्याहुः। अङ्गानाचरणनिन्दाया अर्थवादत्वेन कथमेवमिति विचारणीयम्। [इतराङ्गाणां शक्तावपि त्यागो बद्धशिखत्वादीनामशक्तौ त्यागेन दोष इति वा।][3]

(१) D. Omits the portion bracketed. (२) A. B. C. सर्व्वाङ्गाचमन ०।

(३) B. D. Omit the portion bracketed.

अथाचमनानुकल्पाः।

आपस्तम्बः,—स्वप्ने क्षवथौ [1]सिंहाणिकालम्भे लोहितस्य केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चालम्भे महापथं गत्वा[2][ऽमेध्यञ्चोपस्पृश्याप्रयतं मनुष्यं नीवीञ्च परिधाय अप उपस्पृशेत् [3]आर्द्रं वा शकृत् ओषधिं भूमिं वा। उक्तनिमित्तेष्वाचमनासम्भवे आर्द्रगोमयस्पर्शनम्। तदभावे आर्द्रतृणस्पर्शनम्। पराशरः,—

क्षुते निष्ठीविते चैव दन्तश्लिष्टे तथानृते।
पतितानाञ्च सम्भाषे दक्षिणं श्रवणं स्पृशेत्॥
प्रभासादीनि तीर्थानि] गङ्गाद्याः सरितस्तथा।
विप्रस्य दक्षिणे कर्णे सन्तीति मनुरब्रवीत्॥
आदित्यो वरुणः [4]सोमो वायुरग्निस्तथैव च।
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः॥

एतद्वाक्यशेषात् सर्व्वत्राचमननिमित्ते दक्षिणकर्णस्पर्शनमनुकल्पः। [5]एषु निमित्तेष्ववश्यमनुकल्परूपणमिति वाक्यान्तरेणाचमनस्यैव विधानात्। दन्तश्लिष्टेचाचमनविध्यभावात् कर्णस्पर्शनं मुख्यम्।

---

(१) D. सिंहाणिकाश्रुलम्भे ०।

(२) D. Omits the portion bracketed.

(३) B. आर्द्रञ्च वा शकृत् ०।

(४) B. C. D. ० सोमः अग्निर्वायुस्तथैव च।

(५) A. B. C. एषु च निमित्तेष्ववश्यमनुकल्परूपमिति वाक्यान्तरेणाचमनस्यैव विधानात्। दन्तश्लिष्टेत्वाचमनविधानाभावात् कर्ण ०

मार्कण्डेयपुराणे,—

क्षुत्वा निष्ठीव्य वासश्च परिधायाचमेद् बुधः।
कुर्य्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम्॥
कुर्व्वीतालम्भनं [1]वापि दक्षिणश्रवणस्य च[2]।
अविद्यमाने पूर्व्वोक्ते उत्तरप्राप्तिरिष्यते॥

क्षुतष्ठीवनवस्त्रपरिधानेषु प्रथमकल्प आचमनम्। तदसम्भवे गोपृष्ठस्पर्शनम्। तदसम्भवे सूर्य्यदर्शनम्। तस्याप्यसम्भवे दक्षिणकर्णस्पर्शनमिति। [3][यत्तु] स्मृत्यन्तरे,—

गङ्गा वै दक्षिणे कर्णे नासिकायां हुताशनः।
[4]उभावपि च स्पृष्टव्यौ तत्क्षणादेव शुद्ध्यति॥

इति तदुक्तनिमित्तादन्यत्राचमनानुकल्परूपमित्याहुः।

क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने।
कर्म्मस्थ एषु नाचामेद् दक्षिणं श्रवणं स्पृशेत्॥

इति रत्नाकरलिखितवाक्यात् कर्म्ममध्ये एषु नाचमनं कर्णस्य स्पर्शनं [5]मुख्यकल्पः।

---

(१) D. ० चापि ०।

(२) A. D. ० तु।

(३) D. Omits the portion bracketed.

(४) B. उभावपि तु ०।

(५) D. अनुकल्पः।

अथाचमनापवादाः ।

अत्राङ्गिरसौ,—

मधुपर्के च सोमे च अप्सु प्राणाहुतिषु च ।
नोच्छिष्टस्तु भवेद् विप्रो यथात्रेर्वचनं तथा ॥

अत्राप्स्वेति प्राणाहुतिसाहचर्य्यादापोशानविषयमिति लक्ष्मीधरः । तदन्यजलपाने [1]त्वाचमनम् । शातातपः,—

दन्तलग्ने फले मूले भच्यस्नेहे तथैव च ।
ताम्बूले चेक्षुदण्डे च नोच्छिष्टो भवति द्विजः ॥

फले मुखशुद्ध्यर्थे कटुतिक्तकषायादौ । [2]अत्र शुद्ध्यर्थमाचमनं नास्ति । नैमित्तिकं स्यादेव । अतएव भट्टाः,—परस्परस्पृष्टताम्बूलभक्षणं तदवसानानाचमनञ्च दुराचार इत्याहुः । गौतमः,—दन्तश्लिष्टे दन्तवदन्यत्र जिह्वाभिमर्षात् । प्राक्च्युतेरित्येके । च्युतेरास्राववन्निगिरन्नेव तत् शुचिः । अत्र च जिह्वाभिमर्षणात् यावज्जिह्वया दन्तेभ्यो भेदो नोपलभ्यत इत्यर्थः । सत्यपि जिह्वाभिमर्षणे यावन्न च्यवते तावत् शुचिरित्येके मन्यन्ते । च्युतेरास्राववत् लालावत् । निगिरन्नेव तत् शुचिः । देवलः,—

भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत् ।
दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत् ॥

वशिष्ठः,—न श्मश्रुगतलेपः । अशुचिरित्यर्थः । तथा,—यच्चाप्यन्तर्मुखे आचान्तस्यावशिष्टं निगिरन्नेव तत् शुचिः । आचा-

(१) D. ऽप्याचमनम् ।
(२) D. मुखशुद्ध्यर्थे अत्राचमनं नास्ति ।

न्तस्य यदवशिष्यते मुखे दन्तलग्नातिरिक्तमपि तदपि निगिरन्नेव शुचिरित्यर्थः । पैठीनसिः,—भूमिगता विन्दवः परामृष्टाः पूताः । विप्रुषः शुद्धाः । द्वौरोमक्लिन्नेष्वाचामेत् । विन्दवः आचमनविन्दवः । परामृष्टाः स्पृष्टाः । पूता [1]नाप्रयत्यहेतवः । अङ्गे पतिता अपि रोमद्वयार्द्रभावमापादयितुं समर्था एवाचमननिमित्तं भवन्ति । याज्ञवल्क्यः,—

मुखजा विप्रुषो मेध्यास्तथाचमनविन्दवः ।
श्मश्रु चास्यगतं दन्तश्लिष्टं त्यक्त्वा ततः शुचिः ॥

मनुः,—

स्पृशन्ति विन्दवः पादौ य आचामयतः परान् ।
भूमिगास्ते समाज्ञेया न तैरप्रयतो भवेत् ॥

बृहस्पतिः,—

प्रचरन्नन्नपानेषु यदोच्छिष्टमुपस्पृशेत् ।
भूमौ निधाय तद् द्रव्यमाचान्तः प्रचरेत् पुनः ॥
अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि ।
कृत्वा मूत्रपुरीषन्तु द्रव्यहस्तो न दूष्यति ॥
शौचन्तु प्रथमं कुर्य्यात् पादौ प्रक्षालयेत् ततः ।
उपस्पृश्य तदभ्युक्ष्य गृहीतं शुचितामियात् ॥

मनुः,—

उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथञ्चन ।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥

(१) D. नाप्रत्ययहेतवः ।

इदमन्नव्यञ्जनादिव्यतिरिक्तद्रव्यविषयमिति विश्वरूपः।

इत्यग्निचिद्-वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे

[1]आचमनकल्पः।

दन्तधावनम्।

वृद्धशातातपः,—

मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद् दन्तधावनम्॥

अत्र भक्षयेदिति पूर्ब्बोत्तराचमनरूपभक्षणधर्म्मप्राप्त्यर्थमिति लक्ष्मीधरः। यद्यपि भोजनस्य दृष्टार्थस्याचमनं नाङ्गं [2]तथाप्यदृष्टार्थप्राणाहुत्यङ्गत्वादतिदेशः। छन्दोगपरिशिष्टे,—

नारदाद्युक्तवार्क्ष्यमष्टाङ्गुलमपाटितम्।
सत्वचं दन्तकाष्ठं स्यात् तदग्रेण प्रधावयेत्॥
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः।
परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम्॥
आयुर्बलं यशो वर्च्चः प्रजापशुवसूनि च।
ब्रह्म प्रज्ञाञ्च मेधाञ्च त्वं नो धेहि वनस्पते॥

(१) B. आचारकल्पः। D. आचमनानुकल्पः।
(२) C. तथापि दृष्टार्थ ०।

नारदेति नारदशिक्षाग्रन्थोक्तवृक्षसम्भवम्। नारदः,—

आम्रपालाशबिल्वानामपामार्गशिरीषयोः।
वदरस्य कदम्बस्य करवीरकरञ्जयोः॥
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः।

[1]नरसिंहपुराणे,—

खदिरश्च करञ्जश्च कदम्बश्च वटस्तथा।
तिन्तिड़ी [2]वेणुपृष्ठञ्च आम्रनिम्बौ तथैव च॥
अपामार्गश्च बिल्वश्च अर्कश्चोदुम्बरस्तथा।

तथा,—

अष्टाङ्गुलेन मानेन तत्प्रमाणमिहोच्यते।
प्रादेशमात्रमथवा तेन दन्तान् विशोधयेत्॥

विष्णुः,—न दक्षिणापराशामुखः। उदङ्मुखः प्राङ्मुखो वा। वटाशनार्क-खदिरकरञ्ज-करवीर-सर्ज्जारिमेदापामार्गमालतीवकुल-कुरुविन्दानामन्यतमं कषायं कटुतिक्तं वा कनीनिकास्थौल्यं सकूर्च्चं द्वादशाङ्गुलं

प्रातर्भुक्त्वा च यतवाक् भक्षयेद् दन्तधावनम्।

हारीतः,—काले पालाशकोविदारश्लेष्मातकतिल्वकशाकवृक्ष-शिखण्डीवेणुवर्जम्। प्लक्षमासकवदरीकरञ्जशम्यशनकानीत्येके। दधित्थहरीतक्यश्वकर्णशालाशनकानीत्यपरे। बिल्वखदिराम्र-पालाशशिरीषापामार्गाणामेकतममनार्द्रं नातिशुष्कं नातिस्थूलमा-

(१) C. D. नारसिंह ०।
(२) C. ० वेणुवेत्रञ्च आम्रबिल्वौ तथैव च।

पोथिताग्रमनोष्ठग्रन्थ्युदङ्मुखो वाग्यत आसीनो दन्तकाष्ठं भक्षयेत्। काले उषःकाले। तिल्वकः बिल्वकः। शाकवृक्षः शागवन इति प्रसिद्धः। शिखण्डी मयूरशिखा। दधित्थः कपित्थः। एके अपरे इत्युभयत्रापि [1]वर्जयित्वेति शेषः। पलाशः आम्रातकवृक्षः। आर्द्रं सद्यश्छिन्नं ततोऽन्यदनार्द्रम्। आपोथिताग्रमीषच्चूर्णिताग्रम्। अनोष्ठग्रन्थि दन्तधावनकाले ओष्ठसमीपग्रन्थिरहितम्। विष्णुः,—न पालाशं दन्तधावनं स्यात्। न श्लेष्मातकारिष्टविभीतकधवधन्वनवर्ज्यम्। न कोविदारशमीपीलुपिप्पलेङ्गुदगुग्गुलवर्ज्यम्। बन्धुकनिर्गुण्डीतिलतिलुकवर्ज्यम्। न पारिभद्राम्लिकामोचशाल्मलीषणवर्ज्यम्। न मधुरम्। नार्द्रं नोर्द्ध्वशुष्कम्। न शुषिरम्। न पूतिगन्धम्। न पिच्छिलम्। दन्तकाष्ठं भक्षयेदित्यर्थः। धन्वनः धमनः। पीलुः गुड़फलः। पारिभद्रः पालघोणा इति प्रसिद्धः। अम्लिका तिन्तिड़ी। ऊर्द्ध्वशुष्कं वृक्ष एव शुष्कम्। शुषिरं छिद्रयुक्तम्। अशनः अशन इति प्रसिद्धः। महाभारते,—

प्रक्षाल्य हस्तौ पादौ च मुखञ्च सुसमाहितः।
दक्षिणं बाहुमुद्धृत्य कृत्वा [2]जान्वन्तरालतः॥
क्षीरिणो वृक्षगुल्माद्या भक्षयेद् दन्तधावनम्।
त्यज्यं सपत्रमज्ञात[3]मूर्द्ध्वशुष्कञ्च पाटितम्॥

(१) D. वर्जयित्वेत्यर्थः।
(२) D. ० जान्वन्तराद्वतः।
(३) A. ० मूर्द्ध्वशुष्कमपाटितम्।

त्वग्विहीनं ग्रन्थिमुखं तथा पालाशशींशपम्।
ऋजु वितस्तिमात्रञ्च कीटाग्निभिरदूषितम्॥

विद्याकरपद्धतौ,—

गुवाकस्तालहिन्तालौ तथा ताड़ी च केतकी।
खर्जूरं नारिकेलञ्च सप्तैते तृणराजकाः॥
तृणराजपलाशैश्च न कुर्य्यात् दन्तधावनम्।

तथा,—

इष्टकालोष्टपाषाणैर्नखैरङ्गुलिभिस्तथा।
मुक्त्वा चानामिकाङ्गुष्ठौ वर्जयेद्दन्तधावनम्॥

उशना,—नाङ्गुलीभिर्दन्तान् प्रक्षालयेत्। अत्र ये क्षीरिणः कण्टकिनः प्रतिषिध्यन्ते तत्र विहितनिषेधे विकल्पापत्तेः पर्य्युदासः। एवं तिक्तकटुकषायाणां येषां निषेधस्तेषां पर्य्युदासः। तेनैतेषां निषेधाभावाद् विहितासम्भवे प्रतिनिधित्वेनोपादानम्। ये तु न क्षीरिणो न कण्टकिनो न तिक्तकटुकषाय[1]सुगन्धिनस्तेषां प्राप्त्यभावात् प्रतिनिधित्वेन प्राप्तानां प्रतिषेधः। यथा व्रीहियवविधानादेव माषनिवृत्तौ [2]अयज्ञिया माषा इति निषेधः प्रतिनिधि प्राप्तिविषयः। [3]तेनैषां न प्रतिनिधित्वेनापि ग्रहणम्। पालाशे तु विशेषतः

आसनं शयनं यानं पादुके दन्तधावनम्।
वर्ज्जयेद् भूतिकामस्तु पलाशं नित्यमाप्तवान्॥

(१) A. D. ० ‸गन्धय ०।
(२) D. अयज्ञिया वै माषा ०।
(३) D. तेनैतेषां ०।

आसनादिसाहचर्य्यात् कषायचीरित्वेऽपि न पर्य्युदासः। किन्तु निषेध एवेति न प्रतिनिधित्वमपि। पारस्करः,—दन्तप्रक्षालनादीनि नित्यमपि अन्नाद्यायेतिमन्त्वस्तु न दन्तधावनाङ्गम्। छन्दोगपरिशिष्टे तु परिजप्य च मन्त्रेणेति काष्ठसंस्कारत्वेन मन्त्रजपविधिरिति भिन्नार्थत्वाद् द्वयोः समुच्चयः। विष्णुः,—

प्रक्षाल्य भंक्त्वा तज्जह्यात् शुचौ देशे प्रयत्नतः।

महाभारते,—

प्रक्षाल्य च शुचौ देशे दन्तधावनमुत्सृजेत्।
पतितेऽभिमुखे सम्यक् भोज्यमाप्नोत्यभीप्सितम्॥
ऐश्वर्य्यभङ्गमाप्नोति क्षिप्ते तदशुचौ भुवि।

नरसिंहपुराणे,—

प्रतिपद्दर्शषष्ठीषु नवम्याञ्चैव सत्तमाः।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम्॥
अलाभे दन्तकाष्ठस्य प्रतिषिद्धे तथा दिने।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्भविष्यति॥

अत्र दन्तकाष्ठकार्य्ये मुखशुद्धौ गण्डूषविधाने परिधौ पशुं नियुञ्जीतेति यूपकार्य्ये पशुनियोजने परिधिविधौ [1]पशुयूपनिवृत्तिवत् [2][दन्तकाष्ठनिवृत्तौ प्रतिपदादितिथिषु दन्तकाष्ठनिन्दा गण्डूषप्ररोचनार्था। न च प्रतिषिद्धे दिने इति वचनात् प्रतिषेध एवायम्। अर्थान्निवृत्तौ प्रतिषेधवैयर्थ्यात्। [3]गिरा गिरेति ब्रूयादैरं कृत्वोदेय-

(१) C. यूपनिवृत्तिवत्।

(२) C Omits the portion bracketed.

(३) A. निगिरा •।

मिति गिरापदविधानादेव गिरापदे निवृत्ते गिरापदनिषेधस्यार्थवादत्ववत्।] तेन संक्षेपेणार्थवादोक्ततिथिचतुष्टयानुवादार्थं प्रतिषिद्धपदम्। न च मुख्यार्थदन्तधावने काष्ठनिषेधपरमिदं वचनम्। नित्यदन्तधावनप्रकरणे बाधापत्तेः। [1]यदि तु,—

कुहूषष्ठ्योर्नवम्याञ्च पत्रादौ दन्तधावनम्।
पर्णैरन्यत्र काष्ठैः स्याद् जिह्वोल्लेखः सदैव हि॥

तत्र पत्राणां धावनसाधनत्वं गण्डूषेण सह [2]वैकल्पिकमुच्यते। तत्र व्यक्तं काष्ठस्यान्यदिनविषयत्वं न निषेधः। तेन प्रतिपदादिषु काष्ठेनापि सुखार्थदन्तधावने भोजनोत्तरादृष्टार्थदन्तधावने वा न कश्चिद्दोषः। यच्च महाभारते,—

भक्षयेच्छास्त्रदृष्टानि पर्व्वस्वपि च वर्जयेत्।

इति [3]तत्रायं पञ्चपर्व्वसु शास्त्रदृष्टानीतिपदोक्तकाष्ठानां प्रतिषेध इति। न दन्तधावनप्रतिषेधः। तेन पर्व्वसु गण्डूषैरेव मुखशुद्धिः। प्रतिषिद्धे तथा दिन इति [4]नरसिंहपुराणे स्मृत्यन्तरोक्तप्रतिषिद्धदिनस्यापि ग्रहणात्। यद्यपि स्मृत्यन्तरे,—

श्राद्धे जन्मदिने चैव विवाहे मुखदूषिते।
व्रते चैवोपवासे च वर्जयेद् दन्तधावनम्॥
न भक्षयेद्दन्तकाष्ठमेकादश्यां नरेश्वर।
आदित्यदिवसे चैव तस्मादेनो महद् भवेत्॥

(१) A. यत्तु ◦ D. यदि,—कुहू ◦।

(२) A. ◦ विकल्प ◦ D. ◦ वैकल्प ◦।

(३) A. D. तत्रापि ◦।

(४) D. नरसिंहपुराणोक्तस्मृत्यन्तरोक्त ◦।

इत्यत्रापि कर्म्माङ्गत्वेन दानहोमादिप्रतिषेधवत् श्राद्धाद्यङ्गत्वेन दन्तधावनं काष्ठकरणकं प्रतिषिद्ध्यत [1]इति वचनविहितनिषेधे विकल्पापत्तिभयेन सुखार्थदन्त[2]धावनस्य निषेधकल्पना। अतएव,—

व्रतोपवासदिवसे खादित्वा दन्तधावनम्।
गायत्रीशतसंपूता अपः प्राश्य विशुद्ध्यति॥

इति कर्म्माङ्गभ्रंशत्वे प्रायश्चित्तम्। एवञ्च भोजनोत्तरदन्तधावनस्यापि तत्र निषेधः। सुखार्थदन्तधावनस्य भोगत्वादेव निषेधः। सर्व्वभोगविवर्जित इति वचनात्। अत्र दन्तधावनस्य प्रायत्याख्यकर्म्माधिकारसम्पादकादृष्टसिद्ध्यर्थत्वात् तदङ्गानां तदुपकारकत्वात् तद्भ्रंशे वैगुण्यं नाधर्म्मः। नित्यकर्म्मान्तरवदशक्तिकृताङ्गहानेऽपि फलोदयात्। एवमाचमनाङ्गानामपीत्युक्तम्। तद्विधिः,—प्राङ्मुखतयोदङ्मुखतया वोपवेशनम्। हस्तपादमुखक्षालनम्। आचमनम्। जान्वन्तःस्थदक्षहस्तेन दन्तकाष्ठधारणम्।

आयुर्बलं यशो वर्च्चः प्रजापशुवसूनि च।
ब्रह्म प्रज्ञाञ्च मेधाञ्च त्वं नो धेहि वनस्पते॥

इति काष्ठाभिमन्त्रणम्।

अन्नाद्याय व्यूहध्वं सोमो राजा यमागमत्।
स मे मुखं प्रमार्क्ष्यते यशसा च [3]बलेन च॥

---

(१) A. D. इति च विहित ० D. इति च विहितप्रतिषेधे विक ०।

(२) D ० धावन इत्यस्य निषेधकल्पना।

(३) A. ० भगेन च।

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1078.



नित्याचारप्रदीपः ।

NITYĀCĀRA-PRADĪPAḤ

BY

NARASIMHA VĀJAPEYĪ.

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬACĀRYYA.

FASCICULUS IV.

CALCUTTA:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1904.

Pariçiṣta Parvan, (Text) Fasc. 1--5 @ /6/ each	Rs. 1	14
Prākrita-Paingalam. Fasc. 1--7 @ /6/ each	2	10
Prithivirāj Rāsa. (Text) Part II, Fasc. 1--5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol III, Fasc. 1--6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1--3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. 1, Fasc. 5--10 ; II, 1--6 ; III, 1--7 ; IV, 1--6 ; V, 1-8, @ /6/ each Fasc.	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1--4 @ /6/ each	1	8
Ditto (English) Fasc. 1--3 @ /12/ each	2	4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/ each	0	12
Sraddha kriyā kaumudī, Fasc. 1-5 @ /6/	1	14
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each	1	2
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1--19 @ /6/ each	7	2
Tantravarteka (English) Fasc. 1	0	12
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1--12 @ /6/ each	14	10
Tattvarthadhigama Sutram Fasc. 1	0	6
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/	1	2
Tul'si Sat'sai, (Text) Fasc. 1--5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each ...	2	4
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ /12/	4	8
Vallāla Caritam Fasc 1-- Text only	0	8
Varāha Purāṇa, (Text) Fasc. 1--14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc 1--5 @ /6/ each	1	14
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--7, @ /6/ each	4	8
Vidhan Parijata, Fasc. 1--4	1	8
Viṣṇu Smṛti, (Text) Fasc 1--2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1--7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1--6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1--6	2	4
Tibetan Series.		
Pag-Sam Ṭhi S'iñ, Fasc. 1--4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1--5 ; Vol. II, Fasc. 1--3 ; Vol. III, Fasc. 1--5, @ 1/ each	13	0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1--5 ; Vol. II. Fasc. 1--5 @ 1/ each	10	0
Arabic and Persian Series.		
'Ālamgīrnāmah, with Index, (Text) Fasc. 1--13 @ /6/ each	4	14
Al-Muqaddasi (English) Vol. I, Fasc 1--3 @ /12/	2	4
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, Fasc. 1--5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc 1--37 @ 1/ each	37	0
Ditto (English) Fasc. 1--8 @ 1/ each	8	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1--19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1--21 @ 1/ each	21	0
Farhang-i-Rashīdi, (Text) Fasc. 1--14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1--4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1--9 @ /6/ each	3	6
Ditto of Āzādi, (Text) Fasc. 1--4 @ /6/ each	1	8
Haft Asmān, History of the Persian Masnavi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1--6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngirī, (Text) Fasc. 1--3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. III, Fasc 11-12 ; Index to Vol. II, Fasc. 10-12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1--5 @ /6/ each	1	14

*The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal.

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO., 46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
*Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5 @ 1/ each		10	0
Bāl Bhatta Fasc. 1 @ /6/ each		0	6
Bandhaya Banta Sutram Fasc. 1 @ /6/ each		0	6
*Bhāmatī, (Text) Fasc. 4-8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-4		1	8
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each		1	8
Bṛhaddharma Purāṇa (Text) Fasc. 1-6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1		0	6
Catadusani Fasc 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-2 ...		3	6
Çatasāhasrikā Prajnāpāramitā (Text) Fasc. 1 to 6 @ /6/ each ...		2	4
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each		19	14
Çlockavartika, (English) Fasc. 1-4		3	0
Çrāddha Kryā Kaumudī (Text Fasc 1-5 @ /6/ each		1	14
*Çrauta Sūtra of Āpastamba. (Text) Fasc. 4-16 @ /6/ each... ...		4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc 1-3 @ /6/ each		1	2
Dana kriyā kaumudī, Fasc 1-2 @ /6/		0	12
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-6		2	4
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1-6		2	4
Kātantra, (Text) Fasc 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc 1-9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each		4	2
Mahā-bhāṣya-pradipōdyōta, (Text) Vol. I, Fasc 1-9 II, Fasc. 1-10 @ /6/ each		7	2
Manuṭikā Sangraha, (Text) Fasc. 1-3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-7 @ /12 each		5	4
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1-3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1-4 @ /6/		1	8
*Nirukta, (Text) Vol. III Fasc. 1-6 Vol. IV, Fasc. 1-8 @ /6/ each ...		5	4
Nityācāra Paddhatiḥ (Text) Fasc. 1-7		2	10
Nityācārapradīpaḥ (Text) Fasc. 1-4		1	8
Nyayabinduṭīkā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-3 @ /6/ each		3	6
Padumawati Fasc. 1-3 @ 2/		6	0

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1-15 @ /6/ each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and Index; Vol. III, Fasc. 1 @ /12/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each		7	2
Ma'āṣir-i-' Ālamgīrī, (Text), Fasc. 1-6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc 1-2 @ /12/ each ...		1	8
Riyāẓu-s-Salāṭīn, (Text) Fasc 1-5 @ /6/ each		1	14
Ditto (English) Fasc. 1-3		2	4
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1-5 @ /6/ each		1	14
Ditto (English) Fasc. 1-14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1-7 @ /6/ each ...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1-6 @ /6/ each ...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wis-o-Rāmīn, (Text) Fasc. 1-5 @ /6/ each		1	14
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc 1-8 @ /6/ each ...		6	6
Tuzuk-i-Jahāngīrī, (Eng) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1170 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8) 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ...	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II, and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kasmir by M. A. Stein PH.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1-29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

22-5-04.

Books are supplied by V.P.P.

इति मन्त्रमुपांशु पठित्वा दन्तघर्षणम् । काष्ठं चालयित्वा भंक्त्वा सम्मुखशुचिदेशे पातनम् । काष्ठान्तरेण जिह्वोल्लेखः । तोयगण्डूषैर्बहुशो मुखचालनम् । आचमनम् । दन्तकाष्ठं प्रत्याम्नातत्वेन गण्डूषकरणे सकृदेवाभिमन्त्रणम् । न प्रतिगण्डूषम् । मन्त्रस्य साधनसंस्कारत्वाद् द्वादशसंख्यावच्छिन्नस्य गण्डूषस्य च साधनत्वात् । तत्र वनस्पतिपदस्य वृक्षपरस्य काष्ठे गौणत्वेऽपि साधनस्वरूपपरित्यागात् प्रकृतौ धान्यमसीति मन्त्रस्य तण्डुलपरत्वेऽपि तरसैमां समसीत्यूहवत् जलगण्डूष इत्यूहः कर्त्तव्यः । न च जपस्यार्थानपेक्षणान्मोहः । द्वितीयाश्रुत्या काष्ठस्य मन्त्रसंस्कार्य्यत्वादर्थज्ञानरूपदृष्टद्वारैव मन्त्रस्य काष्ठसंस्कारत्वम् । धावनमन्त्रस्त्वविकृत एव प्रयोक्तव्यः । अत्र चायुरादीनां फलत्वं यद्यपि मन्त्रवर्णात् कल्पितं तथापि मन्त्रस्य नित्यवदाम्नानात् तत्कामनाविरहेऽप्यनुष्ठानम् । तथा च षष्ठे,—तथा भक्ष्यप्रैषाच्छादनसंज्ञमहोमद्वेषमित्यत्राधिकरणे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म इति मन्त्रः द्वेष्याभावेऽपि नित्यवदाम्नानात् प्रयोक्तव्य इति । न च कामनाविरहेऽपि मन्त्रलिङ्गोक्तफलं किं न स्यादिति वाच्यम् । मन्त्रस्य [1]स्वयमप्रमाणत्वेन विध्यनुमानद्वारा तथात्वम् । विधिश्च प्रवर्त्तनारूपो नाकाम्यसाधने प्रवर्त्तयितुं शक्नोतीति कामनायां सत्यामेव फलम् । यथा मुमुक्षोरग्निहोत्राद्यनुष्ठानेऽपि न स्वर्गादिफलं कामनाविरहात् । यथा वा योगसिद्धौ फलान्तरस्य ।

---

(१) D. स्वयमप्रमाणत्वेऽपि न विध्यनु० ।

विष्णुपुराणे,—

स्वाचान्तश्च ततः कुर्य्यात् पुमान् केशप्रसाधनम् ।
आदर्शाञ्जनमाङ्गल्यदूर्व्वाद्यालम्भनानि च ॥

मनुः,—

मैत्रं प्रसाधनञ्चैव दन्तधावनमञ्जनम् ।
पूर्व्वाह्न एव कुर्व्वीत देवतानाञ्च पूजनम् ॥

देवीपुराणे,—

नेत्राञ्जनं निषेवेत्तु दन्तधावनपूर्व्वकम् ।

अत्र दन्तधावनानन्तरं केशप्रसाधनम् । तदनन्तरमञ्जनग्रहणम् । आदर्शादि पश्चात् । अञ्जनं सौवीराञ्जनमिति लक्ष्मीधरः । स्नातकधर्म्मत्वाच्च नित्यम् । अत्रैव वैद्यशास्त्रोक्ताञ्जनान्तरग्रहणमित्याहुः ।

इत्यग्निचिद्वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे
दन्तधावनप्रकरणम् । श्रीः ।

ततः सम्यगरुणकिरणदर्शने प्रातःस्नानम् । दक्षः,—

लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान् ।
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ॥
स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनम् ।

[1][तथा च—योगियाज्ञवल्क्यः,—]

अस्नात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन ।
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं शुभम् ।
सर्व्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम् ॥

दृष्टं मलापनयनद्वारा शुद्धिः । अदृष्टं नित्याचरणात् पापक्षयः ।

विष्णुः,—

स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्म्मणि ।
पवित्राणां तथा जाप्ये दाने च विधिचोदिते ॥
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्व्विचिन्तितम् ।
अम्भात्रेणाभिषिक्तस्य नश्यन्तीति च धारणा ॥

कालकर्णी दुःसहदुरिता बालविधवा । दुर्व्विचिन्तितं स्वानिष्टचिन्तनम् । अम्भात्रेण उद्धृतानुद्धृतसाधारणेन ।

याम्यं हि यातनादुःखं प्रातःस्नायी न पश्यति ।
नित्यस्नानेन पूयन्ते येऽपि पापकृतो जनाः ॥

शङ्खः,—

नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं षोढ़ास्नानं प्रकीर्त्तितम् ॥
अस्नातस्तु पुमान् नार्हो जप्याग्निहवनादिषु ।
प्रातःस्नानं तदर्थन्तु नित्यस्नानं प्रकीर्त्तितम् ॥

---

(1) A. D. Omit the portion bracketed.

छन्दोगपरिशिष्टे,—

यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः ।
दन्तान् प्रक्षाल्य नद्यादौ गृहे चेत् तदमन्त्रवत् ॥
अल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्म्मणः ।
प्रातर्न तनुयात् स्नानं होमलोपो विगर्हितः ॥

यथाहनीति मध्याह्नस्नाने कर्त्तव्यतानिर्देशः । दन्तान् प्रक्षाल्येति दन्तधावनस्य प्रायत्यार्थत्वात्

कृतार्थयोस्तु संयोगे देशकालोपलक्षणम् ।

इति दन्तधावनानन्तर्य्यं प्रातःस्नानस्योक्तम् । अनातुरः स्नानवर्द्धिष्णुरोगरहितः । गृहे चेदिति तत्प्रातःस्नानं यदि केनचिन्निमित्तेन गृहे क्रियते तदा स्नानाङ्गमन्त्ररहितम् । अन्तर्जलजपमन्त्रः स्यादेव । न च साङ्गस्नानस्य मन्त्रनिवृत्तिः कथञ्चनेति वाच्यम् । तच्छब्दवैयर्थ्यभयेन प्रधानमात्र[1]परामर्षितच्छब्देन प्रधानमात्रे मन्त्राधानविधेः । एवञ्च प्रातःस्नानं नद्यादौ गृहे वोद्धृतोदकेनेति विकल्पः । तथा च दक्षः,—सन्ध्यास्नानमुभाभ्यान्तु । सन्ध्यास्नानं प्रातःस्नानम् । उभाभ्यामुद्धृतानुद्धृताभ्याम् । प्रातर्न तनुयादिति प्रातःसंक्षेपविधिना स्नानं कुर्य्यात् । विस्तारे होमलोपप्रसङ्गादतिविस्तरनिन्दया संक्षेपस्तुतिः । तथा च व्यासः,—

प्रातःसंक्षेपतः स्नानं होमार्थं तद् विधीयते ।
मृन्मात्रविधिनिष्पाद्यं मध्याह्ने तत् सुविस्तरम् ॥

(1) D. ० परामर्षिततच्छब्देन प्रधानमात्रेण मन्त्राभावविधेः ।

अत्रापि होमार्थं तद्विधीयत इत्यर्थवादः । यथा जामिवा एतद् यज्ञे क्रियते यदन्यथैव पुरोडाशावुपांशुयाजमन्तरा यजतीति पुरोडाशद्वयनैरन्तर्य्यदोषसमाधानार्थत्वेनान्तरोपांशुयाजविधौ दोषसमाधानस्यार्थवादत्वेनैकपुरोडाशीया(ना)मप्युपांशुयाजप्रवृत्तिः ।

तथेह [1]होमार्थत्वस्यार्थवादत्वान्निरग्नेरपि प्रातः संक्षेपविधिः । न च वाक्यशेषेण साग्निविषयत्वनिर्णयः सन्देहाभावात् । एवञ्च प्रातःसंक्षेपविधिरेव । मध्याह्ने विस्तराशक्तस्य संक्षेपविधिः । एवं काम्येऽपि तीर्थस्नानादौ विस्तराशक्तस्य संक्षेपविधिरनुकल्पः । अनुकल्पस्याप्यतिदेशात् । अयन्तु विशेषः,—काम्ये विस्तरविधिसामर्थ्ये संक्षेपकरणे न फलम् । नित्ये तु विस्तरसामर्थ्येऽपि संक्षेपकरणे प्रत्यवायाभावः । किन्तु न पापक्षयरूपफलम् । प्रभुः प्रथमकल्पस्येत्यत्र दुर्म्मतेर्विद्यते फलमिति [2]फलाभावस्य कथनात् । तथा च स्मरन्ति,—

स्नातस्य वह्नितप्तेन तथैव परवारिणा ।
शरीरशुद्धिर्विज्ञेया न तु स्नानफलं लभेत् ॥

योगियाज्ञवल्क्यः,—

उषस्युषसि यत् स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥

उषस्यरुणोदये । सन्ध्यायां सूर्य्योदयात्प्राक् । एवञ्चोदिते

(1) D. होमार्थस्यार्थ ० ।

(2) C. फलाभावकथनात् ।

रवावित्यनुकल्पः। विष्णुः,—प्रातःस्नाय्यरुणकिरणग्रस्तां प्राचीमवलोक्य स्नायादिति। [अत्र च

य इच्छेद् विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥

इति विष्णूक्तं मासद्वयविहितं प्रातःस्नानम्। यच्च—

तुलामकरमेषेषु प्रातःस्नायी भवेन्नरः।

इति प्रातःस्नानम्। यच्च—

प्रातःस्नात्वा मुनिश्रेष्ठ शिवतीर्थेषु मानवः।
अश्वमेधफलं प्राप्य रुद्रलोकञ्च गच्छति॥

इति काम्यतीर्थस्नाम्। एवमादिषु प्रातःस्नाय्यरुणकिरणग्रस्तां प्राचीमवलोक्य स्नायादिति][1] विष्णुना सर्व्वतः स्नानोद्देशेनारुणोदयकालविधानात् प्रातःस्नानादूर्द्ध्वं सन्ध्यातः पूर्व्वमनुष्ठानम्। न तु काम्यस्नानं नित्यस्य बाधकं गोदोहचमसवदेकद्वारत्वाभावात्। दर्शपूर्णमासात् पूर्व्वप्रयुक्तप्रणयननिवृत्तिर्गोदोहचमसयोर्द्वारम्। तत्रावश्यमेकस्य बाध्यत्वमिति सावकाशदूरफलत्वाभ्यां चमसबाधः। नचेह तथा द्वारं किञ्चिदस्ति द्वयोरदृष्टार्थत्वात्। किञ्च प्रातःस्नानस्य शरीरशुद्धिद्वारा कर्म्माधिकारसम्पादकत्वात् काम्यस्नानान्तरस्यापि [2]प्रातःस्नानानन्तरमेव काल इति कालभेदान्न काम्यनित्यप्रातःस्नानयोस्तन्त्रेणानुष्ठानसम्भवः। न च—

(१) A Omits the portion bracketed.

(२) D. काम्यप्रातःस्नानाकरणे सूर्य्योदयावधिजपरूपसन्ध्यावध्यापत्तेः। सन्ध्यानन्तरमेव काल इति कालभेदान्न काम्यनित्यप्रातःस्नानयोस्तन्त्रेणानुष्ठानसम्भवः।

सन्ध्याहीनोऽशुचिर्विप्रो ह्यनर्हः सर्व्वकर्म्मसु।

इति वचनात् सन्ध्योत्तरं काम्यप्रातःस्नानप्रसङ्गः। सन्ध्यायाः सूर्य्योदयावधित्वात् सूर्य्योदयोत्तरकालीनकर्म्मणामेव सन्ध्योत्तरत्वाधिकारसम्पादकत्वात् सूर्य्योदयात् पूर्व्वं सन्ध्यां कृत्वा [काम्य][1] प्रातःस्नानकरणे सूर्य्योदयावधिजपरूपसन्ध्याबाधापत्तेः सन्ध्याहीनत्वेन सुतरामनधिकारः। नचाग्निहोत्रवन्निरवकाशत्वम्।

सन्ध्याकर्म्मावसाने × स्वयं होमो विधीयते।

इत्यादिवाक्यान्तराद्धोमस्य सन्ध्योत्तरत्व[2]वदिह तथावचनाभावेन सन्ध्याबाधकत्वाभावात् सन्ध्यातः पूर्व्वमेवानुष्ठानम्। नित्यकाम्याग्निहोत्रयोरेककर्म्मत्वात् स्वर्गार्थमग्निहोत्रकरणकालेऽग्निहोत्रकरणाभावस्य प्रत्यवायहेतोरभावात्। तत्कालेऽन्यकरणाभावाद्वा प्रत्यवायाभावो नतूपात्तदुरितक्षयरूपं नित्याग्निहोत्रफलं योगसिद्ध्यधिकरणविरोधादित्युक्तमेव। एवं माघस्नानमप्यनुदिते रवाविति पद्मपुराणवचनात् सन्ध्यातः पूर्व्वं प्रातःस्नानादूर्द्ध्वमनुष्ठानम्। यत्तु,—

कार्त्तिकं सकलं मासं [3]वह्निःस्नायी जितेन्द्रियः।
जपन् हविष्यभुग् दान्तः सर्व्वपापैः प्रमुच्यते॥

इति विष्णूक्तं काम्यस्नानम्। तस्य प्रातःकालविध्यभावात्

(१) D. Omits the portion bracketed.

(२) D. ० वदितरथा वचनाभावेन सन्ध्याबाधकत्वासम्भवात् ०।

(३) D. ० प्रातःस्नायी ०।

सन्ध्योत्तरं यदाकदाचिदनुष्ठानमिति [1]लक्ष्मीधरादयः। यदा तु,—

कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्द्दन ।

इति मन्त्रवर्णाच्छागो वा मन्त्रवर्णादितिन्यायेन प्रातःकाल अवधार्य्यते यदा (तदा) तस्यापि सन्ध्यातः पूर्व्वमरुणोदयेऽनुष्ठानमिति । यत्तु शङ्खेन,—

नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।

क्रियास्नानं तथा षष्ठं

इति स्नानषट्कमध्ये नित्यं प्रातःस्नानं कर्म्मार्हतापादकमुक्त्वा [2]क्रियास्नानमुक्तं

जप्तुकामः पवित्राणि अर्च्चिष्यन् देवतापितॄन् ।

स्नानं समाचरेद् यत्तु क्रियाङ्गं तत्प्रकीर्त्तितम् ॥

इति यदत्र कर्म्माङ्गत्वेन स्नानं पृथक् विहितमस्ति तस्यानुवाद इति सन्ध्योत्तरमेव तस्यानुष्ठानम् ।

नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।

तर्पणन्तु भवेत्तत्र अङ्गत्वेनेति निश्चितम् ॥

इति वचनान्नित्ये प्रातःस्नाने मध्याह्नस्नाने तर्पणं काम्यतीर्थादिस्नाने च। न तु क्रियाङ्गमलापकर्षणस्नानयोरिति । अतएव प्रातःस्नानमधिकृत्य मार्कण्डेयपुराणे,—

(१) D. लक्ष्मीधरः ।

(२ D. क्रियाङ्गस्नान ० ।

शिरः स्नातस्तु कुर्व्वीत दैवं पित्र्यमथापि वा ।

इत्यत्र प्रातःस्नाने काम्यस्नाने च मध्याह्नस्नानाङ्गत्वेन विहितानां नद्यादीनामेव स्नानदेशत्वमतिदेशात् । तथा च मध्याह्नस्नानदेशाः,—

नदीषु देवखातेषु तड़ागेषु सरस्सु च ।

स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥

देवखातपदं देवसम्बन्धित्वेन प्रसिद्धपरम् । यथा भुवनेश्वरे विन्दुह्रदः । तड़ागः सहस्रधन्वन्तरमितः सहस्रेण तड़ागः स्यादिति [1]वचनात् । सरांसीन्द्रद्युम्नाच्छोदप्रभृतीनि । गर्त्ताः,—

धनुःसहस्राण्यष्टौ च गतिर्य्यासां न विद्यते ।

न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ॥

इति छन्दोगपरिशिष्टोक्तलक्षणाः । शङ्खः,—

सरस्सु देवखातेषु तीर्थेषु च नदीषु च ।

स्नानमेव क्रिया यस्मात् स्नानं पुण्यफलं स्मृतम् ॥

स्नानमेव क्रियेति मध्याह्नस्नानषोढ़ास्नाने क्रियापदवाच्यत्वा[1]दित्यर्थः । याज्ञवल्क्यः,—

स्नायान्नदीदेवखातह्रदेषु च सरस्सु च ।

विष्णुः,—उद्धृताद् भूमिष्ठमुदकं पुण्यम् । स्थावरात् प्रस्रवणम् । तस्मान्नादेयम् । तस्मादपि साधुपरिगृहीतम् । सर्व्वत्र एव गाङ्गम् ।

(१) D. ० दित्याशयः ।

मार्कण्डेयः,—

भूमिष्ठमुद्धृतात् पुण्यं ततः प्रस्रवणोदकम्।
ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम्॥
तीर्थतोयं [1]ततः पुण्यं महानद्यम्बु पावनम्।
ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यस्ततोऽम्बुधिः॥

शङ्खः,—

सर्व्वे प्रस्रवणाः पुण्याः सर्व्वे पुण्याः शिलोच्चयाः।
नद्यः पुण्याः सदा सर्व्वा जाह्नवी च विशेषतः॥

भविष्यपुराणे,—

भास्करायतनाभ्यासे यत्तोयं पुरतः स्थितम्।
सूर्य्यगङ्गेति [2]तज्ज्ञेयं तत्र स्नात्वा दिवं व्रजेत्॥

तथा,—

शिवलिङ्गसमीपस्थं यत्तोयं पुरतः स्थितम्।
शिवगङ्गेति [3]तज्ज्ञेयं तत्र स्नात्वा दिवं व्रजेत्॥

[4]तथात्वाविशेषोपादानात् कृत्रिमस्यापि जलस्य सूर्य्यगङ्गात्वं शिवगङ्गात्वञ्च। अत्र [5]जलसामीप्यं पुरस्थत्वञ्च सूर्य्यगङ्गात्वं शिवगङ्गात्वञ्च। यत्तु,—

(१) A. ० महापुण्यम् ०।
(२) C. ० संज्ञेयं ०।
(३) C. ० संज्ञेयं ०।
(४) A. तत्राविशेषो ० D. अत्राविशेषो ०।
(५) C. जलसामीप्ये ०।

शिवलिङ्गसमीपस्था नद्यः सर्व्वाश्च भारत।
वापीकूपतडागाश्च शिवतीर्था इति स्मृताः॥

इति तत्रापि पुरस्थत्वं बोध्यं सामान्यस्य विशेषे उपसंहारात्। योगियाज्ञवल्क्यः,—

त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः।
समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः॥

एवं देव्यां त्रिंशत्सहस्रजलधिगतनदीस्नानमन्योन्यतुल्यम्। विद्याकरपद्धतौ,—

नदीस्नानमवाप्नोति स्नातः सेतुजलाशये।
बाहुखाते जले स्नातो गङ्गास्नानमवाप्नुयात्॥

अत्र नद्यादीनां स्नानाङ्गत्वेन विधानेऽपि त्रिरात्रफलदा इति संयोगपृथक्त्वेन गुणफलसम्बन्धः। खादिरो यूपो भवतीत्युक्तो खादिरं वीर्य्यकामस्येतिवत्। यद्यपि मध्याह्नस्नान एव गुणफलसम्बन्धो न तद्विकारे प्रातःस्नाने गुणफलस्यानतिदेशात्। तथापि भाष्यकारमते तस्मिंस्तु प्रवर्त्तमाने तदाश्रितः कामोऽपि प्रवर्त्तते इति नीत्या भवत्येव गुणफलम्। वार्त्तिककारमते नास्ति। अत्र यद्यपि स्नानञ्चाकृत्रिमे जल इत्यकृत्रिमस्य स्नानाङ्गत्वमुक्तं तथापि विष्णुना उद्धृताद् भूमिष्ठमुदकं पुण्यमित्यविशेषेण कृत्रिमाकृत्रिमसाधारणभूमिष्ठमात्रस्याङ्गत्वबोधनात्।

प्रभूते विद्यमाने वा उदके सुमनोहरे।
नाल्पोदके द्विजः स्नायान्नदीञ्चोत्सृज्य कृत्रिमे॥

इति याज्ञवल्क्यवचनात् नद्यादावपि प्रभूतोदकसम्भवे अल्पोदकस्य यथा नाङ्गत्वं [1]एवमकृत्रिमसम्भवे कृत्रिमस्य नाङ्गत्वम्। तेन स्नानञ्चाकृत्रिम इति नद्याद्यनुवादो न कृत्रिमनिषेधः। अतएव स्वकारिते तु न विरोध इति लक्ष्मीधरः। विष्णुः,--परनिपानेषु न स्नायात्। आचरेद् वा पञ्चपिण्डानुद्धृत्यापदि। आपदि जलान्तरासम्भवे। अत्र परनिपानपदं परकर्त्तृकनिपानपरम्। तथा च

मनुः,--

परकीयनिपानेषु न स्नायाद्धि कदाचन।
निपानकर्त्तुः [2]स्नात्वा तु दुष्कृतांशेन लिप्यते॥

योगियाज्ञवल्क्यः,—

परकीयनिपानेषु यदि स्नायात् कदाचन।
सप्तपिण्डान् समुद्धृत्य ततः स्नानं समाचरेत्॥

शङ्खलिखितौ,--स्नायात् तड़ागोदकनिपानकूपेषु सप्त पञ्च च त्रीन् पिण्डानुद्धृत्य देवपितॄंश्च तर्पयेत्। बौधायनः,--

स्रवन्तीष्वनिरुद्धासु त्रयो वर्णा द्विजातयः।
प्रातरुत्थाय कुर्व्वीरन् देवर्षिपितृतर्पणम्॥
निरुद्धासु न कुर्व्वीरन्नंशभाक् तत्र सेतुकृत्।
तस्मात् परकृतान् सेतून् कूपांश्च परिवर्जयेत्॥

(१) D. एवमकृत्रिमजलसम्भवे ०।
(२) D. ० स्नानात्तु ०।

उद्धृत्य वापि त्रीन् पिण्डान् कुर्य्यादापत्सु नो सदा।
निरुद्धासु तु मृत्पिण्डान् त्रींस्त्रीनम्बुघटांस्तथा॥

अत्रेयं व्यवस्था,—परकृततड़ागेषु शङ्खलिखितयोगियाज्ञवल्क्यवचनाद्वा सप्तपिण्डोद्धरणम्। कूपतड़ागातिरिक्तपरकृतजलाशये शङ्खलिखितविष्णुयाज्ञवल्क्यवचनैः पञ्चपिण्डोद्धरणम्। [1][परकृतकूपेषु पिण्डत्रयोद्धरणम्] [2]प्रवाहसेतुकरणेन जलाधिक्यं यत्र तत्र मृत्पिण्डत्रयोद्धरणम्। अम्बुघटत्रयोद्धरणञ्च। अत्र च,—

चतुर्विंशाङ्गुलैर्हस्तैश्चतुर्भिर्धनुरुच्यते।
एकधन्वादितुर्य्यान्तं कूपमानमुदाहृतम्॥
शतधन्वन्तरा वापी पुष्करिणी चतुर्गुणा।
सहस्रेण तड़ागः स्यादयुतेन तु सागरः॥

इत्युक्तलक्षणाः कूपादयः। एवं परकृतेषूत्सृष्टेष्वनुत्सृष्टेषु निषेधपिण्डोद्धरणे। इह च निपानकर्त्तुर्दुष्कृतांशभागित्वदोषस्यार्थवादत्वं परकृतनिपानस्नानाङ्गत्वेन पिण्डोद्धरणं विधीयते। [3]अत्र दानदोषजलोदरकीर्त्तनस्य वारुणचतुःकपालविधिप्ररोचनार्थवदित्याहुः। वस्तुतो मनुना स्नानप्रकरणाद् वहिरेव स्नातकव्रतप्रकरणे [4]परकीयनिपानेषु स्नानं [5]निषिध्य तद्-

(१) C. Omits the portion bracketed.
(२) D. प्रवाहविरोधार्थं सेतुकरणेन ०।
(३) A. C. अश्वदान ०।
(४) A. D. ० परकृत ०।
(५) D. निषिद्धयते दुष्कृत ०।

दुष्कृतभागित्वदोषकथनात् पुरुषार्थोऽपि निषेधोऽस्ति। तेन क्रतुमध्येऽनृतवदनेकक्रत्वर्थपुरुषार्थनिषेधद्वयातिक्रमवत् वैधस्नाने परकृतजले कृते स्नानाङ्गनिषेधातिक्रमवत् पुरुषार्थनिषेधातिक्रमोऽप्यस्ति तदुभयसमानार्थत्वेन पिण्डोद्धरणविधिः। तथा च योगियाज्ञवल्क्यः पिण्डोद्धरणं विधायाह,—

अनुद्धृत्य तु यः कुर्य्यात् परकीयजलाशये।
वृथा स्नानफलं तस्य कर्त्तुः पापेन लिप्यते॥

स्नानवैगुण्यं [1]पुरुषदोषं च पिण्डोद्धरणाभावे दर्शयति। अर्थात् पिण्डोद्धरणं तदुभयदोषसमाधानार्थमित्युक्तं केवलं जलान्तरसम्भवे परकृतजले वैधस्नानकरणे न स्नानफलं न वा पुरुषदोषपरीहारः। [2]शरीरशुद्धिः प्रत्यवायपरीहारश्च स्यादेव।

तदुक्तम्,—

स्नातस्य वह्नितप्तेन तथैव परवारिणा।
शरीरशुद्धिर्विज्ञेया न तु स्नानफलं लभेत्॥

एवं संक्रान्तिग्रहणादिनैमित्तिकस्नाने बोध्यम्। कर्म्माङ्गस्नानस्य जलान्तरासम्भवेऽवैगुण्यमेव। जलान्तरसम्भवेऽपि तत्र स्नानधर्म्मानतिदेशात् परकृतेऽपि स्नानस्वरूपनिर्वाहादवैगुण्यमेव पुरुषार्थनिषेधातिक्रमदोषः स्यादेव। निपानकर्त्तुः काशीमरणेन मुक्तत्वे पापाभावे न पुरुषार्थदोषः। स्नानाङ्गपिण्डोद्धरणं

(१) D. पुरुषार्थदोषञ्च०।

(२) D. शरीरशुद्धिपरीहारश्च०।

स्यादेव। न च यद्येकं युगपत् [1]स्पृशेदेष ते वायो इति ब्रूयादिति प्रायश्चित्तस्य लौकिकस्पर्शविषयत्ववदिह न वैधे दोषः परकृते विध्यभावात्। स्वकृततड़ागादौ विक्रयादिना परकीये कृते नदीसेतु[2]बन्धादिना गर्त्ते परकीये जाते परकीयनिम्नभूमौ वर्षोदकपूर्णे च जलस्य परकीयत्वे[ऽपि परकृतत्वाभावान्न[3]] पिण्डोद्धरणम्।

स्नातस्य वह्नितप्तेन तथैव परवारिणा।

इत्यत्र परवारिपदस्य परवारिकृत्रिममकृत्रिमञ्च परेणोपार्ज्जितमिति लक्ष्मीधरव्याख्यानान्निषेधः। शरीरशुद्धिः प्रत्यवायपरीहारश्च स्याताम्। नात्र पिण्डोद्धरणम्। योगियाज्ञवल्क्यः,—

न ग्राह्यास्त्वागता ह्यापो नद्याः प्रथमवेगिताः।
प्रक्षोभिताश्च केनापि याश्च तीर्थाद्विनिःसृताः॥

प्रथमवेगितानिषेधः शुष्कनदीविषय इति लक्ष्मीधरः। प्रक्षोभिता हस्तिमहिषादिना। तीर्थाद्विनिःसृतास्तीर्थाद्विच्छिन्नास्तत्तीर्थगतत्वेनाप्रत्यभिज्ञायमानाः। छन्दोगपरिशिष्टे,—

मासद्वयं श्रावणादि सर्व्वा नद्यो रजस्वलाः।
तासु स्नानं न कुर्व्वीत वर्जयित्वा समुद्रगाः॥

समुद्रगाः साक्षात्प्रत्यभिज्ञायमानसमुद्रप्रवेशाः। [4]यत्तु,—

(१) A. ० स्पृशेदेधते वायो ०।

(२) A. D. ० भङ्गादिना ०।

(३) D. Omits the portion bracketed.

(४) D. यत्तु कालादर्शकारः,—०।

भागीरथी च कालिन्दी नर्म्मदा च सरस्वती।
विशोका च वितस्ता च गौतमी कृष्णवेणिका॥
तुङ्गभद्रा भीमरथी तापी चैव पयोष्णिका।
द्वादशैता महानद्यः [1]प्राणिनः पावयन्ति याः॥

इति वचनात् समुद्रगापदं द्वादशनदीपरमिति तन्न समुद्रगापदस्य प्रसिद्धयोगत्यागेनाप्रसिद्धरूढ़िकल्पनायां मानाभावात्। तथा,—

आदौ कर्कटके नद्यः सर्व्वा एव रजस्वलाः।
त्रिदिनन्तु चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा॥

इति तेन सर्व्वा इति वचनात् समुद्रगाणामपि त्रिरात्राशुद्धिर्न गङ्गायाः शुद्धौ दृष्टान्तत्वेनोपादानात्। ये चान्ये नदसंज्ञका इत्यपवादात् शोणादिनदेषु न रजोदोषः। [2]तत्र स्नाननिषेधस्य सुखार्थस्नानपरत्वे उपाकर्म्मादिष्वपवादवैयर्थ्यापत्तेः। विहितस्नाननिषेधे विकल्पापत्तेरगत्या स्नानप्रकरणाभावेऽपि पर्य्युदासत्वम्। वस्तुतो दर्शप्रकरणेऽनृतवदननिषेधवत् मासद्वयसम्बन्धिस्नानाङ्गत्वेन नदीनिषेधः। [न च विकल्पः[3]।] अनृतवदनवद्विशेषाकारेण मासद्वयस्नानाङ्गत्वेन नदीविध्यभावादिति। तेन लौकिकस्नानादौ न दोषः। रजस्वलाशब्दलिङ्गात् तत्रापि दोष इत्यन्ये। छन्दोगपरिशिष्टे,—

(१) A. D. ० पापिनः ०।
(२) A. D. अत्र ०।
(३) D. Omits the portion bracketed.

उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने तथैव च।
चन्द्रसूर्य्यग्रहे चैव रजोदोषो न विद्यते॥

जलान्तराभावे न रजोदोष इति कालादर्शे। तेन विशेषविधानादवैगुण्यम्।

अन्त्यजैः खानिताः कूपास्तड़ागा वाप्य एव च।
एषु स्नात्वा च पीत्वा च प्राजापत्येन शुद्ध्यति॥

इति निषेधस्य पुरुषार्थत्वेऽपि परक्ततत्वेन स्नानवैगुण्यमप्यस्ति जलान्तराभावे स्नाने न फलं प्रत्यवायपरीहारः स्यादेव। पुरुषार्थं प्रायश्चित्तं कार्य्यम्। इह च नद्यादिस्नानाङ्गदेशानां प्रातःस्नानेऽतिदेशेऽपि दक्षेण [1][सन्ध्या]स्नानमुभाभ्यामित्युद्धृतानुद्धृताभ्यां विकल्पेन विधानादुद्धृतपक्षे औपदेशिकेनातिदेशिकनद्यादिबाधः। विष्णुपुराणे च,—

कूपेषूद्धृततोयेन स्नानं कुर्व्वीत वा भुवि।

इत्येतदपि प्रातःस्नानपरमेव। यत्तु पद्मपुराणे,—

अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत्।

इति तस्य माध्याह्निकस्नानपरत्वेऽप्यनुकल्परूपमेव। तेन प्रातःस्नाने दक्षस्मृत्या समकल्पत्वान्नानुवादरूपता। एवञ्च मज्जनस्य पाक्षिकत्वान्न स्नानशब्दार्थत्वं किन्तु सर्व्वाङ्गजलसंयोग एव स्नानम्। पद्मपुराणे,—अनुद्धृतैरुद्धृतैर्वा स्नानमित्येकस्य स्नानपदस्यानुद्धृतपक्षे मज्जनपरत्वेन मुख्यत्वमुद्धृतपक्षे गौणत्वमिति

(१) C. Omits the portion bracketed.

विरोधात् । तेन सर्व्वाङ्गजलसंयोग एव [1]स्नानशब्दार्थः । [2]अन्तर्जलजपस्य तोयकुम्भेनाभिषिच्यमानस्य स्यादेव । [3]एवञ्च प्रातःस्नानप्रकृतिषु माघस्नानादिषूद्धृतजलस्यापि प्राप्तिः । तथाच स्नानाङ्गमन्त्रलोपोऽप्यतिदेशात् प्रवर्त्तते । प्रातःस्नानातिरिक्तेऽवश्यकर्त्तव्ये ग्रहणादिस्नाने उद्धृतजलस्यानङ्गत्वेऽपि प्रतिनिधिन्यायेन क्रियमाणे प्रारब्धकाम्यस्नाने वोद्धृतजलस्नानत्वेऽपि न स्नानाङ्गमन्त्रलोपः । अनारब्धकाम्यस्नानस्य [4]नोद्धृतोदकेन प्रसङ्गः । एवं माध्याह्निकस्नानेऽप्यनुद्धृतासम्भवे भूमिष्ठमुद्धृतात् पुण्यमिति वचनादुद्धृतेनावैगुण्यम् । अनुद्धृतसम्भवे वैगुण्यमेव । अथ मनुः,—

न स्नानमाचरेद् भुक्त्वा नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥

कृतभोजनस्य यदृच्छास्नाननिषेधः । नित्यस्य प्राप्तप्रभावाच्चाण्डालादिस्पर्शनिमित्तकस्यावश्यकर्त्तव्यत्वादिति मेधातिथिः । एवमातुरस्य । महानिशायामनवरतञ्च लौकिकमेव निषिद्ध्यते । अविज्ञात इत्यस्य वैधविषयत्वे विकल्पभयेन पर्य्युदासत्वे [5]दूरश्रुतिलक्षणापत्तेरेव लौकिकविषयत्वम् । अविज्ञातत्वं गाधत्वेन निन्दितविषयत्वेन च । [6]जावालः,—

(१) A. स्नानस्य शब्दार्थः ।
(२) D. अन्तर्जलजपस्तोय ०
(३) D. एवं प्रातः ०
(४) A. नोद्धृतोदके प्रसङ्गः ।
(५) A. C. यूपश्रुति ०
(६) D. जावालिः,—

त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः ।
शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथञ्चन ॥

शूद्रादीनां यथाक्रमं रागप्राप्तस्य । विद्याकरपद्धतौ,—

दशमी नवमी चैव तृतीया च त्रयोदशी ।
प्रतिपच्च विशेषेण स्नानमत्र विवर्ज्जयेत् ॥
द्वादश्यां कृष्णपक्षे तु न स्नातव्यं कथञ्चन ।
दर्शे स्नानं न कुर्व्वीत मातापित्रोस्तु जीवतोः ॥
[1]न वर्ज्ज्यञ्च नवम्यां तन्निमित्तान्तरसम्भवे ।

अयमपि सुखार्थस्नानस्य कालविशेषानियतकाम्यस्नानस्यात्र-निषेध इत्येके । वस्तुतः,—

भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः ।
तन्निषिद्धं नवम्यादौ नित्यं नैमित्तिकं न तु ॥

आपस्तम्बः,—शिरोमज्जनमप्सु वर्जयेदस्तमिते च स्नानम् ।

अथ स्नानाङ्गानि ।

बौधायनः,—न नग्नः स्नायात् । एतेन स्नानाङ्गत्वेन नग्नतानिषेधः । दर्शप्रकरणेऽनृत[2]वदननिषेधवत् । यत्तु पठन्ति,—

नग्नः कौपीनवासा वा द्विवासा स्नाति यो नरः ।
वृथा स्नानफलं तस्य निराशाः पितृदेवताः ॥

(१) D. नवम्यां (च) न वर्ज्यं तत् निमित्ता ० A. नवम्याञ्च न वर्ज्यं ० ।
(२) C. ० वदने निषेध ०

[इति][1] तदधोवस्त्रविहिते बोध्यम्। उत्तरीयस्याङ्गत्वात्। स्नानाधिकारे [2]जावालः,—

नार्द्रमेकञ्च वसनं परिदध्यात् कथञ्चन।

शङ्खलिखितौ,—अनश्नन्ननग्नः स्नायात्। नाप्सु मेहनोद्वर्षणं(णे) कुर्य्यात्। न पादेन पाणिना वोदकमभिहन्यात्। न स्रवन्तीं वृथातिक्रामेदनवसिच्य। अमेध्योदकं परिहरेत्। अल्पोदके न स्नायात्। न समुद्रोदकमवगाहेत। अनश्नन् ताम्बूलादिकमभक्षयन्। मेहनं मूत्रोत्सर्गः। अङ्गचालनार्थमुद्वर्षणञ्च जले न कुर्य्यात्। अनवसिच्य तर्पणमकृत्वा नदीमतिक्रम्य न गच्छेत्। एतच्च तर्पणकाले [3]दृष्टार्थत्वात्। अमेध्योदकं परिहरेत् सर्व्वजलकार्य्येषु। नाल्पोदके स्नायात् प्रभूतोदकसम्भवे। समुद्रोदकं नावगाहेत न बहुदूरं गच्छेत्। इहाङ्गघर्षणजलमेहनाल्पोदकस्नानसमुद्रमध्यदूरप्रवेशानां निषेधः स्नानाङ्गप्रकरणादनृतवदननिषेधस्य दर्शाङ्गत्ववत्। वचनान्तरवारितानां भक्षणमेहनामेध्योदकानां निषेधो न कर्म्माङ्गम्। कर्म्मणि प्राप्त्यभावात्। किन्तु न मलवद्द्विवाससी सह संवसेदितिवत् पुरुषार्थ इति भाव्यम्। योगियाज्ञवल्क्यः,—

(१) D. Omits the portion bracketed.

(२) D. जावालिः,—

(३) D. सन्निहितदृष्टार्थत्वात्।

पादेन पाणिना वापि यथ्या वस्त्रेण चोदकम्।
न हन्यान्न च बाधेत न च प्रक्षोभयेत् [1]तथा॥
न कुर्य्यात् कस्यचित् पीड़ां कर्म्मणा मनसा गिरा।
आचरन्नभिषेकन्तु कर्म्माण्यन्यानि नाचरेत्॥

अन्यानि पूर्व्वोक्तानि पादघातप्रभृतिपरपीड़ापर्य्यन्तानि नाचरेदिति लक्ष्मीधरः। एतदपि स्नानाङ्गम्। देवलः,—

न नदीषु नदीं ब्रूयात् पर्व्वते न च पर्व्वतम्।
नान्यत् प्रशंसेत् तत्रस्थस्तीर्थेष्वायतनेषु च॥

तथा न चत्वरोपद्वारयोः स्नायात्। चत्वरं पश्वादिबलिदानस्थानम्। उपद्वारं द्वारसमीपम्। बौधायनः,—श्मशानमापो देवगृहं गोष्ठं यत्र च ब्राह्मणा अप्रक्षाल्य पादौ [2]नान्तः प्रवेष्टव्यम्। तथाचिः,—पादौ प्रक्षालयेदिति। इदमनुद्धृतस्नानाङ्गम्। विष्णुः,—न स्नानवर्णकयोरग्रं प्रयच्छेदन्य(त्र)देवगुरुब्राह्मणेभ्यः। स्नानं स्नानसाधनं कुशादि। वर्णकं सुगन्धिद्रव्यम्। शङ्खः,—

उदकस्याप्रदानाद्धि स्नानशाटीं न पीड़येत्।

योगियाज्ञवल्क्यः,—

यावद्देवानृषींश्चैव पितॄंश्चैव न तर्पयेत्।
तावन्न पीड़येद् वस्त्रं येन स्नातो न चोदके॥

(१) A. ० बुधः।

(२) D. नात्र ०

येन वस्त्रेण स्नातस्तर्पणात् पूर्व्वं [1][तद् वस्त्रं] न पीड़येत्। [उदके न च पीड़येत्।][2] एतदपि स्नानाङ्गम्। तत्प्रकरणात्।

नरसिंहपुराणे,—

नद्यां स्रवत्सु च स्नायात् प्रतिस्रोतःस्थितो द्विजः।
तड़ागादिषु तोयेषु प्रत्यर्कं स्नानमाचरेत्॥

योगियाज्ञवल्क्यः,—

नरादापः प्रसूता वै तेन नारा इति स्मृताः।
अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः॥
यो हि व्रतानां तपसां यमस्य नियमस्य च।
भोक्ता च यज्ञतपसां योगिनां ध्येय एव च॥
स्मरेन्नारायणं देवं स्नानादिषु च कर्म्मसु।
प्रायश्चित्तेषु सर्व्वेषु दुष्कृतान्मुच्यते पुमान्॥
प्रमादात् कुर्व्वतां कर्म्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति [3]श्रुतिः॥

एवञ्च सर्व्वस्नानाङ्गभ्रंशे प्रायश्चित्तमिदम्। विशेषेणात्र विधानात्। अन्यकर्म्मभ्रंशेऽपि वाक्यसंयोगात्। यत्तु बौधायनः,—[4][नाप्सु सतः प्रयमणं विद्यते।] न वाससः पल्ललनं नोपस्पर्शनम्। यद्युपरुद्धाः स्युरेतेनोपतिष्ठते नमोऽग्नयेऽप्सुमते

(१) C. Omits the portion bracketed.

(२) C. Omits the portion bracketed.

(३) D. ० स्मृतिः।

(४) D. Omits the portion bracketed.

नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः। प्रयमणं प्लवनम्। वासःपल्ललनं वासोमलक्षालनम्। [1][उपस्पर्शनं देहमलक्षालनम्।] अज्ञानाद् यदि प्लवनादिभि[रेभि[2]]राप उपरुद्धाः स्युर्य्यद्येतत् क्रियत इत्यर्थः। [3]इति स्नानकालीनान्यङ्गानि।

स्नानेतिकर्त्तव्यता च।

योगियाज्ञवल्क्यः,—

स्नान[4]मन्त्रजलञ्चैव मार्जनाचमने तथा।
जलाभिभ्रमणञ्चैव तीर्थस्य परिकल्पनम्॥
अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः।
अन्यान् वा वारुणान् मन्त्रान् कामतः संप्रयोजयेत्॥

अत्र,—

असामर्थ्यान्न कुर्य्याच्चेत् तत्रायं विधिरुच्यते।

इति प्रथमतोऽभिधाय नित्यश [5]इत्यभिधानात् प्रातःस्नाने नित्यं संक्षेपविधिर्मध्याह्ने विस्तरासामर्थ्ये सतीति वाक्यार्थस्तेन

(१) C. Omits the portion bracketed.

(२) C. Omits the portion bracketed.

(३) D. इति स्नानाङ्गकालान्यङ्गानि। Then adds] स्नानोत्तराङ्गानि। हारीतः,—न स्नात्वा गात्रमवमृज्यात्। न शिरो विधुनुयात्। न वासो विधुनुयात्।

(४) D. ० मन्त्रजले चैव ०

(५) D. इति पुनरभिधाय प्रातः ०

निरग्नेरपि प्रातःसंक्षेपविधिरिति प्रतिभाति। अतश्चासामर्थ्यान्न कुर्य्यादित्युक्तविस्तरासामर्थ्ये निमित्ते प्रातःकाले वा निमित्ते स्नानकार्य्यमुद्दिश्य पदार्थषट्के मन्त्रविधानेऽर्थात् पदार्थान्तरनिवृत्तिः। नह्युक्तपदार्थषट्के मन्त्रसम्बन्धेन स्नानकार्य्यसिद्धावन्यापेक्षास्ति। न चैवं पदार्थषट्कस्य यथाश्रुत एव क्रमः स्यात्। पदार्थषट्कस्य विस्तरविधिगतस्येहानुवादेन तत्रत्यक्रमबाधे मानाभावात्। तत्स्वरूपस्येहोत्पत्तिविधिरभावेनावश्यं तत्रत्यानुवादात्। न च मन्त्रस्तत्त्रित्वञ्च कथमेकस्य विधेयं प्राप्ते कर्म्मण्यनेकविध्यभावादिति वाच्यम्। अघमर्षणसूक्तेन प्रयोजयेत् त्रिरावृत्तेन प्रयोजयेदिति क्रियापदस्योभयत्रानुषङ्गेण वाक्यद्वयस्य स्पष्टत्वात्। तथाच मन्त्रस्य त्रिवारपाठपूर्व्वकं तीर्थपरिकल्पनं-तीर्थावाहनं, जलाभिमन्त्रणं-जलस्य मन्त्रेणावर्त्तनं, आचमनं-मन्त्रेण जलभक्षणं, मार्जनं, अन्तर्जले निमज्य जपः, पुनर्मज्जनमिति पदार्थषट्कम्। अन्यान् वारुणान् मन्त्रानित्यत्रापि पूर्व्वपूर्व्वप्रकृतपदार्थषट्काङ्गमन्त्रानुवादेन वारुणत्वं विस्तरासामर्थ्यनिमित्ते प्रातःकाले वा निमित्ते विधीयत इति पदार्थान्तरनिवृत्तिः। [1]क्रमपदो विस्तरस्नानगत एव। अतोऽन्यानघमर्षणभिन्नान्। कामत इति वचनात् स्नानप्रकरणगतानन्यप्रकरणगतान् वा। तेनाग्नेयीन्यायस्य प्रसङ्गः। त्वन्नः सत्वन्न इत्येतयोर्निरपेक्षवरुणदेवताकत्वाभावाद् वारुणपदेनाग्रहणम्। बृहत्स्नाने तु सृष्टि-

(१) D. क्रमः पूर्व्वविस्तर॰

न्यायेन वारुणावारुणेषु वारुणशब्दः। वारुणामिति [1]बहुवचनस्यानुवादः। [2]सत्रादुदवसाय पृष्ठसवनीयेन यजेरन्निति वत्। दक्षिणावर्त्तशङ्खादिना स्नानं मध्याह्न एव नेह काम्यत्वात्।

विष्णुपादोदकं मूर्द्ध्नि कल्यमुत्थाय धारयेत्।

इतिवचनात् प्रातःस्नानकाले कार्य्यम्। तस्य च फलम्,—

स चैवावभृथस्नातः स च गङ्गाजलाप्लुतः।
विष्णुपादोदकं कृत्वा शङ्खे यः स्नाति मानवः॥
स्थानं नैवास्ति पापस्य देहिनां देहमध्यतः।
सबाह्याभ्यन्तरं यस्य व्याप्तं पादोदकेन वै॥

इति सामान्यतो विष्णुप्रतिमासु।

स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
शालग्रामशिलातोयैर्योऽभिषेकं समाचरेत्॥

इति शालग्रामपादोदकफलम्। अत्र मन्त्रः,—

कृष्ण कृष्ण महाबाहो भक्तानामार्त्तिनाशन।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे॥

अत्र विशेषः,—

तुलसीदलसम्मिश्रं तोयं यत् (यः) शिरसा [3]वहेत्।
सर्व्वतीर्थाभिषेकस्य तेन प्राप्तं फलं ध्रुवम्॥

(१) D. ॰ बहुवचनमनुवादः।
(२) D. सत्रादुदवसीनीयपृष्ठ ॰
(३) C. ॰ जपेत्।

अत्र च,—

नित्यं पादोदकं मूर्द्ध्ना मया धार्य्यं प्रयत्नतः ।

इति वैष्णवधर्म्मनियमात् चित्रप्रतिमादौ मुख्यपादोदकासम्भवे पञ्चरात्रोक्तविधिः कार्य्यः । स चैवम्,—

शङ्ख[1]पात्रन्तु संक्षाल्य गन्धपुष्पं ततः क्षिपेत् ।
आपूर्य्य गन्धतोयेन पुनर्गन्धादिनार्चयेत् ॥
पिण्डिकोपरि देवस्य सन्निधाने निधापितम् ।
गङ्गादिसर्व्वतीर्थन्तु[2] शङ्खे न्यस्य जपेदिदम् ॥
त्रिविक्रम क्रमाक्रान्तत्रैलोक्येश्वर केशव ।
त्वत्प्रसादादिदं तोयं पाद्यं तेऽस्तु नमो नमः ॥
इत्युक्त्वा प्रणिपत्याथ देवदेवं श्रियः पतिम् ।
शङ्खे व्यवस्थितं तोयं वैष्णवेभ्यो निवेदयेत् ॥

ईदृशं पादोदकं गृह्णीयात् । अत्र पादोदकस्य काल्ये ग्रहणविधानात् पर्य्युषितस्यैव काल्ये सम्भवात्

एकरात्रोषितास्तास्तु त्यजेदापः समुद्धृताः ।

इति निषेधाप्रवृत्तिः । यत्तु,—

न वक्त्रोदकपुष्पाद्यै[3]रर्च्चनं स्नानमाचरेत् ।

इति देवपूजादेवस्नानयोरेव पर्य्युषितजलनिषेधो न [4]स्व-

(१) D. ० पात्रञ्च ०
(२) D. ० ञ्च ०
(३) A. ० रर्चयन् स्नान ०
(४) A. स्वस्य स्नाना ०

स्नानादाविति तन्न । [1]देवस्यार्चनपदेनैव स्नाननिषेधे स्नानपदस्य स्वस्नानपरत्वौचित्यात् । शङ्खः,—

नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं षोढ़ास्नानं प्रकीर्त्तितम् ॥
अस्नातस्तु पुमान् नार्हो जप्याग्निहवनादिषु ।
प्रातःस्नानं तदर्थन्तु नित्यस्नानं प्रकीर्त्तितम् ॥
चाण्डालचितियूपादि स्पृष्टास्नातां रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् ॥
पुष्यस्नानादिकं यत्तु दैवज्ञविधिचोदितम् ।
तद्धि काम्यं समुद्दिष्टं नाकामस्तु प्रयोजयेत् ॥
जप्तुकामः पवित्राणि अर्च्चिष्यन् देवतापितॄन् ।
स्नानं समाचरेद् यस्तु क्रियाङ्गं तत् प्रकीर्त्तितम् ॥
मलापकर्षणं नाम स्नानमभ्यङ्गपूर्व्वकम् ।
सरित्सु देवखातेषु तड़ागेषु सरस्सु च ।
स्नानमेव क्रिया यस्मात् स्नानात् पुण्यफलं स्मृतम् ॥

इति तत्र नित्यस्नानं प्रातःस्नानमुक्तम् । क्रियास्नानं [2]चतुर्थे भागे वक्ष्यते । कर्म्माङ्गस्नानञ्च तत्तत्कर्म्माङ्गस्नानं कृच्छ्राद्यङ्गत्रिषवणस्नानादिरित्युक्तम् । मलापकर्षणस्नानं मलक्षयहेतुत्वान्नादृष्टार्थम् । नात्रेतिकर्त्तव्यतापेक्षा । पुष्यस्नानादिकाम्यस्नानमपि दृष्टार्थत्वादेव नेतिकर्त्तव्यतापेक्षम् । यत्तु तीर्थादिषु काम्यस्नानं

(१) D. देवस्नानस्यार्चन ०
(२) A. D. चतुर्थभागे ०

तद्दृ(तददृ)ष्टार्थत्वादितिकर्त्तव्यतापेक्षं सत् प्रातःस्नानवद् वाचनिकातिदेशाभावेऽपि चोदनालिङ्गातिदेशेनैव मध्याह्नस्नानधर्म्मान् गृह्णाति । तथा च ब्रह्मपुराणे,—

कृत्वा चाव्दैवतैर्मन्त्रैरभिषिकञ्च मार्जनम् ।

इत्यादि समुद्रस्नाने लिङ्गदर्शनम् । यत्तु ग्रहोपरागसंक्रान्तिलक्ष्मयोगादौ नैमित्तिकस्नानं तदप्यदृष्टार्थत्वादेव [1]तीर्थस्नानवत् सधर्म्मकम । तथाचैवमादिकास्ये ब्रह्मपुराणे तर्पणविधिः सधर्म्मकत्वे लिङ्गम् । यत्तु चाण्डालादिस्पर्शननिमित्तं स्नानं तत्र निषेधादेव नेतिकर्त्तव्यताप्रवृत्तिः ।

अजीर्णेऽभ्युदिते वान्ते श्मश्रुकर्म्मणि मैथुने ।
दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते ॥

अजीर्णेऽभ्युदिते अशुद्धोद्गारादिना[2]भिव्यक्ते । एतच्चोत्तरकालं स्नानप्राप्त्यर्थमजीर्णावस्थायां स्नाननिषेधात् । स्नानमात्रमदृष्टार्थेतिकर्त्तव्यतारहितम् । आपस्तम्बः,—

अस्पृश्यस्पर्शने वान्ते अश्रुपाते क्षुरे भगे ।
स्नानं नैमित्तिकं कार्य्यं दैवपित्रविवर्जितम् ॥

इति ।

नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमीष्यते ।
तर्पणन्तु भवेत् तत्र अङ्गत्वेनेति निश्चितम् ॥

---

(१) D. तीर्थस्नानविधिसधर्म्मकम्

(२) D. ०चाभिव्यक्ते ।

इतिब्रह्मपुराणविहितस्य तर्पणस्याभावेनादृष्टार्थेतिकर्त्तव्यतामात्रनिवृत्तिं बोधयति । तथा योगियाज्ञवल्क्यः,—

तूष्णीमेवावगाहेत यदा स्यादशुचिः पुमान् ।
आचम्य प्रयतः पश्चात् स्नानं विधिवदाचरेत् ॥

इह मध्याह्नस्नानप्रकरणाबाधाय स्नानं विधिवदाचरेदिति मध्याह्नस्नानानुवादः । तूष्णीमेवेत्येतावद्विधीयते । अनुवादप्रयोजनञ्चाशुचेर्[1]मन्त्राद्युच्चारणानधिकारात् स्पर्शननिमित्तस्नानस्य मध्याह्नस्नानेन सह तन्त्रानुष्ठानं नास्तीति [2]ज्ञापनम् । अतएव प्रातःस्नानस्यापि दृष्टादृष्टकरत्वेन शरीरशुद्ध्यर्थत्वान्माघकार्त्तिकादि काम्यस्नानं न प्रातःस्नानेन सह तन्त्रेणानुष्ठेयमित्युक्तं भवति । [3]तस्माच्चाण्डालादिस्पर्शननिमित्तशुद्ध्यर्थस्नाने न धर्म्मापेक्षा । नात्र नद्यादिनियमः । उद्धृतेनानुद्धृतेन वा सर्व्वाङ्गजलयोगरूपस्नान[4]पदार्थानुष्ठानरूपमात्रमेव । एवं [5]मलापकर्षणे काम्यपुष्यादिदृष्टार्थस्नाने च बोध्यम् । तथा च शङ्खः,—

नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
तीर्थाभावेऽपि कर्त्तव्यमुष्णोदकपरोदकैः ॥

इति । एवं कर्म्माङ्गस्नानस्यादृष्टार्थत्वेऽपि तत्र तर्पणविध्यभावलिङ्गेन [6][न]स्नानेतिकर्त्तव्यतानिर्द्देशः । स्नानाङ्गतर्पणन्तु वक्ष्य-

---

(१) D. ० मन्त्रानुच्चार ०

(२) D. ज्ञापनार्थम् ।

(३) D. तथा चाण्डाला ०

(४) D. ० पदार्थमात्रानुष्ठान ०

(५) D मलापकर्षे ०

(६) D. Omits the portion bracketed.

स्नानतर्पणविधिना [1]कार्य्यम् । सन्ध्याकालविलम्ब[2]शङ्कायान्तु संक्षेपतर्पणं कार्य्यम् । तच्च प्रातःस्नानप्रयोगे वक्ष्यते । [3]स्नानाङ्ग-तर्पणञ्चाङ्गत्वादेव स्नानसमकालं कर्त्तव्यम् । तदसम्भवात् [4]पूर्व्वं पश्चाद्वा कर्त्तव्यम् । [5]पूर्व्वकरणमादित्य(त्व)वचनाभावेन युक्त-मितिस्नानसमनन्तरं कार्य्यम् । [किञ्च स्नानस्य कर्म्मान्तराधिकार-सम्पादकत्वमपूर्व्वद्वारकम् । अपूर्व्वञ्च तर्पणाद्यङ्गसहितात् स्नानान्न स्नानमात्रात् । तेन सन्ध्याधिकारसिद्ध्यर्थं पूर्व्वं तर्पणं स्नानं कार्य्यम् ।[6]] [7]स्मरन्ति स्मृतिरत्नमालायाम्,—

आचम्य प्रयतः पूर्व्वं स्नानं प्रातः समाचरेत् ।
स्नात्वा सन्तर्पयेद्देवानृषीन् पितृगणांस्तथा ॥
आचम्य मन्त्रवन्नित्यं पुनराचम्य वाग्यतः ।
सम्मार्ज्य मन्त्रैः

इत्यादिना तर्पणानन्तरं सन्ध्योक्ता । ननु च प्रकृतीभूत-प्रधानतर्पणे सन्ध्योत्तरत्वं दृष्टमिहापि तदतिदिश्येत । स्नानाङ्ग-तर्पणं हि अङ्गिनमनुपादेयमुद्दिश्य प्रकरणान्तरे विधीयमानं प्रकरणान्तरन्यायेन भिन्नं सत् नित्याग्निहोत्रविकृतिकुण्ड[8]याज्य-

(१) D. कर्त्तव्यम् ।
(२) D. ० शङ्कायां न संक्षेप ०
(३) D. स्नानाङ्गतर्पणन्तु ०
(४) D. पूर्व्वं वा पश्चाद् ०
(५) E. F. पूर्व्वकरण आहत्य वचनाभावेन (१)
(६) A. D. Omit the portion bracketed.
(७) D. स्मरन्ति च स्मृतिरत्नमालायां कौर्म्मे,—
(८) E. F. ० पाय्य ०

ग्निहोत्रवत् प्रधानभूततर्पणधर्म्मग्राहित्वात् सन्ध्योत्तरं कार्य्यं स्यात् । मैवम् । चतुर्थे च तथाभागे स्नानं, अस्नाताशी मलं भुंक्ते, सन्ध्यात्रयं कर्त्तव्यं, प्रत्यहं तर्पणं कुर्य्यात्, तर्पणं पितृयज्ञ इत्यादिवाक्यैः स्नानसन्ध्यातर्पणानां पृथगेव फलसाधनत्वेन पुरुषार्थ-त्वात् क्रमपाठो नान्तरीयकः क्रतूनामिव पृथक्फलानाम् । तदुक्तमङ्गत्ववत् क्रतूनामानुपूर्व्व्यमित्याशङ्क्य न वाऽसम्बन्धादिति । न च दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेतिवद् वाचनिकः सन्ध्यातर्पणयोः क्रमोऽस्ति येन सोमविकारे इष्ट्यन्तरत्वमिवाङ्ग-तर्पणे सन्ध्योत्तरत्वमिति सन्दिश्येत । तेन [1][यथा] सोमस्याधाना-नन्तर्य्यविधौ इष्टिपूर्व्वत्वं सोमस्यार्थसिद्धमिति सोमविकारे नाति-दिश्यते तथा सन्ध्योत्तरत्वं तर्पणे । न च पाठक्रमानादरे सन्ध्यातः पूर्व्वं तर्पणप्रसङ्गः । [2]शङ्खलिखितौ,—

आचम्यैवं पुरा प्रोक्तास्तीर्थसम्मार्जने तु ये ।
मन्त्रास्तैर्मन्त्रितं तोयं मूर्द्ध्नि भूमौ तथा क्षिपेत् ॥

इति स्नानात्याचमनानन्तरं सन्ध्योपक्रमाभिधानान्मध्ये तर्पणा-नवकाशात् । न च शङ्खमते मध्याह्नसन्ध्यामुक्त्वा

एष एव विधिर्ज्ञेयः सन्ध्ययोश्च द्विजातिषु ।

इति मध्याह्नसन्ध्यायाः प्रातःसायंसन्ध्याप्रकृतित्वेन प्रातः सन्ध्यायां स्नानानन्तर्य्यातिदेशे मध्ये स्नानाङ्गतर्पणानवकाशः ।

(१) D. Omits the portion bracketed.
(२) A. D. शङ्खस्मृतौ,—

तर्पणन्तु भवेत् तत्राङ्गत्वेनेत्यङ्गत्वस्यानन्तर्य्यघटितत्वेनातिदेशिकत्वेन दुर्व्वलस्य सन्ध्यानन्तर्य्यस्य बाधात् । योगियाज्ञवल्क्यीये च मन्त्रवत् स्नानभोजनमिति स्नानोत्तराचमने मन्त्रं विधाय

आचम्य [1]प्लाव्य चात्मानं त्रिराचम्य शनैरसून् ।

इति स्नानानन्तर्य्यं मध्याह्नसन्ध्यायामुक्तम् । [2]तेन मध्याह्नसन्ध्यातः पूर्व्वं तर्पणप्रसङ्गो नास्ति । यत्तु तत्रैव,—

यदैव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः ।
[3]तदैव सर्व्वमाप्नोति पितृयज्ञक्रियाफलम् ॥

इति तर्पणस्य स्नानानन्तर्य्यवचनं तस्य पश्चात्तनत्वादनुवादत्वाच्च स्नानोत्तरत्वमात्रमर्थः । स च सन्ध्याव्यवधानेऽपि । इह स्नानोत्तरत्वस्याविधेयस्याङ्गतर्पणेऽनतिदेशात् । तेन तर्पणस्य सन्ध्योत्तरत्वमर्थसिद्धं न स्नानाङ्गतर्पणेऽतिदिश्यते । केवलं स्नानविलम्बे तर्पणकरणे सन्ध्याकाललोपशङ्कायां संक्षेपतर्पणम् । संक्षेपतर्पणेऽपि सन्ध्याकालबाधशङ्कायां सान्तपनीयाग्निहोत्रन्यायेनासम्बन्धात्तु नोत्कर्षः । प्रापणाच्च निमित्तस्येति न्यायेन सम्बन्धोत्तरं कार्य्यम् । इदञ्च स्नानाङ्गतर्पणं शिरःस्नातस्यैव । सर्व्वाङ्गजलसंयोगस्यैव स्नानशब्दार्थत्वादित्युक्तम् । तथाच स्मरन्ति,—

शिरःस्नातस्तु कुर्व्वीत दैवं पित्र्यमथापि वा ।

(१) D. ० यदि चात्मानं ० ।
(२) D. एतेन ० ।
(३) D. तेनैव सर्व्वं ० ।

इति । [1][यत्तु,] वामनपुराणे,—

कृत्वा शिरःस्नानमथाह्निकं वा
सन्तर्प्य तोयेन पितॄन् मनुष्यान् ।

इति तदनुवादत्वात् शिरःस्नानपक्षे सन्तर्प्यत्वेवम्परम् । रुज व्याधि[2]वृद्धाशङ्कया वृष्ट्यादिकालदोषेण जलाशयगमनासामर्थ्ये सर्व्वाङ्गसंयोगक्षमजलासम्भवे वा मन्त्रस्नानादयोऽनुकल्पाः । ते च प्रकरणाविशेषान्माध्याह्निकस्नानस्याप्यनुकल्पा एव । "शृणुध्वं वक्ष्यते स्नान"मित्युपक्रम्य माध्याह्निकस्नानं सुविस्तरमुक्त्वा मध्ये च "न स्नात्वा नाचरेत् कर्म्म, लालास्वेदसमाकीर्ण" इत्यादिसार्थवादविधिना,

तस्मात् प्रातः प्रशंसन्ति स्नानमेव हि नित्यशः ।

इति प्रातःस्नानं विधाय, अन्ते च

[3]एष वोऽभिहितः कृत्स्नः स्नानस्य परमो विधिः ।
गुणाश्च तस्याचरणे दोषास्तस्यानिषेवणे ॥

इत्युपसंहृत्य,

असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया ।
मन्त्रस्नानादयः सप्त केचिदिच्छन्ति सूरयः ॥

इतिस्नानानुकल्पविधेः प्रातःस्नानवन्मध्याह्नस्नानेऽप्यविशेषात् प्रवृत्तेः । सन्ध्याप्रकरणे च,—

(१) D. Omits the portion bracketed.
(२) D. वृद्धाशङ्कायां ० ।
(३) A. एष वो नित्यशः कृत्स्नः ० ।

उभे सन्ध्ये च स्नातव्यं ब्राह्मणैश्च गृहाश्रितैः ।
तिसृष्वपि तु सन्ध्यासु स्नातव्यन्तु तपस्विना ॥

इति सन्ध्याङ्गत्वेन स्नानमुक्त्वा

कालदोषादसामर्थ्यान्न शक्नोति यदा ह्यसौ ।
तदा ज्ञात्वा ऋषिभ्यस्तु[1] मन्त्रैर्दृष्टन्तु मार्जनम् ॥

इति मार्जनं स्नानफले सन्ध्यासाद्गुण्यानुकल्पत्वेनोक्तम् ।

अप्रायत्ये समुत्पन्ने स्नानमेव समाचरेत् ।

इति चाण्डालादिस्पर्शे लालादिसङ्करे चाप्रायत्ये स्नानमेव न मार्जनम् । तेनायमर्थः,—[2][स्नानस्य फलद्वयं] अप्रायत्यनिवृत्तिः सन्ध्यासाद्गुण्यञ्च । तेन कर्म्मसाद्गुण्यं स्नानेन मार्जनाद्यनुकल्पेन वा । अप्रायत्यनिवृत्तिस्तु स्नानादेव । लालादिलेपाशुद्धौ क्षालनादिना वा । [3]तथाच बौधायनः,—"अथातः सन्ध्योपासनाविधिं व्याख्यास्यामः । तीर्थं गत्वा प्रयतोऽभिषिक्तः[4] प्रक्षालितपाणिपादः अप आचम्य अग्निश्च मामन्युश्चेति सायमपः पीत्वा सूर्य्यश्च मामन्युश्चेति प्रातः सपवित्रेण पाणिना सुरभिमतीभिरब्लिङ्गाभिर्हिरण्यवर्णाभिः[5] पावमानीभिर्व्याहृतिभिरन्यैश्च पवित्रैरात्मानं संप्रोक्ष्य प्रयतो भवति ।" तथाप्युदाहरति,—

(१) C. ॰ पितृभ्यस्तु ॰

(२) C. Omits the portion bracketed.

(३) A. C. तथा बौधायनः ॰

(४) A. C. Here add प्रयतो वाऽनभिषिक्तः प्रक्षालित ॰

(५) D. ॰ वारुणीभिर्हिरण्यवर्णाभिः ॰

अम्भोऽवगाहनं स्नानं विहितं सार्व्ववर्णिकम् ।
मन्त्रवत् प्रोक्षणं वापि द्विजातीनां विशिष्यते ॥

सर्व्वकर्म्मणाञ्चारम्भे प्राक् सन्ध्योपासनाकालाच्चैतेन पवित्रसमूहेनात्मानं प्रोक्ष्य प्रयतो भवति । [1]अत्र लक्ष्मीधरः,—"इदञ्चाग्निश्च मा मन्युश्चेत्यादिपवित्रैरित्यन्त्यं (स) पवित्रं मार्जनं, याज्ञवल्कीयञ्च शन्न आप इत्यादि, अघमर्षणसूक्तेन वेत्यन्त्यं मन्त्रैर्मार्जनं, प्रयतस्यैव कर्म्माङ्गमुख्यस्नानाशक्तौ बोध्यम् ।" सर्व्वकर्म्मणाञ्चारम्भे श्राद्धादीनामपि मार्जनं साद्गुण्यार्थमित्यर्थः । अत्र च प्रयतो भवति (इति) [2][किं कर्म्मार्हो भवति] न तु प्रायत्यशून्यो भवतीत्यर्थः । तथा च प्रातःस्नानस्य लालास्वेदादिलेपाप्रायत्यनिर्हरणार्थत्वेऽप्यशक्तस्य शिरःप्रोञ्छनपूर्व्वकं

अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्म्मिणाम् । त्वे
आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः ॥

(इति) जावालोक्तं स्नानद्वयमप्रायत्यनिर्हरणार्थम् । तथा,—

नाभेरधः प्रविश्याप्सु कटिं प्रक्षाल्य मृज्जलैः ।
जलार्द्रकर्पटेनाङ्गप्रोञ्छनं कापिलं विदुः ॥

एतदपि सशिरस्कस्नानासम्भवेऽङ्गप्रोञ्छनम् ।

आतुरस्य वारुणस्नानासमर्थस्य चाण्डालादिस्पर्शननिमित्ताशौचे यमः,—

(१) C. तत्र ॰ इदमग्निश्च ॰ रित्यन्त्यं मार्जनं ॰

(२) C. Omits the portion bracketed.

आतुरस्नानसम्प्राप्तौ दशकृत्वस्त्वनातुरः ।

स्नात्वा स्नात्वा स्पृशेत् क्षिप्रं ततः शुद्ध्येत् स आतुरः ॥

[1][इदञ्च तत्र (ततः) शुद्ध्येत् स आतुर] इति वाक्यशेषात् शुद्ध्यर्थम् । कर्म्माङ्गस्नानकार्य्यन्तु मार्जनादिना कर्त्तव्यम् । आतुरस्य शुद्ध्यर्थं स्नान[2]ममन्त्रकमेव प्राप्नोतीति स्नात्वा स्नात्वेति स्पष्टः स्नानममन्त्रकमेव । अमेध्यलेपव्यतिरिक्तसर्व्वप्रकाराप्रायत्ये मानसस्नानमेवाप्रायत्यनिवर्त्तकम् । तदसामर्थ्येनान्येन दशकृत्वः स्नात्वा स्पर्शनमिति विद्याकरवाजपेयिनः* । तेषामभिप्रायः,—"मानसं प्रवरं स्नान"मिति मानसस्नाने प्रवरत्वं कर्म्मसाद्गुण्यकरत्वेनाप्रायत्यनिवर्त्तकत्वेन च । एकार्थत्वे प्रवरत्वासङ्गतेः,

य: स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ।

इति स्मृत्यन्तराच्च ।

---

[3]तत्र स्नानानुकल्पाः ।

बौधायनोक्तमन्त्रस्नानमुक्तमेव । योगियाज्ञवल्क्यः,—

कालदोषादसामर्थ्यान्न शक्नोति यदा ह्यसौ ।

तदा स्नात्वा ऋषिभ्यस्तु मन्त्रैर्दृष्टन्तु मार्जनम् ॥

[इति ।][4]

---

(१) C. Omits the portion bracketed.

(२) D. ॰ममन्त्रकमेव ॰

* See Bibliotheca Indica A. S. B. नित्याचारपद्धति Part II. p. 144.

(३) C. तेन स्नाना ॰ A. ते च स्नाना ॰

(४) A. C. Omit the portion bracketed.

शन्न आपस्तु द्रुपदा आपोहिष्ठाघमर्षणम् ।

एतैश्चतुर्भिर्ऋङ्मन्त्रैर्मन्त्रस्नानमुदाहृतम् ॥

स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसंयमः ।

अघमर्षणसूक्तेन अश्वमेधावभृत्समम् ॥

स्नानमब्दैवतै[र्मन्त्रै][1]रित्यब्दैवतैः शन्न-आप, द्रुपदा, आपोहिष्ठा इति तिसृभिर्मार्जनत्रयम् । अघमर्षणसूक्तेन प्राणसंयम इति स्नानमश्वमेधावभृत्सममित्यर्थः । अत्र [2]मन्त्रसाद्गुण्यरूपस्नानकार्य्येण शन्न-आप इत्यादिमन्त्रचतुष्टयस्य निरपेक्षविधानान्न बौधायनोक्तसुरभिमत्यादिषु समुच्चयः । बौधायनेऽपि सुरभिमत्याद्यनन्तर"मन्त्रैश्च पवित्रै"रिति [3]तच्छाखानामेव मन्त्राणां निरपेक्षेण सन्ध्याङ्गत्वविधेः "शन्न-आप" इत्यादीनामप्रवेशः । केवलं द्वयोः सन्ध्याप्रकरणस्थत्वेन मन्त्रभेदेऽपि मार्जनक्रियारूपप्रत्यभिज्ञानादेककर्म्मत्वेन बौधायनोक्तमन्त्रस्नानेऽङ्गत्वेन विहित"मग्निश्च मा मन्युश्च"त्यब्भक्षणमिहापि प्रवर्त्तते । मध्याह्नसन्ध्यायां सन्ध्याप्रकरणे "उभे सन्ध्ये (च) स्नातव्य"मिति मध्याह्नस्नानस्य सन्ध्याङ्गत्वमिति पुरुषार्थत्वञ्च स्नानस्यास्ति तेन पुरुषार्थस्नानकार्य्ये सन्ध्यादिसाद्गुण्यरूपस्नानकार्य्ये चाविशेषेण मार्जनं विधीयते । विशेषादप्रायत्यपरीहाररूपस्नानकार्य्यमात्रपर्य्युदासादिति । अतएव "तर्पणन्तु शुचिः कुर्य्या"दित्यत्र "शुचिर्मन्त्रस्नानादिनापी"ति

---

(१) D. Omits the portion bracketed.

(२) A. C. कर्म्मसाद्ग ॰

(३) A. C. शाखान्तरीयाणामेव मन्त्राणां ॰

लक्ष्मीधरः । एवञ्च सायंसन्ध्यायां वचनादेव पुनर्मार्जनविधिः "प्राक्सन्ध्योपासना"दिति बौधायनोक्तेः । श्राद्धादिषु च वचनादेव पृथगङ्गत्वमिति । अग्निहोत्रपञ्चमहायज्ञादावपि यद्यपि पृथङ्मार्जनप्रसङ्गस्तथापि "सर्व्वकर्म्मणाञ्चारम्भ" इति यत्र पृथक् स्नानमङ्गं तत्रैव श्राद्धादौ स्नानकार्य्यं मार्जनविधिरिति प्राय(यो)दर्शनादवगतमिति नाग्निहोत्रादौ पृथक् प्रसङ्गः । योगियाज्ञवल्क्यः,—

असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया ।
मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः ॥
आपो हिष्ठेति वै मान्त्रं मृदालम्भस्तु पार्थिवम् ।
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ॥
[1]यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते ।
वारुणञ्चावगाह्यन्तु मानसं विष्णुचिन्तनम् ॥
कालदोषादसामर्थ्यात् सर्व्वं तुल्यफलं स्मृतम् ।

[इति ।][2]

मानसं प्रवरं स्नानं केचिदिच्छन्ति सूरयः ।
आत्मतीर्थप्रशंसायां व्यासेन गदितं यथा ॥

[3][आपो हिष्ठेति मार्जनमन्त्रमात्रोपलक्षणम् । सर्व्वं तुल्यफलमिति यद्यपि वारुणं मुख्यं मन्त्रस्नानादिकमपि तदसम्भवे तत्कार्य्यकारित्वात् तुल्यफलम् । आत्मतीर्थप्रशंसायाम्—

(१) D. यत् त्वषातप ०

(२) C. Omits the portion bracketed.

(३) D. Omits the portion bracketed.

आत्मा नदी संयमपुण्यतोया
सत्यह्रदा शीलतटा दयोर्म्मिः ।
तत्रावगाहं कुरु राजपुत्र
न वारिणा शुद्ध्यति चान्तरात्मा ॥

इति व्यासवाक्यम् ।] [1]तेनैव तद्वाक्यशेषाद् ब्रह्माकारान्तःकरणवृत्तिरूपनिराकारविष्णुचिन्तनं मानसम् । साकारचिन्तनं तदसामर्थ्ये । शिष्टाः,—

स्वस्थितं पुण्डरीकाक्षं मन्त्रमूर्त्तिं प्रभुं स्मरेत् ।
तत्पादोदकधाराञ्च निपतन्तीं स्वमूर्द्धनि ॥
चिन्तयेद् ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकां तनुम् ।
तया (तया) संक्षालयेत् सर्व्वमन्तर्देहगतं मलम् ॥
इदं स्नानवरं मन्त्रस्नानाच्छतगुणं स्मृतम् ।

एवञ्च मानसं सर्व्वोत्कृष्टमिति । तदसम्भवेऽनुकल्पान्तरम् । अत्र हारीतः,—(हारीतेन)

आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च ।

इति पञ्चस्नानान्युक्त्वा

एतैश्च मन्त्रतः स्नात्वा तीर्थानां फलमाप्नुयात् ।

इत्युक्तम् । तत्र तीर्थस्नानफलत्वेन विधानेऽप्रकरणपाठे यदि कर्म्मभेदस्तदा हारीतोक्तस्य सधर्म्मकत्वे प्रवृत्तत्वात् याज्ञवल्कीयेऽप्याग्नेयादिस्नाने समन्त्रकत्वमतिदेशात् । द्वयोरैक्ये सुतरां समन्त्रकत्वम् । स्कान्दे,—

(१) D. तत एव व्यासवाक्यं तेन एतद्वाक्यशेषाद् ०

पुण्यं कानखले यच्च प्रयागे यच्च सुन्दरि !
तत्फलं सकलं देवि भूतिस्नानेन लभ्यते ॥
उच्छिष्टं वा प्रमत्तं वा नरञ्च हरनन्दिते ।
भस्मच्छन्नं नहि सदा धर्षयन्ति विनायकाः ॥

(इति) आग्नेयस्नानस्य फलान्तरम् ।

विष्णुपुराणे,—

आकाशगङ्गासलिलं समादाय गभस्तिमान् ।
[1]अनन्तगतमेवासौ समुत्क्षिपति रश्मिभिः ॥
तस्य संस्पर्शनिर्द्धूतपापपङ्को द्विजोत्तमः ।
न याति नरकं सद्यो दिव्यस्नानं हि तत् स्मृतम् ॥

(इति) दिव्यस्नानस्य फलान्तरम् ।

एते चानुकल्पा नित्ययोरेव प्रातर्माध्याह्निकस्नानयोस्तदुभयप्रकरणपाठात् । काम्यनैमित्तिकस्नाने तु नैषां प्रवृत्तिः । कार्त्तिकस्नानाद्यसामर्थ्येऽनन्तप्रतिनिधिकर्तृद्वारा वारुणस्नानमेव कारयितव्यम् । पुत्रादीनां प्रतिनिधिकर्तृत्वस्य वक्ष्यमाणत्वाद्दक्षिणादानादिना ब्राह्मणान्तरद्वारा वा वारुणस्नानमिति ।

---

(१) A. C अन्यत्रगत ०।

अप्रायत्ये समुत्पन्ने स्नानमेव न मार्जनादीत्युक्तं

तत्राप्रायत्यनिमित्तान्युच्यन्ते ।

गौतमः,—पतितचाण्डालसूतिकोदक्या*शवस्पृष्टतत्स्पृष्टोपस्पर्शने सचेल उदकोपस्पर्शनात्पूतो भवति । उपस्पर्शनं स्नानं सचेल इतिलिङ्गात् । अत्र तत्स्पृष्टपदं शवस्पृष्टपरमित्येके । अन्ये त्वेकपदोपात्तत्वाविशेषात्सर्व्वत्र सम्बन्ध इत्याहुः । अत्र वर्त्तमानचाण्डालस्पृष्टस्य स्पर्शने स्नानम् । अतीतचाण्डालादिस्पर्शस्याकृतस्नानस्य स्पर्शने तु शातातपः,—

अशुचिं संस्पृशेद् यस्तु एक एव स दुष्यति ।
[1]तं स्पृष्ट्वान्यो न दुष्येत सर्व्वद्रव्येष्वयं विधिः ॥

[इति ।][2] देवलः,—

उपस्पृश्याशुचिस्पृष्टं तृतीयं वापि मानवः ।
तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुद्ध्यति ॥

चण्डालः प्रथमः तत्स्पर्शाद् द्वितीयः तत्स्पृष्टस्पर्शात् तृतीयः । अत्रातीतचण्डालस्पर्शस्य द्वितीयस्य स्पर्शे यदाचमनं तदकामतः कामतस्तु तत्रापि स्नानमेव ।

तत्स्पृष्टिनं स्पृशेद् यस्तु स्नानं तस्य विधीयते ।
ऊर्द्धमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा ॥

---

* अत्र "शव तत्स्पृष्टोपस्पर्शने" इत्येवं रूप एव पाठः सङ्गतः ।

(१) D. संस्पृष्ट्वान्यो ०।

(२) C. Omits the portion bracketed.

इति स्मृत्यन्तरादित्याहुः। शवस्पृष्टस्पर्शे त्वकामतोऽपि स्नानं दोषगुरुत्वादित्यवधेयम्। गुरुत्वञ्च वक्ष्यमाणच्यवनस्मृतौ पृथक् [1]निर्द्देशात्। शवस्पृष्टपदस्य तत्रातीतशवस्पर्शनद्रव्यपरत्वात्। बौधायनः,—चाण्डालेन सहाध्वगमने सचेलस्नानम्। तेन सहैककार्य्येणाध्वगमनम्। अङ्गिराः,—

यस्तु च्छायां श्वपाकस्य ब्राह्मणो ह्यधितिष्ठति।
सचेलो जलमाप्लुत्य घृतं प्राश्य विशुद्ध्यति॥

आपस्तम्बः,—

एकशाखां समारूढ़श्चाण्डालादिर्भवेद् यदि।
ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात्॥

एकशाखाग्रहणमेकावयव्युपलक्षणम्। "अनेकोद्धार्य्ये दारुशैले (दारुशिले) भूमिसमे" इतिवचनादनेकपुरुषवाह्यावयविपरम्। तथा,—

चाण्डालं पतितञ्चैव दूरतः परिवर्जयेत्।
गोबालव्यजनादर्वाक् सचेलो जलमाविशेत्॥

इत्यतिसान्निध्ये स्नानम्। [तेन][2]

युगञ्च [3]द्वियुगञ्चैव त्रियुगञ्च चतुर्युगम्।
चाण्डालपतितोदक्यासूतिकानामधः क्रमात्॥

इति युगादिदेशपरिहारोक्तावपि तन्मध्यगमनं न स्ाननिमित्तं किन्त्वाचमननिमित्तम्। षड़शीत्यङ्गुलं युगम्।

(१) D. निर्द्देशाच्च।
(२) D. Omits the portion bracketed.
(३) D. ० द्विगुणञ्चैव त्रिगुणञ्च चतुर्गुणम् ०।

पराशरः,—

चैत्यवृक्षश्चितिर्यूपश्चाण्डालः सोमविक्रयी।
एतांस्तु ब्राह्मणः स्पृष्ट्वा सचेलो जलमाविशेत्॥

[चितियूपयोः कर्म्मसमाप्तौ स्पर्शनं स्ाननिमित्तम्। वार्त्तिके तु,—"कर्म्ममध्येऽवैधस्पर्शे स्नान"मित्युक्तम्। च्यवनः,—"श्वानं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं चितिकाष्ठं मद्यं मद्यभाण्डं सस्नेहमनुष्यास्थि शवस्पृष्टं महापातकिनं शवं स्पृष्ट्वा सचेलोऽम्भोऽवगाह्योत्तीर्य्याग्निमुपस्पृशेत्।[1]] गायत्र्यष्टशतं जपेत्। घृतं प्राश्य पुनः स्नात्वा द्विराचामेत्।" इदं कामकृते। अभ्यस्ते अग्न्युपस्पर्शनादिकमधिकम्। देवद्रव्योपजीवी देवतायै दत्तस्य हिरण्यादेरपहारेण जीवति यः। तथा,—

देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम्।
असौ देवलको नाम हव्यकव्येषु गर्हितः॥
स्पृष्ट्वा देवलकञ्चैव सवासा जलमाविशेत्।

कालिकापुराणे,—

स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिः।

इदं वैधनिर्म्माल्यग्रहणव्यतिरिक्तपरम्। स्मृतिः,—

शैवान् पाशुपतान् स्पृष्ट्वा वैड़ालव्रतनास्तिकान्।
विकर्म्मस्थान् द्विजान् शूद्रान् सचेलो जलमाविशेत्॥

शैवपाशुपतपदं वामशैवपाशुपतपरं योगियाज्ञवल्क्ये पाशुपतस्य प्रामाण्योक्तेः। कौर्म्मे च,—

(१) D. Omits the portion bracketed.

अन्यानि चैव शास्त्राणि [1]लोके सम्मोहनानि च।
वेदवादविरुद्धानि मयैव कथितानि च।
वामं पाशुपतं शैवं दक्षिणञ्चैव भैरवम्॥

इत्यप्रमाणस्य पृथक् निर्द्देशात्।

मनुः,—

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा।
स्नात्वा सचेलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति॥

शुद्धेरित्यनुवृत्तौ विष्णुः,—सर्व्वस्यैव हि प्रेतस्य बान्धवैः सहाश्रुपातं कृत्वा स्नानेन। मार्कण्डेयपुराणे,—

अभोज्यसूतिकाषण्ढमार्जाराखुश्वकुक्कुटान्।
पतितापविद्धचाण्डालमृतहारांश्च धर्म्मवित्।
संस्पृश्य शुद्ध्यति स्नानात् उदक्याग्रामशूकरौ॥

अत्र मार्जारपदं स्थिरस्थितमार्जारपरम्। "मार्जारश्चंक्रमी शुचि"रिति स्मृत्यन्तराच्चंक्रमणमार्जारस्पर्शे न स्नानम्। आखुपदं कुक्कुटपदसमभिव्याहाराद् ग्राम्याखुपरम्। [2]एवं "मार्जारमूषिकासनशयनाम्बुविप्रुषो नित्यं मेध्या" इति, "मार्जारमूषिकस्पर्शे",—"कर्म्म कुर्व्वन्नपः स्पृशेत्" इति चापवादवचनञ्चंक्रमणमार्जारपरमारण्याखुपरञ्च। कुक्कुटश्चात्र ग्राम्य एव स्नाननिमित्तम्। तथा च देवलः,—

श्वपाकं पतितं व्यङ्गमुन्मत्तं शवहारकम्।
सूतिकां सूयिकां नारीं रजसा च परिप्लुताम्॥

(१) C. लोकसम्मो०।
(२) A C. एवञ्च मार्जार०।

श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः।
सचेलं सशिरः स्नात्वा तदानीमेव शुद्ध्यति॥
अशुद्धान् स्वयमप्येतानशुद्धो यदि संस्पृशेत्।
विशुद्ध्यत्युपवासेन पुनः कृच्छ्रेण चैव हि॥

आरण्यकुक्कुटवराहस्पर्शे न स्नानम्। [[1]स्मृत्यन्तरात् खरोष्ट्रस्पर्शे स्नानम्।]

अत्र विशेषमाह शातातपः,—

रजकश्चर्म्मकारश्च व्याधजालोपजीविनौ।
चेलनिर्णेजकश्चैव नटः शैलूषकस्तथा॥
मुखे भगस्तथा श्वा च वनिता सर्व्ववर्णगा।
चक्री ध्वजी विध्यघाती ग्राम्यकुक्कुटशूकरौ॥
एभिर्यदङ्गं संस्पृष्टं शिरोवर्जं द्विजातिषु।
तोयेन क्षालनं कृत्वा आचान्तः शुचितामियात्॥

शिरोवर्जमितिशिरःपदं करव्यतिरिक्तनाभ्यूर्द्ध्वभागपरमित्युक्तमेव। अत्र श्वकुक्कुटवराहाणामत्यमेध्यत्वात् अकामतोऽधमाङ्गस्पर्शे आचमनं कामतस्तु स्नानमेव। ब्रह्मपुराणे,—उदक्यासूतिकाश्वान्त्यावसायिमृतहारस्पर्शे स्नात्वा द्वादशवारमृद्ग्रहणं मैथुने वमने चेत्युक्तम्। व्यासः,—

भासवानरमार्जारखरोष्ट्राणां शुनां तथा।
शूकराणाममेध्यञ्च स्पृष्ट्वा स्नायात् सचेलकः॥

(१) D. Omits the portion bracketed

लघुहारीतः,—

श्वविष्ठां काकविष्ठाञ्च कङ्कगृध्रनरस्य च।

अधोत्सृष्टस्तु(?) संस्पृश्य सचेलो जलमाविशेत्॥

नरविष्ठा परकीया। अधोत्सृष्टो(?) मूत्रपुरीषशुक्रोत्सर्गेणाशुद्धः।

शङ्खः,—

रथ्याकर्द्दमतोयेन ष्ठीवनाद्येन वाप्यथ।

नाभेरूर्द्धं नरः स्पृष्टः सद्यः स्नानेन शुद्ध्यति॥

ब्राह्मे,—

उच्छिष्टेनाथ विप्रेण विप्रः स्पृष्टस्तु तादृशः।

उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ॥

तथा,—

पलाण्डुलशुनस्पर्शे स्नात्वा नक्तं समाचरेत्।

मनुः,—

वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत्।

आचामेदेव भुक्तान्नं स्नानं मैथुनिनः स्मृतम्॥

भुक्तान्नं वान्त इत्यर्थः। तेन सद्यो वान्ते आचमनमात्रम्। मैथुनिनः ऋतौ। ब्राह्मे,—

मानुषास्थि तु संस्पृश्य दग्धं सस्नेहमेव वा।

स्नायाद् गां संस्पृशेत् सूर्य्यं पश्येद् विष्णुमनुस्मरेत्॥

[१]मानुषास्थिग्रहणमभक्ष्यपञ्चनखास्थिपरं स्मृत्यन्तरसंवादात्। देवलः,—

मानुषास्थि वसां विष्ठामार्त्तवं मूत्ररेतसी।

(१) C. D. मानुषास्थिग्रहणं भक्ष्यपञ्च०।

मज्जानं शोणितं वापि परस्य यदि संस्पृशेत्।

स्नात्वावमृज्य लेपादीनाचम्य स शुचिर्भवेत्॥

तान्येव स्वानि संस्पृश्य पूतः स्यात् परिमार्जनात्।

चालनात्। विष्णुः,—"नाभेरधस्तात् प्रबाहुषु कायिकैर्मलैः सुराभिर्मद्यैर्वोपहतो मृत्तोयेन तदङ्गं [१]प्रक्षाल्याद्भिः शुद्धो भवति। अत्यन्तोपहतश्च तदङ्गं मृत्तोयैः प्रक्षाल्य स्नानेन। चक्षुष्युपहतः स्नात्वा पञ्चगव्येन शुद्धो भवति दशनोपहतश्च।" प्रबाहुर्हस्तः। अत्यन्तोपहतः नाभ्यूर्द्धकायस्पृष्टः। अङ्गिराः;—

इन्द्रियेषु प्रविष्टं स्यादमेध्यं यदि कर्हिचित्।

मुखेऽपि संस्पर्शगतं तत्र स्नानं विशोधनम्॥

विशोधनं इन्द्रियमुखक्षालनं स्नानञ्च कार्य्यम्। हारीतः,— स्नातः शुद्धो भवति। अजीर्णवान्तश्मश्रुकर्म्मायोनिपशुदिवामैथुनगमने च। सुमन्तुः,—अनुदकमूत्रपुरीषकरणे नखकेशरुधिरप्राशने सद्यःस्नानं घृतकुशहिरण्योदकप्राशनञ्च। लघ्वापस्तम्बः,—

यद् विष्ठितं काकवलाकिकाभ्या-

समेध्यलिप्तञ्च भवेच्छरीरम्।

श्रोत्रे मुखे च प्रविशेत्तु सम्यक्

स्नानेन लेपोपहतस्य शुद्धिः॥

काकवलाकाभ्यां यस्योपरि विष्ठा कृता तच्छरीरममेध्यलिप्तं स्नानेन शुद्ध्यति। [२]श्रोत्रमुखप्रवेशे गुरु प्रायश्चित्तमत्र।

(१) A. C. प्रक्षाल्य तद्रेतःशुद्धो भवति।

(२) D. श्रोत्रे मुखे प्रविष्टे गुरु०।

पादेतरांशेन श्मशानस्पर्शे, संवत्सरपर्य्यन्तनित्यकर्म्माकारिस्पर्शे [[1]पुनर्म्मनो(?) जपेत् महाव्याहृतिभिः समाज्याहुति स्नानम्। स्मृत्यन्तरात् कृष्णाजिनप्रतिग्राहिस्पर्शे स्नानम्।

अस्पृश्योऽसौ द्विजो राजन् चितियूपसमो हि सः।

(इति) यूपसाम्येन निन्दनात्। ग्रामयाजकस्पर्शे स्नानं स्मृत्यन्तराच्चिताधूमस्पर्शे च। [2]पुत्रजन्म स्नाननिमित्तं बन्धुमरणञ्च।

ग्रहणे श्रावमाशौचं विमुक्तौ सूतकं स्मृतम्।

इति ग्रहणमुक्तेरपि स्नाननिमित्तत्वम्। यत्तु "चाण्डालादिस्पर्शे] पुनर्म्मनो(?) जपेत् महाव्याहृतिभिः [3]समाज्याहुतिभिर्जुहुया"दिति तत्कामतोऽभ्यासे। स्मृत्यन्तरे,—अस्थिसञ्चयनात् पूर्व्वमबान्धवस्य रोदने स्नात्वोपोष्य शुद्धिः। शूद्रे त्रिरात्रेण। पराशरः,—

अस्तं गते यदा सूर्य्ये चाण्डालं पतितं स्त्रियम्।
सूतिकां स्पृशतश्चैव कथं शुद्धिर्भविष्यति।
स्नानमाचमनं प्रोक्तं दिवोद्धृतजलेन च॥

दिवोद्धृतजलाभावे त्वाह,—

जातवेदाः सुवर्णञ्च सोममार्गस्तथैव च।
ब्राह्मणानुमतेनैव स्पृष्ट्वा स्नात्वा च शुद्ध्यति॥

अग्निसुवर्णाकाशानामेकं स्पृष्ट्वा ब्राह्मणानुज्ञया जलमुद्धृत्य रात्रौ स्नायादित्यर्थः। अत्र हेतुमाह,—

(१) A. D. Omit the portion bracketed.
(२) C. पुत्रजन्म स्नानेन शुद्ध्यति।
(३) A. समाज्याहुतीर्जुहुयादिति ०।

आचान्तमनुचान्तञ्च निशि स्नानं न विद्यते।

अनुचान्तं भूमिष्ठजले स्नानमाचान्तञ्च निशि न विद्यते यत इत्यर्थः।

---

[1]अथापवादः।

अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे।
मार्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसम्भवे।
निमित्तेष्वेषु सर्व्वेषु कर्म्म कुर्व्वन्नपः स्पृशेत्॥

शिष्टाः पठन्ति,—

विष्ण्वालयसमीपस्थान् विष्णुसेवार्थमागतान्।
[2]चाण्डालपुक्कशादींश्च स्पृष्ट्वा न स्नानमाचरेत्॥

इदञ्चोत्सवादौ बहुजनसङ्कुले। तथा,—

तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे।
नगरे ग्रामदाहे च स्पृष्टास्पृष्टं न दुष्यति॥

स्पृष्टास्पृष्टमीषत्स्पृष्टमित्याहुः। आचारपल्लवे,—

कुण्डे मञ्चे शिलापृष्ठे नौकायां गजवृक्षयोः।
संग्रामे सङ्क्रमे चैव स्पर्शदोषो न विद्यते॥

स्मृतिः,—

वाक्प्रशस्तं चिरातीतमनेकान्तरितं लघु।

(१) A. C. अत्रापवादः।
(२) A. D. चाण्डालपुक्कशान् वापि स्पृष्ट्वा ०।

शुद्धमित्यर्थः । चिरातीतं उच्छिष्टभाण्डखर्परादिकं क्षुद्रमार्गादिस्थं न स्पर्शे स्नाननिमित्तम् । अनेकपरम्परया चाण्डालादिस्पर्शनं न स्नाननिमित्तम् । एकान्तरिते स्नानमित्युक्तमेव । लघु [1]उच्छिष्टान्नवाष्पं तत्स्पृष्टमारुतास्पृश्याग्निधूमादि नाशुद्धम् । तथा मक्षिका सन्ततिर्द्धारा । सन्ततिः सन्तन्यमानं तृणादि । धारा जलक्षीरघृतादेः पात्रादधः पतन्तीति तलेऽमेध्यसंस्पृष्टापि पात्रं नरं वा न दूषयति । तथा,—

पादुके वापि गृह्णीया[2]दस्पृश्यस्पर्शवारणे ।

तथा,—

सप्तरात्रोषितां विष्ठां वशिष्ठः प्राह मृत्तिकाम् ।

इदञ्चाप्रत्यभिज्ञायमाने गन्धाद्यभावे च[3]बोध्यम् । तथा,—

रथ्याकर्द्दमतोयानि नावः पन्थास्तृणानि च ।
मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च ॥

तथा,—

पादौ शुचिर्ब्राह्मणानां पदास्पृष्टञ्च कामतः ।

[4]इति पादशुद्धिस्तस्या अपवादः । इत्यादिवाक्यानामाचारोपष्टम्भान्महाजनपरिग्रहेणाप्रामाण्यकारणाभावाच्च प्रामाण्यम् । इति नैमित्तिकस्नानानि ।

(१) D. उच्छिष्टान्नवातस्पृष्टमारुतास्पृश्याग्निधूमादिकं नाशुभम् । तथा ० ।
(२) D. ० दस्पर्शस्पर्श ० ।
(३) D. बोद्धव्यम् ।
(४) A. C. इति याशुद्धि ० ।

अथ प्रातःस्नानप्रयोगः ।

वहिरेव जलेन देहक्षालनम् । [[1]मृदा त्रिः पादक्षालनम् ।] आचमनम् । वस्त्रद्वयधारणम् । [[2]पवित्रोपग्रहधारणम् ।] शिखायज्ञोपवीतानुसन्धानम् । जले प्रवेशः । उद्धृतोदकपक्षे प्राङ्मुखतयोदङ्मुखतया वोपवेशनम् । त्रिमात्रप्रणवोच्चारणम् । अघमर्षणसूक्तस्याघमर्षणऋषिरनुष्टुप्छन्दः [3]भाववृत्तं दैवतं स्नाने विनियोगः ।

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ।
ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥
समुद्रादर्णवादधिसंवत्सरो अजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥
सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयत् ।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ॥

[इति[4]] वारत्रयमुक्त्वा [5]गङ्गे इहागच्छेत्येवं तीर्थावाहनम् । कृत्रिमादिषु गङ्गादिशब्देनावाहनम् । पुनस्त्रिवारमुच्चार्य्य जलावर्त्तनरूपं जलाभिमन्त्रणम् । पुनस्त्रिवारमुच्चार्य्य जलचुलुकपानम् ।

(१) D. Omits the portion bracketed.
(२) D. Omits the portion brackoted.
(३) D. भावृतं ० ।
(४) D Omits the portion bracketed.
(५) D. तीर्थनाम कृत्वा गङ्गे अत्रागच्छेत्येवं तीर्थावाहनम् ० ।

[1]पुनस्त्रिवारपाठेन मार्जनम् जले निमज्ज्य त्रिवारमघमर्षणजपः । उद्धृतस्नानेऽन्तर्जपकाले जलकुम्भेनाभिषेचनं यावत्-पाठम् । ततोऽघमर्षणं त्रिः पठित्वा मज्जनम् । विष्णुस्मरणम् । उद्धृतोदकस्नाने न मन्त्रः । स्नानं प्रवाहाभिमुखस्य प्रवाहाभावे सूर्य्याभिमुखस्य ।

---

[2]अथ वारुणमन्त्रैः स्नानम् ।

तत्र प्रयोगः । पूर्व्ववद्देहक्षालनादि । जले प्रविश्य त्रिमात्रप्रणवजपः । प्रजापतिर्ऋषिर्गायत्रीच्छन्दो वरुणो देवता तीर्थावाहने विनियोगः । "इमम्मे वरुणश्रूधी हवमद्या च मृलय । त्वामवस्युरा चके ।" अनेन तीर्थावाहनम् । प्रजापतिः । त्रिष्टुप् । वरुणः । जलाभिमन्त्रणे ।

तत्वायामि ब्रह्मणा वंदमान-
स्तदाशास्ते यजमानो हविर्भिः ।
अहेलमानो वरुणेह बोध्यु-
रुशंसमा न आयुः प्रमोषीः ॥

अनेन जलाभिमन्त्रणम् । शुनः शेपः । त्रिष्टुप् । वरुणः । जलपाने ।

उरुं हि राजा वरुणश्चकार
सूर्य्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽक-
रुतापवक्ता हृदयाविधश्चित् ॥

(१) E. F. Add before it द्विराचमनम् ।

(२) D. अथ वारुणस्नानम् ।

अनेन जलपानम् । द्विराचमनम् । प्रजापतिः । गायत्री । वरुणः । मार्जने । "योवन्तं जिघांसति तमभ्यमीति वरुणः परोमभिः परस्क"(?) अनेन मार्जनम् । धाम्न इत्यस्य प्रजापतिः । मुञ्चेत्यन्तं यजुः(?) । यदाहु(?)रिति गायत्री । वरुणः । अन्तर्जलजपे । "धाम्नो धाम्नो राजन्नितो वरुण नो मुञ्च यदापो अघ्निया वरुणेति शपामहे ततो वरुण नो मुञ्च ।" जले निमज्य जपः । शुनःशेपः । त्रिष्टुप् । वरुणः । स्नाने । "उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥" इति मज्जनम् । विष्णुस्मरणम् ।

कृष्ण कृष्ण महाबाहो भक्तानामार्त्तिनाशन ।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे ॥

इति पादोदकग्रहणम् । तत्र जल एव स्थित्वा माध्याह्निकवक्ष्यमाणविधिना तर्पणं वस्त्रनिष्पीड़नान्तम् । सन्ध्याहोमकालसङ्कोचशङ्कायां संक्षेपतर्पणम् । तत्र [1]नरसिंहपुराणोक्तविधिः । देवांस्तर्पयामीति सव्यतया त्रिवारमञ्जलिं देवतीर्थेन । देवगणांस्तर्पयामीति पुनरञ्जलित्रयदानम् । एवं कण्ठलग्नयज्ञोपवीतः ऋषींस्तर्पयामीत्यञ्जलित्रयं दद्यात् । पुनः ऋषिगणांस्तर्पयामीत्यञ्जलित्रयम् । ततः प्राचीनावीतिनो दक्षिणामुखस्य पितॄंस्तर्पयामीति पितृतीर्थेनाञ्जलित्रयम् । [[2]एवं] पितृगणांस्तर्पयामीत्यञ्जलित्रयम् । अथवा भूर्देवांस्तर्पयामि भुवर्देवां-

(१) D. नारसिंहोक्त ० ।

(२) D. Omits the portion bracketed.

स्तर्पयामि स्वर्देवांस्तर्पयामि भूर्भुवःस्वर्देवांस्तर्पयामीतिदेवतर्पणम् । भूऋर्षींस्तर्पयामि भुव ऋर्षींस्तर्पयामि भूर्भुवःस्वऋर्षींस्तर्पयामीति ऋषितर्पणम् । भूः पितॄंस्तर्पयामि भुवः पितॄंस्तर्पयामि स्वः पितॄंस्तर्पयामि भूर्भुवःस्वःपितॄंस्तर्पयामीति पितृतर्पणम् । अथवा —

आब्रह्मस्तम्बपर्य्यन्तं जगदेतच्चराचरम् ।
मया दत्तेन तोयेन तृप्यत्वेतच्चतुर्विधम् ॥

इति जलाञ्जलित्रयदानं देवधर्म्मेण ।

मार्जनक्रमः,—"सूर्य्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत्किञ्चिद्दुरितं मयि इदमहमापोऽमृतयोनौ सूर्य्ये ज्योतिषि परमात्मनि जुहोमि स्वाहा" इति जलचुलुकपानम् । वैकल्पिकं द्विराचमनम् । "शन्न" इत्यस्य,—प्रजापतिः । अनुष्टुप् । आपः । मार्जने । "शन्न आपो धन्वन्याः शमनः सन्तु नूप्याः शन्नः समुद्रिया आपः शमनः सन्तु कूप्याः ।" इति कुशत्रयेण शिरसि जलप्रक्षेपः । कोकिलो राजपुत्रः । अनुष्टुप् । आपः । मार्जने । "द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ।" इत्यनेन मार्जनम् । आपो हि ष्ठा । सिन्धुद्वीपः । गायत्री । आपः । मार्जने । "आपो हि ष्ठा मयो भुव स्ता न ऊर्ज्जे दधातन महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः । तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ

आपो जनयथा च नः ।" अनेन मार्जनम् । [1]पुनरघमर्षणसूक्तस्य ऋष्यादिस्मरणम् । "ऋतञ्चे"त्यादि "दिवञ्च पृथिवीञ्चान्तरिक्षमथोस्व"रित्यन्त्येन मार्जनम् । तत्रापि पूर्व्ववद्देहक्षालनं आचमनं जलप्रवेशश्च । ततो मार्जनम् । अथवा "शन्न आप" इत्यादिमन्त्रत्रयेण मार्जनं कृत्वा अघमर्षणसूक्तेन प्राणायामः कार्य्यः । ईदृशं वा मन्त्रस्नानम् । तत्रापि पूर्व्ववद्देहक्षालनम् । समन्त्रकजलभक्षणञ्च पूर्व्वतः कार्य्यम् । अप्रायत्ये तु लालादिसङ्करनिमित्ते [2]सशिरस्कस्नानं कृत्वा [3]यथोक्तमार्जनम् । [4]तत्राप्यसामर्थ्ये नाभेरधः प्रविश्याप्सु अङ्गप्रोञ्छनम् । [5]तत्राप्यसामर्थ्ये आर्द्रवस्त्रेण सर्व्वाङ्गप्रोञ्छनं [6]वस्त्रक्षालनम् । चाण्डालादिस्पर्शनिमित्ताप्रायत्ये तु दशकृत्वः अन्येन स्नात्वा स्पर्शनम् । ततो मार्जनं कृत्वा सन्ध्यारम्भः ।

अथ भौमस्नानम् ।

तच्च अङ्गप्रोञ्छनादिकं कृत्वा गङ्गामृत्तिकादिना सर्व्वाङ्गलेपनम् । तत्र मन्त्रः,—

अनेनैव वराहेण उद्धृतासि वरप्रदे ।
कृष्णेनाक्लिष्टकार्य्येण चक्रहस्तेन विष्णुना ॥

---

(१) D. अघमर्षणसूक्तस्य ० ।
(२) A. C. अशिरस्क ० ।
(३) C. तथोक्त ० ।
(४) D. अत्राप्य ० ।
(५) D. अत्रा ० ।
(६) C. कृत्वा मार्जनम् ।

धरणि त्वं महाभागे भूमि त्वं धेनुरव्यये ।
लोकानां धरणि त्वं हि मृत्तिके हन पातकम् ॥
मनसा कर्म्मणा वाचा वरदे वारिजेक्षणे ।
त्वया हतेन पापेन जीवामस्त्वत्प्रसादतः ॥

अयं मन्त्रो यद्यपि वराहदंष्ट्रोद्धृतमृदालम्भे श्रुतस्ततोऽतिदेशेनेह प्रवर्त्तते । वराहदंष्ट्रोद्धृतमृदालम्भस्तु काम्यत्वात् सन्ध्यानन्तरमेव कार्य्यः ।

वराहदंष्ट्राभिन्नाया धराया मृत्तिकां द्विजः ।
मन्त्रेणानेन यो बिभ्रन्मूर्द्ध्नि पापात् प्रमुच्यते ॥
आयुष्मान् बलवान् धन्यः पुत्रपौत्रप्रतिष्ठितः ।
क्रमाद् भुवि दिवं प्राप्य कर्म्मान्ते मोदते सुरैः ॥

इतिवचनात् ।

अथाग्नेयस्नानम् ।

तच्च [1]भस्मना कार्य्यम् । तत्र मुख्यं गार्हपत्यभस्म । [[2]तदभावे स्मार्त्तभस्म] तदभावे पञ्चब्रह्मसाधितं भस्म न तु लौकिकम् ।

एवं संस्काररहितं न तु ग्राह्यं कथञ्चन ।

इति निषेधात् । मन्त्रस्तु,—

(१) C. भस्मना स्नानं कार्य्यम् ।
(२) C. Omits the portion bracketed.

आग्नेयमग्निलिङ्गेन मन्त्रेण स्नानमाचरेत् ।
वायव्यं वायुलिङ्गेन दिव्यं सौरेण सर्व्वदा ॥

इति वाक्याद् भस्मस्नाने आग्नेयमन्त्रः । "अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयमपां रेतांसि जिन्वति ।" इत्यनेन सर्व्वाङ्गे भस्मसंयोगः कार्य्यः ।

अथ वायव्यस्नानम् ।

[1]गोखुरोद्भूतरजसा वायुप्रचलितेन सर्व्वाङ्गसंयोगः । तत्र मन्त्रः,—

वायुर्वा त्वा मनुर्वा त्वा गन्धर्व्वाः सप्तविंशतिः ।
ते अग्रे अश्वमायुञ्जन्ते अस्मिन् जवमादधुः ॥

अथ दिव्यस्नानम् ।

तच्चातपवृष्टौ निरावरणस्यावस्थानम् । तच्च कृत्तिकादिविषमपर्य्यायायुग्मनक्षत्रेषु दिग्गजोज्झितं गङ्गाजलमिति बुद्धिः कार्य्या । रोहिण्यादियुग्मनक्षत्रेषु सूर्य्यरश्मिभिरानीतमिदं गङ्गाजलमिति बुद्धिः कार्य्या । तत्कथनस्य फलान्तराभावात् । "उदुत्यं जातवेदस"मिति मन्त्रमुच्चार्य्यातपवृष्टिमध्ये निरावरणोऽवतिष्ठेत ।

(१) D. गोक्षुरोद्भूत० ।

अथ मानसस्नानम् ।

"विष्णु"पदं यद्यपि शुद्धचैतन्ये लाक्षणिकमेव तथाप्यविद्योपहितव्यापकत्वगुणपुरस्कारेण ब्रह्मण्येव मुख्यं साकारेऽपि गौणमेवेति साकारनिराकारयो गौंणत्वा[1]विशेषेऽपि

आत्मतीर्थप्रशंसायां व्यासेन गदितं यथा ।

इति वाक्यशेषादत्र निराकारस्यैव व्यासवाक्ये कीर्त्तनाद् ब्रह्माकारान्तःकरणवृत्तिरेव मुख्यं [2]मानसस्नानं तदसम्भवे चतुर्भुजाद्याकारविशिष्टस्य स्मरणं तस्यैव स्वरूपमिति । यद्वा अविद्याकल्पितव्यापकत्वगुणविशिष्टचैतन्यमेव मुख्यार्थत्वाद् ध्येयमिति । यत्तु,—आकाशस्थमन्त्रमूर्त्तिविष्णुध्यानपूर्व्वकं तत्पादगलितामृतधारां ब्रह्मरन्ध्रेणान्तःप्रविष्टां विचिन्त्य तेन सर्व्वदेहक्षालनचिन्तनं तन्मन्त्रोपासकानां मानसस्नानम् ।

एवं स्नात्वा स्नाननिमित्तं द्विराचमनम् । तच्च जले पादमेकं स्थले पादमेकं दत्वा कार्य्यम् । तदनन्तरं द्रुपदामन्त्रत्रिवारपाठेन अघमर्षणत्रिवारपाठेन वा [गायत्रीत्रिवारपाठेन वा[3]] महाव्याहृतिभिः प्रणवेन वा जलचुलुकपानम् । पुनर्द्विराचमनमिति । पैठीनसिः,—"अन्तरुदक आचान्तोऽन्तरेव शुद्धो भवति । वहिरुदक आचान्तो वहिरेव शुद्धो भवति । तस्मादन्तरेकं वहिरेकं कृत्वा पादमाचामेत् ।" योगियाज्ञवल्क्यः,—

(१) D. ० विशेषेण ० ।

(२) A. C. मानसं स्नानम् ।

(३) D. Omits the portion bracketed.

उदके चोदकस्थश्च स्थलस्थश्च स्थले शुचिः ।
पादौ प्रस्थाप्योभयत्राप्याचान्त उभयतः शुचिः ।
यदा शुचिस्थले वा स्यादुदके देवतापितॄन् ।
तर्पयेत्तु यथाकाममप्सु सर्व्वं प्रतिष्ठितम् ॥
आचान्तः पुनराचामेन्मन्त्रवत्स्नानभोजने ।
द्रुपदां वा त्रिरावृत्य तथा चैवाघमर्षणम् ॥
गायत्रीं वा त्रिरावृत्य महाव्याहृतिभिस्तथा ।
सोपांशुप्रणवेनापि आपः पीता अघापहाः ॥

अत्र च "पादौ प्रस्थाप्योभयत्राचान्त" उभयत्र जले स्थले च शुचिरिति स्नानान्त्या[1]चमनं विधाय स्थलस्याशुद्धत्वे जलमध्य एव तर्पणं कृत्वा स्नानान्त्याचमनं कार्य्यमित्युक्त्वा "आचान्तः पुनराचामे"दित्यादिना "मन्त्रवत्स्नानभोजन" इति स्नानशब्देन स्नानान्त्याचमनमनूद्य तदनन्तरं [द्रुपदादिमन्त्रविकल्पविशिष्टं जलचुलुकपानं विधीयते । एषा चात्र योजना स्नाने भोजने निमित्ते यत् "आचान्तः पुनराचामेत्" तदनन्तरं मन्त्रवत् "आपः पीता अघापहाः" इत्युत्तरेण सम्बन्धः । मन्त्रविशेषापेक्षायां[2]] द्रुपदादिविशेषविधिरिति द्रुपदादिवैकल्पिकमन्त्रविशिष्टं यथा स्यात् तथा स्नानभोजनानन्तरं द्विराचमनानन्तरं (द्विराचमनान्तरं) जलचुलुकं पिबेदिति विशिष्टविधिः । न च योगियाज्ञवल्क्येन,—

(१) A. ० चमनमभिधाय ० ।

(२) C. Omits the portion bracketed.

उपस्थानादिर्यस्तावान् मन्त्रवत्कीर्त्तितो विधिः।
निवेदनान्तं तत् स्नानमित्याहुर्ब्रह्मवादिनः॥

इति। "उरुंहो"ति तोयोपस्थानप्रभृति"देवा गातुविद" इति जप्यनिवेदनमित्यन्त(निवेदनेत्यन्त)कर्म्मकलापस्य स्नानशब्दपरिभाषणात् तन्मध्ये माध्याह्निकसन्ध्यायाः प्रवेशात् स्नानशब्देन मध्याह्नसन्ध्यातर्पणाघमर्षणमन्त्रकप्राथमिकजलपानमनूद्य तत्र मन्त्रविकल्पविधि[1]र्भोजनोत्तरं मन्त्रविशिष्टं जलपानं विधीयत इति [[2]न। एतद्द्वयमेकशब्दस्य शक्यम्।] तदुक्तं "मिथश्चानर्थसम्बन्धः"।

वैश्वदेवमुपादाय देवता नोपदिश्यते।
सह विध्यनुवादौ हि नैकः शब्दः समश्नुते॥

इति(वाच्यम्)। किञ्च सन्ध्यान्तर्गतजलपानं "ऋतमित्यभिमन्त्र्य चे"त्यघमर्षणमन्त्रविशिष्टमुत्पन्नम्। तत्र मन्त्रान्तरमुत्पत्तिविशिष्टमन्त्रावरुद्धे विधातुमशक्यमिति बलादुदकपानानन्तरं (पानान्तरं) समन्त्रकं विधेय[3]मापद्येत। नचैतदिष्टम्। यत्तु,—

(१) C. Here adds भोजनानन्तरं द्विराचमनानन्तरञ्च समन्त्रकजलभक्षणं विधीयत इति [द्रुपदादिमन्त्रविशिष्टं जलचुलुकपानं विधीयते। एषा चात्र योजना। स्नाने भोजने निमित्ते यदाचान्तः पुनराचामेत् तदनन्तरं मन्त्रवदापः पीता अघापहा इत्युत्तरेण सम्बन्धः। मन्त्रविशेषापेक्षायाम्।] अतएव अनन्तरमाचमस्य श्लाव्यचात्मानमिति सन्ध्याकर्म्मानुमन्त्रणं तस्माच्च स्नानान्ताचमनानन्तरसमन्त्रकमुदकभक्षणमस्तीतिवाच्यम्। एवञ्च सति वैरस्यं स्यात्। आपः पीता इति पदेनैकेन जलपानं सन्ध्यान्तर्गतमनूद्यते।

Except the portion bracketed A. reads as C. after the mark of 1.

(२) D. Omits the portion bracketed.

(२) D. ० मापद्यते।

माध्याह्निककर्म्मकलापस्य "निवेदनान्तन्तु (न्तत्) स्नान"मिति स्नानशब्दवाच्यत्वकीर्त्तनं तदर्थवादमात्रम्।

अगम्यागमनात् स्तेयात् पापेभ्यश्च प्रतिग्रहात्।
रहस्याचरितात् पापान्मुच्यते स्नानमाचरन्॥

इति वक्ष्यमाणविधिप्ररोचनार्थम्। तेन यथाप्राप्तानुवादत्वात् तीर्थविसर्जनस्य [1]जप्यनिवेदनपूर्व्वकालीनस्य स्नानाङ्गत्वात् सन्ध्यादेः [2]स्नानानङ्गत्वेऽपि बहुमन्त्रत्वेन स्नानस्य प्राशस्त्यमुच्यते। तथा च मत्स्यकच्छपमण्डूकास्तोये मग्नाः स्नानफलं न लभन्त इतिवचनान्मन्त्रबहुत्वेनैव स्नानस्य फलजनकत्वमिति व्यक्तमर्थवादत्वम्। तेन स्नानपदस्य सन्ध्याकर्म्म न वाच्यम्। यत्तु पूर्व्वं वस्त्रपरिवर्त्तनविधानात् स्नानान्त्याचमनप्रत्यभिज्ञा नास्तीति तन्न "पादौ प्रक्षाप्योभयत्राचान्त" इत्यनेन सन्निधिसम्पादनात्। न च "द्रुपदां त्रिरावर्त्त्ये"ति द्रुपदादेरावृत्ति[3]कर्म्मत्वेन निर्द्देशात् "महाव्याहृतिभिस्तथे"ति "सोपांशुप्रणवेनापो"ति व्याहृतिप्रणवयोर्भिन्न[4]कार्य्यसमुच्चयः। "तथा" शब्दो"ऽपि" शब्दश्च समुच्चयार्थः। तेन द्रुपदां त्रिरावृत्त्यनन्तरं भूर्भुवःस्वरोमित्युच्चार्य्य [5]जलपानं, एवमघमर्षणान्ते भूर्भुवः स्वरोमित्युच्चार्त्त जलपानं गायत्र्यनन्तरञ्चेतिवाच्यम्। द्रुपदामितिकर्म्मत्वस्य कर्त्तृव्यापारव्याप्यत्वघटितत्वेन करणत्वान्तर्गति

(१) D. जपे निवेदन ०।

(२) A. D. स्नानाङ्गत्वेऽपि ०।

(३) D. कर्म्मत्वेन च ०।

(४) A. C. ० कार्य्यात् समुच्चयः।

(५) A. C. वा जलपानं गायत्र्यनन्तरं वेतिवाच्यम्।

व्याहृतिभिरित्यत्रापि व्याहृतिभिरावृत्त्येत्यावृत्तिकर्म्मत्वं व्याहृतीनां तृतीयोपात्तमस्त्येवेत्येकार्थत्वाद्विकल्पः । सोमेन यजेतेति सोमस्य तृतीयया करणत्वेऽपि (क)न्यग्रोधस्तिराहृत्य भक्षं प्रयच्छेदिति फलचमसस्य कर्म्मत्वेऽपि यागसम्बन्धं विना भक्षकर्म्मत्वानुपपत्तेरर्थात् यागकरणत्वेऽनेकार्थत्वात् सोमबाधकत्वं यथेति । "तथा" शब्दोऽपि यथा गायत्री विकल्पेऽत्र तथा व्याहृतयोऽपि । एवं प्रणवोऽपीति विकल्पातिदेशार्थ एवेति सर्व्वं समञ्जसम् । शङ्खः,—

अनेन विधिना स्नातः अमेध्ये स्नानवाससी ।
परिवर्त्तितवासाश्चेत्तीर्थतीर उपस्पृशेत् ॥

तेन जलमध्ये तर्पणादिकरणे जल एव स्नानान्त्याचमनम् । तत्रैव समन्त्रकजलभक्षणम् । जलमध्य एव सर्व्वकर्म्मकरणाद्वहिः शुद्ध्यनपेक्षणादन्तरेकं वहिरेकमित्यस्य जलमध्ये न प्रसङ्गः । वस्त्रपरिवर्त्तनानन्तरं तीरे स्थितः अन्तरेकं वहिरेकं पादं कृत्वाचामेदित्यर्थः । तेन याज्ञवल्कीये वस्त्रपरिवर्त्तनानन्तरं समन्त्रकजलभक्षणविधानं [१]नानुपपन्नम् । विष्णुः,—"स्नातः सोष्णीषे धौते वाससी बिभ्रयात् । नाङ्गेभ्यस्तोयमुद्धरेत् । नाप्रक्षालितं पूर्व्वधृतं वासो बिभ्रयात् ।" उष्णीषधारणं शिरोजलनिर्णेजनार्थम् । तथा च द्रोणपर्व्वणि युधिष्ठिरस्नाने,—

राजहंसनिभं प्राच्यमुष्णीषं शिथिलार्पितम् ।
जलक्षयनिमित्तं वै वेष्टयामास मूर्द्धनि ॥

(क) Should be न्यग्रोधस्तिभिनीराहृत्य भक्षं O See जैमिनीयन्यायमालाविस्तरस्य अध्यायस्तृतीयः पादः पञ्चमः अधिकरणमेकोनविंशमम् ।

(१) A. चानुपपन्नम् ।

तेन "नाङ्गेभ्यस्तोयमुद्धरेदि"ति शिरोव्यतिरिक्तेभ्यः । हारीतः,—स्नात्वा न गात्रमवमृज्यात् । एतच्च स्नानाङ्गं तदपचारे स्नानवैगुण्यं नाधर्म्मः । तेन स्नातोऽङ्गानि वस्त्रेण पाणिना वा न मार्जयेदिति । वस्त्रपाण्योरुद्देश्यविशेषणत्वादविवक्षा । यत्तु,—

वस्त्रेण मार्जिते गात्रे स्नानवस्त्रेण मार्जिते ।
शुनोच्छिष्टं भवेद्गात्रं पुनः स्नानेन शुद्ध्यति ॥

तद्रोगादिनासहिष्णोरर्थप्राप्ते मार्जने स्नानवस्त्रहस्तनिषेधपरम् । तेन वस्त्रान्तरेण प्रकारान्तरेण वा मार्जने स्नानवैगुण्यं नाधर्म्मः ।

अथ वस्त्रपरिधानम् ।

याज्ञवल्क्यः,—

स्नात्वैवं वाससी धौते अक्लिन्ने परिधाय च ।
अभावे धौतवस्त्रस्य शाणक्षौमादिकानि च ॥
कुतपं योगपट्टं वा द्विवासा येन जायते ।

धौतं कार्पासम् । शणसूत्रभवं शाणम् । अतसीभवं क्षौमम् । ब्रह्मचारिवस्त्राधिकारे गोतमः,—वासांसि शाणक्षौमचीरकुतपाः सर्व्वेषाम् । कार्पासं वा विकृतम् । काषायमप्येके धार्य्यं ब्राह्मणस्य । चीरं कुशादिनिर्म्मितम् । कुतपः पर्व्वतीयच्छागरोमनिर्म्मितः । काषायस्य गृहस्थे निषेधो वक्ष्यते । आपस्तम्बः,—आविकं सार्व्ववर्णिकम् । नरसिंहपुराणे,—

न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते ।

उल्बणमधो नाभ्या उपरि जान्वाच्छादयेदिति। एतत्-परिमाणादधिकं नाप्रक्षालितं पूर्व्वधृतं वासो बिभृयादिति। एतद् गृहस्थधर्म्मप्रकरणाम्नानात् कर्म्माङ्गवस्त्रपरम्। अन्यथा फलकल्पनापत्तेः। तेन [1]शीतत्राणाद्यर्थं नायं नियमः। पूर्व्वपरिहितं वासः प्रक्षाल्यैव बिभृयादिति तु परिहितपदादधो[2]वस्त्रपरमेव। [3]एतत्समानार्थत्वार्थाय पूर्व्वधृतमित्यप्यधोवस्त्रपरमित्येके। तेनोत्तरीयस्य न प्रत्यहं क्षालनमिति। तथा नोत्तराधोवाससोर्विपर्य्यासं कुर्य्यात्। न रात्रिवासो दिवा परिदध्यात्। रात्रिवासःपदं शयनकालीनवस्त्रपरम्।

अन्यदेव भवेद्वस्त्रं शयनीये सदैव हि।

इति स्मृत्यन्तरात्। तथा सर्व्वरागान् वाससि वर्जयेत् कृष्णञ्च स्वाभाविकम्। तथा,—

कम्बले पट्टवस्त्रे च नीलीरागो न दुष्यति।
स्त्रीणां क्रीड़ार्थसम्भोगे शयनीये न दुष्यति॥
स्त्रीधृता शयने नीली ब्राह्मणस्य न दुष्यति।
[[4]नृपस्य वृद्धौ वैश्यस्य पर्व्ववर्जं न दुष्यति॥]

अन्यत्र तु,—

नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत्।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति॥

(१) D. शीतत्राणाद्यर्थवस्त्रस्य नायं ०।
(२) D. वस्त्रमेव।
(३) D. एतत्समानाय पूर्व्व ०।
(४) D. Omits the portion bracketed.

इति परिधाने दोषः। परिधाय भोजने चाण्डालादिस्पर्शे वाऽधिकदोषः।

नीलीरक्तं परीधाय भुक्त्वा स्नानार्हकस्तथा।
त्रिरात्रन्तु व्रतं कुर्य्यात् छित्वा गुल्मलता अपि॥

मनुः,—

न जीर्णमलवद्वासा भवेच्च विभवे सति।

जावालिः,—

नार्द्रमेकञ्च वसनं परिदध्यात् कथञ्चन।

तथा परधृतं वर्जयेत्। असम्भवे तदपि धौतं ग्राह्यम्।

वस्त्रपरिधानम्।

नूतनपरिधाने मन्त्रः,—"परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्मि शतञ्च जीवामि शरदः सुवर्च्चा रायस्पोषमभिसंव्ययिष्ये॥" पूर्व्वधृते मन्त्राभावः। "अधोनाभ्युपरि जान्वाच्छादयीत नातो न्यून"मिति किञ्चिदाधिक्ये न दोषः।

वामे पृष्ठे तथा नाभौ कच्छत्रयमुदाहृतम्।
त्रिभिः कच्छैः परीधत्ते यो विप्रः स शुचिः स्मृतः॥

तेन वेष्टितवस्त्रस्य प्रत्यक्प्रान्तं पृष्ठे मध्यं वामकट्यां प्राक्प्रान्तं नाभौ वस्त्रदेहान्तराले प्रवेशयेत्। एतदेवोक्तम्,—

परिधानाद् वहिः कच्छा निबद्धा ह्यासुरी भवेत्।

एकदेशवहिर्भावेऽपि दोषः । उत्तरीयवस्त्रञ्च समाख्ययोत्तराङ्गाच्छादकम् । तदेकदेशाच्छादनेऽप्यविरुद्धमेव । आपस्तम्बः,—"नाधोवस्त्रैकदेशेनोत्तराङ्गं छादयेत् ।" प्रतिनिधित्वेन प्राप्तस्य निषेधः । यत्तु गृह्यम्,—"एकश्चेत् पूर्व्वस्यैवोत्तरवस्त्रं छादयीत" इति तत्समावर्त्तनाङ्गमेव । तेन वस्त्रासम्भवे प्रतिनिधिरूपेण चौमाजिनवल्कलादिग्रहणम् । अत्र च,—देवागारश्राद्धगोष्ठयज्ञसन्ध्यासाधुसङ्गमगुरुसन्निध्यग्न्यागारविवाहस्वाध्यायभोजनेषु दक्षिणपार्श्वेवस्त्राद्बहिःकरणं तत्तत्कर्म्माङ्गपाणिसंस्कार इत्यर्थादुत्तरीयवस्त्रस्य यज्ञोपवीतवद्धारणम् । "श्राद्धे चापसव्यं वासोयज्ञोपवीतेकत्वे"ति पित्र्ये नियम्यते । दैवेऽर्थादेव सव्ये धारणम् । [1]अन्यकर्म्मस्वनियम इति ।

> सव्यादंसात् परिभ्रष्टं कटिदेशे धृताम्बरम् ।
> एकं वस्त्रं विजानीयात्

इति लिङ्गात् सर्व्वदा सव्यांसे चोत्तरीयधारणमित्याहुः । "नित्यमुत्तरीयं वासः कार्य्यमपिवा सूत्रमेवोत्तरीयार्थं" इति यद्यपि सूत्रमात्रमुत्तरीयार्थे विहितं तथापि,—

> यज्ञोपवीते द्वे धार्य्ये श्रौतस्मार्त्तेषु कर्म्मसु ।
> तृतीयञ्चोत्तरीयार्थे वस्त्रालाभे तदिष्यते ॥

इतिवाक्यदर्शनादविरोधाच्च यज्ञोपवीतलक्षणोपेतं सूत्रमुत्तरीयप्रत्याम्नातत्वेन विभ्रयात् । तस्य च यज्ञोपवीतत्वत्यागेनैव

(१) C. अन्यकर्म्मसु नियम इति ० ।

वस्त्रकार्य्यकारित्वात् । यूपकार्य्यकारिणि परिधौ परिधिमन्त्रवत् यज्ञोपवीतमन्त्र एव [1]भवति मन्त्रः । अत्रोत्तरीयार्थ इति "अर्थ" पदेनोत्तरीयप्रयोजनमुद्दिश्य यज्ञोपवीतं विधीयते । उत्तरीयप्रयोजनञ्च नित्यधारणफलं पापक्षयः कर्म्मोपकारश्च । तेन—

> होमदेवार्च्चनाद्यासु क्रियास्वाचमने तथा ।
> नैकवस्त्रः प्रवर्त्तेत द्विजो वाचनिके जपे ॥

इति यत्र एकवस्त्रनिन्दाकल्पितविधिना द्वितीयवस्त्रमुत्तरीयकर्म्माङ्गत्वेन विधीयते [2]तत्कार्य्येऽपि यज्ञोपवीतं विधीयते । यथा "शमीमय्यः स्रुचो भवन्ती"ति स्रुक्पदोपस्थितपालाशादिकार्य्ये शमीविधि[3]रङ्गप्रधानसाधारणपालाशादिकार्य्ये विधीयते । एवम्,—

> न भार्य्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः ।

इत्यत्रापि भोजनकाले निन्दाकल्पितविधिनोत्तरीयमेव विधीयते । तस्य च फलं नित्यकर्म्मान्तरवत् पापक्षयः । तेन तत्कार्य्येऽपि विहितं भवति विनिगमनाऽविरहात् । यत्तु,—

> नैकवासा जपेन्मन्त्रं बहुवस्त्राकुलोऽपि न ।

इति जपकाले बहुवस्त्रत्वनिषेधः "न वासोभिः सहाजस्र-"मिति स्नानाङ्गनिषेधश्च [4]तत्र जपकाले स्नानकाले च वस्त्रान्तरसत्त्वेऽपि यज्ञोपवीतस्य वस्त्रत्वाभावाद् बहुवस्त्रत्वाभावः । स्नाने च

(१) A. C. भवति । न वस्त्रमन्त्रः ।
(२) C. तत्कार्य्येऽपि विहितं भवति यज्ञोपवीतं विधीयते ।
(३) D. ० रनङ्गप्रधान ० ।
(४) A. C. तेन जपकाले च वस्त्रान्तर ० ।

यद्यपि कात्यायनेन "कुशोपग्रही बद्धशिखी यज्ञोपवीती"त्येवोक्तं नोत्तरीयं, तथा "निष्पीड्य स्नानवस्त्र"मित्येकत्वं स्नानवस्त्रस्यानूद्यते तथापि कात्यायनीयस्य नोत्तरीयपरिसंख्यात्वं परिसंख्यादोषादेव। "निष्पीड्य स्नानवस्त्र"मित्येकत्वं संस्कारगतमविवक्षितम्। तेन होमदेवार्चनाद्यास्वित्याद्युपपदेन (इति "आदि" इत्युप०) स्नानेऽप्युत्तरीयं विहितमेव। तेन न [1]कश्चिद्दोषः। उत्तरीयमन्त्रः,—"यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती। यशो भगश्च माऽविदद् यशो मा प्रतिपद्यताम्।" नूतनवस्त्रे। पुरातने मन्त्राभावः। नवोष्णीषे मन्त्रः,—

युवा सुवासाः परिवीत आगात्
स उ श्रेयान् भवति जायमानः।
तं धीरासः कवय उन्नयन्ति
स्वाध्यो मनसा देवयन्तः॥

इति।

वस्त्रपरिधानानन्तरं योगियाज्ञवल्क्यः,—

प्रक्षाल्योरू मृदाद्भिश्च हस्तौ प्रक्षाल्य वै तथा।

तथा,—

स्नात्वा संगृह्य वासोऽन्यज्जङ्घे संशोधयेन्मृदा।

ऊरुजङ्घाक्षालनं वारुणस्नाने गुदजलसंसर्गशोधनार्थम्। [2]तथा च पराशरः,—

(१) D. कश्चिद्दोष इत्यर्थः।
(२) A. तदाह पराशरः।

अपवित्रीकृते ते तु कौपीनच्युतवारिणा।

इति कौपीनतोऽपानच्युतेन जलेनेति लक्ष्मीधरेण व्याख्यातम्।

[[1]गुदजलसंसर्गाभावे सति

ततः प्रक्षालयेत् पादौ मृत्तोयेन विचक्षणः।

इति नरसिंहपुराणोक्तं पादप्रक्षालनमात्रम्।

तत्र (ततः) यथोक्तरूपेण परिभाषानुसारेण तिलकग्रहणम्। शङ्खचक्रादिधारणञ्च पूर्व्वोक्तरीत्या। यथोक्तरूपेण यज्ञोपवीतधारणम्।]

नवयज्ञोपवीतधारणे ब्रह्मोपनिषदुक्तो मन्त्रः,—

यज्ञोपवीतं परमं पवित्रं
बृहस्पतेर्य्यत् सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः॥

अथवा "यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनेह्यामि।" अश्वार्क (?) लिखितो मन्त्रः।

मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत्॥

तथा,—मेखलादण्डाजिनयज्ञोपवीतावपाते त्रय्या हुत्वा यथार्थमुपेयात्। अवपातः पादमार्गेण निःसरणम्। त्रयी च ऋक्-

(१) A. C. Omit the portion bracketed.

त्रयम्। "तुभ्यन्तामङ्गिरः।" "पुनर्मनः।" "अग्ने व्रतपा" इति। तेन होमः। रुद्राक्षधारणम्। पद्माक्षधारणम्। तुलसीकाष्ठ-मालाधारणम्। विष्णुनिर्म्माल्यधारणम्। "अलङ्करणमसि भूयोऽलङ्करणं मे भूयाः।" इति स्वर्णमुद्रिकाधारणमनामिकायाम्। तेनैव मन्त्रेण तर्ज्जन्यां रजतमुद्रिकाधारणम्। कर्णयोः कुण्डल-धारणम्। हिरण्यमालाधारणञ्च। शिखाबन्धनम्। पवित्रोपग्रह-कुशधारणञ्च परिभाषोक्तरीत्या।

---

[1]अथ सन्ध्या।

योगियाज्ञवल्क्यः,—

अतः परं प्रवक्ष्यामि सन्ध्योपासननिर्णयम्।
अहोरात्रकृतात् पापाद् यामुपास्य प्रमुच्यते॥

दक्षः,—

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु।
यदन्यत् कुरुते कर्म्म [2]न तस्याप्नोति तत्फलम्॥

छन्दोगपरिशिष्टे,—

अनर्हः कर्म्मणां विप्रः सन्ध्याहीनो यतः स्मृतः।
पूर्व्वां सन्ध्यां सनक्षत्रामुपक्रम्य यथाविधि॥
गायत्रीमभ्यसेद् विद्वान् यावदादित्यदर्शनम्।

(१) D. अथ सन्ध्यानिर्णयः।

(२) D. ० न तस्य फलभाग्भवेत्।

याज्ञवल्क्यः,—

यावन्तोऽस्यां विकर्म्मस्थाः पृथिव्यां वालिशा द्विजाः।
तेषां हि पावनार्थाय सन्ध्या सृष्टा स्वयम्भुवा॥
सन्ध्या येन न विज्ञाता सन्ध्या[1]नैवाप्युपासिता।
जीवन्नेव स शूद्रत्वं मृतः श्वा चाभिजायते॥
[2]नोपतिष्ठति यः पूर्व्वामुपास्ते न च पश्चिमाम्।
स शूद्रवद् वहिष्कार्य्यः सर्व्वस्माद् द्विजकर्म्मणः॥
सन्ध्यां नोपासते विप्राः कथन्ते ब्राह्मणाः स्मृताः।
कामं तान् धार्म्मिको राजा शूद्रकर्म्मसु योजयेत्॥

याज्ञवल्क्यशातातपौ,—

गृहेषु प्राकृती सन्ध्या गोष्ठे शतगुणा स्मृता।
नदीषु शतसाहस्री अनन्ता शिवसन्निधौ॥
अनृतं मद्यगन्धञ्च दिवामैथुनमेव च।
पुनाति वृषलस्यान्नं वहिः सन्ध्याभ्युपासिता॥

योगियाज्ञवल्क्यः,—

ह्रासवृद्धी तु सततं दिवसानां यथाक्रमम्।
सन्ध्या[3]मुहूर्त्तमात्रञ्च ह्रासवृद्धौ तु सा स्मृता॥ (क)

(१) D. C. ० नैवाभ्युपासिता।

(२) D. उत्तिष्ठति तु यः ० A. C. न तिष्ठति तु यः ०

(३) D. ० मुहूर्त्तमाकर्ण्या ह्रास ०।

(क) रघुनन्दनोऽत्र पठति,—ह्रासवृद्धौ तु सततं दिनरात्र्योर्यथाक्रमम्। सन्ध्या मुहूर्त्तमाख्याता ह्रासे वृद्धौ समा स्मृता। See तिथितत्त्वम्।

मुहूर्त्तं नाड़ीद्वयम्। तथा,—

सन्धौ सन्ध्यामुपासीत नास्तगे [1]नोद्गते रवौ।

सम्बर्त्तः,—

पूर्व्वां सन्ध्यां सनक्षत्रामुपासीत यथाविधि।
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम्॥

बौधायनः,—"सुपूर्व्वामपि पूर्व्वामुपक्रम्य उदित आदित्ये समाप्नुयात्। अस्तमितमुपक्रम्य सुपश्चादपि पश्चिमाम्। सन्ध्ययोश्च सन्तत्या अहोरात्रयोश्च सन्तत्यै।" सुपूर्व्वां बहुषु नक्षत्रेषु दृश्यमानेषु समारभ्येत्यर्थः। अपिशब्दादल्पनक्षत्रदर्शनेऽप्यारम्भः। सायञ्च सुपश्चादपि बहुनक्षत्रदर्शनेऽपि समापनम्। बौधायनः,—

अनागतान्तु ये पूर्व्वां नातिक्रान्तान्तु पश्चिमाम्।
सन्ध्यां नोपासते विप्राः कथन्ते ब्राह्मणाः स्मृताः॥
सायं प्रातः सदा सन्ध्यां ये न विप्रा उपासते।
कामं तान् धार्म्मिको राजा शूद्रकर्म्मसु योजयेत्॥

योगियाज्ञवल्क्यः,—

सन्ध्या उपासिता येन विष्णुस्तेन उपासितः।

तथा,—

त्रिंशत्कोव्यस्तु विख्याता मन्देहा नाम राक्षसाः।
प्राद्रवन्ति सहस्रांशुमुदयन्तं दिने दिने॥

(१) A. C. नोद्यते ०।

अहन्यहनि ते नित्यं सूर्य्यमिच्छन्ति खादितुम्।
[1]अथ सूर्य्यस्य तेषाञ्च युद्धमासीत् सुदारुणम्॥
ततो देवगणाः सर्व्वे ऋषयश्च तपोधनाः।
सन्ध्येति तमुपासीनाः प्रक्षिपन्ति महज्जलम्॥
ॐकारब्रह्मसंयुक्तं गायत्र्या चाभिमन्त्रितम्।
तेन [2]दह्यन्ति ते दैत्या वज्रीभूतेन वारिणा॥

तं सूर्य्यं सन्ध्येत्युपासीना जलं प्रक्षिपन्ति।

त्रयाणाञ्चैव देवानां ब्रह्मादीनाञ्च सङ्गमः।
सन्धिः सर्व्वसुराणाञ्च सन्ध्या तेन उदाहृता॥
गरीयसी तु भूतानां तस्मात् पैत्री तनुर्हि सा।

पैत्री पितृजननार्थां ब्रह्मणः सूनुः सन्ध्या।

सन्धिते तु परे सूक्ष्मे निर्गुणे गुणबोधिनि।
प्रधानपुरुषातीते सन्धिते सन्धिरुच्यते॥ (?)

सन्ध्येति तमुपासीना इति यदुक्तं तस्यायं शेषः। परे सूक्ष्मे अविद्याजीवभिन्ने निर्गुणे प्रपञ्चहीने गुणबोधिनि जनवर्गस्य साक्षिणि परमात्मनि ब्रह्मबुद्ध्या सन्धिते। पुनश्च प्रस्तुतत्वादादित्य-मण्डले एवंविधपरमात्मबुद्ध्या सन्धिते। सन्धिः सन्ध्याशब्दः। स्वात्मानं सर्व्वसाक्षिणं निष्प्रपञ्चब्रह्माहमिति ज्ञात्वा तदेव सूर्य्य-मण्डलात्मकमिति बुद्धिः कार्य्या। एवं सन्ध्याशब्दार्थः।

(१) C. तथा सूर्य्यस्य ०।
(२) C. दहन्ति ०।

अतएवोक्तम्,—

सन्ध्यात्रयन्तु कर्त्तव्यं द्विजेनात्मविदा सदा ।

आत्मविदा [1]ब्रह्मात्मैक्यज्ञानवतेति । एवञ्चाञ्जलिप्रक्षेपकाले तथा ध्यानं कार्य्यम् । एवञ्च सन्ध्याशब्दार्थः । तादृशध्यानसहितोऽञ्जलिप्रक्षेपः गायत्रीजपश्चेति द्वयं प्रधानम् । "पूर्व्वां सन्ध्यां जपंस्तिष्ठे"दित्यादिना जपेऽपि सन्ध्याशब्दप्रयोगात् ।

तथा अघमर्षणसूक्तस्य ऋष्यादिकमभिधाय,—

यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदकः ।
तथाघमर्षणं सूक्तं सर्व्वपापापनोदकम् ॥
सिन्धुद्वीपं भवेदार्षं गायत्रीच्छन्द एव च ।
आपस्तु दैवतं प्रोक्तं विनियोगस्तु मार्ज्जने ॥
सर्व्वत्र पावनं कर्म्म अब्लिङ्गानामुदाहृतम् ।
कोकिलो राजपुत्रस्तु द्रुपदा आर्षमुच्यते ॥
आनुष्टुभं भवेच्छन्द आपश्चैव तु दैवतम् ।
सौत्रामण्यामवभृथस्नाने[2]तु विनियुज्यते ॥
द्रुपदा नाम सा देवी[3]यजुर्वेदे प्रतिष्ठिता ।
अन्तर्जले त्रिरावृत्त्य मुच्यते ब्रह्महत्यया ॥
अपः पाण्योः समादाय त्रिः पठेद् द्रुपदा ऋचम् ।
तज्जलं मूर्द्ध्नि विन्यस्य सर्व्वपापैः प्रमुच्यते ॥

(१) D. ब्रात्मैक्यज्ञानवतेति ।
(२) D. ० तद्विनियुज्यते ।
(३) A. D. यजुर्वेदप्रतिष्ठिता ।

एवं ज्ञात्वा तु मन्त्राणां प्रयोगं वै द्विजोत्तमाः ।
सन्ध्यामुपासते [1]यद् यद् यथावर्णं निबोधत ।

अघमर्षणस्य मार्ज्जने आपोहिष्ठेत्यस्य मार्ज्जने द्रुपदायाश्च मूर्द्ध्नि जलसेके प्रयोगं ज्ञात्वामीषामृष्यादिकञ्च ज्ञात्वेत्यर्थः । तेन द्रुपदामन्त्रत्रिरावृत्तमन्त्राभिमन्त्रितजलसेकः शिरसि सन्ध्याङ्गमुक्तं भवति ।

ईशानाभिमुखो भूत्वा शुचिः प्रयतमानसः ।
आचान्तः पुनराचामेदृतमित्यभिमन्त्र्य च ॥

द्विराचम्य "ऋतञ्च सत्य"मित्यघमर्षणेनाभिमन्त्र्याचामेज्जलं पिबेदित्यर्थः ।

त्रिरावृत्य तु सावित्रीं प्रणवं व्याहृतीस्तथा ।

प्रणवानन्तरं व्याहृतित्रयं ततो गायत्रीति क्रमः ।

प्रणवो भूर्भुवःस्वश्च सावित्री च तृतीयका ।

इति छन्दोगपरिशिष्टात् । मार्ज्जनं च [2]कुशाग्रोदकसेकः ।

शिरसो मार्ज्जनं कुर्य्यात् कुशैः सोदकविन्दुभिः ।

इति छन्दोगपरिशिष्टात् । तथा,—

मार्ज्जनञ्च तथा कृत्वा आपोहिष्ठेति मार्ज्जयेत् ।
सार्द्धमृचन्तु प्रक्षिप्य ऊर्द्ध्वं सार्द्धान्तु निक्षिपेत् ॥

(१) A. ० यावद् यथा ० । Halāyudha's ब्राह्मणसर्व्वस्व reads ० यद्यद् यथावत्तन्निबोधत ।
(२) D. कुशाग्रस्थोदकैः ।

अधोभागविसृष्टाभिरसुरा यान्ति संचयम् ।
सर्व्वतीर्थाभिषेकश्च ऊर्द्धं सम्मार्जनाद् भवेत् ॥
अघमर्षणसूक्तेन मार्जनं कारयेत् ततः ।
शन्न आपस्तु द्रुपदा कामतः सम्प्रयोजयेत् ॥

कामत इच्छया मन्त्रोक्तफलकामनायामित्यन्ये । "शन्न आप" इत्यादि काम्यविषयमिति लक्ष्मीधरः । छन्दोगपरिशिष्टे तु,—

अतःपरं प्रवक्ष्यामि सन्ध्योपासनिकं विधिम् ।
अनर्हः कर्म्मणां विप्रः सन्ध्याहीनो यतः स्मृतः ॥
सव्ये पाणौ कुशान् कृत्वा कुर्य्यादाचमनक्रियाम् ।
सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः ॥
कर्म्मान्ते वारिणात्मानं परिक्षिप्य समन्ततः ।
शिरसो मार्जनं कुर्य्यात्

इत्याचमनद्वयाघमर्षणमन्त्रितजलपानकर्म्मान्ते मार्जनात् पूर्व्वं वारिणात्मानं सर्व्वतो वेष्टयित्वा रक्षां कुर्य्यादित्यर्थः । मार्जनानन्तरं शङ्खः,—

व्याहृतीः कीर्त्तये [1]च्चैवं तथैवाक्षरमव्ययम् ।

व्याहृतीरिति बहुवचनं कपिञ्जलाधिकरणन्यायेन त्रित्वपरम् । अव्ययं प्रणवः । इदञ्च पूर्व्वनिबन्धकारैरलिखितत्वात् "स्मृतिशास्त्र-विकल्पः स्या"दितिन्यायेन वैकल्पिकम् । व्याहृतिप्रणवकीर्त्तनं प्राणायामाङ्गजपरूपस्यानुवाद इत्यन्ये । तथाच,—

उपस्पृशेत् ततः पश्चान्मन्त्रेणानेन मन्त्रवित् ।

(१) A. C. ० द्देवं ० ।

इति ।

[1]अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः ।
त्वं यज्ञस्त्वं वषट्कार आपोज्योतीरसोऽमृतम् ॥

इति । तेन व्याहृतिप्रणवकीर्त्तनपदेन प्राणायाममनूद्य तद्द्वारा तदङ्गाचमनानुवादेनान्त [2]श्चरसीति मन्त्रविधिः । नर-सिंहपुराणे,—

दर्भेषु दर्भपाणिः सन् प्राङ्मुखः सुसमाहितः ।
[[3]प्राणायामांस्तु कुर्व्वीत]

वशिष्ठाङ्गिरोबृहस्पतिबौधायनाः,—

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥

छन्दोग [4]परिशिष्टं कात्यायनः,—

भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः ।
महर्ज्जन स्तपः सत्यं गायत्री च शिरस्तथा ॥

आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरिति शिरः । प्रति-प्रतीकं प्रणवमुच्चारयेदन्ते च शिरसः । प्रतिप्रतीकं प्रति व्याहृतीत्यर्थः ।

(१) A. अन्तश्चरति ० ।
(२) A. ० श्चरतीति ० ।
(३) D. Omits the portion bracketed.
C. प्राणायामांस्तु कुर्व्वीत प्राङ्मुखः सुसमाहितः ।
(४) D. परिशिष्टन्तु कात्यायनः ० ।

एष एतां सहानेन तथैभिर्दशभिः सह। (?)
त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते ॥

आयतप्राणस्त्रिर्जपेत् स प्राणायाम इत्युक्ते एकैकप्राणायामे पूरके कुम्भके रेचके च त्रिवारजपः। न च प्रत्येकस्य [१][प्राणायामजपत्वं किन्तु त्रितयं मिलित्वा] प्राणायामत्वमिति वाच्यम्। प्रत्येकस्यैव प्राणायाम[२]लक्षणलक्षितत्वात्। तथा पतञ्जलिः,—"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः।" श्वासस्य प्रश्वासस्य च गतिविच्छेदस्त्रिष्वनुगतः। तथा "वाह्याभ्यन्तर[३]स्तम्भवृत्ति"रिति त्रितयलक्षणमुक्त्वा "वाह्याभ्यन्तरविषयाक्षेपी चतुर्थ" इति वाह्यवृत्तिश्वासो रेचकोऽन्तरवृत्तिः श्वासः पूरकः स्तम्भवृत्तिः कुम्भकः। मनसा स्थानविशेषध्यानपूर्व्वकश्चतुर्थ इति। योगियाज्ञवल्क्येऽपि,—

भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च।
प्रत्योङ्कारसमायुक्तं तत्सवितुर्वरेण्यम् (० ण्यपि) ॥
ॐ आपो ज्योतिरित्येतत् शिरः पश्चात् प्रयोजयेत्।
एष मन्त्रप्रयोगस्तु प्राणायामनिरोधने ॥
(क)त्रिरावर्त्तनयोगोऽयं प्राणायामस्तु शब्दितः।

(१) D. Omits the portion bracketed.
A. प्राणायामत्वं किन्तु त्रितयं मिलित्वा प्राणायामत्वमिति वाच्यम्। प्रत्येकस्यैव ०

(२) C. लक्ष्मणा लक्षितत्वात्।

(३) D. ० स्तस्य वृत्ति ०।

(क) त्रिरावर्त्तनयोगेन प्राणा ० See Halāyudha's ब्राह्मणसर्व्वस्वे प्राणायामप्रकरणम्।

त्रिवृत्तमन्त्रकस्य प्राणायामत्वमुक्त्वा तस्यैव त्रैविध्यमाह,—
रेचकः पूरकः कुम्भः प्राणायाम(मः)त्रिलक्षणः।

यत्तु,—

आसने सम्यगासीनो वायुनाऽपूर्य्य चोदरम्।
कुम्भकेन त्रिरावृत्ति र्दक्षिणेन च रेचयेत् ॥

इति। अत्रापि त्रिरावृत्त्येति पूरकरेचकयोरपि सम्बध्यते। आसनञ्च पद्मस्वस्तिकभद्रादिवक्ष्यमाणलक्षणम्। तथा,—

वाह्यस्थितं नासपुटेन वायु-
माकृष्य तेनैव शनैः समन्तात्।
नाड़ीश्च सर्व्वाः परिपूरयेद्‌ यः
स पूरको नाम महानिरोधः ॥
न रेचको नैव च पूरयोगो
नासाग्रवर्त्ती स्थित एव वायुः।
सुनिश्चलं धारयते क्रमेण
कुम्भाख्यमेतत् (० मेतं) प्रवदन्ति तज्ज्ञाः ॥
निष्कृष्य नासाविवरेऽ विशेषं
प्राणं वहिः शून्यमिवानिलेन।
निरूप्य सन्तिष्ठति चोर्द्ध्ववायुः
स रेचको नाम महानिरोधः ॥(ख)

(ख) निष्क्रम्य नासाविवरादशेषं प्राणं वहिः शून्यमिवानिलेन।
निरुच्छ्वसन् तिष्ठति चोर्द्ध्ववायुः स रेचकोनाम महान् निरोधः ॥
See Halāyudha's ब्राह्मणसर्व्वस्वे प्राणायामप्रकरणम्।

नासिकान्तश्च उच्छ्वासो ध्मातः पूरक उच्यते ।
कुम्भको निश्चलश्वासो मुच्यमानस्तु रेचकः ॥

विष्णुपुराणे,—

प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते च यः ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥

तथा,—

परस्परेणाभि[1]भवं प्राणापानौ यदानिलौ ।
[2]कुरुतः स द्विधा तेन तृतीयः [3]संक्रमात् तयोः ॥

कुम्भकस्यैवं प्रकारत्रयम् । गुदमूलस्याकुञ्चनेनापानमाकृष्य प्राणस्य कुम्भकेन स्तम्भने प्राणेनापानाभिभवः । कुम्भकेन प्राणस्तम्भनानन्तरमपानस्योर्द्ध्वमाकर्षणेऽपानेन प्राणस्याभिभवः । तदूर्द्ध्वमाकुञ्चनस्तम्भनयोरनुवृत्तौ द्वयोः साम्यम् । तदुक्तं भगवद्गीतायाम्,—

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥

इति । पूरके च वामनासया पूरणम् । "ईलया पूरयेद् वायु"मिति स्मृतेः । "दक्षिणेन विरेचये"दिति पिङ्गलया कुम्भकानन्तरं विरेचनम् । तथा,—

(१) D. ० भवौ ० ।
(२) A. C. कुरुते ० ।
(३) D. संयमात् ० ।

अङ्गुष्ठानामिकाभ्याञ्च कनिष्ठाङ्गुलिनापि च ।
प्राणायामजपं कुर्य्यान्मध्यमां तर्जनीं विना ॥

इति वामनासापीड़नमनामिकाकनिष्ठाभ्यां रेचनकाले । [1]दक्षिणनासापीड़नमङ्गुष्ठेन पूरके । व्यासः,—

आदानं रोधमुत्सर्गं वायो[2]स्त्रिस्त्रिः समभ्यसेत् ।

पूरकादित्रयं त्रिवारमभ्यसेदित्यर्थः । योगियाज्ञवल्क्यः,—

त्रिविधं केचिदिच्छन्ति तथैव नवधा परे ।

नवधा पूरकादित्रयत्रिवाराभ्यासेन । एवञ्च [3][सन्ध्याप्राणायामे पूरकादित्रिकत्रिरभ्यासः । अत्र] प्राणायामो द्विविधः । सबीजो निर्बीजः । जपध्यानोपेतः सबीजः । तद्रहितोऽबीजः । सन्ध्यायां सबीज एव प्राणायामः । जपो मन्त्रस्य प्रणवसप्तव्याहृतिगायत्रीशिरःप्रत्येकप्रणवात्मकस्य । ध्यानं साकारब्रह्मचिन्तनपूर्व्वकं मन्त्रार्थनिराकारध्यानम् । योगियाज्ञवल्क्यः,—

नीलोत्पलदलश्यामं नाभिमध्ये प्रतिष्ठितम् ।
चतुर्भुजं महात्मानं पूरकेण विचिन्तयेत् ॥
कुम्भकेन हृदिस्थाने ध्यायेच्च कमलासनम् ।
ब्रह्माणं रक्तगौराङ्गं चतुर्वक्त्रं पितामहम् ॥
रेचकेनेश्वरं ध्यायेल्ललाटस्थं महेश्वरम् ।
शुद्धस्फटिकसङ्काशं निर्म्मलं पापनाशनम् ॥

(१) A. D. दक्षनासा ० ।
(२) A. D. ० स्त्रिस्त्रः समभ्यसेत् ।
(३) C. Omits the portion bracketed.

[1]मन्त्रजपस्य च प्राणायामे वाचिकजपे प्राणरोधभङ्गस्य (भङ्गस्य) प्रसङ्गात् । (प्रसङ्गात्) मानसत्वेन ।

शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ।

इति । अर्थचिन्तनं प्रणवव्याहृतिगायत्रीशिरसां ब्रह्मात्मानुसन्धानमेव । योगियाज्ञवल्क्यः,—

सावित्र्याश्चैव मन्त्रार्थं ज्ञात्वा चैव यथार्थतः ।
तस्यां यदुक्तश्चोपास्य ब्रह्मभूयाय कल्पते ॥
तच्छब्देन तु यच्छब्दो बोद्धव्यः सततं बुधैः ।
उदाहृते तु यच्छब्दे तच्छब्दः स्यादुदाहृतः ॥
देवस्य सवितुर्यच्च भर्गमन्तर्गतं विभुः (विभु) ।
ब्रह्मवादिन एवाहुर्वरेण्यं सोऽस्मि धीमहि ॥
चिन्तयामो वयं भर्गो धियो यो नः प्रचोदयात् ।
धर्म्मार्थकाममोक्षेषु बुद्धिवृत्तिः (०वृत्तिं) पुनः पुनः ॥
बुद्धेर्बोधयिता यश्च नित्यात्मा पुरुषो विराट् ।
सवितुस्तं वरेण्यन्तु सत्यधर्म्माणमीश्वरम् ।
[2]हिरण्यवर्णवपुषं ध्यायेत् तं विष्णुसञ्ज्ञितम् ॥
भ्राजते दीप्यते यस्माज्जगदन्ते दहत्यपि ।
भ्राजते स्वेन रूपेण तस्माद् भर्ग इति स्मृतः ॥

(१) D. मन्त्रजपस्य प्राणा ० ।
(२) D. हिरण्यवर्णपुरुषम् ० ।

(क)दीप्यते द्योतते यस्मात् क्रीड़ते द्योतते दिवि ।
तस्माद्देव इति प्रोक्तः स्तूयसे (०ते) सर्व्वदैवतैः ॥
स वेत्ता सर्व्वभावानां सर्व्वभावांश्च सूयते ।
शयनात् पालनाच्चैव सविता तेन चोद्यते ॥
वरेण्यं वरणीयं तज्जन्मसंसारभीरुभिः ।
आदित्यान्तर्गतं भर्गः स्तूयते वै मुमुक्षुभिः ॥
जन्मभृत्युविनाशाय दुःखस्य त्रिविधस्य च ।
ध्यानेन पुरुषो यश्च द्रष्टव्यः सूर्य्यमण्डले ॥

योगियाज्ञवल्क्यः,—

प्राणस्यायमनं कृत्वा आचामेत् प्रयतोऽपि सन् ।

मैत्रायणीयगृह्यपरिशिष्टम्,—

प्रातः सूर्य्यश्च मेत्युक्त्वा सायमग्निश्च मेति च ।
आपः पुनन्तु मध्याह्ने कुर्य्यादाचमनं ततः ॥

शङ्खः,—

उपस्पृशेत्ततः पश्चान्मन्त्रेणानेन धर्म्मवित् ।
अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः ।
त्वं यज्ञस्त्वं वषट्कार आपोज्योतीरसोऽमृतम् ॥

यद्यप्येवं मन्त्रविकल्पस्तथापि वाजसनेयिभिः प्रायेण शङ्खोक्तपरिग्रहात् तदुक्तो मन्त्रः । याज्ञवल्क्यः,—

(क) दीव्यते क्रीड़ते यस्माद् रुच्यते शोभते दिवि ।
See Halāyudha's ब्राह्मणसर्व्वस्वे प्राणायामप्रकरणम् ।

प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु।

प्राणायामानन्तरमब्दैवतेनापोहिष्ठेत्यादिना देहप्रोक्षणं कुर्य्येरेव। अन्यत्र दृष्टत्वात्। योगियाज्ञवल्क्यः,—

अपः पाण्योः समादाय त्रिः पठेद् द्रुपदामृचम्।
तज्जलं मूर्द्ध्नि विन्यस्य सर्व्वपापैः प्रमुच्यते॥
एवं ज्ञात्वा तु मन्त्राणां प्रयोगञ्च यथाविधि।
सन्ध्यामुपासते यद्वद् यथावर्णं निबोधत॥

[1]इत्येवं वाक्येन सन्ध्याङ्गत्वावगमात् फलश्रुतेरर्थवादत्वं

समुद्धृत्योदकं पाण्योर्जप्त्वा त्रिर्द्रुपदां क्षिपेत्।

इति व्यासवाक्याच्च। छन्दोगपरिशिष्टे,—

करेणोद्धृत्य सलिलं [2]घ्राणमासज्य तत्र च।
जपेदनायतासुर्वा त्रिः सकृद् वाघमर्षणम्॥
उथ्यायार्कं प्रति प्रोहेत् त्रिकेणाञ्जलिनाम्भसः।

त्रिकेण प्रणवव्याहृतिगायत्र्यात्मकेन। तैत्तिरीयश्रुतिः,—"उत्तिष्ठन्तं हवा तानि रक्षांस्यादित्यं योधयन्ति यावदस्तमन्वगात् तानि हवा एतानि रक्षांसि गायत्रियाऽभिमन्त्रितेनाम्भसा शाम्यन्ति।" "तदु हवा एते ब्रह्मवादिनः पूर्व्वाभिमुखाः सन्ध्यायां गायत्रियाऽभिमन्त्रिता आप ऊर्द्ध्वं विक्षिपन्ति ता एता

(१) D. इत्येव वाक्ये सन्ध्या °।
(२) A. ° घ्राणमासज्य °।

आपो वज्रीभूत्वा तानि रक्षांसि [1]मन्देहारुणे द्वीपे प्रक्षिपन्ति।"
योगियाज्ञवल्क्यः,—

त्रिंशत्कोट्यस्तु विख्याता मन्देहा नाम राक्षसाः।
प्राद्रवन्ति सहस्रांशुमुदयन्तं दिने दिने॥

तथा,—

सन्ध्येति तमुपासीनाः प्रक्षिपन्ति महज्जलम्।
तेन ते विप्रणश्यन्ति वज्रीभूतेन वारिणा॥

व्यासः,—

कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्र्य च।
आदित्याभिमुखस्तिष्ठन् त्रिः क्षिपेत् सन्ध्ययोर्द्वयोः॥

त्रिरित्येतस्य क्रियाविशेषणत्वात् करद्वयकरणकगायत्र्यभिमन्त्रितजलप्रक्षेपत्रयं शब्दार्थः। "तिस्र आहुतीर्जुहोती"तिवत् संख्याया भेदकत्वात्। तेन न सकृद् गायत्रीप्रक्षेपः किन्तु वारत्रयं जलग्रहणमभिमन्त्रणं प्रक्षेपश्च। इदञ्च सायं प्रातर्वैकल्पिकं छन्दोगपरिशिष्टोक्तैकाञ्जलिविधिना। मध्याह्ने त्वेक एवाञ्जलिः।

जलप्रक्षेपकाले सन्ध्यास्वरूपध्यानम्। योगियाज्ञवल्क्यः,—

पूर्व्वा सन्ध्या तु गायत्री सावित्री मध्यमा स्मृता।
या भवेत् पश्चिमा सन्ध्या सा विज्ञेया सरस्वती॥

(१) D मन्देहाद्वीपे प्रक्षिपन्तीति।

तथा,—

श्वेता भवति [1]सावित्री गायत्री रक्तवर्णिका।
कृष्णा सरस्वती ज्ञेया सन्ध्यात्रयमुदाहृतम्॥

तस्याः सम्प्रदायसिद्धं स्वरूपम्।

बालां विद्यात्तु गायत्रीं त्रीक्षणां चतुराननाम्।
रक्ताम्बरद्वयोपेतामक्षसूत्रधरां तथा॥
कमण्डलुधरां देवीं हंसवाहनसंस्थिताम्।
ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम्॥
मन्त्रेणावाहयेद् विद्वानायान्तीं सूर्य्यमण्डलात्।

तत्र (अत्र) ब्रह्मलोकनिवासिनीं आसूर्य्यमण्डलादायान्तीमित्यन्तं द्वयं श्लिष्टम्। तेन ब्रह्मलोकादासूर्य्यमण्डलादायान्तीमित्यभिविध्यर्थमात्रम्। सूर्य्यमण्डलस्य सन्ध्यात्वात्।

योगियाज्ञवल्कीये तु,—

ओङ्कारं पूर्व्वमुच्चार्य्य भूर्भुवःस्व स्तथैव च।
[2]गायत्री प्रणवश्चान्ते जप्ये ह्येवमुदाहृतम्॥

इति सन्ध्याजपेतरजपमुपक्रम्य ध्यानमुक्तम्। सन्ध्याजपे [3]प्रणवान्तराहित्यस्य तेनैव वक्ष्यमाणत्वात्।

श्वेतवर्णा समुद्दिष्टा कौषेयवसना तथा।
श्वेतैर्विलेपनैः पुष्पैरलङ्कारैश्च भूषिता॥

---

(१) D. ० गायत्री सावित्री रक्त ०।
(२) A. गायत्री प्रणवश्चान्ते ० C. गायत्रीं प्रणवश्चान्ते ०।
(३) A. C. प्रणवान्तताराहित्यस्य ०।

आदित्यमण्डलान्तःस्था ब्रह्मलोकस्थिताऽथवा।
अक्षसूत्रधरा देवी पद्मासनगता शुभा॥

केचित्तु इदं [1]गायत्रीध्यानं जपकाले [2]कार्य्यम्। "रक्ता भवति गायत्री"त्यादि तु सन्ध्याध्यानं जलप्रक्षेप इत्याहुः। वस्तुतो गायत्रीसन्ध्ययोरैक्येन ध्यानमिति व्यवस्थैव। "अत्र मन्त्रेणावाहये"दिति यद्यपि जलप्रक्षेपकालीनध्यानानन्तरमुक्तं तथापि योगियाज्ञवल्क्येन,—

[3]तत्रावाह्य जपित्वा तु नमस्कृत्य [4]विसर्जयेत्।

इति श्रुतिक्रमदर्शनात् [5]पाठक्रमबाधेन जपारम्भएव गायत्र्यावाहनम्।

यद्यपि याज्ञवल्क्येन,—

आवाह्य यजुषानेन तेजोऽसीति विधानतः।

इति "तेजोऽसी"ति यजुरुक्तं तस्य वाजसनेयिपरिगृहीतत्वेऽपि तैत्तिरीयश्रुतिप्रत्यक्षदृष्ट एवावाहनमन्त्रः सपरिकरो ग्राह्यः। स प्रयोगो वक्ष्यते। ततश्च "यत् प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानमवधून्वन्ति, "असावादित्यो ब्रह्मे"ति तैत्तिरीयश्रुतेरनेन

---

(१) D. सावित्रीध्यानं ०।
(२) D. कार्य्यञ्च।
(३) D. अत्रावाह्य ०।
(४) C. विवर्जयेत्।
(५) D. पीठक्रम ०।

प्रदक्षिणावर्त्तनम्। तत्र "उद्यन्तमस्तं यन्त"मिति वाक्यशेषान्मध्याह्ने तदभावः।

छन्दोगपरिशिष्टे जलप्रक्षेपानन्तरम्,—

तच्चित्रमुद्वयेनाथ उपतिष्ठेदनन्तरम्।
सन्ध्याद्वयेऽप्युपस्थानमेतदाहुर्मनीषिणः॥
मध्याह्ने उदये वापि विभ्राड़ादीच्छया जपेत्।
सदसंसक्तपार्ष्णिर्वा एकपादर्द्धपादपि॥
कुर्य्यात् कृताञ्जलिर्वापि ऊर्द्ध्वबाहुरथापि वा।

[१][अत्र] "तच्चित्रमुद्वये"न" इति सर्व्वैष्टीकाकारैर्व्याख्यातम्। कल्पतरौ च,—"उद्वयं तमसस्परी"ति व्याख्यातमिति पाठसन्देहः।

कात्यायनेन च

उदु त्यं चित्रं तच्चक्षुरुपस्थाय दिवाकरम्।
वाङ्मनःकर्म्मजं पापं सर्व्वमेव व्यपोहति॥

[२][इति।] "उद्वयं" मन्त्रस्थाने "तच्चक्षु"रिति निःसन्दिग्धपाठात् "सन्दिग्धमसन्दिग्धेन बाध्यत" इति बलाबलाधिकरणन्यायात् कात्यायनस्य च वाजसनेयिपरिग्रहात् "तच्चक्षु"रित्युपस्थाने तृतीयो मन्त्रः। नचास्य गुणफलार्थत्वं पर्णमयीन्यायेनार्थवादत्वात्। [४][नरसिंहपुराणेऽपि,—]

(१) C. Omits the portion bracketed.
(२) A. C. ० नाथ सर्व्वै ०।
(३.४) D. Omits the portions bracketed.

उदु त्यञ्च जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि।

अत्र च "उपतिष्ठेत्" इति परस्मैपदात् "जपेत्" इति नारसिंहपाठाच्चादित्याभिमुखमवस्थाय जपमात्रम्। अर्थप्रकाशनन्त्वङ्गमेव। "इच्छया विभ्राड़ादी"त्यनुवाकपुरुषसूक्तशिवसङ्कल्पानां जपः। मध्येऽपि गायत्रीजपाख्यसन्ध्यातः पूर्व्वमिच्छया विभ्राड़ादीनां जपः। गायत्रीजपादूर्द्ध्वं याज्ञवल्क्योक्तो नित्यं जपः। "कृताञ्जलिरूर्द्ध्वबाहुर्वे"ति समविकल्पोक्तोऽपि

सायं प्रातरुपस्थानं कुर्य्यात्[१]साञ्जलिरानतः।
ऊर्द्ध्वबाहुस्तु मध्याह्ने

इति वाक्याद् वार्त्तिन्नीव्रद्यन्वितयोः [२]पौर्णमास्यमावास्याव्यवस्थावत्। याज्ञवल्क्यः,—

सन्ध्यां प्राक् प्रातरेवेह तिष्ठेदासूर्य्यदर्शनात्।

जपन्नित्यनुषज्यते। तेन [३]सूर्य्योदयावधित्वापरित्यागेनैव जपः पूर्व्वसन्ध्या। तेन सूर्य्योदयात् पूर्व्वं जपसमाप्तौ प्रधानैनैक(प्रधानैक)देशलोपात् प्रत्यवायएव। तत्काले कर्म्मान्तरेऽप्यनधिकारः "सन्ध्याहीनोऽशुचि"रित्यु[४]क्तत्वात्। यत्तु,—

ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत्।

(१) D. पा (प्रा) ञ्जलिरानतम्। A. प्राञ्जलिरानतः।
(२) D. पौर्णमास्याव्यवस्थावत्।
(३) A. सूर्य्योदयावधिजपः पूर्व्वसन्ध्या।
(४) D. ० क्तन्यायात्।

वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत् ॥

इति तदपि सूर्य्योदयावधित्वापरित्यागेनैव ।

यथा सूर्य्योदयपर्य्यन्ते शतसमाप्तिस्तथारब्धव्यम् । असमाप्तौ सूर्य्योदये शतमुदयोत्तरमपि समापनीयम् । आश्विनेऽसमाप्ते सूर्य्योदयेऽप्याश्विनसमाप्तिवत् । दैवाच्छतसमाप्तौ सूर्य्यानुदये शतस्यावृत्तिः कार्य्या । सूर्य्योदयात् पूर्व्वमाश्विनसमाप्तौ सूक्तावृत्तिवत् । प्रातरनुवाके अरुणोदयात् पूर्व्वमभूदुषेत्यतः प्राचीनसूक्तसमाप्तौ तदावृत्तिवत् । नहि [1]कालविशेषेणावच्छिन्नानां न संख्यासम्बन्धः येन विकल्पः स्यात् । असंख्यातजपनिष्फलत्वेन श्रुतसंख्यासम्बन्धस्योदयावधित्वेऽप्यावश्यकत्वात् । आश्विनप्रातरनुवाकादौ ऋक् संख्यासत्वेऽपि कालावधिदर्शनात् । शुक्लप्रतिपदमारभ्यैकादशीपर्य्यन्ते द्वादशसहस्रश्रीसूक्तजपस्य विधिदर्शनाच्च । यत्तु बौधायनः,—"अथाप्युदाहरन्ति दर्भेष्वासीनो दर्भान् धारयमाणः सोदकेन पाणिना प्रत्यङ्मुखः सावित्रीं सहस्रकृत्व आवर्त्तयेत् अपरिमितकृत्वो वा । प्राणायामः प्राणायामस्येव (प्राणानायम्यैव) शतकृत्वः । उभयतः सप्रणवां सप्तव्याहृतिकां मनसा वा द्वादशकृत्वः । त्रिभिश्च प्राणायामैः प्रातः सावित्रीं ब्रह्महृदयेन, वारुणभ्यां रात्रिमुपतिष्ठते "इमम्मे वरुण, तत्त्वा यामी"ति द्वाभ्याम् ।" एवमेव "प्रातः प्राङ्मुखस्तिष्ठन् मैत्राभ्यामहरुपतिष्ठते "मित्रस्य चर्षणी धृतो" मित्रोदयात् "पतिः

(१) C. कालविशेषावच्छिन्ना ० ।

प्रजाना"मितिद्वाभ्याम् ।" अपरिमितकृत्वः दशभ्य ऊर्द्ध्वं शतादर्व्वागिति लक्ष्मीधरः । प्राणायामः शतकृत्वः । यावद्भिः [1]प्राणनिरोधैर्वा शतं भवति । ब्रह्महृदयेन प्रणवेन प्राणायामत्रयम् । अत्र सप्तव्याहृति (का) आद्यन्तप्रणवयुक्तगायत्रीजपः सहस्रमितः शतमितो दशमितोवा सन्ध्याशब्दार्थः । [2][एतदपि सूर्य्योदयावधित्वापरित्यागेनैव "उदित आदित्ये समाप्नुयात्" इति तेनैवोक्तत्वात् । अन्येतु बौधायनमते सूर्य्योदयावधिजपः सहस्रादिसंख्यजपश्च विकल्पेन सन्ध्याशब्दार्थः] । तेन तन्मते सूर्य्योदयात् पूर्व्वमपि शतसमाप्तौ सन्ध्या कृता भवति । [3]वाजसनेयिनान्तु,—

ओङ्कारं पूर्व्वमुच्चार्य्य भूर्भुवः स्व स्तथैव च ।
गायत्रीञ्च ततः पश्चात् सन्ध्याकाले जपेत् त्रिकम् ॥

इति नान्ते प्रणवः । [4]["गायत्रीञ्च तत" इति क्रमप्राप्तौ पश्चादिति वचनादन्ते प्रणवाभावः ।] योगियाज्ञवल्क्यः ,—

एतदक्षर[5]मेताञ्च जपन् व्याहृतिपूर्व्वकम् ।
स ...केभयोर्विप्रो वेदपुण्येन युज्यते ॥

इति नान्ते प्रणवः । साग्नेस्तु सूर्य्योदयात् पूर्व्वं होमविधानस्य निरवकाशत्वेन सन्ध्यायाश्चाधिकारसम्पादकत्वेन पूर्व्वं करणि-

(१) C. प्राणनिरोधैः शतं ० ।
(२) C. Omits the portion bracketed.
(३) A. C. वाजसनेयिनामपि ।
(४) C. Omits the portion bracketed.
(५) D. मैत्रोञ्च ० ।

ऽपि सूर्य्योदयात् पूर्व्वं सन्ध्यां समाप्य होमारम्भः। "शयाने(?) श्रीकाम" इति श्रीकामाग्निहोत्रस्यारुणोदयात् पूर्व्वं करणेऽपि प्रातःस्नानसन्ध्ययोरधिकारसम्पादकत्वेनाग्निहोत्रात् पूर्व्वं करणम्। अधिकारसम्पादकस्य स्वाधिकाराभावेऽप्यधिकार्य्यनुरोधेनाधिकारः। [[1]यथा रथकारस्याधानाधिकारसम्पादकविद्याधिकारः।] [2]अथवा महापातकिनः [3]सन्ध्याधिकारेऽपि निरवकाशप्रायश्चित्तविध्यधिकाराधीनः सन्ध्यास्नानाधिकारः। न चैवमकाले कृतायाः सन्ध्यायाः काले पुनः करणम्। नहि सोमान्ते कृतायाः सायमाहुतेः पुनः स्वकाले करणम्। दुर्व्वलस्य सायमाहुत्यनन्तरं प्रातर्होमे कृते वा पुनः प्रातःकाले करणम्। तदुक्तं "सोमान्ते काल उक्त एव प्रातर्होम इति, [4]जीवेच्चेत् स्वः (श्वः) पुनर्न वा कृतत्वादिति च।" स्वविधिप्रयुक्ताया एव सन्ध्याया अधिकारसम्पादकत्वेन परनिमित्तमपकर्षणमात्रं नानुष्ठानं पराधीनम्। स्वविध्यधीनञ्चानुष्ठानं जातमेवातो न पुनः क्रिया। एवञ्च होमसमाप्त्यनन्तरं गायत्रीजप एवोदयपर्य्यन्तं कार्य्य इत्यपि नास्ति। सन्ध्याद्यधिकारसम्पादिका न सन्ध्यैकदेशः। सा चेत् होमात् पूर्व्वं समाप्ता [5]कस्या एकदेशो [6]होमोर्द्ध्वं कर्त्तव्यः। न च साङ्ग-

(१) D. Omits the portion bracketed.

(२) A. D. यथा वा ०।

(३) A. C. सन्ध्यानधिकारेऽपि ०।

(४) D. जीवे चेत्स्वः ०।

(५) A. C. एकस्या ०।

(६) D. होमः कर्त्तव्यम्।

सन्ध्याकर्म्म अनिष्पत्तौ होमाधिकारसम्पादकसन्ध्यापूर्व्वमुत्पन्नं(?) येन होमाधिकारः स्यादिति [1]यद्यपि योगियाज्ञवल्क्येन,—

प्रणवो भूर्भुवः स्वश्चेत्यङ्गानि हृदयादयः।
त्रिरावृत्त्य ततः पश्चादार्षं छन्दश्च दैवतम्॥

इति व्यस्तेन प्रणवव्याहृतित्रयेण चत्वार्य्यङ्गानि समस्तेन पञ्चममिति सकलगायत्रीजपसाधारण्येनोत्पन्नम्। तथापि सन्ध्याकालेऽङ्गान्तरविधानात् तदेव ग्राह्यम्। तथाच स्मृतिः,—

ओं भूर्विन्यस्य हृदये ओं भुवः शिरसि विन्यसेत्।
ओं स्वः शिखायां विन्यस्य गायत्र्याः प्रथमं पदम्॥
विन्यसेत् कवचे विद्वान् द्वितीयं नेत्रयोर्न्यसेत्।
तृतीयेनास्त्रविन्यासश्चतुर्थं सर्व्वतो न्यसेत्॥
विन्यस्यैवं क्रमेणैव सन्ध्याकाले जपेद्द्विजः।
शिरोमन्त्रन्तु सर्व्वाङ्गे प्राणायामपरं (०परो)न्यसेत्॥
उपस्थाय तुरीयेण गायत्रीन्तु समाहितः।

चतुर्थपादो गायत्रीवाच्यो हिरण्यगर्भाख्यः तत्स्मृत्वा सर्व्वदेहे न्यसेदित्यर्थः। प्राणसंयमं कृत्वा सर्व्वाङ्गे शिरोमन्त्रन्यासः। "उपस्थाय तुरीयेणे"ति "गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो माप्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति

(१) D. तदपि योगियाज्ञवल्क्यः।

वा ।" इति तुरीयवाचकपरोरजःशब्दयुक्तः सकलो "गायत्र्यसी"ति मन्त्रो विवक्षितः । तेनोपस्थानं सन्ध्याङ्गम् । तथाच बौधायनः,—"उपतिष्ठेत वा एतां देवीं तुरीयपदेन । अथाप्युदाहरन्ति गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजस इत्यखिलां जपतीति ।" उपस्थाय जपतीत्यर्थः । अत्रचासौ पदस्थाने द्वेष्यनामग्रहणं द्वेष्यस्याभिलषितं माप्रापत् । द्वेष्याभावे पाप्मा मदीयजपफलप्रतिबन्धकत्वं मा प्रापदिति । अथवाहं पापक्षयं प्राप इत्येवं मन्त्रः । अत्र तस्या उपस्थानमित्यविशेषोक्तेः प्रकाशनपर्य्यन्तमुपस्थानशब्दार्थोऽवस्थानमात्रमिति सन्देहे "यस्मा एवमुपतिष्ठत" इति वाक्यशेषे आत्मनेपदप्रयोगान्मन्त्रकरणकप्रकाशनं लभ्यते तेन मन्त्रार्थस्य गायत्र्यां त्रैलोक्यत्रैविद्यत्रिवृत्-प्राणादिसम्पादनस्य ज्ञानं विना प्रकाशनशक्यमिति गायत्र्युपासना प्रथमं बुद्धिस्था कर्त्तव्या । अन्यथा प्रकाशनासम्भवेन"उपस्थाय तुरीयेण"इत्यसङ्गतेः । तेनार्थाद् गायत्र्युपासनमपि सन्ध्याङ्गम् । यश्च प्रतिग्रहदोषनिवृत्त्यर्थमेव गायत्र्युपासनं काम्यं करोति तस्य कर्म्मकाले तदुपासनस्य फलातिशयत्वात् सुतरां सन्ध्यायाः पुरुषार्थमेव गायत्र्युपस्थानं संयोगपृथक्त्वात् कर्म्माङ्गञ्च । तथाच "भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरं ह वा (क)गायत्र्यैकपदम् ।" एवं "ऋचो यजूंषि सामानीत्यष्टावक्षराण्यष्टाक्षरं ह वा गायत्र्यैकपदम् ।" "प्राणो-

(क) बृहदारण्यकोपनिषद् reads "एकं गायत्र्यै पदम्" in the places of "गायत्र्यैकपदं" mentioned here in the text. See, 5. 14. 1, 2, 3.

ऽपानोदान(ख)व्यान इत्यष्टावक्षराण्यष्टाक्षरं ह वा गायत्र्यैकपदम् ।" [1]अथास्यान्तरिक्षं पदं परोरजा य एष तपतीत्युपासनास्वरूपमुक्त्वाह,—(ग)"स य एवं विद्वद्विव प्रतिगृह्णाति न हैव तद् गायत्र्या एकञ्चन पदं प्रति ।" इत्युक्त्वाह,—"स य इमांस्त्रीन् लोकान् पूर्णान् प्रतिगृह्णीयात् सोऽस्या एतत् [2]प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत् प्रतिगृह्णीयात् सोऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत् प्रतिगृह्णीयात् सोऽस्या एतत् तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा [[3]य एष तपति] नैव केन च नाप्यं कुत उ एतावत् प्रतिगृह्णीयात् ।" इति ।

योगियाज्ञवल्कीये च,—

सायं प्रातश्च ये सन्ध्यां मध्याह्ने पर्य्युपासते ।
जपन् वै तामिमां देवीं गायत्रीं लोकमातरम् ॥
स तया प्रार्थितो देव्या ब्राह्मणो वीतकल्मषः ।
न सीदेत् प्रतिगृह्णानः पृथ्वीमपि ससागराम् ॥

इति सन्ध्यात्रयकालीनजपकाले शतपथोक्तगायत्र्युपासनाफलं प्रतिग्रहदोषाभावरूपमेव श्रुत्यनुसारेणोक्तं लक्ष्यते । तेन

(ख) "उदान" is not seen in the बृहदारण्यकोपनिषद् See 5. 14. 3.
(१) D. अथास्या भूरियं पदं ० ।
(ग) बृहदारण्यकोपनिषद् reads :—यदि ह वा अप्येवं विद् ० See, 5.14. 5.
(२) C. द्वितीयं ० ।
(३) C. Omits the portion bracketed.

प्रथमं गायत्र्युपासनां कृत्वोपस्थाय जपारम्भः कार्य्यः। जपधर्म्माश्च परिभाषायामुक्ताः ।

अत्राक्षमालालाभे हस्तेन गणनम् ।

प्रातरुत्तानपाणिस्तु मध्याह्ने समपाणिकः ।
[1]अधोमुखकरः सायं वस्त्रावृतकरो जपेत् ॥

इति विशेषः। मन्त्रार्थज्ञानस्य जपाङ्गत्वेऽपीह सन्ध्याशब्दार्थस्यादित्यमण्डले जीवब्रह्माभेदध्यानपूर्व्वकशुद्धचैतन्यात्मतासम्पादनस्यावश्यानुष्ठेयत्वेन गायत्र्यर्थतया तथाध्यानमावश्यकम्। असमर्थस्य [2]सवितृमण्डलमध्यस्थनारायणध्यानम् ।

वाचिकोपांशुमानसभेदेन जपत्रैविध्येऽपि,—

नोच्चैर्जपं बुधः कुर्य्याद् गायत्र्यास्तु विशेषतः ।

इति गायत्रीव्यतिरिक्तो वाचिको जपोऽल्पफलः। गायत्र्यास्तु वाचिको जपो नास्त्येव। तेन यत् "उच्चनीचस्वरितै"रित्यादिवाचिकजपलक्षणे स्वरनियमाल्लक्षणस्यासाधारणधर्म्मत्वेन मानसान्यव्यावृत्तत्वादुपांशुमानसयोः स्वराभावः। नचैवं गायत्र्या वर्णविशेषे स्वरविशेषविधानं व्यर्थम्। "वाचिको मारणे चैव प्रशस्त" इत्यादि गुणफलार्थस्य वाचिकस्य गायत्र्या (०त्र्यां) सम्भवेन तत्र स्वरापेक्षायां (या) विधानसम्भवात्। किञ्च पाणिनीये,—एकश्रुति दूरात् सम्बुद्धौ यज्ञकर्म्मणि जपन्युङ्खसामसु उच्चैस्तरां वषट्कारः उच्चैरुदात्तः नीचै-

---

(१) D. अधोमुखं करः ० ।

(२) A. D. सवितुर्मण्डल ० ।

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1094.



नित्याचारप्रदीपः ।

NITYĀCĀRA-PRADĪPAḤ.

BY

NARASIṂHA VĀJAPEYĪ.

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

FASCICULUS V.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTTI, AT THE SANSKRIT PRESS.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1904.

Pariçiṣṭa Parvan, (Text) Fasc. 1--5 @ /6/ each ... ... Rs.	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /6/ each	2	10
Prithivirāj Rāsa. (Text) Part II, Fasc. 1--5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1--3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5--10 ; II, 1--6 ; III, 1--7 ; IV, 1--6 ; V, 1-8, @ /6/ each Fasc.	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1 4 @ /6/ each	1	8
Ditto (English) Fasc. 1-3 @ /12/ each	2	4
Suddhikaumudī, (Text) Fasc. 1 @	6	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/ each	0	12
Sraddha kriyā kaumudī, Fasc. 1-5 @ /6/	1	14
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each	1	2
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	7	2
Tantravarteka (English) Fasc. 1	0	12
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1--12 @ /6/ each	14	10
Tattvarthadhigama Sutram Fasc. 1-2	0	12
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/	1	2
Tul'si Sat'sai, (Text) Fasc. 1--5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each ...	2	4
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ /12/	4	8
Vallāla Caritam Fasc 1-- Text only)	0	8
Varāha Purāṇa. (Text) Fasc. 1--14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc 1--5 @ /6/ each	1	14
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--7, @ /6/ each	4	8
Vidhan Parijata, Fasc. 1--5	1	14
Viṣṇu Smṛti, (Text) Fasc 1--2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1--7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1--6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1--6	2	4
Tibetan Series.		
Pag-Sam Ṭhi S'iñ, Fasc. 1--4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc 1--5 ; Vol. II, Fasc 1--3 ; Vol. III. Fasc. 1--6, @ 1/ each	14	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1--5 ; Vol. II. Fasc. 1--5 @ 1/ each	10	0
Arabic and Persian Series.		
Ālamgirnāmah, with Index, (Text) Fasc. 1--13 @ /6/ each	4	14
Al-Muqaddasi (English) Vol. I, Fasc 1--3 @ /12/	2	4
Āin-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, Fasc. 1--5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1--37 @ 1/ each	37	0
Ditto (English) Fasc. 1--8 @ Vol. II, Fasc. I-1/ each ...	9	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1--19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1--21 @ 1/ each	21	0
Farhang-i-Rashīdi, (Text) Fasc. 1-14 @ 1/ each...	14	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1--4 @ /12/. each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1--9 @ /6/ each	3	6
Ditto of Āzādi, (Text) Fasc. 1--4 @ /6/ each	1	8
Haft Asmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1--6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1--3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. III, Fasc. 11-12 ; Index to Vol. II, Fasc. 10-12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1--5 @ /6/ each	1	14

*The other Fasciculi of these works are out of stock, and complete ies cannot be supplied.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal.

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,
46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1-2		0	12
*Agni Purāṇa, (Text) Fasc 4-14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III. Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5 ; Vol. II. Fasc. 1-5 @ 1/ each		10	0
Bal Bhatta Fasc. 1 @ /6/ each		0	6
Bandhaya Banta Sutram Fasc. 1 @ /6/ each		0	6
*Bhāmatī, (Text) Fasc. 4-8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-4		1	8
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each		1	8
Bṛhaddharma Purāṇa (Text) Fasc 1-6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1		0	6
Catadusani Fasc 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ..		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-3 ...		3	12
Çatasāhasrikā Prajnāpāramitā (Text) Part, I. Fasc. 1-7 @ /6/ each ...		2	10
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25 ; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. @ /6/ each ; Vol. IV. Fasc. II		20	4
Çlockavartika, (English) Fasc. 1-4		3	0
Çrāddha Kṛyā Kaumudī (Text) Fasc. 1-5 @ /6/ each		1	14
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-16 @ /6/ each... ...		4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc 1-3 @ /6/ each		1	2
Dana kriyā kaumudī, Fasc 1--2 @ /6/		0	12
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-6...		2	4
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1-6		2	4
Kātantra, (Text) Fasc 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Vol. I, Fasc 1-9 II, Fasc. 1-10 @ /6/ each		7	2
Maṇutikā Sangraha, (Text) Fasc. 1-3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-7 @ /12 each		5	4
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1--3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1--4 @ /6/		1	8
*Nirukta, (Text) Vol. III. Fasc. 1--6 Vol. IV, Fasc. 1--8 @ /6/ each ...		5	4
Nityācāra Paddhatiḥ (Text) Fasc. 1--7		2	10
Nityācārapradīpaḥ (Text) Fasc. 1-5		1	14
Nyayabinduṭīkā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1--6 ; Vol. II, Fasc. 1--3 @ /6/ each		3	6
Padumawati Fasc. 1--3 @ 2/		**6**	**0**
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1--15 @ /6/ each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and Index ; Vol. III, Fasc 1 @ /12/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1- 19 @ /6/ each		7	2
Ma'āṣir-i-' Ālamgīrī, (Text), Fasc. 1--6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1--2 @ /12/ each ...		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1--5 @ /6/ each		1	14
Ditto (English) Fasc. 1--3		2	4
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1--5 @ /6/ each		1	14
Ditto (English) Fasc. 1--14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1--7 @ /6/ each ...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif. (Text) Fasc. 1--6 @ /6/ each ...		2	4
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each		3	0
Wis-o-Rāmin, (Text) Fasc. 1--5 @ /6/ each		1	14
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /6/ each ...		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No. ; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Assiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1170 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8) 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharraḥīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II, and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kasmir by M. A. Stein PH.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1--29 @ 1/ each	**29**	**0**
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	**5**	**0**

***N.B.*—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.**

6-10-04.

Books are supplied by V.P.P

रनुदात्तः। समाहारः स्वरित" इत्युक्ता "विभाषाच्छन्दसी"त्युक्तम्। तत्र विभाषायामेव श्रुतिरित्यनुवर्त्तते "[1]यज्ञकर्म्मव्यतिरिक्ते छन्दसि उदात्तादिस्वरनियमो नैकश्रुत्वं वे"ति। तत्र यदि "जपन्यूङ्खसामसु" विभाषाप्रवेशस्तदा पर्य्युदासवैयर्थ्यमिति नित्यमेव तत्रो[2]दात्तस्वरः। तथाच त्रिविधजपे नानास्वरनियम[3]प्राप्तौ वाचिके नानास्वरनियमकथनमप्राप्तनियमविध्योरसम्भवात् परिसंख्यार्थमुपांशुमानसयोर्नोदात्तादिनानास्वर इति। अन्यथा "स्पष्टशब्दवदक्षरैर्व्यक्तं मन्त्रोच्चारणं वाचिक"मित्येतावता लक्षणसिद्धौ उच्चनीचस्वरितकीर्त्तनं व्यर्थमेव स्यात्। [4]जपसमाप्तौ "गायत्रसी"त्युपस्थाय महाव्याहृतिभिर्जलं

गायत्र्या प्रणवेनैव दद्यादेतत् विसर्ज्जनम्।

इति वचनात्। पुनस्तुरीयेणोपस्थाय प्रणवव्याहृतिगायत्रीभिर्जलचुलुकप्रक्षेपः। याज्ञवल्क्यः,—

इत्यावाह्य जपित्वा च नमस्कृत्य विसर्जयेत्।

नम इति पठित्वा गायत्रि स्वस्थानं गच्छेति विसर्ज्जनम्।

अन्यत्र तु,—

आयाहि वरदे देवि त्र्यक्षरे ब्रह्मवादिनि।
गायत्रि च्छन्दसां मातः स्वयं ब्रह्माप्यवाप्यतु॥

---

(१) D. यदि कर्म्म०।

(२) A. C. ० दात्तादिस्वरः।

(३) D. ० समाप्तौ ०।

(४) D. Adds जपधर्म्मपरिभाषायामेवोक्तः। जपसमाप्तौ ०।

इत्याह्वानं विसर्गोऽपि नमोऽस्त्वितिच तत्शृणु ।

उत्तरे शिखरे [1]जाते भूम्यां पर्व्वतवासिनि ।

ब्रह्मणा समनुज्ञाते गच्छ देवि यथासुखम् ॥

इत्यावाहनविसर्गमन्त्रावुक्तौ । मनुः,—

ऋषयो दीर्घसन्ध्यत्वाद् दीर्घमायुरवाप्नुयुः ।

दीर्घसन्ध्यत्वमुदया[2]नन्तरं जपस्य दीर्घकालव्याप्तया । शङ्खः सन्ध्याजपानन्तरम्,—

ततो जपेत् पवित्राणि पावमानीश्च शक्तितः ।

ऋषयो दीर्घसन्ध्यत्वाद् दीर्घमायुरवाप्नुयुः ॥

पवित्राणि अघमर्षणादीनि शङ्खोक्तानि। तेन दीर्घसन्ध्यत्वमुदयानन्तरमघमर्षणादिजपेन । नृसिंहोपासकस्य,—

दशमात्रं जपेन्मन्त्रं न(ना)रसिंहन्तु सन्ध्ययोः ।

सर्व्वरोगविनिर्म्मुक्तः शतं वर्षाणि जीवति ॥

तस्मादष्टाक्षरं मन्त्रं [3]मङ्गक्तैर्वीतकल्मषैः ।

सन्ध्याकाले तु जप्तव्यं शतञ्चात्मविशुद्धये ॥

[4]इत्येतच्च सूर्य्योदयानन्तरं कार्य्यम् । [5][अथवा] "काम्यं नित्यस्य बाधक"मिति सूर्य्योदयात् पूर्व्वं कार्य्यम् ।

---

(१) D. ० वासे भूम्यां ० ।

(२) D. ० नन्तरजपस्य ० ।

(३) A. चाशक्तैर्वीत ० ।

(४) A. C. इति च । एतच्च ।

(५) D Omits the portion bracketed.

अत्र,—

कर्म्मणा मनसा वाचा यद्रात्र्या कृतमेनसः ।

उत्तिष्ठन् पूर्व्वसन्ध्यायां प्राणायामैर्व्यपोहति ॥

इति (उत्) तिष्ठतः [1]प्राणायामत्रयं सन्ध्याप्रकरणाद्बहिः पाठात् फलार्थं पृथक्कार्य्यमिति केचित् । वस्तुतो बलवत्प्रत्यभिज्ञानात् सन्ध्याकर्म्मण एवानेन फलान्तरसम्बन्धः । यथा याज्ञवल्क्ये [2]रहस्य-पापक्षयप्रायश्चित्तप्रकरणे,—

त्रिकालसन्ध्याकरणात् तत्सर्व्वं विप्रणश्यति ।

इति । अन्यथा "फलञ्च कर्म्मसन्निधा"विति [3]तत्र सन्ध्याभेदापत्तेः । तेन "यज्ञेन दानेन विविदिषन्ती"तिवत् रूपाज्ञानादेवा[4]-प्रकरणेन कर्म्मभेदः । (?) नह्यत्रापि प्राणायामस्य मन्त्रं(:) कालो वा ज्ञायत इति ।

नारसिंहे,—

[5][प्रदक्षिणं समावर्त्य नमस्कृत्य च तं प्रभुम् ।

इति । तथा,—]

प्रदक्षिणं समावर्त्य नमस्कृत्योपविश्य च ।

मण्डलस्थं ततो ध्यायेत् पुरुषन्तु हिरण्मयम् ॥

---

(१) D. प्रातरुत्थाय सन्ध्याप्रकरणाद् ० ।

(२) D. रहस्यप्रायश्चित्त ० ।

(३) D. तत् सन्ध्या ० ।

(४) D. ० प्रकरणेऽपि न कर्म्म ० ।

(५) D. Omits the portion bracketed.

त्वं ब्रह्मा त्वं तथा विष्णु स्त्वं रुद्र स्त्वं प्रजापतिः ।
त्वमेव चात्मा भगवान् स्थावरस्य चरस्य च ॥
इत्युक्त्वापः समादाय प्रदद्यादञ्जलित्रयम् ।
ब्राह्मवैष्णवरौद्रैर्वा मन्त्रैर्वा प्रणवेन वा ॥

एतत्[1]सन्ध्याकर्म्म कालातिक्रमशङ्कायां जलमध्ये कर्त्तव्यम् । जले चार्द्रवासोनियमः । सावित्रीजपस्तु स्थले कर्त्तव्यः ।

नोदकस्थो जपेद् विद्वान् सावित्रीं [2]वेदमातरम् ।

इति वचनात् । स्थले चार्द्रवस्त्रनिषेधः सामान्यशास्त्रं गायत्री-जपस्य जले निषेधो विशेष इति तदेव परिहार्य्यम् ।

न प्रातर्न प्रदोषे वा सन्ध्याकालो विपद्यते ।
मुख्यः कालोऽनुकल्पश्च सर्व्वस्मिन् कर्म्मणि स्मृतः ॥

तेन त्रिमुहूर्त्तात्मकः प्रातःकालोऽनुकल्पः । सायञ्च त्रिमुहूर्त्तम् । मण्डनादिभिः सजातीयकर्म्मान्तरकालपर्य्यन्तं गौणकालस्योक्त-त्वात् मध्याह्नसन्ध्यापर्य्यन्तं गौणकालत्वेऽपि

सामान्येनाभ्यनुज्ञानाद् विशेषो हि विशिष्यते ।

इतिन्यायेन त्रिमुहूर्त्तपर्य्यन्तं निर्द्दोषत्वं तदूर्द्धं फलाल्पत्वम् । मध्याह्नसन्ध्याकालादूर्द्धं लोप एव । [3]अयं विशेषः ।

उदिते तु जलं पीत्वा गायत्र्या दश मन्त्रितम् ।

(१) A. सन्ध्याकाला ०।
(२) A. लोकमातरं।
(३) A. C. अयञ्च विशेषः।

इति नैमित्तिकमङ्गम् । तथा,—

यामार्द्धमागते सूर्य्ये तथाचास्तमुपागते ।
विप्रः पतितसन्ध्यस्तु स्नात्वा सन्ध्यां समाचरेत् ॥

यामार्द्धमागते,—दिवा अस्तमनादूर्द्धञ्च यामार्द्धमागत इति सम्बन्धः । अत्र स्नानमधिकम् । सायं सन्ध्यायाः [1]प्रातः सन्ध्या-पर्य्यन्तं गौणकालत्वेऽपि त्रिमुहूर्त्तादूर्द्धं वैगुण्याधिक्यात् फला-ल्पत्वम् । मध्याह्नसन्ध्यायास्तु,—

अध्यर्द्धयामादासायं सन्ध्या माध्याह्निकी स्मृता ।

इति दक्षवचनाद् विशेषाभ्यनुज्ञानाद् दोषाभावः ।

[2]शतकृत्वः पिबेदापो गायत्र्या श्राद्धभुग् द्विजः ।
ततः सन्ध्यामुपासीत शुद्ध्यते तदनन्तरम् ॥

इति श्राद्धभोजनप्रायश्चित्तं नतु सन्ध्याङ्गम् । तदभावे न सन्ध्यावैगुण्यम् ।

सन्ध्योपासनहानौ च नित्यश्राद्धं विलोप्य च ।
होमं नैमित्तिकं शुद्धेरद् गायत्र्यास्तु सहस्रकृत् ॥

एतद् गौणकालेऽप्यकरणे प्रायश्चित्तम् । [3]सायमतिक्रमे रात्र्यु-पवासः प्रातरतिक्रमे दिवोपवास इति वा प्रायश्चित्तम् । न चैतत् कालातिक्रममात्रविषयमिति वाच्यम् । सन्ध्याप्रकरणाम्नातत्वेन

(१) D. प्रातःसन्ध्या गौणकाल ०।
(२) A. D. दशकृत्वः ०।
(३) A. C. रात्र्यतिक्रमे सायमुपवास इति प्रायश्चित्तम्।

[1]तदनङ्गत्वे पृथक् फलकल्पनापत्तेः। प्रायश्चित्ते तु तल्लोपजन्य-पापक्षय एव फलमिति। विष्णुपुराणे,—

सर्व्वकालमुपस्थानं सन्ध्ययोः पार्थिवेष्यते।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥

अन्यत्र [2]सूतकाशौचेतु पर्य्युदासः। विभ्रमातुरभयेषु यदर्थ-प्राप्तमकरणं तत्र दोषाभाव उच्यते। तत्र विभ्रमादावपि सम्भवे कर्त्तव्यम्। व्यासः,—

ॐ सूर्य्याय नमः प्रातः सायञ्चैवाग्नये नमः।
अनग्निमान् ब्रह्मचारी प्रदद्यादुदकाञ्जलिम्॥

इति जलाञ्जलिदानम्। समाचारात् प्रजापतये द्वितीयाञ्जलिः। स्वाहाशब्दो नमःशब्दस्थाने च समाहारादेव। "अनग्निमान्" इत्यविशेषोपादानादुत्सन्नाग्नेरपि।

---

(१) A. D. तदङ्गत्वे ०।
(२) D. सूतकाशौचपर्य्युदासः। A. सूतकाशौचे पर्य्यु ०।

अथ सन्ध्याक्रमः।

ईशानाभिमुखोपविष्टस्य दक्षिणहस्ते पवित्रधारणम्। वामहस्ते कुशमुष्टिधारणम्। द्विराचमनम्। त्रिमात्रप्रणवोच्चारणम्। नारायणस्मरणम्। [1]दक्षहस्ते जलचुलुकमादाय ऋष्यादिस्मरणपूर्व्वकमघमर्षणसूक्तेनाभिमन्त्र्य तज्जलपानम्। द्विराचमनम्। वारिणा देहवेष्टनम्। ततः कराग्रस्थितजलविन्दुभिः कुशैः शिरसि जलविन्दुप्रक्षेपरूपं मार्ज्जनम्। प्रथमं प्रणवव्याहृतित्रयगायत्रीभिस्त्रिरावृत्ताभिरेकम्। "आपोहिष्ठे"ति सार्द्धर्च्चेन "भाजयतेहन" इत्यन्त्येन भूमौ जलविन्दुसेकः। कुशाग्रै"रुशती"रित्यादि "[2]चन" इत्यन्त्येन सार्द्धर्च्चेन शिरसि मार्ज्जनम्। अघमर्षणसूक्तेन मार्ज्जनम्। मन्त्रवर्णिकफलकामनायां "शन्न आप" "द्रुपदा" इत्याभ्यां मार्ज्जनद्वयम्।

आसनं [3]स्थिरीकृत्य कुशत्रयेणास्तीर्य्य स्वस्तिकपद्माद्यन्यतमेनोप वेशनम्। ॐकारस्य,—[4][ब्रह्म] गायत्री [5]अग्निव(म)त् परमात्मा देवता प्राणायामे विनियोगः। [6]सप्तव्याहृतीनां,—प्रजापतिर्ऋषिर्गायत्र्यनुष्टुप्-व्याहृति पंक्तित्रिष्टुप् जगत्य-

---

(१) D. दक्षिणहस्ते ०।
(२) D. जनयथाचन इत्य ०।
(३) D. स्थिरीकृत्यास्तीर्य्य ०।
(४) D. Omits the portion bracketed.
(५) D. अग्निव(म)त्प्रकाशात्मा देवताः ०।
(६) D. समस्तव्याहृतीनां ०।

च्छन्दांसि । अग्निवायुसूर्य्यबृहस्पतिवरुणेन्द्रविश्वेदेवाः (देवताः ।) गायत्र्याः,—विश्वामित्रः । गायत्री । सविता । शिरसः,—[1][प्रजापतिः ।] [2][यजुः ।] ब्रह्माग्निवायुसूर्य्याः ।

चक्षुर्निमीलनम् । वाग्यमः । दक्षनासापुटे दक्षाङ्गुष्ठदानेन नीरन्ध्रतां कृत्वा वामनासापुटे वाह्यवायुपूरणकाले "ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् । ॐ आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम्" इति मन्त्रं त्रिर्जपतः आकुञ्चनेनापानमूर्द्ध्वमाकृष्य मन्त्रार्थ-चिन्तनम् । तटस्थस्वरूपलक्षणाभ्यां ब्रह्म लक्षयित्वा स्वात्मनस्तेना-भेदो वाक्यार्थः । "सवितु"र्जगत्कारणस्य "देवस्य" दीप्तयात्मकस्य जड़व्यावृत्तचैतन्यात्मकस्य स्वरूपं यद् "भर्गः" भ्राजत इति स्वप्रकाश-मित्यर्थः । पुनः कीर्त्तनात् "वरेण्यं" प्रार्थनीयमानन्दस्वरूपमित्यर्थः । "यः" सविता "नो"ऽस्माकं "धियः" बुद्धिवृत्तीः "प्रचोदयात्" प्रेरयेत् धर्म्मार्थकाममोक्षेषु तं "धीमहि" स्वाभेदेन चिन्तयामः । कीदृशं तद् भर्गः ॐकारवाच्यपूर्णचित्स्वरूपं भूरादिसप्तलोकात्मकम् । भूरादिसप्तलोकानां तत्राध्यस्तत्वेन तत्सत्त्वयैव सत्त्वादिति सद्रूपत्व-मुक्तम् । [3]["आपः" सलिलम् । "ज्योति"स्तेजोऽग्न्यादि । "रसः" पृथिवी । "अमृतं" [4]वाय्वाकाशः । अमृतभूतद्वयञ्च ब्रह्मैव । तथा

(१) D. Omits the portion bracketed. A. प्रजापतिर्ऋषिः ।

(२) A. Omits the portion bracketed.

(३) A. Omits the portion bracketed.

(४) D. वाय्वाकाशरूपम् ।

ब्रह्म बृहत् । यद्व्यतिरिक्तं किमपि नास्तीत्यर्थः । "भूर्भुवः स्वः" सत्त्वरजस्तमोमयविष्णुब्रह्मशिवात्मकमिति । "ॐ" मित्यखण्डरूप-वाक्यार्थपरामर्षाय । अत्र भर्गदेववरेण्यपदभूरादिपदैः स्वप्रकाश-चिदानन्दसद्रूपत्वं स्वरूपलक्षणमुक्तम् ।] सवितुःपदशिरोमन्त्रै-स्तटस्थलक्षणं जगत्कारणत्वं प्रपञ्चाधिष्ठानत्वञ्चोक्तम् । धीमहीति पदेन ब्रह्मजीवयोरैक्यमुक्तमन्तिमोङ्कारेणाखण्डरूपवाक्यार्थ उक्तः । ततो नाभिमध्यस्थनीलोत्पलश्यामचतुर्भुजविष्णुध्यानम् । एवं पूरकं कृत्वा कनिष्ठानामिकाभ्यां वामनासापुटं नीरन्ध्रं कृत्वा [1][अङ्गुष्ठेन दक्षनासापुटं नीरन्ध्रं कृत्वा] गुदमूलाकुञ्चनेनापान-वायुमुत्तोल्य [2][पूर्व्ववद् दशप्रणवसप्तव्याहृतिगायत्रीशिरसां त्रिवार-जपेन सम्पूर्णकुम्भवदवस्थानम् । शक्तौ सत्यां त्रिवारजपादूर्द्ध्वमपि । मन्त्रार्थजीवब्रह्मैक्यचिन्तनं पूर्व्ववत् । हृदये रक्तगौराङ्गचतुर्मुख-ब्रह्मध्यानञ्च । एवं कुम्भकं स्थिरीकृत्य दक्षिणाङ्गुष्ठत्यागेन [3]दक्षनासापुटेन वायुविरेचनं शनैः शनैः ।] पूर्व्ववद्दशप्रणवसप्त-व्याहृतिगायत्रीशिरसां त्रिवारजपो मन्त्रार्थजीवब्रह्मैक्यानुसन्धा-नम् । ललाटे शुद्धस्फटिकसङ्काशवृषारूढमहेश्वरध्यानञ्च । एष रेचकः । एवमपरं वारद्वयं रेचकादित्रयम् ।

(१) D. Omits the portion bracketed.

(२) A. Omits the portion bracketed.

(३) D. दक्षिणनासा० ।

ततः,—

[1]अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञ स्त्वं वषट्कार आपोज्योतीरसोऽमृतम् ॥

इति सकृदाचमनम् । "आपोहिष्ठे"ति तृचेन सशिरस्कदेह-प्रोक्षणं समाचारादविरोधाच्च कुशैरेव । पाण्योर्जलमादाय द्रुपदां त्रिरावर्त्त्य तज्जलस्य शिरसि[2]क्षेपः । दक्षिणहस्ते जलचुलुकं गृहीत्वा वामनासायां संयोज्याघमर्षणसूक्तस्य त्रिः सकृद् वा जपः । जपकाले प्राणनिरोधः पाक्षिकः । प्राणनिरोधपक्षेऽप्याचमनाभावः । प्रमाणाभावात् ।

गायत्री बाला त्रीक्षणा चतुरानना रक्ताम्बरद्वयोपेता ब्रह्माणी हंसवाहनाक्षसूत्रकमण्डलु[3]हस्ता ब्रह्मलोकादागत्य सूर्य्यमण्डलप्रविष्टा एषैव पूर्व्वसन्ध्येतिध्यानम् । प्रणवव्याहृतिगायत्रीभिरुत्थाय सूर्य्याभिमुखं [4]जलाञ्जलित्रयप्रक्षेपः । प्रत्यञ्जलिमन्त्रपाठः । "असावादित्यो ब्रह्मे"ति प्रदक्षिणावर्त्तनम् ।

उपस्थानम्,—उदुत्यम् । प्रस्कण्वः । गायत्री । सूर्य्यः । चित्रम् । कौत्सः । त्रिष्टुप् । सूर्य्यः । तच्चक्षुः । दध्यङ् । आथर्व्वणः । उष्णिक् । सूर्य्यः । त्रयाणामुपस्थाने,—सूर्य्याभिमुखस्य भूम्यलग्नगुल्फतया भूमिलग्नैकपादतया भूमिलग्नार्द्ध-

(१) A. C. अन्तश्चरति ० ।
(२) D. प्रक्षेपः ।
(३) D. ० धरा ० ।
(४) D. जलाञ्जलिप्रक्षेपः ।

पादतया वा स्थितस्य प्राञ्जले[1]र्मन्त्रत्रयपाठः । "उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम्", "चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य्य आत्मा जगतस्तस्थुषश्च", "तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणवाम शरदः शतम् ।"

अथ जपः ।

प्रथमं सन्ध्यादेवतया [[2]गायत्र्या] कृतसन्धानं सूर्य्यं ध्यात्वा सच्चिदानन्दब्रह्माहमिति जीवब्रह्मणोरैक्यं ध्यात्वा तदेवादित्यमण्डलात्मकमिति ब्रह्माभिन्नत्वेनादित्यमण्डलध्यानम्। ॐकारस्य,—ब्रह्म । गायत्री । अग्निः । व्याहृतीनाम्,—प्रजापतिः । अग्निवायुसूर्य्याः । जपे (।) [[3]विश्वामित्रः । (?) गायत्र्या(:),—] विश्वामित्रः । गायत्री । सविता । जपे । तेजोऽसीति,—परमेष्ठी [4]प्रजापतिः । यजुः । आज्यम् । गायत्र्यावाहने । "तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनम् ।" गायत्रि

(१) C. मन्त्रपाठः ।
(२) C. Omits the portion bracketed.
(३) D. Omits the portion bracketed.
(४) C. प्रजापतिपुरुषः । यजुः । आज्यं दे । गायत्र्यावाहने वि ।

अत्रागच्छ । अथवा [1]प्रत्यक्षश्रुतविश्वासाधिक्यात् तैत्तिरीयरीत्यावाहनम् । प्रणवव्याहृतित्रय-ऋष्यादिस्मरणम् ।

आयातु वरदा देवी अक्षरं ब्रह्मसम्मितम् ।
[2]गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व मे ॥
यदह्नात् कुरुते पापं तदह्नात् प्रतिमुच्यते[3] ।
सर्व्ववर्णे महादेवी सन्ध्याविद्ये सरस्वति ॥

"ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामासि विश्वमसि विश्वायुः सर्व्वमसि सर्व्वायुरभिभूरों गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि छन्दर्षीनावाहयामि। [[4]श्रियमावाहयामि।] [5]गायत्रिया गायत्री(च्छन्दो) विश्वामित्र(ऋषिः) सविता देवता। अग्नि(:)मुखम्। ब्रह्मा शिरः। रुद्र (:) शिखा विष्णु (:) हृदयं पृथिवी योनिः प्राणापानव्यानोदानसमानाः [6]सप्राणाः। श्वेतवर्णा। साङ्ख्यायनसगोत्रा। गायत्री चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षिः पञ्चशीर्षोपनयन(ने)विनियोगः।" गायत्र्यादीनां त्रयाणामाम्नानेऽपि सूक्तवाके देवताषट्काम्नानेऽपि पर्व्वभेदेन व्यवस्था पूर्व्ववत्। गायत्रीमावाहयामीति प्रातः न[7]

(१) D. प्रत्यक्षदृशो विश्वासा ०।
(२) D गायत्रीं छन्दसां मात इदं ब्रह्म जुषस्वरोम्।
(३) A. D. Adds here यद्रात्रौ कुरुते पापं तद्रात्र्या प्रतिमुच्यते।
(४) C. Omits the portion bracketed.
(५) C. गायत्र्या विश्वामित्रः। गायत्री। सविता। अग्निमुखम् ०
(६) C. सुप्राणाः।
(७) D. नेतरयोः। मध्याह्ने ०।

सावित्रीसरस्वत्योः। मध्याह्ने सावित्रीमावाहयामीति नेतरयोः। सायं सरस्वतीमावाहयामीति नेतरयोः। ॐ भूः हृदयाय नमः। ॐ भुवः शिरसे स्वाहा। ॐ स्वः शिखायै वषट्। ॐ तत्सवितुर्वरेण्यं कवचाय हुम्। ॐ भर्गो देवस्य धीमहि नेत्राभ्यां वौषट्। ॐ धियोयोनः प्रचोदयात् [[1]करतलपृष्ठाभ्यां] अस्त्राय फट्। गायत्र्यर्थं हिरण्यगर्भमादित्यमण्डलस्थं ध्यात्वा हिरण्यगर्भाय नम इति सर्व्वदेहे न्यासः। [2]ॐ ब्रह्मभूर्भुवः स्वरोमिति संयतप्राणो देहे न्यसेत्।

ततो गायत्र्युपासना।

"तत्सवितुर्वरेण्यं", "भूमिरन्तरिक्षं द्यौ"रित्यनयोः शब्दयोरैक्यचिन्तनम्। भूमिरन्तरिक्षमित्यस्यार्थे [3]स्त्रैलोक्यरूपात्मकब्रह्मविकारः। गायत्रीप्रथमपादः। "भर्गो देवस्य धीमहि", "ऋचो यजूंषि सामानी"ति शब्दयोरभेदचिन्तनम्। ऋचो यजूंषि सामानीत्यस्यार्थस्त्रैविद्यात्मकं नामात्मक(?)ब्रह्मविवर्त्तभूतं गायत्रीद्वितीयपादः। "धियो यो नः प्रचोदयात्", "प्राणो-

(१) A. C. Omit the portion bracketed.
(२) D. ओं भूभवः स्वरोम् संयतिप्राणो ०।
(३) D. ० स्विद्वृत्तिप्राणाख्यं परिस्पन्दाख्यं ब्रह्म।

ऽपानोव्यान" इति शब्दयोरभेदचिन्तनम् । प्राणोऽपानोव्यान इत्यस्यार्थ[1]स्त्रिवृत् प्राणाख्यं परिस्पन्दाख्यब्रह्मविवर्त्तरूपं गायत्री-तृतीयः पादः । सर्व्वान्तःकरणसमष्ट्यवच्छिन्नचैतन्यं सूर्य्य-मण्डलान्तःस्थं हिरण्यगर्भाख्यं गायत्रीचतुर्थः पादः । सा गायत्री गाय(?)शब्दवाच्यप्राणत्राणकरी गायत्रीच्छान्दस्का । अग्नि(:) मुखम्,—अग्निर्हि देवयानः पन्था इत्यर्थः । अग्निरहः शुक्लपक्ष उत्तरायण-संवत्सर-देवलोकवायुलोकादित्यलोकामानवपुरुषवैद्युत-वारुणेन्द्रप्रजापतिलोकपुरुषा देवयानमार्गरूपा गायत्रीमुखमिति-ध्यानम् । क्षणं शुद्धचिन्मात्ररूपमात्मानं ध्यात्वा "गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे" पाप्मा मदभिभावकत्वं मा प्रापत् इति गायत्र्युपस्थानम् । [2][अथवा "परोरजसे" इत्यन्तमुक्ता अहं पापक्षयं प्राप(म्) इति वोपस्थानम् ।] गायत्र्याः पादद्वयं ब्रह्मपरम् । [3]तृतीय-पादो जीवपरः । धीमहीत्यनेनाभेदः । तदेवाखण्डरूपेणोङ्कार-वाच्यम् । भूरित्यधस्तलसप्तलोकोपहितभूर्लोकः [4]भुवर्लोकमन्त-रीक्षं स्वरिति स्वर्गादिसत्यान्तसप्तलोकाः तज्जननोपलक्षितं चैतन्यं स्वप्रकाशरूपमानन्दात्मकत्वेन वरणीयम् । नोऽस्माकमन्तःकरणा-वच्छिन्नानां धियः बुद्धिवृत्तीः प्रचोदयात् जीवत्वेन प्रमातृतया

(१) A. D. ॰ स्त्रिवृत्ति ॰

(२) C. Omits the portion bracketed.

(३) D. तृतीयः पादो ॰

(४) A. भुव इत्यन्तरीक्षम् ॰

धर्म्मार्थकाममोक्षेषु यः प्रेरयेत् तद् ब्रह्म धीमहि स्वाभिन्नत्वेन चिन्तयामः । ॐ मित्यखण्डपरिपूर्णचिदात्मकस्तिष्ठेत् । इत्येवं गायत्र्यर्थध्यानम् । एवं ध्यानासमर्थस्तु,—

[1][ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥]

(इति ध्यायेत् ।)

[2]अत्र गदापद्मयोरुपलक्षणं तेन शङ्खचक्रगदापद्मयुक्तभुजचतुष्टय इत्याहुः । उत्तानपाणिनाक्षमालागणनया सूर्य्योदयावधिप्रणव-व्याहृतित्रयगायत्रीणामष्टोत्तरशतजपः । [3][साग्नेस्तु होमकालानु-रोधेनाष्टशतमष्टाविंशतिरष्टादश वा जपः ।] जपसमाप्तौ पूर्व्ववद् गायत्र्युपस्थानं "गायत्र्यसी"ति । जलचुलुकं गृहीत्वा प्रणवव्याहृति-त्रयगायत्रीजपान्ते,—

उत्तरे शिखरे जाते भूम्यां पर्व्वतमूर्द्धनि ।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम् ॥

(१) D. Omits the portion bracketed.

(२) D. ध्येयः सदेतिध्यानम् । अत्र ॰ ।

(३) A. Omits the portion bracketed.

स्तुता मया वरदा वेदमाता
प्रचोदयन्ती पवनेन्दुजाता ।
आयुः पृथिव्यां द्रविणं ब्रह्मवर्च्चसं
मह्यं दत्वा प्रयातु ब्रह्मलोकम् ॥

"नमो ब्रह्मण्यदेवाये"त्यादि "आकाशात् [1]'पतित'मित्यादि च "केशवं प्रतिगच्छत्यों नमोनम" इत्युक्ता "गायत्रै नमोऽस्तु गायत्रि स्वस्थानं गच्छे'ति विसर्ज्जनम् । आयुष्कामस्य तु शङ्खोक्ताघमर्षण-द्रुपदा हंसः शुचिषदित्यादिपावनमन्त्राणामुदयादूर्द्ध्वमपि जपः सन्ध्यान्तर्गतः । ततो [2]मन्त्रर्ष्यादिस्मरणपूर्व्वकं दशवारजपः । [3][एव-मष्टाक्षरशतवारजपः ।] [4]जपधर्म्माः परिभाषायामुक्ताः । प्रयत-मनस्त्वं चंक्रमणहसनपार्श्वावलोकनकुड्याद्याश्रयणशिरोग्रीवकम्पन-ब्राह्मणेतरपुरुषान्त(तु)रसम्भाषण-चाण्डाल-पतितरासभरजस्वला-दर्शनपदापदाक्रमणहस्तेनहस्ताक्रमणवर्जनम् । कषायार्द्रवस्त्रपरि-त्यागः । पतितचाण्डालसम्भाषणे स्नानम् । स्त्रीशूद्रसम्भाषणे-ऽव्ययस्य विष्णोः स्मरणम् । वैष्णवमन्त्रजपोवा । चाण्डालादि-दर्शने चोदकस्पर्शनम् । सुराविष्ठादिदर्शने आचम्य सौरमन्त्र-जपः । शक्तौ पावमानीजपश्च । क्षुत [5]प्रस्खलितादिषु सप्तवारं

(१) D. A. पतितं तोयमित्यादि केशवं ०
(२) A. C. मन्त्रराजर्ष्यादि ०।
(३) D. Omits the portion bracketed.
(४) D. जपधर्म्मपरिभाषायामुक्ताः ।
(५) D. स्खलितादिषु सप्तवारं कृष्णकीर्त्तनम् ।

कृष्णनामकीर्त्तनम् । पाषण्डविकर्म्मस्थसंभाषणेऽच्युतस्मरणम् । जपसमाप्तौ वैकल्पिकमिदं कार्य्यम् । प्रदक्षिणावर्त्तननमस्कारौ कृत्वा उपविश्य सूर्य्यमण्डले हिरण्मयपुरुषध्यानम् ।

त्वं ब्रह्मा त्वं वषट्कारस्त्वं रुद्रस्त्वं प्रजापतिः ।
त्वमेव कर्त्ता भगवान् स्थावरस्य चरस्य च ॥

इति कीर्त्तनम् । ब्राह्मवैष्णवरौद्रमन्त्रैरञ्जलित्रयदानम् । सूर्य्याय नमः प्रजापतये नम इत्यञ्जलिद्वयदानम् । समाचारस्तु स्वाहाशब्देन । हंसः शुचिषदिति [1]सूर्य्यार्घ्यदानं समाचरेत् । परमेष्ठी प्रजापतिः । अनुष्टुप् । वरुणः । धाम्नो धाम्न इति यजुः । प्रजापतिः । यदाहुरघ्न्या (यदापो अघ्निया) इति गायत्री । वरुणः । द्वयोस्तीर्थविसर्ज्जने । "इदमापः प्र वहत यत्किञ्च दुरितं मयि । यद्वाहमभि दुद्रोह यद्वा शेप उतानृतम् ।" "धाम्नो धाम्नो राजन्नितो वरुण नो मुञ्च । यदापो अघ्निया वरुणेति शपामहे ततो वरुण नोमुञ्च ।" गङ्गे स्वस्थानं गच्छेति तीर्थविसर्ज्जनम् ।

इत्यग्निचिद्-वाजपेयिनरसिंहविरचिते नित्याचार-प्रदीपे सन्ध्याकर्म्म समाप्तम् ॥ श्री ॥

(१) A. सूर्य्यार्घ्यदानं समाचारात् ।

[१]दानधर्म्मे,—

वरुणं वायुमादित्यं पर्ज्जन्यं जातवेदसम्।
स्थाणुं स्कन्दं तथा लक्ष्मीं विष्णुं ब्रह्माणमेव च॥
वाचस्पतिं चन्द्रमसमपः पृथ्वीं सरस्वतीम्।
सततं ये नमस्यन्ति तान् नमस्याम्यहं प्रभो॥

इति नारद [२]वचनात् तान् नमस्कुर्य्यात्। विष्णुः,—कृतसन्ध्योपासनश्च पूर्व्वं गुर्व्वभिवादनं कुर्य्यात्। मनुः,—

भोशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने।
नाम्नां स्वरूपभावो हि [३]भोभाव ऋषिभिः स्मृतः॥

भोभावो भो शब्दः। देवदत्तशर्म्माहं भो अभिवादयामीति वाच्यम्।

व्यायस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः।
सव्येन [४]सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः॥

तथा पुरस्तिष्ठन् दक्षिणं बाहुं श्रोत्रं [५]प्रसार्य्याञ्जलिं बद्ध्वा प्लुतान्त्याक्षरं स्वनामोच्चार्य्याहं भो अभिवादयामीति वदन् ब्राह्मणोऽभिवादयेत्। अञ्जलौ विशेषः। आपस्तम्बः,—दक्षिणं बाहुं

(१) A. Here adds :—वराहपुराणे,—
उदयाद्रिः स्तुतं सूर्य्यं यस्तु भक्तिपरो द्विजः।
दध्यक्षताञ्जलिभिस्तु तिसृभिः पूजयेत् शुचिः॥
(२) A. D. वचनादेतान् नमस्कुर्य्यात्।
(३) C. भोःशब्दं ०।
(४) D. सव्यसंस्पर्श (र्शौ) ०।
(५) D. प्रार्य्याञ्जलिं ०।

श्रोत्रसमं प्रसार्य्य ब्राह्मणोऽभिवादयेत्। उरः समं राजन्यो मध्यसमं वैश्यः। नीचैः शूद्रः प्राञ्जलिरिति। तथा,—अभिवादयेत् सर्व्व(:)नाम्ना स्त्रियो राजन्यवैश्यौ च न नाम्ना मातरमाचार्य्यांश्चैके। बौधायनः,—असावहं भो इति श्रोत्रे संस्पृश्य मनः समाधानार्थमधस्ताज्जान्वोः पद्भ्याम्। (?) [१]गोतमः,—"पादोपसंग्रहणं *समवायेऽन्वहम्। अभिगम्य तु विप्रोष्य"

जन्मप्रभृति यत् किञ्चिच्चेतसा पुण्यमर्ज्जितम्।
तत्सर्व्वं [२]विलयं याति एकहस्ताभिवादनात्॥
अजाकर्णेन विद्वांसं यतिं सम्पुटपाणिना।
मूर्खं चैकेन हस्तेन कनिष्ठं नाभिवादयेत्॥

तेन,—

ज्यायानपि कनीयांसं सन्ध्याकालेऽभिवादयेत्।
विना शिष्यञ्च पुत्रञ्च दौहित्रं दुहितुः पतिम्॥
ज्येष्ठो यदि नमस्कुर्य्यात् कनिष्ठाय तयोः पुनः।
जन्मप्रभृति यत्पुण्यमायुश्चैव प्रणश्यति॥

इति सन्ध्याकालेतरविषयम्। विष्णुः,—

यो भावयति या सूते येन विद्योपदिश्यते।
ज्येष्ठो भ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः॥

(१) D. गौतमः।
* गुरुसमवाये ० see गौतमस्मृतिः।
(२) C. D. निष्फलम् ०।

अन्ये च पितामहपितृव्य[1]मातुलश्वशुरज्येष्ठशालर्त्विक्पुराणादिवाचकज्ञानतपोवृद्धबन्धुज्येष्ठप्रव्रजिता दीक्षितश्च सोमविक्रयोत्तरकालम्। पितामहपितामहीमातामहमातामहीश्वश्रूश्वशुरज्येष्ठभगिन्य उपाध्यायश्च धात्री च।

[2]भ्रातुर्भार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि।
विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः॥
नाभिवाद्याः स्त्रियः सर्व्वा मुक्त्वा मातरमेव च।
[3]गुरुपत्नी च युवती नाभिवाद्येह पादयोः॥

तथा,—

मातुलांश्च पितृव्यांश्च श्वशुरान् ऋत्विजो गुरून्।
असावहमिति ब्रूयात् प्रत्युत्थाय [4]यवीयसः॥

तेन ज्येष्ठेभ्योऽभिवादनम्। कनिष्ठेभ्यो मान्येभ्यः प्रत्युत्थानम्।

मान्याश्च,—

वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम्।
पञ्चानां त्रिषु वर्णेषु [5]भूयांसि गुणवन्ति च॥
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः।

(१) A. मातुलपितृव्यश्वश्वशुर ०।
(२) C. D. भ्रातृभार्य्यो ०।
(३) D. गुरुपत्नीतु ०।
(४) C. ० यवीयसम्।
(५) A. वयांसि ०।

दशमीं नवत्यधिकवयोऽवस्थाम्। प्रत्यभिवादने मनुः,—

आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्व्वाक्षरः प्लुतः॥

शर्म्मान्तस्य नामत्वाच्छर्म्मपदस्याकारस्य प्लुतत्वम्। स हि नकारान्तशर्म्मपदस्य नकारात् पूर्व्वः। पाणिनिः [1]"वाक्यस्य टेः प्लुत उदात्त" इत्युपक्रम्य [2]प्रत्यभिवादनेऽशूद्रविषयेऽन्त्यस्वरस्य प्लुतत्वमुदात्तत्वञ्चोक्तवान्। वशिष्ठः,—"सन्ध्यक्षरमप्रगृह्यमायाव् भावञ्च प्रतिपद्यते" इति शेषः। चकारात् प्लुतः। "प्लुतप्रगृह्या अचः" इति प्रगृह्यसंज्ञा। प्लुतो नाम्नोऽन्ते परे नान्यत्र। तेनाप्रगृह्यसन्ध्यक्षरस्य नामान्ते आय् आव् इति स्यात्। "एकारैकारयोराय् ओकारौकारयोराव्" इति। आयुष्मान् भव सौम्य हरा ३ य् आयुष्मान् भव सौम्य विष्णा ३ व् प्लुतत्वमुदात्तञ्च। अस्य मते शर्म्मपदं विहाय नामान्त्यस्वरप्लुतत्वम्।

पुनर्वशिष्टः,—

स्वस्तीति ब्राह्मणे ब्रूयादायुष्मानिति राजनि।
वर्द्धतामिति वैश्ये तु शूद्रेत्वारोग्यमेव च॥

यमः,—

यत्सुखं त्रिषु लोकेषु व्याधिव्यसनवर्जितम्।
यस्मिन् सर्व्वे स्थिताः कामाः सा स्वस्तीत्यभिशब्दिता॥

(२) A. वाक्यस्य उच्चैः ०।
(१) D. प्रत्यभिवादेऽशूद्रस्य प्रत्यभिवादने ० A प्रत्यभिवादेऽशूद्र इति प्रत्यभिवादने शूद्रविषये ०।

स्वस्तीति प्रत्यभिवादनं ब्राह्मणे वैकल्पिकम् । गुरोस्तु विशेषः । आपस्तम्बः,—"तत्रास्य पाणी संगृह्य आशिष आशास्ते ।" पाणिग्रहणपूर्व्वकं प्रत्यभिवादनम् । अन्येषां नामोच्चारणमात्रम् । प्रत्यभिवादनानन्तरं मनुयमौ,—

ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥

शूद्रं प्रत्यारोग्यवचनस्य विहितत्वान्न "प्रागाहाराद्वृषलमभिभाषेते"ति हारीतोक्तनिषेधस्याप्रवृत्तिः । आपस्तम्बः,—"नासम्भाष्य श्रोत्रियं पथि व्रजेदरण्ये [1]च स्त्रियम् ।" यमः—

क्षत्रियस्त्रियुगं हन्ति वैश्यो हन्ति चतुर्युगम् ।
हन्त्येकविंशतियुगं शूद्रो ब्राह्मणमब्रुवन् ॥

त्रियुगं त्रिपुरुषं हन्ति नरके पातयति । अब्रुवन् सम्भाषणमकुर्व्वन् । यत्तु अङ्गिराः,—

प्रणाममगते शूद्रे स्वस्ति कुर्व्वन्ति ये द्विजाः ।
[2]शूद्रोऽग्रे नरकं याति ब्राह्मणस्तदनन्तरम् ॥

तदाशीर्व्वादमात्रोपलक्षणम् । [3]यमः,—

अभिवादे तु यः पूर्व्वमाशिषं न प्रयच्छति ।
यद्दुष्कृतं भवेत्तस्य तस्माद्भागं प्रपद्यते ॥

---

(१) D. ०न० ।
(२) C. D. शूद्रोऽपि ० ।
(३) D. आपस्तम्ब(म्बो) यमश्च ।

तस्मात् पूर्व्वाभिभाषी स्याच्चाण्डालस्यापि धर्म्मवित् ।
सुरां पिबेति वक्तव्यमेवं धर्म्मो न लुप्यते ॥

अत्र "पूर्व्वाभिभाषी"तिकार्य्यान्तरात् पूर्व्वमवश्यं कर्त्तव्यमित्यर्थः । नत्वभिवादनात् पूर्व्वमिति भ्रमः । हारीतः,—

जपयज्ञजलस्थञ्च [1]समित्पुष्पकुशानलान् ।
उदकुम्भञ्च भैक्ष्यञ्च वहन्तं नाभिवादयेत् ॥

मनुः,—

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥

आपस्तम्बः,—"विषमगताय गुरवे नाभिवाद्यम् । अन्यारुह्य(?) वा अभिवादयेत् ।" तथा,—"प्रयतायाप्रयतो न प्रत्यभिवादयेत् । [2]न च सोपानत्को न वेष्टितशिरा अवहितपाणिर्वा अभिवादयेत् ।" अवहितपाणिर्वस्त्वन्तरासक्तपाणिः । शङ्खलिखितौ,—"नोदकुम्भोऽभिवादयेत् ।" उदकुम्भयुक्त इत्यर्थः । तथा,—"न भैक्ष्यं चरन् पुष्पाज्यपाणिर्वाऽशुचिर्न जपन् न देवपितृकार्य्यं कुर्व्वन् ।" जपकाले गुर्व्वादिनमस्कारस्य विहितत्वान्निषेधस्तदन्यविषयः ।

सभायां यज्ञशालायां देवतायतनेष्वपि ।
प्रत्येकं हि नमस्कारो हन्ति पुण्यं पुराकृतम् ॥

इतिवचनात् पर्षन्मध्ये प्रत्येकनमस्कारो निषिद्धः । समुदायेन

---

(१) C. ० समित्पुष्पकुशान् तिलान् ।
(२) C. D. नच तत् सोपा ० ।

स्यादेव। हारीतः,—"नान्येन कृतप्रणामोऽन्यमभिवादयेत्।" अत्र च गुर्व्वादिभ्यः पादोपसंहारादिरूपमभिवादनम्। अन्येभ्यो मान्येभ्यो नमस्कारमात्रम्। नमस्कारश्च बद्धाञ्जलेः प्रह्वीभावो नमःशब्दोच्चारणञ्च। "नमः प्रह्वत्वे शब्दे" इति स्मरणात्।

अभिवादो नमस्कार्थं पादयोर्वन्द एव च।

इति शातातपेन पृथक् व्यपदेशात्। पादयोर्वन्दनं दण्डवत् प्रणामः। नमस्कारेऽपि सोपानत्कादिपर्य्युदासोऽभिवाद्यविशेषपर्य्युदासश्च। अयञ्च विशेषः,—उत्तमवर्णेन नाधमवर्णस्य नमस्कर्त्तव्यम्। भविष्यपुराणे,—

ब्राह्मणं दशवर्षञ्च शतवर्षन्तु भूमिपम्।
पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता॥
ब्राह्मणः सर्व्ववर्णानां स्वस्ति कुर्य्यादिति श्रुतिः।
यदि विप्रः प्रमादेन शूद्रमप्यभिवादयेत्।
अभिवाद्य दश विप्रांस्ततः [1]पापात् प्रमुच्यते॥
ज्येष्ठं कनिष्ठो यो मोहात् स्वस्तिवाचं करोति वै।
ज्येष्ठस्य हरते सर्व्वं दुष्कृतं शतधा कृतम्॥

[2]आपस्तम्बः,—"त्रिवर्षपूर्व्वः श्रोत्रियोऽभिवादनमर्हति।" त्रिवर्षज्येष्ठ इत्यर्थः। [3]अतोऽल्पकालेन ज्येष्ठत्वे नमस्कारे न दोषो

(१) A. D. ० शुद्धिमवाप्नुयात्।
(२) D. Here adds इति नमस्कारविधिः।
(३) A D अतो न्यूनकालेन ज्येष्ठत्वेन नम ०।

न फलम्। [1]कनिष्ठाभिवादे च दोषः। गुर्व्वादीनां ज्ञातिसम्बन्धिबान्धवानां मुहूर्त्तेनापि ज्येष्ठत्वेऽभिवाद्यत्वं नमस्कार्य्यत्वञ्च।

[2]इति नमस्कारविधिः।

---

[3]तत्रेमं म इति द्वाभ्यामुदपात्रं प्रपूर्य्य च।
सोपानत्को गृहं गच्छेन्न स्पृशन् न वहन् क्वचित्॥
[4]ततश्च पादौ प्रक्षाल्य द्विराचम्य गृहागतः।
त्रिसन्ध्यं वाग्यतो वारि गुप्तमाहृत्य शोधयेत्॥
भाण्डोपचारभूगेहद्रव्यान् सपरिचारकान्।
बह्वपघातसम्भूतो दोष उत्पद्यते गृहे॥
शुद्ध्यते तद् वहिस्तोयैः शान्त्यर्थञ्च तदिष्यते।

इति वचनात् तेनोदकेन सर्व्वद्रव्यप्रोक्षणम्।

अग्निहोत्रहोमः।

होमं वैतानिकं कृत्वा स्मार्त्तं कुर्य्याद्विचक्षणः।
स्मृतीनां श्रुतिमूलत्वात् स्मार्त्तं केचित् पुरा विदुः॥

(१) C. D. कनिष्ठेऽभिवादने दोषः।
(२) C. इति नमस्कार्य्यादिविधिः।
(३) A. शौनकः। ततः इमं ०।
(४) D. तत्र च पादौ ०।

यत्तु,—

सन्ध्याकर्म्मावसाने तु स्वयं होमो विधीयते ।

इत्यस्य स्मार्त्तविषयत्वेऽप्यकृतश्रौताधानपरत्वम् । किञ्च

सूर्य्येऽस्तशैलमप्राप्ते षट्त्रिंशत् त्रिभिरङ्गुलैः ।
प्रादुष्करणमग्नीनां प्रातर्भासाञ्च दर्शने ॥

प्रकाशमात्रे श्रौतहोमविधिः स्मार्त्तस्य पश्चादेवानुष्ठानम् । [1][यत्तु]

आवसथ्यमनाहृत्य त्रेतायां यः प्रवर्त्तते ।
अनाहिताग्निर्भवति परिवित्तिश्च जायते ॥

[2][इति] तदाधानविषयमेव । अथ यत् पुरोदये जुहोतीति शतपथश्रुतौ यद्यप्युदयात् पूर्व्वं होम उक्तस्तथापि स्मार्त्तहोमस्याप्यनुदिते विधानात् श्रौतस्य पूर्व्वत्वेऽप्यविरोधः । यत्तु,—"उदिते जुहोती"ति श्रुत्यन्तरमपि वैकल्पिकं तथापि वाजसनेयिनां स्मार्त्तहोमस्यानुदिते विधानात् कांस्यभोजिन्यायेनानुदिते होम एव नियतः । अतएव सन्ध्योपासनमपि स्मार्त्तहोमानन्तरमेव । "अनशित्वा प्रात"रिति भोजनात् पूर्व्वं तस्य विधानात् ।

[3][मनुः,—

उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥

(१) C. Omits the portion bracketed.
(२) D. Omits the portion bracketed.
(३) A. Omits the portion bracketed.

अत्रेयं व्यवस्था छन्दोगपरिशिष्टे,—

रात्रेः षोड़शमे भागे ग्रहनक्षत्रभूषिते ।
[1]कालं त्वनुदितं जानन् होमं कुर्य्याद् विचक्षणः ॥
तथा प्रभातसमये नष्टे नक्षत्रमण्डले ।
रविर्य्यावन्न दृश्येत समयाध्युषितञ्च यत् (तत्) ॥]
रेखामात्रञ्च दृश्येत रश्मिभिश्च समन्वितम् ।
उदितं तं [2]विजानीयात् तत्र होमं प्रकल्पयेत् ॥
हस्तादूर्द्ध्वं रविर्यावद् भुवं भित्वा न गच्छति ।
तावद्धोमविधिः पुण्यो नान्यो ह्युदितहोमिनाम् ॥
यावत् सम्यक् न भाव्यन्ते नभस्यृक्षाणि सर्व्वतः ।
न च लौहित्यमत्येति तावत्सायञ्च हूयते ॥

अत्र स्मृतिः,—

नाग्निहोत्रात् परो धर्म्मो नाग्निहोत्रात् परं तपः ।
नाग्निहोत्रात् परं श्रेयो नाग्निहोत्रात् परा गतिः ॥
निर्द्वन्द्वा निर्नमस्कारा यमुपास्य मनीषिणः ।
सोऽयं सूक्ष्मोऽग्निहोत्रेषु गूढ़ोऽग्निरिव दारुषु ॥
विवाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
[3]प्रार्थयन्ते यमात्मानं सोऽग्निहोत्रे प्रकाशते ॥

(१) C. कालं त्वनुदितं जानन् ० ।
(२) D. ० समानीयाद्धोमं तत्र प्रकल्पयेत् ।
(३) A. D. अधीयन्ते ० ।

ब्राह्मे,—

सर्व्वाणि तीर्थान्यपि चाग्निहोत्र-
तुल्यानि नैवेति वयं वदामः ।

कात्यायनः,—"स्वयं वा जुहुयात्" "अध्वर्य्युर्वे"ति विकल्पः । "उपवसथे नियमः" । दर्शपूर्णमासपूर्व्वदिने स्वयमेव होमः । एवमध्वर्य्युकर्त्तृकहोमे उद्धरणप्रैषोन्नयनप्रैषाद्यङ्गाधिक्यात् स एव मुख्यः पक्षस्तदसम्भवे स्वयं होम इति वदन्ति ।

स्वयं होमे फलं यत् तदन्यहोमे न विद्यते ।

इति स्मार्त्तहोमविषयम् । कात्यायनः,—"उद्धरेति यजमानो ब्रूयात् सायं प्रातरग्निहोत्रे ।" "गार्हपत्याहवनीयस्योद्धरणमनस्तमितानुदितयोः ।" "नित्यो दक्षिणाग्निः ।" "सदा वाहरणम् ।" "एकेषामुपवसथे ।" "न वावसिते वा ।" [1]दक्षिणाग्नेर्नित्यत्वं [2]यदाधानपूर्व्वदिने "गार्हपत्यागारे निर्मथ्याभ्यादधाती"ति विहितं [3]तस्य "दक्षिणा वा संहरे"दिति पक्षे नित्यमुद्धरणं नवगृहे वा पुनरुद्धरणम् । ततः पूर्व्वमुद्धृतस्य नित्यमवस्थानम् । भूमिं परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निस्थापनम् । उल्लेखनं [4]स्फ्येनोद्धति(?) इति श्रुतिः स्फ्येन । भूसंस्कारस्याग्निस्थापनादित्वादाहवनीयस्थानं संस्कृत्याहवनीयं स्थापयित्वा दक्षिणाग्निस्थानं संस्कृत्य तत्स्थापनम् । आधाने तु स्थानद्वयसंस्कारानन्तरमग्निद्वयस्थापनं तन्मात्रविषयम् । कर्म्ममध्ये चाग्निनाशे संस्कारस्य पुनः करणं नास्ति तत्कर्म्मगताग्निस्थापनं प्रति स्थानस्य संस्कृतत्वात् । सपात्राग्निस्थापनेऽपि स्थापनाङ्गत्वादेव भवति । "अन्तरेणापराग्नी गत्वा दक्षिणेन वा प्रदक्षिणमाहवनीयं परीत्योपविशति यजमानः ।" इति सायं प्रातः प्रदक्षिणं गार्हपत्यं परीत्योपविशति । अप आचामति "वृष्टिरसी"ति । पत्नी च प्रत्यग्दक्षिणतः गार्हपत्यस्योपविशति ।

(१) C. दक्षिणाग्नौ ० ।
(२) D. यदाधानात् पूर्व्व ० ।
(३) A. C. तस्य ० ।
(४) A. स्फ्येनोद्धन्तीति(?) ० । Most probably "स्फ्येनोद्धन्ति" ९०० शतपथब्राह्मणे १.२.३.२०.

अथाध्वर्य्युकर्म्म ।

"अपरेणाहवनीयं कूर्चं निदधाति कुशान् वा ।" "परिस्तरणं वा सर्व्वेषां प्रागुदगग्रकुशैः" आहवनीयगार्हपत्यदक्षिणाग्नीनां प्राक्पश्चिमयोरुद(ग)ग्रैर्दक्षिणोत्तरयोः प्रागग्रैस्त्रिभिरित्यर्थः । तथा "आहवनीयं पर्य्युक्ष्योदधारां निनयत्यागार्हपत्यात् ।" "तञ्च" "ततो दक्षिणाग्निम् ।" तं गार्हपत्यं दक्षिणाग्निञ्च ततः पर्य्युक्षति ।

इति सायम् ।

प्रातस्तु "प्राक्संस्थं समिद्धारापर्य्युक्षणञ्च" (समित्पर्य्युक्षणं धाराच) इति विधानात् गार्हपत्यं पर्य्युक्ष्य ततो दक्षिणाग्निं ततो

गार्हपत्यादाहवनीयं यावदुदकधारां नीत्वाहवनीयपर्य्युक्षणञ्च। सर्व्वत्र परिसमूहनपूर्व्वकम्। अग्नेस्तृणान्यपचिनोतीति (?) श्रुतावग्नेरित्यस्यैकत्वा[1]विवक्षणात्।

पयोहोमपक्षमाह।

[2]अग्निहोत्रीं दोहयति स्थाल्यामार्य्यकृत्यामूर्द्ध्वकपालायामशूद्रेण। ऋजूर्द्ध्वकपालम्।

कुलालचक्रघटितमासुरं मृन्मयं भवेत्।

इति वचनाद्धस्तघटिता दोहनस्थाली तस्यां शूद्रव्यतिरिक्तद्वारा दोहनम्। क्षीरहोता चाध्वर्य्युर्दोहनप्रभृतिहोमपर्य्यन्तं वाग्यतः। यजमानश्चावभक्षणप्रभृतिप्राणभक्षणपर्य्यन्तं सर्व्वपक्षेषु वाग्यतः। तथा "पूर्व्वेणाहवनीयमाहृत्य गार्हपत्येऽधिश्रयति *दक्षिणतो निरुह्याङ्गारान्।" "एवमन्यत्रापि होमार्थस्याहरणम्।" "दक्षिणेन वौषधम्।" अवज्योत्यासिच्यापः पुनरवज्योत्य निदधाति त्रिरुद्वासयति। तण्डुलादौ पाकाभावान्नाधिश्रयणादि। "वैकङ्कतं स्रुक्स्रुवं प्रतप्य पाणिना सम्मार्ष्टि।" स्रुक् वैकङ्कत्येव। स्रुवस्याप्यग्निहोत्रे वैकङ्कतत्वम्। प्रतपनानन्तर-

(१) A. ० विशेषणात्।

(२) C. D. अग्निहोत्रं ०।

* उत्तरतः see कातीयश्रौतसूत्रे ४.१४.२.

मुदकालम्भः। "पुनः प्रतप्योन्नेष्यामीत्याह।" "ॐमुन्नयेति यजमानस्तिष्ठन्।" प्रातस्तु उन्नयामीति प्रश्नः। "चतुरःस्रुवानुन्नयति।" "उपरि समिधं धारयन् वाक्षीमध्यधि गार्हपत्यादाहवनीयं हरति मुखमात्रे धारयन्।" "मध्ये निगृह्य पुनरुद्गृह्योपविश्य समिधमादधात्यग्निर्ज्योतिष"मिति। "प्रदीप्तामभिजुहोत्यग्निर्ज्योतिरिति।" "कूर्चे निधाय गार्हपत्यमवेक्षते" "तूष्णीं द्वितीयां भूयसीम्।" प्रातस्तु सूर्य्यज्योतिषमिति समिदाधानम्। सूर्य्योज्योतिरिति होमः। द्वितीयाहुतिहोमानन्तरं "भूयिष्ठं स्रुचि।" परिशिनष्टि। "द्विः प्रकम्प्य निदधाति।" "उपमृज्य स्रुचं कूर्चे निमार्ष्टि नमो देवेभ्यः" "स्वधा पितृभ्य इति दक्षिणत उत्तानम्।" "अप उपस्पृश्य" [1]["स्थाल्याः स्रुवेण] इह पुष्टिं" "इति गार्हपत्ये" "तूष्णीं द्वितीयाम्।" "अग्नयेऽन्नादायान्नपतये *इति दक्षिणाग्नौ तूष्णीं द्वितीयाम्।" दक्षिणं जान्वाच्य। एवं सर्व्वत्रोपविष्टहोमेषु। "अनामिकया द्विः प्राश्नाति।" प्रतिप्राशनं द्विराचमनम्। उत्सृप्य भक्षणपात्रयां(:) निर्लेढ़ीत्यर्थः। ततो द्विराचमनम्। "आचम्योत्सिञ्चति देवान् जिन्व पितॄन् जिन्व तृतीयामुदुक्षति सप्तर्षीन् जिन्वेति।" "चतुर्थीं कूर्चस्थाने (त्रिः) निषिञ्चत्यग्नये पृथिवीक्षिते स्वाहा पृथिव्या अमृतं जुहोमि स्वाहा अमृते अमृतं जुहोमि स्वाहेति" "स्रुक्स्रुवमाहवनीये प्रतप्य निदधाति।" सर्व्वेषु यथापर्य्युक्षितं

(१) D. Omits the portion bracketed. A. स्थालीस्रुवेण ०।

* स्वाहेति see कातीयश्रौतसूत्रे ४.१४.२५.

समिध आदधाति समिदसीति। सायमाहवनीयक्रमात्। प्रातर्गार्हपत्यक्रमात्।

अथ यजमानकर्म्माह।

"सायमाहुत्यां हुतायां यजमानोऽग्नी उपतिष्ठते वात्सप्रेण।" "न वा।" "उपप्रयन्त" इत्यादिना "पारमशीये"त्यन्तेनाहवनीयोपस्थानम्। आहवनीय(समीपे) एवोपविश्य "संत्वमग्न"-इत्यादि "ग्भिषीये"त्यन्तेनोपस्थानम्। "अन्ध स्थान्धो वो भक्षीये-"त्यादिना "इहैवस्त मापगाते"त्यन्तेनाग्निहोत्रगां प्रतिगमनम्। "संहितासि विश्वरूप्यूर्जा माविश गौपत्येने"ति गोस्पर्शनम्। "उपत्वाग्न" इत्यादिना "अघायत: समस्मा"दित्यन्तेन गार्हपत्योपस्थानम्। "इड़ एह्यदित एही"ति गां प्रति गमनम्। "काम्य एति" (इत्यादिना) "भूया"दित्यन्तेन गोस्पर्शनम्। "सोमानं स्वरणमित्यादि(ना) "प्रजया धनेनच"[1]इत्यन्तेनान्तरेण गार्हपत्यदक्षिणाग्न्योर्गत्वा आहवनीयस्य पश्चात् स्थित्वोपस्थानम्। नोदकस्पर्शनम्। इदं मे कर्म्मेदं वीर्य्यं पुत्रोऽमुकदेवशर्म्मानुसन्तनोत्विति पुत्रनाम ग्रहणम्। आत्मनो वाऽविद्यमाने। इदमुपस्थानं पयोहोमपक्षे वैकल्पिकम्। "भूर्भुव:स्वरिति वोभौ।" इदमपि गोपक्ष एव वात्सप्रेण सह विकल्पितत्वादिति सम्प्रदाय:। गोलिङ्गाभावादौषधादिहोमेऽपीति कर्काचार्य्य:। सायं प्रातराहवनीयस्यासनोपस्थाने

तूष्णीमुपस्थायाहवनीयपश्चादुपवेशनम्। एवं "शय्यासनं वा गार्हपत्ये।" गार्हपत्यं तूष्णीमुपस्थाय तत्पश्चात् शयनमुपवेशनं वेति विकल्प:। "समिदसी"ति उपविश्याहवनीयगार्हपत्यान्वाहार्य्यपचनेषु समिदाधानं सायं प्रातर्गार्हपत्याहवनीयान्वाहार्य्यपचनाहवनीयेषु क्रमेण। एवं पर्य्युक्षणं नोदकधारा। "विद्युदसि विमे पाप्मान"मिति जलपानम्। वाग्विसर्जनम्। सायमाहवनीयं प्रदक्षिणीकृत्यापराग्न्योरुत्तरेण निष्क्रमणम्। प्रातर्गार्हपत्यम्। प्रातर्मुहूर्त्तं सभ्योपस्थानम् "अनशित्वा" इति वचनात् भोजनात् पूर्व्वं यथाकालम्। "भस्मोद्धृतमुपेयात्।" यत्राग्निभ्यो भस्म उद्धृत्य स्थापितं तत्र गच्छेत्। इदं भस्मधारणार्थमिति केचित्।

[2]अथाध्वर्य्युकर्त्तव्यपक्षे देवतोद्देशेन द्रव्यत्याग: प्रक्षेपसमकालं यजमानेनैव कर्त्तव्य:। यद्यपि प्रक्षेपोऽपि प्रधानरूपहोमान्तर्गतस्तथापि प्रक्षेपे ऋत्विक्द्वारा यजमानस्य प्रयोजककर्त्तृत्वम्। त्यागस्य स्वत्वनिवृत्तिसङ्कल्पस्य स्वद्रव्ये परस्य कर्त्तुमशक्यत्वादुत्सर्गे तु प्रधानत्वादित्युक्तदिशा स्वयमेव कर्त्तव्यत्वम्। देवतोद्देशो यद्यपि परेण कर्त्तुं शक्यते तथापि त्यागस्य किञ्चिदुद्दिश्य त्याग इत्येव सप्रतियोगित्वाद् यागकर्त्रैवोद्देश: कार्य्य:। कात्यायनो होम द्रव्याण्याह,—"पयसा स्वर्गकाम: पशुकामो वा। यवाग्वा ग्रामकाम:। तण्डुलैर्बलकाम:। दध्नेन्द्रियकाम:। घृतेन तेजस्काम:।" एतानि संयोगपृथक्त्वेन नित्यानि च। शाखान्तरे च,—

---

(१) A. ०रन्तरेण०।

(२) D. अत्राध्वर्य्युकर्त्तृकपक्षे०।

पयो दधि यवागूश्च सर्पिरोदनतण्डुलाः ।

सोमो मांसं तथा तैलमापश्चैते दशैव तु ॥

पयोहोमप्राशस्त्यं श्रुतेः "पयसि ह्येदं सर्व्वं प्रतिष्ठितं * * * सर्व्वं हि देवेभ्योऽन्नाद्यं प्रयच्छति ।" स्मृतिश्च,—

पयस्यन्तर्हितं विश्वं पश्यन्नेवं पयो नरः ।

एकयैव तदाहुत्य जगदात्मानमश्नुते ॥

इति। काम्यप्रयोगे च "संवत्सरं जुहुयादित्येषामेकैकेन कामसंयोगे" इति पूर्व्वपक्षः । "यदहरेव जुहोति तदहः पुनर्मृत्युमपजयती"ति श्रुते [रेकाहेनापि सायं प्रातः प्रयोगेण फलसिद्धिः । "स वै सायञ्च प्रातश्च जुहोती"ति श्रुतेः[१]]

सायमादि प्रातरन्तमेकं कर्म्म प्रचक्षते ।

इति स्मृतेश्च । सायं प्रातरभ्यस्तमेकं कर्म्म । यश्च सायं होमे कर्त्ता यच्च द्रव्यं प्रातरपि तत् । स्मरन्ति च,—

द्रव्यं देशश्च मन्त्राश्च कर्त्ता कालश्च शासनम् ।

सायं यत् स्वीकृतं सर्व्वं प्रातस्तदनुवर्त्तते ॥

मनुः,—

नैव कन्या न युवती नाल्पविद्यो न वालिशः ।

होता स्यादग्निहोत्रस्य नार्त्तो नासंस्कृतस्तथा ॥

यद्यप्यविद्यत्वेन स्त्रिया अनधिकारस्तथापि विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकत्वात् कर्त्रन्तरासम्भवे कन्यायुवतीभिन्न-

(१) D. Omits the portion bracketed.

स्त्रीकर्त्तृकत्वम् । वैरूप्यभयेन कन्यायुवतीनिषेधस्य नित्यानुवादत्वकल्पनानुपपत्तेः ।

यच्च छान्दोग्ये,—

अन्यैः शतहुताद्धोमादेकः शिष्यहुतो वरम् ।

शिष्यैः शतहुताद्धोमादेकः पुत्रहुतो वरम् ।

पुत्रैः शतहुताद्धोमादेको ह्यात्महुतिर्वरम् ॥

[१][इति तद्] यद्यपि ज्ञानकाण्डे "य एतदेवं विद्वानग्निहोत्रं जुहोती"त्युपासकपरं तथापि स्वयं होमाशक्तौ सर्पणं सर्पणाशक्तौ "उपासीताध्वं" इति "उपवसथे नियम" इति च कात्यायनवचनात् तत्रोपयुज्यते । कात्यायनः,—"प्रथमास्तमिते पर्य्युदयं च स्वर्गकामस्य । तमोऽभ्यये सायं जुहुयाद्वियति प्रातरायुःकामस्य । अन्तः पशौ पशुकामस्य (सायम्प्रातः ।) शयाने श्रीकामस्य प्रातः । प्रदीप्ततमे श्रीयशःकामस्य । अर्चिः प्रत्यवाये मैत्रेणान्नमत्स्यतः । अङ्गारेषु ब्रह्मवर्चसकामस्य । तमोऽभ्यये सायं तमस्यनागते । (?) प्रातस्तमसि द्यति अप्रक्रान्ते । अग्निविशेषे फलं प्रदीप्ततम इत्यादि । अत्र च

रजोनीहारधूमाभ्रशाखाद्यन्तरिते रवौ ।

सन्ध्यामुद्दिश्य जुहुयाद्धुतमस्य न लुप्यते ।

होमकालापरिज्ञानपरमितिकालनिर्णयेऽप्यधिकारसद्भावदर्शनार्थम् । पश्चात्त्वन्यथा काल[२]ज्ञाने न पुनः क्रियेत्येतत्परं वा ।

(१) D. Omits the portion bracketed.

(२) A. ज्ञाने पुनः ० ।

दानधर्म्मे,--

करीषाग्नौ स जुहुयाद्दिषस्तैन्यं(?)करोति यः ।

इति होमकाले यत्राहवनीये समिदाधानं [1]तत्रेन्धनकाष्ठापेक्षा । गार्हपत्यदक्षिणाग्न्योः काष्ठान्तरेणाङ्गारसम्पादनम् । अन्यत्रापि यत्र समिदाधानं नास्ति तत्र काष्ठान्तरेणाग्नीन्धनम् ।

स्मार्त्तहोमविधिः ।

दक्षः,—

सन्ध्याकर्म्मावसाने तु स्वयं होमो विधीयते ।

स्वयं होमे फलं [2]यत् तदन्यहोमे न विद्यते ॥

ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।

[3]एभिरेव हुतं यत्तु तद्हुतं स्वयमेव तु ॥

एवञ्च स्मार्त्तहोमे स्वयं करणं मुख्यं तदभावेऽन्येन करणम् । "कामं गृह्येऽग्नौ पत्नी जुहुयात् सायं प्रातर्होमौ" इति गोभिलवचनात् [4]यजमानाभावे पत्न्यधिकारः । शौनकः,— "पाणिग्रहणादि गृह्यं परिचरेत् स्वयं पत्न्यऽपि वा कुमार्य्यन्तेवासी-वे"ति कर्त्रन्तराभावे कुमार्य्या अधिकारः । अनुपनीतस्यार्त्विज्यानधिकारेऽपि वैदिकमन्त्रशून्यत्वादगत्या भवेदधिकारः । पत्न्यसामर्थ्ये चेदम् ।

(१) A. C. तत्रनेन्धनकाष्ठा ० ।

(२) A. यत्त अन्य ० ।

(३) A. एतैरेव ० ।

(४) A. यजमानभावे पत्न्याः कोऽप्यधिकार ।

असमक्षञ्च दम्पत्योर्होतव्यं नर्त्विगादिना ।

इति पत्न्यसमक्षे होमासम्भवात् । यजमानप्रवासे पत्न्यां रजस्वलायां अगत्या होमकरणे कुमार्य्यनुपनीतयोरपि प्रसङ्गः । गोभिलः,— "पुरास्तमयात् (अग्निं)प्रादुःकृत्यास्तमिते सायमाहुतिं जुहुयात् ।" "पुरोदयात् (प्रातः) प्रादुःकृत्योदितेऽनुदिते वा प्रातराहुतिं" "पुरा प्रादुःकरणवेलाया (सायंप्रातः) अनुगुप्ता अप आहरेत्" "मणिकाद् वा" अप आहरेत् । [1]हविषाग्नौ जुहुयात् कृतस्याकृतस्य वा ।" "अकृतञ्चेत् प्रक्षाल्य प्रोदकं कृत्वा जुहुयात् ।" "दधि पयो यवागूं वा ।" पारस्करः,—"दध्ना तण्डुलैरक्षतैर्वा ।" तथा,— "उपयमनप्रभृत्यौपासनस्य परिचरणम् । "उपयमनान् कुशानादाय समिधोऽभ्याधाय पर्य्युक्ष्य जुहुया"दिति प्रथमकण्डिकोक्तरीत्या ।

सप्तपत्राः शुभा दर्भा ब्रह्मग्रन्थिसमन्विताः ।

उपयमनकुशाः प्रोक्ता अग्निकार्य्यादिकर्म्मसु ॥

पारस्करः,—"अग्नये स्वाहा प्रजापतये स्वाहेति सायम् ।" जुहोति । "सूर्य्याय स्वाहा प्रजापतये स्वाहेति प्रातः ।

पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।

पुमानिन्द्रश्च [2]सूर्य्यश्च पुमां संवर्त्ततां मयि ॥

पुनः स्वाहेति पूर्व्वां गर्भकामा । पत्नी जुहुयात् । द्वितीयां यजमान एव ।" यत्तु,—

(१) गोभिलगृह्यसूत्रे पाठः,—हविष्यस्यान्नस्याग्नौ जुहुयात् कृतस्य वाऽकृतस्य वा । अकृतञ्चेत् प्रक्षाल्य जुहुयात् प्रोदकं कृत्वा । १. प्र. ३. ख. ६, ७ सू० ।

(२) In all Mss. वायुश्च ०

होमं करोति यो विप्रस्तुलसीकाष्ठवह्निषु।
शतक्रतुसमं पुण्यं होता तत्-फलमाप्नुयात्॥

(तत्)[1]गुणफलार्थम्।

समिद्धर्म्माः परिभाषायामुक्ताः। नाप्रोच्छितं [2]नाम्लानं न क्लिन्नं काष्ठं समिधं वाग्नावादध्यात्। आपस्तम्बगृह्यम्,—अनुगतो मथ्यः श्रोत्रियागाराद् वाहार्य्यः उपवासश्चान्यतर(?)भार्य्यायाः पत्युर्वा। अपिवोत्तरया जुहुयान्नोपवसेत्। उत्तरा ऋक्। "अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि। अया नोयज्ञं वहास्ययानो धेहि भेषजम्।" सर्व्वहोमेषु देवतामुद्दिश्य द्रव्यत्यागो यजमानेनैव कार्य्यः। उद्दिश्यमानत्वप्रतिग्रहीतृत्वरूपसमुदायवाचिन्या चतुर्थ्या देवतायाः प्रतिग्रहीतृत्वाभावेऽप्युद्दिश्यमानत्वमेव देवतात्वं चतुर्थीवाच्यम्। तेन यत्राग्नेयोऽष्टाकपाल–इत्यादावग्निरस्यदेवतेतिविधिस्तत्रायमर्थः—अग्निश्चतुर्थ्यन्तपदेनैतत् [3][पुरोडाशसम्बन्धित्वेन निर्द्दिश्य] पुरोडाशं यजेदिति। तथा च द्रव्यमिदमिति निर्द्दिश्य चतुर्थ्यन्तदेवतापद[4]मुच्चार्य्य स्वत्वनिवृत्तिसंकल्पः कार्य्य इति विध्यर्थ इतीदमग्नये इत्युच्चार्य्य न ममेत्येवं ज्ञानविशेषरूपः संकल्पः कार्य्यः। न ममेतिशब्दोच्चारणमापस्तम्बानां ज्ञानविशेषोत्पादाय। न

(१) A. D. युगफलार्थम्।
(२) A. D. नाम्लानं क्लिन्नं ०।
(३) D. Omits the portion bracketed.
(४) A. मुदीर्य्य स्वत्वनिवृत्तिः संकल्पः ०।

ममेति शब्दोच्चारणं विना ज्ञानविशेषस्योत्पत्तौ न तत्रादरः। न चैवमपि चतुर्थ्या ददात्युच्चारणं विना साधुत्वाभावात् त्यागप्रतिपादकत्वेन ददातिप्रयोगापत्तिः। स्यादेवं यदि ज्ञानोत्पादाय चतुर्थ्युच्चारणं किन्त्वदृष्टार्थम्। अतएव स्वयं क्रियमाणे [1]होमे मन्त्रगतदेवतापदस्य चतुर्थ्यन्तत्वाभावे सुतरां न तेन देवतोद्देशसिद्धिः। मन्त्रगतदेवतापदस्य चतुर्थ्यन्तत्वेऽपि [2]मन्त्रस्य लिङ्गेन श्रुत्या वा होमाङ्गत्वज्ञानाद्धोमस्वरूपान्तर्गतदेवतोद्देशं प्रति [3]करणत्वाद्दृष्टार्थत्वानुरोधेन पृथगेव देवतोद्देशः प्रधानान्तर्गतः। नहीह पुष्टिमित्यादिपदानां अग्नये गृहपतये [4]इत्यादि चतुर्थ्यन्तपदोच्चारणे करणत्वं न वा समुदायस्य स्वयं क्रियमाणेऽपि होमे भ्रान्त्यान्यदैवत्यमन्त्रोच्चारणे यथार्थं देवतामुद्दिश्य त्यागकरणे मन्त्रभ्रंशप्रायश्चित्तं न प्रधानावृत्तिः। परक्रियमाणे सुतराम्। याज्यानुवाक्याविपर्य्यासे तु यथानुपूर्व्वकरणं वचनान्नतु प्रधानानुष्ठानात्। अयञ्च त्यागः पत्न्यापि कर्त्तव्यः। [[5]तथाहि] "फलोत्साहविशेषात्तु।" अनेन पत्न्यधिकारे साधिते "धर्म्मे[6]चार्थे च कामे च नातिचरितव्ये"ति स्मृत्यनुरोधेन "स्ववतीस्तु वचनादैक-

(१) A. होमे प्रतिग्रहीतृत्वरूपसमुदायवाचिन्याश्चतुर्थ्या देवतायां प्रतिग्रहमन्त्रगत ०।
(२) C. मन्त्रलिङ्गेन ०।
(३) C. करणात्वानुरोधेन ०।
(४) A. इति चतुर्थ्य ०।
(५) A. C. Omit the portion bracketed.
(६) A. शब्दे च ०।

कर्म्मं स्यात्” इति द्वयोरधिकारेऽपि सहैव कर्म्माचरणमिति[१] विन्तितेऽपि स एव। द्वयोर्यागकर्त्तृत्वं फलभागित्वं पृथगेवेति देवतोद्देशद्रव्यत्यागरूपं प्रधानं द्वाभ्यां कार्य्यम्। [२]क्रत्वर्थानुष्ठानं वचनाद् यस्य यावद्। यथा सत्रेऽध्वर्य्यादीनां पत्नी आज्यमवेक्षत इति यजमानस्य क्रतुसिद्धौ पत्नीकर्त्तृकाज्यावेक्षणस्याङ्गत्वं सहाधिकारम्। पृथक् कर्त्तृत्वं पृथक् फलभागित्वं च द्योतयति “पत्युर्नो यज्ञसंयोग” इति यज्ञसम्बन्धेन स्वामित्वे पतिशब्दात्रागमविधानात्। अकर्त्तुः फलभागित्वरूपस्वाम्यभावादस्वामिकर्त्तृकस्यानङ्गत्वात्। अङ्गत्वविधानमेव तस्याः स्वामित्वे कर्त्तृत्वे च प्रमाणम्। एवं यजमानोऽन्वारभत इति यजमानकर्त्तृकमङ्गं पत्न्या[३]यागफलसिद्धौ व्याप्रियत इति सहप्रयोगः पृथक् कर्त्तृत्वञ्च। सत्रे यथाध्वर्य्युकर्त्तृकेष्वङ्गेषु [४]होतुरकर्त्तृकत्वेऽपि प्रधानानुष्ठानं परकृताङ्गानुष्ठानसहितं फलाय। [५][एवं] पत्नीकर्त्तृके यजमानकर्त्तृकाङ्गं पत्न्या अकृतमपि फलाय। [६]यद्वा पत्नीकर्त्तृके यजमानस्य तत्कृते पत्न्यनुज्ञाद्वारा प्रयोजककर्त्तृत्वम्। सत्रेऽपि [७]परस्परकर्म्मसु प्रयोजनत्वमितरस्य। एवञ्च सति यजमानपत्नीकर्त्तृके

(१) A. चरितेऽपि ०।

(२) D. क्रत्वर्थानुष्ठानात्तु वचनाद्।

(३) D. त्यागफल ०।

(४) A. होतृकर्त्तृकत्वेऽपि ०।

(५) D. Omits the portion bracketed.

(६) A. यथा पत्न्या अकृते यज ०।

(७) D. परस्परप्रयोजकमितरस्य।

यदेकवचनं तत् पुमेककर्त्तृकत्वाभिप्रायेण सत्रे पुम्बहुत्वाद्बहुवचनम्। “स्वर्गकामो यजेते”त्यत्राख्यातोपात्तसंख्याया भावनाक्षिप्ते कर्त्तर्य्यन्वये स्वर्गकामपदगतलिङ्गसंख्ययोस्तद्गतत्वेनाविवक्षितत्वेऽपि भावनान्वयोत्तरकालमर्थाक्षिप्तकर्त्तरि पाक्षिकान्वये एकं पुंकर्त्तृकत्वं सर्व्वाङ्गोपेते प्रधाने पर्य्यवस्यति। एवञ्च स्त्रीकर्त्तृकत्वं प्रमाणान्तरावगतं न प्रतिषिद्धम्। एकत्वं हि पुंस्त्वावरुद्धम्। पुंसः सद्वितीयत्वं वारयति न स्त्रियाः।

अतएव स्त्रियामेकत्वान्वयाभावेनानेकस्त्रीकर्त्तृकत्वमप्येकस्मिन् प्रयोगे। यथा “वसन्ते ब्राह्मणोऽग्नीनादधीते”त्यत्र ब्राह्मणपदे पुंस्त्वस्याविवक्षा[१]कारणाभावात् एकपुंब्राह्मणकर्त्तृकत्वमाधाने ज्ञातं स्त्रीकर्त्तृत्वं न वारयति। “पूर्व्वेण प्रविशत्युत्तरेण पत्नी”त्यादिलिङ्गात् “क्षौमे वसानावग्नी आदधीयाता”मित्यादिलिङ्गाच्च। न च कर्त्राकाङ्क्षायामेकपुं[२]कर्त्रन्वये निराकांक्षत्वान्न कर्त्रन्तरान्वयः। “पशुना यजेते”त्यत्र पुंपशुकरणत्वे स्त्रीपशुनिवृत्ति[३]रिति वाच्यं स्वर्गकाममुद्दिश्य यागविधौ स्वर्गकामपदे पुंस्त्वविवक्षाभावात् यः स्वर्गकामः या स्वर्गकामा स च [[४]सा च यागं] साङ्गं कृत्वा फलं प्राप्नुयादित्युक्ते [५]पुरुषस्यार्थाक्षिप्तकर्त्तृत्वांशे पुंस्त्वेकत्व-

(१) A. करणाभावात्।

(२) D. कर्त्तृक (का) न्वये ०।

(३) D. वर्द्दित ०।

(४) A. Omits the portion bracketed.

(५) A. पुरुष (:) स्यादित्युक्तत्वेऽर्था ०।

विवक्षा न स्त्रिया इति यागव्यक्तिभेदे द्वयोः कर्तृत्वमिति वैषम्यं पशोरेकस्यां यागव्यक्तौ करणत्वात्। "राजा स्वाराज्यकामो यजेते"[1]त्यत्र स्वाराज्यकामपदेनाविशेषाद् ब्राह्मणादिस्वाराज्यकामोपस्थितौ राजपदानर्थक्यभयेन न ब्राह्मणादिकर्त्तन्वयः। न चेह कस्यचिद् वैयर्थ्यं येन स्त्रीकर्तृकत्वं नान्वीयेत अतएवाह जैमिनिः,—"स्ववतोस्तु वचनादैककर्म्यं स्यात्"इति पृथक्यागकर्तृत्वेऽपि वचनात् [2]सकृदाम्नानुरूपं प्रयोगैक्यमित्यर्थः। तेन पत्न्यापि पृथगेव देवतामुद्दिश्य तदेव द्रव्यं त्यक्तव्यम्। यत्तु कर्काचार्य्यैः,—"पत्नी च ददाती"ति सूत्रं दीयमानमनुजानातीति व्याख्यातं तस्यापि त्याग एवार्थः त्यक्तस्य ह्यनुज्ञा सत्यपि(?) त्यक्तमित्येवं रूपैव। अतएव यजमाने प्रोषिते नित्यकर्म्मसु प्रायश्चित्ताहुतीनां त्यागः पत्न्यैव क्रियते यजमानस्यानुज्ञादानेन [3]तत्त्यागे कर्तृत्वेन कर्म्मसाद्गुण्यम्।

> निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा।
> प्रवसेत्कार्य्यवान् विप्रो वृथैव न चिरं क्वचित्॥

इति छन्दोगपरिशिष्टे अग्निनिक्षेपपदेनाग्निकार्य्यानुज्ञाविधानात्। यत्तु [4]तत्र,—

> मनसा नैत्यिकं कर्म्म प्रवसन्नप्यतन्द्रितः।
> उपविश्य शुचिः सर्व्वं यथाकालमुपाचरेत्॥

(१) A. ० त्यतः ०।
(२) D. सकृदङ्गात्तु ०।
(३) D. तत्त्यागेन ०।
(४) D. तत्र च ०।

इति प्रवासे कर्म्मानुसन्धानमेव यजमानस्याग्निहोत्रादिकार्य्यं विधीयते न तु गृहे पत्न्या कृतमग्निहोत्रं यजमानस्य फलायेति तस्यार्थः। अन्यथा प्रोषिते यजमाने पत्न्यां रजस्वलायामकृतमेव स्यादिति तस्यार्थ इति। तन्न। तथा सति गृहे [1]पत्न्या ऋत्विगादिभिरकरणे यजमानस्य कर्म्मानुसन्धानमात्रेण कृतकृत्यता स्यात्। न चैतदिष्टम्। तथा च हारीतः,—"नाग्निवेलयोः प्रवसेत पर्व्वसु च। आपत्सु प्रोषितेऽग्निवेलायां वाग्यतः प्रतिदिनमग्नीन् मनसा ध्यात्वोपस्थाय मन्त्रतो हुतं ज्ञात्वा व्रतये"दिति गृहे होमं [2]दर्शयति। कात्यायनोऽपि प्रवसन् याजमानं कुर्य्यात् इति। अर्थः—नहि यागानुसन्धानं कुर्व्वन् यजमानः किन्तु यागं कुर्व्वन्। तेन गृहकृतकर्म्मणामिह त्यागकरणे यजमानः तस्य कर्म्म याजमानम्। प्रोषिते यजमाने पत्न्यां रजस्वलायां ऋत्विक्कृतैरेव हविःप्रक्षेपादिभिर्यजमानक्रतुसिद्धिः। न च

> द्वयोरप्यसमक्षन्तु हुतमप्यहुतं भवेत्।

इति कर्म्मासिद्धिः परिकल्प्यर्त्विजं [3]यागविधानादेवासमक्षहोमस्यानुज्ञानात्। यथा "तामवरुध्य यजेते"ति रजस्वलां विहाय कर्म्माचरणे पत्न्याज्यावेक्षणाभावे कर्म्मसाद्गुण्यम्। न च प्रवास-

(१) A. C. पत्न्या करणे ०।
(२) D. दर्शयेदिति।
(३) A. C. प्रवासविधानादेव समक्षहोमस्या ०।

विधेर्बहुपत्नीकविषयत्वे [1]नीरजस्कापत्नीविषयत्वे वा प्रमाणमस्ति न चासमक्षपदं (द्वि)पत्नीकहोमनिषेध एव मानं द्वयोर्युगपद्रजस्वलयो स्तत्रापि दोषात्। [2]समक्षहोमस्य यजमानपदार्थानुष्ठानसौकर्य्यार्थत्वात् तदतिक्रमे नियमादिष्टलोपमात्रम्। यत्तु यजमानकर्त्तृके त्यागे (यागे) पत्न्या अनुमतिमात्रेण प्रयोजककर्त्तृत्वानुपपन्नं कर्त्तृत्वमन्यथा तस्याः स्वतन्त्रकर्त्तृत्वे एकवचनविरोधः स्यादिति तन्न प्रयोजककर्त्तुः फलभागित्वेऽतिप्रसङ्गात्। आर्त्त्विज्य दक्षिणाम्नानवदिह प्रमाणाभावात्। स्वतन्त्रकर्त्तृत्वेऽपि यजेतेत्येकवचनं यथा तथोक्तमेव। यद्वा यागकर्त्तृत्वं यद्यपि प्रत्येकविश्रान्तं साङ्गं प्रधानकर्त्तृत्वं द्वयोर्व्यासज्य। नह्याज्यावेक्षणे यजमानस्य कर्त्तृत्वं न वा विष्णुक्रमादौ पत्न्याः। तेन साङ्गप्रधानरूपविष्णुक्रमादौ तत्र प्रयोग[3]कर्त्तृत्वं द्वयोर्व्यासज्येत तदभिप्रायमेकवचनं सत्रे तु प्रधानकर्त्तृबहुत्वापेक्षं बहुवचनम्। यदि यागरूपप्रधानकर्त्तृत्वं व्यासज्य वृत्तिः स्यात्। [[4]फलमपि व्यासज्य वृत्तिः स्यात्] फलस्य कर्त्तृगामित्वात् द्वयोः समग्रफल[5]भागित्वाभ्युपगमादध्वर्य्वादीनां प्रधानकर्त्तृत्वाभावादेव न प्रसङ्गः।

(१) D. नीरजस्वलापत्नी०।

(२) D. समिद्धोमस्य ०।

(३) A. रूपकर्त्तृत्वं०।

(४) A. C. Omits the portion bracketed.

(५) A. ०गामित्वाभ्युप०।

तेन पत्न्या अपि पृथक् त्याग(याग)करणमुचितम्। समाचारस्तु श्रुतिविरोधेन प्रमाणम्। अतएव प्रोषितो यजमानश्चेदशौचं शृणोति पत्नी गृहे श्राद्धादिकं करोति तदा श्राद्धं सगुणमेव। पत्न्यास्तु गृहे अशौचश्रवणे तत्सम्बन्धेन पाकस्य दुष्टत्वात् श्राद्धाद्यकरणम्। यजमानस्तु प्रवसन् न श्रुत्वा यदि करोति तदा न दोषः। गृहे करिष्यन्तीत्यनुसन्धानेनाकरणे वैश्वदेवलोपप्रायश्चित्तं कुर्य्यात् श्राद्धञ्चाशौचान्ते। बहुभार्य्यस्य त्वेकयाज्यावेक्षणादिना क्रतुसाद्गुण्यं स्वफल[1]लोभेनान्यासां प्रवृत्तिः। एतदेवाभिप्रेत्य छन्दोगपरिशिष्टे—

अग्निशिष्टान्तु शुश्रूषां बहुभार्य्यः सवर्णया।
कारयेत् तद्बहुत्वे तु ज्येष्ठया गर्हिता न चेत्॥
या वा स्याद् वीरसू रामा आज्ञासम्पादनी च या।
दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत्॥
दिनक्रमेण वा कर्म्म यथाज्येष्ठमशक्तयः।
विभज्य सह वा कुर्य्युर्यथाक्रममशाठ्यवत्॥

[2]तथा,—

स्त्रीणां सौभाग्यतो ज्यैष्ठ्यं विद्ययैव द्विजन्मनाम्।
नहि स्वल्पेन तपसा भर्त्ता तुष्यति योषिताम्॥

इदं ज्येष्ठानियोगपक्षे। एवञ्च बहुपत्नीकस्यैकस्याग्निहोत्र-

(१) A. ०लाभेनान्येषां प्रवृत्तिः। अतएवाह छन्दोगपरिशिष्टे।

(२) A. C. यथा।

सन्निधानेऽन्यस्याः प्रवासोऽपि न दोषाय। पत्न्याः प्रवासे पुनराधानविधानमेकपत्नीकपरम्। केवलं प्रवासस्याविहितत्वात् "प्रवसन् प्रवत्स्यन्वा वैश्वानर्य्या यजेते"ति प्रवासादागत्य प्रवासपूर्व्वं वा वैश्वानरी। पर्व्वातिक्रमे कृच्छ्रार्द्धञ्च। एवं यजमानस्य "वृथैव न चिरं क्वचित्" इति वृथा चिरप्रवासयो[1]रिष्टिः। पर्व्वातिक्रमे कृच्छ्रार्द्धम्। प्रत्येकप्रायश्चित्ते इतरस्यानुमत्या स्वत्यागः। [2][एवमुत्तरक्रत्वनुष्ठानार्थम्।] तत्रेतरस्य फलभागित्वाभावेऽपीतरस्य तत् क्रतुसिद्ध्यर्थं प्रवृत्तिः। यथा सत्रे मृते यजमाने संख्यापूरणार्थमानीतस्य कर्त्तुः। अतएवाहिताग्नेर्भार्य्यान्तरपरिग्रहे तदर्थं पुनरारम्भणीयानुष्ठानम्। यजमानस्य [3]तत्राङ्गनिर्वाहकत्वेन प्रवेशः। एवमुत्तरक्रत्वनुष्ठानार्थमग्निष्टोमस्य भार्य्यार्थं पुनः प्रयोगः। न च "धर्म्मप्रजासम्पन्ने दारे नान्यां कुर्व्वीत। अन्यतराभावे कुर्व्वीत प्रागग्न्याधेयात्" ऊर्द्ध्वं विवाहनिषेधः। प्रागग्न्याधेयादित्यस्योर्द्ध्वं विवाहनिषेधपरत्वे परिसंख्यापत्तेरग्न्याधेयं कुर्य्यादित्येव तस्यार्थः। तथाच छन्दोगपरिशिष्टे,—

सदारोऽपि पुनर्दारान् कथञ्चित् कारणान्तरात्।
य इच्छेदग्निमान् कर्त्तुं क्व होमोऽस्य विधीयते॥

इत्याशङ्क्य—

स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन।

---

(१) A. C. र्रिति।

(२) A. Omits the portion bracketed.

(३) D. तत्रेदं निर्वाह०।

इत्युक्तम्। न च पत्न्यर्थान्वारम्भणी(या)यां यजमानस्याफल[1]भागित्वेनायजमानत्वान्न यजमानकर्त्तृकविष्णुक्रमणादिसम्भवः। सत्रे यथा "ये न यजमाना[2]स्तएव ऋत्विज" इत्यार्त्विज्ये यजमानविधानेऽपि मृते कस्मिंश्चित् संख्यापूरणार्थमानीतस्य यजमानत्वेऽप्यगत्या तत्कृताङ्गानां क्रत्वर्थत्वमेवमिह। तत्रारब्धत्वेनावश्यसमापनीयत्वादङ्गवैगुण्यं यथासह्यं इहापि "धर्म्मे चार्थे च कामे च नातिचरितव्ये"ति सहधर्म्मचरणनियमाद् वैगुण्यं सह्यम्। अतएव पत्नीनाशेनोत्सन्नाग्नेर्न पुनराधानप्रसङ्गः सह धर्म्म[3]चरणनियमात्। यत्तु भरद्वाजसूत्रम्,—"दारकर्म्मणि यद्यशक्त आत्मार्थमग्न्याधेयं कुर्य्यात्" इति तदारब्धाधानस्य मध्ये पत्न्याः पतितत्वे पलायने वारब्धाधानसमापन [पर][4]मेव। अन्यथा ब्रह्मचर्य्यानन्तरमेव दारकर्म्मण्यशक्त आत्मार्थमाधानं कुर्य्यादिति प्रथमाधानपरं किं [5]न स्यात्। अतएवापत्नीकोऽप्यग्निहोत्रमाहरेत् यदि नाहरेदनध्वा पुरुषः स्यादिति ऋग्वेदब्राह्मणव्याख्यातम्। भार्य्यायाः पातित्ये पलायने वा साग्निरेवापत्नीकोऽप्यग्निहोत्रहोमं कुर्य्यादित्यर्थः। न तु मृतभार्य्यस्याधानविधिपरमग्निहोत्रपदस्याधानवाचित्वाभावात्। छन्दोगपरिशिष्टे,—

---

(१) C. भागित्वे यजमानत्वा०।

(२) D. स्ते ऋत्विज०।

(३) D. प्रचरण०।

(४) C. Omits the portion bracketed.

(५) D. न स्यादिति।

मृतायामपि भार्य्यायां वैदिकाग्निं न सन्त्यजेत् ।
उपाधिनापि तत्कर्म्म यावज्जीवं समाचरेत् ॥
रामोऽपि कृत्वा सौवर्णीं सीतां भार्य्यां यशस्विनीम् ।

इत्यादि । तज्जातारणिपरमिति पूर्व्वैर्व्याख्यातमेव । वैजवापः,—"जाते कुमारे अरणिभ्यामग्निं मथित्वा तस्मिन्नायुष्यहोमान् जुहोति तस्मिंश्चूड़ाकरणोपनयनव्रतादेशगोदानक्रिया तस्मिन्नेनमुद्वाहयेद् सः शालाग्निः ।" येषां जातारणिपक्षः तेषां सोऽग्निः पत्नीदाहे [1]न नियुज्यते ।

यो दहेदग्निहोत्रेण स्वेन भार्य्यां कथञ्चन ।
स स्त्री तेन भवेत् पूर्व्वं पुमांस्त्री चापि जायते ॥

इति तत्रैवोक्तेः । आहवनीयादिपरत्वे पत्नीदाहनिषेधानुपपत्तेरिति । तेन जातारणिर्मृतायामपि भार्य्यायां तमग्निं न त्यजेत् । रामोऽपि कृत्वा सौवर्णीमिति दृष्टान्तः सीतात्यागे यज्ञकरणांशेन । अन्यथा रामस्य यागार्थं द्वितीया पत्नी विद्यतएव इतिवार्त्तिकविरोधात् । एवञ्च द्वितीयाश्रुत्याधानस्याग्निसंस्कारत्वं संस्कारस्याग्निनाशेऽपि तज्जनकारणिनिष्ठः । गौतमादिस्मृत्याष्टाचत्वारिंशत्संस्कारमध्यपाठात् संयोगपृथक्त्वेन यद्यप्यात्मसंस्कारस्तथापि नाहिताग्निसंस्कारवत्वेन कर्म्माधिकारः किन्त्वाहवनीयादिमत्वेनाधि-

(१) A. C. न वियुज्यते ।

कारः । अधिकारे सत्येव नित्याकरणे दोषः । न चोत्सन्नाग्नेरधिकारः । अतएवोक्तम्,—

दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः ।
आहरेद्विधिवद् दारानग्नींश्चैवाविलम्बयन् ॥

इति दारकर्म्मानन्तरमग्न्याधानं दर्शयति । अन्यथा हिताहिताग्नित्वाविशेषाद् दारकर्म्मण्यशक्त इत्यत्र पुंस्त्वस्याविवक्षितत्वाच्च यजमानमरणे [1]पत्न्यापि केवलया आधानकरणेन नित्याग्निहोत्रादिकरणप्रसङ्गः ।

ब्राह्मे,—

महापातकसंयुक्तो दैवात् स्यादग्निमान् यदि ।
पुत्रादिः पालयेदग्निं युक्त आदोषसंक्षयात् ॥
प्रायश्चित्तं न कुर्व्वीत कुर्व्वन् वा म्रियते यदि ।
गृह्यं निर्वापयेत् श्रौतमुदस्येत् स्रोतसां परे ॥

इति लिङ्गाद् यजमाननाशे पत्न्या नाधानमिति पत्नीनाशे कथं यजमानस्याधानम् । तस्माद् द्वयोरधिकारेऽपि न पृथक् प्रयोगादधिकारः ।

(१) C. पत्न्या अपि केवलाया० ।

अग्निहोत्रप्रातःप्रयोगः ।

आचमनम् । [1]त्रिमात्रप्रणवमुच्चार्य्य "उद्धर" इति प्रैषः । अध्वर्य्योराहवनीयस्थाने पञ्चभूसंस्कारः । उद्धृत्य आहवनीयस्थापनम् । [2][दक्षिणाग्निस्थानं] पञ्चधा संस्कृत्य दक्षिणाग्निस्थापनम् । यजमानस्य गार्हपत्यदक्षिणाग्न्योरन्तरा गत्वा गार्हपत्यं प्रदक्षिणीकृत्य आहवनीयदक्षिणत उपवेशनम् । गार्हपत्यनैर्ऋते पत्न्या उपवेशनम् । "वृष्टिरसि वृश्च मे पाप्मानं सत्येन व्रतमुपैम्यापः सत्यं मयि व्रत" मिति यजमानस्य जलपानम् । द्विराचमनम् ।

अथाध्वर्य्युकर्म्म ।

वाग्यमनम् । पात्रासादनम् । कूर्च्चं । कुशाः । आपः । स्थाली । [3]अवज्योतनतृणद्वयम् । स्रुवः वैकङ्कतः । स्रुक् वैकङ्कती । एका समित् । भक्षणपात्री । तिस्रः समिधः । [4]अपरेणाहवनीयं कूर्च्चनिधानम् । तदुपरि [5]कुशनिधानम् । आहवनीयस्य त्रिभिस्त्रिभिः

(१) D. त्रिप्रमीतप्रणव ० ।

(२) D. Omits the portion bracketed.

(३) C. अवज्योततृण ० ।

(४) C. अपरे आहवनीयम् ।

(५) C. कुशानां निधानम् ।

कुशैः प्रागुदगग्रैः पूर्व्वार्द्धपरिस्तरणम् । ततो गार्हपत्यदक्षिणाग्न्योः क्रमेण परिस्तरणम् । [[1]गार्हपत्यं परिसमुह्य] गार्हपत्यपर्य्युक्षणम् । ततो दक्षिणाग्नेः । गार्हपत्यादाहवनीयं यावदुदकधारानिनयनम् । आहवनीयपर्य्युक्षणम् । [2]दोहनपात्रीमादाय गोसमीपं गत्वा [3]शूद्रभिन्नेन दोहनम् । गोदोहनप्रभृतिहोमपर्य्यन्तं वाग्यमः । पूर्व्वेणाहवनीयमानीय [4]दक्षिणत(?) उत्तरतोऽङ्गारान् निरुह्य गार्हपत्येऽधिश्रयणम् । तण्डुलस्य होमीयत्वे आहवनीयदक्षिणेनानयनम् । घृतादेः पूर्व्वेणैव । तृणेन दुग्धस्यावज्योतनम् । जलसेकः । [[5]पुनरवज्योतनम् ।] उत्तरतस्त्रिरुद्वासनम् । तण्डुलादेरधिश्रयणाद्यभावः । स्रुक्स्रुवप्रतपनम् । उदकस्पर्शनम् । पाणिना द्वयोर्मार्ज्जनम् । पुनः प्रतप्योदकस्पर्शनम् । "उन्नयामि" इति प्रश्नः । यजमानस्तिष्ठन् "ओमुन्नय" इति वदेत् । स्रुवेण स्रुचि वारचतुष्टयग्रहणम् । स्रुग्दण्डोपरि समिधं दत्वा स्रुचं गृहीत्वा गार्हपत्यादाहवनीयं प्रतिगमनम् । मुखमात्रे धृत्वा मध्ये नाभिपर्य्यन्तं नीत्वा पुनर्मुखमात्रे धृत्वोपवेशनम् । उपविश्य दक्षिणं जान्वाच्य *"सूर्य्यज्योतिषं त्वा वायुमतीं प्राणवतीं स्वर्ग्यां स्वर्गायोपदधामि भास्वती"मिति समिदाधानम् । इध्मे

(१) D. Omits the portion bracketed.

(२) C. दोहनपात्रमा ० ।

(३) D. शूद्रव्यतिरिक्तेन ० ।

(४) D. दक्षिणतोऽङ्गारान् ० ।

(५) D. Omits the portion bracketed.

* कात्यायनसूत्रे — अग्निज्योतिषम् ० । Sec. 4. 14. 23.

प्रदीप्ते होमः । "सूर्य्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहा" [1]इति होमः । इदं सूर्य्याय इति त्यागः । [2]कूर्च्चं निधाय गार्हपत्यावेक्षणम् । तूष्णीमुत्तराहुतिः । पूर्व्वापेक्षया भूयसी । इदं प्रजापतय इति । [3]याजमानं स्रुचि भूयिष्ठं शेषयित्वा स्रुचं द्विः प्रकम्प्य कूर्च्चे निधानम् । स्रुगग्रोपमार्जनं नमो देवेभ्य इति । स्रुगग्रे न्युब्जपाणिना निमार्जनमुत्तरे स्वधा पितृभ्य इति दक्षिणत उत्तानपाणिना निमार्जनम् । उदकस्पर्शनम् । स्थाल्याः स्रुवेण गार्हपत्यहोमः । "इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजां रमयतु प्रजापतिः अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा" इति [4][होमः] इदमग्नये [गृहपतये][5] रयिमते पुष्टिपतये । "तूष्णीं द्वितीयाम् ।" इदं प्रजापतये [इति याजनम् ।][6] "अग्नयेऽन्नादायान्नपतये स्वाहेति दक्षिणाग्नौ" स्रुवेण [7][होमः] । इदमग्नयेऽन्नादायान्नपतये । "तूष्णीं द्वितीयाम् ।" इदं प्रजापतये । स्रुच आदायानामिकया प्राशनं द्विराचमनम् ।

(१) D इति स्रुचा चरुहोमः ।

(२) D. शेषस्य कूर्च्चे ० ।

(३) D. त्यागः । द्वितीयाहुतितः भूयिष्ठस्य स्रुचि परिशेषणम् । स्रुचि भूयिष्टं रयित्व (?) द्विः प्रकम्प्य कूर्च्चे निधानम् । दक्षिणहस्तेन स्रुगग्रोपमार्जनं कूर्चस्योत्तरदेशे न्युब्जेनैव नमोदेवेभ्य इति । पुनरुत्ताने दक्षिणतः स्रुगग्रोपमार्जनं स्वधा पितृभ्य इति । उदकस्पर्शनम् । स्थाल्याः स्रुवेण ० ।

(४) C. Omits the portion bracketed.

(५) D. Omits the portion bracketed.

(६) D. Omits the portion bracketed.

(७) C. Omits the portion bracketed.

पुनः स्रुचो गृहीत्वानामिकया [1]प्राश्य द्विराचमनम् । शेषं भक्षणपात्रां कृत्वा तत्रस्थस्य लेहनम् । द्विराचमनम् । स्रुचि जलं [2]गृहीत्वा "देवान् जिन्व" इति स्रुगग्रेण जलसेकः । "पितॄन् जिन्व" इति दक्षिणतः । "सप्तर्षीन् जिन्व" इति ऊर्द्ध्वमुत्क्षेपणम् । चतुर्थीं कूर्चस्थाने निषिञ्चति[3] । "अग्नये [4]पृथिवीक्षिते स्वाहा पृथिव्याऽअमृतं जुहोमि स्वाहा अमृते अमृतं जुहोमि स्वाहेति" कूर्च्चमाहवनीयस्य पश्चात् कृत्वा स्रुक्स्रुवयोः प्रतप्य कूर्च्चे निधानम् । "समिदसि समिद्धो मे अग्ने दीदिहि समेद्धा ते अग्ने दीद्यासमिति" गार्हपत्ये समिदाधानम् । ततो दक्षिणाग्नौ । तत आहवनीये । यजमानस्य पयोहोमपक्षे वात्सप्रेणोपस्थानं यथोक्तं वैकल्पिकम् । "भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषै"रिति आहवनीयोपस्थानम् । ततोऽनेन गार्हपत्योपस्थानम् । तूष्णीमाहवनीयमुपस्थाय तदभिमुखं तत्समीप उपवेशनम् । गार्हपत्यसमीपे शयनमासनं [5]वा । अध्वर्य्योर्गार्हपत्यं पर्य्युक्ष्य ततो दक्षिणाग्निं तत आहवनीयपर्य्युक्षणम् । नात्रोदकधारा । यजमानस्य "विद्युदसि वि मे पाप्मानं जह्यपोऽवभृथमभ्युपैमि मयि सत्यं गोषु मे व्रतमिति" जलभक्षणम् । द्विराचमनम् । वाग्विसर्गः । [6]गार्हपत्यं दक्षिणीकृत्याग्न्योरुत्तरा

(१) D. प्राशनं द्वि ० ।

(२) C. कृत्वा ।

(३) D. Adds here उदकस्पर्शनम् ।

(४) D. पृथ्वीक्षिते ।

(५) D. कृत्वा ।

(६) D. आहवनीयं प्रदक्षिणीकृत्य अग्न्यो ० ।

निष्क्रमणम् । मुहूर्त्तं सभ्यसमीपे उपवेशनम् । माध्यन्दिनश्रुत्या इन्द्रायाहवनीयाग्नये नमः यमाय गार्हपत्याग्नये नमः नलायान्वाहार्य्यपचनाग्नये नमः अनश्नत्साङ्गमनाय सभ्याग्नये नमः अवसत्पांसवाय नमः इति पञ्चमन्त्रैराहवनीयगार्हपत्यदक्षिणाग्निसभ्याग्नीनामुद्धृतभस्मनश्चोपस्थानम् । भस्मसमीपे उपवेशनम् । "हुत्वाग्नीन् सूर्य्यदैवत्यान् जपेन्मन्त्रान्" इति वचनात् सौर्य्यमन्त्रयजपो होमाङ्गम् । "न सायमनुपस्थायापरीत्यानमस्कृत्योपविशेत् आप्रात"रिति हारीतवचनात् त्रयाणामग्नीनामुपस्थानं प्रदक्षिणनमस्कारौ च ।

अथ स्मार्त्तहोमः ।

उदयात् पूर्व्वं यजमानः स्वयमेव आवसथ्यसमीपे उपविश्य उपयमनकुशास्तिस्रः समिधः मणिकोदकं तण्डुलाः इत्यासाद्य उपयमनकुशानादाय समिधोऽभ्याधाय मणिकाद्भिः पर्य्युक्ष्य द्वादशपर्व्व[1]पूरं तण्डुलानादाय सूर्य्याय स्वाहा इदं सूर्य्याय [2]प्रजापतये स्वाहा इदं प्रजापतये इति । [3][पत्नी पुत्रकाम्यात् पूर्व्वामाहुतिं जुहोति ।] मन्त्रः,—

(१) D. पूरिततण्डुला ० ।

(२) D. ओं प्रजा ० ।

(३) C. Omits the portion bracketed.

पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।

पुमानिन्द्रश्च *सूर्य्यश्च पुमां संवर्त्ततां मयि ॥

पुनः स्वाहा । [1]द्वितीयां यजमान एव । इदं मित्रावरुणाभ्यामश्विभ्यामिन्द्राय वायवे इदं प्रजापतये । समाचारात् ऋचं वाच (?) मित्यध्यायपाठेन शान्तिकरणम् ।

अग्निहोत्रप्रायश्चित्तानि ।

तत्र ब्रह्मप्रायश्चित्तानि । जुहुयादनादिष्टानीति सूत्रितेऽपि नैमित्तिकस्य ब्रह्मावरणाप्रयोजकत्वादग्निहोत्रादावध्वर्य्युरेवानादेशकर्त्ता । सब्रह्मके पूर्व्वं प्रायश्चित्तार्थं ब्रह्म[2]वरणाप्रकर्षः । तदा च वाचस्पतिप्रैषः स्वकाल एव । यदि ब्रह्मा न विद्यादपि य एव कश्चिद्विद्यात् [3]स एव जुहुयादिति श्रुतेर्यजमानोऽपि जुहुयात् । पूर्णाहुतिहोमे एवं सर्व्वत्रेति सूत्रादव्यक्तं जुहोति । चोदनासु पूर्णाहुतिवदाज्यसंस्कारः । आज्यस्थाली । कुशाः । स्रुवाः । स्रुक् । एका समित् । आज्यम् । आज्यस्थाल्यामाज्यनिर्वापः । आज्याधिश्रयणम् । [4]स्रुवस्रुक्कुशैः सम्मार्गः । आज्योद्वास-

* In all Mss. वायुश्च ।

(१) C. द्वितीयो ०

(२) C. वरणापकर्षः ।

(३) D. स जुहुया ०

(४) C. स्रुवस्तरोः कुशैः ०

नम् । कुशैरुत्पवनम् । आज्यावेक्षणम् । स्रुवेण स्रुचि चतुर्गृहीतग्रहणम् । उत्थाय समित्प्रक्षेपः । ततो होमः ।

तत्र ऋग्वेदीयकर्म्मभ्रंशे,—गार्हपत्ये । प्रजापतिः । गायत्री । अग्निः । [1]भूः स्वाहा इति [2]चतुर्गृहीतहोमः । इदमग्नये । ततः सर्व्वप्रायश्चित्तपञ्चाहुतयोऽपि गार्हपत्य एव सकृद्गृहीतेन । वामदेवः । त्रिष्टुप् । अग्नीवरुणौ । "त्वंनो अग्ने वरुणस्य विद्वान् देवस्य हेलोऽव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् ।" स्वाहा । इदमग्नीवरुणाभ्याम् । पूर्व्ववदृष्यादिः । "सत्वंनो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अवयक्ष्व नो वरुणं रराणो वीहि मृलीकं सुहवो न एधि" स्वाहा । इदमग्नीवरुणाभ्याम् । कल्पजः । त्रिष्टुप् । अग्निः । "अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि । अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा ।" इदमग्नये । कल्पजः । त्रिष्टुप् । लिङ्गोक्ताः । "ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।" इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो (देवेभ्यो)मरुद्भ्यः स्वर्केभ्यः । शुनः शेपः । त्रिष्टुप् । वरुणः । "उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा ।" इदं वरुणाय ।

---

(१) D. ओं भूः स्वाहा ।

(२) C. चतुर्गृहीतेहोमः ।

याजुर्व्वेदिककर्म्मभ्रंशे,—गार्हपत्ये आज्यं संस्कृत्य समित्पूर्व्वं चतुर्गृहीतेनाहुतिं दक्षिणाग्नौ । प्रजापतिः । उष्णिक् । वायुः । ॐ भुवः स्वाहा । इदं वायवे । "त्वन्न" इत्यादिसर्व्वप्रायश्चित्ताहुतयश्च दक्षिणाग्नावेव । सोमे वाग्नीध्रीये । प्रागाग्नीध्रीयोत्पत्ते र्दक्षिणाग्नौ ।

सामवेदोक्तकर्म्मण्युद्गात्रादिसम्बन्धे नष्टे गार्हपत्ये संस्कृत्याज्यं चतुर्गृहीतेन । प्रजापतिः । अनुष्टुप् । आदित्यः । स्वः स्वाहा [1]इदं सूर्य्यायेति । आहवनीये होमः । सकृद्गृहीतेन सर्व्वप्रायश्चित्ताहुतयश्च । स्मृतिबोधितानादिष्टप्रायश्चित्ताङ्गकर्म्मभ्रंशे,—गार्हपत्ये आज्यं संस्कृत्याहवनीये समित्पूर्व्वं होमः । ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ भूर्भुवः स्वः स्वाहा इदं प्रजापतये । इति चतुर्गृहीताहुतिचतुष्टयम् । सकृद्गृहीतेन सर्व्वप्रायश्चित्ताहुतयश्च ।

अग्निहोत्रार्थदोहनकाले गौरुपविष्टा चेत् सायं होमकाले च "उदस्थाद्देव्यदिति"रिति यजुषोपस्थाप्य दोहनम् । ब्राह्मणाय गौर्देया यं प्रति स्वयं गन्तव्यं नास्ति । प्रातर्होमो गवान्तरपयसा । अथवा "दण्डेन वानुपिष्योत्थाप्य दोहनम् ।" अस्मिन् पक्षे न दानम् । अग्निहोत्रगौर्दुग्धं न ददाति तदान्यगोदोहनम् । [2]नात्रानादिष्टप्रायश्चित्तम् । हम्भाशब्दकरणे तृणान्यादाय तां

---

(१) D. इदं सूर्य्याय ।

(२) D. अत्र अनादिष्ट ०

भोजयेत्। दीर्घतमा (०तपाः)। त्रिष्टुप्। धेनुः। "सूयवसाद्भगवति हि भूया अथो वयं भगवन्तः स्याम अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्तीति" मन्त्रेण। तामेव दुग्धहोमः।

यजमानो यदि ध्यायेद् गौरियं धेनुरूपिणी।
वत्सो वायुः क्षितिः स्थाली तस्य किञ्चिन्न नश्यति॥
परश्रिया स युक्तः स्यात् श्रेयसा वा ऋषिश्रुतेः।

रक्तं रक्तविमिश्रितं वा यदि दुह्यते [1]कटादिना दक्षिणाग्नि-वेष्टनम्। व्युत्क्रामतेति प्रैषः। गृहात् सर्व्वजनानां निष्क्रान्तिः। [2]दक्षिणाग्नेरुष्णे भस्मनि रुद्राय स्वाहेति प्रक्षेपः। शतपथे तु,—रक्तदोहे। दक्षिणाग्निं "परिश्रयित वै।" इति प्रैषः। मेक्षणेना-लोड़नम्। दक्षिणाग्नौ तूष्णीं प्रक्षेपः। द्वयोर्विकल्पः। गवान्तर-पयसा होमः। गविस्थितं पयोऽमेध्यभक्षणादिना दुष्टमिति ज्ञातं चेत् तदा इदं वरुणायेति निर्द्देशः। वत्ससंसर्गकाले गोस्थदुग्धदोष-[3]ज्ञाने इदं वायव [4]इति निर्द्देशः। दोहनकालेऽमेध्यादिसंसर्गदोषे इदमश्विभ्यामिति सकलदुग्धविनाशे इदं सोमाय। शतपथेतु,—अधिश्रयणार्थानङ्गारान् गार्हपत्ये समस्य उष्णे भस्मनि तदीय-दुग्धप्रक्षेपस्तूष्णीमद्भिरभिषेकश्च। एवं दुह्यमाननाशे। अधिश्रित-नाशे इदं वरुणाय। उत्तरकृताङ्गारेषु प्रक्षेपमात्रं वा। एतेषु

(१) D. कटाग्निना यदि वेष्टनम्।
(२) D. दक्षाग्नेरुष्णभस्मानि रुद्राय ०।
(३) C. काले ०।
(४) C. इत्युद्देशः।

सर्व्वत्रान्येन पयसाग्निहोत्रहोमः। यवाग्वादिद्रव्यहोमपक्षे-ऽप्येवम्। अधिश्रितस्योत्फेनत्वे इदं पूष्णे। उत्फेनताशान्तौ नाशे इदं मरुद्भ्यः। अन्येन होमः। उत्फेनं भूत्वोपशान्त-मुपरि वुद्बुदाच्छादितं यदि नश्येत् तदा इदं सरस्वत्यै। होमोऽन्येन। उत्फेनताशान्तौ वुद्बुदशान्तौ (च)नाशे इदं मित्राय। उद्वासनकाले नाशे इदं सवित्रे। अन्येन होमः। उन्नीय-माननाशे इदं विश्वेभ्यो देवेभ्यः। एवं दध्यादावपि। स्रुचि गृहीतस्य नाशे इदं बृहस्पतये। अन्येन होमः। शतपथे तु,—समिधमाहवनीये दत्वा तत उष्णं भस्मोद्धृत्य तस्मिंस्तूष्णीं तस्य पयसः क्षेपः। अथवा तेनैवाग्निहोत्रहोमः। "नवै देवाः कस्माच्चन वीभत्सन्ते" इति श्रुतेः। अथवाहवनीयं प्रति नेतुमिष्टं पयो विनष्टञ्चेत् इदं धात्र इति निर्द्देशः। [[1]आहवनीयार्थं नयनो-पक्रमे इदं विश्वकर्म्मणे। नयैशंस्यान्तराले विनाशे इदमग्नये वैश्वानराय। अन्येन होमः। आहवनीयसमीपे नाशे इदं द्यावा-पृथिवीभ्याम्। अन्येन होमः। समित्प्रक्षेपनाशे इदमिन्द्राग्नि-भ्याम्। अन्येन होमः। पूर्व्वाहुतिहोमानन्तरं उत्तराहुतौ वुद्धि-स्थायां नाशे इदं प्रजापतये इति निर्द्देशः।] सकृद्गृहीतेनो-त्तराहुतिः। होमशेषपयोनाशे इदमिन्द्राय। अत्र सर्व्वत्र देवतानिर्द्देशमात्रम्। "रौद्र"मित्यादिश्रुतेः। रुद्रैतत्ते पयः वायो एतत्ते पय इति सम्बोधनेन निर्द्देश इति सम्प्रदायः। दुष्टस्य

(१) C. Omits the portion bracketed.

पयसो रुद्राय स्वाहेत्येवमाहवनीये होमः। एवं सर्व्वत्र इति केचित्। अन्येन पयसा सर्व्वत्राग्निहोत्रहोमः। यवाग्वादिहोमद्रव्यपक्षेऽप्येतानि प्रायश्चित्तानि। अथ यदि तण्डुलपयःप्रभृति होमद्रव्यं स्कन्देत अधः पतति "अस्कान्नधितप्राजनो"तिमन्त्रेणाभिमर्शनम्। पतितस्य शेषेण होमः। आज्ये स्कन्नेत्वपां निनयनं तूष्णीम्। यदि स्थालो स्रुग् वा सह हविषा भिद्येत अधोमुखो वा पतति सर्व्वं हविर्भूमौ पतेत् भूमिगतं द्रव्यं "अस्कान्नधीत प्राजनो"ति मन्त्रेणाभिमृश्य भूर्भुवः स्वरिति जलेन पर्य्यसिचनम्। स्थालीभेदपक्षे यत्राग्निभ्यो भस्मोद्धृत्य कुटीकृत्य स्थाप्यते तत्र स्थालीकपालानां प्रक्षेपः। भुवपतय इति हाविर्यज्ञीयस्कन्दस्याभिमर्शः। देवान् दिवमगन्निति सोमे हविषः स्कन्देऽभिमर्शः। यदि स्रुच्युन्नीतं द्रव्यं संस्कन्देत स्रुग् वा भिद्येत स्रुचान्तरं संमृज्य प्रतप्य द्रव्यान्तरमुन्नीयान्यस्मै दद्यात् तेन कर्त्ता जुहुयात्। एकदेशस्कान्दने तु शेषेण होम उक्तः। एकदेशस्याल्पत्वेऽपि तेनैव होमः। द्रव्यान्तरोपादानं स्थाल्यामसम्भवे। पुनर्दोहनम्।

प्रथमाहुतौ हुतायामाहवनीयानुगमने प्रथमाहुतिहोमात् पूर्व्वं वानुगमनेऽनादिष्टप्रायश्चित्तमाध्वर्य्यवं दक्षिणाग्नौ हुत्वाहवनीयमुद्धृत्य द्वितीयाहुतिः। द्वे वा आहुती।

अथाग्निसमेधनाय पूर्व्वं प्रक्षिप्ते काष्ठेऽनादिष्टमकृत्वैव द्वितीयाहुतिः। काष्ठे होमे शंकशूकले हिरण्यं निधाय द्वितीयाहुति

[होतव्या[१]] आहवनीयस्य त्रिरुद्धृतस्य नाशे विहारस्योत्तरतो गार्हपत्याहवनीयदक्षिणाग्नीनां स्थानसंस्कारः। देवश्रवा देवरातश्च। अनुष्टुप्। अग्निः। "अयन्ते योनिरृत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आ सीदाथा नो वर्द्धया गिरः।" इति गार्हपत्ये अरणी प्रतप्य गार्हपत्यमुपशमय्य निर्मथ्य गार्हपत्यमुत्पाद्य स्थाने स्थापयित्वाहवनीयदक्षिणाग्नी उद्धृत्य सायं होमं कृत्वा तत्रैव विहारे प्रातर्होमः। अन्ये तु प्रातर्होमार्थं पृथगुद्धरणम्। प्रातर्होमकाले त्रिरुद्धृताहवनीयानुगमने प्रातराहुतिर्निर्मथ्य उदग्विहारे कार्य्या न सायं होमार्थमग्नि[२]रक्षणम्। अन्ये तु शतकृत्वोऽप्युद्धरन्ति। नैतत् प्रायश्चित्तम्। आहवनीयहोमे कृतेऽकृते वा गार्हपत्यानुगमने आहवनीयहोमं कृत्वा गार्हपत्यभस्मनारणी संस्पृश्य मथित्वा संस्कृते गार्हपत्यस्थाने निधाय गार्हपत्यहोमादि कर्त्तव्यम्। कर्म्मान्तरकालेऽपि गार्हपत्यनाशे भस्मनारणी संस्पृश्य मन्थनम्। अथवाग्निहोत्रकाले गार्हपत्यानुगमने आहवनीयादुद्धृत्य पूर्व्वतो नीत्वा तमाहवनीयं प्रकल्प्य पूर्व्वाहवनीयं गार्हपत्यं कृत्वा होमः। अथवा गार्हपत्यानुगमने आहवनीयं [३]गार्हपत्यस्थानं नीत्वा तत आहवनीयमुद्धृत्य होमः। अथवाहवनीयात् पश्चिमतो गार्हपत्यं यावत् घणतृण[४]पंक्तिं प्रस्तार्य्य

---

(१) D. Omits the portion bracketed.

(२) C. ० करणम्।

(३) C. गार्हपत्यं नीत्वान्ते आहवनीय ०।

(४) C. फलैः प्रस्तीर्य्य।

तां दहन् गार्हपत्यस्थानं प्राप्त आहवनीय एव गार्हपत्यः। ततः पुनराहवनीयोद्धरणम्। अथवाहवनीये स्थिते गार्हपत्यं निर्मथ्योत्पाद्याध्वर्य्येवं कृत्वाग्निहोत्रहोमः। अथवा गार्हपत्यनाशे आहवनीयमरण्यां समारोप्य उत्तरे स्थानत्रयं संस्कृत्य निर्मथ्य गार्हपत्यं स्थापयित्वाहवनीयमुद्धृत्य होमः। अथवाहवनीयमुपशमय्य निर्मथ्याहवनीयमुद्धृत्य होमः। पक्षद्वयेऽपि स एव दक्षिणाग्निः। दक्षिणाग्न्यनुगमने दक्षिणाग्निमुद्धृत्यानादेशं कृत्वा [1]पुनराहृत्य होमः। त्रिरुद्धृतदक्षिणाग्निनाशे तदहस्तद्धोमलोप इति कर्कः। [2]अन्ये तु शतकृत्वोऽप्युद्धरन्ति। अरणिसम्भवदक्षिणाग्निपक्षे शतकृत्वो मन्थनम्। त्रिमथितनाशेऽमन्थनं वा। नित्यधारित्वपक्षेऽप्यग्निशमनेऽनादिष्टं कृत्वा स्वयोनेराहरणम्। आहवनीये स्थिते नाशशुद्धा पुनराहवनीयोद्धरणे सम्प्रत्युद्धृतो गार्हपत्य एव भवति। गार्हपत्यायतने निधेयः। अनादेशश्च। अथवा समिदुपरि खातं कृत्वाहवनीयद्वये अन्वस्य तत्र तथा होतव्यं यथा होमद्रव्यमग्निद्वये पतति। द्वयोर्मिश्रयणेऽग्नये ऽग्निमते पुरोडाशः। अग्निहोत्राङ्गत्वात् तद्विहार एवाग्नावन्वाधानादिब्राह्मणतर्पणान्तः। पृथगारम्भाभावान्नान्वारम्भणीया। इष्टिकरणाशक्तौ "समित"मित्याद्याभ्यामुपस्थानम्। प्रजापतिः। उष्णिक्। अग्निः। "संवा"मित्युपरिष्टाद् बृहती। "समितं संकल्पेथां सम्प्रिया रोचिष्णू

(१) C. पुनरुद्धृत्य होमः।

(२) D. अन्येऽपि ०।

सुमनस्यमानौ इषमूर्जमभि संवसानौ।" "संवा मनांसि सं व्रता समु चित्तान्याकरं अग्ने पुरीष्याधिपा भव त्वन्न इषमूर्जं यजमानाय धेहि। अनुद्धृतास्तमये होमकर्त्ता कश्चिद् ब्राह्मणं प्रेष्यति। "हिरण्यं दर्भे [1]प्रबध्य पश्चाद्धर्त्ते वै (ब्रूयात्) स च ब्राह्मणः कुशबद्धं हिरण्यं पश्चाद् हारयति। पुनर्मन्त्राणामृषिज्ञातारं ब्राह्मणं प्रेष्यति। इध्ममादीप्य पुरस्ताद्धर्त्ते वै (ब्रूयात्।) सद्योऽवसितेध्मकाष्ठानि त्रिःसन्नद्धान्यग्रे सार्द्रमृत्पिण्डत्रयरूपोपयमनीसंलग्नानि गार्हपत्ये मूलदानेनादीप्याहवनीयाय खरे निदधाति। तत्र नयें संस्कृत्य समित् पूर्व्वं चतुर्गृहीतेन विष्णवे स्वाहेति होमः। ततो दक्षिणाग्निमुद्धृत्याग्नये सूर्य्यवते पुरोडाशः। इष्टिमकृत्वा वाऽज्यं संस्कृत्य चतुर्गृहीतेन विश्वेभ्यो देवेभ्यः स्वाहेति होमः। अनुद्धृताभ्युदये रजतं दर्भे [2]प्रबध्य पुरस्ताद्धर्त्ते वै इति प्रैषः। ब्राह्मणेन पुरस्ताद्धारणम्। पूर्व्ववदिध्मेनोद्धृत्य वैश्वदेव्याहुतिः। दक्षिणाग्निमुद्धृत्य "सूर्य्याय ज्योतिष्मते पुरोडाशः।" इष्टिमकृत्वा वा वैश्वदेव्याहुतिः। वक्ष्यमाणमहुताभ्युदयप्रायश्चित्तञ्चात्र। अग्निहोत्रे पात्रासादनानन्तरं कूर्चनिधानानन्तरमाहवनीयनाशे "प्राण उदानमप्यगात् स्वाहे"ति गार्हपत्ये होमः।[3] तस्मिन्नेव काले गार्हपत्यनाशे निर्मथ्य स्थापयित्वाज्यं संस्कृत्याहवनीये होमः।

(१) D. प्रपद्य।

(२) D. प्रपद्य।

(३) C. Adds here उद्धृत्याग्निहोत्रहोमः।

"उदानः प्राणमप्यगात् स्वाहे"ति । तस्मिन्नेव काले दक्षिणाग्नि-
नाशे "व्यान उदानमप्यगा"दिति गार्हपत्ये हुत्वा दक्षिणाग्न्यु-
द्धरणम् । तस्मिन्नेव काले युगपत् सर्व्वे चेदनुगच्छेयुः शीघ्रं
मथित्वा प्रतिवातमुद्धृत्य यथा पुरोवाते प्रतीच्यां तत्रोद्धृत्य वायवे
स्वाहेति हुत्वा तमेवाहवनीयं स्वस्थाने न्यस्याग्निहोत्रहोमः ।
अतिमान्याद्(?) वाताभिमुखादिज्ञाने तु त्रयाणां पात्रासा-
दनोर्द्ध्वं नाशज्ञाने तूर्णं तु मथित्वाहवनीयदक्षिणाग्न्युद्धृत्य नये
घृतं संस्कृत्य सकृद्गृहीत्वा आहवनीयस्य पश्चादुपविश्य स्वयं
पीत्वाचम्याग्निहोत्रहोमः । नात्र पूर्व्वप्रायश्चित्तं पात्रासादनरूप-
निमित्तभेदात् । नवा विकल्पो [1]निमित्तभेदेन भिन्नार्थत्वात् ।
पात्रासादनात् पूर्व्वन्तु त्रयानुगमने सूर्य्योदयास्तमनज्ञाने उभ-
यानुगमननिमित्तं पुनराधेयम् । [पात्रासादनात् पूर्व्वं तदूर्द्ध्वं
वाहवनीयगार्हपत्यद्वयनाशे सूर्य्योदयास्तमनज्ञाने पुनराधेयम् ।][2]
सूर्य्योदयास्तमनज्ञानानन्तरन्तूभय[3]नाशज्ञाने न पुनराधेयं किन्तु
मथित्वोद्धृत्यानादेशः । विहरणकाले मथ्यमानश्चेन्न जायेत निक-
टस्थलौकिकाग्निमाहृत्य विहृत्य होमः । अथवा अग्नित्रयस्थाने
ब्राह्मणदक्षिणहस्तत्रयं च स्थापयित्वा होमः । तस्मिन् पक्षे व्रतम् ।
यावज्जीवं "वसत्यर्थ"मागतस्य ब्राह्मणस्यानिराक्रिया । जीववदज-

(१) C. रूपभेदेन भिन्नार्थत्वात् ।
(२) D Omits the portion bracketed.
(३) D. ज्ञाननाशज्ञाने ० ।

कर्णत्रयं वाग्निस्थाने निधाय होमः । तत्र यावज्जीवमाजमांस-
वर्जनं कुशस्तम्बे वा होमः । यावज्जीवं तत्रानासनम् । पात्र-
स्थाप्सु वा होमः । यावज्जीवजलनिन्दावर्जनं तत्र व्रतम् । दर्भ-
जलपक्षयोर्गार्हपत्यायतने कृत्वोद्धरणम् । ब्राह्मणहस्तादिसर्व्व-
पक्षेषु दृष्टार्थत्वात् प्रथमा समिन्नास्ति । लौकिकेऽग्नौ पयोऽधि-
श्रयणम् । "समिदसि समिद्धो मे ब्राह्मणहस्त दीदिहि समिद्धा
ते" ब्राह्मणहस्तवद्वा समिति द्वितीया समित् । एवमाजकर्ण
दीदिहि । कुशस्तम्ब दीदिहि । अहुताभ्युदये उन्नीय निःश्वास-
धारणम् ।

प्रथमाहुतिं हुत्वा भूरित्यनुमन्त्रणम् । यजमानस्य होत्रे वर-
दानम् । गार्हपत्यदक्षिणाग्निहोमात् प्राक् उदयेऽप्येवम् । वरः
श्रेष्ठद्रव्यम् । सर्व्वहविर्नाशे दोषे वाऽध्वर्य्यवं कृत्वा साङ्गावृत्तिः ।
आज्येन वा देवतेज्या । मार्जारमूषिकादीनां गार्हपत्याहवनीय-
दक्षिणाग्नीनान्तरागमने (दक्षिणाग्नीनामन्तरागमने) न दोषः ।
श्वैड़कवराहेषूदकधारा प्राङ्मुखी कर्त्तव्या । भस्मधारा वा ।
गर्द्दभगमने अग्नये पथिकृते पुरोडाशः । [1]नित्येष्ट्यतिपत्तौ चेय-
मिष्टिः । गौणकालातिक्रमे । गौणकालेत्वाध्वर्य्यवं कृत्वा क्रिया ।
स्तोत्रमोहे शस्त्रमोहे चेयमिष्टिः । [[2]स्वजनमरणेऽन्वारम्भणीया-
पूर्व्विका चेयमिष्टिः ।] व्रत्येऽहनि मांसमैथुनभोजने अग्नये
व्रतपतये अष्टाकपालः । कर्म्ममध्ये आर्त्त्यश्रुकरणश्चेदग्नये व्रतभृते ।

(१) D. नित्येष्ट्यापत्तौ चेय ० ।
(२) D. Omits the portion bracketed.

आहवनीयादीनां [1]प्रागग्निसंसर्गे न दोषः। संकुसुकत्वे अग्नये संसर्गाय सदृग्टहीतेनाहुतिः। तथापि (तथा) संकुसुकत्वे अग्नये संसर्गायाष्टाकपालः। परस्परसंसर्गे अग्नये विविचये आहुतिरष्टाकपालो वा। दावाग्निसंसर्गे अग्नये संवर्गायाहुतिरिष्टिर्वा। [2][वैद्युताग्निसंसर्गे अग्नयेऽप्सुमते आहुतिरिष्टिर्वा। सर्व्वत्रानादरः। हृल्लेखे आहुतिरिष्टिर्वा।] अशुच्यायतनसंसर्गे तु नानादरः। अग्नये शुचये आहुतिरिष्टिर्वा। भर्य्यागोषु यमलजनने मारुतस्त्रयोदशकपालः। स्वगृहदाहे अग्नये क्षामवते पुरोडाशः। मृन्मयस्य पात्रस्य भेदनेऽभिमर्शनम्। "भूमिर्भूमिमवागान्माता मातरमप्यगात् भूयाम पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम्।" ऋग्वेदब्राह्मणे। आहिताग्निर्यद्यस्नातः प्रातरग्निहोत्रं जुहोति का तत्र प्रायश्चित्तिः वारुणमष्टाकपालं निर्वपेदाहुतिं वा वारुणीं जुहुयादिति। अग्निहोत्रातिपत्तौ आहुतिर्होमः। "मनो ज्योति र्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु। अरिष्टं यज्ञं समिमं दधातु विश्वेदेवास इह मादयन्तामों प्रतिष्ठ स्वाहा।" एवं प्राणायामशतमेकरात्रात्। [उपवास (:) अर्द्धरात्रात्[3]।] तत ऊर्द्ध्वमाषष्टिरात्रात् तिस्रो रात्रीरुपवसेत्। तत ऊर्द्ध्वं माससंवत्सरं प्राजापत्यम्। संवत्सरो-

(१) D. आमादिसंसर्गे ०

(२) C. Omits the portion bracketed.

(३) D. Omits the portion bracketed.

त्सन्नेऽग्निहोत्रे चान्द्रायणं कृत्वा पुनराधानम्। अत्राप्याहुतिः पूर्व्वं कार्य्या। इदमरणिसत्त्वे। अरणित्यागे तु,—

अग्निहोत्र्यपविद्ध्याग्निं ब्राह्मणः काममोहितः।
चान्द्रायणं चरेन्मासं वीरहत्यासमो हि सः॥

[1]एवमग्नित्यागे प्राजापत्यविधानं स्मार्त्ताग्निविषयम्।

[2]होमद्वयात्यये दर्शपौर्णमासात्ययेऽपि च।
पुनरेवाग्निमादध्यादिति भार्गवशासनम्।

इति संवत्सरं होमद्वयात्यय इत्यर्थः।

दर्शञ्च पौर्णमासञ्च विलोप्योभयमेव वा।
एकस्मिन् कृच्छ्रपादेन द्वयोरर्द्धेन शुद्ध्यति॥

इति श्रौतपरमेव।

यत्तु—

अहूयमानेऽनश्नंश्च नित्यकालं समाहितः।
सम्पन्ने च यथा तत्र हूयते तदिहोच्यते॥
अहुताः परिसंख्याय पात्रे कृत्वाहुतीः पृथक्।
तन्त्रेण विधिवद्द हुत्वा एवमेवापराहुतिः॥

इत्यतिक्रान्तहोमप्रकारोऽविशेषात् श्रौतस्मार्त्तोभयपरः। आसायमाहुतेः प्रातराहुतिर्नात्येति आप्रातराहुतेः सायमाहुतिर्नात्येति आपौर्णमासाद्द दर्शो नात्येति आदर्शात् पौर्णमासो

(१) D. एवञ्चाग्नि ०।

(२) D. Adds here :—योऽग्नि (उ) पविद्धेरत् कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधानं कारयेदिति वशिष्ठोक्तमकामकृतत्यागे। विष्णुः,—अग्न्य + दि कृच्छ्रार्द्धेन इदमत्यन्तापदि।

नास्तेतीत्येतत् स्मार्त्तविषयमिति भट्टाचार्य्याः । याज्ञिकास्तु श्रौत-स्मार्त्तोभयविषयं मन्यन्ते गौणकालपरत्वात् ।

अथ परिशिष्टभरद्वाजसूत्रादिनिष्ठो मण्डनव्याहृतः पञ्चहोमविधिः ।

यदापदुपस्थिता तदा सायं होमकालेऽग्नीनुद्धृत्य कूर्चमासाद्य परिस्तीर्य्य पर्य्युक्ष्य [1]दोहाज्योद्वासनान्तं कृत्वा पर्व्वण्यग्न्यन्वाधान-मावश्यकमिति पर्व्वपूर्व्वसायंहोमान् गणयित्वा तावन्ति चतु-रुन्नीतानि पृथक् पात्रेणोन्नीय समिधमुपरि धृत्वाहवनीयं यथोक्तरूपेणेति "अग्निर्ज्योतिष"मिति समिधं दत्वा तावद्धो-मोचितद्रव्येण पूर्व्वाहुतिः सायंहोममन्त्रेण द्वितीयाहुतिद्रव्यं पात्रान्तरे कृत्वा पुनर्गार्हपत्यमेत्य पर्व्वपूर्व्वदिने प्रात[2]र्होमान् गणयित्वा तावन्ति चतुरुन्नीतान्युन्नीय समिधमुपरि [3]कृत्वा-हवनीयमेत्य "सूर्य्यज्योतिष"मिति समिधं दत्वा तावद्धो-मोचितद्रव्येण प्रातर्मन्त्रेण पूर्व्वाहुतिः । प्रथमस्थापितद्रव्येण संमेल्य कूर्चे निधाय गार्हपत्यमवेक्ष्य तन्त्रेण द्वितीयाहुतिः । सकृत् कूर्चमुखे मार्जनम् । गार्हपत्यदक्षिणाग्न्योश्च सायं-होम-

(१) D. दोहोद्वासनान्तम् ।

(२) C. र्होमान्तान् ।

(३) D. दत्वाहवनीयं यथोक्तरूपमेत्य सूर्य्य ० ।

पूर्व्वा[1]हुतिं गणयित्वा तावतः स्रुवान् पात्रान्तरे कृत्वा ताव-द्द्वितीयाहुतिद्रव्यञ्च पात्रान्तरे कृत्वा पुनः प्रातर्होमान् गणयित्वा पात्रान्तरस्थसायंकालिकपूर्व्वाहुतिद्रव्येण संमेल्य तन्त्रेण सायं प्रातःपूर्व्वाहुतिः । पात्रान्तरस्थसायंकालिकपूर्व्वाहुति[2]द्रव्येण प्रातर्द्वितीयाहुतिद्रव्येण प्रातर्द्वितीयाहुतिसंख्यकान् स्रुवान् संमेल्य तन्त्रेण द्वितीयाहुतिः । भक्षणादितन्त्रसमाप्ति(ः)तन्त्रेण । समित्पर्य्युक्षणोपस्थानानि सायं धर्म्मेण । यदातु प्रातर्होम-काले आपत्सम्भावना तदा पर्व्वप्रातःपर्य्यन्तप्रातर्होमसंख्यक-प्रातर्धर्म्मेण समिधं दत्वा प्रातराहुतिः । शेषं संरक्ष्य पर्व्वपूर्व्व-दिनपर्य्यन्तसायंहोमसंख्यकचतुरुन्नीतानि गृहीत्वा सायंधर्म्मेण समिधं दत्वा सायमाहुतिः । शेषद्वयं समस्य कूर्चे निधाय गार्हपत्यमवेक्ष्य द्वितीयाहुतिस्तन्त्रेण । प्रातर्धर्म्मेण पर्य्युक्षणोप-स्थाने । आपल्लाघवे तु सायंहोमसम्बन्धिनः सायंहोमा एव समस्य कार्य्याः प्रात र्होमकाले तु प्रातर्होमाः ।

पञ्चहोमे कृते पश्चान्निर्वाहस्तु यदा भवेत् ।
[3]तत ऊर्द्ध्वन्तु कर्त्तव्या शेषाहे तु यथाविधि ॥
अकाले चेत् कृतं कर्म्म काले तस्य पुनः क्रिया ।

इति न्यायमूलमेतत् ।

उभयानुगमने पुनराधेयमुक्तं तत्प्रसङ्गेन पुनराधेयनिमित्ता-

(१) D. ० हुतीः ।

(२) D. ० द्रव्ये प्रातर्द्वितीयाहुतिसंख्यकान् ० ।

(३) D. तत ० ।

न्युच्यन्ते । तत्र येषु निमित्तेषु शृङ्गग्राहिकया पुनराधेयविधि-स्तत्रैव पुनराधेयविधिरन्यत्राधानम् ।

पुनराधेयमाधानादूर्द्धं प्रज्ञाविनाशने ।
तथा सर्व्वस्वनाशे च तदर्द्धे च [1]महापदि ॥
मृते पुत्रेऽङ्गनाशे च पुनराधेयमिष्यते ।
ऋत्विक्पुरोहितभ्रातृमृतौ बौधायने मते ॥
[2]बहुशः पुनराधेयमाधानाद् व्यसनोद्यमे ।
उद्वातेऽग्नौ विहारात् प्राक् मथ्यमान्येऽप्यजन्मनि ॥
लौकिकाग्न्यादानाहारेऽभ्युदयेऽस्तमयेऽपि वा ।
विशिष्टहेतुनानेनाधानं स्यादग्निदोषतः ॥
मन्थनारम्भमात्रेण नाग्निदोष इतीतरे ।
हुतेऽपि लौकिकाग्न्यादौ मथ्यमानोऽप्यनन्तरम् ॥
द्वितीयाद् वा तृतीयाद् वा होमकालात् पुरा यदि ।
अग्निर्न जायते तत्र पुनराधेयमिष्यते ॥
होमाष्टकाधिके लुप्ते धृतोऽप्यग्निर्विनश्यति ।
ततोऽल्पहोमलोपेऽपि यदाग्निरुपशाम्यति ॥
लौगाक्षिः पुनराधेयाधाने वैकल्पिके जगौ ।
कौषीतकिश्रुतिश्चैवं मासार्द्धं चेन्न हूयते ॥
ज्वलत्स्वग्निष्वतिक्रान्तान् पश्चान्ते पञ्चहोमवत् ।
समस्य जुहुयात् पश्चादिष्टिस्तन्तुमती भवेत् ॥

(१) D. यदापदि ।
(२) C. विन्नशः (?) ० ।

न तत्र पुनराधेयमापद्येवं प्रकीर्त्तितम् ।
वत्सरं वत्सरार्द्धं वा होमलोपे मतान्तरम् ॥
आपत्काले न नश्यन्ति दीप्यन्ते चेद्धुताशना ।
पञ्च कार्य्याः पुरोडाशा होमे लुप्तेऽर्द्धवत्सरम् ॥
पथिकृत् प्रथमो ज्ञेयः पावकः शुचिरेव च ।
व्रतपतिस्तन्तुमांश्चाग्ने दैवताया गुणाः क्रमात् ॥
सप्त कार्य्याः पुरोडाशाः होमे लुप्ते च वत्सरम् ।
पवमानः पावकश्च शुचिः पथिकृदित्यपि ॥
वैश्वानरो व्रतपतिस्तन्तुमानिति सप्तभिः ।
विशेषितोऽग्निरेव स्याद् देवतात्र यथाक्रमम् ॥
नाशदाहावरण्योश्चेदग्निं यत्नेन पालयेत् ।
अन्यारण्योर्यावदेष नारोप्य मथितः पुनः ॥
उद्वासे पुनराधानं छन्दोगपरिशिष्टतः ।
अयन्ते योनिरनया समारोपो विधीयते ॥
मन्यन्तूपावरोहेत्यनया स्याच्च वा सदा ।

"उपावरोह जातवेदः प्रजानन् । आयुः प्रजां रयिमस्मासु धेह्यजस्रो दीदिहि नो दुतरणे ।"(१)

यज्ञपार्श्वे तु,—

अरण्योर्दग्धयोश्चैव दुष्टयोः क्षीणयोस्तथा ।
आहृत्यान्ये समारोप्य पुनस्तत्रैव निर्मथेत् ॥

तत्र चायं समारोपमन्त्रः,—"उद्बुध्यस्वाग्ने प्रविशस्व योनिमन्यां

देवयज्याये वोढ़वे जातवेदः । अरण्योररणिमनुसङ्क्रमस्व जीर्णा-
न्तनुमजीर्णया निर्णुदस्व ।"

विहायाग्निं सभार्य्यश्चेत् सीमामुल्लङ्घ्य गच्छति ।
[1][होमकालात्यये तस्य पुनराधानमिष्यते ॥]
भार्य्यायां प्रोषितायां चेदुदेत्यर्कोऽस्तमेति वा ।
तत्र स्यात् पुनराधेयमन्ये त्वाहुरिहान्यथा ॥
ज्येष्ठा चेदग्निसंयुक्ता गच्छन्त्यन्या यथारुचि ।
यजमानेन सहिता यद्वा ता एव केवलाः ॥
एकस्यामप्यतिष्ठन्त्यामग्निहोत्रसमीपतः ।
पतिस्तिष्ठति चेदग्निनाशो नेत्यपरे जगुः ॥
सन्ध्यावदन्यदाप्यग्नीन् हित्वा चेद् दम्पती गतौ ।
[2]ग्रामान्तं वाथ सीमान्तं तत्रैकेऽग्निशमं विदुः ॥
अन्ये ग्रामान्तरगमान्नत्वतिक्रम[3]मात्रतः ।
यदीभावप्यतिक्रम्य सीमां प्रत्यागतौ पुनः ॥
उदयास्तमयात् पूर्व्वं न नाशोऽस्तीति केचन ।
विनाग्निभिर्यदा पत्नी नदीमम्बुधिगामिनीम् ॥
अतिक्रामेत् तदाग्नीनां विनाशः स्यादिति स्मृतिः ।
आपद्यपि हि कष्टायां विना पत्नीं नरान्तरैः ॥

(१) D. Omits the portion bracketed.

(२) D. ग्रामान्तरं वा सीमान्तम् ॰ ।

सीमातिक्रमणेऽग्नीनां न कथञ्चिदनुग्रहः ।
प्रत्यक्षेण नयन्नग्निमुच्छ्वसेच्चेद् [1]विनश्यति ॥

तत्राधानमित्यर्थः ।

तस्मादनुच्छ्वसन् हुत्वा निधायोच्छ्वसनं चरेत् ॥
पुरस्तादुच्छ्वसन् हुत्वा नयेदेवं [2]न नश्यति ।
शकटेनापि दूरं वा प्रत्यक्षं मननं नयेत् ॥
स्वाङ्गेनैवाथवा शम्या परासात् प्राङ् नयेत् श्वसन् ।
अन्यथाग्निविनाशः स्यात् तत्राधानं विधीयते ॥
पितृयज्ञे च दीक्षायां यायावरभृतिषु च ।
एतेष्वेव दहेदग्निं प्रत्यक्षं मनसा विना ॥

अनोविना शम्या ग्रामादूर्द्ध्वं नयनेऽग्निनाश इत्याहुः ।

कर्म्मार्थहरणेऽग्नीनां नानुच्छ्वासादिचोदिते ।
नदीसन्तरणेऽग्नीनां सीमातिक्रमणे तथा ॥
सर्व्वत्राद्यन्तसीम्नोर्वा स्वामिस्पृष्टाः स्युरग्नयः ।
प्रत्यक्षमरणिद्वारञ्चान्यथाग्निविनाशनम् ॥
आत्मारम्भणपक्षे तु नत्वारम्भो विधीयते ।
न क्वाप्यारम्भणं किञ्चिल्लौगाक्ष्यादिनिबन्धनात् ॥
दृष्टोऽग्निर्यदि नश्येत मथ्यमानः पुनः पुनः ।
ग्रामाद् ग्रामान्तरं गच्छेत् प्रत्यक्षो हव्यवाहनः ॥

(३) D. ॰ मागतः ।

(१) D. ॰ विनश्यति ।

अहुतो वत्सरं तिष्ठेदुदकेन शमङ्गतः ।
चतुर्भिः कारणैरेभि र्नष्टेऽग्नौ पुनराहवेत् ॥

उदकेन शमितः नष्टः । उदकेन सह नीत इत्यन्ये ।

नष्टे मथितमात्रे वा समारोपयजुर्जपेत् ।
पुनर्निर्मथ्य जप्तव्यं यजुस्तूपावरोहणम् ॥

तथा,—

विप्रोषिते स्वामिनि वैदिकाग्नि-
र्ग्रामस्य सीमामतिलङ्घ्य गच्छेत् ।
पत्न्याः प्रवासेऽपि तथैव नाशः
पत्नीबहुत्वेऽपि समानमेतत् ॥

"प्रवा व्रजति प्रवा धापयती"ति काण्वश्रुत्या प्रोषितस्याग्नि-नयनमनुज्ञातमित्यन्ये ।

नोपवासः प्रवासे स्यात् पत्नी धारयते व्रतम् ।
अमावस्यात्रयादूर्द्ध्वं पुनराधानमिष्यते ॥
[1]मासद्वयं प्रवासोऽस्ति परतो नाहिताग्निवत् ।
स्पर्शेऽग्न्योर्गृहदाहे च उदक्यायां तथैव च ॥
उदक्यायाः प्रवासाच्च पुनराधानमर्हति ।
[[2]सूतके मृतके चैके प्रवासे पुनराहितम् ॥]
धूपाङ्गारै स्तथा दीपैः पावकः प्रशमेद् यदि ।
उत्सन्नाग्निः स विज्ञेयः पुनराधानमर्हति ॥

(१) D. मासद्वयप्रवासो ० ।

(२) C. Omits the portion bracketed.

[1]अचोदितेन पाकेन कृतेनोद्धरणेन च ।
उत्सन्नाग्निः स विज्ञेयः पुनराधानमर्हति ॥
पुनर्विवाहे त्वाधानं पुनराधेयमेव वा ।
लौगाक्ष्याद्यनुबन्धत्वा [2]दुभयश्चेति केचन ॥
पक्षत्रयं पक्षहोमे पुनराधिनिरन्तरे ।
अग्नावनुगते स्वामी सीमामुल्लङ्घ्य चेद्गतः ॥
असमाधाय तत्रापि पुनराधेयमिष्यते ।
श्वशूकरखरोष्ट्राद्यैः काककुक्कुटमर्कटैः ॥
शृगालकुणपोदक्यासूतकीपतितान्त्यजैः ।
रेतोमूत्रपुरीषैर्वा पूयाश्रुश्लेष्मशोणितैः ॥
वसास्थिमांसमज्जाद्यैः शूद्रैरन्यैर्जुगुप्सितैः ।
आरोपितारणिस्पर्शे कृतेऽग्नौ स्पर्शनेऽपि वा ॥
आत्मोऽभिभ्रजते पुंसंसर्गे वासे वा पतितादिभिः ।
वदन्त्येषु निमित्तेषु केचिदग्निविनाशनम् ॥
तत्रारणिगते वह्नौ दुष्टे स्यात् पुनराहितिः ।
इतरेषु निमित्तेषु त्वग्न्याधेयं प्रचक्षते ॥
बौधायनमते वह्नावत्यन्तोपहते सति ।
समारोप्य मथित्वा च पवमानेष्टयो मताः ॥
यद्वा सर्व्वोपघातेषु स्यादापस्तम्बवाक्यतः ।
"पुनस्त्वादित्यारुद्रा" इत्यादिमन्त्रेण समिदाहुतिः ॥

(१) D. अत्रोदितेन ०

(२) C. ० दुभयं नेति ०

अन्ये चतुर्गृहीताग्न्याहुतिमेतेन वा जगुः ॥

प्रजापतिः। त्रिष्टुप्। अग्निः। "पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वन्तन्वं बर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥" स्वाहा।

आरोपितारणीनाशे पुनराधेयमेव वा।

छन्दोगपरिशिष्टे,—

अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्व्वयोः।
न तावत् पुनराधानमन्यारण्योर्विधीयते ॥
उत्तरा तु यदि क्षीणा नष्टा वा दैवकारणात्।
अवपाव्य ततो मन्थेत् प्रादेशं परिशेषयेत् ॥
एकारण्यां विनष्टायामस्ति चेदपरारणिः।
तां छित्वा मन्थनं प्रोक्तं भाष्ये बौधायनीयके ॥
अरणीमथनाशक्ते तन्तुभिर्मथनेन वा।
स्यातां चेदरणी नूत्ने ग्राह्ये शास्त्रोक्तलक्षणे ॥
श्वोभूतेऽनुदिते दर्शे तस्मिन् पूर्व्वारणिद्वयम्।
शकलीकृत्य पाश्चात्ये वह्नौ निक्षिप्य दाहयेत् ॥
ततो दक्षिणहस्तेन नूतनामुत्तरारणिम्।
गृहीत्वा सव्यहस्तेन गृह्णीयादधरारणिम् ॥
ते उभे अरणी तत्र दीप्तेऽग्नौ धारयन् जपेत्।
उद्बुध्यस्वाग्न इत्येतदयन्ते योनिरित्यपि ॥
मन्थनस्यावृता सम्यङ् मथित्वाग्निं विहृत्य च।
विलाप्योत्पूय दर्भाभ्यां स्रुच्यादाय चतुर्घृतम् ॥

जुहोत्याहवनीयेऽग्नौ मनस्वत्या घृतं तथा।
इष्टिं तन्तुमतीं कुर्य्यात् शरावं दक्षिणां ददेत् ॥
इत्यनारोपितारण्योः क्षये ग्राह्ये नवे पुनः।
तदलाभादग्निनाशे पुनराधानमिष्यते ॥
शूद्रोदक्यान्त्यकाकश्वपतितामेध्यरासभैः।
अनारूढारणिस्पर्शे ते विहायान्ययोर्ग्रहः ॥
भवतन्नः समेत्यप्सु मज्जयेद्दूषितारणी।

प्रजापतिः। पंक्तिः। अग्निः। "भवतन्नः समनसौ सचेतसा वरेपसौ। मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः।"

एकारण्येव दुष्टा चेत् तामेवाप्सु विनिक्षिपेत्।
तत्रान्यारणिलाभात् प्रागुद्दाते पुनराहितिः ॥
प्रागादित्योदयाद्धोमं संकल्प्य न जुहोति चेत्।
अग्न्याधिः पुनराधिर्वा नोभयं स्वाम्यसन्निधौ ॥

[1][छन्दोगपरिशिष्टे,—]

वैताने पुनराधानं यस्याग्नीनां विधीयते।
अकुर्व्वंस्तदवाप्नोति प्रायश्चित्तमृताहृतौ ॥

[2]प्रायश्चित्तमनादेशप्रायश्चित्तम्।

अत्र येषु निमित्तेषु वह्नेर्नाशो मतान्तरे।
मतान्तरे विनाशो न तत्र किं प्रतिपद्यताम् ॥

---

(१) C. Omits the portion bracketed.

(२) D. प्रायश्चित्तमनादेशः। अत्र °

स्थितानग्नीन् समुत्सृज्य नाधानस्यात्र सम्भवः।
दैवादग्निविनाशे स्यादाधानमिति याज्ञिकाः॥
अनेकाचार्य्यसिद्धान्ताः सौकर्य्याय प्रदर्शिताः।
देशकालवयोऽवस्थाशक्तिभेदाद् व्यवस्थिताः॥

अत्र प्रायश्चित्तोपयुक्ताधानप्रसङ्गेन प्रथमाधानं लिख्यते।

तत्र—

आवसथ्यमनादृत्य त्रेतायां यः प्रवर्त्तते।
अनाहिताग्निर्भवति परिवित्तिश्च जायते॥

इति छन्दोगपरिशिष्टवचनात् प्रथमं स्मार्त्ताधानम्। छन्दोगपरिशिष्टे,—

दाराधिगमनाधाने यः कुर्य्यादग्रजेऽनुजः।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः॥
देशान्तरस्थक्लीवैकवृषणानसहोदरान्।
वेश्यानिष्ठांश्च पतितान् शूद्रतुल्यातिरोगिणः॥
जड़मूकान्धवधिरकुब्जवामनकुष्ठकान्।
अतिवृद्धानभार्य्यांश्च कृषिसक्तान् नृपस्य च॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा।
कुलटोन्मत्तचौरांश्च परिविन्दन् न दुष्यति॥

एकवृषणान् एकस्यां स्त्रियां प्रसक्तान्। अभार्य्या यतिवनवासि-

नैष्ठिकाः। कुलटः परकुलाटनशीलः। कुष्ठकः कुष्ठी। सर्व्वक्रिया-स्खलन इत्यपरे। नृपस्य सक्तान् नृपसेवकान्। तथा धनवार्द्धुषिकं राजसेवकं कर्षकं तथा।

प्रोषितञ्च प्रतीक्षेत वर्षत्रयमपि त्वरन्।

तेन—

नाग्नयः परिविन्दन्ति न वेदा न तपांसि च।

इति जातिमात्रे यस्याग्निस्तत्परम्। तथा,—

योगशास्त्राभियुक्ते च न दोषः परिवेदने।

पारस्करः,—("आवसथ्याधानं) दारकाले"। "दायाद्यकाल एकेषाम्।" अभ्रातृकस्य दारकाले सभ्रातृकस्य दायाद्यकाल इति व्यवस्था। ज्येष्ठेऽनाहिताग्नौ कनिष्ठस्य दायाद्यकाल आगतेऽपि नाधानाधिकार इति। तदूर्द्ध्वमेव प्रायश्चित्तम्। यद्वा ज्येष्ठं [1]बोधयित्वा तदाधानं कारयित्वा स्वस्याधानकरणं शक्यमिति स्यादेव ततः प्रभृति प्रायश्चित्तम्। यथा निर्द्धनोऽपि धनमर्जयित्वा क्रतुसमर्थ इति तस्याधिकारः। प्रायश्चित्तञ्च,—

यावन्त्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः।
तावन्ति कृच्छ्राणि चरेत् हौम्यं दद्याद् यथाविधि॥

[2]हौम्यं द्रव्यं ब्राह्मणेभ्यो दद्यात्। अनाहिताग्नितायाः उपपातकमध्ये गणनात् तत्प्रायश्चित्तम्।

उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा।

---

(१) C. भोजयित्वा।
(२) C. हौम्यद्रव्यं ०।

इति। ज्येष्ठस्य तु विशेषः,—

कृतदारो गृहे ज्येष्ठो यो नादध्यादुपासनम्।

रुद्रायणं चरेद्‌ वर्षं प्रतिमासमहोऽपि वा॥

अत्र विवाहात् पूर्व्वं यदाधानविधानं ब्रह्मचर्य्यस्थस्य कन्यादानस्वीकारानन्तरं समावर्त्तनात् पूर्व्वमाधानम्। तत्कन्या[1]नाशे तेनैवाग्निना कन्यान्तरविवाहः। कन्याऽलाभे तस्यैवाग्नेरात्मारोपणं कृत्वा सन्न्यास इति कल्पः। सूत्रे,—"वैश्यस्य बहुपशो गृहादग्नि[2]माहृत्य" इति मुख्ययोनिमुक्त्वा "अरणिप्रदानमेके" इत्युक्तम्। तेन वाजसनेयिनां वैश्यगृहादानयनमेव [3]मुख्यकल्पः। छन्दोगपरिशिष्टोक्तम्—

पुण्यमेवादधीताग्निं स हि सर्व्वैः प्रशस्यते।

अनर्द्धकत्वं यत्तस्य काम्यैस्तन्नीयते शमम्॥

इत्यारणेयस्य पुण्यत्वं गोभिलीयानामेव। तत्र अनर्द्धकत्वं असमृद्धिकरत्वम्। [[4]तस्य अरणिभवस्याग्नेः काम्यैर्धनकामप्रयोगैः शमं नीयत इत्यर्थः।] गोभिलसूत्रे,—वैश्यकुलाद्वाम्बरीषाद्‌ वा" इत्यादिना अग्नियोनिकल्पानुक्त्वा "अपि वा (अन्यं) मथित्वाभ्यादध्यात् पुण्यस्त्वेवानर्द्धको भवति" इति आरणेयस्य [5]पुण्यत्वमेव वचनात्। तेन मुख्यवैश्यालाभेऽपि "व्यत्यये कर्म्मणां

(1) C. ० ऽलाभे ०।

(2) C. ० मानयेति।

(3) D. मुख्यः कल्पः।

(4) D. Omits the portion bracketed.

(5) D. पुण्यवचनात्।

साम्य" मिति वैश्यवृत्त्या जीवतां ब्राह्मणानां पञ्चमे सप्तमे वा पुरुषे वैश्यत्वप्राप्तेस्तत एवाहरणम्। छन्दोगपरिशिष्टे,—

अश्वत्थो यः शमीगर्भः प्रशस्तोर्व्वीसमुद्भवः।

तस्य या प्राङ्मुखी शाखा या चोदीच्यूर्द्ध्वगापि वा॥

अरणिस्तन्मयी प्रोक्ता तन्मयी चोत्तरारणिः।

संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते॥

अलाभे त्वशमीगर्भादा [1]हरेदविलम्बितः।

चतुर्विंशतिरङ्गुष्ठं दैर्घ्यं षड़पि विस्तरे॥

चत्वारि चोच्छ्रये मानमरण्योः परिकीर्त्तितम्॥

अष्टाङ्गुलः प्रमन्थः स्याच्चात्रं स्यात् द्वादशाङ्गुलम्।

ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम्॥

खादिरं चात्रमुद्दिष्टमोविली खादिरी स्मृता।

गोबालैः शणसंमिश्रैस्त्रिवृतत्वृत्तमनंशुकम्।

व्यामप्रमाणं नेत्रं स्यात् प्रमथ्यस्तेन पावकः॥

प्रथमस्तु प्रमन्थः स्यादैशान्यामुत्तरारणेः।

[2]चात्रबुध्ने प्रमन्थाग्रं गाढ़ं कृत्वा विचक्षणः।

कृत्वोदगग्रामरणिं तदूर्द्ध्वमुपरि न्यसेत्॥

चात्रोर्द्ध्वकीलकाग्रस्थामोविलीमुदगग्रगाम्।

विष्टभ्य धारयेद्‌ यन्त्रं निष्कम्पः प्रयतः शुचिः॥

(1) C. ० हरेति विचक्षणः।

(2) D. चात्रमध्ये ०। C. चात्रवेधे ०

अत्रारणे [1]रुत्तराग्रत्वमुक्तम्। यज्ञपार्श्वे तु,—

उत्ताना प्राक्शिरा वेदि र्यथा वेदि स्तथारणिः।

इति द्वयोर्विकल्पः। प्राक्शिरस्त्वं श्रौतविषयं वा।

[2]मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलम्।
अन्तरं देवयोनिः स्यात् तत्र मथ्यो हुताशनः॥
प्रथमे मन्थने ह्येष नियमो नेतरेषु च।
परिधायाहतं वासः प्रावृत्य च यथाविधि॥
विभृयात् प्राङ्मुखो यन्त्रं यजमानः समाहितः।
त्रिवृद्वेष्ट्याथ नेत्रेण चात्रं पत्न्यहतांशुका॥
पूर्व्वं मथेदरण्यन्ते प्राच्यग्नेः स्याद् यथा च्युतिः।

तथा—

हव्यवाड् वरुणं दृष्ट्वा भीतः [3]प्रत्यङ्मुखोऽभवत्।
तमिच्छन् पुनरादातुं तस्मात् प्रत्यङ्मुखो मथेत्॥

सर्व्वाः पत्न्यो रज्जुमालभन्ते समर्था चाग्निजन्मपर्य्यन्तं मथेदिति।

(१) D. ० रुत्तराग्रमुक्तम्।
(२) D. अग्रादष्टाङ्गुलं त्यक्त्वा मूलार्द्धन्तु दशाङ्गुलम्।
(३) D. प्रत्यङ्मुखो मथेत्।

स्मार्त्ताधानप्रयोगः।

गणपत्यादिपूजा। स्वस्तिवाचनम्। सङ्कल्पः,—मम नित्यनैमित्तिककर्म्मानुष्ठान[1]साधनमावसथ्याधानं करिष्ये। मातृपूजा। [[2]वसोर्द्धारा।] आभ्युदयिकम्। दम्पत्योरहतवस्त्रपरिधानम्। क्रियमाणेऽस्मिन्नावसथ्याधानकर्म्मणि यावन्तो वैकल्पिकाः पदार्थास्ते मया ऋत्विक्प्रत्ययेनानुष्ठेयाः। ब्रह्मवरणम्। गृह्याग्नये सार्द्धत्रयोदशाङ्गुष्ठमितरज्ज्वा मण्डलं कृत्वा तन्मध्ये खरकरणम्। चतुरङ्गुलचतुरङ्गुल[3] मेखलात्रयं त्र्यङ्गुलविस्तारम्। दम्पत्योरुपविष्टयोर्हस्ते [4]ब्रह्मणोऽरणिद्वयसमर्पणम्। दक्षिणे ब्रह्मण्युपविष्टे यथोक्तस्थानेऽरणिमुत्तराग्रां निवेश्य उत्तरारणेरीशानात् प्रमन्थमुद्धृत्य चात्रबुध्ने प्रमन्थाग्रं प्रवेश्य चात्रमूलमरणिं देवयोनौ निवेश्य चात्रोर्द्ध्वकीलके ओविलीमुदगग्रां विन्यस्य यजमानस्य प्राङ्मुखस्य हस्ताभ्यां विष्टभ्य धारणम्। पत्न्याः प्रत्यङ्मुखायाः गोवालरज्जुं चात्रे त्रिधा वेष्टयित्वा मन्थनम्। अन्यासामालम्भनम्। [5]समर्थायाश्चोत्पत्तिपर्य्यन्तं रज्जुकर्षणम्। जातेऽग्नौ खरमध्ये पञ्चभूसंस्कारः। खरे अग्निनिधानम्। वैश्यकुलादग्न्याहरणपक्षे

(१) D. साधनीभूत (ं) आवसथ्याधानमहं करिष्ये।
(२) D. Omits the portion bracketed.
(३) C. ० रङ्गुलम्।
(४) C. ब्रह्मणोररणिद्वय ०
(५) D. समर्थाया ग्नौत्पत्ति (अग्न्युत्पत्ति) पर्य्यन्तम् ०

अग्निमाहृत्य खरमध्ये पञ्चभूसंस्कारं कृत्वाऽग्निस्थापनम्। दक्षिणतो ब्रह्मोपवेशनम्। प्रणीताप्रणयनम्। परिस्तरणम्। पवित्रच्छेदनानि। पवित्रे। प्रोक्षणीपात्रम्। आज्यस्थाली। [[१]चरुस्थाली] सम्मार्जनकुशाः। उपयमनकुशाः। तिस्रः समिधः। स्रुवः। आज्यचरुतण्डुलाः। पूर्णपात्रो दक्षिणा वरो वा। पवित्रकरणम्। प्रोक्षणीसंस्कारः। क्रमेण पात्रप्रोक्षणम्। असञ्चरे प्रोक्षणीनिधानम्। आज्यस्थाल्यामाज्यनिर्वापः। [२]सप्रणीतोदकस्थाल्यां चरुतण्डुलप्रक्षेपः। आज्यस्य ब्रह्मणा चरोर्यजमानेन युगपदधिश्रयणम्। द्वयोः पर्य्यग्निकरणम्। अर्धश्रुतेः स्रुव[३]तपनम्। सम्मार्जनकुशैः स्रुव[४]सम्मार्गः। पुनः प्रतपनमुदकस्पर्शनम्। प्रणीतो[५]दकेन प्रोक्षणम्। आज्योद्वासनं [[६]चरोरुद्वासनम्।] आज्योत्पवनम्। [७]आज्यावेक्षणम्। उपयमनकुशानादाय समिधोऽभ्याधाय पर्य्युक्ष्य होमः। ब्रह्मान्वारब्धे प्रजापतये स्वाहा इन्द्राय स्वाहा अग्नये स्वाहा सोमाय स्वाहा इत्याघारावाज्यभागौ।

(१) C. Omits the portion bracketed.

(२) D. प्रणीतोदकयुक्तचरुस्थाल्यां चरु ०।

(३) D. ० प्रतपनम्।

(४) D. ० सम्मार्जनम्।

(५) D. ० दकेनाभ्युक्ष्य निधानम्। आज्योद् ०।

(६) D. Omits the portion bracketed.

(७) D. प्रोक्षण्युत्पवनम्। आज्यावेक्षणम्।

अथाष्टचरुहोमः।

[१]"त्वन्नो अग्ने" (इत्यादि) "प्रमुमुग्ध्यस्मत् स्वाहा।" इत्यन्तेन होमः। "सत्वन्नो अग्न" इत्यादि "सुहवो न एधि स्वाहा।" इति होमः। "इमम्मे वरुण" इत्यादि "स्युराचके स्वाहा।" इति होमः। इदं वरुणाय। "तत्वायामि" इत्यादि "आयुः प्रमोषीः स्वाहा"। इदं वरुणाय। "येते शत"मित्यादि "स्वर्काः स्वाहा[२]। इदं वरुणाय। इत्यादि। "अयाश्चाग्न" इत्यादि "भेषजं स्वाहा" इत्यन्तेन होमः। [[३]इदमग्नये।] "उदुत्तम"मित्यादि "स्याम [४]स्वाहा।" [[५]इदं वरुणाय।] "भवतन्नः" इत्यादि "शिवौ भव तमद्यनः [६]स्वाहा।" [[७]इदं जातवेदोभ्याम्।] अथ स्थालीपाकात्। अग्नये [८]पावकाय स्वाहा। अग्नये शुचये स्वाहा। अदित्यै स्वाहा। पुनरष्टर्चहोमः। "त्वन्नो अग्न" इत्यादि "भवतन्नः" इत्यन्तेन। स्विष्टकृते च। "अयास्यग्नेर्वषट्कृतं यत्कर्म्मणात्यरी-

(१) D. त्वन्नो अग्न इत्यादि सत्वं नो अग्न इत्यादि। इमम्मेवरुण इत्यादि। होमः। तत्वायामीत्यादि। येते शत मित्यादि ०

(२) D. स्वाहेत्यन्तेन होमः। अयाश्चाग्न ०

(३) D. Omits the portion bracketed.

(४) D. स्वाहेत्यन्तेन होमः।

(५) D. Omits the portion bracketed.

(६) D. स्वाहेति च होमः।

(७) D. Omits the portion bracketed.

(८) D. पवमानाय।

रिचं देवागातुविदः स्वाहा।" इदं देवेभ्यो गातुविद्भ्यः। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। त्वन्नो अग्ने। (सत्वन्नो अग्ने) अयाश्चाग्ने। येति शतम्। उदुत्तमम्। प्रजापतये स्वाहा। परिस्तरणवर्हिर्होमः। प्राशनम्। मार्जनम्। ब्रह्मणे पूर्णपात्रः। दक्षिणा वरो वा। छन्दोगपरिशिष्टोक्तं गोदानं वस्त्रद्वयदानञ्च वैकल्पिकम्। दम्पत्योरहतवस्त्राणि यानि तानि ब्रह्मणे देयानि। त्रयोविंशतिब्राह्मणभोजनम्। शान्तिकरणमच्छिद्रावधारणम्। पुराधाने मातृपूजाद्यभावः। पूर्व्वैव योनिः पूर्व्वाहुडिरिति छन्दोगपरिशिष्टवाक्यात् सैवारणिः नारण्यन्तरम्। अरणिदोष-नाशेत्वरण्यन्तरमर्थसिद्धम्। वैश्यकुलादाहरणमपि न निषिद्धम्। पूर्व्वैव योनिरित्यस्यारणिव्यक्तिनियमपरत्वात्। [1]यथा श्रौते यजमानदाहे ऽरणिप्रतिपत्तिदर्शनात् पुनराधाने सैवारणिः। अतएव

पुण्यमेवादधीताग्निं सहि सर्व्वैः प्रशस्यते।

इति। पूर्व्वैव योनिरित्यत्रारणेयनिर्द्देश आरणेयस्य पुण्यत्वेनोक्तः। अन्यथा योनिमात्रनियमपरत्वे तदसङ्गतिः। अत्र श्रौतोक्तानि पुनराधाननिमित्तानि प्रायेण। [2][अन्यत्र] वैश्यकुलादाहरणपक्षेऽग्निनाशे पुनर्वैश्यकुलादानीय खरे स्थापनम्। केवलं

(१) D. Reads here :—एवं प्रथमाधाने वैश्यकुलादाहरणे पुनराधानेऽरणिप्रदानपक्षो न वार्य्यते। पूर्व्वैव योनिरित्यस्यारणिव्यक्तिनियमपरत्वात्। श्रौते यजमान०

(२) D. Omits the portion bracketed.

ग्रामान्तरनयने प्रत्यक्षमेवाग्निर्नीयते। अनोऽभावेत्वतिसङ्कटे आत्मारोपणम्। स्थानान्तरे पुनर्वैश्यकुलादाहरणम्। अन्यथा तु पुनराधानमेव। होमद्वयलोपे दर्शपौर्णमासलोपे पुनराधानम्। इदञ्च मध्ये भोजने सति। यदा तु होमकाले होमाशक्तौ न भुंक्ते तदा यावद्दिनं होमपात्रस्तावद्दिनमभुक्त्वा न स्थित्वा तन्त्रेण सर्व्वहोमान् पक्षहोमवत् कुर्य्यात् न पुनराधानम्। इति। छन्दोगपरिशिष्टे। मथ्यमानस्याजन्मनि प्रातर्होमपर्य्यन्तं प्रतीक्षा तदूर्द्धं पुनराधानम्। अरणिनाशदोषे अग्नेररण्यन्तरे "अयन्ते योनि"रिति समारोपः। "उपावरोह" इति मन्थनम्। समारोपात् पूर्व्वं नाशे पुनराधानम्। अग्निं विहाय सभार्य्यस्य सीमातिक्रमे होमकालात्यये पुनराधानम्। अग्निं विना पत्न्याः समुद्रगानदीतरणे पुनराधानम्। पत्नीं विना अग्नीनां सीमान्तरनयनं शकटं विना प्रत्यक्षाग्निनयनं [1]स्वाम्यन्वारोहणं विना नदीतरणं सीमालङ्घनम्। मन्थनकाले [2]अरण्यामग्निनाशः। अहुतस्य प्रत्यक्षवह्नेर्वत्सरावस्थानम्। यजमानप्रवासे [3]अग्निः (अग्नेः) सीमान्तरनयनम्। अग्निं विहाय पत्न्याः प्रवासः। पक्षत्रयं निरन्तरं पक्षहोमः। [4]उदक्यायाः प्रवासः। उदक्यास्पर्शः। धूपाङ्गारादिभिरग्निनाशः। अवैधपावकः। विधिं विनाग्न्यु-

(२) D. स्वाम्यनारम्भणं।

(१) C. अरण्यामग्निनाशः।

(२) D. अग्ने (:)।

(३) D. उदक्यायां०

ह्वरणम् । पुनर्विवाहः । [१]अग्न्यनुगमे मन्थनमकृत्वा यजमानस्य सोमातिक्रमणम् । श्वशूकरोष्ट्रादिस्पर्शः । रेतोमूत्रपुरीषादिस्पर्शः । प्रत्यक्षे [२]समारोपिति (०तौ) चरणौ वा । एतानि पुनराधान निमित्तानि । छन्दोगपरिशिष्टे,—

यद्यग्निरग्निनान्येन संसृज्येताहितः क्वचित् ।
अग्नये विविचय इति जुहुयाद् वा घृताहुतिम् ॥
अग्नयेऽप्सुमत इति जुहुयाद् वैद्युतेन चेत् ।
अग्नये शुचये चैव जुहुयाच्चेन्धनाग्निना ॥
गृहदाहाग्निना यस्तु यष्टव्यः क्षामवान् द्विजैः ।
आहृतो यदि संसृज्येत् संसृष्टमुपशामयेत् ॥
असंसृष्टं जागरयेद् गिरिशर्म्मैवमुक्तवान् ।

आहृतः पाकार्थं पृथक्कृत्य नीतः ।

यस्याग्नावन्यहोमः स्यात् स वैश्वानरदैवतम् ।
चरुं निर्वर्त्त्य जुहुयात् सैव तत्र विनिष्कृतिः ॥

अत्र श्रौते यत्रेष्टिर्विहिता तत्र स्मार्त्ते चरुः । यथानिष्ट्वा नवयज्ञे नवान्नाशने पतितप्रतिग्रहेऽभोज्यभोजने वैश्वानरीति । स्वजन-मरणे पथिकृत् । तथाच गृह्यपरिशिष्टम्,—"य एवाहिताग्नेः पुरोडाशास्तएव नाहिताग्नेश्चरवः" इति ।

---

(१) D. अग्न्यनुगमने ०

(२) D. समारोपितरणौ वा ।

अथ श्रौताधानम् ।

जातपुत्रः कृष्णकेशोऽग्नावदधीत इति पुत्रजन्म यद्याप्याधान-निमित्तत्वेन श्रुतं तथापि पूर्व्वेण धर्म्ममन्विच्छेदिति स्मृत्यन्तरा-ज्जातपुत्रपदेन पुत्रजननयोग्ययुवावस्था लक्ष्यते । कृष्णकेशपदेन वार्द्धक्यव्यावृत्तिः । अथवा गृह्यशालिनो जातपुत्राधानं कुर्य्युः । सम्वत्सराद्वा शुश्रूषावानीति पुत्रजन्मानन्तरं वा गृह्याधानानन्तरं वर्षान्ते वा कार्य्यम् । दारकाले विहितगृह्याधानानन्तरं पुत्रजननयोग्ययौवनावस्थालाभात् । गृह्याधानानन्तरं वर्षान्ते वेत्युक्तम् ।

प्राक्सौमिकीः क्रियाः कुर्य्याद् यस्यान्नं वार्षिकं भवेत् ।

इति काम्येष्टिपशुबन्धपरम् ।

वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः ।
इष्टीः पार्व्वायनान्तीयाः केवला निर्वपेत् सदा ॥

इति शिलोञ्छवृत्तेर्मनुना नित्येष्टिपशुहोमादि (०होमादयो)-दर्शिताः । यथा "वसन्ते वसन्ते ज्योतिषा यजेत" इति श्रुतेः ।

त्रैवार्षिकाधिकान्नो यः स हि सोमं पिवेत् द्विजः ।

इति काम्यसोमपरम् । एवं यथोक्तकाले श्रौताधानासम्भवे नाहि-ता(ग्नौ)ना(म्) उपपातकप्रायश्चित्तिः । बहुकालातिक्रमे

कालेत्वाधाय कर्म्माणि कुर्य्याद् विप्रो ह्यनापदि ।
तदकुर्व्वंस्त्रिरात्रेण मासि मासि विशुद्ध्यति ॥

तत्राधानप्रायश्चित्तविशेषानाम्नानादनादिष्टप्रायश्चित्तस्याहवनीयादिसाध्यतदुत्पत्तेः पूर्व्वमशक्यत्वात्

यदैतदन्यथा जातं तदारभ्य समापयेत्।

इति नित्यावैगुण्ये पदार्थावृत्तिः। पदार्थाश्च अग्न्यागारकरणं क्षौमपरिधानं इत्यादिरूपम्। यस्मिन् पदार्थे भ्रंशस्तारभ्यावृत्तिः। तेन "ऋतुनक्षत्रसम्भारसामवपनचातुष्प्राश्यजागरणेध्मपूर्व्वाधान्वारम्भणसार्पराज्ञीर्नवा कुर्य्यात्।" इति येषां विकल्पस्तत्परिहारेणानुष्ठानन्यायः। तथा वपनहविष्यविकल्पश्रुतेस्तत्परिहारः। अमावास्याकालोवा वैकल्पिक इति कर्कादयः। एतत्पदार्थापरिहारेणानुष्ठानेऽपि यदा वैगुण्यं विष्णुस्मरणमेव प्रायश्चित्तम्।

अत्र क्षौम अतसीप्रभवस्तस्य श्रौतत्वेऽपि कार्य्यांशेनानुष्ठानं याज्ञिकानाम्। नित्यकर्म्मसु यथाशक्तीत्युपबन्धात्। मनुः,—

प्रजापत्यमदत्वाश्वमग्न्याधेयस्य दक्षिणाम्।

अनाहिताग्निर्भवति ब्राह्मणो विभवे सति॥

इत्यश्वदक्षिणा ऋत्विग्भ्यः। यद्यपि मानवे,—

रथं हरेदथाध्वर्य्युर्ब्रह्माधाने च वर्जनम्।

इति वाजिनो ब्रह्मदक्षिणासम्बन्ध उक्तस्तथापि केषाञ्चित् शाखिनामिति तट्टीकाकाङ्क्षिर्व्याख्यानात् प्राजापत्याश्वमृत्विग्भ्यो दद्यादितियाज्ञिकसम्प्रदायः। अरणिस्वरूपं मन्थनयन्त्रं मन्थनप्रकारश्च छन्दोगपरिशिष्टोक्त एव स्मार्त्तवत् श्रौतेऽपि।

अत्र,—

अरत्निश्चतुरस्रश्च पूर्व्वस्याग्नेः खरो भवेत्।

रथचक्राकृतिः पश्चाच्चन्द्रार्द्ध इव दक्षिणः॥

सभ्यावसथ्ययोः स्थानं नर्य्येणैव प्रकीर्त्तितम्।

अग्नीनान्तु खरः कार्य्यो मेखलात्रयसंयुतः॥

वितस्तिमात्रमुच्छ्रायो विस्तारेण तु त्र्यङ्गुलः।

सार्द्धत्रयोदशाङ्गुष्ठरज्ज्वा नर्य्येच मण्डलम्॥

गार्हपत्यायतनादष्टदिक्षु प्रक्रमेषु च।

एकादशद्वादशसु मत्वावाहवनीयकः॥

अथ तत्स्थानं मध्यं कृत्वा तत्परितः शंस्यखरकरणम्।

चतुर्विंशाङ्गुलमानरज्जुः पाशैकसंयुता।

तावानेवागमस्तस्याः परान्ते (?) पाशसंयुतः॥

आगमार्द्धेच तन्मूले तयोर्मध्येच लक्षणम्।

धृत्वागमचतुर्भागं लक्षणं दक्षिणानयेत्॥

एवमुत्तरतः पश्चात् पूर्व्ववत् परिकल्पयेत्।

तदन्तान्तरतो भित्तीर्निदध्यात् पूर्व्ववत् समाः॥

इत्थमाहवनीयस्य चतुरस्रः खरो भवेत्।

नर्य्यशंस्यान्तरालन्तु षोढ़ा वा सप्तधा त्रिधा॥

चतुर्द्धा पञ्चधा वापि विभज्य गन्तुना समम्।

त्रेधा विभज्योभयतः पाशरज्जुं विधाय च॥

नर्य्यशंस्यस्थानमङ्क्त्र रज्जुपाशौ प्रमुच्य तु।

धृत्वापरवितृतीयलक्षणं दक्षिणा नयेत्॥

लक्षणो वितृतीयान्त्यमध्यमुत्तरतो भवेत्।
सयवैः षड्भी रज्जुश्च मण्डले त्र्यङ्गुलाधिका ॥
चतुर्भिः सयवै स्त्रिंशत् हरेन्मण्डलमध्यतः।
द्वात्रिंशदङ्गुला ज्येष्ठा विस्तारस्त्वेकविंशतिः ॥

गणपत्यादिपूजा। स्वस्तिवाचनम्। श्रोमद्यारभ्याद्यं श्रावाभ्यां(?) अग्न्याधेयं करिष्ये इति संकल्पः। मातृपूजा। वसोर्द्धारा। आभ्युदयिकं कृत्वा अग्न्याधेये कर्म्मणि यावन्तो वैकल्पिकाः पदार्थास्ते मया ऋत्विक्प्रत्ययेनानुष्ठेयाः। अग्न्याधेये कर्म्मणि त्वं ब्रह्मा भवेति ब्रह्मवरणम्। होत्रध्वर्य्वोरग्नीनाञ्च दक्षिणे ब्रह्मण्युपविष्टे त्रिभिर्ऋत्विग्भिरग्न्यागारकरणम्। प्रागवंशं पूर्व्वगृहम्। उदग्वंशं पश्चिमगृहम्। दक्षिणे पूर्व्वे परे पश्चिमगृहमध्ये यथोक्तरूपेण नयंखरकरणम्। यथोक्ताधाने पूर्व्वगृहे शंस्यखरकरणम्। पश्चिमगृह एव दक्षिणाग्निखरः। व्याख्यानाध्यापनोपस्थाने सभ्यखरः। दम्पत्योरतसीप्रभवाहतवस्त्रद्वयद्वयपरिधानम्। विष्णुस्मरणम्। गार्हपत्यागारे पञ्चधा संस्कृत्यारणिभ्यां निर्म्मथ्याग्निस्थापनम्। दम्पत्योर्दिवाशनम्। उपास्तमयं गृहाद्वहिरुपलिप्ते दक्षिणतो ब्रह्मण्युपविष्टे यजमानस्य पत्न्या सहोपविष्टस्य जपः। "देवाः पितरः पितरो देवा योऽहमस्मि स सन्यजे यस्याहमस्मि न तमन्तरयामि स्वं म इष्टं स्वं श्रान्तं स्वं हुतमस्त्विति।" दम्पत्योरग्न्यागारे प्रवेशः। पूर्व्वेण द्वारेण यजमानस्य दक्षिणेन पत्न्याः। अग्नेः पश्चाद् द्वयोरुपवेशनम्। दक्षिणतः पत्नी। ब्रह्मणि दक्षिणत उपविष्टे दम्पत्योर्हस्ते अध्वर्य्योः सम्पूज्य अरणिद्वयदानम्।

अस्तमिते गृहे चेदग्नो नास्ति परस्मादानीय अग्न्यागारे बन्धनम्। शकलैर्वा सकलगोमयपिण्डैर्वा प्रयतेनाग्निरक्षणम्। उपासितस्याग्नेः शमनम्। "वाचं यच्छा पूर्णाहुते"रिति शेषः। नयंखरेऽध्वर्य्योः पञ्च भूसंस्कारः। अश्वमानयेति प्रैषोऽग्नीधोऽश्वनयनम्। अश्वाभावे प्रैषं विनानभिधानात्। आनयनम्। पुरस्तात् स्थितेऽश्वेऽनडुहि वा पुरस्तात्स्थिते। नयंखरस्य पश्चादनुदिते सूर्य्येऽग्निमन्थनम्। उदिते वा। यजमानस्य दण्डधारणम्। अध्वर्य्योर्मन्थनं प्रत्यङ्मुखस्य। अग्नौ जाते वरदानमध्वर्य्यवे। मनसा सङ्कल्प्य पश्चाद्दानम्। "प्राणममृते दधे" इति यजमानस्य मुखवायुनाग्निसंधुक्षणम्। "अमृतं प्राण आदधे" इति यजमानमुखेनाग्निसंसृष्टवायुपानम्। दारुभिरग्निज्वालनम्। येषां प्रवरे गोत्रे वा अङ्गिरा ऋषिस्तेषां "भूर्भुवरङ्गिरसां त्वा देवानां व्रतपते व्रतेनादधे।" इति मन्त्रेण ज्वलतोऽग्नेर्गार्हपत्यस्य खरे स्थापनम्। येषां भृगू ऋषिः प्रवरे गोत्रे वा तेषां "भूर्भुवः भृगूणां त्वा देवानां व्रतपते व्रतेनादधे।" इति मन्त्रः। भार्गवाङ्गिरव्यतिरिक्तानां "आदित्यानां त्वा देवानां व्रतपते व्रतेनादधे" इति गार्हपत्याधानमन्त्रः। सूर्य्योदये अग्रे मृत्तिकाकलशत्रये उपयम्य त्रिः सन्नद्धस्य द्वात्रिंशदिध्मकाष्ठस्य परिधिवृक्षसम्बन्धिनो मूलस्य गार्हपत्येऽधिश्रयणम्। अश्वस्यानडुहो वा पुरस्तादग्निकरणम्। ज्वलदिध्मस्याध्वना प्राक् नयनम्। यजमानस्य धूमाभिमुखस्य प्राग्गमनम्! अश्वमनड्वाहं वाध्वर्य्युर्दक्षिणपूर्व्वपादेनाहवनीयस्थानमधिष्ठाप्य अग्निस्थापनस्योत्तरेण प्राचीं नीत्वा

अग्निस्थापनं प्रदक्षिणमावर्त्त्य पूर्व्वस्यां दिशि स्थापयति। इत्थाग्निनाऽश्वपदोपलक्षिताग्निस्थापनं द्विः त्रिः सकृद्वोपस्पृश्यानुपस्पृश्य वाग्निस्थापनम्। तत्र मन्त्रः,—"भूर्भुवः अङ्गिरसां त्वा देवानां व्रतपते व्रतेनादध" इत्यङ्गिरसाम्। "भूर्भुवः भृगूणां त्वा देवाना"मित्यादि भृगूणाम्। "भूर्भुवः आदित्यानां त्वा देवाना"मित्याद्यन्येषाम्। गार्हपत्यदक्षिणाग्न्योः स्थापनम्। सभ्यवरे पञ्च भूसंस्काराः। निर्मथ्य व्याख्यानाध्यापनस्थाने सभ्य स्थापनम्। "गां दीव्यध्व"मिति यजमानस्य प्रैषः। ऋत्विजां समीपे देवनम्। आहवनीयदक्षिणाग्निगार्हपत्यानां प्रदक्षिणकरणम्। अश्वस्यानडुहो वा उत्तरस्यामुत्सर्गः।

अथ पूर्णाहुतिः।

आज्यस्थाली। कुशाः। खादिरः स्रुवः। वैकङ्कती स्रुक्। एका समित्। आज्यम्। आज्यस्थाल्यामाज्यनिर्वापः। गार्हपत्ये तस्याधिश्रयणम्। कुशैः स्रुवस्रुक्सम्मार्गः। आज्यमुद्वास्य कुशैरुत्पवनम्। अवेक्षणम्। स्रुक्पूरणग्रहणम्। यजमानेऽन्वारब्धे स्वाहेति होमः। इदमग्नये। "अन्नादं एतं जनयत्यात्मनो यदग्निं तस्मा एतदन्नमपिदधाति" इति तस्मै चतुर्थ्याग्नि-

देवताप्रतीतिः। नचाधाराग्निस्तुतिरपेक्षत (?) देवताविधिसम्भवे त्यागायोगात्। शाखान्तरे चाग्नेरेव देवतात्वश्रुतिः। अन्यथानुद्वृतास्तमयाहुतिर्द्धर्म्मस्येत्यतिदेशः। विश्वेदेवा देवताःस्युः प्रजापतिश्च तूष्णीमिति विधौ देवता न चेह तूष्णीमिति विधिः।

तदेतदग्निमीमांसायामस्मद्वृद्धप्रपितामहनरसिंहवाजपेयिभिरतिप्रपञ्चितम्। पूर्णाहुतौ हुतायामृत्विग्भ्यो वरं ददामीति वरदानं वाग्विसर्जनं तूष्णीमग्निहोत्रहोमः। प्राक् संस्थं धारापर्य्युक्षणं समिदाधानञ्च। चतुर्गृहीतमेकं गृहीत्वा पात्रान्तरे स्थापनन्। इदमग्नये। पुनश्चतुर्गृहीतं गृहीत्वा होमः इदं सूर्य्याय। शेष द्वयं समस्य कूर्चे निधाय गार्हपत्यमवेक्ष्य द्वितीयाहुतिः इदं प्रजापतये। गार्हपत्यदक्षिणाग्न्योर्द्वे द्वे आहुती। यथादैवतं त्यागः। नानाग्न्युपस्थापनम्। ब्रह्मादयो ऋत्विजः। अयं प्राजापत्योऽश्वो मया दत्त दक्षिणात्वेन प्रतिगृह्यताम्। दम्पत्योर्वस्त्राणि यानि तान्यध्वर्य्यवे। अग्न्याधेयकर्म्मणोऽङ्गतया एकोत्तरशतब्राह्मणभोजनं ददानि। शान्तिकरणमच्छिद्रावधारणम्।

"ब्रह्मचार्य्यग्निनित्यधारी क्षीरहोम्यग्निमुपशायी द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः।" यावज्जीवञ्चाहिताग्निव्रतम्। अनृतवर्जनम्। तदपचारे श्रौतं प्रायश्चित्तम्। स्नातकधर्म्मत्वञ्च स्मार्त्तमपि प्रायश्चित्तम्। अतिथ्यपनोदः। अतिथिनिराकरणम्। तद्वर्जनम्। तस्य गृहस्थधर्म्मत्वेऽपि श्रौतप्रायश्चित्तार्थमाहिताग्नि धर्म्मत्वम्। दुर्गन्धिदारुणः। दुर्गन्धिदारुणो वक्षावाधानम्।

ऋत्वीषपक्वं भूम्यां गर्त्ते पक्वं तिन्दुकफलादि तद्वर्जनम् । अग्नि-होत्रार्थमुद्धृतेऽग्नौवुदकादिदानवर्जनञ्च ।

एवमाहिताग्निमधिकृत्य "यावज्जीवमग्निहोत्रं जुहुयात् ।" "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत ।" "षट्सु षट्सु पशु-बन्धयाजी ।" "तं वै संवत्सरो नानीजानमतीयात् ।" इति वचनाद् वर्षाख्येको वा पशुबन्धः । "शरद्वसन्तयोराग्रयणम् ।" "वर्षासु सौम्यः श्यामाकचरुः ।" "अनिष्टानवयज्ञेन नवान्नखरे वैश्वानरीष्टिः ।" "चतुर्षु चतुर्षु मासेषु चातुर्म्मास्ययाजी ।" "वसन्ते वसन्ते ज्योतिषा यजेत ।" इत्यादयो नित्ययज्ञाः ।

याज्ञवल्क्यः,—

प्रति संवत्सरं सोमः पशुः प्रत्ययनं तथा ।
कर्त्तव्याग्रयणेष्टिश्च चातुर्म्मास्यानि चैव हि ॥
एषामसम्भवे कुर्य्यादिष्टिं वैश्वानरीं द्विजः ।

द्वौ वा तत्रापि प्रायश्चित्तम् । मुख्यकाले यथाकथञ्चित्-करणसम्भवेन वैश्वानरीति । सर्व्वथाप्यसम्भवे गौणकालेप्यकरणे वैश्वानरी । अतएव विधिरप्येकदेशे स्यादितिहवनाङ्गमात्र-निर्व्वाहकव्रीहिलाभेऽपियागानुष्ठानमुक्तम् । तथा बौधायनेन दर्शपौर्णमासयोश्चत्वार ऋत्विजस्तेषामेकस्मिन्नविद्यमाने सर्व्व-प्रायश्चित्तं कृत्वा त्रयः प्रचरेयुः । द्वौ तत्रापि प्रायश्चित्तमिति-ऋत्विगभावे मुख्यकाले करणं दर्शितम् । सर्व्वप्रायश्चित्तञ्च बौधायन एवाह यद्येकोऽध्वर्य्युरेव स्यात् पुराप्रयाजेभ्य आज्य-स्थाल्याः स्रुवेणोपहातमेवाध्वर्य्युः प्रायश्चित्तानि जुहोति "जुष्टो वाचे

BIBLIOTHECA INDICA:


A

Collection Of Oriental Works

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1111.



नित्याचारप्रदीपः ।

NITYĀCĀRAPRADĪPAḤ.

BY

NARASIMHA VĀJAPEYĪ.

EDITED BY

PAṆDITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

FASCICULUS VI.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTTI, AT THE SANSKRIT PRESS.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREE.

1905.

Pariçiṣta Parvau, (Text) Fasc. 1--5 @ /6/ each ... ... Rs.	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /6/ each	2	10
Prithivirāj Rāsa. (Text) Part II, Fasc. 1--5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Lakṣaṇam (Text) Fasc. 1.	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1--3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5--10 ; II, 1--6 ; III, 1--7 ; IV, 1--6 ; V, 1-8, @ /6/ each Fasc.	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each	1	8
Ditto (English) Fasc. 1-3 @ /12/ each	2	4
Suddhikaumudī, (Text) Fasc 1 @	12	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/ each	0	12
Sraddha kriyā kaumudī. Fasc. 1-5 @ /6/	1	14
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each	1	2
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	7	2
Tantravarteka (English) Fasc. 1	0	12
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1--12 @ /6/ each	14	10
Tattvarthadhigama Sutram Fasc. 1-2	0	12
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/	1	2
Tul'si Sat'sai, (Text) Fasc. 1--5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each ...	2	4
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ /12/	4	8
Vallāla Caritam Fasc 1-- Text only)	0	8
Varāha Purāṇa, (Text) Fasc. 1--14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc 1--5 @ /6/ each	1	14
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--7, @ /6/ each	4	8
Vidhan Parijata, Fasc. 1--5	1	14
Viṣṇu Smṛti, (Text) Fasc 1--2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1--7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1--6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1--6	2	4
Tibetan Series.		
Pag-Sam Ṭhi S'iñ, Fasc. 1--4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1--5 ; Vol. II, Fasc. 1--3 ; Vol. III, Fasc. 1--6, @ 1/ each	14	0
Rtogs *brjod d*pag *h*khri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1--5 ; Vol. II. Fasc. 1--5 @ 1/ each	10	0
Arabic and Persian Series.		
Ālamgirnāmah, with Index, (Text) Fasc. 1--13 @ /6/ each	4	14
Al-Muqaddasi (English) Vol. I, Fasc 1--3 @ /12/	2	4
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, Fasc. 1--5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1--37 @ 1/ each	37	0
Ditto (English) Fasc. 1--8 @ Vol. II, Fasc. I-1/ each ...	9	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1--19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1--21 @ 1/ each	21	0
Farhang-i-Rashīdi, (Text) Fasc. 1--14 @ 1/ each	14	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1--4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1--9 @ /6/ each	3	6
Ditto of Āzādi, (Text) Fasc. 1--4 @ /6/ each	1	8
Haft Asmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1--6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1--3 @ /6/ each	1	2
Iṣābah with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. III, Fasc. 11-12 ; Index to Vol. II, Fasc. 10-12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1--5 @ /6/ each	1	14

*The other Fasciculi of these works are out of stock, and complete ies cannot be supplied.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,

15, Piccadilly, London. W., and Mr. Otto

HARRASSOWITZ, BOOKS'LLER, LEIPZIG, GERMANY.

*Complete copies of those works [illegible] an asterisk * cannot be supplied.—some of [illegible] being out of stock.*

[illegible] CA INDICA.

[illegible]skrit Series

Advaita Brahma S[illegible] (Text) F[illegible] 1-4 @ /6/ each ... Rs. 1 8
Advaitachinta Kau[illegible]e, Fasc. [illegible]2 ... ... 0 12
*Agni Purāṇa, (Text) Fasc 4-14 @ /6/ each 4 2
Aitarēya Brāhmaṇa. Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III. Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6/ 7 8
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each 1 14
Aphorisms of Sāṇḍilya, (English) Fasc. 1 ... ... 0 12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ... 2 4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each 1 14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each 10 0
Bal Bhatta Fasc. 1 @ /6/ each 0 6
Bandhaya Panta Sutram Fasc. 1 @ /6/ each 0 6
*Bhāmatī, (Text) Fasc 4-8 @ /6/ each 1 14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-4 ... ... 1 8
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each 1 8
Bṛhaddharma Purāṇa (Text) Fasc 1-6 @ /6/ each 2 4
Bodhicaryavatara of Cantidevi, Fasc. 1 ... ... 0 6
Catadusani Fasc 1 ... ... 0 6
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ... 8 0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-3 ... 3 12
Çatasāhasrikā Prajnāpāramitā (Text) Part, I. Fasc. 1-7 @ /6/ each ... 2 10
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II. Fasc. 1-10. @ /6/ each; Vol. IV. Fasc. II 22 0
Çlockavartika, (English) Fasc. 1-4 ... ... 3 0
Srāddha Kriyā Kaumudī (Text Fasc 1-6 @ /6/ each 2 4
*Çrauta Sūtra of Āpastamba. (Text) Fasc. 4-16 @ /6/ each 4 14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each 5 10
Crī Bhāshyam, (Text Fasc 1-3 @ /6/ each 1 2
Dana kriyā kaumudī, Fasc 1-2 @ /6/ 0 12
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-6... ... ... 2 4
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each 1 8
Kāla Viveka, Fasc. 1-6 ... ... 2 4
Kātantra, (Text) Fasc 1-6 @ /12/ each 4 8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each 10 8
Kūrma Purāṇa, (Text) Fasc 1-9 @ /6/ each 3 6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each... ... ... 2 4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each 4 2
Mahā-bhāṣya-pradipōdyōta, (Text) Vol. I, Fasc. 1-9 II, Fasc. 1-10 @ /6/ each 7 2
Manutīkā Sangraha, (Text) Fasc. 1-3 @ /6/ each 1 2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-7 @ /12 each 5 4
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each 4 14
Nārada Smṛti, (Text) Fasc 1-3 @ /6/ 1 2
Nyāyavārtika, (Text) Fasc. 1-4 @ /6/ 1 8
*Nirukta, (Text) Vol. III. Fasc. 1-6 Vol. IV, Fasc. 1-8 @ /6/ each ... 5 4
Nityācāra Paddhatiḥ (Text) Fasc. 1-7 ... ... 2 10
Nityācārapradīpaḥ (Text) Fasc. 1-6 ... ... 2 4
Nyayabinduṭīkā, (Text) 0 10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-3 @ /6/ each 3 6
Padumawati Fasc. 1-3 @ 2/ 6 0

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1-15 @ /6/ each ... Rs. 5 10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and Index; Vol. III, Fasc 1 @ /12/ each 12 0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each 7 2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc 1-6 @ /6/ each 2 4
Nukhbatu-l-Fikr, (Text) Fasc. 1 ... ... 0 6
Niẓāmī's Khiradnāmah-i-Iskandarī, (Text) Fasc. 1-2 @ /12/ each ... 1 8
Riyāẓu-s-Salātīn, (Text) Fasc 1-5 @ /6/ each 1 14
Ditto (English) Fasc. 1-3 .. .. 2 4
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1-5 @ /6/ each 1 14
Ditto (English) Fasc. 1-14 @ /12/ each 10 8
Ditto Index 1 0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1-7 @ /6/ each ... 2 10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif. (Text) Fasc. 1-6 @ /6/ each ... 2 4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each 3 0
Wis-o-Rāmīn, (Text) Fasc. 1-5 @ /6/ each 1 14
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /6/ each ... 6 6
Tuzuk-i-Jahāngīrī, (Eng) Fasc. 1 ... ... 0 12

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each 50 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.
3. JOURNAL of the Assiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1170 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8) 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
   A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) 4 0
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) 2 0
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) 4 0
   Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882) 4 0
   ... 3 0
5. Anīs-ul-Musharraḥīn 3 0
6. Catalogue of Fossil Vertebrata 3 8
   Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion
8. Ināyah, a Commentary on the Hidāyah, Vols. II, and IV, @ 16/ each... 32 0
9. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ... 2 0
10. Khizānatu-l-'ilm 4 0
11. Mahābhārata, Vols. III and IV, @ 20/ each 40 0
12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each 18 0
    ... 4 0
13. Sharaya-ool-Islām 10 0
14. Tibetan Dictionary, by Csoma de Körös 8 0
15. Ditto Grammar " " 3 0
16. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ ... ...
17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson 1 0
18. Memoir on maps illustrating the Ancient Geography of Kasmir by M. A. Stein PH.D., Jl. Extra No. 2 of 1899 ... ... 4 0

Notices of Sanskrit Manuscripts, Fasc. 1-29 @ 1/ each 29 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

6-4-05.

Books are supplied by V.P.P

भूयासं जुष्टो वाचस्पतये देवि वाग्यत्ते वाचो मधुमत्तमं जुष्टतमं तस्मिन् मा धाः स्वाहा सरस्वत्यैः ।”

त्रातारमिन्द्रमवित [illegible]रमि द्रं

हवेहवे सुहवं शू[illegible]

ह्वयामि शक्रं पु[illegible]

स्वस्तिनो म[illegible] धा[illegible] न्द्रः ॥ [illegible] ॥

यन्मे मनसि स्थितं[1] यद्वाचो यच्च मे हृदः ।

देवास्तत् शमयन्तु सर्व्वं सोमो बृहस्पतिश्च ॥ स्वाहा[2] ॥

अग्निर्मातस्मादेनसः [3]श्रद्धां देवा (?) विमुञ्चताम् । स्वाहा ॥

“यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जहिंसिम । अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरितानि चक्रम (?) करोतु मामनेनसं स्वाहा ।” ब्रह्मत्वे हौत्र आध्वर्य्यवे आग्नीध्ये चैक एव यज्ञपर्व्वाणि। तन्मे देवा रक्षन्तां प्राणान्मे मा हिंसिष्ठ स्वाहा। अहं ब्रह्मा त्वं (अहं) होता अहमध्वर्य्यु रहमग्नीदहं यजमान एक एव यज्ञपर्व्वाणि तन्मे देवा रक्षन्तां प्राणान् मे मा हिंसिष्ट स्वाहा। एतान्येव प्रायश्चित्तानि हुत्वान्तर्वेद्यामासीनः सर्व्वा देवता यजतीति विज्ञायते। यजमान एव वा कुर्य्यात् तदा नैमित्तिकमाध्वर्य्यवप्रायश्चित्तानि सर्व्वप्रायश्चित्तं वा कृत्वा स्वयमेवार्त्त्विज्यं याजमानं कुर्य्यादिति। एवं लाटसूत्रे नित्यसोमयागे ऋत्विगसम्भवे स्वयमौद्गात्रं ब्रह्मत्वञ्च कुर्य्यादित्युक्तमिति। इत्याधानम्।

---

(१) F. छिद्रम् । (२) E. Adds यद्विद्वांसो मुख्याः कुर्व्वन्नृत्विजः ।

(३) Y. श्रद्धादेवी ०

अथ पुनराधेयम् ।

त्रिरात्रावरमग्न्युत्सर्गः । शाखान्तरात् संवत्सरपर्य्यन्तमिति । संवत्सरादतिरिक्तमध्ये यथेच्छम् । सभ्यस्य नोत्सर्गः । सर्व्वमग्न्याधेयवत् । नाग्न्यगारकरणम् । नारणिप्रदानम् । उच्छ्वासश्च न भवति । कुशैर्ज्ज्वलन आधानम् । कुशैरेवोद्धरणम् । ब्रह्मचर्य्यक्षीरहोमाग्निनित्यधारित्वादिनियमाभावः । आधानमेव पुनः क्रियते चेत् तदा अग्न्यागारकरणारणिप्रदानमुच्छ्वासश्च न भवति । अरण्यभावे तु नूतनारणिमादायाधानेऽरणिप्रदानमपि भवति । अग्न्यागारस्य दैवान्नाशेऽग्न्यागारकरणमपि ।

आहिताग्नेः प्रवासविधिः ।

स्वयमुद्धरणम् । "नर्य्य प्रजां मे पाही"ति गार्हपत्योपस्थानम् । "शंस्य पशून् मे पाही"त्याहवनीयस्य । "अथर्य्य पितुं मे पाही"ति दक्षिणाग्नेः । उपस्थाय गमनं वाग्विसर्जनम् । प्रवासे यथाकालं याजमानम् । अग्निहोत्रहोमे अभक्षणम् । देवतोद्देशेन द्रव्यत्यागः । मन्त्रेणाग्न्युपस्थानम् । प्रवसनकाले विहाराभिमुखोऽग्न्युपस्थानमक्षानुक्षरेदित्यापस्तम्बवचनात् । पुनरभ्युक्षणम् । दर्शपौर्णमासयोः उद्धरणादिसर्व्वपदार्थानुसन्धानम् । व्रतग्रहणं प्राङ्मुखस्य । प्रयाजानुमन्त्रणम् । देवता उद्दिश्य द्रव्यत्यागः । "समिद्दसी"ति जपः । पूर्णपात्रग्रहणम् । [[1]विष्णुक्रमणम्] प्राग्वीक्ष-

(1) D. Omits the portion bracketed.

णम् । [[1]सूर्य्यावेक्षणम् ।] दक्षिणावर्त्तनम् । प्रागगमनम् । पुत्रनामग्रहणम् । व्रतविसर्गः । एवं चातुर्म्मास्येष्टिदैवादसन्निधाने बोध्यम् । न काम्येषु । दैवात् प्रवासोपस्थानमकृत्वा गमने "इहैव सन् तत्र सन्तं त्वाग्ने हृदा वाचा मनसा वा बिभर्म्मि । तिरो मा सन्तं मा प्रहासीर्ज्योतिषा त्वा वैश्वानरेणोपतिष्ठते ।" इत्याश्वलायनोक्तमुपस्थानं कृत्वा याजमानं यथोक्तम् । प्रवेशविधिः । "मत्या वाग्यमनम् ।" समित्पाणिर्गुरुदेवतादिसन्निधिमप्यगत्वाग्न्यागारे प्रविश्य उद्धृत्याहवनीयोपस्थानम् । "आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् । अग्ने सम्राड़भिद्युम्नमभिसह आयच्छस्व ।" गार्हपत्योपस्थापनम् । "अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः । अग्ने गृहपतेऽभिद्युम्नमभिसह आयच्छस्व ।" दक्षिणाग्न्युपस्थापनम् । शाखान्तरीयमन्त्रेण "अयमग्निः पुरिष्यो रयिमान् पुष्टिवर्द्धनः । अग्ने पुरीष्याभिद्युम्नमभिसह आयच्छस्व ।" तत्र उपविश्याहवनीये समिधमाधाय तृणं प्रज्वाल्य तत्रैव प्रक्षेपः । एवं गार्हपत्ये दक्षिणाग्नौ च । तूष्णीं गार्हपत्यमुपस्थाय शंस्योपस्थानं ततो दक्षिणाग्न्युपस्थानम् । अग्न्यगारान्निष्क्राम्य स्वगृहोपस्थानम् । "गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि । ऊर्जं बिभ्रद् वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ॥ येषामध्येति प्रवसन् येषु सौमनसो बहुः । गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥ उपहूता इह गाव उपहूता अजावयः ।

(1) Y. Omits the portion bracketed.

अथो अन्नस्य कीलाल उपहूतो गृहेषु नः।" ततो गृहप्रवेशः। अत्र मन्त्रः—"क्षेमाय वः शान्त्यै प्रपद्ये शिवं शग्मं शंयोः शंयोः।" ततश्च स्मार्त्तपुत्रदर्शनजपादि। "अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम्।" अथास्य मूर्द्धानमवजिघ्रति। प्रजापतेष्ट्वा हिंकारेणावजिघ्रामि सहस्रायुषामुकदेवशर्म्मन् जीव शरदः शतम्। गवां त्वा हिंकारेणावजिघ्रामि सहस्रायुषामुकदेवशर्म्मन् जीव शरदः शतम्। त्रिः दक्षिणेऽस्य कर्णे जपति। "अस्मे प्रयंधि मघवन्नृजीषिन्निन्द्ररायो विश्ववारस्य भूरेः। अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन्॥" वामकर्णे,—"इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तं दक्षस्य सुभगत्वमस्मे पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम्॥" तद्दिने गृह्याणामहिंसनं कामं श्वः।

अत्र शिष्टः,—

प्रवत्स्यामीत्युपस्थाय वह्निं न प्रवसेद् यदि।
आगत्योपस्थितिं तत्र प्राह कौषातकी श्रुतिः॥

इति प्रसङ्गादुक्तम्। प्रकृतमनुसरामः। होमान्ते,—

कृत्वाग्निकार्य्यं यः कुर्य्याल्ललाटे तिलकं नृप।
सर्व्वपापविनिर्मुक्तः सुरलोके महीयते॥

तथा,—

सितेन भस्मना कार्य्यं ललाटे च त्रिपुण्ड्रकम्।

तथा,—

दिनमेकन्तु यो भस्म समन्त्रं धारयेन्नरः।
सोऽग्निष्टोमफलं [1]देव लभते नात्र संशयः॥
आयुःकामो नरो राजन् भूतिकामश्च वा पुनः।
नित्यं वै धारयेद् भस्म मोक्षकामी च वा पुनः॥
त्रिकालमपि यो नित्यं यावज्जीवन्तु धारयेत्।
भस्म [2]मोक्षो भवेत् तस्य सत्यमेतन्मयोदितम्॥

तथा,—

सितेन भस्मना [3]कुर्य्याल्ललाटे यस्त्रिपुण्ड्रकम्।
तस्मै नारायणो देवः प्रदद्यात् परमं पदम्॥
त्रिपुण्ड्रं न सदा कार्य्यं भस्मना नोर्द्ध्वपुण्ड्रकम्।
चन्दनेनोभयं कुर्य्यादेवमाह प्रजापतिः॥

एतदूर्द्ध्वपुण्ड्रोपरि कार्य्यम्।

ऊर्द्ध्वपुण्ड्रं त्रिपुण्ड्रं वा कुर्य्यादुभयमेव वा।
ऊर्द्ध्वपुण्ड्रे त्रिपुण्ड्रं स्यात् त्रिपुण्ड्रे नोर्द्ध्वपुण्ड्रकम्॥

तथा,—

मध्याङ्गुलित्रयेणैव [4]दक्षिणस्य करस्य तु।
षड़ङ्गुलायतं पुण्ड्रं कुर्य्यात् सजलभस्मना॥

---

(१) Y. देवी (देवि)।
(२) Y. योगे।
(३) Y. कार्य्यं ललाटे च त्रिपुण्ड्रकम्।
(४) Y. ० स्वदक्षिणकरस्य तु।

यत्तु,— मध्यमानामिकाङ्गुष्ठैर्ललाटे भस्मना कृतः ।

स त्रिपुण्ड्रो भवेत् शस्तो महापातकनाशनः ॥

इति ललाटे तर्ज्जन्यङ्गुष्ठयोर्विकल्पः ।

यत्तु,— यतिः सार्व्वाङ्गिकं स्नानमापादतलमस्तकम् ।

गृहस्थः [1]पुरुषाकारैः स्नानं कुर्य्यात् त्रिपुण्ड्रकैः ॥(?)

इति तद् भस्मस्नानविषयम् । तत्र श्रौतं भस्म मुख्यं तदभावे स्मार्त्ताग्निभस्म । तस्याप्यभावे तु भविष्यपुराणे,—

शिवाग्निकार्य्यं यः कृत्वा कुर्य्यात् त्र्यायुषमात्मनि ।

मुच्यते सर्व्वपापैस्तु शिवस्पृष्टेन भस्मना ॥

एतत् शिवसम्बन्धिहोमानन्तरं बोध्यम् ।

पद्मपत्रेण वान्येन शुचिपत्रेण वा पुनः ।

सद्येन गोमयं गृह्य वामदेवेन मन्त्रयेत् ॥

शुचौ भूमावघोरेण दहेत स्वाग्निना तथा ।

ताम्रपात्रे क्षिपेत् शुद्धे भस्म तत्पुरुषेण तु ॥

सिकताङ्गारपाषाणानीशानेन विशोधयेत् ।

एवं संस्काररहितं नहि धार्य्यं कथञ्चन ॥

शूद्रहस्तस्थितं भस्म द्विजातिर्नैव धारयेत् ।

ईश्वराग्रे स्थितं यच्च भस्मितं वा तदालये ॥

तद्धार्य्यं सुमनोहृच्च(?) यथाजातमपि प्रिये ।

एकादश त्रिपुण्ड्रस्य स्थानमाहुः शरीरजम् ॥

(१) Y. त्रिपुषाकारैः ०

शिरो ललाटांशद्वयं ग्रीवा भुजद्वयं वक्षो नाभिः पृष्ठभागः पार्श्वे ककुदित्येकादश ।

मूर्द्ध्नि श्रवणयोः पुण्ड्रमङ्गस्पर्शनमात्रतः ।

एतेन तत्र षडङ्गुलायतत्वं नास्तीत्युक्तम् ।

कालाग्निरुद्रोपनिषदुक्तो विधिः ।

आग्नेयं भस्म सद्यादिपञ्चमन्त्रैः परिगृह्य अग्निरिति भस्म वायुरिति भस्म जलमितिभस्म स्थलमितिभस्म व्योममितिभस्म [[1]सर्व्वं वा इदं भस्म] मन एतानि चक्षुषि भस्मानि(? इति जावालोपनिषद्भवैः सप्तभिर्मन्त्रैरभिमन्त्र्य "मानस्तोक" इति समुद्धृत्य शिरोललटावक्षःस्कन्धेषु त्र्यायुषैस्त्र्यम्बकमन्त्रैस्तिर्य्यक् तिस्रो रेखाः कुर्व्वीत। व्रतमेतत् शाम्भवं तत् समाचरेन्मुमुक्षुरपुनर्भवाय । हरः । अनुष्टुप् । भगः ।

सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।

भवेऽभवे नादिभवे भजस्व मां भवोद्भवाय नमः ॥

वामदेवः । पंक्तिः । भगः । [2]वामदेवाय नमो बलाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्व्वभूतदमनाय नमो मनोन्मनाय नमः । अग्निः । अनुष्टुप् । अघोरः । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्व्वेभ्यः सर्व्वसर्व्वेभ्यो नमोऽस्तेऽस्तु

(१) D. Omits the portion bracketed.

(२) Y. Reads वामदेवाय नमः । ज्येष्ठाय नमः । श्रेष्ठाय नमः । रुद्राय नमः । कालाय नमः । कलविकरणाय नमः । विकरणाय नमः । बलप्रमथनाय नमः ०

रुद्ररूपेभ्यः। तत्पुरुषः। गायत्री। आपः। तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्। ईशानः। अनुष्टुप्। ईशः। ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानां ब्रह्माधिपति र्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्तु महाशिवोम्। त्र्यायुषैरिति "कश्यपस्य त्र्यायुष"मितिमन्त्रः। ततश्चाष्टौ समिध आदध्यादित्येतैरष्टभिर्हुत्वा सर्व्वस्मात् पापात्मुच्यते इति वचनात् स्मार्त्ताग्नौ तदभावे लौकिकाग्नौ वा। "देवकृतस्यैनसोऽवयजनमसि" स्वाहा। "पितृकृतस्यैनसोऽवयजनमसि" स्वाहा। "आत्मकृतस्यैनसोऽवयजनमसि" स्वाहा। यद्दिवा नक्तञ्चैनः कृतं तस्यावयजनमसि स्वाहा। यत् स्वपतश्च जाग्रतश्चैनः कृतं तस्यावयजनमसि स्वाहा। यद्विदुषाचाविदुषाचैनः कृतं तस्यावयजनमसि स्वाहा। "एनस एनसोऽवयजनमसि" स्वाहा। यजुर्विधानेन,—"त्वमग्ने प्रथमो" इत्यग्निं स्तुवन् सर्व्वसमृद्धो भवति। अस्यादित्य ऋषिः। जगती। अग्निः। "अस्या जरासो" इत्यनुवाकेनाग्निमुपतिष्ठेत्। अग्निर्वरदोभवति तेजसाग्निसमो भवति। ब्रह्मा। अग्निः। द्वितीयतृतीयचतुर्थ नवम-दशम्यः गायत्र्यः। चतुर्द्दशतमा अनुष्टुप्। पञ्चदशतमा बृहती। शेषास्त्रिष्टुभः। एताः सप्तदश। मणिकाख्योऽग्निगृहकार्य्यार्थजलपात्रे पर्य्युषितं जलं वहिः कृत्य जलान्तरप्रक्षेपः। "आपो रेवती"त्यनेन। "आपोहिष्ठे"ति तिसृभिश्च। तन्नाशदोषे पुनर्मणिकाधानं विधिना तद्विधिश्च। अग्नेरीशानदेशे। "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम्। आददे नार्य्यसि" इत्यभ्यादानम्। "इदमहं रक्षसां ग्रीवा अपि कृन्तामि॥" इत्यवट

खननम्। जलस्पर्शः। प्राक् पांसूद्धरणम्। अवटे पूर्व्वोक्तरात्रकुशगुच्छद्वयनिधानम्। दूर्व्वाक्षतहरिद्रारिष्टकान् त्रिकोणागारे [1]पूर्व्वादि स्थापनम्।(?) "समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूः" इति तदुपरि मणिकभाण्डस्थापनम्। "आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं विभृथामृतञ्च। रायश्च स्थ स्वपत्यस्यपत्नीः सरस्वती तद्गृणते वयो धात्॥" इत्यल्पोदकपूरणम्। "आपोहिष्ठे" तितिसृभिः शेषपूरणम्। ब्राह्मणमेकभोजनार्हं तर्पयामीतित्यागः। प्रथमप्रयोगे मातृपूजाभ्युदयिकम्। अच्छिद्रावधारणम्। निरग्नेरप्येतदितिविद्याकरवाजपेयिनः। शिष्टाः पठन्ति,—

गृहे वसन्नुपस्पृष्टे कृत्वा स्वर्णकुशोदकम्।
उद्धृत्य मणिकात् तोयं तेनाभ्युक्षणमाचरेत्॥
रक्षोघ्नांश्च जपेन्मन्त्रान् गायत्रीं वेदमातरम्।
[2]अभ्युक्षेत स्मरेद् विष्णुं पुण्डरीकाक्षमच्युतम्॥

भविष्यपुराणे,—

उभे सन्ध्येऽच यो विप्रो मौनमास्ते समाहितः।
दिव्यं वर्षसहस्रन्तु ब्रह्मलोके महीयते॥

अत्र सन्ध्याहोमाङ्गमन्त्रजपव्यतिरिक्तशब्दानुच्चारणं मौनशब्दार्थः।

(१) Y. दूर्व्वादि ०
(२) Y. अभ्युक्षयेत् स्मरन् विष्णुम् ०

[1][अत्र,—]

उदयात् प्राक्तनी सन्ध्या [2]घटिकात्रयमुच्यते।
सायं सन्ध्या त्रिघटिका अस्तादुपरि भास्वतः॥

इति मौनादिविषयम्। सन्ध्यामुहूर्त्तमात्रमितिप्रकरणात् सन्ध्याकर्म्मपरम्।

इति श्रीमहामहोपाध्यायाग्निचिद्वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे सन्ध्याकालीनकर्म्मनिर्णयः।

अथ प्रथमभागकृत्यम्।

वराहपुराणे—

उदयान्निःसृतं सूर्य्यं यस्तु भक्तिपरो द्विजः।
दध्यक्षताञ्जलीभिस्तु तिसृभिः पूजयेत् शुचिः॥
तस्य भावप्रपन्नस्य अशुभं यत्समर्ज्जितम्।
तत्क्षणादेव निर्दग्धं भस्मीभवति दारुवत्॥

आदित्याभिमुखः सूर्य्याय नम इति लिखितपद्मे भूमौ दध्यक्षताञ्जलित्रयं दद्यात्। पूर्व्वार्ज्जितमशुभं [3]नश्यतु इति चिन्त-

---

(१) Y. Omits the portion bracketed.

(२) Y. E. घटिकाद्वयमुच्यते।

(३) Y. मे नश्यतु।

नम्। यजुर्विधाने,—"विश्वानि देव सवितः" इत्यादित्यमुदयकाले उपतिष्ठेद् विपापो भवति। नारायण ऋषिः। गायत्रीच्छन्दः। सविता देवता। "भद्रोनो अग्निराहुतो" इत्यादित्योदयकाले जपेत् सुभगो भवति।

तथा,—

उदित्योद्यन्तमादित्यमुपतिष्ठेद् दिने दिने।
क्षिपेज्जलाञ्जलीन् सप्त मनोदुःखं व्यपोहति॥

अत्रिः,—

ब्रह्महा गुरुतल्पगोऽगम्यगामी तथैव च।
सुवर्णचोर स्तेनश्च गोघ्नो विश्वासघातकः॥
एवमादिषु चान्येषु पापेषु निरताः सदा।
प्राणायामान् (तु) त्रीन् कुर्य्युः सूर्य्यस्योदयनं प्रति॥

अत्रोदयनं प्रतीति वीप्सार्थप्रतिशब्दादभ्यासयुक्तस्य फलस्य सम्बन्धिफलानुरूपेणाभ्यासकल्पनाद् यावज्जीवाभ्यासस्य फलसम्बन्ध इत्याहुः।

ततः,—

स्वाचान्तश्च ततः कुर्य्याद् गुरुमङ्गलवीक्षणम्।
आदर्शाञ्जनमाङ्गल्यदूर्व्वाद्यालम्भनानि च॥

गुरवः पितृमातृविद्याप्रदज्येष्ठभ्रातरः। मङ्गलान्याह नारदः,—

लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौ र्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥

एतानि सततं पश्येन्नमस्येदर्चयेच्च यः।
प्रदक्षिणञ्च कुर्व्वीत तथास्यायुर्न्न हीयते॥

अञ्जनं सौवीराञ्जनम्। माङ्गल्यं दूर्व्वादीनि।

दूर्व्वां दधि (`) सर्पिरथोदकुम्भं
धेनुं सवत्सां वृषभं सुवर्णम्।
मृद् गोमयं स्वस्तिकमक्षतानि
लाजा मधु ब्राह्मणकन्यकाश्च॥
श्वेतानि पुष्पाणि तथा शमीं च
हुताशनं चन्दनमर्कविम्ब-
मश्वत्थवृक्षं च समालभेत।

आदित्यस्यालम्भासम्भवाद् यथासम्भवमिति बोध्यम्। चिर-[1]जीवितार्थी घृते स्वं प्रतिविम्बमवलोकयेत्।

मनुः,—

मङ्गलाचारयुक्तानां नित्यञ्च प्रयतात्मनाम्।
जपतां जुह्वताञ्चैव विनिपातो न विद्यते॥

इह चान्येषां स्तोत्राणां त्रिसन्ध्यं पाठः सन्ध्याद्वये वा पाठः। प्रातः पाठो वा सूर्य्योदये वा पाठः। तेषां प्रथमभाग एव पठनम्। यत्तु पञ्चरात्रोक्तं स्तोत्रेषु पूजितमिति तद् यस्य स्तोत्रस्य प्रातिस्विकः कालविशेषो नास्ति तत्परमेव। न चैतन्मन्त्रसिद्धार्थजपपरम्।

(१) Y. जीवितार्थं।

अन्यथा कुरुते यस्तु फलं तस्य न सिद्ध्यति।

इति वाक्यशेषात् फलार्थप्रयोगपरत्वावगतेः। किञ्च शारदा-तिलके,—

द्विसहस्राधिका मन्त्राः खण्डशः शतधा कृताः।
ज्ञातव्या स्तोत्ररूपास्ते मन्त्रा एते यथास्थिताः॥

इति द्विसहस्राधिकाक्षरमन्त्राणां स्तोत्ररूपत्वमुक्तमिति स्तोत्राणामपि यद्यपि मन्त्रत्वमुक्तं तथाच तत्रापि पुरश्चरणा-पेक्षास्ति तथापि

द्विसहस्रमितो मन्त्रः सकृज्जप्तेन सिद्ध्यति।

इति सकृज्जपमात्रमेव स्तोत्राणां पुरश्चरणकार्य्यकरणमिति। नक्तं स्तोत्रेषु पूजितमिति प्रयोगपरमेव। अत्र,—

एकदन्तं महाकायं कपिलं गजकर्णकम्।
लम्बोदरञ्च विकटं विघ्ननाशं विनायकम्॥
धूम्रकेतुं गणाध्यक्षं भालचन्द्रं गजाननम्।

नमामीत्यन्तेऽध्याहार्य्यम्।

नामद्वादशकं चैव यः पठेत् शृणुयान्नरः।
विद्यारम्भे विवाहे च प्रवासे [1]दुर्गमेऽपिवा॥
संग्रामे सङ्कटे चैव विघ्नस्तस्य न विद्यते।

अस्य द्विसहस्राधिकाक्षरत्वाभावेन स्तोत्रपरिभाषाभावान्नक्तं नियमाभावात् पूर्व्वाह्ण एव पाठः। एवम्,—

(१) D. ० दुर्गमे सदा।

नमस्कृत्य महादेवं स्तोष्येऽहं तं विनायकम्।

इत्यादीच्चाकृता विनायकस्तुतिः। यत्तु,—"सूर्य्योऽर्य्यमा भगस्त्वष्टा" इत्यादि सूर्य्यनामाष्टशतं तत्र

नामाष्टशतं (नाम्नश्चाष्टशतं) प्रोक्तं शक्रेण [1]सुमहात्मना।

सूर्य्योदये यः सुसमाहितः पठत्

सुपुत्रलाभं धनसञ्चयानपि।

इति सूर्य्योदयविधानात् तत्रैव काले पाठः।

विकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः।

लोकप्रकाशकः श्रीमान् लोकचक्षुर्ग्रहेश्वरः॥

लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा।

तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः॥

गभस्तिहस्तो ब्रह्मा च सर्व्वदेवनमस्कृतः।

एकविंशतिरित्येष स्तव इष्टः सदा मम॥

शरीरारोग्यदश्चैव धनवृद्धियशस्करः।

स्तवराज इतिख्यातस्त्रिषु लोकेषु विश्रुतः॥

य एतेन महाबाहो द्वे सन्ध्येऽस्तमनोदये।

स्तौति मां प्रणतो भूत्वा सर्व्वपापैः प्रमुच्यते॥

इत्यस्य स्फुट एव कालः। तथा,—

प्रथमञ्च महादेवं द्वितीयञ्च महेश्वरम्।

तृतीयं शङ्करं नाम चतुर्थं वृषभध्वजम्॥

(१) Y. तु महात्मना।

पञ्चमं कृत्तिवासञ्च षष्ठं कामाङ्गनाशनम्।

सप्तमं देवदेवेशं नीलकण्ठमथाष्टमम्॥

नवमं चेश्वरं नाम दशमं पार्व्वतीप्रियम्।

रुद्रमेकादशं नाम द्वादशं शिवमुच्यते॥

एतानि द्वादशनामानि त्रिसन्ध्यं यः पठेन्नरः।

मुच्यते सर्व्वपापेभ्यः शिवलोकं स गच्छति॥

अत्र नामविशेषणत्वेन प्रथमान्तानामेव नपुंसकलिङ्गत्वमिति नमामीत्यध्याहाराभावः। एवम्,—नमस्तुभ्यं विरूपाक्ष इत्यादि नीलकण्ठस्तवः इह काम्यफलप्राप्तिपूर्व्वकशिवसायुज्यफलप्रदः।

अथ विष्णोः स्तोत्राणि।

चराचरस्तोत्रम्।

सर्व्वं त्वमिति तुष्टेन विष्णुना संप्रकीर्त्तितम्।

अनुग्रहाद्धि लोकानां स्तोत्रं परमपावनम्॥

[1]ज्ञात्वा ज्ञानमयं विष्णुं श्रद्धया विनयान्वितः।

स्तोत्रमुच्चारयेद् यस्तु स मुक्तो नात्र संशयः॥

(१) Y. ज्ञानाज्ञानमयं॰ E. ध्यात्वा ज्ञानमयम्॰

तथा, —

[1]अजितं केशवं विष्णुं हरिं सत्यं जनार्द्दनम् ।
हंसं नारायणञ्चैव एतन्नामाष्टकं शुभम् ॥
त्रिसन्ध्यं यः पठेन्नित्यं दारिद्र्यं तस्य नश्यति ।
[2][शत्रुसैन्यं क्षयं याति दुःस्वप्नञ्चापकर्षति ॥]
गङ्गायां मरणञ्चैव दृढ़ा भक्तिश्च केशवे ।
ब्रह्मविद्याप्रबोधश्च तस्मान्नित्यं पठेन्नरः ॥

इति । अत्रापि नामविशेषणत्वादजितादि[3]पदानां नपुंसकप्रथमान्तत्वं तेन साकाङ्क्षत्वाभावान्नाध्याहारः । हरिमिति छन्दसोऽनुस्वारः ।

नरसिंहपुराणीयं मृत्युञ्जयाष्टकं "त्रिकालं नियतः शुचि"रितिवचनात् पठनीयम् ।

वराहपुराणीयं—

नारायणो नरः शौरिश्चक्रपाणिर्जनार्द्दनः ।

[4]इति नामाष्टशतं [5]सर्व्वयज्ञफलं पठनीयम् । यजुर्विधाने "युञ्जते मनः ।" इत्यनुवाकं सायं प्रातः प्रयुञ्जानो दीर्घायुर्भवत्यरोगी च । उभयमन्यस्मान्न भवति । "युञ्जत" इति जगती ।

(१) Y. अच्युतं ० ।
(२) Y. Omits the portion bracketed.
(३) D. शब्दानां ।
(४) Y. इत्यादि ।
(५) Y. सर्व्वकामसर्व्वयज्ञफलपठनीयम् ।

श्यावाश्वः । "इदं विष्णुः ।" गायत्री । मेधातिथिः । "इरावती" त्रिष्टुप् । वशिष्ठः । इतरमन्त्राणां प्रजापतिः । "विष्णोर्नुकं" तिस्रस्त्रिष्टुभः । इतरद् यजुः । श्रौतविनियोगानुसारेणान्यदैवतत्वेऽपि वैष्णवानुवाकमितिवचनाद् विष्णुरेव सर्व्वत्र देवता ।

शिष्टाः पठन्ति,—

गीता नामसहस्रञ्च स्तवराजो ह्यनुस्मृतः ।
गजेन्द्रमोक्षणञ्चैव कृष्णस्यातीव वल्लभम् ॥

तत्र,—

अध्येष्यते [1]च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥

अध्येष्यते पठतीत्यर्थः ।

तथा,—

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभान् लोकान् प्राप्नुयान्नात्र संशयः ॥

अत्र स मुक्तः स्यात् शुभान् लोकान् प्राप्नुयात् । तेन मुक्त्यर्थिनः सत्वशुद्धिद्वारा मुक्तिः फलम् । शुभलोकार्थिनः शुभलोकप्राप्ति-(:) फलम् । सोऽपीत्यपिशब्दात् योऽधीते पठति तस्य मुक्तिः शुभलोकप्राप्तिर्यश्च शृणोतीति सम्बन्धः । नामसहस्रञ्च "विश्वं विष्णु"रित्यादि "सर्व्वप्रहरणाय नमोनम" इत्यन्तम् । तत्र सहस्रनामवादारम्भात् पूर्व्वं ॐनमो भगवते वासुदेवाय

(१) Y. ० तु ० ।

[1]सर्व्वलोकगुरवे सर्व्वलोकपितामहाय सर्व्वलोकप्रधानाय सर्व्वलोकविशिष्टाय सर्व्वलोकेश्वराय सर्व्वलोकसुखप्रदाय सर्व्वलोककर्त्रे सर्व्वलोकनिधये सर्व्वलोकहिताय सर्व्वलोकोद्भवाय सर्व्वलोकोद्भवकराय विष्णवे प्रभविष्णवे इत्येतत् पठनीयम्। अस्याम्नातस्यान्यत्र विनियोगाभावात् प्रकरणेनैव तदङ्गत्वसिद्धिरिति वदन्ति। वस्तुतः सिद्धरूपाणामेषां पदानां प्रकरणेन ग्रहणासम्भवः। न चैतदुच्चारणक्रिया प्रकरणग्राह्या तदुपस्थित्यभावात् समिदादिपदानां क्रियारूपयोगोपस्थापकत्वात् प्रकरणग्रहणम्। मन्त्राणामध्ययनविधिप्रयोजनाकांक्षावशेन कर्म्माङ्गत्वं न प्रकरणात्। सत्यपि प्रकरणग्राह्यत्वे महाप्रकरणिना भारतश्रवणविधिना ग्रहणं न [2]सहस्रनामविधिना। तदुक्तम्,–"आनन्तर्य्यमचोदना। नहि "केशश्मश्रु वपते" "[3]दतो धावति" (?) इत्यादीनां परस्पराङ्गत्वम्। न तेभ्यः पदेभ्यः पूर्व्वं सहस्रनामाङ्गविधिरस्ति येन सन्दंशेनावान्तरप्रकरणकल्पनम्। न चैषामन्यत्र विनियोगाभावः। [4]ग्रन्थकर्त्तृवैशम्पायनस्य वा मङ्गलत्वेन भगवन्नमस्कारोपपत्तेः। [5]तदुक्तं महाभाष्ये,—भुवादयो धातव इति वरुणवाचकवकारकीर्त्तनं मङ्गलार्थम्। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि

(१) D. ओं नमः सर्व्वलोकगुरवे ओं नमः सर्व्वलोक पितामहाय ०

(२) Y. सन्निधितस्य सहस्र ०।

(३) Y. ततो धावती।

(४) Y. ग्रन्थकर्त्तुर्वैशम्पायनस्य वामाङ्गलवत्वेन भग ०

(५) Y. यदुक्तं।

च शास्त्राणि वीरपुरुषाणि [1]आयुष्यपुरुषाणि भवन्ति च। स्मरन्तिच,—

आदौ चान्ते च मध्ये च हरिः सर्व्वत्र गीयते।

[2][इति। तेन] भारताङ्गत्वेन भारतश्रवण[3]फलकत्वात् राजसूयान्तर्गतावेष्टिसन्निधिपठितानामवेष्टग्रङ्गत्वं यथा नास्ति तथा सहस्रनामसन्निधिपाठो नैषां तदङ्गतापादकः। "श्रुत्वा धर्म्मानशेषेण" इत्याद्यर्थवादः। नास्य नामपाठेऽन्तर्भावः।

य इदं शृणुयान्नित्यं यश्चापि परिकीर्त्तयेत्।

इति विधिः। परिकीर्त्तनं जपः। स च त्रिविधः। मानसवाचिकोपांशुभेदात्। कुत एवं "किं जपन्मुच्यते जन्तुः" [4]इत्युपक्रमेऽभिधानात्। "शूद्रः सुखमवाप्नुयात् श्रवणेन" इति शङ्कराचार्य्याः। वस्तुतः "स्तवैरर्च्चेन्नरः सदा।" "किं जपन्मुच्यते जन्तु"रित्युपक्रमेऽभिधानात् स्तोत्रजपे शूद्रस्याप्यधिकारप्रतीतेः। किञ्च "श्रावयेच्चतुरो वर्णान्" इतिविधेः "शृणुयात्" इतिपर्य्यवसानात्। श्रवणस्य चानुष्ठानार्थत्वात् स्तोत्रपाठानुष्ठानेऽपि शूद्रस्याधिकारः। यत्तु "नमस्कारोऽस्य मन्त्र" इति मन्त्रकार्य्ये नमस्कारविधिरिति तत्र "अहे बुध्न्य मन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः ऋचो यजूंषि सामानि।" इति [5][श्रुतौ "ऋचो यजूंषि सामानि] निगदा

(१) Y. आयष्मत् (आयुष्मत्) पुरुषा भवन्ति।

(२) Y. Omits the portion bracketed.

(३) Y. ० फलवत्वात्।

(४) Y. इत्यभिधानात्।

(५) D. Omits the portion bracketed.

मन्त्राः" इति [1]कल्पसूत्रे च मन्त्रपदस्य मन्त्रसमाम्नायपठितवेदपरत्वेन तच्चोदकेषु मन्त्राख्या(?) इत्यत्र निर्णीतत्वात् स्मार्त्तमन्त्राणां मन्त्रपदगौणार्थत्वेन [2][तत्कार्य्ये] नमस्कारविधिर्नास्ति। नहि "गौ र्नपदा स्प्रष्टव्या" इत्यनेन वाहकस्य पदस्पर्शनं निषिध्यते। एतेन

अमन्त्रकस्य शूद्रस्य विप्रो मन्त्रेण युज्यते।

इति व्याख्यातम्। वैदिकमन्त्र एव श्राद्धादौ ब्राह्मणेन [3][पठनीयः।] स्मार्त्तमन्त्रस्तु स्वयमेव। अतएव

पूजयेयुर्द्विजाः सर्व्वे स्त्रीशूद्राणाममन्त्रकम्।

इत्यादौ मन्त्रपदं प्रणवपरत्वेन व्याख्यातं जन्माष्टमीविधावभियुक्तैः। अत्र नित्यं शृणुयात् कीर्त्तयेदिति यावज्जीवमितिनार्थः तथा सति

नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः।

इत्यैहिकफलविरोधात्। तथा,—

भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः।

इत्यैहिकमेव फलम्। किन्तु फलानुसारेण मासं वर्षं वा प्रत्यहं पाठस्य फलसम्बन्धः। तथा,—"भक्तिमान् यः सदोत्थाय" इति वचनात् प्रातरुत्थाय पठनम्। स्कन्दपुराणे,—

[4]नित्यं नामसहस्रन्तु पठनीयं मया तव।

(१) Y. मन्त्रसूत्रे ०।

(२) Y. Omits the portion bracketed.

(३) D. Omits the portion bracketed.

(४) Y. नित्यं नामसहस्रञ्च पठितव्यं मयातव।

इति वैष्णवप्रतिज्ञानाद् यावज्जीवं पाठः। [[1]तथा,]

विष्णोर्नामसहस्राख्यं पुराणेषु प्रतिष्ठितम्।
यो नरः पठते नित्यं त्रिकालं केशवालये॥
शिवालये पठेद् वापि तुलसीवनसन्निधौ।
नरो मुक्तिमवाप्नोति प्रसादाच्चक्रपाणिनः॥
नाम्नां सहस्रं योऽधीते द्वादश्यां जागरे हरेः।
स निर्दहति पापानि जन्मकोट्यर्जितानि च॥
यः पठेत् श्राद्धकाले तु विप्राणां भुञ्जतां पुरः।
आकल्पकालिकी [2]तुष्टिः पितॄणां तत्र जायते॥
माङ्गल्येषु च यात्रायां यज्ञोत्सवक्रियासु च।
ग्रहनक्षत्रपीड़ासु राजदैवभयेषु च॥
दुःस्वप्नदर्शने चैव पठेन्नामसहस्रकम्।

स्तवराजश्च राजधर्म्मे भीष्मोक्तः।

आरिराधयिषु र्विष्णुं वाचं यद्विसृजाम्यहम्।
तया व्याससमासिन्या प्रीयतां मधुसूदनः॥

इत्यादि। "अव्यक्तं शाश्वतं विष्णु"मित्याद्यनुस्मृतिः। [[3]गजेन्द्रमोक्षणम्।] ॐ नमो मूलप्रकृतये इत्यादि विष्णुधर्म्मे। तथा नारदपञ्चरात्रोक्तनरसिंहकवचम्। नरसिंहकवचस्य नारदऋषिरनुष्टुप् छन्दः नरसिंहो देवता। ॐ

(१) D. Omits the portion bracketed.

(२) Y. तृप्तिः।

(३) D. Omits the portion bracketed.

पूर्व्वस्यां दिशि चाग्नेये दक्षिणे नैर्ऋते तथा ।
वारुणे चैव वायव्ये कौवेरे रुद्रगोचरे ॥
छिद्रस्थानेषु सर्व्वेषु वाह्ये सर्व्वासु दिक्षु च ।
पाताले च तथाकाशे पृष्ठतश्चाग्रतोऽपि वा ॥
पार्श्वयोः सर्व्वकोणेषु रन्ध्रदेशेषु च क्रमात् ।
नखदंष्ट्रायुधो देवः पातु मां नरकेशरी ॥
मूर्द्ध्नि देशे ललाटे च लोचने कर्णनासिके ।
मुखे कण्ठे च मां पातु भुजयुग्मे तथोरसि ॥
हृदये पार्श्वयोः पृष्ठे जठरे सर्व्वसन्धिषु ।
पातु मां नरसिंहस्तु सुरशत्रुनिवारणः ॥
नाभौ कटिप्रदेशे च गुह्ये चोरुयुगे तथा ।
जानुनोः पादयोश्चैव पातु मां [१]दीप्तलोचनः ॥
अधमोत्तममध्यानि यानि चाङ्गानि सन्ति मे ।
समस्तरोमकूपेषु पातु मां स तु सिंहराट् ॥
हृदये चोत्तमाङ्गे च शिखायां कवचे पुनः ।
नेत्रयोर्हस्तयोश्चैव पातु मामग्निसप्रभः ॥
तप्तहाटककेशान्तज्वलत्पावकलोचनः ।
वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते ॥
सर्व्वत्र रक्ष मां नाथ भयेभ्यश्चाग्निलोचनः ।
प्रसादात् तव देवेश न मां हिंसन्तु हिंसकाः ॥

(१) E. Y. दैत्यसूदनः ।

अभेद्यं कवचं बद्ध्वा विचरामि महीतले ।
प्रसादान्नरसिंहस्य न भयं [१]मेऽस्तु कुत्रचित् ॥
वाङ्मनःकर्म्मभि र्ये मां क्रूरा हिंसितुमुद्यताः ।
ते सर्व्वे प्रलयं यान्तु नरसिंहरवाहताः ॥
जले स्थले च पाताले दिक्षु कोणेषु सर्व्वदा ।
दिवा रात्रौ च सन्ध्यायां पातु मां दैत्यसूदनः ॥
गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ।
नरसिंहकृता गुप्तिर्वासुदेवमयोऽस्म्यहम् ॥
[२][कृत्वैवं कवचं दिव्यमच्छिद्रं मुनिसत्तम ।
नारसिंहं महाज्ज्वालं दुर्निरीक्ष्यं सुरासुरैः ॥
सर्व्वतेजोमयं रौद्रं सर्व्वोपद्रवनाशनम् ।
साक्षाद् भवत्यसौ विप्रो नरसिंहो न संशयः ॥
नरसिंहस्य कवचमापादतलमस्तकम् ।
कृत्वाप्येवं मुनिश्रेष्ठ सर्व्वपापैः प्रमुच्यते ॥]
ज्वलद्वह्निस्फुलिङ्गोर्म्मिवेष्टितं त्रिशिखं हृदि ।
सकृज्जप्तं दहेत्सर्व्वम् ।

इति हृदि हृदयावकाशे ज्वलद्वह्निकणावृतवह्निशिखात्रययुक्तमिव सर्व्ववृजिनं दहतीत्यर्थः। कवचावृतसर्व्वाङ्गमित्यादेरयमर्थः। शाकिनीडाकिनीप्रेतकुष्माण्डपिशाच[३]राक्षसाभिभव-

(१) Y. मेऽस्ति ।

(२) D. Omits the portion bracketed.

(३) Y. राक्षसग्रहानभिभव ०

कामः कवचं धारयेत्। भगवन्निति नारदसम्बोधनम्। कार्य्येषु प्रवर्त्तमानः क्वचिन्न प्रतिहन्यते न नश्यति यतो नरसिंहो रक्षते। तेजः सोढुमित्यादेरयमर्थः।* [1]यान्तीति पाठः सुगमः। ममापि हिंसकानभिभवः कवचसाध्यः किं पुनरन्येषामित्यर्थः। न्यासं विना जपमात्रफलमाह सकृज्जप्तमित्यादि। त्रिर्ज्जप्तं कवचं गन्धर्व्वादिभ्यो योजनानां द्वादशाभ्यन्तरे रक्षेदित्यर्थः। अत्रहेतुः

रक्षते भगवान् देवो नरसिंहो महाबलः।

इति। "स्वदेहे परदेहे च इति स्वदेहे करणस्य प्राप्तत्वात् परदेहेऽतिदेशार्थं पुनर्वचनम्। स्वदेहवत् परदेहे कुर्य्यादित्यर्थः। तथाच स्वशब्दस्थाने इदम्शब्दः कर्त्तव्यः। "पातु मां नरकेशरी"त्यत्र पात्विमं नरकेशरीत्यूहः। व्यवहिते च पातु तं नरकेशरीत्यूहः। मुखे कण्ठेचैनं पातु। पात्विमं नरसिंहस्तु।

जानुनोः पादयोश्चैव पात्विमं दीप्तलोचनः।

अधमोत्तममध्यानि [यानि चाङ्गानि[2]] सन्त्यस्य।

समस्तरोमकूपेषु पात्विमं सतु सिंहराट्।

पात्विममग्निसप्रभः। सर्व्वत्र रक्षेमं नाथ। नेमं हिंसन्तु हिंसकाः। अभेद्यं कवचं बद्धा विचरन्तु। प्रसादान्नरसिंहस्य न

* Y.Hear adds दानवसिद्धगन्धर्व्वमानवविद्याधरयक्षगणकिन्नरमहोरगराक्षसादिदुःसहतेजःकामः कवचं धारयेत्। तेजोऽत्र धर्म्मविशेषः। ब्रह्मवर्चसं वा। ये मां हिंसितुमिच्छन्ति इति ब्रह्मण उक्तिः। ब्रह्माणमपि मां ये हिंसितुमिच्छन्ति तस्य कवचस्याग्नितेजसा दग्धास्ते प्रलयं यान्ति। वर्त्तमानार्थे लोट।

(१) D. पाहीति०

(२) D. Omits the portion bracketed.

भयमस्य। वाङ्मनःकर्म्मभिर्य इमं क्रूराः। दिवारात्रौ च सन्ध्यायां पात्विमम्। वासुदेवमयोह्ययम्। एवं चतुर्द्दशस्थानेषूहः। "स्मृत्वा तं पुरुषः सदा" इति संग्रामाद्यात्ययिके कवचस्मरणं रक्षाकरमित्यर्थः। क्वचित्पाठः "दृष्ट्वा तं पुरुषः सदा" इति। तं कवचं दृष्ट्वा ज्ञात्वा विन्यसेदित्यर्थः। "योऽश्वमेधेन यजेत।" "य उ चैनं वेदे"तिवत्। संग्रामादिषु कवचपर्य्यालोचनं न्यासद्वारापद्विमोक्षणफलम्। अथवा "संग्रामे सङ्कटे दुर्ग" इत्यारभ्य

यं यं काममभिध्याय यजते नरकेशरीम्(?)।

इत्यनेन नृसिंहमाहात्म्यकथनम्।* शेषं स्पष्टम्। पाद्मे,—

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्[1]।

[2][जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम्॥

सासितूणधनुर्बाणपाणिं नक्तञ्चरान्तकम्!

स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम्॥

रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्व्वकामदाम्।

शिरोमे राघवः पातु भालं दशरथात्मजः॥

कौशलेयो दृशौ पातु विश्वामित्रप्रियः श्रुतो।

घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः॥

जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः।

स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्म्मुकः।

* अत्र कृतव्याख्यानां पदानां न दृश्यते सर्व्वसङ्गृहीतेषु कवचपाठेषु।

(१) Y. राजीवलोचनमित्यादि।

(२) Y. Omits the portion bracketed.

करौ सीतापतिः पातु हृदयं जामदग्न्यजित्।
मध्यं पातु खरध्वंसी नाभिं जाम्बुवदाश्रयः॥
सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः।
ऊरू रघूत्तमः पातु गुह्यं पातु गुहाश्रयः॥
जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः॥
एतां रामबलोपेतां रक्षां यस्तु कृती पठेत्।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत्॥
पातालभूतलव्योमचारिण श्छद्मचारिणः।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः॥
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन्।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति॥
जगज्जितैकमन्त्रेण रामनाम्नाभिरक्षितम्।
यः करे धारयेत् तस्य करस्थाः सर्व्वसिद्धयः॥
भूर्जपत्रे लिखित्वेमां गन्धचन्दनचर्च्चिताम्।
कृत्वा वै धारयेद् यस्तु सोऽभीष्टफलमाप्नुयात्॥
काकबन्ध्या च या नारी मृतवत्सा च या भवेत्।
बहुपत्या जीववत्सा साच स्यात्नात्र संशयः॥
वज्रपञ्जरनामेदं यो रामकवचं पठेत्।
अव्याहताज्ञः सर्व्वत्र लभते जयमङ्गलम्॥]
आदिष्टवान् यथा स्वप्ने रामरक्षामिमां विभुः।
तथा लिखितवान् प्रातर्विबुद्धो बुधकौशिकः॥

[1]इति रामकवचफलम्।

धन्विनौ बद्धनिस्त्रिंशौ जटामुकुटमण्डितौ।
[2]वीरौ मामधिरक्षेतां तावुभौ रामलक्ष्मणौ॥
[3][शरण्यौ सर्व्वसत्वानां श्रेष्ठौ सर्व्वधनुष्मताम्।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ॥
आत्तसज्यधनुषाविषुस्पृशा-
वक्षयाशुगनिषङ्गसङ्गिनौ।
रक्षणाय मम रामलक्ष्मणा-
वग्रतः पथि सदैव गच्छताम्॥
सन्नद्धः कवची खड्गी चापबाणधरो युवा।
गच्छन् मनोरथान् चास्मान् रामः पातु सलक्ष्मणः॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ॥
फलमूलाशनौ दान्तौ तापसौ ब्रह्मचारिणौ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ॥
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली।
काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः॥
वेदान्तवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः॥

---

(१) Y. इत्यन्तं रामकवचं फलम्।

(२) Y. वीरौ मां पथि रक्षेतां तावुभौ रामलक्ष्मणौ इत्यादि फलम्।

(३) Y. Omits the portion bracketed.

इत्येतानि जपेन्नित्यं सभक्तिः संयतेन्द्रियः।
अश्वमेधायुतं पुण्यं प्राप्नोति स न संशयः॥
आपदामपहर्त्तारं दातारं सर्व्वसम्पदाम्।
गुणाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्॥
दक्षिणे लक्ष्मणो धन्वी वामे च जानकी शुभा।
पुरतो मारुतिर्यस्य तं स्मरामि रघूत्तमम्॥]

विष्णुपुराणे,—

ये त्वामार्य्येति दुर्गेति वेदगर्भेऽम्बिके[1]ति च।
भद्रेति भद्रकालीति क्षेम्या क्षेमङ्करीति च॥
प्रातश्चैवापराह्ने च स्तोष्यन्त्यानम्रमूर्त्तयः।
तेषां हि प्रार्थितं सर्व्वं मत्प्रसादाद् भविष्यति॥

इति दुर्गां प्रति श्रीकृष्णवाक्यम्। तथा हरिवंशे,—

आर्य्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा।

इत्याद्यार्य्यास्तवः।

मार्कण्डेयपुराणे,—

[2]सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः॥
महामायानुभावेन—

इत्यादि

एवं देव्या वरं लब्ध्वा सावर्णि र्भविता मनुः।

---

(१) Y. ०ऽपिच।

(२) Y. सावर्णिः सूर्य्यतनय इत्यादि सावर्णिर्भविता मनुरित्यन्तः देवीमाहात्म्यप्रतिश्लोकग्रन्थसन्दर्भः ०

इत्यतः देवीमाहात्म्यप्रतिपादको ग्रन्थसन्दर्भः सर्व्वः पठनीयः। देवीमाहात्म्यस्यैव पठन[1]श्रवणरूपकर्म्मविशेषे फलजनकत्वश्रवणात् तदन्तर्गतफलप्रतिपादकवाक्यानामपि देवीमाहात्म्यरूपत्वात्। "स्वाध्यायोऽध्येतव्यः" इति विधौ स्वस्यापि प्रवेशवत्। यद्यपि "एभिस्तवै"रित्युपक्रमादुपसंहारस्थमाहात्म्यपदं "वेदो वा प्रायदर्शना"दित्यनेन न्यायेन नारायणीस्तवशक्रादिस्तवपरं प्रतिभाति तथापि "एभिः स्तवै"रित्यस्य प्रकृतनारायणीस्तवमात्रपरस्य "मधुकैटभनाश"ञ्चेत्यत्र चकारेण समुच्चयप्रतीत्या साकाङ्क्षत्वेनापर्य्यवसितत्वाद् वाक्यभेदभयाच्च सर्व्वस्यैव माहात्म्यस्य फलसम्बन्धः। यथोपांशुयाजवाक्ये विष्णुवितिदेवताविधौ वाक्यभेदभयात् "उपांशुयाजमन्तरा यजती"त्येव विधिः। तेन देवीमाहात्म्यस्यैव कीर्त्तनात् नित्यक्रियाणां सकलबाधाशमनं फलम्। सकलपदस्यानेकाशेषपरस्य प्रत्येकोपस्थापकत्वाभावात् सर्व्वेभ्यः कामेभ्यः इत्यत्र हि वैदिकप्रत्येककाममनूद्य ज्योतिष्टोमविधि[2]रित्येकं फलम्। नैवमिह। तेन नित्यं

मङ्गलाचारयुक्तानां विनिपातो न विद्यते।

इत्यादिवत् सन्ततानुष्ठानात् सकलबाधाशान्तिः। अथवा बाधापदस्य प्रतियोगिसापेक्षत्वात् पशुबाधा पुत्रबाधा इत्यादिविशेषः। सर्व्वपदपर्य्यायभूतसकलपदेन प्रत्येकमुपस्थाप्यत इति

---

(१) E. Y. स्मरण०

(२) Y. रिति प्रत्येकं।

प्रत्येकपशुबाधादिनाशमुद्दिश्य फलानुरूपेण नित्यपदोक्तसन्तताभ्यासानुष्ठानं विधीयत इति। प्रत्येकपशुबाधाद्यर्थं मासं पक्षं वा देवीमाहात्म्यनित्यपठनं कर्त्तव्यम्। तस्मिंश्च पक्षे यावज्जीवपाठो न विधेयः। पूर्व्वकल्पे सर्व्वबाधाशमफलार्थं यावज्जीवपाठः। फलस्य नित्यापेक्षितत्वेन मुमुक्षुसाधारण्यादङ्गबाधाशमनस्य मुमुक्षोरप्यपेक्षणात्। तत्र प्रत्यहप्रयोगात् फलम्। "अष्टम्यां च चतुर्द्दश्या"मित्यादि विध्यन्तरम्।

तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः।
श्रोतव्यञ्च सदा भक्त्या परं स्वस्त्ययनं महत्॥

[1]इत्येतदन्तम्। अतएव "श्रोष्यन्ति चैव"इति चकारेण "कीर्त्तयिष्यन्ति"इत्यपि सम्बध्यते। "अष्टम्याञ्च"इति चकारेण समुच्चितेष्वष्टम्यादिष्वित्यर्थः। "स वै सायञ्च प्रातश्च जुहोति" इति चकारेण सायं प्रातरभ्यस्ताग्निहोत्रस्य फलसाधनत्ववत्। अर्थवादकत्वाच्च "न तेषां दुष्कृत"मित्यादि "न शस्त्रानलतोयौघात्" इत्यन्तं विशिष्टमेव फलम्। तेन समुच्चितेष्वप्यष्टम्यादिषु देवीमाहात्म्यकीर्त्तनं दुष्कृतदुष्कृतोत्थानापद्दारिद्र्येष्टवियोजनाभावशत्रुदस्युराजशस्त्रानलतोयौघभयाभावकामः कुर्य्यात्। एतत्काम एव समुचिताष्टम्यादिषु देवीमाहात्म्यश्रवणं कुर्य्यादित्यर्थः। "उपसर्गान्" इत्यादि। अशेषान् गृहग्रामनगरजनपदविषयानुपसर्गान् महामारीसमुत्थानमरकरूपाणित्यर्थः।

(१) Y. इति यदुक्तम्।

"त्रिविधं" दिव्यान्तरीक्षभौमरूपमुत्पातञ्च माहात्म्यं कीर्त्तितं श्रुतं वा शमयेदित्यर्थः। "जानताऽजानता वापि" इत्यनेन बलिपूजादिषु साद्गुण्यार्थं माहात्म्यपठनम्। "शरत्काल" इति विध्यन्तरम्। "भविष्यति न संशय" इत्यन्तम्। शरत्कालीनवर्षावधिकपूजा कृष्णाष्टम्यादिमहानवमीपर्य्यन्ततिथिषु क्रियते। तासु तिथिषु देवीमाहात्म्यश्रवणं कीर्त्तनं वा सर्व्वबाधाविनिर्मुक्तिपूर्व्वकधनधान्यसुतान्वितत्वकामः कुर्य्यादित्यर्थः। "श्रुत्वा ममैतन्माहात्म्य"मित्यादीनां देवीमाहात्म्योपलक्षणम्। निर्भयत्वकामः देवीमाहात्म्यं शृणुयादित्यर्थः। "रिपवः संशयं यान्ती"त्यादिविधित्रयं "माहात्म्यं मम शृण्वता"मित्यनुषङ्गात् रिपुक्षयकामः शृणुयात्। कुलनन्दनकामः शृणुयादिति। "शान्तिकर्म्मणी"ति रोगादिशान्तिकामोऽपि शृणुयादितिविध्यन्तरम्। दुःस्वप्नसूचितानिष्टशान्तिकामः शृणुयादित्यपि विध्यन्तरम्। "ग्रहसूचितो" ग्रहपीड़ाशान्तिकामः शृणुयादितिविध्यन्तरम्। "उपसर्गाः शमं यान्ती"त्यादिषु "पठनादेव" इति वक्ष्यमाणं सम्बध्यते। उपसर्गा महामारीव्यतिरिक्ता रोगबाहुल्यदुर्भिक्षादिरूपा देवीमाहात्म्यपठनात् शमं यान्ति। एवं ग्रहपीड़ाः पठनात् शमं यान्ति। पूर्व्वं श्रवणात् शान्तिरुक्ता। दुस्वप्नं सुस्वप्नं जायते पठनादेव। बालानां शान्तिकारकं माहात्म्यं भवति पठनादेव। [1]तथा संघातभेदे मित्रतानाशे मैत्रीकरणं पठनादेव। दुर्वृत्तानां बलहानिकरं पठना-

(१) Y. तदेव संघातभेदेऽपि तत्र नाशे मैत्रीकरणं ०

देव। रक्षोभूतपिशाचानां नाशनं पठनादेव। सर्व्वत्र "सर्व्वं ममैतत्। माहात्म्य"कर्त्तृतया सम्बध्यते। अत्र हेतुः,–यतो मम सन्निधिकारकं अतएव [1]मुक्तिफलजनकत्वमित्यर्थः। "पशुपुष्पार्घ्यधूपै"रित्यादि-विध्यन्तरम्। "सकृत् सुचरितं श्रुतं" इत्यन्तम्। पशूपहारादि-महाविभववर्षावच्छिन्नपूजातुल्यफलकामः सकृन्माहात्म्यं शृणुयादि-त्यर्थः। इदानीमिकोद्दिष्टन्यायेनैकदेशस्य फलसम्बन्धं कथयति। जन्मनां प्रादुर्भावानां कीर्त्तनं तत्प्रतिपादको ग्रन्थः। श्रुतं पापं हरति। श्रुतञ्चारोग्यं प्रयच्छति। युद्धचरितश्रवणं वैरकृतभय-नाशकम्। स्तुतयः श्रुताः शुभमतिप्रदाः। पापक्षयकामः प्रादु-र्भावग्रन्थं शृणुयात्। वैरकृतभयाभावकामो युद्धग्रन्थं शृणुयात्। शुभमतिकामः स्तुतिं शृणुयादितिसर्व्वत्र विधिः। "अरण्ये प्रान्तरे" इत्यादिना माहात्म्यश्रवणस्य विधिः। अरण्ये सङ्कटाभावकामः देवीमाहात्म्यं स्मरेत्। एवं प्रान्तरे। दावाग्निपरिवारितसङ्कटा-भावकामः माहात्म्यं स्मरेदित्याद्या विधयः। अत्र देवी-माहात्म्यस्य प्रातः कालाद्यश्रवणात् "नक्तं स्तोत्रेषु पूजित"मिति-रात्रिपाठादेव फलमिति प्रतिभाति। तथापि

देवकार्य्यस्य सर्व्वस्य पूर्व्वाह्णः परिकीर्त्तितः।

इति नरसिंहपुराणात् सर्व्वपदस्य सर्व्वनामत्वेन [2]स्तोत्रेषु विशेषरूपेणैव पूर्व्वाह्णविधानाद् विकल्प एव इति।

---

(१) Y. मुक्तिफलकमित्यर्थः।

(२) D. स्तोत्रेऽपि।

विष्णुपुराणीयो लक्ष्मीस्तवः पठनीयः।

नमस्ये सर्व्वभूतानां जननीमब्जसम्भवाम्।
श्रियमुन्निद्रपद्माक्षीं विष्णोर्वक्षस्थलाश्रयाम्॥

इत्यादि।

पठ्यते येषु चैवेष गृहेषु श्रीस्तवो मुने।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन॥

इत्यादिफलार्थम्।

स्कन्दपुराणीयसरस्वतीस्तवः।

प्रपञ्चसारे च,—

इति मातृका [1]विभेदान् प्रभजन् [2]मनुद्वयं च [3]मन्त्रितमः।
[4][प्रजपेद्दिनां स्तुतिमपि दिनशो वाग्देव्यनुग्रहाय बुधः॥
अमलकमलाधिवासिनि मनसो वैमल्यदायिनि मनोज्ञे।
सुन्दरगात्रि सुशीले तव चरणाम्भोरुहं नमामि सदा॥
अचलात्मजा च दुर्गा कमला त्रिपुरेति भेदिता जगति।
या सा त्वमेव वाचामीश्वरि सर्व्वात्मना प्रसीद मम॥

---

(१) Y. प्रभेदान्

(२) प्रपञ्चसार reads मन्त्रत्रयं च ०

(३) Y. मन्त्रितम इत्यादि।

(४) Y. Omits the portion bracketed.

[१]तव चरणाम्भोजयोः प्रणामहीनः पुनर्द्विजातिरपि ।
भूयादनेड़मूकस्त्वद्भक्तो भवति देवि सर्व्वज्ञः ॥
मूलाधारमुखोद्गतविसतन्तुनिभप्रभाप्रभावतया ।
विस्तृतलिपिव्राताहितमुखकरचरणादिके प्रसीद मम ॥
वर्णतनो ऽमृतवर्णे नियतमनिवर्णितेऽपि योगीन्द्रैः ।
निर्णीतकरणदूरे वर्णयितुं देहि देवि सामर्थ्यम् ॥
ससुरासुरमौलिलसन्मणिप्रभादीपितांघ्रियुगे ।
सकलागमस्वरूपे सर्व्वेश्वरि सन्निधिं विधेहि मयि ॥
पुस्तकजपपुटहस्ते वरदाभयचिह्नचारुबाहुलते ।
कर्पूरामलदेहे वागीश्वरि बोधयाशु मम चेतः ॥
क्षौमाम्बरपरिधाने मुक्तामणिभूषणे मुदावासे ।
स्मितचन्द्रिकाविकासितमुखेन्दुविम्बेऽम्बिके प्रसीद मम ॥
विद्यारूपेऽविद्याविनाशिनि विद्योतितेऽन्तरात्मविदाम् ।
गद्यैः सपद्यजातैराद्यैर्मुनिभिः स्तुते प्रसीद मम ॥
त्रिमुखि त्रयीस्वरूपे त्रिपुरे त्रिदशाभिवन्दिताङ्घ्रियुगे ।
वीक्षणविलसितवक्त्रे त्रिमूर्त्तिमूलात्मिके प्रसीद मम ॥
वेदात्मिके निरुक्तज्योतिर्व्याकरणकल्पशिक्षाभिः ।
सच्छन्दोभिः सन्ततक्लृप्तषड़ङ्गेन्द्रिये प्रसीद मम ॥
त्वच्चरणसरसिजन्मस्थितिमहितधियां न लिप्यते दोषः ।
भगवति भक्तिमतस्त्वयि परमां परेश्वरि प्रसीद मम ॥

(१) प्रपञ्चसार reads त्वच्चरणाम्भोरुहयोः प्रणाम ०

बोधात्मिके बुधानां हृदयाम्बुजचारुरङ्गनटनपरे ।
भगवति भवभङ्गकरीं भक्तिं भद्रार्थदे प्रसीद मम ॥
वागीशीस्तवमिति यो जपार्चनाहवनवृत्तिषु प्रजपेत् ।
स तु विमलचित्तवृत्तिर्देहापदि नित्यशुद्धमेति पदम् ॥]

---

[१]नवग्रहस्तोत्रम् ।

[२]जवाकुसुमसङ्काशं [३][काश्यपेयं महाद्युतिम् ।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥
दिव्यशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
नमामि शशिनं भक्त्या शम्भोर्मुकुटभूषणम् ॥
धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ॥
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सर्व्वगुणोपेतं नमामि शशिनः सुतम् ॥
देवतानामृषीणाञ्च गुरुं कनकसन्निभम् ।
वन्द्यभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥

(१) Y. नवग्रहस्तवः।
(२) Y. जवाकुसुमसङ्काशमित्यादि ।
(३) Y. Omits the portion bracketed.

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥
नीलाञ्जनचयप्रख्यं रविसूनुं महाग्रहम् ।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
अर्द्धकायं महाघोरं चन्द्रादित्यविमर्द्दकम् ।
सिंहिकायाः सुतं रौद्रं तं राहुं प्रणमाम्यहम् ॥
पलाशधूमसङ्काशं तारादित्यविमर्द्दकम् ।
रौद्रं रुद्रात्मजं घोरं तं केतुं प्रणमाम्यहम् ॥
व्यासेनोक्तमिदं स्तोत्रं यः पठेत् शृणुयादपि ।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशयः ॥
ऐश्वर्य्यमतुलञ्चैव बलपुष्टिविवर्द्धनम् ।
नरनारीहितार्थाय नित्यं चाप्यभिधीयते ॥ (?)
नरनारीहितार्थाय लभते नात्र संशयः ॥]

तथा—

[1]मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः ।
[2][स्थिरासनो महाकायः सर्व्वकर्म्मावबोधकः ॥
लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
अङ्गारको यमश्चैव सर्व्वरोगापहारकः ॥
वृष्टिकर्त्ता च हर्त्ता च सर्व्वकामफलप्रदः ।
एतानि कुजनामानि नित्यं यः प्रयतः पठेत् ॥

(१) Y. मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रद इत्यादि मङ्गलस्तोत्रम् ।
(२) Y. Omits the portion bracketed.

ऋणं न जायते तस्य धनमाप्नोति पुष्कलम् ।
रक्तगन्धैश्च पुष्पैश्च धूपगन्धादिभिस्तथा ।
मङ्गलं पूरयित्वा तु मङ्गलेऽहनि सर्व्वदा ॥
ऋणलेखा प्रकर्त्तव्या अङ्गारेण सदा बुधैः ।
प्रोञ्छयेद् वामपादेन ऋणनाशो भवेद् ध्रुवम् ॥]

एतच्च "ऋणानाश्चानपक्रिये"त्युपपातकमध्ये गणनात् ।

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥

(?/?) [1]महादोषात् ।

व्याधितस्य कदर्य्यस्य ऋणग्रस्तस्य सर्व्वदा ।
[2]स्त्रीजितस्य च मूर्खस्य मरणान्तं हि सूतकम् ॥

इति [3]प्रतिक्रिया (इत्यपक्रिया) सम्भावनारहित-ऋणवतः कर्म्मानधिकारस्मरणाच्च ।

[4][अथाहुः,—]

ऋणे प्रज्ञायमाने तु उत्सन्ने धनिके सति ।
क्रीत्वा द्रव्येण तेनाज्यमिति तत्र विधानतः ॥

मध्यमेन पलाशानां पर्णेन [5]तिलानां पर्णेन जुहोति च । [6]यदास्य

(१) D. महादोषाच्च ।
(२) D. त्याजितस्य ०
(३) Y. प्रक्रिया ०
(४) Y. Omits the portion bracketed.
(५) D. तिलान् जुहोति च ।
(६) D. E. जभ्यासीदिति ०

दिति(?) मन्त्रेण व्याहृतिभिः सप्तशतम्। ततः [1]नान्यस्याट्टणमर्दन्तं मयेह येन यमस्य विधिनाचराणि।(?) इदं तदग्ने अनृणो भवामि तावत् तेन प्रतिदत्ते ददानीति निर्धनस्य तूपपातकप्रायश्चित्तम्।

"बृहस्पतिः सुराचार्य्य" इति बृहस्पतिस्तोत्रम्। दशरथकृतं स्कन्दपुराणीयं शनैश्चरस्तोत्रं (च) पठनीयम्।

इत्यग्निचिद्वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे स्तोत्रपाठव्यवस्था।

अथ देवगृहसम्मार्जनादि देवकार्य्याणि।

"पूर्व्वाह्णे दैविकं कर्म्मे"ति वचनात्

देवकार्य्यस्य सर्व्वस्य पूर्व्वाह्णस्तु विधीयते।

इति वचनात् (च) पूर्व्वाह्णमात्रकर्त्तव्यत्वेऽपि द्वितीयभागे बहुकर्म्मविधानात् तृतीयभागे च प्रासादादिदेवतालयगमनविधानेन [2]तत्र देवपरिचर्य्याविधानाद् [3]बृहद्देवकार्य्याणां प्रथमभाग एव कालः। न च पूर्व्वाह्णसामान्यस्य तृतीयभागे [4][विशेषे] उपसंहारः। "देवकार्य्यस्य सर्व्वस्ये"ति गृहदेव(बृहद्देव)कार्य्यस्यापि संग्रहेण तदसङ्गतिः।

---

(१) E. D. यद्यासीदृण ०

(२) Y. तत्रत्यदेवतापरिकर्म्मेत् (?)

(३) D. गृहे देव ०।

(४) D. Omits the portion bracketed.

व्यक्तञ्च वराहपुराणे,--

कल्यमेव समुत्थाय हन्याद् भेरीं यथोदिताम्।

इति कल्यप्रभृतिदेवकार्य्याणि दर्शितानि। तत्र यद्यपि सन्ध्याकाल एव कपाटोद्घाटनदीपज्वालनदन्तधावनमुखक्षालनमाल्यदानघृततैलाभ्यञ्जन [1]भूमिलेपोद्वर्त्तन [2]स्नानदानगन्धचन्दनदानपुष्पमाल्यदानवस्त्रालङ्कारदानानि देवकार्य्याणि विहितानि।

एवं कृते च सन्ध्यादि कर्म्म शेषं समाचरेत्।

इति पश्चादेव (च) सन्ध्या विहिता तथा तद् गृहीतभागवतदीक्षाणामितिप्रतिभातीति सन्ध्यानन्तरमन्येषां देवकार्य्याणि। अतएव भविष्यपुराणे,—

स्नानकाले त्रिसन्ध्यन्तु यः कुर्य्याद् गीतवादितम्।

इतिहासपुराणाभ्यां तथा श्रवणमुत्तमम्॥

इति सन्ध्याकाले स्नानस्यानुवादः। स च सन्ध्याऽव्यवहितकालविषयः। सन्ध्याया अधिकारसम्पादकत्वात्। तत्र वराहपुराणीयमन्त्राणां यथोक्तरूपेण ज्ञानासम्भवात् [3]तन्मन्त्राभावेपि तत्तत्कर्म्माणि कार्य्याणि।

तत्र यमः,—देवमाल्यापनयनं देवागारसमूहनम्।

स्नपनं सर्व्वदेवानां गोप्रदानसमं स्मृतम्॥

---

(१) Y. भूमिलेपनोद् ०

(२) Y. स्नानगन्धचन्दनपुष्पमाल्य ०

(३) Y. तन्मन्त्राभावेऽ(पि) तन्मन्त्राणि कार्य्याणि।

अथ सूर्य्यस्य ।

भविष्यपुराणे,—

सूर्य्यमाल्यापनयनं पूजान्ते च प्रमार्ज्जनम् ।
एकैकं स्यात् सदा तुल्यं चान्द्रायण[1]फलेन तु ॥

तथा,—

पश्यन् परिहरन् जन्तून् मार्ज्जन्या मृदुसूक्ष्मया ।
शनैः सम्मार्ज्जनं कृत्वा चान्द्रायणफलं लभेत् ॥
यावत्यः पांशुकणिका मार्ज्ज्यन्ते भास्करालये ।
दिनानि दिवि तावन्ति तिष्ठत्यस्तमितो नरः ॥

तथा,—

गृहीत्वा गोमयं खस्थं स्थाने वा पतितं शुभे ।
उपर्य्यधश्च सन्त्यज्य प्रत्ययं जन्तुवर्ज्जितम् ॥

तथा,—

नात्यर्थं रोगजीर्णाया वन्ध्यायाश्च विशेषतः ।
रोगार्त्तनवसूताया न गोर्गोमयमाहरेत् ॥
वस्त्रपूतेन तोयेन यः कुर्य्यादुपलेपनम् ।
पश्यन् परिहरन् जन्तून् चान्द्रायणफलं लभेत् ॥
मृदा धातुविकारैर्वा वर्णकैर्गोमयेन वा ।
उपलेपनकृद् याति तत्पदं यानमाश्रितः ॥

(१) D. °फलं लभेत् ।

उदकाभ्युक्षणं भानोर्यः करोति तथा गृहे ।
सोऽपि गच्छति यत्रास्ते भगवान् यादसांपतिः ॥
यः कुर्य्यात् कुट्टिमां भूमिं दर्पणोदरसन्निभाम् ।
नानावर्णविचित्राञ्च विचित्रकुसुमाकुलाम् ॥
क्वचित् कलशविन्यस्तां पङ्कजैरुपशोभिताम् ।
रम्यां मनोरमां सौम्यामर्कायतनमन्दिरे ॥
[1]यावद्धस्ता भवेद् भूमिः समन्ताद्धस्तसंख्यया ।
तावद्युगसहस्राणि सूर्य्यलोके महीयते ॥

तथा,—

एवं स्वस्तिकपद्माद्यैर्भूशोभां सूर्य्यमन्दिरे ।
कृत्वा वर्णकपिष्टाद्यैर्लभेत् शतगुणं फलम् ॥

एवं स्थानं संस्कृत्य मुखप्रक्षालनम् । दन्तधावनम् । "अभ्यङ्गे पञ्चविंशति"रितिवचनात् पञ्चविंशतिपलघृतेनाभ्यङ्गो वर्षकोटिसहस्रार्ज्जितपापक्षयफलः । यवगोधूम[2]चूर्णैरुद्वर्त्तनम् । ततः [3]स्वच्छोदकस्नानम् । भविष्ये,—

मृत्कुम्भैस्ताम्रकुम्भैस्तु स्नानं दशगुणं स्मृतम् ।
रौप्यैर्लक्षोत्तरं पुण्यं [4]हैमैः कोटिगुणोत्तरम् ॥

(१) D. यावद्वर्णा भवेद् °
(२) Y. चूर्णैरावर्त्तनम् ।
(३) D. स्वल्पोदक °
(४) Y. हैमं ।

तथा,— स्नानकाले प्रकुर्व्वीत गीतवाद्यादिमङ्गलम् ।
इतिहासपुराणाभ्यां तथा श्रवणमुत्तमम् ॥
घृतेन स्नपनं कृत्वा एकाहमुदये रवेः ।
गवां शतसहस्रस्य दत्तस्य लभते फलम् ॥

सप्तम्यां घृतस्नाने सप्तकुलोद्धरणसूर्य्यलोकमहि(त)त्वम् । शुक्लाष्टम्यां सर्व्वपापक्षयः । ग्रहणविषुवायनदर्शपौर्णमासेषु महापुण्यम् ।

आह्लादं निर्वृतिं स्वास्थ्यमारोग्यं चारुरूपताम् ।
[1]सप्तजन्मानि चाप्नोति क्षीरस्नानप्रदो रवेः ॥

दधिस्नानाद् विष्णुलोकः । [[2]मधुस्नानादिन्द्रलोकः ।] श्रीखण्डवारिस्नानेनार्कलोकः । कपिलापञ्चगव्यस्नानं पूर्व्वतो दशगुणफलम् । गङ्गातोयेनापोहिष्ठेति स्नानाद् ब्रह्मलोकप्राप्तिः । कर्पूरागुरुतोयेन सूर्य्यस्नानं सूर्य्यलोकदम् । [[3]मन्त्राष्टशतजपेन निर्म्मलजलस्नानं सूर्य्यलोकदम् ।] पितॄनुद्दिश्य तीर्थवारिणा सूर्य्यस्नाने [4]नरकादुद्धृत्य पितॄणां स्वर्गवासः । सिताम्बुधारोष्णपयोघृतैः क्रमेण सूर्य्यं स्नपयित्वा [5][पूजयित्वाश्वमेधसहस्रफलप्राप्तिः ।

तथा,— आपः क्षीरं कुशाग्राणि घृतं दधि तथा मधु ।
रक्तानि करवीराणि तथा रक्तञ्च चन्दनम् ॥

(१) Y. सप्तजन्म समाप्नोति ० ।
(२) Y. Omits the portion bracketed.
(३) Y. Omits the portion bracketed.
(४) Y. नरकोद्धारपूर्व्वकं पितॄणां ०
(५) D. Omits the portion bracketed.

योऽष्टाङ्गमर्घ्यमापूर्य्य भास्कराय निवेदयेत् ।
दशवर्षसहस्राणि स रमेदर्कमन्दिरे ॥

सुवर्णरत्नतोययुतार्घ्येण कोटिशतवर्षं सूर्य्यलोकप्राप्तिः ।

दशापराधांस्तोयेन क्षीरेण तु शतं क्षमेत् ।]
सहस्रं क्षमते दध्ना घृतेनाप्ययुतं क्षमेत् ॥

हेमपात्रे रौप्ये वा ताम्रे वा गोमयकृतपद्मस्वस्तिकशङ्खध्वजादिभिर्नानावर्णैरक्षततण्डुलादिभिर्भक्षपिष्ट(?)दीपचूताश्वत्थपल्लवसहिते नीराजनं युगसहस्रसूर्य्यलोकप्राप्तये । दारवार्घ्यपात्रात् मृत्पात्रे शतगुणम् । ताम्रपात्रे ततो दशगुणम् । पलाशपद्मपत्राभ्यां ताम्रपात्रसमम् । रौप्यपात्रे लक्षगुणं स्वर्णपात्रे कोटिगुणम् ।

एवं स्नानेऽथ नैवेद्ये बलिधूपादिषु क्रमात् ।
पात्रान्तरविशेषेण फलं स्यादुत्तरोत्तरम् ॥
सूर्य्यस्य दर्शनं पुण्यं दर्शनात् स्पर्शनं परम् ।
स्पर्शनादर्चनं श्रेष्ठं घृतस्नानमतः परम् ।

इति सूर्य्यस्य । *

* Y reads the following after this mark :—

इ(ति) सम्मार्जनादिफलम् । अथ दर्शनादिफलम् ।
मेरुमन्दारतुल्योऽपि राशिः पापस्य कर्म्मणः ।
आसाद्य भास्करं मर्त्त्य तन्नाशयति तत्क्षणात् ॥
यः कुर्य्याद्दर्शनं मासमेकाहारो जितेन्द्रियः ।
स यत् फलमवाप्नोति न तत् सर्व्वैर्महामखैः ॥
पौर्णमास्याममावास्यां दर्शनं पुण्यदं स्मृतम् ।
सप्तम्याञ्च तथा षष्ठ्यां दिवसे च रवेः सदा ॥

सकृत्प्रदक्षिणप्रणामाद् राजसूयाश्वमेधफलम् ।

त्रिहत्प्रदक्षिणीकृत्य नमस्कारा(त्)परां गतिम् ।
प्रणम्य दण्डवत् भूमौ गतिं पुण्यशतोद्भवाम् ।

अत्र "देवकार्य्यस्य सर्व्वस्ये"ति वचनाद्देवतासम्प्रदानकस्यापि प्रथमभाग एव कालः ।

पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम् ।
विलेपनञ्चाक्षतञ्च केशवाय प्रयच्छति ।
तेन पुण्येन निवसेत् विष्णुलोके युगायुतम् ॥

इति सामान्यतः । विशेषतो विष्णुधर्म्मे—

पुष्पाणि च सुगन्धीनि मनोज्ञानि च यः पुमान् ।
प्रयच्छति हृषीकेशं स भागवत उत्तमः ॥

इति वाक्यात् तद्वाक्यैश्च पूजाप्रकरणाद् वहिरेव फलार्थत्वेन तत्तद्दिव्य (तत्तद्द्रव्य) विधानाद् (विधान) वाक्येन पूजासम्बन्धे फलसम्बन्धवाक्यभेदोत्पत्तेः पृथग्गन्धादि दानं फलार्थं विधीयते । हिरण्यगृहयानासनदानं तत्तत्फलार्थमेव । तत्र देवतायाः प्रतिष्ठात्वभावेन ददात्यर्थस्य गौणत्वात् । यत्र दद्यादिति वार्चयेदिति यत्रानुकम्पेदिति सत्रे देवताप्रीत्यभावात् प्रीतिहेतुत्वं न पूजास्वरूपं तथापि देवतामुद्दिश्य कृतप्रीतिजननयोग्यक्रियासु पूजेति प्रत्येकमुपादानं गन्धादिलेपनादिकं च पूजैवेति न दोषः । अन्यथा पुष्पस्य देहदानं गन्धस्यानुलेपनञ्च न स्यात् । देवतामुद्दिश्य त्यागमात्रेण दानविध्युपपत्ते (:) देवप्रतिमासम्बन्धो निष्प्रमाणकः । सुवर्णरजतगृहक्षेत्रादीनां साक्षात् प्रतिमाशरीरेऽनुप्रयोगेऽपि तद्भक्षणविधानादपहारे दोषाभिधानाच्च । प्रतिमाशरीरे द्वारान्तरेण तेषामप्युपयोगः । तथाच योगशिवीये चण्डप्रतिष्ठानन्तरं

ब्रूयादेनं शिवद्रव्यं रक्षंस्तिष्ठन् शिवान्तिके ।
वितानच्छत्रचिह्नानि वस्त्रभूषणवाहनम् ।
गोभूहिरण्यवासादि देवद्रव्यमुदाहृतम् ।

भविष्ये—

नाधिकारोऽस्ति विप्राणां भौमानां देवपूजने ।
भृत्या भरतशार्दूल क्ष्माधिपत्ये विशेषतः ॥

इति । क्ष्माधिपत्ये देवभूमिप्रभुत्वे । भौमानां मखेतरब्राह्मणानाम् । मूल्यग्रहणेन नाधिकार इति मूल्यग्रहणं विना देवभूप्रभुत्वे ऽधिकार इत्युक्तं भवति । मखानान्तु वेतनपूर्व्वकमप्यधिकारः ।

देवालयेषु सर्व्वेषु वर्जयित्वा शिवालयम् ।
अधिकारः स्मृतो राजन् भोजकानां न संशयः ॥

इति भोजकपदवाच्यमखाधिकारं दर्शयति । एवं शावरभाष्ये देवग्राम इति तदुपजीविनां तत्र व्यवहारादभिधीयत इति । अन्यथा इत्युक्ते साधारण्यात् सर्व्वेषां व्यवहारः स्यात् । तदुपजीवव्यवहारस्तु पूजाविनियोगार्थ एव । तेन भूम्यादिदानमपि पूजैव । केवलं दानप्रायपठितानां दाने तु कर्त्तव्यतयानुष्ठानसमाचारः । देवद्रव्यं देवतामुद्दिश्य त्यक्तं द्रव्यमिति यद्यपि लक्ष्मीधरेणोक्तं तथापि त्यागोऽपि पूजैवेति न दोषः । तथापि मन्त्रदेवप्रकाशिकायां पूजा पञ्चविधा× अभिगमनमुपादानमिज्या स्वाध्यायो योग इति श्रीपञ्चरात्रेऽभिहितम् । तत्रापितु (तत्राभिगमनं) नाम सम्मार्जननिर्म्माल्यवहिष्करणादि । उपादानं पूजासाधनसम्पादनम् । इज्या गन्धपुष्पादिदानम् । स्वाध्यायो मन्त्रजपः । योगो देवतास्वरूपभावना इति पूजाङ्गमातृकान्यासादिकरणप्रसङ्गः ।

तेषां सपर्य्यां त्रिविधा प्रोक्तामेकां समाश्रयेत् ॥

इति पञ्चोपचारदशोपचारषोड़शोपचाररूपत्रिविधपूजामधिकृत्य विधाने(ऽ)न्यत्र प्रसङ्गाभावात् । अतिथिपूजादौ तदनादरस्यावश्यकत्वात् स्मार्त्तपूजादौ तेषामनङ्गत्वात् ।

अर्चितं प्रतिगृह्णाति अर्चिताय प्रयच्छति ।

इत्यादौ पुष्पादिदानमात्रेण पूजादर्शनाच्चेत्यत्र दानप्रकरणोक्तानां येषां पूजायां न निषेधस्तेषां पूजायामपि स्यादेवाङ्गत्वम् । सर्व्वपूजाप्रकृतीभूत) दीक्षापूजायां प्रपञ्चसारे कानिचित् पुष्पाण्युक्त्वा

सुगन्धीनि सुरूपाणि स्वागमोक्तानि यानि च ।

इति स्वागमोक्तपुष्पाणां विधानात् । नच तत्र देवताशब्दे पूजाङ्गत्वेन यान्युक्तानि तेषामेव ग्रहणम् । स्वागमोक्तानीत्यविशेषेणोपादानात् काम्यानामपि पूजाङ्गत्वाविशेषणाच्च । भविष्यपुराणादेरपि तत्र देवतायाः स्वागमत्वमेव विशेषादागमपदस्य शास्त्रपरत्वादिति । भविष्यपुराणे,—

अथानुलेपनं कृत्वा दिव्यैर्गन्धैः सुगन्धिभिः ।
वर्षकोटिशतं दिव्यं सूर्य्यलोके महीयते ॥
गन्धानुलेपनं पुण्यं द्विगुणं चन्दनस्य च ।
चन्दनादगुरो (॰दगुरो) र्ज्ञेयं पुण्यमष्टगुणं नृप ॥

कृष्णागुरोर्विशेषेण द्विगुणं फलमाप्नुयात् ।
तस्माच्छतगुणं पुण्यं कुङ्कुमस्य विधीयते ॥
चन्दनागुरुकर्पूरैः श्लक्ष्णपिष्टैः सकुङ्कुमैः ।
भानोरङ्गं समालिप्य कल्पकोटि (ं) वसेद् दिवि ॥
सम्बीता (सम्बीज्य) तालवृन्तेन शुभगन्धैः प्रलेपितम् ।
दशवर्षसहस्राणि वीर मित्रपुरे वसेत् ॥

तालवृन्तदाने दशसहस्रवर्षं सूर्य्यलोके वासः । मायूरव्यजनदाने वर्षकोटि(ं) वायुलोकप्राप्तिः । हेमरूप्यरत्नदण्डचामरदाने चामरहस्तसेवितस्य चिरं सूर्य्यपुरावाप्तिः । अथ पुष्पाणि सूर्य्यस्य ।

भविष्यपुराणे --

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः ।
अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ॥
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेद् रविम् ।
पुष्पजातिविशेषेण लभेत् पुण्यं ततोऽधिकम् ॥
दत्वा दश सुवर्णस्य निष्कस्य लभते फलम् ।
करवीरे तथैकस्मिन्नर्काय विनिवेदिते ॥

अत्र पुष्पैः सम्पूजयेदिति स्पष्टविधिना वक्ष्यमाणसर्व्वपुष्पाणां पूजाङ्गत्वावगमः । पुष्पजातिविशेषेणेत्यादिना योगे फलसम्बन्धः । नचाश्रयालाभः । उपक्रमे पूजामनु यत् पुष्पविधानं उपसंहारे च स्वयमुत्पाद्य पुष्पाणीति पूजाङ्गविधिमध्येऽपि मुकुलैर्नार्चयेद्देवमित्येवपूजाङ्गविधानात् कथं वाऽनिष्पत्तिरूपप्रकरणप्रधानविध्यभावेऽपि सद्भावाप्रकरणादाश्रयलाभासम्भवात् तत्र यथा "भूयस्त्वेनोभयश्रुती"ति नित्यात् ज्योतिष्टोमयजुर्वेदोत्पन्नत्वेन सामवेदेऽतद्विध्यभावेऽपि प्रकरणम् । तदुक्तं

परप्रकरणस्थानामङ्गैरित्यादिभिस्त्रिभिः ।
ज्ञाते पुनश्च तैरेव सन्देशेन तदिष्यते ॥

इति । नचैवं फलश्रुतेरङ्गं जुहूपर्णमयीन्यायेनार्थवादत्वम् । फलभूतप्रधानायामित्युक्तदिशा फलविधित्वप्रतीतेः । एवं कामशब्दतुल्यनिर्द्देशात् । यथा खादिरं वीर्य्यकामस्येति संयोगपृथक्त्वविधिः । स्मृतिवाक्ये फलं प्राप्नुयादित्यादिशब्दैरेव फलविधिप्रतीतेः । यदा नात्र पूजाप्रकरणमितिपक्षस्तदानुगुणफलासम्भवात् तत्तत्पुष्पपूजनमेव फलाय विधीयते । तदा च नित्यपूजाकालं विनापि प्रातरप्येतानि पुष्पाणि देयानि । तत्र कर (वीर) पुष्पदाने दशसुवर्णदानफलम् ।

जाती-वकुल-पाटल-श्वेतमन्दार-सितपद्म-नागकेशरचम्पकपुन्नागमुद्गरास्तत्समाः । अर्कपुष्पेण सूर्य्यलोकप्राप्तिः । करवीरसहस्रे (भ्यः) विल्वपत्रमधिकम् । विल्वपत्रसहस्रेभ्यः पद्ममेकमधिकम् । पद्मसहस्राद् वकमधिकम् । तत्सहस्रात् शमीपुष्पम् । बृहतीपुष्पं कुङ्कुमपुष्पञ्च शमीपुष्पसमम् । शमीसहस्रान्नीलोत्पलम् । रक्तोत्पलसहस्रनीलोत्पलशतरक्तकरवीरैश्च पूजने कल्पकोटिशतं कल्पकोटिसहस्रञ्च सूर्य्यलोके वासः । सर्व्वपुष्पेषु मालायां स्वस्वफलं द्विगुणम् । तथा,—

मालती मल्लिका चैव तथा काशोऽतिमुक्तकः ।
पाटली करवीरश्च जया पार्न्तिकेति च ॥
कुब्जकस्तगरश्चैव कर्णिकारः कुरुण्टकः ।
चम्पको रेतकः कुन्दो वाणो वदरमालिका ॥
अशोकस्तिलको लोध्रस्तथा पैनाटरूपकः ।
शतपत्राणि चान्यानि वकाद्यानि विशेषतः ॥
अगस्त्यकिंशुकौ तद्वत् पूजार्थं भास्करस्य तु ।
विल्वपत्रं शमीपत्रं पत्रं भृङ्गरजस्य च ॥
तमालपत्रञ्च तथा सर्व्वदा तपनप्रियम् ।
तुलसी कालतुलसी तथा वै रक्तचन्दनम् ।
केतकीपत्रपुष्पञ्च सद्यस्तुष्टिकरं रवेः ॥

अतिमुक्तकोऽत्र माधवी । कुरुण्टकोऽत्र पीताम्लानः । केतकीपत्रदानमपि । एतेषां मालत्यादीनां फलश्रवणाभावात् पूजायामेकाङ्गत्वम् । एवं पुष्पाभावे पत्राणि पत्राभावे तृणगुल्मौषधाः । इत्यपि पूजाविषयं न फलार्थः (म्) केशकीटावपन्नशीर्णपर्य्युषितं (त) स्वयंपतितमुकुलवर्जनं तु पूजायामिव फलार्थपुष्पसमर्पणे इति । तत्र,—

मुद्गराणि कदम्बानि रात्रौ देयानि भानवे ।
दिवा शेषाणि पुष्पाणि दिवारात्रौ च मल्लिका ॥
प्रहरस्तिष्ठते जाती करवीरमहर्निशम् ।

न निर्म्माल्यतां यातीत्यर्थः । अन्येषु यावद्गन्धानुवृत्तिः । ततः पूर्व्वमुद्धरणे तु ब्रह्महत्याफलमहारौरवपातः । सूर्य्यस्योपरि पुष्पमण्डपकरणे सूर्य्यलोके सर्व्वोपरिवासः । नानापुष्पैः सूर्य्यगृहमण्डलेऽर्च्चयम् । की(कि)ङ्करमते स्वयमुत्पाद्य पुष्पाणि सूर्य्यपूजने सूर्य्यतुष्टिः । स्वर्णपद्मदाने कल्पान्तः (कल्पान्तं) मित्रार्द्धासने वासः । वर्ज्यानि पुष्पाणि । देवीपुराणे,—सूर्य्यस्य तगरं तथा वर्जयेदित्यर्थः ।

भविष्ये,—

कुड्मलोन्मत्तकं केरी तथाच गिरिकर्णिका ।

गिरिकर्णिका अपराजिता ।

नचाम्रातकजैः पुष्पैरर्च्चनीयो दिवाकरः ।

अथ धूपाः । तत्र सूर्य्यस्य ।

गन्धश्चापि शुभा ये च धूपाश्च विजयादयः ।
दिवाकरस्य धर्म्मज्ञैर्निवेद्याः सर्व्वदाच्युत ॥

इत्यविशेषेण पूजाङ्गधूपं विधाय धूपविशेषात् फलविशेषमाह । तेन तेषामेव पूजाङ्गत्वम् । कालान्तरे केवलानां फलार्थत्वञ्च । एवं सर्व्वदेवेषु बोध्यम् । तत्र सूर्य्याय सघृतगुग्गुलधूपदाने चतुर्वेदिग्टहे जन्म ।

देवदारुं नमेरुञ्च सिल्लकं कुटकं तथा ।
श्रीफलञ्चाज्यसन्मिश्रं दत्वा श्रियमवाप्नुयात् ॥

तस्माद् गन्धधूपं षट्सहस्रगुणम् ।

अगुरुं दशसाहस्रं द्विगुणं वा सितागुरुम् ।
गुग्गुलं दशसाहस्रं द्विगुणं सघृतञ्च तत् ॥

सिल्लकधूपेन सूर्य्यसायुज्यम् । कर्पूरागुरुधूपेन राजसूयफलम् । पक्षं गुग्गुल-धूपदानात् ब्रह्महत्यानाशः । संवत्सरेणाश्वमेधफलम् । कृष्णसप्तम्यां साज्यगुग्गुल धूपदाने(न) वर्षशतं सूर्य्यलोके वासः । द्विसहसहस्र (द्विसहस्र) फलसाज्यगुग्गुल धूपे दत्वा सूर्य्यतुल्यो भवति । सूर्य्यघहे (ग्टहे) धूपेन सूर्य्यलोकाप्तिः ।

अथ दीपाः । सूर्य्यस्य । भविष्ये,—विष्णुमहादेवौ प्रति ब्रह्मवाक्यम् ।

घृतेन दीपं प्रज्वाल्य तिलतैलेन वा पुनः ।
प्रयाति सूर्य्यलोकञ्च दीपकोटिशतैर्वृतः ॥
शिरसा धारयेद् दीपं भास्करस्याग्रतो निशि ।
आप्रभातञ्च यो वीर भक्तिश्रद्धासमन्वितः ॥
ललाटे चैव हस्ताभ्यां समुद्‌युक्तस्तथोरसि ।
कल्पायुतशतं देवः सूर्य्यलोके महीयते ॥

कार्त्तिके सप्तम्यामष्टम्याममावास्यायां वा दीपमालादाने भास्करायुतसङ्काशः कुलोद्योतकरः । भास्करालये दीपवृक्षदानात् सूर्य्यलोकाप्तिः । कार्त्तिके प्रत्यहं सूर्य्यनामजपः । सूर्य्यायतने च दीपदानं जातिस्मर(त्व) स्वप्रकाशाव्याहतेन्द्रियत्व-फलदम् । प्रतिपक्षं षष्ठ्यामष्टम्यां वा सूर्य्याय दीपदाने कर्पूरमणिमुक्ताढ्यदीपमाला-

कुलविमानावरोहः । अत्र तान् दत्वा नहि सेतन(?) तैलवर्जितान् कुर्व्वीत दीप-हता (हर्त्ता) च दरिद्रः स प्रजायते इति वचनात् दीपदानकाले परहिंसावर्जनम् । तैलञ्च स यावत्कालं निधेयम् ।

अथ नैवेद्यानि । सूर्य्यस्य । भविष्यपुराणे,—

शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम् ।
सूर्य्याय च तदा दत्वा सप्तम्याञ्च विशेषतः ॥
संयावं कृशरं सूपं पायसं यावकं तथा ।
दध्योदनञ्च शाकञ्च मोदकान् गुड़पूपकान् ॥
यावन्तस्तण्डुलास्तस्मिन् नैवेद्ये परिसंख्यया ।
तावद् युगसहस्राणि सूर्य्यलोके महीयते ॥

रसालशिखरिणी,—

गुड़खण्डशतानां भूभ्रमाणां(?)विनिवेदने ।
घृतेन पाचितानाञ्च दत्वा शतगुणं लभेत् ॥
रसालपानकाद्यानां भक्ष्याणां फलमोष्यते ।
तदर्द्धमखिलस्यापि वासितस्य निवेदने ॥
घृतपूपकृतैः सिक्थैः पुण्यं दशगुणोत्तरम् ।
उपदंशगुणैर्ज्ञेयं पुण्यं शतगुणं खग ॥

एवं षष्टिकोदने सहस्रगुणम् । सुगन्धिशाल्यन्नेत्वयुतगुणम् । रक्तशाल्यन्नेन लक्षाधिकम् । क्षीरभक्तेन दशकोटिगुणोत्तरम् । दधिशर्करायुतान्नेन ततोऽप्य-धिकम् । सघनशात (० सार) कर्पूरसुत्तरशालाया(कर्पूरयुक्तरसालायां) कोटि-कोटिश(त)पुण्याधिकफलम् । सुगन्धपानानां रसालातुल्यफलम् । नानाविधघृत-पायसैः कोटिकोटिगुणम् । घृतौदने मासतुल्यफलम् । शर्कराखण्डयुक्तघृतौदने मासादधिकम् । सर्व्वरत्नसमन्वितपूपदानेऽमरलोकत्वम् ।

मधुमांसासवैश्चापि प्रीयते साधु भास्करः ।
मातुलङ्गफलादीनि पक्वानि विनिवेदयेत् ॥

एवं पक्वस्य प्राप्तिभावात् अपक्वं न निवेदयेत् ।

फलं कोष्ठन्तुविद्धञ्च यत्नात् पक्वमपि त्यजेत् ।

इति प्रतिनिधित्वेन प्राप्तस्य निषेधार्थम् । अर्कपर्णपुटेन मधुपर्कसमर्पणे अश्वमेधफलम् ।

अथ सूर्य्यस्य नानाविधद्रव्यदानानि ।

भविष्ये—

वासोभिः पूजयेद् भानुं यानि वास्य प्रियाणि च ।
तथान्यैश्च शुभैर्द्रव्यैः पूजयेद् वनमालिनम् ॥
वासांसि तु विचित्राणि सारवन्ति मृदूनि च ।
धूपितानि रवौ दद्याद् विकेशानि नवानि च ॥
यावन्तव्दम्बु (यावन्तोऽब्दास्तु) तन्तूनां परिमाणं प्रचक्षते ।
तावद्वर्षसहस्राणि सूर्य्यलोके महीयते ॥
त्रिवृत् शुक्लं सपीतं वा पट्टसूत्रादिनिर्म्मितम् ।
दत्वा × × सूर्य्याय भवेत् वेदान्तपारगः ॥

श्वेतं महाध्वजं किङ्किणीमालान्वितं मयूरच्छत्रभूषितं कृत्वा दिव्यमन्वन्तरशतं दिवि मोदते । सूर्य्यस्य गृहे ध्वजमालादाने महाध्वजाष्टकदाने दिव्यं कल्पायुतशतं दिवि मोदते । मणिरत्नमयं दण्डं काञ्चनमयदण्डं वा शुभं छत्रं मुक्तामाला(ल)ङ्कृतं दत्वा सूर्य्यलोके मोदते । घण्टालासमायुक्तकांस्यलोहमयमहास्वनघण्टादाने अरुणस्यानुचरः सूर्य्येण सह मोदते । भेरीमृदङ्गपटहडमरुमुरजवैणा (वीणा) कांस्यादिदाने युगायुतशतं सूर्य्यलोके महीयते । महास्वनशङ्खदाने युगायुतशतं सूर्य्यलोके महीयते । बहुवर्णाभं एकवस्त्रं नानावस्त्रचितं वा मध्ये पद्मभूषितं वितानं सूर्य्यस्योपरि दत्वा तद्वस्त्रतन्तुपरिमाणसंख्यगुगसहस्रं सत्यलोके महीयते ।

तथा,—

भास्करायतनाभ्यासे यत्तोयं पुरतः स्थितम् ।
सूर्य्यगङ्गेति तज्ज्ञेयं तत्र स्नात्वा दिवं व्रजेत् ॥
यः कुर्य्याद् दीर्घिकां वापीं तड़ागं भास्करालये ।
स तारयेत् कुलशतं सूर्य्यलोके महीयते ॥

शङ्खवाद्यगीतनृत्यजयशब्दहस्ततालकरणे भूमिदानकन्यादानफलम् । दासीदासदाने नरमेधफलम् । प्रेक्षणीयकन्यादाने राजसूयफलम् । वेश्या(ः) कदम्बकं दत्वा तत्स्थानं गच्छति यत्र सूर्य्यस्तिष्ठति । गोमहिषीगजाश्वदाने अश्वमेधफलम् । सूर्य्याय गौरीगोदाने स्थावरजङ्गमजगद्दानफलम् । स्नानार्थगोदाने कपिलगोशतदानफलम् । गोवृषं पुष्टं दत्वा वृषसन्ततिरोमसंख्ययुगसहस्रं सूर्य्यलोके महीयते । उभयतोमुखी (?) दत्वा सप्तद्वीपमहीदानफलम् । सवृषं गोशतं दत्वा एकविंशतिकुलजैः सार्द्धं सूर्य्यलोके क्रीड़ित्वा तत्र भोगान् भुंक्त्वा प्रलये सूर्य्यमण्डले

प्रविशति । सवृषं गोसहस्रं दत्वा अश्वमेधफलम् । गोयुक्तमश्वयुक्तं काञ्चन(ं) रौप्यं वा रत्नचितं रथं दत्वा सूर्य्यलोकं गत्वा पश्चात् शिवलोके क्रीड़ते । दारुरथविमानेनार्कं प्रयाति । घण्टाभूषितगजदाने युगकोटिसहस्राणि युगकोटिशतानि च स्वर्गं भुंक्त्वा पश्चादिन्द्रः स्यात् । सर्व्व(श)स्यशालिभूमिदाने भूमिरेणुसंख्यं सूर्य्यलोके महीयते ।

एवं सर्व्वत्र विज्ञेयं फलं भूरेणुमानतः ।
ग्रामखेटपुरक्षेत्रविषयादि दिने दिने ॥

नानापुष्पफलान्वितारामदाने वृक्षपत्रफलसंख्ययुगस(ह)स्रं सूर्य्यलोके महीयते । भानोरायतने यागकरणे परमं स्थानं याति । शीतकाले सूर्य्यायतने वह्निदाने अश्वमेधफलम् । सूर्य्यस्नानार्थं पञ्चामृतदाने स्वर्गाप्तिः । दीपार्थतैलं दत्वा नरकं न याति । दीपतैलार्थं जलदाने महापापक्षयः । धनं धान्यं हिरण्यञ्च दत्वा परमां गतिमेति । नवं भारतपुस्तकं दत्वा विष्णुलोके महीयते । रामायणपुस्तकं दत्वा वाजपेयफलम् । भविष्यपुराणपुस्तकं दत्वा राजसूयाश्वमेधफलम् । सूर्य्यायतने वाचले (वाचकाय) वृत्तिं दत्वा इतिहासपुराणपाठप्रवर्त्तने सर्व्वान् कामानवाप्येह सूर्य्यलोके महीयते । तथा भास्कराग्रे दत्वा कल्पायुतसहस्रं सूर्य्यलोके महीयते ।

सुवर्णमणिमुक्तास्व रजतञ्च तथोत्तमम् ।
वज्राणि विविधानीह यच्चान्यदपि दुर्लभम् ॥
पुण्यानि करवीराणि प्रियङ्गु रक्तचन्दनम् ।
गुग्गुलञ्चैव × × नैवेद्यं मोदकाः प्रियाः ॥
मूलाकारो भोजकस्य (?) घृतदीप (:) तथा प्रियः ।
दानं प्रियं खरी श्रेष्ठ (?) ये प्रयच्छन्ति मानवा (:) ॥
तेषां ददाति विश्वेशो भगवान् मुक्तिमीश्वरः ।

षण्मासे संवत्सरे वा भानोर्यात्राकरणे न पुनरुद्भवः । तथा,—

अयं विनैव मन्त्रेण पुण्यराशिः प्रकीर्त्तितः ।
स्यादयं मन्त्रयुक्तश्चेत् पुण्यं शतगुणोत्तरम् ॥
तस्मान्मन्त्रेण सूर्य्याय स्नानं गन्धसमादिकम् (˚ रसादिकम्)
गजाश्वरत्नवस्त्रादि हेमाङ्कञ्च निवेदयेत् ॥
गणोत्कार्येति विज्ञेयो मन्त्रः शब्दार्थसाधकः ।
सर्व्वमन्त्राधिकश्चायं प्रणवद्वयमध्यगः ॥

अथ सौरधर्म्माः ।

भविष्यपुराणे,—

सूर्य्यधर्म्मो बुधैरुक्तः + + + सर्व्वपापहः ।
त्रिसन्ध्यमर्चयेद् भानुमग्निकार्य्यञ्च शक्तितः ।
एककालमथापि स्या (त्) पूजां कृत्वैव भोजनम् ॥
सूर्य्यार्चाग्निपरे (० परो) नित्यं तद्भक्तातिथिपूजकः ।
सर्व्वमैथुनवर्जी स्यात् श्रीमान् सूर्य्यगृहाश्रमी ॥
अर्द्धात् तुरीयभागेन प्रकुर्य्यादर्चनं रवेः ।
धर्म्मार्जनं तदर्द्धेन यतो(ऽ)नित्यं हि जीवनम् ॥
व्रतार्थं ब्रह्मचारी यः सूर्य्यपूजाग्नितत्परः ।
भवेज्जितेन्द्रियः शान्तो नैष्ठिकः स्नातकोऽपिवा ॥
सर्व्वद्वन्द (० द्वन्द्व) विनिर्म्मुक्तः कन्दमूलफलाशनः ।
सौरवैखानसो ज्ञेय (:) सूर्य्यपूजाग्नितत्परः ॥
निवृत्तः सर्व्वसङ्गेभ्यः पूजादानरतः सदा ।
ज्ञेयः सूर्य्यमतीन्द्रोऽयं पूजानिष्ठो जितेन्द्रियः ॥
लिङ्गव्रतस्य यः कुर्य्यात् भस्मना च त्रिपुण्ड्रकम् ।
अवध्य (:) सर्व्वसत्वानां सूर्य्यलोकं स गच्छति ॥
सूर्य्यभक्तैः सदा कार्य्या शिखैका भास्करप्रिया ।

कृत्वा (कृता) ग्निकार्य्यस्य भस्मना तिलकं प्रिया (तिलकक्रिया ।) कालिकापुराणे सूर्य्यवाक्यम्,—

मद्भक्तो नहि भुञ्जीत भाजने परिमण्डले ।
उष्णीषं वर्जयेच्छत्रं शाकं शौवर्चलं तथा ॥
रक्तं माल्यं न सेवेत तथा वस्त्रं विलेपनम् ।
गोमयं मूषिकोत्खाता तथा कृष्णाच मृत्तिका ॥
वर्जयेदुपलेपार्थं धूपं देयं न पाणिना ।
प्रलिप्तं मण्डलं कृत्वा नमस्येन्नतु लङ्घयेत् ॥
अदृष्ट्वा मां न भुञ्जीत विण्मूत्रं नैव दर्शयेत् ।
अहोरात्रोषितो भूत्वा सप्तम्यामर्च्चयेन्नरः ।
केशांश्च दापयेद् भक्त्या रक्तं मुञ्चेन्न सेऽग्यतः ॥
मन्नाम्ना पर्य्यटन्तञ्च मद्भक्तं समुपस्थितम् ।

[1]अथ शिवस्य ।

भविष्यपुराणे,—

शिवमाल्यापनयनं पूजान्ते च प्रमार्जनम् ।
एकैकं तत्र तुल्यं स्यात् चान्द्रायण[2]फलेन तु ॥

[[3]तथा,—शिवायतनसम्मार्गे चान्द्रायणफलम् ।] स्कान्दे [4]संवत्सरं मासमायतनसम्मार्ज्जनात् शिवलोकप्राप्तिः । पूर्व्वोक्तगोमयेन पूर्व्ववदुपलेपनाच्चान्द्रायणफलम् । पञ्चं सम्मार्जनलेपनाद् युगकोटिशतं शिवलोकप्राप्तिः । पूर्व्ववद्दन्तधावनमुखप्रक्षालने ।

मनाभोजज (?) मन्यं वा सर्व्वं यत्नेन मानयेत् ॥
मच्छास्त्रं लिखितं किञ्चिद् भक्तै रम्ये शिलातले ।
मम च्छाचोक्त (?) मन्यं वा न मार्जेत कदाचन ॥
मदर्चाधृतनिर्म्माल्यं शरीरेण तु धारयेत् ।
दशनानां विशुद्ध्यर्थमर्क्ककाष्ठं न भक्षयेत् ॥
हिरण्यखल्लकांस्यार्कदार्वाश्वत्थशमीध्वभिः ।
प्रतिश्रयं पादपीठं पादुके च न धारयेत् ॥
उदयास्तमयञ्चैवमष्टम्यां प्रणमेत् सदा ।
ईदृग्विधानां भक्तानामहं + + न संशयः ॥

इति श्रीमहामहोपाध्यायाग्निचिद् वाजपेयिनरसिंहविरचिते
नित्याचारप्रदीपे नानाविधसूर्य्याराधनम् ।

---

(१) Y. अथ शिवस्य देवकार्य्याणि ।
(२) Y. ० फलेन च ।
(३) Y. Omits the portion bracketed.
(४) Y. संवत्सरं शिवायतनसम्मार्गात् शिवलोकप्राप्तिः ।

भविष्ये,—पञ्चविंशतिपलमितघृतेन लिङ्गमभ्यङ्ग्य वर्षकोटिशतार्ज्जितपापक्षयः। यवगोधूमचूर्णकषायगन्धैरुद्वर्त्त्य सुखोष्णेनाम्बुना स्नाप्य विल्वपत्रैः पीठं विशोध्य धेनु[1]दशसहस्रदानफलं प्राप्नोति। मन्त्राष्टशतजप्तविमलाम्भःस्नानं शिवलोकदम्। लिङ्गं शीतलाम्बुधारयोष्णपयसा घृतेन च क्रमात् स्नपयित्वा पश्चात् पूजां कृत्वाश्वमेधसहस्रफलम्। [2][गव्येन पयसा स्नानं राजतविमानेन सोमलोकप्रदम्। कृष्णाष्टम्यामुपोष्य दध्ना स्नपनं कुलैकविंशोद्धारपूर्व्वकरुद्रलोकमहि(त)त्वदम्।] हस्तयन्त्रोद्भवतिलतैलस्नपनाद् वायुलोकप्राप्तिः। फलोदकेन पितृलोकप्राप्तिः। इक्षुरसेन विद्याधरलोकप्राप्तिः। सितभस्मना स्नपनात् सोमलोकप्राप्तिः। रत्नोदकेन रौद्रम्। कौवेरं हेमवारिणा। पाठलामलकपुष्पोदकेन पद्मोदकेन च शिवलोकः। कर्पूरागुरुतोयेन शिवलोकप्राप्तिः। स्कान्दे,—क्षीरेण सन्ततस्नानादपराधसहस्रनाशः। संवत्सरं क्षीरस्नानाद् बह्वपत्यम्। भविष्ये,—पूर्व्ववद् गोमयादिकृतश्रीवत्सस्वस्तिकध्वजदधिदूर्व्वाक्षतचूताश्वत्थपल्लवादिभिर्नीराजनं पदसंख्ययुगसहस्रशिवलोकदम्।

दशापराधांस्तोयेन क्षीरेण च शतं क्षमेत्।
सहस्रं क्षमते दध्ना घृतेनाप्ययुतं क्षमेत्॥

---

(१) Y. शतसहस्र ०।

(२) In the place of bracketed portion Y reads:—स्नानकाले गीतनृत्यादिकरणम्। यावत् पदानि गीते नृत्ये च तावद् युगसहस्रं रुद्रलोके महि(त)त्वदम्।

आपः क्षीरं कुशाग्राणि [1]दध्याज्यमधुतण्डुलाः।
तिलाश्च सर्षपाश्चैव अर्घ्योऽष्टाङ्गः प्रकीर्त्तितः॥

लिङ्गमूर्द्ध्न्यष्टाङ्गार्घ्यदानाद् दशवर्षसहस्रं रुद्रलोकमहि(त)त्वम्। पुष्पोदकार्घ्यदाने [2]सर्व्वपूज्यत्वम्। गन्धसंयुक्तार्घ्ये दशगुणम्। पञ्चगव्यसंयुक्ते शतगुणम्। अर्घ्यपात्रविशेषात् फलविशेषः। स्नानकुम्भविशेषात् फलविशेषः पूर्ववत्।

तथा,—

अशून्यमस्तकं लिङ्गमभिषेके विशेषतः।
ताम्रेण पद्मपत्रेण [3]पलाशस्य दलेन च॥
शङ्खेन मृन्मयेनाथ शुभेन स्नापयेत् शुभम्।
लिङ्गस्य दर्शनं पुण्यं दर्शनात् स्पर्शनं [4]शिवम्॥
स्पर्शनादर्चनं श्रेष्ठं घृतस्नानमतः परम्॥*

---

(१) Y. तथा वा मधुतण्डुलाः।

(२) Y. सर्व्वभूपत्वम्।

(३) Y. उत्पलस्य दलेन च।

(४) Y. शुभम्।

---

* Y reads the following after this mark :—

अथ घृतकम्बलविधिः।

भविष्यपुराणे,—

आलिङ्गं पीठपर्य्यन्तं यो दद्यात् घृतकम्बलम्।
घृतेन रूपकं रम्यं कृत्वा शम्भोर्महात्मनः॥
मन्वन्तरशतं साग्रं रुद्रलोके महीयते।
सम्यक् प्रेक्षणकं दत्वा रुद्रलोके महीयते॥

सुरूपः सुभगः श्रीमान् परिभ्रष्टोऽपि जायते ।
रूपं पिष्टमयं कृत्वा विचित्रं रत्नभूषितम् ॥
यज्ञोपवीतसंयुक्तं हेमपात्रं विशेषतः ।
दन्तेषु मौक्तिकं न्यस्य प्रवालं मध्यपृष्ठयोः ॥
दद्याद् वज्रञ्च नेत्राभ्यां वैदुर्य्यं वाप्यसम्भवे ।
हेमरूप्यञ्च हस्ताभ्यां ताम्र ( ) पादतले तथा ॥
अण्डजैर्वनजैर्वस्त्रै र्विचित्रैः परिवेष्टयेत् ।
विविधैरथ तोयाद्यै र्लिङ्गपूजां प्रकल्पयेत् ॥
भोजयेत् शिवभक्तांश्च विप्रान् भक्त्या च भोजयेत् ।
प्रीयतां मे महादेवो भक्तांस्तान् चामयेद्विजान् ॥
तैरेव सार्द्धं विप्रस्तु तद्रूपन्तु शिवालये ।
नीत्वा समर्पयेद् वेद्यां शिवलिङ्गसमीपतः ।
सर्व्वयज्ञफलं प्राप्य सर्व्वदानफलानि च ॥
पुरुषो रूपदानेन शिवलोके महीयते ।

अन्यत्रच,—

कुर्य्यान्मकरसंक्रान्तौ लिङ्गे तु घृतकम्बलम् ।
श्राव(श्राप)येद्देवमीशानं चीरसारं घृतं विभो ॥
शालिपिष्टेन दीपांश्च + + + + + कारयेत् ।
तिलैर्होमं प्रकुर्व्वीत दधिमध्वाज्यसंयुतैः ॥
अष्टोत्तरशतं चाज्यं मूलमन्त्रेण मन्त्रवित् ।

अथ घृतकम्बलाभिषेकः ।

भविष्यपुराणे,—

घृताभिषेकं यः कुर्य्यादहोरात्रं शिवस्य तु ।
सूच्णधारेण भाण्डेन पुष्यमासे द्विजोत्तमः ॥
गीतनृत्योपचारेण शङ्खवादित्रनिःस्वनैः ।
कुर्य्याज्जागरणं चात्र प्रदीपाद्युपशोभितम् ॥
समस्तपापनिर्मुक्तः समस्तकुलवर्द्धनः ।
मुक्तः शिवपुरं नित्यं मोदते शिववत् सुखी ॥
ग्रहणे विषुवे चैव पुण्येषु दिवसेषु च ।
घृताभिषेकं यः कुर्य्यान्महापुण्यं समश्नुते ॥

अथ घृतधारा ।

कालिकापुराणे,—

अथाभ्यर्च्य सुगन्धेन विन्यसेद्धेमपङ्कजम् ।
प्रत्यहं वाऽहवेद्धारां यस्तु वै लिङ्गमूर्द्धनि ॥
उत्तरायणमासाद्य ज्ञात्वा संक्रमणं रवेः ।
तदन्ते विधिवत् पूज्य दद्याच्चैव उपस्करम् ॥
गृहं प्राप्य ततो भक्त्या ब्राह्मणान् यतिभिः सह ।
संभोज्य दक्षिणां दत्वा क्षमाप्य च विसृज्य च ॥
दीनार्त्तदुःखितानाथा(न्) कल्पयेदनिवारितम् ।
कीर्त्तिं लोकेऽतुलां प्राप्य भुक्त्वा भोज्यान् प्रकल्पकान् ॥
प्राप्नुयात् परमं स्थानं रुद्रसायुज्यलक्षणम् ॥

अथ महास्नानम् ।

कार्त्तिक्यामथ वैशाख्यामयनादिषु पर्व्वसु ।
दत्वा दीपान् समुद्बोध्य देवस्याग्रे बलिं तथा ॥
भक्त्या मां देवदेवस्य ÷ + + + खि (क्षि) पेत् सुधीः ।
+ + + देवमामन्त्र्य स्वपेद् भूमौ हरिं स्मरन् ॥
भूयः सार्द्धसहस्रेण फलानामैक्षवेण च ।
रसेन कारयेत् स्नानं भक्त्या चोष्णाम्बुना ततः ॥
शीताम्बुना तथोद्वर्त्त्य वस्त्रपूतेन मन्त्रवित् ।
स्नापयेद् भक्तितो भूयो गन्धमन्त्रान्वितेन तु ॥
विधिना स्नाप्य चानेन सह रोचनया लिपेत् (?) ।
कुष्ठकुङ्कुमकर्पूरचन्दनागुरुसक्तया ।
लेपयित्वा ततो लिङ्गमापीठान्तं घनं शुभम् ।
नीलोत्पलसहस्रेण मालां बद्ध्वा प्रपूजयेत् ॥
अलाभे तु सहस्रस्याप्यार्द्धेनैव तु पूजयेत् ।
उत्पलानामलाभेतु पत्रैश्च श्रीतरोर्यजेत् ॥
पद्मैर्वा चम्पकैर्वापि जात्या + ष्टालया (?) तथा ।
पुन्नागैः कर्णिकारैर्वा श्वेतमन्दारजैरपि ॥
दमकै (:) मरु (कुरु) वकैर्वापि शमीशुक्लार्कनागरैः ।
यथालाभन्तु पत्रैर्वा निर्गन्धसुमनोन्वितैः ॥

संपूज्य कारयेद्भक्त्या विमलं पुष्पमण्डपम्।
गुग्गुलुञ्चाज्यसंयुक्तमगुरुं वासितं दहेत्॥
सम्पूज्य गौरीभर्त्तारं गीतवादित्रमङ्गलैः।
शालिपिष्टोद्भवैः शि (सि)द्धैः घृतपूर्णैः समुज्ज्वलैः॥
ततो नीराजनं दीपैः षड्विंशतिश्च कारयेत्।
सर्षपैर्दधियुक्तैश्च दूर्व्वागोरचनायुतैः॥
गन्धपुष्पादिकं दद्याद्भूयो विचिन्त्य शङ्करम्।
शातकुम्भं ततः पद्ममष्टपत्रं सुशोभनम्॥
मध्ये निवेशयेन्मूर्द्ध्नि लिङ्गस्य कुसुमैः सह।
सूक्ष्मवस्त्रयुगं श्वेतं पीतं वा पट्टसम्भवम्॥
चामरं दर्पणञ्चैव दीपवृक्षं प्रदापयेत्।
धूपं साधारणञ्चैव सघटं पूर्णमेव च॥
वितानकं ध्वजं दद्यात् किङ्किणीरसमान्वितम्।
अथाष्टाभिः पिढ़िं पीड्य अङ्गैर्भक्त्या च दण्डवत्॥
ततः किञ्चित् पठेत् स्तोत्रं शारङ्गं भवशङ्करम्।
प्रदक्षिणं ततो गच्छेच्छनैर्निर्माल्यवर्जकः॥
प्रणम्योच्चैः पुनः पश्चान्नैवेद्यं विनिवेदयेत्।
दीनान्धकृपणांश्चैव तर्पयेदन्नदानतः॥
कारयेद् यः शिवे भक्त्या महास्नान(ं) फलं शृणु।
समुद्धृत्य शतं साग्रं कुलानां पापवर्जितः॥
भगवन् ब्रह्मलोकान्तं भुक्त्वा भोगानशेषतः
व्रजे क्रीड़ायने तस्मिन् विमाने सोऽमरैर्युतः॥
भुक्त्वा यत्रेप्सितान् भोगान् शिवसायुज्यतां व्रजेत्।
मायावितानमुत्सृज्य अन्ते मोक्षमवाप्नुयात्॥
केवलेनाप्यथाज्येन दध्ना गव्येन वै तथा।
पयसा पञ्चगव्येन मधुनेक्षुरसेन च॥
यः कारयेन्महास्नानं विधिनानेन संयुतः
सोऽपि तेनैव मार्गेण गमिष्यत् (?) परमं पदम्॥
विधिनानेन निःस्वोऽपि स्नानं तोयेन कारयेत्।
नराणां विंशतिर्यावत् सोऽपि यास्यति तत्पदम्॥

एवमेषहि धर्म्मस्य राशिरन्तविवर्जितः।
मन्त्रयुक्तो नयेद् यस्तु तत्तुल्यो नास्ति धर्म्मवान्॥

मन्त्रः शिवमन्त्रः। लिङ्गपुराणे,—

महास्नानञ्च यः कुर्य्याद् घृतेन दधिना ततः।
स याति मम सायुज्यं स्नानेष्वेतेषु सुव्रत॥
स्नाने शतफलं ज्ञेयमभ्यङ्गे पञ्चविंशति।
द्वे सहस्रे पलानाञ्च महास्नानं प्रकीर्त्तितम्॥
स्नाप्य लिङ्गमपापञ्च गव्येनैव घृतेन च।
विशोध्य सर्व्वद्रव्यैश्च तोयेनाप्यभिषेचयेत्॥
महास्नानेन युक्ते तु स्नानमष्टगुणं स्मृतम्।
जलेन केवलेनैव गन्धतोयेन भक्तितः॥
अनुलेपस्तु सर्व्वत्र पञ्चविंशपलेन वै।
शमीपुष्पञ्च विधिना बिल्वपत्रञ्च पङ्कजम्॥
अथान्यानि च पत्राणि बिल्वपत्रं न सन्त्यजेत्।
दशद्रोणैश्च नैवेद्यं सप्तद्रोणैरथापि वा॥
शतद्रोणसमं पुण्यमाढ़के तु विधीयते।
वित्तहीनस्य विप्रस्य नात्र कार्य्या विचारणा॥
भेरीमृदङ्गमुरजविषाणपटहादिभिः।
वादित्रैर्विविधैश्चान्यैरन्योन्यैर्विविधैरपि॥

महास्नानक्रमः।

अनादि(?)पूर्व्वदिने कृतोपवासो देवस्याग्रे रात्रौ दीपान् समुद्बोध्य अष्टदिक्षु लोकपालेभ्यो बलिं दत्वा देवं विज्ञाप्य गृहं गत्वा स्वपेत्। अपरदिने कृतनित्यक्रियो देवालयं गत्वा पञ्चोपचारेण लिङ्गं सम्पूज्य पञ्चविंशतिपलमितघृतेन लिङ्गमभ्यङ्गं कारयित्वा यवगोधूमचूर्णैर्विलिप्य शुद्धोदकेन संस्नाप्य मूलमन्त्रेण गन्धादिधूपपात्रैः सम्पूज्य पञ्चविंशतिपलमितं घृतं वीक्षणादिभिः संस्कृत्य तेन मूलमन्त्रेण संस्नाप्य शुद्धोदकेन संस्नाप्य पुनर्धूपपात्रैः सम्पूज्य अष्टोत्तरपञ्चदशशतपरिमितैरिक्षुरसं वीक्षणादिभिः संस्कृत्य मूलमन्त्रेण शतेन स्नपयित्वा अष्टविधस्नानम्। तत्रैवं स्वच्छजलहेमयुक्तजलसुगन्धिजलरत्नयुक्तजलसर्व्वौषधियुक्तजलशुद्धजलैरष्टाभिः प्रत्येकमष्टोत्तरसहस्रद्वयपलपरिमितैर्धूपान्तपूजापूर्व्वकं मन्त्रशुद्धोदकस्नानसहितं स्नापयेत्। तत उष्णाम्बुना शीताम्बुना च संस्नाप्य यवगोधूमचूर्णैरुद्वर्त्त्य

वस्त्रपूततोयेन संस्नाप्य पुनर्गन्धतोयेन संस्नाप्य गोरोचनाकुष्ठकुङ्कुमकर्पूरचन्दनागुरुभिर्लेपयित्वा नीलोत्पलसहस्रेण तदर्द्धेन मालां कृत्वा पूजयेत्। तदलाभे तावत्पद्ममालया वा तावत्परिमितजातीचम्पकपाटलकर्णिकारपुन्नागश्वेतमन्दारमदनकुरुवकवकशमीशुक्लार्कनीपेश्वराणामन्यतमस्य मालया वा ततः सम्पूज्य देवस्योपरि पुष्पमण्डपं कृत्वा आज्यं वा सितागुरुगुग्गुलधूपं दत्वा गीतवाद्यादिभिः सन्तोष्य शालिपिष्टोद्भवषड्विंशतिदीपै र्घृतपूर्णैः सर्षपदधिदूर्व्वागोरोचनाक्षतयुक्तपात्रस्थै र्नीराजनं कृत्वा गन्धपुष्पाभ्यां सम्पूज्य अष्टदलस्वर्णपद्मं लिङ्गस्य मूर्द्ध्नि पुष्पैः सह दत्वा सूक्ष्मवस्त्रयुगं श्वेतं पीतं वा पट्टसम्भवं परिधाप्य चामरदर्पणौ समर्प्य दीपवृक्षं प्रज्वाल्य साधारधूपं दत्वा जलपूर्णघटं वितानकिङ्किणीरसनान्वितं जलं दद्यात्। अष्टाङ्गप्रणामं कृत्वा स्तोत्रैः स्तुत्वा प्रदक्षिणं कृत्वा पुनः प्रणम्य दशद्रोणपरिमितमन्नं शतद्रोणपरिमितं वा नानाविधभक्ष्यभोज्यलेह्यपेययुक्तं निवेद्य आचमनं कृत्वा ताम्बूलं निवेद्य पूजां समापयेत्। दीनानापाल्य सन्तोष्य गृहं गत्वा शिष्टरिष्टैः (?)सह भुञ्जीत। आचार्य्यादीनां वरणे पूर्व्व * * * * * (स्व) स्ति वाच्य वरणम्। अन्ते दक्षिणादानं ब्राह्मणभोजन (ं) अच्छिद्रावधारणञ्च। घृताद्येकद्रव्येण महास्नानकरणे घृताभ्यङ्गं कृत्वा गन्धादिधूपान्तैः सम्पूज्य अष्टोत्तरसहस्रद्वयपलमितं घृतं दुग्धं वा संस्कृत्य तेन स्नपयित्वा शुद्धोदकेन संस्नाप्य अष्टविधजलैः • * वत् संस्नाप्य त • म्बुस्नानादि सर्व्वं (ं) कार्य्यं (ं) इति शिवमहास्नानविधिः।

अथ शिवस्य दर्शनप्रदक्षिणनमस्कारादिफलम्।

भविष्यपुराणे,—

लिङ्गस्य दर्शनं पुण्यं दर्शनात् स्पर्शनं वरम्।
सकृत् प्रसङ्गाद् वा दृष्ट्वा सर्व्वपापैः प्रमुच्यते ॥

स्कान्दे,— सुदूरमपि गच्छेत यत्र देवो महेश्वरः।
दृष्ट्वा लिङ्गं महेश (स्य) पातकै र्विप्रमुच्यते ॥
सप्तजन्मकृतै र्देही मनोवाक्कायकर्म्मजैः।
पूजितं वा महेशानं पूज्यमानमथापि वा ॥
दृष्ट्वा प्रयाति वै मर्त्त्यो ब्रह्मलोकं न संशयः।
एकः पूजयते भक्त्या भक्त्या चान्यः प्रपश्यति ॥
तुल्यमेव फलं ताभ्यां भक्तिरेवात्र कारणम्।
यः प्रातर्देवदेवेशं शिवलिङ्गं (प्रद) क्षिणम् ॥

पश्येत् स याति सर्व्वस्मादधिकां गतिमेव हि।
मध्याह्ने च महादेवं दृष्ट्वा यज्ञफलं लभेत् ॥
सायाह्ने सर्व्वयज्ञानां फलं प्राप्य विमुच्यते।
प्रदोषे शङ्करं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ॥

स्कान्दे,—

स्नातो यः पूर्व्वसन्ध्यायां सदा मामभिगच्छति।
स स्मृतो यक्षरक्षस्य (?) मन्त्री भवति वीर्य्यवान् ॥

तथा,—

प्रातस्तद्दर्शनं * * वै * • • • व्यपोहति।
आजन्मनस्तु मध्याह्ने सप्तजन्मकृतं निशि ॥
अर्द्धयामकृतं पापं दृष्ट्वा पर्व्वणि सन्त्यजेत्।
सोमनाथं जगन्नाथं दृष्ट्वा स्पृष्ट्वा विकल्मषः ॥
जायते नात्र सन्देहः अपि चाण्डालयोनिजः।

योगशिवीये,—

अङ्गुष्ठमुच्छ्रितं कृत्वा बद्ध्वा मुष्टिञ्च दक्षिणे।
पिण्डिकायां न्यसेत् लिङ्गमङ्गुष्ठेन च संस्पृशेत् ॥
* * महेशमन्त्राभ्यां स्पर्शनं भूतिमिच्छताम्।

भविष्ये,—

कृत्वा प्रदक्षिणं भक्त्या शिवस्यायतने नरः।
अश्वमेधसहस्रस्य सुयष्टस्य फलं लभेत् ॥

अन्यत्रच,—

प्रदक्षिणत्रयं कुर्य्यात् प्रासादस्य समन्ततः।
सव्यापसव्यन्यायेन मृदुना यात्य * * नरः ॥
पदे पदेऽश्वमेधस्य यज्ञस्य लभते फलम्।
सव्यं व्रजेत् ततोऽसव्यं प्रणा * * * लङ्घयेत् ॥

अस्यानेकगुणविधानात् प्रकरणान्तराच्च भिन्नत्वेऽपि सधर्म्मकत्वादधर्म्मके भविष्यपुराणीयप्रदक्षिणेऽतिदेशात् सव्यापसव्यादिधर्म्मप्रवृत्तिः शिवप्रदक्षिणत्वावान्तरसादृश्यात्।

एवम्भूतमना(ः) कुर्य्यात् शिवे प्रदक्षिणत्रयम्।
छिन्नस्तेन भवग्रन्थिर्न तस्य पुनरुद्भवः ॥

अत्रापि धर्म्मप्रवृत्तिरेव । यद्यपि,—

चण्डस्य वृषभस्यापि देवस्य च शुभार्थिभिः ।
मध्ये यात्रा प्रकर्त्तव्या मन्त्रलिङ्गक्रियामयम् ॥

इति ।

बाणेश्वरेऽभूलिङ्गे च सोमसूत्रं न विद्यते ।

इति च कृत्रिम एव लिङ्गे सोमसूत्रलङ्घने दोषः। सोमसूत्रप्रणालादिलङ्घने महद्भयमित्यपि सामान्यं कृत्रिमपरमेव । तथापि पुरुषार्थदोषो बाणे स्वयमे + (स्वयम्भुवि) च माभूत् । सव्यासव्यादियुक्तप्रदक्षिणविधिः स्याद्देवाविशेषात् । भविष्ये,—

नमस्कृत्य महादेवमश्वमेधफलं लभेत् ।
प्रणम्य दण्डवद्‌ भूमौ नमस्कारेण योऽर्चयेत् ॥
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ।

यत्र प्रणामपूर्व्वकाञ्जलिकरणं शिरसि फलाय विधीयते प्रणामनमस्कारयोर्भेदात् ।

जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवेशे सर्व्वान् कामानवाप्नुयात् ॥

भविष्ये— अर्घ्यपात्रं तथा पुष्पमन्यद्‌ वा यागसाधनम् ।
गृहीत्वा नैव कुर्व्वीत देवतायाः प्रदक्षिणम् ॥
देवशक्तिपरो द्वारवाहनानाञ्च मध्यतः ।
प्रदक्षिणं न कुर्व्वीत कुर्य्यात् सर्व्वस्य वाह्यतः ॥
प्रासादे मण्डपे गेहे वृक्षमूले वनेऽपि वा ।
पूज्यन्ते देवता यत्र तत्रैवं विधिमाचरेत् ॥
शिवां हुत्वा जगत् कृत्स्नं दृष्टिपातेन धारयेत् ।
यत् सम्भार्य्य जगत् कृत्स्नमग्निकार्य्येण तल्लभे(त्) ॥

अग्निकार्य्यञ्च—

तैले होमं प्रकुर्व्वीत दधिमध्वाज्यसंयुतैः ।
अष्टोत्तरशतञ्चाज्यं मूलमन्त्रेण मन्त्रवित् ॥

इति वचनादेव (का) र्य्यम् । स्कान्दे,—

इदञ्च परमं गुह्यं सोमे देवि निवेदयेत् ।
अर्कपर्णपुटं पूर्णं घृतस्य मधुनस्तथा ॥
अर्चयित्वा तु मां देवि यो मे नामानि कीर्त्तयेत् ।
चतुर्द्दश्यामथाष्टम्यां पक्षयोरुभयोरपि ॥

वामदेव सुदेवेति हरगुप्तेति वा पुनः ।
उमापते नीलकण्ठ शान्त श्रीकण्ठ गोपते ॥
सर्व्व भीम पशुपते शङ्कर प्रभवेति च ।
महादेवेति चाप्यन्य(त्) नाम गुह्यं प्रकीर्त्तयन् ॥
सर्व्वपापैः प्रमुच्येत दिवि देवैश्च पूज्यते ।
एतेषामेकमपि यः कथयेद्‌ वा पठेत् सदा ॥
स देहबन्धं भित्त्वा तु मामेव प्रतिपद्यते ।

तथा,— इमानि तु महाभागे सोमनामानि कीर्त्तयेत् ।
समस्त लिलयेद्‌ (?) भर्गो भस्मशायी यतव्रतः ॥
वामदेवः प्रशान्तश्च सर्व्वश्चैवाग्निलोचनः ।
तपसार्चाप्रियः सेव्यो यवरूपोऽन्तकालकृत् ॥
पुराणः पुरुहूतश्च मृत्योर्मृत्युर्जितेन्द्रियः ।
अतीन्द्रियो निरिन्द्रियः सर्व्वभूतहृदि स्थितः ॥
संसारचक्री योगात्मा कपाली दण्डिरेव च ।
महादेव महादेव महादेवेति चैवहि ॥
पठेदेत + मयवान् शृणुयाद्‌वापि यः सदा ।
स देहभेदमासाद्य योगात्मा गणगो भवेत् ॥

तथा,—

कीर्त्तयन्ति च ये रुद्रं सकृदप्यत्र मानवाः ।
सर्व्वपापैः प्रमुच्येत सप्तजन्मकृतैरपि ॥
अश्वमेधसहस्राप्तिर्महादेवेति कीर्त्तनात् ।
हर इत्युच्चरन् मर्त्त्यः सर्व्वपापैः प्रमुच्यते ॥
ओं नमो नीलकण्ठाय इति पुण्याक्षरात्मकम् ।
चन्द्रमाह सकृद्‌ वा यः पातकैः स विमुच्यते ॥
त्रिपुरहर त्रिदिवेश शम्भो त्रिनयन शङ्कर रुद्र शूलपाणे ।
भवशरणमितीरयन्ति येऽस्मिन् भवजलधौ न भवन्ति ते मनुष्याः ॥
यज्ञेश्वर महादेव जय भूतपते हर ।
जयाशेषमहापापमोचक त्रिपुरान्तक ॥
इति सङ्कीर्त्य वृजिनं त्यक्त्वा याति परां गतिम् ।
मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ॥

अमृतेशाय सर्व्वाय महादेवाय ते नमः।
एतानि मम नामानि यः पठेच्छिवसन्निधौ ॥
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम्।
सकृदुच्चार्य्य रुद्रेति सर्व्वपापैः प्रमुच्यते ॥
हरेति कीर्त्तयेत् वापि ज्योतिष्टोमफलं लभेत्।
भवेति कीर्त्तयेद् वापि सर्व्व (सर्प) मेधफलं लभेत् ॥
सर्व्वेत्युक्त्वा नमस्कृत्य शिवलोके महीयते।
वेदैरधीतैः किं तस्य महादेवेति यो वदेत् ॥
शिवेति सकृदुच्चार्य्य मोक्षमाप्नोति मानवः।
अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ॥
यः स्मरेद्देवमीशानं न स पापेन लिप्यते।

स्कान्दे,—

निर्म्माल्यं यो हि मे देवि शिरसा धारयिष्यति।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः ॥
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते।
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत् ॥
तस्य पापं महत् शीघ्रं नाशयिष्ये महाव्रते।

अत्र धारणाङ्गतया शुचित्वं विधीयते तेन अशुचिधारणे दोषः शुचित्वप्ररोचनार्थो न पुनरशुचेर्धारणे नरकपातः। केवलमविहितरुद्रनिर्म्माल्यस्पर्शनमशुचेः स्नाननिमित्तपरम्। निर्म्माल्य (म्) अपकर्षणादिविहितत्वा(त्) तदा स्पर्शन (म्) स्नाननिमित्तम्। तेन शुद्धकाले धारणमशुद्धकाले त्यागः। निर्म्माल्यञ्चाङ्गलिप्तपत्रपुष्पहृतादि न तु नैवेद्यम्। ब्रह्माण्डे –

रुद्राङ्गलग्नं — — — दहेत् सर्व्वञ्च तत्क्षणात्।

इति निर्म्माल्यप्रतिपत्तिमुक्त्वा तस्मादङ्गेभ्यश्च शाम्भव — — नैवेद्यस्य पृथक्प्रतिपत्तिविधानात्।

यत्तु योगशिवीये,—

वितानच्छत्रचिह्नानि वस्त्रं भूषणवाहनम्।
गोभूहिरण्यवासादि देवद्रव्यमुदाहृतम् ॥
नैवेद्यगन्धपुष्पाद्यमचिरा + यते च यत्।
तन्माल्यमुपभुक्तं सन्निर्म्माल्यमभिधीयते ॥

शिवार्चारूढनैवेद्यभक्षणं लङ्घनं स्रजाम्।
दानञ्चादीक्षितस्यापि निषिद्धं त्र्यम्बकाज्ञया ॥

उभयथापि निर्म्माल्यधारणं शुचिना कार्य्यम्। नैवेद्यस्य निर्म्माल्यभिन्नत्वेन

न भुञ्जीत निवेद्यान्नं गणानाञ्च शिवस्य च।

इति वाक्यान्तरात् तन्निषेधोऽस्त्येव।

न धारयेत् क्वचित् शम्भोर्निर्म्माल्यं न च दापयेत्।

धारयेत् उपयोगार्थं गृहादौ न रक्षयेदित्यर्थः। एवम्,—

क्रव्यादो जायते दाना(त्) + + सप्तस्य (?) भक्षणात्।
लङ्घनात् सिद्धिहानिः स्यान्निदध्याद्गहनोदके ॥

इति। अस्य प्रतिपत्तिशेषत्वेऽपि स्मृत्यन्तरे शिवनिर्म्माल्यदानभक्षणनिषेधात् तदपेक्षितानिष्टफलं स्यादेव। यत्रापवादवाक्यं पठति,—

रत्नहेमास्थिलिङ्गेषु चले लिङ्गे प्रदक्षिणे।
गुरुष्वपि न निर्म्माल्यं नाख्यासु प्रतिमासु च ॥

अत्र प्रदक्षिणपदेन बाणस्वयम्भूलिङ्गमुच्यते। तस्य सूत्राभावेन प्रदक्षिणसम्भावनया प्रदक्षिणयोग्यत्वसम्भवात्। गुरुषु स्थूलतरेषु प्रासादं विना वह्निस्थापिताकाशलिङ्गेषु। आख्यास्विति प्रतिमाविशेषणं तेन शिवाख्यासु प्रतिमास्वित्यर्थः। तेन कृत्रिमस्थापितलिङ्गमात्रे दोषः। नान्यत्रेति। अस्य प्रामाण्येऽपि स्वयम्भू बा(ण) चलरत्नहेमास्थिलिङ्गप्रतिमानैवेद्यमलग्नञ्च प्रतिपत्त्यन्तरविधानादेवाभयम्। अपवादवचनादपि कदाचित् भक्षणे न दोषः।

यत्तु,—

पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधम्।
अनिवेद्य न भोक्तव्यं यच्चान्यदुपकल्पितम् ॥

इति तद—रा (?) शिवभक्तस्य स्वभोज्ये शिवोपभुक्तिचिन्तामात्रपरमिति वदन्ति।

अथ शिवस्य गन्धः।

भविष्यपुराणे,—

अथानुलेपनं कृत्वा वरैर्गन्धैः सुगन्धिभिः।
वर्षकोटिशतं दिव्यं शिवलोके महीयते ॥
गन्धानुलेपनं पुण्यं द्विगुणं चन्दनस्य च।
चन्दनादगुरोर्ज्ञेयं पुण्यमष्टगुणं नृप ॥

कृष्णागुरोर्विशेषेण द्विगुणं फलमाप्नुयात्।
तस्मात् शतगुणं पुण्यं कुङ्कुमस्य विधीयते ॥
चन्दनागुरुकर्पूरैः श्लक्ष्णं पिष्टैः सकुङ्कुमैः।
शिवस्याङ्गं समालिप्य कल्पकोटिं वसेद्दिवि ॥
संवीज्य तालवृन्तेन शुभगन्धैः प्रलेपितम्।
दशवर्षसहस्राणि वीर शिवपुरे वसेत् ॥

तालवृन्तदाने दशवर्षसहस्रं शिवलोके वासः। मयूरव्यजनदाने वर्षकोटिशतं वायुलोकाप्तिः। हेमरत्नदण्डचामरदाने चामरहस्तस्त्रीसेवितस्य सूर्य्यपुराप्तिः।

शिवस्य पुष्पाणि।

भविष्यपुराणे,—

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः।
अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्ज्जितैः ॥
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेत् शिवम्।

अत्र पूर्व्व(व)देव पुष्पाणां भविष्यपुराणोक्तानां पूजाङ्गत्वं गुणफलसम्बन्धश्च।

अर्कपुष्पे तथैकस्मिन् शिवाय विनिवेदिते।
दश दत्वा सुवर्णस्य यत् फलं तदवाप्नुयात् ॥

तत्फलञ्च शिवलोकवासः। अर्कपुष्पसहस्रतुल्यफलं करवीरकस्य दाने। जातीपाटलविजयश्वेतमन्दारसितपद्मानि करवीरसमानि। करवीरसहस्रतुल्यं विल्वपत्रम्। विल्वपत्रसहस्रतुल्यं बृहतीपुष्पम्। बृहतीसहस्रतुल्यं द्रोणपुष्पम्। द्रोणपुष्पसहस्रतुल्यमपामार्गपुष्पम्। तत्सहस्रतुल्यं कुशपुष्पम्। तत्सहस्रसमं नीलोत्पलम्। तत्सहस्रसमं वकपुष्पम्। वकसहस्रसमं धूस्तूरम्।—

नागपङ्कजपुन्नागा धूस्तूरस्य समाः स्मृताः।

तथा अखण्डविल्वपत्रैः शिवलोकमहि(त)त्वम। धूस्तूरे गोलक्षफलम्। बृहतीपुष्पैर्गवायुतफलम्। अशोकश्वेतमन्दारकर्णिकारवककरवीरार्कमन्दारशमीतगरकेशरैर्यथालाभं पूजने रुद्रकन्यासमाकीर्णपुष्पमालायुक्तसूर्य्यकोटिविमानेन सूर्य्यलोके महीयते। अपराजिता श्वेतमन्दारप्रसिद्धिः। अपरो मन्दार(:) पारिभद्रः। स्कान्दे अर्ककरवीरविल्ववकैर्लिङ्गपूजने दिव्यवर्षसहस्रशतं स्वर्गः। भविष्यपुराणे शिवस्योपरि पुष्पमण्डपकरणं सर्व्वौषधि — — — शिवपुरवासाय। शिवस्य(?)हस्य पुष्पमालिकाभि(:) मण्डने अक्षयलोकाप्तिः। मालाभि(:) लिङ्गदेहवेष्टने देवीपुत्रत्वम्। देवीपुराणे वैशाखे पाटलया पूजा ज्यैष्ठे पद्मेन आषाढ़े विल्वकल्हारैः

श्रावणे नवमालिकया कदम्बैश्चम्पकैर्भाद्रपदे आश्विने पद्ममालया कार्त्तिके शतपत्रपत्रिकया मार्गे नीलोत्पलैः पौषे कुब्जकैः माघे कुन्दपुष्पैः फाल्गुने मरुवकैः चैत्रे शतपत्रैः पूजने सर्व्वकामावाप्तिफलम्। तथा,—

पञ्चाक्षरेण मन्त्रेण विल्वपत्रैः शिवार्च्चनम्।
करोति श्रद्धया यस्तु स गच्छेदैश्वरं पदम् ॥

कृष्णाष्टम्यां विल्वपत्रैरखण्डैरर्च्चने ब्रह्महत्यापापक्षयः। माघकृष्णचतुर्द्दश्यां विल्वदलार्चने पृथ्वीदानफलम्। तुलसीदलदानेन मनोवाक्कायजन्मपापक्षयः।

अर्केण श्रियमागच्छेत् मोक्षं धूस्तूरकेण तु।
नीलोत्पलैर्लभेद् भोगान् ज्ञानं मल्लिकया लभेत् ॥
कुन्दैश्च पुत्रलाभः स्यादुन्मत्तैर्गणपो भवेत्।
पूजयेत् पुत्रकामस्तु केतक्या परमेश्वरम् ॥

वक्ष्यमाणकेतकीनिषेधः पूजाविषयः। सुनिषण्णदाड़िमकुष्माण्डकर्कटीरक्तचन्दनकोकिलाक्षकोविदारपुष्पाणि पूजाङ्गानि न पृथक् देयानि। तथा केशरवकुल गिरिकर्णिकाकाशपुष्पमन्दारापराजिताकुब्जकशङ्खिनीतगरकुरण्टकशिंशपोदुम्बरजयापामार्गपुष्पकुसुम्भकुङ्कुमनीलकुमुदरक्तोत्पलस्थलपद्मानि निर्दिश्य

गृह्णामि शिरसा देवि यो मे भक्त्या निवेदयेत्।

इति वचनात् पूजाङ्गानि। गिरिकर्णिका अपराजिता श्वेता नीला च। जया कुटजः।

तथा स्कान्दे,—

तुलस्यगस्त्यपुष्पाणि गुरुकुन्दं सुकुन्दकम्।
अशोकः किंशुकश्चैव शस्तं शङ्करपूजने ॥

अत्र बृहत्कुन्दगन्धकुन्दयोर्विधिः। भविष्ये कुन्दनिषेधस्तदितरकुन्दपरः।

केतकी अतिमुक्तश्च कुन्दो यूथी मदन्तिका।
शिरीषसर्जबन्धूककुसुमानि विवर्ज्जयेत् ॥
अङ्कोलिपत्रकुसुमं करञ्जोड्रतरूद्भवम्।
वैभीतकानि पत्राणि कुसुमानि विवर्जयेत् ॥

अङ्कोलिः काङ्को इति प्रसिद्धम्। ओड्रपुष्पं जवापुष्पम्।

निर्गन्धान्युग्रगन्धानि कुसुमानि विवर्जयेत्।

पुष्पालाभे पत्राणि पत्राभावे फलानि फलाभावे तृणगुल्मौषधिविधानं पूजाङ्गम्।

भविष्ये,— धूस्तूराणि कदम्बानि रात्रौ देयानि शङ्करे।
दिवा शेषाणि पुष्पाणि दिवारात्रौ च मल्लिका॥

पुष्पफलवाक्यविशेषोऽयम्। तेन न परिसंख्यादोषः।

प्रहरं तिष्ठते जाती करवीरमहर्निशम्।

अथ धूपाः।

भविष्यपुराणे,—

कृष्णागुरु सकर्पूरं धूपं दद्यान्महेश्वरे।
नैरन्तर्य्येण मासार्द्धं तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
भुङ्क्ते शिवपुरे भोगान् तस्यान्ते च महीपतिः॥

पक्षं सघृतगुग्गुलुधूपदानात् शिवलोके महीयते। कृष्णचतुर्द्दश्यां सघृतगुग्गुलु-धूपदाने शिवसालोक्यम्।

देवदारुसमेतञ्च सर्व्वश्रीवासकुट्टकम्।
श्रीफलञ्चाज्यसम्मिश्रं दत्वाप्नोति परां गतिम्॥
एभ्यः सौगन्धिकं धूपं षट्सहस्रगुणोत्तरम्।
अगुरु दशसाहस्रं द्विगुणं वा सितागुरु॥
गुग्गुलु दशसाहस्रं सघृतं द्विगुणं भवेत्।

द्विपलसहस्रमाहिषाख्यगुग्गुलुमधुघृतधूपेन शिवतुल्यः। स्कन्दपुराणेन नन्दि-तुल्यः। स्कान्दे अमावास्यायां सघृतक्षीरगुग्गुलुधूपदानेनाक्षयस्थानाप्तिः। कवाट-द्वारा दिक्षु पुष्पमालाभिर्मण्डयित्वा धूपने स्वामोदेन दिशः पूरयन् कल्पकोटिशतं शिवलोके महीयते। रुद्राहत्तौ शिवालये धूपने शिवतुल्यः स्यात्।

अथ दीपाः।

भविष्यपुराणे,—

घृतदीपप्रदानेन शिवाय शतयोजनम्।
विमानं लभते दिव्यं सूर्य्यकोटिसमप्रभम्॥

कार्त्तिके मासि विशेषतश्च चतुर्द्दश्याममावास्यायां दीपमालाकरणे दीपसंख्ययुग-सहस्राणि रुद्रलोके महीयते। शिवायतने दीपद्योद्बोधने शिवलोकाप्तिः। शिवस्याग्रतः शिरसि ललाटे हस्ताभ्यां वक्षसा दीपधारणे सकलरात्रिनयने कल्पायुतशतं दिव्यं शिवलोके महीयते। स्कान्दे कार्त्तिके प्रत्यहं दीपमालादान-मन्ते ब्राह्मणभोजनं गाणपत्यफलाय।

अथ नैवेद्यम्।

शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम्।
शिवाय तच्चरुं दद्याच्चतुर्द्दश्यां विशेषतः॥
संयावकृशरापूपपायसं यावकं तथा।
घृतपूरादिसम्मिश्रमेवमादि प्रकल्पयेत्॥
यावन्तस्तण्डुलास्तस्मिन् नैवेद्ये परिसंख्यया।
तावद्युगसहस्राणि रुद्रलोके महीयते॥

गुड़खण्डयुतघृतपाचितभक्ष्यनिवेदने फलं शतगुणम्।

सर्जकापानकाद्याना(म्) लसां चल माप्यते। (?)

तदङ्गवासितजलस्य। स्कान्दे,—

दक्षिणाय(ण संक्रान्तौ) पायसं घृतसंयुतम्।
निवेदयेद् वर्षमेकं स मे न विषमो भवेत्॥
चरवो दशसाहस्रा यावकस्य चतुर्गुणः।
शेषाश्च चरवः सर्व्वे यावकार्द्धेन सम्मिताः।
घृतपात्रं समं ख्यायं(?)इह प्रेत्य च शाश्वतम्।
मातुलुङ्गफलादीनि सुपक्वानि निवेदयेत्॥
शिवाय तत्फलं तस्य यद्भक्ष्याणां निवेदने।

तथा,—

रुद्रायान्नप्रदानेन यावत् सिक्थोऽमरैः सह।
षोड़शैवाब्दलक्षाणि वसेत् श्रद्धासमन्वितः॥

अथ शिवप्रदेयानि।

भविष्ये,—

सर्वेषामेव पात्राणां परं पात्रं महेश्वरः।
शिवे भद्रं हुतं जप्तं बलिपूजानिवेदनम्॥
एकान्ततोऽनन्तफलं तद्भवेन्नात्र संशयः।

तथा, —

वासांसि सुविचित्राणि सारवन्ति मृदूनि च।
धूपितानि शिवे दद्याद् विकोशानि नवानि च॥
यावत् तद्वस्त्रतन्तूनां परिमाणं विधीयते।
तावद्युगसहस्राणि रुद्रलोके महीयते॥

त्रिवृत् शुक्लञ्च पीतं वा पट्टसूत्रादिनिर्म्मितम् ।
दत्वोपवीतं रुद्राय भवेद् वेदान्तगः सुखी ॥
वृट्मात्रन्तु(?)यो दद्याद्धेमं लिङ्गे समौक्तिकम् ।
इन्द्रस्यार्द्धासने तावद् यावदिन्द्राश्चतुर्द्दश ॥

नन्दिपुराणे,—

मुक्तां मुक्तार्द्धमात्रं वा अर्द्धं वा प्रतिवासरम् ।
कनकं यस्य लिङ्गे तु लभेत् पदमनुत्तमम् ॥
एवमर्थानुसारेण फलं ज्ञेयं समासतः ।
योऽर्कपत्रपुटे कृत्वा मधुपर्कममन्त्रकम् ।
निवेदयति सर्व्वाय सोऽश्वमेधफलं लभेत् ॥

भविष्ये,—

सर्व्वस्य पुरतो दत्वा दर्पणन्तु सुनिर्म्मलम् ।
कल्पायुतसहस्रन्तु शिवलोके महीयते ॥

तथा,—

श्वेतं महाध्वजं दत्वा परं यान्ति शिवान्तिकम् ।

शिवगृहे ध्वजमालादानेऽष्टदिक्षु ध्वजाष्टकदाने वा कल्पायुतशतं वा दिवि मोदते । स्कान्दे,—

छत्रं + दद्यात् यः सोऽपि दीव्यते तेजसा सह ।

भविष्ये,—

शरच्चन्द्रांशुविमलं मुक्तादामोपशोभितम् ।

मणिकाञ्चनान्यतमदण्डं छत्रं दत्वा विचित्रच्छत्रशोभितो विमानशतसम्भोगैः शिवपुरे चिरं स्थित्वा समुद्रपर्य्यन्तां महीं भुङ्क्ते । घण्टालासमायुक्तमहास्वनकांस्य लोहान्यतममयघण्टायाः शिवालये बन्धने चीर्णाकर्ण (?)शततुल्यः शिवलोके महीयते । शिवाय प(य)स्विनीगोदाने सचराचरजगद्दानफलम् ।

वृषभं शुक्लवर्णं वा नीलं वा विनिवेदयेत् ।
यावत्प्रसूतिरोमाणि तत्प्रसूतिकुलेषु वै ॥
तावद्युगसहस्राणि शिवलोके महीयते ।
शिवाग्निकार्य्ये कपिलां दत्वा गोशतजं फलम् ॥
क्रोशमात्रं परं क्षेत्रं शिवस्य परमात्मनः ।
देहिनां तत्र पञ्चत्वं शिवसायुज्यकारणम् ॥

मनुजैः स्थापिते लिङ्गे क्षेत्रमानमिदं स्मृतम् ।
स्वायम्भुवे सहस्रस्य दीर्घं चैव तदर्द्धकम् ॥(?)
यः कुर्य्याद् दीर्घिकां वापीं कूपं वापि शिवालये ।
त्रिसप्तकुलसंयुक्तः शिवलोके महीयते ॥

स्कान्दे — दद्यात् कृष्णतिलांश्चैव तथा सिद्धार्थकांश्च हि ।
यो मे देवि महाभक्त्या स मे न विषमो भवेत् ॥

तथा,— गोचर्म्ममात्रमपि वा यो मे दद्याद् वसुन्धराम् ।
स मे पुरं समासाद्य गणेशैः सह मोदते ॥

अथ शिवधर्म्माः ।

तत्वसारसंहितायाम्,—

अखण्डदण्डी भवेन्नित्यं शिवपूजापरायणः ।
सिद्धक्षेत्रनिवासी च शैवीं सिद्धिमवाप्नुयात् ॥

तथा,— लिङ्गार्च्चनं रुद्रजपो व्रतं शिवदिनत्रये ।
वाराणस्याञ्च मरणं मुक्तिरेषा चतुर्विधा ॥
एकादश्यष्टमी चैव चतुर्दशी शिवप्रिया ।
तासामाद्यामुपवसेद् विना नाद्यात् तथान्ययोः ॥

अत्र शिवप्रीत्यर्थं एकादशीव्रते शिवपूजाप्यङ्गम् ।

कालोत्तरे,—

दीक्षितानां क्रमेणैव शिवाचारो निगद्यते ।
किं वर्ज्यं किञ्च कर्त्तव्यं शिवमार्गे स्थितेऽप्यथ ॥
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोस्तथा ।
व्यतीपातेषु सर्व्वेषु दिनवृद्धौ दिनक्षये ॥
संक्रान्तावयनाभ्यान्तु षड़शीतिमुखे तथा ।
द्विगुणं पूजनं होमं जपं नक्तेन वर्त्तनम् ॥
प्रीतेषु रक्षणं कार्य्यं वात्सल्यञ्च तपस्विषु ।
कारुण्यं सर्व्वभूतेषु क्षमा सत्यमचापलम् ॥
अनृतं गुरुदेवार्थं न दोषाय प्रकल्पते ।
रुद्राक्ष(') कण्ठकार्य्यं + समञ्च विषमं दृढ़म् ॥
एकत्रिपञ्चवदनं यथालाभन्तु धारयेत् ।
द्विचतुःषण्मुखं शस्तमव्रणं तीक्ष्णकण्टकम् ॥

दक्षबाहौ शिखायां वा धार्य्यञ्च चतुराननम् ॥
अधारणान्महादोषः सिद्धयस्तस्य दूरतः ।
रुद्राक्षो धारणीयस्तु दीक्षितैश्चाप्यदीक्षितैः ॥
नित्यं हेममयी धार्य्या मुद्रिका दक्षिणे करे ।
पद्मरागान्विता कार्य्या नीलेन रचिताऽथवा ॥
धार्य्ये विचित्रहेमाढ्ये कुण्डले रचनान्विते ।
शिवसंज्ञा द्विजस्यैव कवराख्या(?)न्टपस्य च ॥
वैश्यानां शैवसंज्ञा च शूद्रानां + गणान्वितम् ।
अनाथदुर्व्वलं भीतं दुर्गस्थं न परित्यजेत् ॥
गवामुत्थापनं कार्य्यं मग्नानां कर्दमेषु च ॥
चोदको बोधकश्चैव मोक्षदस्तु तृतीयकः ।
शिववत् पूजयेत् सर्व्वान् यदक्षेमो यदा न्टणाम् ॥
यः प्रेरकस्तु जन्तूनां शिवे प्रेतस्य चोदकः ।
दीक्षागुरुर्मोक्षदस्तु बोधकः शास्त्रदर्शकः ॥

तथा,—

स्नानं पूजा जपो ध्यानं होमश्चैव तु पञ्चमः ।
इति नित्यं सदा कुर्य्यात् परशास्त्रं विवर्ज्जयेत् ॥
पूजनीयो महादेवो नापरं मनसा स्मरेत् ।
न वामहस्ते पूजा तु कर्त्तव्या मनसा अपि ॥
वामहस्तेन लिङ्गन्तु नैव स्पृश्यं कदाचन ।
वामाचारो न कर्त्तव्यः तत्र निन्दा(ं)च वर्जयेत् ॥
न निन्दाकरणं देवो न शास्त्रं शिवभाषितम् ।
शङ्करो नार्चितो यावत् तावन्नान्य(त्)समाचरेत् ॥
शिववत् शिवभक्तास्तु द्रष्टव्याः शिवमिच्छता ।
न शून्यमस्तकं लिङ्गं दृष्ट्वा यायात् कदाचन ॥

इति श्रीमहामहोपाध्यायाग्निचिद्वाजपेयिनरसिंहविरचिते
नित्याचारप्रदीपे नानाविधशिवाराधनकर्म्माणि ।

---

[1]ब्रह्मणः ।

भविष्यपुराणे,—सम्मार्ज्जने चान्द्रायणफलम् । लेपने अग्निष्टोम-फलम् । मुखक्षालनम् । [[2]दन्तधावनम् ।] पञ्चविंशतिपलमित-घृतेनाभ्यङ्ग वर्षकोटिसहस्रार्जितपापक्षयः । यवगोधूमचूर्णैरुद्-वर्त्तनम् । [3]तप्तेन शीतेन जलेन स्नानम् । स्नानकाले गीतनृत्यादि पूर्व्ववत्फलदम् । नीराजनं पूर्व्ववत् । कल्पकोटिसहस्रार्जित-पापक्षयार्थं ब्रह्माणं घृतेन स्नापयेत् । शुक्लप्रतिपदि घृतस्नानादेक-विंशकुलमुद्धृत्य ब्रह्मलोकप्राप्तिः । क्षीरस्नाने गवायुतदानफलम् । चतुःषष्टिपलपयसा स्नानं ब्रह्मलोकाप्तये । दध्ना स्नानाद् विष्णु-लोकप्राप्तिः । इक्षुरसस्नानाद् ब्रह्मलोकप्राप्तिः । मन्त्रपूतकपिला-पञ्चगव्यकुशवारिस्नानं पूर्व्वतः शतगुणम् । फलोदकस्नानादर्क-सालोक्यम् । सर्व्वौषधिस्नानात् कामगविमानेन ब्रह्मलोकप्राप्तिः । गन्धचन्दनोदकेन स्नानाद्रुद्रलोकप्राप्तिः । पाटलोत्पलकरवीर-पद्मानामेकतमोदक[4]स्नानाद् ब्रह्मलोकप्राप्तिः । कर्पूरागुरुतोय-स्नानाद् ब्रह्मलोकप्राप्तिः । गायत्रीशतजप्तनिर्मलाम्भःस्नानं ब्रह्म-लोकदम् । शीताम्बुना धारोष्णपयसा घृतेन च क्रमात् स्नपयित्वा

(१) Y. अथ ब्रह्मणो नानाविधकर्म्माणि ।
(२) D. Omits the portion bracketed.
(३) Y. उष्णेन शीतलेन ।
(४ D स्नानेन ।

पूजां कृत्वाश्वमेधसहस्रफलम् । स्नानपात्रविशेषात् फलविशेषः पूर्व्ववत् ।

ब्रह्मणो दर्शनं पुण्यं दर्शनात् स्पर्शनं वरम् ।
स्पर्शनादर्च्चनं श्रेष्ठं घृतस्नानमतः परम् ॥ *

---

* Y. Reads the following after this mark :—

भविष्ये,—

अथानुलेपनं कृत्वा दिव्यैर्गन्धैः सुगन्धिभिः ।
वर्षकोटिशतं दिव्यं ब्रह्मलोके महीयते ॥
गन्धानुलेपनं पुण्यं लेपनं चन्दनस्य च ।
चन्दनादगुरोर्ज्ञेयं पुण्यमष्टगुणं नृप ॥
कृष्णागुरोर्विशेषेण द्विगुणं फलमादिशेत् ।
तस्माच्छतगुणं पुण्यं कुङ्कुमस्य विधीयते ॥
यः समालभते कञ्च चन्दनागुरुकुङ्कुमैः ।
कर्पूरवारिभिर्मिश्रैस्तथा कस्तूरिकान्वितैः ॥
वर्षाणाञ्च कोटिशतं विहृत्य त्रिदशालये ।
पुनः संजायते भूमौ राजराजो न संशयः ॥
चन्दनागुरुकर्पूरैः श्लक्ष्णपिष्टैः सकुङ्कुमैः ।
ब्रह्मणोऽङ्ग(ं) समालिम्प कल्पकोटि वसेद् दिवि ॥
संवीज्य तालवृन्तेन शुभगन्धैः प्रलेपितम् ।
दशवर्षसहस्राणि वीर मित्रपुरे वसेत् ॥
भक्त्या निवेद्य ब्रह्माणं तालवृन्तं नराधिप ।
दशवर्षसहस्राणि वीर मित्रपुरे वसेत् ॥
मायूरव्यजनं कृत्वा ब्रह्मणेऽतीवशोभनम् ।
कल्पकोटिशतं पूर्णं प्रभञ्जनपुरे वसेत् ॥
दद्याद् ब्रह्मणे च परं (?) मणिरत्नविभूषितम् ।
हेमरौप्यादिदण्डं वा तस्य पुण्यफलं शृणु ॥
चामरव्यग्रहस्ताग्र्यदिव्यस्त्रीपरिवारितः ।
महागौरविमानस्थश्चिरं ब्रह्मपुरे वसेत् ॥

अत्र ब्रह्मपूजायां यद्यपि पुष्पाणि नोक्तानि तथापि प्रपञ्चसारादिषु पूजासामान्योक्तानि ग्राह्याणि । एवं गणपत्यादिदेवतान्तरपूजायाम् । विशेषतश्च भविष्ये,—

पाटलोत्पलपद्मानि करवीराणि सर्व्वदा ।
स्नानेऽपलानि (ऽपराणि) योज्यानि स्थिराणि सुरभीणि च ॥

इत्येवं स्नानोक्तानि पुष्पाणि पूजायां ब्राह्मणैर्ग्राह्याणि । यदा तु

शिवपूजाङ्गपुष्पाणि वैष्णवेनार्चितानि वै ।
अन्येषामपि देवानां कथितानि मनीषिभिः ॥

इति वचनात् क्रियते तदा शिवपुष्पाण्यपि ब्रह्मणो गणेशस्य कार्त्तिकेयादेश्च बोध्यानि ।

अथ नैवेद्यम् ।

देवतानाञ्च यो दद्यादन्नाद्यं श्रद्धयान्वितः ।
सिक्थे सिक्थे वसेत्स्वर्गे समानममरैः सह ॥
एतद्दशगुणं पुण्यमन्येषां गुणसंयुते ।
यो दद्याद् ब्रह्मणेऽन्नानि तस्माद्द्विगुणितं फलम् ॥
तस्माद् विष्णौ च दत्वान्नं द्विगुणं फलमश्नुते ।
रुद्रायान्नप्रदानेन फलमेतच्चतुर्गुणम् ॥

यत्तु भविष्ये ब्रह्मनैवेद्यमधिकृत्य ।

खण्डलड्डुकप्यावेषकारणाशोकवर्त्तका ।
स्वस्तिका लोपिका दुग्धा प्यावेष्टककिलात्मिका ॥ (?)
फलानि धन(वन)पक्वानि खाद्यानि विविधानि च ।

इति तत् पूजानैवेद्यार्थं ।

अथ ब्रह्मधर्म्माः ।

तत्वसारसंहितायाम्,—

ब्रह्ममार्गे समश्नीयात् पद्मपत्रे तथोत्तरे ।
जपेत् पद्मोद्भवैर्बीजैः पद्मपीठसमीपतः ॥
यज्ञोपवीतदाता स्याद् ब्राह्मणानां शुचिः सदा ।
एवं यो वर्त्तते नित्यं जन्मजन्मान्तरेष्वपि ।
चतुर्वेदी च तु(?)भूत्वा पुनर्ब्रह्माणमाप्नुयात् ॥

इति नित्याचारप्रदीपे नानाविधब्रह्माराधनकर्म्माणि ।

[1]अथ विष्णोः ।

नरसिंहपुराणे,—

नरसिंहगृहे नित्यं यः सम्मार्जनमाचरेत् ।
सर्व्वपापविनिर्मुक्तो विष्णुलोके स मोदते ॥
गोमयेन मृदा तोयै र्यः कुर्य्यादुपलेपनम् ।
चान्द्रायणफलं प्राप्य विष्णुलोके महीयते ॥
निर्माल्यमपकृष्याथ तोयेन स्नाप्य केशवम् ।
नरसिंहाकृतिं राजन् सर्व्वपापैः प्रमुच्यते ॥
[2]गोदानस्य फलं प्राप्य यानेनाम्बरशोभिना ।
नरसिंहपुरं प्राप्य मोदते कालमक्षयम् ॥

वराहपुराणे,—

पश्चादालेपयेद् भूमिं गोमयेन दृढव्रतः ।
तस्य दृष्ट्वा विलेपन्तु मम तुष्टिः प्रजायते ॥
लिप्यमानस्य विद्यन्ते यावन्तो जलविन्दवः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥
अभ्युक्षणं च यः कुर्य्यात् पानीयेन सुरालये ।
स शान्तपापो भवति नात्र कार्य्या विचारणा ॥
हरेर्गृहं सदा यस्तु तुलसीदलविप्रुषैः ।
त्रिसन्ध्यं प्रोक्षयेद् भक्त्या महापापैः प्रमुच्यते ॥

(१) Y. अथ सकलदेवताराधनप्रयोजनमूलनानाविध)विष्णाराधनमभिधीयते ।
(२) गोप्रदानफलं ०

तथा,—

कल्यमेव समुत्थाय हन्याद् भेरीं यथोदिताम् ।
यदि भेरी न विद्येत कवाटं तत्र वादयेत् ॥
दीपं न ज्वालयेद् यावत्तावद्देवं न संस्पृशेत् ।
दीपं प्रज्वालयित्वा तु हस्तशौचन्तु कारयेत् ॥
चरणौ वन्दयित्वा तु दन्तकाष्ठमुपानयेत् ।

तथा—

निर्माल्यं शिरसः कश्चिद् भक्त्या चापोह्य मानवः ।
कुर्य्यात्तु मुखकर्म्माणि स्वच्छेन सलिलेन च ॥

अत्र द्वारोद्घाटनदन्तधावनादिषु वराहपुराणीयमन्त्राम्नानेऽपि प्रणवेन सर्व्वं करणीयम् । "यः प्रणवमधीते स सर्व्वमधीते" इति सर्व्वमन्त्रप्रत्याम्नातत्वेन तापनीयश्रुतौ [1]प्रणवस्य विधानात् ।

नरसिंहपुराणे,—

गीतवाद्यादिकं नृत्यं शङ्खतुर्य्यादिनिःस्वनम् ।
यः कारयित्वा विष्णोस्तु सन्ध्यायां मन्दिरे नरः ॥
सर्व्वकालेऽविशेषेण कामगः कामरूपवान् ।
स्वर्गात् स्वर्गमनुप्राप्य विष्णुलोके महीयते ॥

(१) Y. प्रणवविधानात् ।

अथ स्नानम् ।

तत्र प्रथमभ्यञ्जनम् । वाराहे,—

शीघ्रमभ्यञ्जनं कुर्य्याद् दद्यात् तैलं घृतञ्च यत् ।

"अभ्यङ्गे पञ्चविंशती"ति पञ्चविंशतिपलमिततैलं घृतञ्च तावत् तथा शिरसि प्रदद्यात् पश्चात् दक्षिणाङ्गे ततो वामाङ्गे ।

[१]पश्चात् पृष्ठे पुनश्चैव पादौ पश्चात् कटिं तथा ।

एवमभ्यञ्जनानन्तरमुद्वर्त्तनम् । वाराहे,—

कलायस्यापि चूर्णेन पिष्टचूर्णेन वा पुनः ।

एतेनोद्वर्त्तनं कुर्य्याद् गन्धद्रव्यैश्च संयुतम् ॥

नारसिंहे,—

[२]यवगोधूमचूर्णैश्च उद्वर्त्त्योष्णेन वारिणा ।

प्रक्षाल्य देवदेवेशं वारुणं लोकमाप्नुयात् ॥

तोयेन भक्त्या संस्नाप्य विष्णुलोके महीयते ।

स्नाप्य दध्ना सकृद्विष्णुं [३]विष्णुलोकमवाप्नुयात् ॥

यः करोति हरेरर्च्चां स्नापनं मधुना नरः ।

अग्निलोके स मोदित्वा पुनर्विष्णुपुरे वसेत् ॥

घृतेन स्नापनं यस्तु पर्व्वकाले विशेषतः ।

---

(१) Y. पश्चात् पृष्ठे ततः पादयो (:) ततः कट्याम् । एवमभ्यञ्ज०

(२) Y. यवगोधूमजैश्चूर्णैरुद्वर्त्त्यो०

(३) विष्णुलोके महीयते ।

नरसिंहाकृतेः कुर्य्यात् शङ्खभेरीनिनादितम् ।

पापं सकलमुन्मुच्य विष्णुलोके महीयते ॥

पञ्चगव्येन देवेशं यः स्नापयति भक्तितः ।

[१][ब्रह्मकूर्चविधानेन विष्णुलोके महीयते ॥]

[२]ब्रह्मकूर्चविधानं न परिमाणार्थं "स्नाने पलशतं ज्ञेय"मिति परिभाषणात् । किन्तु

गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् ।

आप्यायस्वेति वै क्षीरं दधिक्राव्णेति वै दधि ॥

तेजोऽसीति घृतञ्चैव देवस्यत्वा कुशोदकम् ।

इति मन्त्रप्राप्त्यर्थम् ।

पयः काञ्चनवर्णायाः श्वेतायाश्चैव गोमयम् ।

गोमूत्रं ताम्रवर्णाया नीलायाश्च तथा घृतम् ॥

दधि च कृष्णवर्णाया एतद् वै पञ्चगव्यकम् ।

वरुणश्चैव गोमूत्रे गोमये हव्यवाहनः ।

दध्नि वायुः सदा देवः सोमः क्षीरे घृते रविः ॥

आलोड्य निर्मथ्य प्रणवेन मूलमन्त्रेण स्नानम् ।

पादपीठन्तु यो भक्त्या बिल्वपत्रेण घर्षयेत् ।

उष्णाम्बुना च प्रक्षाल्य सर्व्वपापैः प्रमुच्यते ॥

कुशपुष्पोदकस्नानाद् ब्रह्मलोकमवाप्नुयात् ।

रत्नोदकेन सावित्रं कौवेरं हेमवारिणा ॥

---

(१) Y. Omits the portion brackated.

(२) Y. ब्रह्मकूर्चविधाने परिमाणार्थं स्नानं शतपलं ज्ञेयमिति परिभाषणात् ।

नरसिंहन्तु संस्नाप्य कर्पूरागुरुवारिणा।
इन्द्रलोके स मोदित्वा पश्चाद् विष्णुपुरे वसेत्॥
पुष्पोदकेन गोविन्दं स्नाप्य भक्त्या नरोत्तमः।
सावित्रं लोकमासाद्य विष्णुलोके महीयते॥

विष्णुधर्म्मे,—

आह्लादं निर्वृतिं स्वास्थ्यमारोग्यञ्च सुरूपताम्।
सप्तजन्मान्यवाप्नोति नरः स्नानप्रदो हरौ॥
[2]स्नानार्थसुरभीक्षीरं महिष्याद्यास्तु वर्ज्जिताः।
दुःस्वप्ननाशनं ज्ञेयममङ्गल्यविनाशनम्॥
मङ्गल्यवृद्धिदं दध्ना स्नपनं द्विजसत्तमाः।
स्नाप्य दध्ना सकृद्विष्णुं विष्णुलोकमवाप्नुयात्॥
गवां शतस्य विप्रेभ्यः सम्यग्दत्तस्य यत्फलम्।
घृतप्रस्थेन तद् विष्णोर्लभेत् स्नानान्नसंशयः॥
अयने विषुवे प्राप्ते यः स्नापयति केशवम्।
घृतप्रस्थेन वै पापं सकलं स व्यपोहति॥
पलं सुवर्णाश्चत्वारः प्रस्थः षोड़शकं पलम्।
वर्षकोटिसहस्रेण यत्पापं समुपार्जितम्।
तद्घृताभ्यञ्जनाद् विष्णोर्दहेत् सर्व्वं न संशयः॥

अभ्यञ्जनं पञ्चविंशतिपलेन।

रोगार्त्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात्।

(२) Y. स्नानार्थे०

भयान्मुच्येत [1]भीतश्च घृतेन स्नापयन् हरिम्॥
प्रतिमासं सिताष्टम्यां घृतेन जगतीपतिम्।
स्नापयित्वा समभ्यर्च्य सर्व्वपापैः प्रमुच्यते॥
द्वादश्यां पञ्चदश्याञ्च गव्येन [2]माहिषेण वा।
स्नपनं देवदेवस्य महापातकनाशनम्॥

मधुना स्नानाद् विष्णुलोकप्राप्तिः। इक्षुरसेन विद्याधरलोकः। खण्डेन स्नाने पापक्षयपूर्व्वकविष्णुलोकमहि(त)त्वम्। [3]वीजोदकस्नानात् क्रियासाफल्यम्। पुष्पोदकेन श्रीलाभः। फलतोयेन क्रियासाफल्यम्। [4]पञ्चामृतस्नानं महापातकनाशनम्।

तत्रैवम्,—

दुग्धेन दध्ना चाज्येन मधुना चैक्षवेण च।
प्रत्येकं जलपुष्पाभ्यां धूपेनान्तरितं तथा॥
अम्भःपलैश्चतुर्भिस्तु [5]सम्पूर्णं गड़ुकं स्मृतम्।
गड़ुकञ्चाष्टलोहोत्थं कर्षाभ्यधिकषट्पलैः[6]॥
गड़ुकानि जलस्याथ प्रदेयानि यथाविधि।
शतञ्चाष्टोत्तरञ्चैव तथाचाष्टौ सदैव हि॥

(१) Y. भीतस्तु०
(२) Y. हविषा न्वपः।
(३) V. वीजोदकेन स्नानात्०
(४) Y. पञ्चामृतस्नानेन महापातकनाशः।
(५) Y. सम्पूर्णगड़ुकं०
(६) Y. षट्पदैः।

अनुक्तपरिमाणस्नाने पलशतम्।

मृत्कुम्भात् ताम्रकुम्भैस्तु स्नानं दशगुणं स्मृतम्।
रौप्यैर्लक्षोत्तरं प्रोक्तं हैमैः कोटिगुणं भवेत्॥
जलाढ़कसुपूरांस्तु लोहजान् कारयेद् घटान्।
अष्टाविंशाधिकशतपलपूरांस्तु मार्त्तिकान्॥

स्कान्दे,—

शङ्खस्थितेन तोयेन यः स्नापयति केशवम्।
कपिलाशतसहस्रस्य दत्तस्य फलमश्नुते॥

अक्षतपुष्पान्वितशङ्खतोयस्नानात् पूर्व्वकृतपापक्षयः। तिलकुसुमयुतशङ्खतोयस्नानाद् विष्णुलोकप्राप्तिः। अष्टाक्षरेण शङ्खस्थितगन्धोदकस्नानान्मोक्षः। शङ्खस्थतीर्थजलस्नानात् कुलशतोद्धारः। शङ्खस्थितकपिलाक्षीरस्नानाद् यज्ञायुतसहस्रफलम्। "अश्विनो भैँषज्येन" इति "अभिषिञ्चामि" इत्यन्तेन स्नानकाले नृत्यादिकरणम्। [[1]स्कान्दे],

कृष्णं सन्तोषयेद् यस्तु सुगीतैर्मधुरैः स्वरैः।
सामवेदफलं तस्य जायते नात्र संशयः॥
यो नृत्यति प्रहृष्टात्मा भावे वाह्ये च भक्तितः।
स निर्दहति पापानि मन्वन्तरशतेष्वपि॥
गीतवाद्यादिनिर्घोषं देवदेवस्य कारयेत्।
घण्टाऽभावेऽप्यशक्तस्य सर्व्ववाद्यमयो यतः॥

(१) Y. Omits the portion bracketed

जयकारस्य करणाद् वन्द्यो भवति भूतले।
पदे पदे क्रतुफलं यात्रानुगमनं हरेः॥
[[1]सर्व्वं सम्पूर्णतामेति * * * * * * * * ।]
स्तोत्रैः स्तुत्वा हरिं पापान्मुक्तो विष्णुपुरे वसेत्॥

स्कान्दे,—

स्नानार्चनक्रियाकाले घण्टानादं करोति यः।
मन्वन्तरसहस्राणि मन्वन्तरशतानि च॥
घण्टानादेन देवेशः प्रीतो भवति केशवः।
वेणुवीणास्वनेनैव करोति स्नपनं हरेः॥
मृदङ्गवाद्येन युतं पणवेन समन्वितम्।
अर्चनं वासुदेवस्य सनृत्यं मोक्षदं नृणाम्॥
स्नानकाले च देवस्य पठेन्नामसहस्रकम्।
प्रत्यक्षरं भवेत् पुण्यं कपिलागोशतोद्भवम्॥
गीतवाद्याद्यभावे तु कुर्य्यात् पुस्तकवाचनम्।
न लौकिकैः स्तवैर्देवांस्तोषयेद् वाह्यजैरपि॥

वाह्यजै बौद्धाद्यागमस्थैः।

[2]लौकिकनिषेधापवादमाह,—

अदुष्टलक्षणै र्देवं स्वयं विरचिताक्षरैः।
स्तुवन् ब्राह्मणशार्दूलाः सर्व्वान् कामानवाप्नुयात्॥

(१) Y. Omits the portion bracketed.
(२) Y. लौकिकविशेषापवादमाह।

तथा,—कुर्य्यादारात्रिकं यस्तु कल्पकोटिं वसेद् दिवि ।
मन्त्रहीनं क्रियाहीनं यत् कृतं पूजनं हरेः ।
सर्व्वं सम्पूर्णतामेति कृते नीराजने सुत ॥

नीराजनञ्च स्वर्णादिपात्रे गोमयादिकृतपद्मकस्वस्तिकश्रीवत्स-कौस्तुभध्वजसहित[3]दूर्व्वाक्षतचूतन्यग्रोधाश्वत्थपत्रसहिते नानावर्त्ति-युक्तदीपं कृत्वा वन्दापनम् । [4]स्कान्दे,—

कृष्णाग्रतो महाभक्त्या कुर्य्यात् पुस्तकवाचनम् ।
प्रत्यक्षरं लभेत् पुण्यं कपिलाशतदानजम् ॥
ऋग्यजुःसाममन्त्रैश्च कृष्णं सन्तोषयन्ति ये ।
कल्पान्तं ब्रह्मलोके [5]तु ते वसन्ति द्विजोत्तमाः ॥
योगशास्त्राणि वेदान्तं [6]ये जनाः कृष्णसन्निधौ ।
पठन्ति रविबिम्बं ते भित्त्वा यान्ति न संशयः ॥
यः पठेद्रामचरितं भारतं व्यासभाषितम् ।
पुराणानि महीपाल प्राप्ता मुक्तिं न संशयः ॥

तथा,—अगम्यागमने पापमभक्ष्यस्य च भक्षणे ।
सर्व्वं तन्नाशमायाति मण्डयित्वा हरेर्गृहम् ॥
अणुमात्रञ्च यः कुर्य्यान्मण्डनं केशवाग्रतः ।
मृदा धातुविकारैश्च कल्पकोटिं वसेद् दिवि ॥

---

(३) Y. दधिदूर्व्वा ।
(४) Y. स्कन्दपुराणे ।
(५) Y. ० च० ।
(६) D. योगिनः० ।

सर्व्वतोभद्रमण्डलं परिभाषायामुक्तम् ।
शालग्रामशिलाग्रे तु यः कुर्य्यात् स्वस्तिकं [1]शुभम् ।
कार्त्तिके तु विशेषेण पुनात्यासप्तमं कुलम् ॥
स्वस्तिकं माधवस्याग्रे य कुर्य्याद् बहुरूपकम् ।
सप्तजन्मानि वैधव्यं न [2]साप्नोति कदाचन ॥

[3]स्वस्तिकमण्डलञ्चैवम्,—

अष्टादशाष्टादशकैः पदानां त्रिशतं भवेत् ।
चतुर्विंशाधिकं तत्र मध्ये षट्त्रिंशताम्बुजम् ॥
स्वस्तिकाष्टकमाशासु लिखेद् विधिवदीदृशम् ।
षट्त्रिंशत्कोष्ठकैरेकं स्वस्तिकं दिशि कारयेत् ॥
पद्मावसानसूत्राणि स्थापितानि न लोपयेत् ।
एकं त्रीणि बहिः पञ्च नव कोष्ठस्य मार्जनात् ॥
अथ द्वादशकोष्ठैस्तु स्वस्तिकं कार्य्यमीदृशम् ।
षोड़शषोड़शकोष्ठैस्तु स्वस्तिकाष्टकमालिखेत् ॥
अन्तरेकं बहिस्त्रीणि स्यादेवं कोष्ठमार्जनम् ।
पदैः षोड़शभिर्मध्ये [4]पद्मकं परिकल्पयेत् ॥
मार्जयेत् स्वस्तिकाकारं श्वेतपीतारुणासितैः ।
रजोभिः पूरयेत् तानि स्वस्तिकानि शिवादितः ॥

---

(१) Y. त्वहम् ।
(२) D. प्राप्नोति ।
(३) Y. स्वस्तिकमण्डलं यथा ।
(४) D. पद्मञ्च ।

महापातकयुक्तोऽपि पातकी चोपपातकी।
विमुक्तपापो भवति विष्णायतनचित्रकृत्॥
यावन्ति विष्णुरूपाणि सुरूपाणि [1]विलेखयेत्।
तावद्युगसहस्राणि विष्णुलोके महीयते।

स्कान्दे,—त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे॥
नमितः सर्व्वदेवैस्त्वं पाञ्चजन्य नमोऽस्तु ते।

इति शङ्खमादाय,—

शङ्खे कृत्वा तु पानीयं भ्रामयेत् केशवोपरि।
वारि धेनुसहस्राणां [2]फलं प्राप्नोति तावता॥

स्नानान्ते—देवस्य मस्तकं कुर्य्यात् कुसुमोपशोभितं सदा।
इति वचनान्मस्तके पुष्पं दद्यात्।

भ्रामयित्वा हरेर्मूर्द्ध्नि मन्दिरं शङ्खवारिणा।
प्रोचयेद् वैष्णवो यस्तु नाशुभं तद्गृहे भवेत्॥
कृत्वा पादोदकं शङ्खे वैष्णवानां महात्मनाम्।
यो ददाति तिलैर्मिश्रं चान्द्रायणफलं लभेत्॥*

[3][इति विष्णुगृहकार्य्याणि।

(१) Y. सुलेखयेत्।
(२) Y. फलमाप्नोति।
(३) Y. Omits the portion bracketed.

* Y reads the following after this mark :—

अथ महास्नानम्।
महास्नानेन गोविन्दं सम्यक् संस्नाप्य मानवः।
सर्व्वान् कामानवाप्नोति नात्र कार्य्या विचारणा॥

राजाग्निचौरदुर्भिक्षमहारोगाद्युपद्रवे।
उत्तमं स्नपनं कार्य्यं सर्व्वरोगोपशान्तये॥

तद्विधिः,—

अस्त्रेण रक्षये(द्) दुग्धं कवचेनावगुण्ठयेत्।
अमृतीकरणं कृत्वा वासुदेवेन मन्त्रयेत्॥
अभिषेकञ्च मूलेन गण्डुकानां ततो भवेत्।
अर्घ्यादिधूपपर्य्यन्तं स्ततो (ततो) विष्णु(ं) समर्चयेत्॥

एवं दध्यादिमन्त्रविशेषः दधि सङ्कर्षणेन। घृतं प्रद्युम्नेन। मध्वनिरुद्धेन। खण्डं नारायणेन। ओं नमो भगवते वासुदेवाय। आं नमो भगवते सङ्कर्षणाय आं नमः। ओं आं नमो भगवते प्रद्युम्नाय ओं आं नमः। ओं नमो भगवते प्रद्युम्नाय (अनिरुद्धाय) ओं अं नमः। ओं ओं ओं नमो भगवते वासुदेवाय ओं ओं ओं नमः।

तथा,—

सर्पिःपलसहस्रेण गोविन्दस्य शिवस्य वा।
महास्नानं नरः कृत्वा सर्वपापैः प्रमुच्यते॥

बृहत्कालोत्तरे,—

पयोदधिघृतानाञ्च सहस्राष्टोत्तरद्वयैः।
महास्नानं पलानाञ्च कलानामपि तत्समम्॥

तथा,—

महास्नाने प्रसक्ते तु स्नानमष्टविधं स्मृतम्।
स्वच्छं हैमं सुगन्धञ्च सुरत्नं फलपुष्पकम्॥
सर्व्वौषधिजलञ्चान्यत् स्नापयेत् क्रमशः शुचिः।

अन्यदितिजलान्तरमष्टविधत्वाय। अत्र यद्यपि

पलानां द्वे सहस्रे तु महास्नानं प्रकीर्त्तितम्।

इति पञ्चद्रव्येण मिलित्वा सहस्रद्वयमिति प्रतीयते। तथा (पि) सहस्राष्टोत्तरद्वयैरिति पलानामपि तत्सममिति पलाष्टकेऽपि सहस्रद्वयविधानाच्च प्रत्येकं सहस्रद्वयम्। केवलदुग्धादिमहास्नाने सहस्रद्वयमेव। तत्राप्यष्टद्रव्यस्नानाङ्गत्वादेतदङ्गभूतनारिकेलोदकानि (कादि) स्नानं शतपलेन। हैमादुदकान्ता(त्) तत्त(त्) द्रव्ययोगेन मुरामांसीत्यादि सर्व्वौषधिगणः। गन्धोदके सर्व्वगन्ध इत्याहुः। चन्दनाभावे अगुरुकुङ्कुमोशीरजटामांसीमुरा इति च।

महास्नानप्रयोगः।

सार्व्वभौमत्वकामः परमैश्वर्य्यकामो ग्रहशान्तिकामो महारोगोपशमनकामो राजाग्निचौरदुर्भिक्षाद्यन्यतमोपद्रवनिवृत्तिकामो वा विष्णुमूर्त्तौ महास्नानमहं करिष्य इति स्वस्तिवाच्य सङ्कल्प्य वैकल्पिका (च्छिद्रा) वधारणं कृत्वाचार्य्यं वृणुयात्। अथाचार्य्यः द्वारपालपूजां कृत्वा देवगृहे प्रविश्य पञ्चोपचारेण देवं सम्पूज्य देव त्वां स्नानमण्डपं नयामीति विज्ञाप्य तूर्य्यघोषपूर्व्वकं देवं स्नानमण्डपं नीत्वा तत्र धूपामोदं वितानबन्धनं फलपल्लवपुष्पयुक्तकुम्भचतुष्कस्थापनञ्च कृत्वा दीपत्रयमुच्छ्रित्य देवदक्षिणेऽष्टाधिकशतपलतैलपात्रे रक्तवस्त्रं प्रज्वाल्य वामे साष्टशतपलघृतपात्रे शुक्लवस्त्रञ्च प्रज्वाल्य ततोऽष्टाधिकोशतमभितः प्रज्वाल्य स्नानाय द्रव्याणि सन्निधाप्य स्वासने उपविश्य भावनाचतुष्टयान्तं समन्त्रं न्यासं कृत्वा स्नापनाय मूर्त्तिं ध्यात्वा सामान्यार्घ्यं संस्कृत्य स्नानोपयोगिसर्व्वं प्रोक्ष्य पञ्चोपचारैर्द्देवं सम्पूज्य

गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम्।
आप्यायस्वेति वै क्षीरं दधिक्राव्णेति वै दधि॥
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम्।

इति पञ्चगव्यं गृहीत्वा प्रणवेनैकीकृत्य मूलेनाभिमन्त्र्य तेनैव हृदा स्नपनम्। अन्तरा शुद्धोदकपलशतेन स्नपनम्। सर्व्वत्रान्तरा स्नानं पलशतेन। मूलेन कुशोदकमभिमन्त्र्य हृदा स्नपयित्वा अन्तरा स्नानं कृत्वा पञ्चोपचारैः सम्पूज्य मूलाभिमन्त्रितघृतविंशतिपलेन मूलेनाभ्यङ्ग्यान्तरा संस्नाप्य मूलाभिमन्त्रितशालिपिष्टशतेन मूलेनोद्वर्त्त्य अन्तरा स्नानं कृत्वा अस्त्रेण राजिकाभिः सिद्धार्थैर्वा निर्मथ्य मूलाभिमन्त्रितपञ्चविंशतिपलशुद्धामलकेनानुलिप्यान्तरा संस्नाप्य यवचूर्णेन विरूक्ष्यान्तरा संस्नाप्यार्घ्यादिधूपान्तैः सम्पूज्य शालिपिष्टमयसप्तवर्त्तिकदीपेन नीराज्योष्णोदकैः संस्नाप्य विशेषार्घ्यं संस्कृत्याष्टोत्तरसहस्रद्वयपलपरिमितं क्षीरं संस्कुर्य्यात् क्षीरमर्घ्याम्बुना प्रोक्ष्य गन्धपुष्पाभ्यामभ्यर्च्यास्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयामृतीकृत्य ओँ नमो भगवते वासुदेवाय ओँ नम इत्यभिमन्त्र्य सुवर्णादिपात्रे कृत्वा देवं स्नानोदके विचिन्त्य मूलमन्त्रमुच्चार्य्य श्रीकृष्णं क्षीरेण स्नापयामीति स्नापयेत्। कर्षाधिकषट्पलपरिमितहेमादिनिर्मितजलपलचतुष्टयग्राह्यगडुकेनाष्टोत्तरशतवारं मूलेन स्नपनम्। धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलदधिसंस्कारः। दधि प्रोक्षणादिभिः संस्कृत्य ओँ नमो भगवते सङ्कर्षणाय इत्यभिमन्त्र्य पूर्व्ववद् दध्ना स्नपनं मूलेन। गडुकस्नपनं पूर्व्ववत्।

धूपान्तपूजा। अष्टोत्तरसहस्रद्वयपलमिताज्यं संस्कृत्य ओँ नमो भगवते प्रद्युम्नाय नम इत्यभिमन्त्र्य मूलेन स्नपनम्। गडुकस्नानं पूर्व्ववत्। धूपान्तपूजा। अष्टाधिकसहस्रद्वयपलमितमधु प्रोक्षणादिभिः संस्कृत्य ओँ नमो भगवते अनिरुद्धाय ओँ आं नम इत्यभिमन्त्र्य मूलेन स्नपनम्। गडुकस्नानं धूपान्तपूजा। अष्टोत्तरसहस्रद्वयपलमितं खण्डमिक्षुरसं वा प्रोक्षणादिभिः संस्कृत्य ओँ नमो गवते नारायणाय ओँ ओँ ओँ नम इत्यभिन्त्र्य मूलेन स्नपनम्। गडुकस्नानं धूपान्तपूजा पूर्व्ववत्। ततोऽष्टोत्तरशतपलमितनारिकेलोदकं संस्कृत्य मूलेनाभिमन्त्र्य तेनैव स्नपनं पञ्चविंशतिपलमितयवगोधूमचूर्णैर्निरूक्ष्य शुद्धोदकेन संस्नाप्य धूपान्तैः सम्पूज्याष्टोत्तरशतपलमितेक्षुरसं संस्कृत्य मूलेनाभिमन्त्र्य तेनैव स्नपयित्वा शुद्धोदकेन स्नापयेत्।

अथाष्टविधजलस्नानम्। (?)

धूपान्तैः सम्पूज्याष्टाधिकसहस्रद्वयपलमितस्वच्छजलं संस्कृत्य मूलेनाभिमन्त्र्य तेनैव स्नपयित्वा शुद्धोदकेन स्नपयेत्। धूपान्तैः सम्पूज्याष्टाधिकसहस्रद्वयपलमितहिरण्योदकं संस्कृत्य मूलेनाभिमन्त्र्य तेन संस्नाप्य शुद्धोदकेन स्नापयेत्। धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलमितपद्मजातीपुष्पोदकं संस्कृत्याभिमन्त्र्य स्नपयित्वा शुद्धोदकेन स्नापयेत्। धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलमितसर्व्वौषधिजलं संस्कृत्य मूलेनाभिमन्त्र्य तेन संस्नाप्य तेनोदकेन स्नापयेत्। धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलमितशुद्धोदकं संस्कृत्याभिमन्त्र्य तेन संस्नाप्य तोयेन स्नापयेत्। इति विधिस्नानम्।

अथ सुवर्णाद्यन्यतमकलसे वस्त्रपूतमष्टोत्तरशतपलपरिमितजलं जलदैवतमन्त्रैः पूजयित्वा कुशापामार्गकर्पूरजातीचम्पकपाटलासितकरवीरमल्लिकाकमलोत्पलचन्दनागुरुकुङ्कुमादिकं प्रक्षिप्यानुष्टुप्नारसिंहमन्त्रराजं विन्यस्य मूलेनाभिमन्त्र्य तेन स्नापयेत्। पुरुषसूक्तेन तेनोदकेन स्नापयेत्। प्रणवेन शुद्धोदकेन स्नापयेत्। सूक्ष्मवस्त्रेणाङ्गप्रोञ्छनम्। कर्पूरादियुक्तचन्दनानुलेपनम्। वस्त्रद्वयपरिधापनम्। स्वर्णपद्मदानम्। सूक्ष्मसुगन्धिपुष्पमालादानञ्च कृत्वा पुष्पाञ्जलिं दत्वा विलोमार्घ्यजपस्तुतिप्रणामफलसमर्पणोद्वासनानि कृत्वाच्छिद्रावधारणं कृत्वा पूजागारे देवं स्थापयेत्। ततो महास्नानाङ्गत्वेन महापूजा।

पञ्चविंशतिपलमितेन गन्धेनानुलेपनं सूक्ष्मसुगन्धिपुष्पमाला धूपो दीपा इति महापरिमाणः। नीलोत्पलबिल्वपत्रपद्मचम्पकादिनानाविधपुष्पाणि। नेत्रपटादिदिव्यवस्त्रम्। भोक्ष्यभोज्यचोष्यपेयादि नानानैवेद्यं दशद्रोणमितमन्नं

अथ दुर्गायाः ।

देवीपुराणे,—

> देवीगृहन्तु यः शक्र सम्मार्जयति नित्यशः ।
> स भवेद् बलवान् सौख्यधर्म्मसम्पत्तिसंयुतः ॥
> देव्या गृहन्तु यः शक्र गोमयेनोपलेपयेत् ।
> स्त्री पुमान् वा यथाशक्ति षण्मासाश्च निरन्तरम् ।
> स लभेदीप्सितान् कामान् देवीलोकञ्च गच्छति ॥

भविष्यपुराणे—रत्नाकारमण्डलं देवीगृहे कृत्वा वैष्णवीलोकाप्तिः । पद्माकारमण्डले ब्रह्माणीपुरप्राप्तिः शङ्खचूर्णमण्डलकरणे वाराहीलोकप्राप्तिः । त्रिशूलयुक्तमण्डलेन माहेश्वरीलोकः । वज्रचिह्नितमण्डलेन ऐन्द्रीलोकप्राप्तिः । पीतकृष्णादिवर्णैः श्रीवत्साकृतिमण्डलेन श्रीलोकप्राप्तिः । स्वस्तिकमण्डलेन कल्पान्तममरलोकप्राप्तिः । निर्म्माल्यमपकृष्य दन्तधावनमुखचालने ।

> घृताभ्यक्तां घृतस्नातां दुर्गां रत्नाद्भिरुत्तयेत् ।
> यवगोधूमजैश्चूर्णैः घर्षयेद् वल्कलेन च ॥
> घृतेन पयसा दध्ना चण्डिकां स्नपयेन्नृप ।
> बिल्वपत्रैः पादपीठं घर्षयेद् यत्नतस्ततः ।

सप्तद्रोणमितं वा । असम्भवे आढ़कमितम् । दर्पणच्छत्रचामरादिनानाविधपूजोपचाराः । इत्येवं पूजा समाप्ता । आचार्य्यदक्षिणा । इति बृहत्कालोत्तरोक्तविष्णुमहास्नानविधिः ।

> गोसहस्रशते दत्ते पुष्करे यत्फलं लभेत् ॥

पिष्टप्रदीपचूताश्वत्थादिपल्लवमेध्यौषधियवादिबीजादभिः शङ्खभेर्य्यादिनिनादसहिते यावद्दिनं नीराजनं तावत्कल्पसहस्रं दुर्गालोकप्राप्तिः । प्रदीपेन नीराजने सूर्य्यलोकप्राप्तिः । लवणाद्यतैर्विष्णुलोकप्राप्तिः । सुवर्णरूप्यैर्ब्रह्मलोकप्राप्तिः । त्रिकालं गीतवाद्यनृत्यकरणे पदसंख्यवर्षसहस्रं ब्रह्मलोकप्राप्तिः । पञ्चगव्यस्नाने सुरभीपुरप्राप्तिः । कपिलापञ्चगव्यघृतक्षीरैः स्नानं ततः शतगुणम् । वर्षपञ्चसहस्रार्जितपापक्षयार्थं घृताभ्यङ्गः । शुक्लनवम्यां घृतस्नानेन एकविंशपुरुषोद्धरणपूर्व्वकं दुर्गालोकप्राप्तिः । क्षीरस्नानेनैन्द्रीलोकप्राप्तिः । दधिस्नानेन शिवलोकः । इक्षुरसस्नानेन विष्णुलोकः । गन्धचन्दनवारिस्नानेन चन्द्रलोकः । हेमवारिस्नानेन वसुलोकः । रत्नजलस्नानेन विष्णुलोकः । द्रोणबिल्वकरवीरनीलोत्पलान्यतमपुष्पजलस्नानेन विष्णुलोकः । कर्पूरवारिस्नानेन चण्डिकासालोक्यम् । अगुरुवारिस्नानेनेन्द्रलोकः । पितॄनुद्दिश्य मधुस्नानाद् वर्षशतत्रयं पितृतृप्तिः । सर्व्वैरेतैर्युगपत् स्नानेनाश्वमेधशतसहस्रराजसूयशतफलोत्तरं विष्णुलोकः । पौर्णमास्यां नवम्यामष्टम्याञ्च स्नानस्य वाजपेयफलम् । कुम्भविशेषात् फलविशेषः । पुष्पवारिणा अर्घ्यदाने स्वर्गः । गन्धोदकार्घ्येण गन्धर्व्वलोकः । द्वादशाङ्गार्घ्येण दशपद्मसहस्रवर्षं स्वर्गः ।

> आपः क्षीरं कुशाग्राणि हविरक्षततण्डुलाः ।
> तिलाः सिद्धार्थकं दूर्व्वा कुङ्कुमं रोचना मधु ॥

इति द्वादशाङ्गार्घ्यः । दारवार्घ्यपात्रेणाग्निष्टोमफलम् ।

ताम्रपात्रेण पौण्डरीकफलम् । पलाशपद्मपत्राभ्यां गोसहस्र(दान)-फलम् । रौप्यपात्रेण विष्णुयागफलम् । सुवर्णपात्रेण बहुसुवर्ण-यज्ञफलम् । एवं सर्व्वोपचारपात्रे फलविशेषः ।

अथ(सूर्य्य)देवदर्शनप्रदक्षिणनमस्काराः ।

भविष्यपुराणे,—

मेरुमन्दरमानोऽपि राशिः पापस्य कर्म्मणः ।
आसाद्य भास्करं मर्त्त्यस्तन्नाशयति तत्क्षणात् ॥
यः कुर्य्याद्दर्शनं मासमेकाहारी जितेन्द्रियः ।
स यत् फलमवाप्नोति न तत् सर्व्वैर्महामखैः ॥
पौर्णमास्याममावास्यां दर्शनं पुण्यदं स्मृतम् ।
सप्तम्याञ्च तथाष्टम्यां दिवसे च रवेः सदा ॥

सकृत्प्रदक्षिणप्रणामाद् राजसूयाश्वमेधफलम् ।

विद्वत् प्रदक्षिणीकृत्य नमस्कारात् परां गतिम् ।
प्रणम्य दण्डवत् भूमौ गतिं पुण्यशतोद्भवाम् ॥

अथ शिवस्य ।

भविष्यपुराणे,—

लिङ्गस्य दर्शनं पुण्यं दर्शनात् स्पर्शनं वरम् ।
सकृत्प्रदक्षिणीकृत्य सर्व्वपापैः प्रमुच्यते ॥

स्कान्दे,—

सुदूरमपि गच्छेत यत्र देवो महेश्वरः ।
दृष्ट्वा लिङ्गं महेशस्य पातकैर्विप्रमुच्यते ।
सप्तजन्म कृतैर्देही मनोवाक्कायकर्म्मभिः ॥
पूजितं वा महादेवं पूज्यमानमथापि वा ।
दृष्ट्वा प्रयाति वै मर्त्त्यो ब्रह्मलोकं न संशयः ॥
एकः पूजयते भक्त्या भक्त्या चान्यः प्रपश्यति ।
तुल्यमेव फलं ताभ्यां भक्तिरेवात्र कारणम् ॥
यः प्रातर्देवदेवेशं शिवलिङ्गस्वरूपिणम् ।
पश्येत् स याति सर्व्वस्मादधिकां गतिमेव हि ॥
मध्याह्ने च महादेवं दृष्ट्वा यज्ञफलं लभेत् ।
सायाह्ने सर्व्वयज्ञानां फलं प्राप्य विमुच्यते ॥

स्कान्दे,—

स्नातो यः पूर्व्वसन्ध्यायां सदा मामभिगच्छति ।
स मृतो यक्षराजस्य मित्रं भवति वीर्य्यवान् ॥

तथा,— प्रातस्तु दर्शनं शम्भो र्नैशमेनो व्यपोहति ।

आजन्मनस्तु मध्याह्ने सप्तजन्मकृतं निशि।
अर्द्धमासकृतं पापं दृष्ट्वा पर्व्वणि सन्त्यजेत्॥
सोमनाथं जगन्नाथं दृष्ट्वा स्पृष्ट्वा विकल्मषः।
जायते नात्र सन्देहः अपि चाण्डालयोनिजः॥

योगशिवीये,—

अङ्गुष्ठमुच्छ्रितं कृत्वा बद्ध्वा मुष्टिञ्च दक्षिणे।
पिण्डिकायां न्यसेल्लिङ्गमङ्गुष्ठेन च संस्पृशेत्॥
उमामहेशमन्त्राभ्यां स्पर्शनं मोक्षकाङ्क्षिणाम्।
शिवोमामन्त्रयोगेन स्पर्शनं भूतिमिच्छताम्॥

भविष्यपुराणे,—

कृत्वा प्रदक्षिणं भक्त्या शिवस्यायतने नरः।
अश्वमेधसहस्रस्य यष्टस्य च फलं लभेत्॥

अन्यत्र च—

प्रदक्षिणत्रयं कुर्य्यात् प्रासादस्य समन्ततः।
सव्यापसव्यन्यायेन मृदुगत्या शुचिर्नरः॥
पदे पदेऽश्वमेधस्य यज्ञस्य लभते फलम्।
सव्यं व्रजेत् ततोऽसव्यं प्रणालीं नैव लङ्घयेत्॥

अस्यानेकगुणविधानात् प्रकरणान्तराच्च भिन्नत्वेऽपि सधर्म्मकत्वादधर्म्मके भविष्यपुराणीयप्रदक्षिणेऽतिदेशात् सव्यापसव्यादिधर्म्मप्रवृत्तिः शिवप्रदक्षिणं प्रत्यवान्तरसादृश्या। एवमेकीभूतमनाः कुर्य्यात् शिवे च प्रदक्षिणत्रयम्। अत्रापि धर्म्मप्रवृत्तिरेव।

यदपि

चण्डस्य (च) वृषस्यापि देवस्य च शुभार्थिभिः।
मध्ये यात्रा न कर्त्तव्या यत्र लिङ्गं क्रियामयम्॥

इति

बाणे स्वयम्भूलिङ्गे च सोमसूत्रं न विद्यते।

इति कृत्रिम एव लिङ्गे सोमसूत्रलङ्घनदोषः।

सोमसूत्रप्रणालादिलङ्घने तु महद् भयम्।

इत्यपि सामान्यं कृत्रिमपरमेव। तथापि पुरुषार्थदोषो बाणस्वयम्भू(लिङ्गे)च माभूत्। सव्यापसव्यादियुक्तप्रदक्षिणविधिः स्यादेवाविशेषात्। तत्वसारसंहितायाम्,—

अर्घ्यपात्रं तथा पुष्पमर्चनायागसाधनम्।
गृहीत्वा नैव कुर्व्वीत देवतायाः प्रदक्षिणम्॥
देवशक्तिपरीवारवाहनानाञ्च मध्यतः।
प्रदक्षिणं न कुर्व्वीत कुर्य्यात् सर्व्वस्य बाह्यतः॥
प्रासादे मण्डपे गेहे वृक्षमूले वनेऽपिवा।
पूज्यन्ते देवता यत्र तत्रैवं विधिमाचरेत्॥

भविष्यपुराणे,—

नमस्कृत्य महादेवमश्वमेधफलं लभेत्।
प्रणम्य दण्डवद् भूमौ नमस्कारेण योऽर्च्चयेत्।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि॥

अत्र प्रणामपूर्व्वकाञ्जलिकरणं शिरसि फलाय विधीयते। प्रणामनमस्कारयोर्भेदात्।

जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवेशि सर्व्वान् कामानवाप्नुयात् ॥

भविष्ये,—

सर्व्वदानोपवासेषु सर्व्वयज्ञेषु यत् फलम् ।
स्तुतिजप्योपहारेण शिवे तत्फलमाप्नुयात् ॥

स्तुतिः शिवस्य । जपः शैवमन्त्रस्य ।

शिवाहुत्या जगत् कृत्स्नं वृष्टिपातेन धारयेत् ।
यत् सम्ध्यार्थं जगत् पुण्यमग्निकार्य्येण तल्लभेत् ॥

अग्निकार्य्यञ्च—

तिलैर्होमः प्रकुर्व्वीत दधिमध्वाज्यसंयुतैः ।
अष्टोत्तरशतञ्चाज्यं मूलमन्त्रेण मन्त्रवित् ॥

इति वचनादेवं कार्य्यम् । स्कान्दे,—

इदञ्च परमं गुह्यं यो मे देवि निवेदयेत् ।
अर्कपर्णपुटं पूर्णं घृतस्य मधुनस्तथा ॥
अर्चयित्वा च मां देवि यो मे नामानि कीर्त्तयेत् ।
चतुर्द्दश्यामथाष्टम्यां पक्षयोरुभयोरपि ।
वामदेव सुदेवेति हरगुप्तेति वा पुनः ॥
उमापते नीलकण्ठ शान्त श्रीकण्ठ गोपते ।
सर्व्व भीम पशुपते शङ्कर प्रभवेति च ।
महादेवेति चाप्यन्यं नाम गुह्यं प्रकीर्त्तयेत् ॥

BIBLIOTHECA INDICA :


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1130.



नित्याचारप्रदीपः ।

NITYĀCĀRAPRADĪPAḤ.

BY

NARASIMHA VĀJAPEYI.

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

FASCICULUS VII.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.

1905.

Pariçiṣta Parvan, (Text) Fasc. 1–5 @ /6/ each ... ... Rs.	1	14
Prākrita-Paingalam, Fasc. 1–7 @ /6/ each	2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Lakṣaṇam (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each	7	8
Parāçara, Institutes of (English)	1	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each ...	2	4
*Sāma Vēda Saṃhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each ...	2	4
[illegible]uddhikaumudī, (Text) Fasc. 1–3 @ /6/ each ...	[illegible]	[illegible]
[illegible]uçruta Saṃhitā, (Eng.) Fasc. 1 @ /12/ each ...	0	12
[illegible]addha kriyā kaumudī Fasc. 1–5 @ /6/	[illegible]	14
[illegible]aittereya Saṃhitā, (Text) Fasc. 14–15 @ /6/ each	[illegible]	[illegible]
[illegible]ṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each	[illegible]	[illegible]
[illegible]antravartika (English) Fasc. 1 ...	[illegible]	[illegible]
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each	[illegible]	[illegible]
Tattvarthadhigama Sutram Fasc. 1–2 ...	0	12
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1–3 @ /6/	[illegible]	2
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each	[illegible]	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1–10 @ /6/ each	[illegible]	[illegible]
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	[illegible]	[illegible]
Vallāla Caritam Fasc. 1– Text only	[illegible]	[illegible]
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each ...	[illegible]	[illegible]
Varṣa Kriya Kaumudi, Fasc. 1–5 @ /6/ each ...	[illegible]	14
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	[illegible]	[illegible]
Vidhan Parijata, Fasc. 1–5	[illegible]	14
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each	[illegible]	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each ...	2	10
Vṛhannāradiya Purāṇa, (Text) Fasc. 1–6 @ /6/ ...	[illegible]	[illegible]
Vṛhat Svayambhū Purāṇa, Fasc. 1–6	2	[illegible]

Tibetan Series.

Pag-Sam Ṭhi S'iñ, Fasc. 1–4 @ 1/ each	4	[illegible]
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3, Vol. III, Fasc. 1–6, @ 1/ each	14	[illegible]
Rtogs brjod dpag ḥkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II Fasc. 1–5 @ 1/ each	10	[illegible]

Arabic and Persian Series.

Ālamgi[illegible]mah, with Index, (Text) Fasc. 1–13 @ /6/ each	[illegible]	14
Al-Mu[illegible]si (English) Vol. I, Fasc. 1–3 @ /12/ ...	2	[illegible]
Āin-i-A[illegible]i, (Text) Fasc. 1–22 @ 1/ each	22	[illegible]
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fas[illegible] @ 1/12/ each	29	12
Akbarn[illegible]th Index, (Text) Fasc. 1–37 @ 1/ each	37	[illegible]
D[illegible] (English) Fasc. 1–8 @ Vol. II, Fasc. 1-1/ each ...	9	[illegible]
Ara[illegible]graphy, by Dr. A. Sprenger	0	[illegible]
Bādsh[illegible]mah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	[illegible]
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	[illegible]
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	[illegible]
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	[illegible]
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Āzādi, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Asmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10-12 @ /6/ each	13	[illegible]
Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each	1	14

*The other Fasciculi of these works are out of stock, and complete [illegible]ies cannot be supplied.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,
AND OBTAINABLE FROM
THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,
15, Piccadilly, London, W., and Mr. Otto
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	
Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	1	8
Advaitachinta Kaustubhe, Fasc. 1-2	0	12
*Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5 Vol. IV, Fasc. 1-5 @ /6	7	8
Aṇu Bhāṣyam, (Text) Fasc. 1-5 @ /6/ each	1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each	1	14
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 @ 1/ each	10	0
Bal Bhatta Fasc. 1 @ /6/ each	0	6
*Baudhaya Pauta Sutram Fasc. 1 @ /6/ each	0	6
*Bhāmati, (Text) Fasc. 4-8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-4	1	8
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each	1	8
Bṛhaddharma Purāṇa (Text) Fasc. 1-6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1	0	6
Catadusani Fasc 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ..	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-3 ...	3	12
Çatasāhasrikā Prajnāpāramitā (Text) Part. I, Fasc. 1-7 @ /6/ each ...	2	10
*Caturvarga Chintāmaṇi (Text) Vols. II, 1-25 ; III, Part I, Fasc. 1-18, Part II, Fasc. 1-10 @ /6/ each ; Vol. IV, Fasc. 11	22	0
Çlokavartika, (English) Fasc. 1-4	3	0
Çrāddha Kriyā Kaumudī (Text) Fasc 1-6 @ /6/ each	2	4
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-16 @ /6/ each... ...	4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each	5	10
Çrī Bhāshyam, (Text) Fasc 1-3 @ /6/ each	1	2
Dana kriyā kaumudī, Fasc 1-2 @ /6/	0	12
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-6...	2	4
Gadadhar Paddhati Vol. I, Fasc. 1	0	6
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1-6	2	4
Kātantra, (Text) Fasc 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each...	2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Vol. I, Fasc 1-9 II, Fasc. 1-10 @ /6/ each	7	2
Manuṭikā Sangraha, (Text) Fasc. 1-3 @ /6/ each	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-7 @ /12 each	5	4
*Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each	4	14
Nārada Smṛti, (Text) Fasc. 1--3 @ /6/	1	2
Nyāyavārtika, (Text) Fasc. 1--4 @ /6/	1	8
*Nirukta, (Text) Vol. III, Fasc. 1--6 Vol. IV, Fasc. 1--8 @ /6/ each ...	5	4
Nityācāra Paddhatiḥ (Text) Fasc. 1--7	2	10
Nityācārapradīpaḥ (Text) Fasc. 1-7	2	10
Nyayabinduṭīkā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1--6 ; Vol. II, Fasc. 1--3 @ /6/ each	3	6
Padumawati Fasc. 1--3 @ 2/	6	0

	Rs.	
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1--15 @ /6/ each ...	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and Index ; Vol. III, Fasc. 1 @ /12/ each	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1--6 @ /6/ each	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1--2 @ /12/ each ...	1	8
Riyāẓu-s-Salāṭīn, (Text) Fasc. 1--5 @ /6/ each	1	14
Ditto (English) Fasc. 1--3	2	4
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1--5 @ /6/ each	1	14
Ditto (English) Fasc. 1--14 @ /12/ each	10	8
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1--7 @ /6/ each ...	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif. (Text) Fasc. 1--6 @ /6/	2	4
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each ...	[illegible]	[illegible]
Wis-o-Rāmīn, (Text) Fasc. 1--5 @ /6/ each ...	[illegible]	[illegible]
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /6/ each	[illegible]	[illegible]
Tuzuk-i Jahāngirī, (Eng.) Fasc. 1	[illegible]	[illegible]

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1170 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8) 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brakets give the number of Nos. in each Volume		
4.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
		3	0
5.	Anīs-ul-Musharraḥīn	3	0
6.	Catalogue of Fossil Vertebrata	3	8
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	32	0
8.	Ināyah, a Commentary on the Hidāyah, Vols. II, and IV, @ 16/ each...	2	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I	4	0
10.	Khizānatu-l-'ilm	40	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each		
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera,	18	0
	Parts 1--III, with 8 coloured Plates, 4to. @ 6/ each	4	0
13.	Sharaya-ool-Islām	10	0
14.	Tibetan Dictionary, by Csoma de Körös	8	0
15.	Ditto Grammar " "	3	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/		
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson	1	0
18.	Memoir on maps illustrating the Aucient Geography of Kasmir by M. A. Stein PH.D., JI. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1--29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

8-9-05.

Books are supplied by V.P.P

दिवि देवैश्च पूज्यन्ते ।

एतेषामेकमपि यः कथयेद् वा पठेत् सदा ।
स देहबन्धं भित्त्वा तु मामेव प्रतिपद्यते ॥

तथा,—

इमानि तु महाभागे यो मे नामानि कीर्त्तयेत् ।
समस्तनिलयो भर्गो भस्मशायी यतक्रतुः ॥
वामदेवः प्रशान्तश्च सर्व्वश्चैव त्रिलोचनः ।
तापसोऽर्च्यः प्रियः सेव्यो यज्ञरूपोऽन्तकालकृत् ॥
पुराणः पुरुहूतश्च मृत्योर्मृत्युर्जितेन्द्रियः ।
अतीन्द्रियो निरिन्द्रियः सर्व्वभूतहृदिस्थितः ॥
संसारचक्री योगात्मा कपाली दण्डिरेव च ।
महादेव महादेव महादेवेति चैवहि ॥
पठेदेतन्नियमवान् शृणुयाद् वापि यः सदा ।
स देहभेदमासाद्य योगात्मा गणपो भवेत् ॥

तथा,—

कीर्त्तयन्ति च ये रुद्रं सकृदप्यत्र मानवाः ।
सर्व्वपापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि ॥
अश्वमेधसहस्राप्तिर्महादेवेति कीर्त्तनात् ।
हरइत्युच्चरन् मर्त्यः सर्व्वपापैः प्रमुच्यते ॥
ॐ नमो नीलकण्ठाय इति पुण्याक्षरात्मकम् ।
मन्त्रमाह सकृद् वा यः पातकैः स विमुच्यते ॥

त्रिपुरहर हरादिदेव शम्भो
त्रिनयन शङ्कर रुद्रपाणे ।
भव शरणमितीरयन्ति येऽस्मिन्
भवजलधौ न भवन्ति ते मनुष्याः ॥

जयेश्वर महादेव जय भूतपते हर ।
जयाशेषमहापापमोचक त्रिपुरान्तक ।
इति सङ्कीर्त्त्य वृजिनं त्यक्त्वा यान्ति परां गतिम् ॥
मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।
अमृतेशाय शर्व्वाय महादेवाय ते नमः ॥
एतानि मम नामानि यः पठेत् शिवसन्निधौ ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥
सकृदुच्चार्य्य रुद्रेति सर्व्वपापैः प्रमुच्यते ।
हरेति कीर्त्तिते वापि ज्योतिष्टोमफलं लभेत् ॥
[1][भवेति कीर्त्तिते वापि सर्व्व(सर्प)मेधफलं लभेत् ।]
शर्व्वेत्युक्त्वा नमस्कृत्य शिवलोके महीयते ॥
वेदैरधीतैः किं तस्य महादेवेति यो वदेत् ।
शिवेति सकृदुच्चार्य्य मोक्षमाप्नोति मानवः ॥
अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेद् देवमीशानं न स पापेन लिप्यते ॥

स्कान्दे,— निर्म्माल्यं यो हि मे देवि शिरसा धारयिष्यति ।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः ।

(१) D. Omits the portion bracketed.

नरके पच्यते घोरे तिर्य्यग्योनौ च सम्भवेत् ॥
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत् ।
तस्य पापं महत् शीघ्रं नाशयिष्ये महाव्रते ॥

अत्र धारणाङ्गतया शुचित्वं विधीयते । तेनाशुचिधारणे दोषः शुचित्वप्ररोचनार्थो न पुनरशुचेर्धारणे नरकपातफलकः । केवलमविहितरुद्रनिर्म्माल्यस्पर्शनमशुचेः स्नाननिमित्तान्तरम् । निर्म्माल्यापकर्षणादेर्विहितत्वात् तदा स्पर्शनं न स्नाननिमित्तम् । तेन शुद्धिकाले धारणमशुद्धिकाले त्यागः । निर्म्माल्यञ्चाङ्गलग्नपत्रपुष्पगन्धघृतादि न तु नैवेद्यं

ब्राह्मे,—रुद्राङ्गलग्नं सर्व्वञ्च दहेत् सर्व्वञ्च तत्क्षणात् ।

इति निर्म्माल्यप्रतिपत्तिमुक्त्वा "भस्माङ्गेभ्यश्च शाम्भव" मिति नैवेद्यस्य पृथक् प्रतिपत्तिविधानात् । यत्तु योगशिवीये,—

वितानच्छत्रचिह्नानि वस्त्रभूषणवाहनम् ।
गोभूहिरण्यदासादि देवद्रव्यमुदाहृतम् ॥
नैवेद्यं गन्धपुष्पाद्यमचिरान्म्लायते च यत् ।
तन्माल्यमुपभुक्तं सन्निर्म्माल्यमभिधीयते ॥
[1]शिवार्चारूढ़नैवेद्यभक्षणं लङ्घनं स्रजाम् ।
दानं वा दीक्षितस्यापि निषिद्धं त्र्यम्बकाज्ञया ॥

उभयथापि निर्म्माल्यधारणं शुचिना कार्य्यम् । नैवेद्यस्य निर्म्माल्यभिन्नत्वे च

(१) E. F शिवाग्रौ रुद्रनैवेद्यं

न भुञ्जीत निवेद्यान्नं गणानाञ्च शिवस्य च ।

इति वाक्यान्तरात्तन्निषेधोऽस्त्वेव ।

न धारयेत् क्वचित् शम्भो र्निर्म्माल्यञ्च न दापयेत् ।

इति न धारयेदुपयोगार्थं गृहादौ न रक्षयेदित्यर्थः । एवम्,—

क्रव्यादो जायते दानान्मातङ्गस्तस्य भक्षणात् ।

लङ्घनात् सिद्धिहानिः स्यान्निदध्याद्दहनोदके ॥

इत्यस्य प्रतिपत्तिविधिशेषत्वेऽपि स्मृत्यन्तरे शिवनिर्म्माल्यदान-भक्षणलङ्घननिषेधादपेक्षितानिष्टफलं स्यादेव । अत्रापवादवाक्यं पठन्ति,— रत्नहेमास्थिलिङ्गेषु चले लिङ्गे प्रदक्षिणे ।

गुरुष्वपि च निर्म्माल्यं नाख्यासु प्रतिमासु च ॥

अत्र प्रदक्षिणपदेन बाणस्वयम्भूलिङ्गमुच्यते । अत्र सोमसूत्राभावेन प्रदक्षिणसम्भावनया प्रदक्षिणयोग्यत्वसम्भवात् । गुरुषु स्थूलतरेषु प्रासादं विना वहिःस्थापिताकाशलिङ्गेषु । आख्यास्विति प्रतिमाविशेषणं तेन शिवाख्यासु प्रतिमास्वित्यर्थः । तेन कृत्रिम-मनुष्यस्थापितलिङ्गमात्रस्य निर्म्माल्ये दोषः नान्यत्रेति अस्य प्रामाण्येऽपि स्वयम्भूबाणचलरत्नहेमास्थिलिङ्गप्रतिमानैवेद्यमङ्गलग्नं चामीषां प्रतिपत्त्यन्तरविधानादेवाभक्ष्यम् । अपवादवचनादापदि कदाचित् भक्षणे न दोषः । यत्तु,—

पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधम् ।

अनिवेद्य न भोक्तव्यं यच्चान्यदुपकल्पितम् ॥

इति तदत्यन्तशिवभक्तस्य स्वभोज्ये शिवोपभुक्तिचिन्तामात्र-परमिति वदन्ति ।]

[1]अथ विष्णोः ।

[2]स्कान्दे,—

त्रिकालं ये प्रपश्यन्ति मुखं कृष्णस्य नित्यशः ।

न तेषां पुनरावृत्ति र्विष्णुलोकात् कथञ्चन ॥

अर्च्चितं केशवं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ।

पूजितं पूज्यमानं वा यः पश्येत् भक्तितो हरिम् ।

श्रद्धया मोदयेद् यस्तु सोऽपि योगफलं लभेत् ॥

[3]स्कान्दे—

ये पश्यन्ति नरा विष्णुं हेमभूषणभूषितम् ।

सकृद् भक्त्या कलौ शक्र पुनात्यासप्तमं कुलम् ॥

ये पश्यन्ति सकृत् कृष्णं पद्मपत्रोपरिस्थितम् ।

भक्त्या पद्मालयाकान्तं तैरासं दुष्करं पदम् ॥

चित्रस्थं पुण्डरीकाक्षं [4]सविलासं सविभ्रमम् ।

दृष्ट्वा विमुच्यते पापै र्जन्मकोटिषु[5] सञ्चितैः ॥

कान्तिभूषणभागाद्याश्रिते यस्मात् स्फुटं स्थिताः ।

तस्मात् सन्निधिमायान्ति चित्रस्थाः सुविशेषतः ॥

---

(१) Y. अथ दर्शनप्रणामप्रदक्षिणादिफलम् ।

(२) Y. स्कन्दपुराणे ।

(३) Y. स्कन्दपुराणे ।

(४) Y. सविन्यासं ०

(५) Y. ०कोटिसुसञ्चितैः ।

दृष्ट्वा सम्पूजितं देवं नृत्यमानोऽनुमोदयेत्।
असंशयमतिप्राज्ञः परं ब्रह्माधिगच्छति ॥

गारुडे,—

यः पश्यति मुखं विष्णो रात्रौ जागरणे स्थितः।
[1]शतजन्मकृतं पापं निमिषार्द्धेन नश्यति ॥

[2]स्कान्दे—

शङ्खे कृत्वा तु पानीयं भ्रामयेत् केशवोपरि।
सन्निधौ वसते विष्णोः कल्पान्तं क्षीरसागरे ॥
एवं कृत्वा तु कृष्णस्य यः करोति प्रदक्षिणम्।
पठन्नामसहस्रन्तु स्तवमन्यं पठन्नृप।
सप्तद्वीपवतीपुण्यं लभेत् प्रतिपदे पदे ॥
रुक्ममासकदानस्य फलं [3]विप्र पदे पदे।
पुरुषस्तु समाप्नोति यः करोति प्रदक्षिणम् ॥
प्रदक्षिणं ये कुर्व्वन्ति भक्तियुक्तेन चेतसा।
न ते यमपुरं यान्ति [4]यान्ति पुण्यवतां गतिम् ॥
देवदेवस्य कृष्णस्य यः करोति प्रदक्षिणम्।
पदे पदेऽश्वमेधस्य यज्ञस्य फलमाप्नुयात् ॥
प्रदक्षिणेन चैकेन देवदेवस्य मन्दिरे।
पृथ्वीप्रदक्षिणफलं नरः प्राप्य हरिं व्रजेत् ॥

---

(१) Y. शतजन्मार्जितम् ०
(२) Y. स्कन्दपुराणे—
(३) D. विप्राः ०
(४) Y. प्राप्य—

[1]पृथ्वीप्रदक्षिणफलमश्वमेधशतफलप्राप्त्यनन्तरमोक्षप्राप्तिरूपं भारतोक्तम्।

त्रिः प्रदक्षिणमावृत्य प्रत्येकं दण्डवत् क्षितौ।
कीर्त्तयन् मम नामानि यज्ञकोटिफलं लभेत् ॥

अत्र प्रदक्षिणप्रणामकीर्त्तनानां त्रयाणां फलम्।

त्रिः प्रदक्षिणं यः कुर्य्यात् [2]साष्टाङ्गञ्च प्रणामकम्।
दशाश्वमेधस्य फलं [3]प्राप्नुयान्नात्र संशयः ॥
प्रदक्षिणं यः कुरुते कार्त्तिके विष्णुसद्मनि।
पदे पदेऽश्वमेधस्य फलभागी भवेन्नरः ॥

यत्र यत्र संख्या नोक्ता तत्र तत्र—

एकं प्रदक्षिणं चण्ड्याः सप्तार्के त्रिर्विनायके।
चत्वारि [4]केशवस्य स्यात् शिवस्यार्द्धं प्रदक्षिणम् ॥

[5]अर्द्धं द्वयम्। तथा—

नमो ब्रह्मण्य[6]देवाय यो मां दृष्ट्वाभिवादयेत्।
भवत्यकल्मषो नित्यं सुखं याति महापथम् ॥

---

(१) D. पृथ्वीप्रदक्षिणफलमश्वस्य मेधः। तत्फलप्राप्त्युत्तरमोक्षप्राप्तिरूपं भारतोक्तम्।
(२) Y. साष्टाङ्गस्य प्रणामकम्।
(३) Y. आप्नुयान्नात्र ०
(४) Y. केशवे विद्यात्।
(५) Y. नार्द्धद्वयम्। E. F. अर्द्धद्वयम्।
(६) Y. ० देवायेति०

देवार्चादर्शनादेव प्रणमेन्मधुसूदनम्।
स्थानापेक्षा न कर्त्तव्या दृष्ट्वार्चां मुनिसत्तम॥
देवार्चादृष्टिपूतं हि शुचि तद् वस्तु कीर्त्तितम्।

यद्यप्येतद्दर्शनमात्रकालीनप्रणामविधिप्ररोचनार्थं तथापि तत्स्थानस्याशौच [1]सन्देहे तदपनयनप्रतीक्षायां विलम्बापत्ते र्विधिबाधात् सन्दिग्धशौचापवादोऽनेन क्रियते। स्पष्टामेध्यादिदर्शने तु तत्परिहारेणान्यत्र प्रणामसम्भवान्न विलम्ब इति [2]न तदपवादः। तेनार्चाग्रभूमिभागस्याशौचशङ्कया विलम्बो न कार्य्यः शुद्धत्वादर्चाग्रस्थस्य स्पष्टामेध्यस्य तु परिहारः कार्य्यः।

तथा,—

दण्डप्रणामं कुरुते विष्णवे भक्तिभावितः।
रेणुसंख्यं वसेत् स्वर्गे मन्वन्तरशतं नरः॥
[3]जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः।
कृत्वा प्रणामं देवस्य सर्व्वकाममवाप्नुयात्॥
परमाणूनि यावन्ति ललाटे पुरुषस्य च।
तावदब्दानि विप्रेन्द्र स्वर्गलोके महीयते॥
नमस्कारकृतो यज्ञः सर्व्वयज्ञेषु चोत्तमः।
नमस्कारेण चैकेन साष्टाङ्गेन हरिं व्रजेत्॥

---

(१) Y. सवलत्वे तद०
(२) Y. नापवादः।
(३) D. जानुभ्याञ्च पाणिभ्याञ्च—

[1]पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः॥

[2][दृशा वीक्षणम्। मनसा नमस्कारः। वचसा नमस्करोमीति वाक्यम्।]

अभिवाद्य जगन्नाथं स कृतार्थस्तथा भवेत्।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी॥

[3][विष्णुधर्म्मे,—

प्रणम्य शिरसा कृष्णं पादक्लिष्टे महीतले।
विकल्मषो भवेत् सद्यो ललाटे पाण्डुपांशुना॥
एकस्य कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेव जन्म
कृष्णप्रणामी न पुनर्भवाय॥

भगवद्गीतायाम्,—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥

तथा—

कस्माच्च ते न नमेरन् महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।

---

(१) D. दोर्भ्यां पद्भ्यां जानुभ्यामुरसा०
(२) D. Omits the portion bracketed.
(३) Y. Omits the portion bracketed.

विष्णुपुराणे,—

यस्मिन् न्यस्तमति र्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः।
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किञ्चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्त्तिते॥

गीतायाम्,—

सततं कीर्त्तयन्तो मां यजन्तश्च दृढ़व्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥
[1][ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।]

तथा,—

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥

तथा,—

एष मे सर्व्वधर्म्माणां धर्म्मोऽधिकतमो मतः।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्च्चेन्नरः सदा॥
लोकाध्यक्षं स्तुवन्नित्यं सर्व्वदुःखातिगो भवेत्।

इत्यादि बहुश उक्तं वक्ष्यते च।

(१) D. Omits the portion bracketed.

[1]अथ दुर्गायाः।

भविष्यपुराणे,—

छित्त्वा भित्त्वाच भूतानि हत्वा सर्व्वमिदं जगत्।
प्रणम्य शिरसा देवीं सर्व्वपापैः प्रमुच्यते॥
सर्व्वावस्थां गतो वापि युक्तो वा सर्व्वपातकैः।
दुर्गां दृष्ट्वा नरः सोऽपि प्रयाति परमं पदम्॥
स्वपन् तिष्ठन् व्रजन् धावन् [2]प्रजने भोजने रतः।
यः स्मरेत् सततं दुर्गां स च मुच्येत बन्धनात्॥
दुर्गाया दर्शनं पुण्यं दर्शनादभिवादनम्।
वन्दनात् स्पर्शनं श्रेष्ठं स्पर्शनात् तर्पणं वरम्॥
तर्पणान्मांसदानन्तु महिषाजनिपातनम्।
अहन्यहनि यो दुर्गां पूजयेद् रुधिरादिभिः।
कुलानां शतमुद्धृत्य ब्रह्मलोके महीयते॥

तथा,—

चण्डिका बलिदानेन अर्घ्यदानेन भास्करः।
शङ्करो नृत्यगीताभ्यां नोपवासं विना हरिः॥

(१) E. F. अथ दुर्गाया दर्शनादिफलम्।
(२) E. F. प्रलपन्

अथ सर्व्वदेवसाधारणप्रियाणि ।

शिवोऽभिषेकसन्तुष्टो भक्ष्यतुष्टो विनायकः ।
[1][अलङ्कारप्रियो विष्णुः श्रिया देवः प्रसीदति ॥
ब्रह्माध्ययनसन्तुष्टः कर्म्मणा च शतक्रतुः ।
वैनतेयः सर्पवरैर्भास्करोऽर्घ्येण तुष्यति ॥
होमेन तु ग्रहः श्रीदस्तेन तुष्टा नवग्रहाः ।
चामुण्डायक्षदैतेयाः सुरा मांसबलिप्रियाः ॥
धर्म्मं आचारसन्तुष्टः पायसेन सुधाकरः ।
मन्मथः कुसुमै स्तुष्टो लक्ष्मीः पद्मार्च्चनप्रिया ॥]
ध्यानेन सर्व्वदा सर्व्वे ज्ञानयोगेन मुक्तिदाः ॥

भगवद्‌गीतायाम्,—

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम् ॥
अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्चयवन्ति ते ॥

तथा,--

यो यो यां यां तनुं भक्तः श्रद्धयार्च्चितुमर्हति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हितान् ॥

(१) D. Omits the portion bracketed.

अन्तवत्तु फलं तेषां तद् भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्‌भक्ता यान्ति मामपि ॥

इति मुक्तिफलव्यवधानेनान्यदेवपूजानिन्दा यद्यपि विष्णुभक्तिप्रशंसार्थेति प्रतिभाति (तथापि) विष्णोः शुद्धसत्वप्रतिविम्बितचैतन्यरूपस्य तद्बिम्बरूपस्य वा सर्व्वोत्कर्षात् रजस्तमोगुणतद्विकारावच्छिन्नानां देवतान्तराणां [1]गुणतारतम्यावश्यम्भावाद् गुणत्रयसाम्यावस्थाविद्यावच्छिन्नस्य वा विष्णोः सर्व्वोत्कर्षस्य [2]सर्व्ववादिसिद्धत्वात् "अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः" इति श्रुतेः । तमेतमग्निचित्यध्वर्य्यव उपासते सामेति च्छन्दोगा उच्छम्(?)इति बह्वृचा जातुर्(?)इति जातुविदः(?)सर्पा देवजन इति (सर्पं) देवजनविदो रूपमिति गन्धर्व्वा गन्धर्व्व इत्यप्सरस इत्युक्त्वा तं यथायथोपासते तदेव भवति परिच्छिन्नोपासनायाः परिच्छिन्नफलम् (इति) उक्त्वा (च) तस्मादेवमेवंवित् सर्व्वैरेवैतैरुपासीत इति सर्व्वात्मकस्य विष्णोरुपास्यत्वं श्रुतेः ।

विष्णु र्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः ।
तस्मात् पूज्यतमं नान्यमहं मन्ये जनार्द्दनात् ॥

इति याज्ञवल्कीयवचनाद्—

वासुदेवं परित्यज्य येऽन्यदेवमुपासते ।
नरकाय भवन्त्येते नात्र कार्य्या विचारणा ॥

इति दोषश्रुतेश्च ।

(१) E. F. गुणतारतम्येन गुणतारतम्या ०

(२) E. F. सर्व्ववादिसम्मतत्वा ०

विशेषतश्च—नान्यदेवं नमस्कुर्य्याद् वैष्णवो न च पूजयेत् ।
नान्यप्रसादं गृह्णीयान्नान्यदेवं निरीक्षयेत् ॥

इति निषेधात् मोक्षार्थिना विष्ण्वन्यदेवार्चनादिकं न कर्त्तव्यम् । केवलम्—

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारणम् ॥

इत्युक्तदिशा देवतान्तराराधनस्यापि विष्ण्वाराधनरूपत्वेन—

यत्करोषि यदश्नासि यज्जुहोसि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

इति देवतान्तरपूजनस्यापि विष्णोः समर्पणं कार्य्यम् । अन्यथा—

स्मृतिश्रुती मम वाक्ये यस्ते उल्लङ्घ्य वर्त्तते ।
आज्ञाच्छेदी मम द्वेषी न भक्तश्च न वैष्णवः ॥

इति भगवद्वचनविरोधः स्यात् । एवञ्च नान्यदेवं नमस्कुर्य्यादिति विष्ण्वाराधनोपायबुद्धिं विनेति शेषः । एवञ्च—

शक्तिनिष्ठो भवेत् शैवः शैवो विष्णुं प्रपूजयेत् ।
वैष्णवो नारसिंहः स्यात् सा काष्ठा सा परा गतिः ॥

इति क्रमाराधनं मुक्तिफलत्वेनोक्तं तत्तु देवताराधने मुक्तिफलाभिधानं विष्ण्वाराधनद्वारकं मन्तव्यम् । पुत्रपश्वादिफलाभिसन्धानन्तु विष्ण्वाराधनेऽपि न कर्त्तव्यं किं पुनः विष्ण्वाराधनफलकदेवतान्तराराधने । फलकथनं तत्तत्कामिनः प्रवृत्तिसौकर्य्याय । कामार्थं तावत् प्रवर्त्ततां पश्चाद् विवेके कामनां त्यक्त्वा प्रवर्त्तिष्यत इत्यभिप्रायः । यच्च वाराहे महादेववाक्यम्—

मां विष्णोर्व्यतिरिक्तं ये ब्रह्माणञ्च द्विजोत्तम ।
भजन्ते पापकर्म्माणस्ते यान्ति नरकं नराः ॥

इति । तथा,—

मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुमीश्वरात् ।
(तथा)
यस्त्वभेदेन पश्येत तस्य मुक्ति र्न संशयः ॥

इति । तदुभयतो भेदबुद्धिरेव मुक्तिप्रतिबन्धकत्वेन निन्द्यते नत्वभेदकबुद्धिः । पूजाङ्गत्वेन येन विष्णुपूजायामीश्वराभेदबुद्धिरङ्गं स्यात् । शिवपूजायामपि न विष्णुभेदबुद्धिरङ्गम् । किन्तु शिवाराधनं विष्णुप्रीतये करोमीत्येवं बुद्धिः कार्य्या । यच्च कौर्म्मे जयध्वजस्य विष्ण्वेकभक्तिं दृष्ट्वा भ्रातृभिरभियोगे व्यासवाक्यम्,—

या यस्याभिमता पुंसः सा हि तस्यैव देवता ।
तस्मात् जयध्वजो नूनं विष्ण्वाराधनमर्हति ॥

किन्तु रुद्रेणैकात्म्यबुद्ध्या पूज्यो हरिः सदेति तदपि—

विष्णुरुद्रान्तरं ब्रूयात् श्रीगौर्य्योरन्तरं तथा ।
अज्ञानां मन्दबुद्धीनां वाक्यं शास्त्रविगर्हितम् ॥

इति । स्मृत्यन्तरे स्नातकव्रतत्वेन विष्णुरुद्रभेदज्ञानस्य वर्जनीयत्वात् तत्समानार्थत्वात् विष्ण्वाराधनप्रकरणबाधेन भेदज्ञानवर्जनमेव पुरुषार्थतया बाध्यते न तु विष्णुपूजाङ्गत्वेन विष्णौ रुद्रैक्यबुद्धिः । तत्सिद्धं विष्ण्वाराधनमेव मोक्षप्रदम् । देवतान्तराराधनं तत्समर्पणेन विष्ण्वाराधनरूपम् । शौचाचाराणां सर्व्वेषां विष्ण्वाराधनरूपत्वादयं विशेषः,—शौचस्नानादेर्विष्णुपूजाधिकारसम्पादकत्वेन

दृष्टद्वारं देवतान्तराराधनमदृष्टद्वारेण विष्णुाराधनपरम् । तथा-चादावेव प्रतिज्ञा—

यदुच्छ्वासादिकं कर्म्म तत्त्वया प्रेरितो हरे ।
करिष्यामि तवाज्ञेयमिति विज्ञापनं मम ॥
साधु वाऽसाधु वा कर्म्म यद् यदाचरितं मया ।
तत्सर्व्वं भगवन् विष्णो गृहाणाराधनं परम् ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

सर्व्वञ्चैतदस्माभिर्विष्णुभक्तिप्रदीपे प्रपञ्चितम् ।

इत्यग्निचिद्-वाजपेयिनरसिंहविरचिते नित्याचार-प्रदीपे देवगृहसंस्कारनिर्म्माल्यापनयनस्नानस्तु-तिनमस्कारप्रदक्षिणादिदेवकार्य्याणि ।

देवकार्य्यकालेऽपराधप्रसङ्गश्चेत् तत्परिहाराय यत्नः कार्य्यः । तद्यथा—

अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्त्तिताः ।
यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे ॥
देवोत्सवाद्यसेवा तु अप्रणामस्तदग्रतः ।
एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणम् ॥
उच्छिष्टे चैव वाऽशौचे भगवद्वन्दनादिकम् ।
पादप्रसारणञ्चाग्रे तथा पर्य्यङ्कबन्धनम् ॥

भोजनं शयनञ्चैव मिथ्याभाषणमेव च ।
उच्चैर्भाषा वृथाजल्पो रोदनञ्चैव विग्रहः ॥
निग्रहानुग्रहौ चैव स्त्रीणां साकूतभाषणम् ।
अश्लीलकथनञ्चैव अधोवायुविमोक्षणम् ॥
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः ।
शक्त्या गौणोपचारश्च अनिवेदितभक्षणम् ॥
तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणम् ।
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिनः ॥
पृष्ठीकृत्यासनञ्चैव परेषामभिवादनम् ।
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ॥

पादुकैर्वापीत्यपिशब्देनोपानद्धोऽप्युपादानम् । उत्सवादीत्यादि-शब्दः प्रतिष्ठादिपरः । तत्पुरस्तात् प्रदक्षिणमन्यस्य । उच्छिष्ट-पदं लेपाशौचमात्रपरम् । [1][अशौचपदं सूतकमृतकपरम् ।] कीर्त्तनमात्रन्तु अशौचे कर्त्तव्यमित्युक्तम् । पादप्रसारणञ्चाग्र इत्यग्रपदं परस्तुतिपर्य्यन्ते सम्बध्यते । शक्त्येति षोड़शोपचारसामर्थ्ये पञ्चोपचाराद्याश्रयणम् । अनिवेदितभक्षणं स्वभोज्यस्य भगव-दुपभुक्तमचिन्तयित्वा भोजनम् । अनर्पणं अदानम् । विनियुक्ताव-शिष्टस्य प्रदानं व्यञ्जनादिन इति सर्व्वपाकसमाप्तौ पुनरति-थ्यर्थं कृतस्य पाकस्यातिथिविनियोगानन्तरं यदवशिष्टं तस्य प्रदानम् । यद्वा दुर्गोत्सवशिवोत्सवादौ तत्पूजामात्रार्थं कृतस्य पाकस्यावशिष्टप्रदानम् । सर्व्वार्थनित्यगृहस्थपाकस्य तु वैश्व-

---

(१) D. Omits the portion bracketed.

देवातिथिबलिदानानन्तरमपि विष्णुपूजार्थं स्वांशोऽस्तीति न विनियोगावशिष्टत्वं सर्वार्थाज्यादेर्ध्रुवागृहीतस्य शेषाभावेन यथा ध्रौवेण स्विष्टकृत्। तदुक्तं जैमिनिना,—"अशेषत्वात्तु नैवं स्यात् सर्व्वादानादशेषता।" त्यक्तस्य पुरोडाशादेः पूजान्तर-नैवेद्यतुल्यत्वेन निविष्टत्वादेवापरिग्रहः। तत्परिग्रहो विनियुक्त-परिग्रह एव विनियुक्तावशिष्टपरिग्रह इति नायमपराधस्तत्र। किन्तु निर्म्माल्यपुष्पदानादिवद्दोषान्तरं तत्र। श्राद्धे अवलेहितस्य श्राद्धदाने निषिद्धत्वात्। अवलेहितस्य दानासम्भवेन तज्जातीय-परत्वादस्य द्रव्यस्यैकदेशोऽन्यत्र विनियुक्तार्थपर्य्यवसानात्। बालाग्निगुरुदेवेभ्यः पितृपाको न दातव्यो यावत्पिण्डान्न निर्वपेदिति वाक्यान्तराच्च। पिण्डदानान्ते च

यत्किञ्चित्पच्यते गेहे भक्ष्यं भोज्यमथापि वा।
अनिवेद्य न भोक्तव्यं पिण्डमूले कथञ्चन॥

इति सर्व्वस्य पितॄनुद्दिश्य त्यागविधानात्। "भुञ्जीत पितृसेवित"-मिति स्वभोज्यस्य पितृसेवितत्वकथनाच्च।

पितृशेषन्तु यो दद्याद्धरये परमात्मने।
रेतोधाः पितरस्तस्य भवन्तीत्यनुशुश्रुमः॥

इति श्राद्धशेषदाने स्यादेवापराधः। एवं "ततो गृहबलिं हरेत्" इत्यादिवचनान्तरात् पितृशेषादपि बलिहरणमिति। केवलं श्राद्धात् पूर्व्वम्,—

विष्णोर्निवेदितं सम्यक् देवेभ्यो जुहुयाद्धविः।
पितृभ्यश्चापि तद्देयं फलस्यानन्त्यमश्नुते॥

इति वाक्ये निवेदितपदस्य निवेदितजातीयपरत्वं निरिष्टिकविनि-योगनिषेधात्। वैष्णवं सात्वतेभ्यश्चेति प्रतिपत्तिविधानाच्च कल्पत इति श्राद्धपरिवेशकाल एव विष्णवे कल्पयित्वा निवेद्य श्राद्धोत्सर्ग-समाचार इति निवेदितपदस्य निरिष्टिकपरत्वे कैमुतिकन्यायेन सुतरां तज्जातीयस्य दानाविरोध इति समाचारः संगच्छते। परेषामभिवादनमित्यत्रापि पृष्ठीकृत्येत्यनुषङ्गः। भगवदभिमुख-मन्याभिवादने न विरोधः। केवलं स्वाचार्य्यसन्निधाने चाचार्य्यायोप-संगृह्य उपसंजिघृक्षेदाचार्य्यं प्रतिषिधेदितरः। आचार्य्यस्याचार्य्य-सन्निधाने अनेन न्यायेनाभिवाद्य तं निवारयेदित्याहुः। निज-स्तोत्रं स्वस्तुतिः। अत्र शिष्टाः,—

अहन्यहनि यो मर्त्त्यो गीताध्यायं पठेत् पुनः।
द्वात्रिंशदपराधांस्तु क्षमतेऽस्य च केशवः॥

इति। तथा,—

अपराधसहस्राणि अपराधशतानि च।
पद्मनैकेन देवेशः क्षमते हेलयार्चितः॥

पाद्मे,— यः करोति हरेः पूजां कृष्णशस्त्राङ्कितो नरः।
अपराधसहस्राणि नित्यं हरति केशवः॥

इति। स्कान्दे—

अपराधाश्च ये प्रोक्ताः [1]पुराणैः केशवार्च्चने।
प्रोक्ते नामसहस्रे तु विलयं यान्ति कार्त्तिके॥

---

(१) D. पुरुषैः०

गारुड़े,—

कृतापराधोऽपि यदा कृष्णस्य मुखदर्शनम् ।
मुच्यते नात्र सन्देहः पापैर्जन्मायतैः कृतैः ॥

अत्र चापराधस्यापि दुरितहेतुत्वान्नामकीर्त्तनमपि तन्नाशोपायः । यत्तु भविष्ये,—

दशापराधांस्तोयेन क्षीरेण च शतात्परम् ।
सहस्रं क्षमते दध्ना घृतेनाप्ययुतं क्षमेत् ॥

इति तत् सूर्य्यशिवदुर्गापराधविषयं न च विष्णुतोयस्नानादौ । सौरस्नानफलस्य दशापराधक्षमादेरतिदेशफलस्यानतिदेशात् । तदुक्तं जैमिनिना,—"कर्म्मणस्त्वप्रवृत्तित्वात् फलनियमकर्त्तृसमुदायस्यानन्वयस्तदुबन्धनत्वात् ।" एतेन सूर्य्यादेरप्येते द्वात्रिंशदपराधाः । अपराधक्षमालिङ्गादित्यवधेयम् । यत्तु वाराहे द्वात्रिंशदपराधकीर्त्तनं प्रायश्चित्तकीर्त्तनञ्च तत् गृहीतवराहपुराणीयवैष्णवदीक्षभागवतपरम् । तथाहि,—शुद्धो भागवतः शुचिः

मम शास्त्रं वहिष्कृत्य अस्माकं यः प्रपद्यते ।

इति लिङ्गात् । तथाच तानि,-राजान्नं भक्षित्वोपसर्पणं तत्र चान्द्रायणतप्तकृच्छ्रसान्तपनानि । दन्तकाष्ठमखादित्वोपसर्पणं तत्र सप्तदिनानि दन्तकाष्ठमखादित्वाकाशशयनम् । मैथुनं गत्वा अस्नातस्य देवोपसर्पणं तत्र त्र्यहं यावकाहारः पिण्याकेन पुनस्त्र्यहं दिनमेकं वायुभक्षणम् । शवं स्पृष्ट्वाऽकृतप्रायश्चित्तस्य भगवदुपसर्पणं तत्र सप्तदिनमेकभक्तं त्रिरात्रमुपोष्य पञ्चगव्याशनम् । पञ्चरात्रशास्त्रं मुक्त्वा प्रकारान्तरेण भगवत्पूजा तत्र सप्तम्यामेकभक्तं ततो

दिनत्रयमुपोष्य पश्चात् पञ्चगव्याशनम् । रजस्वलां स्पृष्ट्वा अकृतस्नानस्य विष्णुस्पर्शनं तत्र त्रिरात्रमाकाशशयनम् । अथवा एकाहारः । पञ्चदशदिनान्ते पञ्चगव्यम् । शवं स्पृष्ट्वाऽकृतप्रायश्चित्तस्य क्षेत्रेऽवस्थानं तत्र पञ्चदशदिनमेकाहारोऽन्ते पञ्चगव्यं पिवेत् । देवस्पर्शनकालेऽधोवायुविसर्गः तत्र दिनत्रयं यावकभक्षणं दिनत्रयं कणभक्षणम् । देवकर्म्मकाले पुरीषोत्सर्गः तत्र दिनमेकं जले शयनम् । पञ्चरात्रमनधीत्य शास्त्रान्तरपठनं तत्र पञ्चदशदिनमाकाशशयनम् । नीलवस्त्रं परीधाय भगवदुपसर्पणं तत्र पञ्चचान्द्रायणं वराहोक्ताचमनं कृत्वा देवोपसर्पणम् । तच्चैवम्,—प्राङ्मुखः पादौ प्रक्षाल्य यथाविध्याचम्य मृत्त्रयेण करौ प्रक्षाल्य सप्तभिः प्रसृतिभिर्मुखं प्रक्षाल्य पादयोरेकैकस्मिन् पञ्चपञ्चाञ्जलिप्रसृतीर्दत्वा प्रसृतित्रयं पिवेत् । कराभ्यां मुखमुन्मृज्य प्राणायाममेकं कृत्वा शिरसि ब्रह्माणं स्मृत्वा वारत्रयं तत्स्पर्शनम् । एवं दक्षकर्णस्य वारत्रयं स्पर्शनम् । ततो दक्षनासायाः । ततः सलिलप्रसृतित्रयस्य प्रक्षेपः ।

अपराधं कृत्वा प्रायश्चित्तमकृत्वा भगवदुपसर्पणं महासान्तपनं तप्तकृच्छ्रञ्च । क्रुद्धस्य चलचित्तस्य देवस्पर्शनं आकाशशयनं कुर्व्वाणः षष्ठे कालेऽन्नं भागवताष्टगृहेभ्यो भिक्षयित्वा भुञ्जीत । निषिद्धपुष्पेणार्च्चनं तत्र मासमेकभक्तं दिनसप्तकं वीरासनम् । मासं चतुर्थकाले घृतपायसभोजनं दिनत्रयं यावकं दिनत्रयं वायुभक्षः । रक्तवस्त्रस्य देवोपसर्पणं तत्र पञ्चदशदिनान्येकभक्तं दिनद्वयं वायुभक्षः दिनमेकं जले वासः । अन्धकारे दीपं विना स्पर्शनं मन्त्रं विना च स्पर्शनं

तत्र पञ्चदशदिनान्येकभक्तं एकस्यां द्वादश्यामेकभक्तं ततो दिनं जलाहारस्ततो गोमूत्रसिद्धयवागूप्राशनम् । नीलव्यतिरिक्तकृष्णवस्त्रपरिधानेन भगवत्कर्म्मकरणं तत्र सप्ताहं यावकभक्षणं त्रिरात्रं सक्तुग्रासभक्षणं त्रिरात्रं पिण्डत्रयभक्षणम् । अधौतवस्त्रेण भगवत्कर्म्मकरणं तत्र यावकेन त्र्यहं पिण्याकेन त्र्यहं कणभक्षस्त्र्यहं पयोभक्षस्त्र्यहं दध्याहारस्त्र्यहं पायसेन दिनत्रयं वाय्वाहारस्त्र्यहम् । भुक्त्वा वराहमांसं भगवदुपसर्पणं जलं पीत्वा सप्ताहावस्थानं अक्षारलवणेन त्रिदिनं सक्तुभिश्च तथा त्र्यहं जलभक्षश्च सप्तैव सप्तपाषाणभक्षकः । सप्ताहं पयोभक्षः । जालपादं भक्षयित्वा भगवदुपसर्पणं जालपादः पक्षिविशेषः तत्र याज्ञवल्क्येन फलाहारेण त्र्यहं अक्षारलवणं त्र्यहम् ।

दिनत्रयं पयोभक्षो वायुभक्षो दिनत्रयम् ।

दीपं स्पृष्ट्वा हस्तावप्रक्षाल्य देवस्पर्शनं तत्कर्म्मकरणञ्च तत्र शुक्लद्वादश्यां चतुर्थकालभोजनं आकाशशयनञ्च । श्मशानं गत्वाऽस्नात्वा भगवदुपसर्पणं तत्र पञ्चदशदिनानि चतुर्थभक्तं आकाशशयनमेकवस्त्रस्य कुशास्तरे । तत्र प्रभाते पञ्चगव्याऽशनम् । तैलनिष्पीड़नावशिष्टपिण्याकं भक्षयित्वा भगवदुपसर्पणं तत्र सतक्रयावकेनैकदिनं पूकान्नपिण्डं जलञ्चैकदिने रात्रौ वीरासनं द्वितीयदिने रात्रावाकाशशयनं प्रभाते पञ्चगव्याशनम् । वराहमांसनैवेद्यदानं तत्र फलाहारः सप्तदिनं मूलाहारः सप्तदिनं सप्तदिनं पायसाहारः तिक्ताहारः सप्तदिनं यावकाहारः सप्तदिनं दध्याहारः सप्तदिनं सप्ताहं क्षारवर्ज्जितः । मद्यं गृहीत्वा देवगृहप्रवेशः तथा दीक्षितस्य

मद्यपानं तत्राग्निवर्णतप्तं सुरापानम् । कुसुम्भशाकादानं तत्र चान्द्रायणम् । पारक्येण वस्त्रेण नधूतेन वा भगवत्कर्म्मप्रचारः माघमासस्य शुक्लद्वादश्यां पूर्व्वमष्टकालभोजनं कृत्वा जलमात्राहारः प्रभाते पञ्चगव्याशनम् । विष्णवे नवान्नं न दत्वा नवान्नाशनं त्रिरात्रमुपवास एकरात्रमाकाशशयनम् । गन्धमाल्यान्यदत्वा धूपदानं तत्र शुक्लपक्षद्वादशीमारभ्य अष्टकालभोजनं आकाशशयनं प्रभाते पञ्चगव्यम् । उपानच्छन्नपदस्य देवगृहप्रवेशः तत्रैकरात्रमाकाशशयनं प्रभाते पञ्चगव्यम् । भेरीशब्दमकृत्वा भगवत्प्रबोधनं शुक्लद्वादश्यामाकाशशयनम् । प्रभूतमन्नं भुक्त्वा उद्गारयुक्तस्य भगवदुपसर्पणं तत्र यावकेन त्र्यहं वायुभक्षस्त्र्यहं तत्र आकाशशयनं कुशेषु प्रभाते पञ्चगव्याशनम् । असम्भृते देशे भूमौ कुशे शयनं तत्र कृच्छ्रचान्द्रायणाद्यशक्तौ प्रत्याम्नायेनानुष्ठानं गीताध्यायपठनं पद्मपुष्पदानमप्यशक्तस्य सहस्रनामपठनं कृष्णमुखदर्शनम्[१] ।

नरसिंहनिर्म्माल्यलङ्घनाद् भग्नदिव्यरथारोहणासमर्थं सुमन्तुं प्रति नारदवाक्यम्,—

अत ऊर्द्ध्वन्तु निर्म्माल्यं मा लङ्घय महीपते ।
नरसिंहस्य देवस्य तथान्येषां दिवौकसाम् ॥

अत्र द्विजोच्छिष्टमार्ज्जनं प्रायश्चित्तमुक्तं नारसिंहे ।

नित्याचारप्रदीपे भगवदपराधाः ।

---

(१) अत्रैतस्मिन्नपराधकीर्त्तने तत्प्रायश्चित्तकीर्त्तने च मूलवराहपुराणतः स्थाने स्थाने वैषम्यं दृश्यते । वराहपुराणस्य १२०—१२६ अध्याया द्रष्टव्याः ।

अत्र "देवकार्य्यस्य सर्व्वस्य" इति वचनाद् देवतासम्प्रदानस्यापि प्रथमभाग एव कालः ।

पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम् ।
विलेपनञ्चाक्षतञ्च केशवाय प्रयच्छति ।
तेन पुण्येन निवसेत् विष्णुलोके युगायुतम् ॥

इति सामान्यतः । विशेषतो विष्णुधर्म्मे—

पुष्पाणि च सुगन्धीनि मनोज्ञानि च यः पुमान् ।
प्रयच्छति हृषीकेशे स भागवत उत्तमः ॥

इति । तत्तद्वाक्यैश्च पूजाप्रकरणाद् वहिरेव फलार्थत्वेन तत्तद्द्रव्यविधानवाक्येन पूजासम्बन्धे फलसम्बन्धे वा वाक्यभेदापत्तेः पृथगेव गन्धविधानं फलार्थं विधीयते । एवं गोभूहिरण्यगृहयानासनदानञ्च तत्तत्फलार्थमेव । तत्र देवतायाः प्रतिगृहीतृत्वाभावेन ददात्यर्थस्य गौणत्वात् यत्र दद्यादिति यत्र वार्चयेदिति यत्रानुलिम्पेदिति सर्व्वत्र तत्तद्द्रव्यपुष्पगन्धादिविशिष्टपूजैव फलार्थं विधीयते । न च पूजायाः पञ्चोपचारादिनियमो देवताप्रीतिहेतुक्रियामात्रस्य पूजाशब्दार्थत्वात् ।

तदुक्तं भारते,—

यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्च्चेन्नरः सदा ।

इति । तथाच भट्टाः,—

स्तुतेरपि हि पूजात्वाज्जायेत यजिवाच्यता ।

इति । न च भट्टमते देवताप्रीत्यभावात् प्रीतिहेतुत्वं न पूजास्वरूपं तथापि देवतामुद्दिश्य कृता प्रीतिजननयोग्या क्रिया

पूजेति प्रत्येकपुष्पदानं गन्धानुलेपनादिकञ्च पूजैवेति न दोषः । अन्यथा पुष्पस्य देहे दानं गन्धस्यानुलेपनञ्च न स्यात् । देवतामुद्दिश्य त्यागमात्रेण दानविध्युपपत्तेर्देवताप्रतिमासम्बन्धो निष्प्रमाणकः । सुवर्णरजतगृहक्षेत्रादीनां साक्षात् प्रतिमाशरीरेऽनुपयोगेऽपि तद्रक्षणविधानादपहारे दोषाभिधानाच्च प्रतिमाशरीरे द्वारान्तरेण तेषामप्युपयोगः । तथाच योगशिवीये चण्डप्रतिष्ठानन्तरम्,—

ब्रूयादेनं शिवद्रव्यं रक्षंस्तिष्ठन् शिवान्तिके ।
वितानच्छत्रचिह्नानि वस्त्रभूषणवाहनम् ॥
गोभूहिरण्यदासादि देवद्रव्यमुदाहृतम् ।

भविष्यपुराणे च,—

नाधिकारोऽस्ति विप्राणां भौमानां देवपूजने ।
भृत्या भरतशार्दूल क्ष्माधिपत्ये विशेषतः ॥

इति । क्ष्माधिपत्ये देवभूमिप्रभुत्वे भौमानां मखेतरब्राह्मणानां मूल्यग्रहणेन नाधिकार इति मूल्यग्रहणं विना देवप्रभुत्वेऽधिकार इत्युक्तं भवति । मखानान्तु वेतनपूर्व्वकमप्यधिकारः ।

देवालयेषु सर्व्वेषु वर्ज्जयित्वा शिवालयम् ।
अधिकारः स्मृतो राजन् भोजकानां न संशयः ॥

इति भोजकपदवाच्यमखाधिकारं दर्शयति । एवं शावरभाष्ये देवग्राम इति तदुपजीविनां तत्र व्यवहारादभिधीयते इति । अन्यथा त्यक्ते साधारण्यात् सर्व्वेषां व्यवहारः स्यात् । तदुपजीविव्यवहारस्तु पूजाविनियोगार्थ एव तेन भूम्या दानमपि पूजैव ।

केवलं दानप्रावपठितानां दानेतिकर्त्तव्यतया अनुष्ठानसमाचारः। देवद्रव्यं देवतामुद्दिश्य त्यक्तं द्रव्यमिति यद्यपि लक्ष्मीधरेणोक्तं तथापि त्यागोऽपि पूजैवेति न दोषः। तथाच मन्त्रदेवप्रकाशिकायां पूजा पञ्चविधा। अभिगमनम्। उपादानम्। इज्या। स्वाध्यायः। योगः। इति श्रीपञ्चरात्रेऽभिहितम्। तत्राभिगमनं नाम सम्मार्जननिर्म्माल्यवहिःकरणादि। उपादानं पूजासाधनसम्पादनम्। इज्या गन्धपुष्पादिदानम्। स्वाध्यायो मन्त्रजपः। योगो देवतास्वरूपभावनेति। न चैवं पूजार्थं मातृकान्यासादिकरणप्रसङ्गः। तथा

सपर्य्या त्रिविधा प्रोक्ता तासामेकां समाश्रयेत्।

इति पञ्चोपचारदशोपचारषोड़शोपचाररूपत्रिविधपूजामधिकृत्य विधानेऽन्यत्र प्रसङ्गाभावात्। अतिथिपूजादौ येनादरस्यावश्यकत्वात् स्मार्त्तपूजादौ तेषामनङ्गत्वात्।

अर्च्चितं प्रतिगृह्णाति अर्च्चिताय प्रयच्छति।

इत्यादौ पुष्पादिदानमात्रेण पूजादर्शनाच्चेति। अत्र दानप्रकरणोक्तानां येषां पूजायां न निषेधस्तेषां पूजायामपि स्यादेवात्वम्।]

(अथानुलेपनम्।)

[1]चन्दनेनानुलिप्यैनं चन्द्रलोकमवाप्नुयात्।
शारीरमानसै र्दुःखैस्तथैवच विमुच्यते॥
दत्वा मृगमदं मुख्यं यशसा च विराजते।
दत्वा जातीफलक्षोदं क्रियासाफल्यमाप्नुयात्॥
रम्येणागुरुसारेण अनुलिप्य जनार्द्दनम्।
सौभाग्यमतुलं लोके बलं प्राप्नोति चोत्तमम्॥
तथा वकुलनिर्य्यासैरग्निष्टोमफलं लभेत्।
वकुलागुरुमिश्रेण चन्दनेन सुगन्धिना॥
समालभ्य जगन्नाथं पौण्डरीकफलं लभेत्।
[2]न दातव्यं द्विजश्रेष्ठ अतोऽन्यदनुलेपनम्॥

वाराहे,—[3]कर्पूरं कुङ्कुमञ्चैव शुक्लं तगरमेवच।
रसञ्च चन्दनञ्चैव अगुरुं गुग्गुलं तथा।

---

(१) Y. reads before this:—

चन्दनागुरुकर्पूरकुङ्कुमोशीरपद्मकैः।
अनुलिप्तो हरिर्भक्त्या वरान् भोगान् प्रयच्छति॥
चन्दनं सर्व्वतः श्रेष्ठं लेपनं शीतलं शुभम्।
भक्तेन भगवान् विष्णु र्यत्नेनानेन लेपितः॥
चन्द्रलोकं समाविश्य ततो विष्णुपुरं वसेत्।
विष्णुधर्म्मोत्तरे,—
चन्दनेनानुलिप्यैनं ०

(२) Y. adds before this line :—

एकीकृत्य तु सर्व्वाणि सोऽश्वमेधफलं लभेत्।

(३) Y. कुङ्कुमं कर्पूरञ्चैव ०

एतैर्व्विलेपनं दद्यात् सुरभिञ्च विचक्षणः ॥

एतच्च फलाश्रवणात् पूजाङ्गविषयम् । तत्वसारसंहितायाम्,—

उशीरं कुङ्कुमञ्चैव मांसी मलयजं तथा ।

तथाम्बुजञ्च ह्रीवेरं कुष्ठञ्चागुरुमेव च ॥

गन्धस्यैतानि [1]चाङ्गानि

इत्युक्तं तदपि पूजाङ्गम् । विष्णुः,—चन्दनागुरुकुङ्कुमकर्पूरमृगमद-जातिफलवर्ज्ज्यमनुलेपनं न दद्यात् । एतेषामेकेनापि गन्ध[2]साद्गुण्यम् । न त्वेषामेकमपि परिहृत्येत्यर्थः । [3]गारुड़े,—

कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।

कुङ्कुमस्य त्रयश्चैकं शशिनः स्याच्चतुः समम् ॥

[कर्पूरं चन्दनं दर्पं कुङ्कुमञ्च चतुः समम्[4] ।]

सर्व्वगन्धमिति प्रोक्तं समस्तरसवल्लभम्[5] ॥

विष्णुधर्म्मे,—

कालेयकं तुरष्कञ्च रक्तचन्दनमेव च ।

नृणां भवति रोगाय दत्तानि पुरुषोत्तमे ॥

दारिद्र्यं पद्मकं कुर्य्यादुशीरं चित्तविभ्रमम् ।

(१) Y. चान्यानि

(२) Y. माङ्गल्यम् । नत्वेतेषा ०

(३) Y. गरुड़पुराणे,—

(४) D. Omits the portion bracketed.

(५) Y. ० समस्तसुरवल्लभम् ।

अथ व्यजनम् ।

विष्णुधर्म्मोत्तरतृतीयकाण्डे,—

अनुलिप्य जगन्नाथं तालवृन्तेन वीजयेत् ।

विष्णुलोकमवाप्नोति पुरुषस्तेन कर्म्मणा ॥

तेन कर्म्मणा व्यजनेन नत्वनुलेपनव्यजनयोः समुदितयोः फल-सम्बन्धः ।

[1]चामरैर्व्वीजयेद् यस्तु देवदेवं जनार्द्दनम् ।

तिलप्रस्थप्रदानस्य फलं प्राप्नोत्यसंशयम् ॥

---

[2][*तर्व्वपूजाप्रकृतीभूतदीक्षापूजायां प्रपञ्चसारे कानिचित् पुष्पाण्युक्ता

सुगन्धीनि सुरूपाणि स्वागमोक्तानि यानि च ।

इति स्वागमोक्तपुष्पाणां विधानात् न च तत्तद्देवतागमे पूजा-ङ्गत्वेन यान्युक्तानि तेषामेव ग्रहणम् । स्वागमोक्तानीत्यविशेषोपादानात् काम्यानामपि पूजाङ्गत्वाविशेषाच्च । भविष्यपुराणादेरपि तत्तद्देवतायाः स्वागमत्वमेवाविशेषादागमपदस्य शास्त्रपरत्वादिति* ।

अत्र सूर्य्यप्रदेयानि,—

(१) Y. चामरैर्वीजयेद् ०

(२) Y. Omits the portion bracketed.

— अत्रायं तारकाद्वयमध्यगतः पाठस्त्रिष्वादर्शपुस्तकेषु दृष्ट इति यद्यपि यथायथं रक्षितस्तथापि पूर्व्वापरसन्दर्भेण सह सम्यङ्निरपेक्ष इति प्रक्षिप्तत्वेन सम्भाव्यते ।

भविष्यपुराणे,—

अथानुलेपनं कृत्वा दिव्यैर्गन्धैः सुगन्धिभिः ।
वर्षकोटिशतं दिव्यं सूर्य्यलोके महीयते ॥
गन्धानुलेपनं पुण्यं द्विगुणं चन्दनस्य च ।
चन्दानाच्चागुरु ज्ञेयं पुण्यमष्टगुणं नृप ॥
कृष्णागुरौ विशेषेण द्विगुणं फलमाप्नुयात् ।
तस्मात् शतगुणं पुण्यं कुङ्कुमस्य विधीयते ॥
चन्दनागुरुकर्पूरैः श्लक्ष्णपिष्टैः सकुङ्कुमैः ।
भानोरङ्गं समालिप्य कल्पकोटिं वसेद् दिवि ॥
सम्वीज्य तालवृन्तेन शुभगन्धैः प्रलेपितम् ।
दशवर्षसहस्राणि वीर मित्रपुरे वसेत् ॥

तालवृन्तदानेन दशवर्षसहस्रं सूर्य्यलोकवासः । मायूरव्यजनदानेन वर्षकोटिशतं वायुलोकाप्तिः । हेमरत्नरूप्यदण्डचामरदाने चामरहस्तस्त्रीसेवितस्य चिरं सूर्य्यलोकाप्तिः ।

अथ शिवस्य ।

अयमेव गन्धः सूर्य्यपदस्थाने शिवपदप्रक्षेपेण शिवस्य चार्थबोधकः । इति शिवस्य ।

अथ ब्रह्मणः ।

सूर्य्यगन्ध एव सूर्य्यपदस्थाने ब्रह्मपदप्रक्षेपेण ब्रह्मणश्चार्थबोधकः ।

अथ विष्णोः ।

नरसिंहपुराणे,—

चन्दनागुरुकर्पूरकुङ्कुमैरच्युताकृतिम् ।
विलिप्य भक्त्या राजेन्द्र कल्पकोटिं वसेद् दिवि ॥

विष्णुधर्म्मे,—

चन्दनागुरुकर्पूरकुङ्कुमोशीरपद्मकैः ।
अनुलिप्तो हरिर्भक्त्या वरान् भोगान् प्रयच्छति ॥
चन्दनं सर्व्वतः श्रेष्ठं लेपनं शीतलं शुभम् ।
भक्तेन भगवान् विष्णुर्यत्नेनानेन लेपितः ॥
चन्द्रलोकं समाविश्य ततो विष्णुपुरं विशेत् ।

विष्णुधर्म्मे,—चन्दनेन चन्द्रलोकम् । मृगमदेन यशः । जातिफलेन क्रियासाफल्यम् । अगुरुसारेण सौभाग्यम् । वकुलनिर्य्यासैरग्निष्टोमफलम् । वकुलागुरुमिश्रचन्दनेन पौण्डरीकफलम् । सर्व्वैरेकीकृतैरश्वमेधफलम् ।

वाराहे,—

कर्पूरं कुङ्कुमञ्चैव शुक्लं तगरमेव च ।
रसञ्च चन्दनञ्चैव अगुरुं गुग्गुलं तथा ।
एतैर्विलेपनं दद्यात् सुरभिञ्च विचक्षणः ॥

अथ दुर्गायाः ।

भविष्ये,—

चन्दनागुरुकर्पूरैर्यस्तु दुर्गां प्रपूजयेत् ।
स तु वर्षशतं दिव्यं शक्रलोके महीयते ॥

तथा गन्धानुलेपनेन ज्योतिष्टोमफलम् । कृष्णागुरुणा वाजपेयफलम् । कुङ्कुमेन गोसहस्रफलम् । चन्दनागुरुकर्पूरकुङ्कुमैः श्लक्ष्णपिष्टैर्विलिप्य कल्पकोटिपर्य्यन्तं स्वर्गः ।

विलिप्तां पूजयेद् दुर्गां गन्धपुष्पाधिवासिताम् ।
तालवृन्तेन संवीज्य महासत्रफलं लभेत् ॥

इति नित्याचारप्रदीपेऽनुलेपनानि ।

अथ पुष्पाणि ।

सूर्य्यस्य ।

भविष्ये,—

पुष्पैररण्यसम्भूतैः [1]पत्रैर्वा गिरिसम्भवैः ।
अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्ज्जितैः ॥

(१) E. F. पत्रैर्वाऽगिरिसम्भवैः ।

आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेद् रविम् ।
पुष्पजातिविशेषेण लभेत् पुण्यं शताधिकम् ॥

इति ।

दत्वा दश सुवर्णस्य निष्कस्य लभते फलम् ।
करवीरे तथैकस्मिन्नर्काय विनिवेदिते ॥

अत्र पुष्पैः सम्पूजयेदिति स्पष्टविधिना वक्ष्यमाणसर्व्वपुष्पाणां पूजाङ्गत्वावगमः । पुष्पजातिविशेषेणेत्यादिना तेषामेव फलसम्बन्धः । नचाश्रयलाभः । उपक्रमे पूजामनूद्य पुष्पविधानमुपसंहारे च स्वयमुत्पाद्य पुष्पाणीति पूजाङ्गविधिमध्येऽपि मुकुलैर्नार्चयेद्देवमित्येवं पूजाङ्गविधानात् कथम्भावानुस्मृतिरूपप्रकरणप्रधानविध्यभावेऽपि सद्भावात् प्रकरणादाश्रयलाभसम्भवात् । तत्र यथा “भूयस्तेनोभयश्रुति”इति नित्यज्योतिष्टोमस्य यजुर्वेदोत्पन्नत्वेन सामवेदे तद्विध्यभावेऽपि प्रकरणम् ।

तदुक्तम्,—

परप्रकरणस्थानामङ्गं श्रुत्यादिभिस्त्रिभिः ।
ज्ञाते पुनश्च तैरेव सन्देशेन तदिष्यते ॥

इति । नचैवं फलश्रुतेरङ्गस्थस्य जुहूपर्णमयीन्यायेनार्थवादत्वम् । “फलन्तु तत्प्रधानायाम्” इत्युक्तदिशा फलविधित्वप्रतीतेः । एवं कामशब्दतुल्यनिर्द्देशात् यथा खादिरं वीर्य्यकामस्येति संयोगपृथक्त्वविधिः (तथा) स्मृतिवाक्येषु फलं प्राप्नुयादित्यादिशब्दैरेव फलविधिप्रतीतिः । यदा तु नात्र पूजाप्रकरणमितिपक्षस्तदा गुणफलसम्भवात् तत्तत्पुष्पपूजनमेव फलाय विधीयते ।

तथा च नित्यपूजाकालं विनापि प्रातरप्येतानि पुष्पाणि देयानि। तत्र करवीरपुष्पदाने दशसुवर्णनिष्कदानफलम्। जाती-वकुल-पाटलश्वेतमन्दारसितपद्मनागकेशर–चम्पकपुन्नागमुद्गरास्तत्-समाः। अर्कपुष्पेण सूर्य्यलोकप्राप्तिः। करवीरसहस्रेभ्यो बिल्व-पत्रमधिकम्। बिल्वपत्रसहस्रेभ्यः पद्ममेकम्। पद्मसहस्राद् वकपुष्पम्। तत्सहस्रात् शमीपुष्पम्। बृहतीपुष्पं कुङ्कुमपुष्पञ्च शमीपुष्पसमम्। तत्सहस्रान्नीलोत्पलम्। [1]रक्तोत्पलसहस्रा-न्नीलोत्पलशतम्। रक्तकरवीरैश्च पूजने कल्पकोटिशतञ्च सूर्य्य-लोके वासः। सर्व्वपुष्पेषु मालायां स्वस्वफलं द्विगुणम्।

तथा,—मालती मल्लिका चैव तथा काशोऽतिमुक्तकः।
पाटली करवीरश्च जया पारन्तिकेति (?) च॥
कुब्जकस्तगरश्चैव कर्णिकारः कुरुण्टकः।
चम्पको रेतकः (?) कुन्दो बाणो वदरमालिका॥
अशोकस्तिलको लोध्रस्तथा पैनाटरूपकः (?)।
शतपत्राणि चान्यानि वकाद्यानि विशेषतः॥
अगस्तिकिंशुकौ तद्वत् पूजार्थं भास्करस्य च।
बिल्वपत्रं शमीपत्रं पत्रं भृङ्गरजस्य च॥
तमालपत्रं च तथा सदैव तपनप्रियम्।
तुलसी कालतुलसी तथा रक्तञ्च चन्दनम्॥
[2]केतकीपुष्पपत्रञ्च सद्यस्तुष्टिकरं रवेः।

(१) E. F. रक्तोत्पल-सहस्रनीलोत्पलशतरक्तकरवीरैश्च पूजने ०
(२) D. केतकीपत्रपुष्पञ्च ०

अतिमुक्तको माधवी। कुरुण्टकोऽत्र पीताम्लानः। केतकी पत्रदानमपि। एतेषां मालत्यादीनां फलश्रवणाभावात् पूजाया-मेवाङ्गत्वम्। एवं पुष्पाभावे पत्राणि पत्राभावे फलानि फलाभावे तृणगुल्मौषधीः। इत्यपि पूजाविषयं न फलार्थम्। केशकीटावपन्न-शीर्णपर्य्युषितस्वयम्पतितमुकुलवर्जनं तु पूजायामिव फलार्थपुष्प-समर्पणे इति। ततस्तु,—

मुद्गराणि कदम्बानि रात्रौ देयानि भानवे।
दिवा शेषाणि पुष्पाणि दिवारात्रौ च मल्लिका॥
प्रहरं तिष्ठते जाती करवीरमहर्निशम्।

न निर्म्माल्यतां यातीत्यर्थः। अन्येषु यावद्गन्धानुवृत्तिः। ततः पूर्व्वमुद्धरणे तु ब्रह्महत्याफलं महारौरवपातः। सूर्य्यस्योपरि पुष्प-मण्डपकरणे सूर्य्यलोके सर्व्वोपरि वासः। नानापुष्पैः सूर्य्यगृह-मण्डने अक्षयं कालं रमते। स्वयमुत्पाद्य पुष्पाणि सूर्य्यपूजने सूर्य्यतुष्टिः। स्वर्णपद्मदाने कल्पान्तमिन्द्रार्द्धासने वासः।

वर्ज्याणि पुष्पाणि।

देवीपुराणे,—

सूर्य्यस्य तगरं तथा। वर्जयेदित्यर्थः।

भविष्ये,—

कुब्जलोन्मत्तकं केरी तथाच गिरिकर्णिका।

गिरिकर्णिका अपराजिता।

तथाम्रातकजैः पुष्पैर्नार्चनीयो दिवाकरः।

अथ शिवस्य पुष्पाणि ।

भविष्यपुराणे,—

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः ।
अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ॥
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेत् शिवम् ।

अत्र पूर्व्ववदेव पुष्पाणां भविष्यपुराणोक्तानां पूजाङ्गत्वं गुणफलसम्बन्धश्च ।

अर्कपुष्पे तथैकस्मिन् शिवाय विनिवेदिते ।
दश दत्वा सुवर्णस्य यत्फलं तदवाप्नुयात् ॥

तत्फलं शिवलोकवासः। अर्कपुष्पसहस्रतुल्यफलं करवीरस्यैकस्य दाने। जातीपाटलविजयश्वेतमन्दारसितपद्मानि करवीरसमानानि। करवीरसहस्रतुल्यं बिल्वपत्रम्। बिल्वपत्रसहस्रतुल्यं बृहतीपुष्पम्। बृहतीपुष्पसहस्रतुल्यं द्रोणपुष्पम्। द्रोणपुष्पसहस्रतुल्यमपामार्गपुष्पम्। तत्सहस्रतुल्यं कुशपुष्पम्। तत्सहस्रसमं [1]शमीपुष्पम्। तत्सहस्रतुल्यं नीलोत्पलम्। नीलोत्पलसहस्रसमं रक्तपद्मम्। तत्सहस्रतुल्यं वकपुष्पम्। वकसहस्रसमं धूस्तूरम्।

[2]नागचम्पकपुन्नागा धूस्तूरकसमाः स्मृताः ।

तथा अखण्डबिल्वपत्रैः शिवलोकमहि(त)त्वम्। धूस्तूरैर्गोलक्षफलम्। बृहतीपुष्पैर्गवायुतफलम्। अशोक-श्वेतमन्दार[3][कर्णि-

(१) E F. शमीपत्रम् ।

(२) F. F. नागपङ्कजपुन्नागा ०

(३) D. Omits the portion bracketed.

कारवककरवीरार्कमन्दार] शमीतगरकेशरैर्यथालाभं पूजने रुद्रकन्यासमाकीर्णपुष्पमालायुक्तसूर्य्यकोटितुल्यविमानेन सूर्य्यलोके महीयते। श्वेतमन्दारः प्रसिद्धः। अपरो मन्दारः पारिभद्रः। स्कान्दे अर्क-करवीरबिल्ववकैर्लिङ्गपूजने दिव्यवर्षशतं स्वर्गः। भविष्यपुराणे शिवस्योपरि पुष्पमण्डपकरणं सर्व्वोपरि शिवपुरवासाय। शिवगृहस्य पुष्पमालाभिर्मण्डने अक्षयलोकप्राप्तिः। मालाभि लिङ्गवेदीवेष्टने देवीपुत्त्रत्वम्। देवीपुराणे वैशाखे मालया पूजा ज्यैष्ठे पद्मेन आषाढ़े बिल्वकल्हारैः श्रावणे नवमालिकाकदम्बैश्चम्पकै र्भाद्रपदे आश्विने पद्ममालिकया कार्त्तिके शतपत्रिकया मार्गशीर्षे नीलोत्पलेन पुष्ये वककुब्जकैश्च माघे कुन्दकुसुमैः फाल्गुने मरुवकैः चैत्रे शतपत्रैः पूजने सर्व्वकामाप्तिः फलम्।

तथा,—

पञ्चाक्षरेण मन्त्रेण बिल्वपत्रैः शिवार्चनम् ।
करोति श्रद्धया यस्तु स गच्छेदैश्वरं पदम् ॥

कृष्णाष्टम्यां बिल्वपत्रैरखण्डैरर्चने ब्रह्महत्यापापक्षयः। माघकृष्णचतुर्द्दश्यां बिल्वदलार्चने पृथ्वीदानफलम्। तुलसीदलदानेन मनोवाक्कायजन्यपापक्षयः।

अर्केण श्रियमागच्छेन्मोक्षं धूस्तूरकेण तु ।
नीलोत्पलैर्भजेद् भोगान् ज्ञानं मल्लिकया लभेत् ॥
कुन्दैः सुपुत्त्रलाभं स्यादुन्मत्तैर्गणपो भवेत् ।
पूजयेत्पुत्रकामस्तु केतक्या परमेश्वरम् ॥

वक्ष्यमाणकेतकीनिषेधः पूजाविषयः । सुनिषस्सदाड़िम-कुष्माण्डकर्कटि-रक्तचित्रककोकिलाक्ष-कोविदारपुष्पाणि पूजाङ्गानि पृथक्देयानि। तथा केशरवकुलगिरिकर्णिका-काशपुष्प-मन्दारापराजिता-कुब्जक-शङ्खिनी-उशीरतगर-कुरुण्टक-शिंशपो-दुम्बरजया-यज्ञवृक्षपुष्पकुसुम्भ-कुङ्कुम-नीलकुमुद-रक्तोत्पल-स्थल-पद्मानि निर्दिश्य

गृह्णामि शिरसा देवि यो मे भक्त्या निवेदयेत् ।

इति वचनात् पूजाङ्गानि। गिरिकर्णिका अपराजिता श्वेता नीला च जया कुटजः ।

तथा स्कान्दे,—

तुलस्यगस्त्यपुष्पाणि गुरुकुन्दं सुकुन्दकम् ।
अशोकः किंशुकश्चैव शस्तं शङ्करपूजने ॥

अत्र बृहत्कुन्दसुकुन्दयोर्विधिः। भविष्ये कुन्दनिषेधस्तदितर-कुन्दपरः ।

केतकी अतिमुक्तश्च कुन्दो यूथी मदन्तिका ।
शिरीषसर्जबन्धूककुसुमानि विवर्जयेत् ॥
आङ्कोलपत्रकुसुमं करञ्जोड्रतरूद्भवम् ।
वैभीतकानि पत्राणि कुसुमानि विवर्जयेत् ॥

आंकोलः। आङ्क इति प्रसिद्धम्। ओड्रपुष्पं जवापुष्पम् ।

निर्गन्धान्युग्रगन्धानि कुसुमानि विवर्ज्जयेत् ।

पुष्पालाभे पत्राणि पत्रालाभे फलानि फलालाभे तृणगुल्मौषधि-विधानं पूजाङ्गम् ।

भविष्ये,—

धूस्तूराणि कदम्बानि रात्रौ देयानि शङ्करे ।
दिवा शेषाणि पुष्पाणि दिवारात्रौ च मल्लिका ॥

पुष्पफलविधानवाक्यशेषोऽयम्। तेन न परिसंख्यादोषः ।

प्रहरं तिष्ठते जाती करवीरमहर्निशम् ।

---

[1]अथ विष्णोः ।

[2]नरसिंहे—

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः ।
अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्ज्जितैः ॥
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेद्धरिम् ।
पुष्पजातिविशेषेण भवेत् पुण्यं विशेषतः ॥
तपःशीलगुणोपेते पात्रे वेदस्य पारगे ।
दश दत्वा सुवर्णानि यत्फलं लभते नरः ।
तत्फलं लभते मर्त्त्यो हरेः कुसुमदानतः ॥

अत्र प्रथमं पूजाङ्गत्वेन पुष्पमरण्यसम्भूतमात्मारामोद्भवञ्च विहितं पुनः काम्यं कुसुमदानं च विहितं हरेः कुसुमदानत इति ।

(१) Y. अथ पुष्पाणि ।
(२) Y. नरसिंहपुराणे ।

तेनाकाङ्क्षाविच्छेदात् [1]प्रकरणादानं नास्ति तेन वक्ष्यमाणफल-[2]वाक्यैर्विशेषपुष्पपूजनादेव फलप्रतीतिः। न पूजायां गुणफलम्। केवलं स्वागमोक्तानि यानि च इति प्रपञ्चसारोक्तेः पूजाङ्गत्वमप्येषा-[3]मुक्तमेव। तथाच नरसिंहे,—

द्रोणपुष्पे तथैकस्मिन् केशवाय निवेदिते।
दश दत्वा सुवर्णानि यत्फलं तदवाप्नुयात्॥

द्रोणपुष्प[4]खादिरशमीपुष्पबिल्वपुष्पनन्द्यावर्त्ताख्यपिण्डीतकरक्तकर-वीर [[5]श्वेतकरवीर] पलाशवकुलकुशपुष्पनवमालापदवाच्यने-आलाख्यपुष्पचम्पकाशोकसेवती[6]कुन्दमालतीत्रिसन्ध्यारक्तत्रिसन्ध्या-श्वेतकुन्दशतपत्रमल्लिकाजातीपुष्पाणां पूर्व्वपूर्व्वापेक्षयोत्तरोत्तरं सहस्रगुणफलम्। सुवर्णदानफलतारतम्येन विष्णुलोकवासतार-तम्यम्। जातीपुष्पसहस्रग्रथितमालादाने [7]कल्पकोटिशतं विष्णु-पुरे वासः। [8][तथा] अपामार्गभृङ्गराजखादिरशमीदूर्व्वाकुश-दमनकबिल्वपत्रतुलशीपत्राणामुत्तरोत्तरप्राशस्त्य[9]मुक्तम्।

एतेषाञ्च यथालब्धैः पत्रै र्योऽभ्यर्चयेद्धरिम्।
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते॥

(१) D. प्रकरणादाश्रयदानं नास्ति।
(२) Y. वाक्यैः पुष्पविशेषपूजनादेव ०
(३) Y. ० मुक्तवान्।
(४) Y. खपाखादिचण्डमा पुष्प (?) बिल्वपुष्पवकपुष्पनन्द्या ०
(५) Y. Omits the portion breckated.
(६) Y. कुञ्जक मालतोत्रिसख्य रक्तत्रिसख्य श्वेत ०
(७) D. कल्पकोटि सहस्रशतञ्च (?)
(८) Y. Omits the portion bracketed. E. F. तथाच,—
(९) D. ० मुक्ता।

तथा—

मल्लिका मालती जाती केतकाशोकचम्पकैः।
[1]पुन्नागनागवकुलैः पद्मैरुत्पलजातिभिः॥
एतैरन्यैश्च कुसुमैः प्रशस्तैरच्युतं नरः।
अर्च्चयन् दशसुवर्णस्य प्रत्येकं फलमाप्नुयात्॥

पूजने एतेषां पुष्पाणां [2]दशसुवर्णफलमुक्ता

एतैश्च नित्यं हरिमर्च्य भक्त्या
नरो विशुद्धो हरिमेव याति।

इति प्रत्यहं पूजनफलमुक्तम्।

[3]केतकीदानं फलार्थं विहितम्। एवञ्च वामनपुराणे केतकी-निषेधो नित्यपूजाविषयः।

वक्ष्यमाणवाक्यैः [4]काम्यपुष्पेणार्च्चनं विधीयते। तथाहि [5]स्कान्दे,—

आहृतेनापि चैकेन पद्मेन मधुसूदनम्।
यदा कदाचिदभ्यर्च्य [6]नरो विष्णुपुरं व्रजेत्॥
अपराधसहस्राणि अपराधशतानि च।
पद्मेनैकेन देवेशः क्षमते हेलयार्च्चितः॥

(१) Y. पुनागनाग ०
(२) Y. दशसुवर्णमुक्ता।
(३) Y. यत्र केतकीदानं ०
(४) Y. काम्येन पुष्पेण ०
(५) Y. स्कन्दपुराणे।
(६) Y. जनो ०

तथा [1]पद्मेनैकेनार्च्चने वर्षायुतसहस्रपापक्षयः।

सुवर्णकेतकीपुष्पं यो ददाति जनार्द्दने।
कोटिजन्मार्जितं पापं हरते गरुड़ध्वजः॥
एकपत्रापि केतक्या यदा सम्पूज्यते हरिः।
पूजितो द्वादशाब्दन्तु [2]केशवस्तस्य तुष्यति॥
केतकीपत्रपुष्पञ्च सद्यस्तुष्टिकरं हरेः।

एतेनाखण्डपुष्परूपेण पत्ररूपेण च देयत्वमुक्तम्। विष्णुधर्म्मोत्तरे,—

नीलोत्पलशतं दत्वा [3]अग्निष्टोमफलं लभेत्।
पौण्डरीकं सहस्रेण राजसूयञ्च लक्षदः॥
नीलोत्पलसमं दानं चम्पकस्य प्रकीर्त्तितम्।
मल्लिकापुष्पजातीनां [4]यूथिकायास्तथैवच॥
तथा कुब्जकजातीनां फलं तद्वत्प्रकीर्त्तितम्।

तथा रक्तपद्मैकदानं स्वर्णमासदानफलम्। शतदानमग्निष्टोमफलम्। सहस्रेण [5]सूर्य्यलोकप्राप्तिः [[6]लक्षेण विष्णुलोकप्राप्तिः।] तथा कुमुदैकदानं रूप्यमासकदानफलम्। कुमुदशतेन चन्द्रलोकः। सहस्रेण यथेष्टा गतिः। लक्षेणाश्वमेधफलम्।

---

(१) Y. पद्मेनैकेनानेन वर्षा०

(२) D. केशवस्तस्य निश्चितम्। Y. केशवस्तेन निश्चितम्।

(३) Y. वह्निष्टोमफलम्०

(४) Y. फलं तद्वत्प्रकीर्त्तितम्।

(५) Y. सूर्य्यलोकाप्तिः।

(६) Y. Omits the portion bracketed.

जातीपुष्पसहस्रेण यथेष्टां गतिमाप्नुयात्।
श्वेतद्वीपमवाप्नोति लक्षपूजाविधायकः॥
करवीरस्य पुष्पेण रक्तेनाथ सितेन वा।
मुचुकुन्दस्य चैकेन सम्पूज्य गरुड़ध्वजम्॥
यावच्चन्द्रश्च सूर्य्यश्च [1]स्वर्गीभूत्वा ततः पुनः।
पुरं नारायणं याति सत्यमेतन्मयोदितम्॥
जातीभिर्म्मल्लिकाभिश्च पुन्नागैर्नागचम्पकैः।
श्रीपतिं सकृदभ्यर्च्य श्रियं पूर्णामवाप्नुयात्॥
[2]चम्पकैर्नन्द्यावर्त्तैः कुमुदैश्च कुरुण्टकैः।
बालैश्च शतपत्रैश्च माधवैः कुसुमैः शुभैः॥
[3]अकाले वाप्यभक्त्या वा तथैवामन्त्रपूर्व्वकम्।
सम्पूजितो नृणां विष्णुः सर्व्वान् कामान् प्रयच्छति॥
किं पुनर्भक्तिपूर्व्वन्तु मन्त्रपूर्व्वं सनातनम्।
अर्च्चयन् कुसुमैरेभि र्मुक्तिभागीति [4]भाष्यते॥

[5]कुरुण्टकः पीताम्लानकः। बालं कुरुवेलिति विख्यातम्।

जवापुष्पैः पुमान् भक्त्या सम्पूज्य गरुड़ध्वजम्।
उत्तमां गतिमाप्नोति प्रसन्ने गरुड़ध्वजे॥

---

(१) D. स्वर्गे भूत्वा०

(२) Y. चम्पकैश्चन्द्रवर्णैः (च) कुमुदैश्च०

(३) Y. अकाले वाप्यभक्तै र्वा०

(४) Y. भाव्यते।

(५) Y. तेन कुरुण्टकः अम्लातकः।

एवञ्च जवापुष्पं विष्णुपूजामात्रे सर्व्वमूर्त्तौ देयम्। तथाच [1]वामने विष्णुमूर्त्तिमात्रदेयमित्युक्तमिति वक्ष्यते। तेन

यो जवाकुसुमैकेन नारसिंहमथापरम्।
जलशायिनमभ्यर्च्य सर्व्वान् कामानवाप्नुयात्॥

इति फलविशेषार्थम्।

अष्टैश्वर्य्यमवाप्नोति स्थलपद्मेन चार्चने।
अचिरात् ज्ञानमाप्नोति वकपुष्पार्च्चिते हरौ॥
सर्व्वलोकाधिपत्यञ्च चम्पकेन प्रयच्छति।
हन्यात् शोकमशोकेन पूजितो देवकीसुतः॥
अगस्त्यैरसितैः शुक्लैः प्राप्नोति परमं पदम्।
सेवतीकुसुमैश्चान्यैर्यूथिकाकुसुमैस्तथा॥
अतसीकुसुमैश्चैव पाठलीतरुसम्भवैः।
अशोककुसुमैश्चैव तिलकोद्भवपुष्पकैः॥
पारन्तीकुसुमैश्चैव कुसुमैः [2]कुटजोद्भवैः।
नारायणं समभ्यर्च्य चिरं स्वर्गे महीयते॥

पारन्ती रङ्गिणी।

कर्णिकारैः सकल्हारैः स्तथा नीपैः कदम्बकैः।
गोकर्णनागकर्णाभ्यां वकुलैस्तगरैस्तथा॥

[3][नागकर्णः पलाशश्च।]

(१) Y. वामनपुराणे।
(२) Y. कुलकोद्भवैः।
(३) Y. Omits the portion bracketed.

अर्जुनैर्हरिमभ्यर्च्य सर्व्वान् कामानवाप्नुयात्।
मालत्या स्वर्गमाप्नोति [1]वकुलैश्च कुलोन्नतिम्॥
मल्लिकाभिः श्रियं दद्यात् कुलानामेकविंशतिम्।
पाटलैः किन्नरो नागकेशरैर्गुह्यकाधिपः॥
विष्णोर्ब्बन्धुत्वमाप्नोति बन्धूकेनार्च्चिते हरौ।
[2]द्विवन्तकुरिकाभ्याञ्च मण्डलेशत्वमाप्नुयात्॥
[3]शरदूर्व्वामयैः पुष्पैस्तथा काशसमुद्भवैः।
भुवनेशमलङ्कृत्य विष्णुलोकं व्रजेन्नरः॥
पुरन्ध्रिपुष्पैः सन्तोषं याति चक्रगदाधरः।

[4]विष्णुधर्म्मे,—

पुरन्ध्रिपुष्पं यो दद्यादेकमप्यथ पण्डितः।
तिलप्रस्थप्रदानस्य फलमाप्नोत्यसंशयम्॥
पुरन्ध्रिमञ्जरीपुष्पसहस्रेणार्चयेद्‌ हरिम्।
अग्निष्टोममवाप्नोति [5]कुलसुन्दरते तथा॥
कर्पूरपटवासेन पुरन्ध्रिपरिवासिताम्।
महारक्तकरक्तेन तथा सूत्रेण निर्म्मिताम्॥
मालां पुष्पसहस्रेण यः प्रयच्छति भक्तितः।
अश्वमेधफलं तस्य नात्र कार्य्या विचारणा॥

(१) Y. वकुलैः सुकुलोच्चतिम्।
(२) Y. विद्दन्तकुरिकाभ्याञ्च।
(३) Y. शरदुद्भवामयैः पुष्पैस्तथाकाशकुशोद्भवैः।
(४) Y. विष्णुधर्म्मोत्तरे।
(५) Y. कुलसुन्दरणे तथा।

शतेन वाजपेयस्य लक्षेण सकलक्रतोः।
मालत्या एकपुष्पेण प्रीतः क्रतुशतेन च ॥
अदत्वा केशवे मालां मालतीं नैव धारयेत्।
विष्णुङ्गभ्रष्टमालत्या धारणे सुमहत् फलम् ॥
बिल्वपत्रैरष्टशतैः पूज्य विष्णुपुरं व्रजेत्।
शमीपत्रैः सर्व्वकामं भृङ्गराजैर्जगद्वशम् ॥
दूर्व्वयागस्त्यपत्रैश्च श्रीदेव्या विष्णुयोषिता।
तमालैरच्युतं पूज्य नरः पापात् प्रमुच्यते ॥
दूर्व्वया चन्द्रलोकाप्तिः कुशैः सप्तर्षिसन्निधौ।
[1]दमनमरुवाभ्याञ्च वासुदेवं व्रजेन्नरः ॥
सहा च सुरभिश्चैव जाम्बूकञ्च यवं तथा।
[2]कह्लारं देवमाता च सुरमर्त्यमहौषधीः ॥
वैष्णव्यः पत्रिकाः प्रोक्ता एताः स्वपुरदायिकाः।
केतक्या वासकस्यैव कृष्णदुर्भरकस्य च ॥
[[3]अपामार्गस्य द्रोणस्य तगरस्य कुण्डिकस्य च ॥]
पिप्पलस्य च दर्भस्य पत्रं तुष्टिकरं हरेः।
कार्त्तिके बिल्वपत्रै[4]स्तु पूजनान्मुक्तिभाग् भवेत् ॥
वसन्ते दमनैः पूजा कृता कल्पशतं भवेत्।
सहकारस्य मञ्जर्य्या गोकोटिफलमाप्नुयात् ॥

(१) Y. दमनकमरुवकाभ्याञ्च ०
(२) Y. कलह्लारं देवता सा च सुरमभ्य महौषधीः।
(३) D. Omits the portion bracketed.
(४) Y. ० स्र ०

जम्ब्वाम्रबीजपूराणां पत्राणि च निवेदयेत् ॥
पूजासु वासमञ्जर्य्यो [1]दयितास्तस्य नित्यशः।
तिलधेनुसहस्रस्य फलं स्याद् बोधिपल्लवैः ॥

तथा,— यत् फलं सर्व्वपुष्पेषु पुण्यं पत्रेषु नारद।
तुलसीदलेन तत्सर्व्वं प्राप्यते केशवार्चनात् ॥
[2]तुलसीपत्रिका यत्र तत्र सन्निहितो हरिः।
कृष्णां कृष्णतुलस्या संपूज्य विष्णुपुरे वसेत् ॥
सुवर्णमणिपुष्पैश्च प्रीतो भवति नाच्युतः।
तुलसीदलार्द्धभागेन यथा प्रीयेत केशिहा ॥
समञ्जरीदलैर्युक्ता तुलसी संभवेत् क्षितौ।
कुर्व्वन्ति पूजनं भक्त्या कृतार्थास्ते कलौ युगे ॥
तुलसीदललक्षेण योऽर्च्चयेद् द्वारकाश्रयम्।
जन्मार्ज्जितसहस्रस्य पापस्य कुरुते क्षयम् ॥
वर्ज्यं पर्य्युषितं पुष्पं वर्ज्यं पर्य्युषितं जलम्।
न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम् ॥
गृह्णाति तुलसीपत्रं शुष्कं पर्य्युषितं हरिः।

तत्र मन्त्रः,–
तुलस्यमृतनामासि सदा त्वं केशवप्रिये।
[3]केशवार्थे चिनोमि त्वां वरदा भव शोभने ॥

(१) Y. दैवतास्तस्य ०
(२) Y. तुलसीवाटिका यत्र ०
(३) Y. केशवार्थं ०

त्वदङ्गसम्भवैर्देवं पूजयामि यथा हरिम्।
तथा कुरु पवित्राङ्गी कलौ मलविनाशिनी॥
मन्त्रेणानेन यः कुर्य्याद् गृहीत्वा तुलसीदलम्।
पूजनं वासुदेवस्य लक्षकोटिगुणं भवेत्॥

[1][तथा,]—न च्छिन्द्यात् सर्व्वथा विद्वान् द्वादश्यां तुलसीदलम्।
पुत्रमर्थं तथा स्वर्गं [2]विष्णुभक्तिञ्च चिन्तयन्॥
उपोष्य तुलसीपत्रैः सम्पूज्य नरकेशरिम्।
द्वादश्यां तत्पदं [3]यायाच्छेदने तत्पदच्युतिः॥
लोभान्मोहाद् भयाद् वापि द्वादश्यां तुलसीदलम्।
छेत्तुं समुद्यमेद् यस्तु इमं मन्त्रमुदीरयेत्॥
त्वदङ्गे सर्व्वतीर्थानि [4]त्वयि देवो जनार्द्दनः।
अतस्त्वां विचिनोम्यद्य पूजनार्थं हरेस्तथा॥
क्षमां कुरु पवित्राङ्गि भक्तात्वं समजायताम्॥

(तथा,)—तुलसीदललग्नेन चन्दनेन जनार्द्दनम्।
विलेपयन्ति येऽत्यन्तं लभन्तेऽचिन्तितं फलम्॥
तुलसीगन्धमाघ्राय पितरस्तुष्टमानसाः।
प्रयान्ति गरुड़ारूढ़ास्तत्पदं चक्रपाणिनः।
श्राद्धे च तुलसीदानं पितॄणां तृप्तिकारकम्॥

---

(१) D. Omits the portion bracketed.
(२) Y. विष्णुभक्तिं विचिन्तयन्।
(३) D. याति छेदके तत्पदच्युतिः।
(४) Y. त्वदङ्गेऽपि जनार्द्दनः।

तथा सर्व्वपुष्पेषु,—

शतं स्यान्मुक्तके पुण्यं सहस्रं संस्कृते फलम्।
स्रजि लक्षगुणं प्रोक्तं माला कोटिगुणोत्तरा॥
प्रतिमामानमानेन मालामेकां सुगुम्फिताम्।
आरोप्य निखिलैर्देवैर्वन्द्यमानो दिवं व्रजेत्॥
योऽपि दूरात् समाहृत्य पुष्पाण्यपि च पत्रिकाः।
महापथं समारुह्य पूजयेद् देवतां बुधः।
सर्व्वपापक्षयस्तस्य तत्क्षणादेव जायते॥
[1]स्वर्णपुष्पेण चैकेन मुक्तिं सम्पूज्य चाप्नुयात्।
किं पुना रत्नमुक्तादिखचितं स्वर्णपङ्कजम्।
आरोप्य प्रतिमामूर्द्ध्नि पूजयन् [2]सिद्धिभागिति॥

स्कान्दे,—

स्वर्णपुष्पार्चितो यस्य गृहे तिष्ठति केशवः।
[3]तस्यैव पादरजसा शुद्ध्यति क्षितिमण्डलम्॥
वस्त्रनिर्म्मितपुष्पैश्च पूजयित्वेष्टदेवताम्।
साधयेदीप्सितं कामं सत्यमेतद् ब्रवीमि ते॥
अस्याभ्युक्षणतः शुद्धेद् वस्त्रपुष्पं दिने दिने।
कृत्रिमाण्यनुलेप्यानि गन्धेनापि सुगन्धिना॥

एवञ्च [4]स्वर्णरत्नपुष्पेऽपि गन्धलेपनम्।

---

(१) Y. स्वर्णस्य पुष्पेणैकेन ०
(२) Y. सिद्धिभाग्भवेत्।
(३) Y, तस्यैतत्पादरजसा ०
(४) Y. सुवर्णरत्न ०

यावच्चन्द्रश्च सूर्य्यश्च यावत्तिष्ठन्ति देवताः।

[1]न निर्म्माल्यं भवेत् पुष्पं स्वर्णरत्नविभूषितम्॥

तथा अग्निपुराणे,—

तमालामलकी [2]पुष्पं शस्तं केशवपूजने।

प्रबालैः शुचिभिः स्वच्छै [3]र्जलेन प्रोच्चितैर्वने॥

वनस्पतीनां सर्व्वेषां तथा दूर्व्वाग्रपल्लवैः।

विष्णुधर्म्मे,—

धर्म्मार्जितधनक्रीतै र्यः कुर्य्यात् केशवार्चनम्।

उद्धरिष्यत्यसन्देहं सप्त पूर्व्वान् परावरान्॥

पञ्चविंशत्यतीतांश्च पञ्चविंशत्यनागतान्।

उद्धरेदात्मनो वंशान् नात्र कार्य्या विचारणा॥

यत्तु,—

समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत्।

शूद्रानीतैः क्रयक्रीतैः कर्म्म कुर्व्वन् व्रजत्यधः॥

इति क्रयक्रीतशूद्रानीतनिन्दनं तद्रहितस्वाहरणप्ररोचनार्थम्। उदितहोमप्रशंसार्थमनुदितनिन्दावत्।

स्वारामस्थैश्च संपूज्य फलं स्यादेतदेव तु।

एतत्पञ्चविंशकुलोद्धरणमित्यर्थः।

---

(१) निर्म्माल्यं न भवेत् ०

(२) Y. पत्रम् ०

(३) Y. र्जलप्रक्षालितैर्वने।

अरण्यादाहृतैः पुष्पैः सर्व्वान् कामानवाप्नुयात्।

[1]अकामः स पुनर्याति तद् विष्णोः परमं पदम्॥

वाह्यपुष्पसहस्राणां सहस्रायुतकोटिभिः।

पूजने यत् फलं पुंसां मानसैकेन तत्समम्॥

नारदपञ्चरात्रे,—

मालतीवकुलाशोकसेफाली[5][2]नवमालिका।

अम्लानं तगराख्यञ्च मल्लिका[3]मधुपिण्डिका॥

यूथिकाश्वपदं कुन्दं कदम्बं [4]शिखिपिङ्गलम्।

पाटली चम्पकं हृद्यं लवङ्गमतिमुक्तकम्॥

केतकं कुरुवकं बिल्वं कल्हारं वासकं द्विजाः।

पञ्चविंशतिपुष्पाणि लक्ष्मीतुल्यप्रियाणि मे॥

मदीयार्चनमाला च पुष्पैरेभिर्महामुने।

ग्रथिता स्यात् तथा तुल्यैः पञ्चविंशतिभिः क्रमात्॥

एभिरेवार्चितो नित्यं साधकेन महामुने।

ददामि सर्व्वकल्याणं तथैश्वर्य्यसुखानि च॥

[[5]सेफाली गङ्गसिऊलीति प्रसिद्धिः। नवमालिका निश्रालीति प्रसिद्धिः। मधु मधुकपुष्पम्। पिण्डिका पिण्डीतगरः। अश्वपदं नागकेशरः। शिखी चित्रकपुष्पम्। पिङ्गलं जवापुष्पम्।]

---

(१) Y. अकामः पूजयन् याति ०

(२) Y. वनमालिका।

(३) D. मधुपर्णिका।

(४) D. शङ्खपङ्कजम्।

(५) D. Omits the portion bracketed.

विष्णुधर्म्मे,—

[1]श्वेतैः पुष्पैः समभ्यर्च्य सर्व्वान् कामानवाप्नुयात्।
ऐश्वर्य्यमाप्नुयाल्लोके पीतै र्देवं समर्चयन्।
[2]शत्रूणामभिचारेषु तथा कृष्णैः समर्चयेत्॥
सुवर्णपुष्पैरभ्यर्च्य राजसूयफलं लभेत्।
रक्तपुष्पैः समभ्यर्च्य राजा भवति भूतले॥
कृत्वा पुष्पगृहं विष्णोः पुष्पैर्वापि वितानकम्।
फलेन योगमाप्नोति राजसूयाश्वमेधयोः॥

तत्रैव,—

अञ्जलीरोदिकापुष्पैः कुष्माण्डतिमिरोद्भवैः।
भुवनेशमलङ्कृत्य विष्णुलोकं व्रजेन्नरः॥

विष्णुधर्म्मे,—

पुष्पप्रकरमत्यर्थं [3]सुगन्धं केशवालये।
अनुलिप्ते नरो दत्वा न दुर्गतिमवाप्नुयात्॥
येषां न प्रतिषेधोऽस्ति गन्धवर्णान्वितानि च।
तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे॥

स्कान्दे,—

मालती तुलसी पद्मं केतकी मुनिपुष्पकम्।
कदम्बपुष्पं लक्ष्मीश्च कौस्तुभं केशवप्रियम्॥

(१) D. श्वेतपुष्पैः।
(२) Y. शत्रूणामभिचारश्च तथा कृष्णैः समर्चयन्।
(३) Y. यः कुर्य्यात् केशवालये।

मालतीकलिकामालामीषद्विकसितां हरेः।
दत्वा शिरसि विप्रेन्द्र वाजिमेधायुतं लभेत्॥
मुनिपुष्पकृतां मालां दृष्ट्वा कण्ठे विलम्बिताम्।
प्रीतो भवति दैत्यारिः [1][शतजन्मानि नारद॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च।
प्रीतो भवति दैत्यारिः] कदम्बकुसुमार्चितः॥
ददाति वाञ्छितान् कामान् सप्तजन्मानि सम्पदः।
केशवः केतकीपुष्पैर्मिथुनस्थे दिवाकरे।
येनार्चितः सकृद् भक्त्या स मुक्तो नरकार्णवात्॥
कर्कराशिगते सूर्य्ये केतकीपत्रकोमलैः।
येऽर्चयिष्यन्ति गोविन्दं सम्प्राप्ते दक्षिणायने॥
कृत्वा पापसहस्राणि कृत्वा पापशतानि च।
तेऽपि यास्यन्ति विप्रेन्द्र यत्र विष्णुः श्रिया सह॥

तथा—

कुम्भीपुष्पन्तु देवेशे प्रयच्छति जनार्द्दने।
सुवर्णपलमात्रन्तु पुष्पे पुष्पे भवेन्मुने॥

विष्णुधर्म्मे—

कुङ्कुमस्य च पुष्पाणि तथा भूचम्पकस्य च।

भूचम्पकश्च कनकचम्प इतिख्यातः। विष्णुरहस्ये,—

कर्णिकारमयैः पुष्पैर्मम लोके महीयते।

(१) Y. Omits the portion bracketed.

यत्तु वामनपुराणे बलिं प्रति प्रह्लादवाक्यम् ।

तान्येव सुप्रशस्तानि कुसुमानि महामुने ।
यानि स्युः सुप्रशस्तानि रसगन्धयुतानि च ॥
[1]जाती शताका सुमनाः कुन्दश्चाटरूषस्तथा ।
बाणश्च चम्पकाशोकं करवीरश्च यूथिका ।
पारिभद्रः पाटली च वकुलं गिरिमालिनी ।
तिलकं जासवनजं पानकं तगरं त्वपि ।
एतानि सुप्रशस्तानि कुसुमान्यच्युतार्च्चने ।
सुरभीणि तथान्यानि वर्ज्जयित्वा तु केतकीम् ।

[2]शताका सञोप इति प्रसिद्धम् । आट रूषः वासकपुष्पम् । जासवनजं जवाकुसुमम् । एतत् पूजाङ्गमेव पृथक् देयम् ।

[3]यच्च प्रपञ्चसारे--

तुलस्यौ पङ्कजे जात्यौ केतक्यौ करवीरकौ ।
शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च ॥
उत्पलानि च नीलानि कह्लारकुमुदानि च ।
मालतीकुन्दमन्दारनन्द्यावर्त्तादिकानि च ।
पलाशपाटली पार्थं पारन्त्यवन्तिकानि च ।
चम्पकानि च नागानि रत्नमन्दारकाणि च ।
अशोकोद्भवबिल्वाद्या कर्णिकारोद्भवानि च ।

---

(१) Y. जातीशताबा सुमना ?
(२) Y शताबा सड़प ।
(३) Y. तत्र प्रपञ्चसारे ।

[1][पार्थं अर्ज्जुन] पारन्ती रङ्गिणी ।

सुगन्धीनि सुरूपाणि स्वागमोक्तानि यानि च ।

अत्र केतकीविधानात् वामने निषेधात् पूजायां विकल्पः ।

[2][केतकीविधानं विष्णुदेवपरम् ।]

एतान्यपि पूजाङ्गान्येव पृथक् देयानि ।

प्रपञ्चसारे—

मुकुलैः पतितैर्म्लानैः शीर्णैर्जन्तुविदूषितैः ।
आघ्रातैरङ्गसंस्पृष्टैरूषितैश्चैव नार्चयेत् ॥

तथा--

अर्कपद्मोत्पलादन्यन्मुकुलानि विवर्ज्जयेत् ।

पतिताघ्राताङ्गस्पृष्टे दृष्टदोषादशौचम् । तच्च अद्भिर्निर्सिक्तं [3]शुद्धं कर्म्मणि योग्यम् । जन्तुदूषिते जन्तुवहिष्कारेण पूजा कार्य्या[4] ।

नमुक्तैः पूजयेद् विष्णुं तथैवातिविकाशितैः ।
तथा शीर्णेन जीर्णेन भूमिष्ठेन युतेन च ॥
उत्सृष्टेनावशिष्टेन गन्धवर्णहृतेन च ।
निशि गेहोषितेनैव निर्म्माल्येन तु केनचित् ॥

---

(१) D. Omits the portion bracketed.
(२) D. Omits the portion bracketed.
(३) Y. शुद्धकर्म्मणि ०
(४) Y. कर्त्तव्या ।

न च्छिन्नेन न भिन्नेन तथोत्सङ्गस्थितेन वा।

अपूतदेशजातेन पाषण्डेनार्पितेन वा॥

अर्च्चयित्वा जगन्नाथं नरो नरकमाप्नुयात्।

अत्र गन्धवर्णहृतेन च इत्यत्रोभयाभाव [[1]एव] निषेधो नैकाभावे।

[2]केचिद् वर्णगुणादेव केचिद् गन्धगुणादपि।

इति वचनात्। तथा विष्णुधर्म्मे—

उग्रगन्धं न दातव्यमन्यदेवगृहोद्भवम्।

श्मशानचैत्यद्रुमजं भूमावथ निपातितम्॥

शुक्लान्य[3]वर्णकुसुमं न देयञ्च तथा भवेत्।

[4]एतद् विशेषविहितेतररक्तविषयम्। तथाच विष्णुः,— नोग्रगन्धपुष्पं नागन्धकण्टकिजञ्च। कण्टकिजमपि शुक्लं सुगन्धमत् तद् दद्यात्। रक्तमपि कुङ्कुमजं जलजं दद्यात्। यद्यपि रक्तनिषेधः केवलरक्तजातीये सावकाशः। जवापुष्पविधिश्च शुक्लजवापुष्पे रक्तजवापुष्पे द्वयोर्व्विधिनिषेधयोः प्रवृत्तौ न विशेषः। तथापि विशेषविधेः [5]शीघ्रप्रवृत्तत्वात् तद्विषयपरिहारेण निषेधः प्रवृत्तः। विहितहिंसापरिहारेण हिंसानिषेधप्रवृत्तिवत्।

(१) Y. Omits the portion bracketed.

(२) Y. केचिद् गन्धगुणादेव केचिद् वर्णगुणादपि।

(३) Y. ० वस्त्र ०

(४) एतद्विशेषविहितं रक्तव्यतिरिक्तविषयम्।

(५) Y. शीघ्रवृत्तत्वात् ०

[1]विष्णुधर्म्मे,—

यदायुर्व्वेदविधिना शुक्लं रक्तीकृतं भवेत्।

तद्रक्तमपि दातव्यं [2]बिल्वपत्रं तथैव च॥

आयुर्व्वेदविधिना दोहददानादिना।

तथा,— मध्येऽन्यवर्णं यस्य स्यात् शुक्लस्य कुसुमस्य च।

[3]पुष्पं शुक्लन्तु विज्ञेयं मनोज्ञं केशवप्रियम्॥

अत्र,— रक्तानि नीलकृष्णानि भूषणार्थं नियोजयेत्।

इति रक्तादिनिषिद्धपुष्पाणामपि मण्डने न विरोधः। एवञ्चास्योपलक्षणतया मुकुलादीनामपि मण्डने विनियोगः। "मुकुलैर्नार्च्चयेत्" इति पूजायामेव निषेधात्।

काञ्चनारं व्यक्तरक्तं धूसराङ्गकमेव च।

कुटजं सिन्धुवारञ्च शिरीषं गिरिकर्णिकम्॥

कृष्णापराजिता चैव जयन्ती [4]तगरस्तथा।

प्रमादात् ज्ञानतो वापि यो दद्याद् विष्णवे क्वचित्।

उन्मादं दारुणं दुःखं तस्मै विष्णुः प्रयच्छति॥

[[5]विष्णुधर्म्मोत्तरे,—

नीलमुन्मत्तकं काशं तथैव गिरिमल्लिकाम्।

न कण्टकारिकापुष्पमच्युताय निवेदयेत्॥

(१) Y. विष्णुधर्म्मोत्तरे।

(२) Y. बिल्वपत्रैस्तथैव च।

(३) Y. शुक्लपुष्पञ्च विज्ञेयम् ०

(४) Y. शाल्मली तथा।

(५) Y. Omits the portion bracketed.

कोटजं शाल्मलीपुष्पं शैरीषं च जनार्द्दने।

निवेदितं भयं शोकं निःसत्वञ्च प्रयच्छति ॥]

एतन्निषेधस्य येषां प्राप्तिर्नास्ति तेषां प्रतिनिधित्वेन प्राप्तानां पूजाविषये सावकाशत्वं विहितानां [1]विकल्पपरत्वञ्च।

[2]विष्णुधर्म्मे,—

[3]करवीरस्य पुष्पाणि तथा धूस्तूरकस्य च।

कृष्णञ्च कुटजञ्चार्कं नैव देयं जनार्द्दने ॥

[4][अत्र—

नन्द्यावर्त्तसहस्राद्धि करवीरं विशिष्यते।

इति विधानाद् विकल्पपरमेव। यत्तु,—]

न गृहे करवीरोत्थैः पुष्पैः सम्पूजयेद्धरिम्।

[5]इति तस्य प्रामाण्यविधेः प्रासादार्चनाविषयपरम्।

---

(१) D. विकल्पत्वम्।

(२) Y. विष्णुधर्म्मोत्तरे।

(३) Y. क्रकरस्य च पुष्पाणि०

(४) Y. Reads in the place of bracketed portion :—क्रकरः करवीरः। कृष्णकुटजस्य निषेधात् शुक्लस्य ग्राह्यं (ग्राह्यत्वं) तथा न गृहे०

(५) Y. अस्य प्रामाण्ये करवीरविधिर्बहिः पूजाविषयः। पर्य्युषित०

पर्य्युषितनिषेधस्यापवादं पठन्ति,—

वर्ज्यं पर्य्युषितं पुष्पं वर्ज्यं पर्य्युषितं जलम्।

न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम् ॥

तथा,—

तत्कालानामलाभे तु एभिः पूजा विधीयते।

पुष्पाणि पञ्चरात्राणि फलान्येकादशं दिनम् ॥

पवित्राणि त्रिरात्राणि शुद्धतोयानि चैव हि।

दिनैकं करवीरन्तु पाटली तु दिनत्रयम् ॥

चतुर्द्दिनन्तु मन्दारं पुन्नागं पञ्चरात्रकम्।

पुन्नागाद् द्विगुणाश्चैव केतक्योत्पलमल्लिकाः ॥

चम्पकं जातिपुष्पाणि [1]तेषां द्विदिनपूजनम्।

करञ्जं वकुलं बिल्वं बृहती वर्त्तिकाद्वयम् ॥

दिनत्रयमिदं योग्यं तुलसी द्वयमुच्यते।

नित्यं प्रक्षाल्य तोयेन शुद्धस्थाने तु संग्रहेत् ॥

[[2]अन्यत्र च,—]

[3]पङ्कजं बिल्वपत्रञ्च यावत्पञ्चदिनावधि।

न वर्ज्यं तुलसीपत्रं शुष्कं पर्य्युषितं त्वपि ॥

पूजायोग्यं कर्णिकारञ्च पत्रं

न स्याज्जीर्णं मासकं कानकाख्यम्।

---

(१) D. न स्याद्द्विदिन०

(२) Y. Omits the portion bracketed.

(३) Y. अन्यत्र पङ्कजं बिल्वं यावत्०

इति। अत्र—

नैवेद्यपत्रपुष्पाद्यमचिराज्जायते च यत्।
तन्माल्यमुपभुक्तं सन्निर्म्माल्यमभिधीयते॥

इत्युक्तेः देवतायाः साक्षादुपभोगासम्भवादुपभोगकालः पारिभाषिकः। तत्र—

प्रहरं तिष्ठते जाती करवीरमहर्निशम्।
अहोरात्रं च निर्म्माल्यं पालाशं ब्रह्ममूर्द्धनि॥
केतकी तु हरे र्मूर्द्ध्नि सुगन्धोत्पलमेव च।

[[1]विष्णुधर्म्मोत्तरे,—

दत्तमात्रं हरेत् पुष्पं निर्म्माल्यं भवति क्षणात्।
उपभुक्तं त्वहोरात्रं मालत्याः कुसुमं हरेः॥]

पुष्पान्तराणान्तु—

[2]निशि गन्धक्षयो यावन्नास्ति येषामसंशयम्।
नास्ति निर्म्माल्यता तेषां तावदित्यागमा जगुः॥

इति। निर्गन्धानां वैरूप्यपर्य्यन्तमिति निर्म्माल्यकालात् पूर्व्वं देवाङ्गात् पुष्पवहिष्करणेन निर्म्माल्यग्रहणफलम्।

[3]न केवलम्—

[4]देवाङ्गादुद्धरेद् यस्तु तत्क्षणात् पुष्पलोभतः।
ब्रह्महत्यामवाप्नोति भोजको लोभमोहितः॥

(१) D. Omits the portion bracketed.
(२) Y. निर्गन्धस्य क्षयो ०
(३) Y. केवलम्।
(४) D. देवमभ्युद्धरेद् यस्तु ०

इति दोषः। [[1]नात्र निर्म्माल्यलङ्घनदोषः] केवलं निर्म्माल्यकालात् पूर्व्वं देवाङ्गात्पतने शुभस्थाने प्रतिपत्तिः कार्य्या। अथवा

वैष्णवप्रतिमालग्नं गन्धं पुष्पमथोदकम्।
प्रमादादपि संस्पृश्य नरो याति परां गतिम्॥

इति तत्वसारसंहितावचनात् स्पर्शादेव ग्रहणे फलम्। अत्र च समित्पुष्पकुशादीनामाहरणकालो द्वितीयभाग एव वक्ष्यते। तथापि तस्य पुरुषार्थत्वात्कालान्तरे स्वयमाहरणे न पूजावैगुण्यं किन्तु पुरुषदोषः। अन्याहृतेन पूजायां तदपि नास्ति।

यत्तु— समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत्।
शूद्रानीतैः क्रयक्रीतैः कर्म्म कुर्व्वन् व्रजत्यधः॥

इति तत्र स्वाहरणस्तुत्यर्थत्वात् शूद्रानीतक्रयक्रीतनिन्दा नतु निषेधो [2]वाक्यभेदापत्तेः। स्वाहरणञ्च नित्यपूजायामेवाङ्गं न काम्यपूजायां नित्यानित्यसंयोगविरोधादिति नित्ये यथाशक्त्युपबन्धादेवादोषः। पुत्रभार्य्यादीनां धर्म्मकार्य्येषु जायन्ते प्रतिहस्तका इति प्रतिनिधिकर्त्तृत्वस्मरणात् [3]तद्द्वाराहरणेऽपि न वैगुण्यम्।

[4]तथा—स्नानं कृत्वा तु ये केचित् पुष्पं चिन्वन्ति मानवाः।
देवता स्तन्न गृह्णन्ति भस्मीभवति [5]दारुवत्॥

अत्र स्नानं माध्याह्निकस्नानम्।

(१) D. Omits the portion bracketed.
(२) Y. वाक्यभेदोत्पत्तेः।
(३) Y. तदाहरणेऽपि ०
(४) Y. तथाहारीतः।
(५) Y. ० काष्ठवत्।

तथा—

छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे ।
पत्रं वा [1]पातयत्येकं ब्रह्महत्यां स विन्दति ॥

इति अमावास्याया मध्यभागे निषेधः ।

अप्सु तस्मिन्नहोरात्रे पूर्व्वं विशति चन्द्रमाः ।
ततो वीरुत्सु संक्रम्य प्रयात्यर्कं ततः क्रमात् ॥

इति विष्णुपुराणवचनात् । अयमपि निषेधः पुरुषार्थ एव ।

[2][द्वादश्याञ्च तुलसीपत्रग्रहणप्रकार उक्त एव ।] पुष्पार्चापि विधानार्थं इति स्तेयापवादात् देवपूजापर्य्याप्तपुष्पस्य परस्तात् स्तेयेनापि पूजायामदोषः ।

(१) Y. पातयत्यङ्गात् ब्रह्म ०
(२) D. Omits the portion bracketed.

---

[1][अथ दुर्गायाः ।

भविष्ये,—

अग्निहोत्रपरे विप्रे वेदवेदाङ्गपारगे ।
सुवर्णानां सुवर्णस्य शते दत्ते न यत् फलम् ॥
तत् फलं लभते राजन् पूजयित्वा तु चण्डिकाम् ।
मालया बिल्वपत्राणां नवम्यां गुग्गुलेन च ॥
मालाद्वयेन बिल्वस्य राजसूयफलं लभेत् ।

तथा,—

करवीरस्रग्भिरग्निष्टोमफलेन सूर्य्यलोके महीयते । एवन्तु पद्ममालायाम् । वकपुष्पस्रग्भिर्वाजपेयफलम् । द्रोणपुष्पस्रग्भी-राजसूयफलेन सूर्य्यलोके महीयते । कुशपुष्पस्रग्भिरग्निष्टोमफलं सूर्य्यलोके महीयते । शमीपुष्पस्रग्भिं र्गोसहस्रफलं विष्णुलोके महीयते । नीलोत्पलस्रग्भि र्वाजपेयफलं रुद्रलोके महीयते । नीलोत्पलसहस्रमालया वर्षकोटिसहस्रं वर्षकोटिशतं दुर्गानुचरो भूत्वा रुद्रलोके महीयते । प्रत्येकमुक्तपुष्पेषु दशनिष्कफलम् । मालाबद्धेषु तेषु द्विगुणम् । फलञ्च दुर्गालोकाप्तिः । मालती-मालयाश्वमेधाप्तिः ।

तथा,—

मल्लिकामुत्पलं पद्मं शमीयं नागचम्पकम् ।
अशोकं कर्णिकारञ्च द्रोणपुष्पं विशेषतः ॥

(१) Y. Omits the portion bracketed.

करवीरं शमीपुष्पं कुङ्कुमं नागकेशरम्।

एतानि समुदितानि दत्वा सर्व्वकामाप्तिर्दुर्गानुचरत्वञ्च। नानापुष्पस्रग्भिश्चण्डिकोपरि पुष्पमण्डपकरणे विष्णुलोकाप्तिः। नवम्यां नानापुष्पैः पुष्पमण्डपं कृत्वा विमानमारुह्य चण्डिकालोकेऽक्षयं कालं मोदते। अक्षयं कालं कल्पादप्यधिकम्। यत्तु देवीपुराणे,—

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः।
अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः॥
आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेत् शिवाम्।

इति पूजाङ्गपुष्पाण्युक्त्वा

दश दत्वा सुवर्णानां यत् फलं कुसुमेषु तत्।

इत्युक्त्वा(च)फलविशेषार्थं पुष्पविशेषानाह—

कदम्बः कर्णिकारश्च सिन्धुवारः सम्पद्द्वये।
पुन्नागश्चम्पकश्चैव यूथिका नवमल्लिका॥
तगरोऽर्जुनमल्ली च बृहती शतपत्रिका।
सुरसा सर्व्वभद्रा च सुरभिः करमर्द्दिका॥
दमनो मरुवकश्च शतधा पुण्यवृद्धये।
कदम्बैरर्चयेद्द रात्रौ मल्लिका तूभयोः शुभा।
दिवा शेषाणि पुष्पाणि यथालाभं प्रपूजयेत्॥

तत्र कदम्बार्च्चने रात्रौ पूर्व्वोक्तफलम्। एवमन्यत्र। यत्तु देवीपुराण एव

शृणु शक्र प्रवक्ष्यामि पुष्पाध्यायं समासतः।

इत्युपक्रम्य मल्लिकाजाती-कुब्जकसितरक्तनीलपाण्डरपद्मकिंशुक-तगर-किङ्किरात-चम्पक-वकुलमन्दारकुन्दचिराटिका लोध्रकरवीरार्क(सित रक्तपीतकृष्णरूप-चतुर्व्विधापराजिता धूस्तूरकमाधवीबन्धूकागस्तिदशनसिन्धुवारसुरभीमरुवकपलाशदूर्व्वाङ्कुरकुशमञ्जरीबिल्वपत्रोक्तानुक्तजलस्थलजसर्व्वधान्यपत्रपुष्पाण्युक्तानि

पश्चाच्च—शुभं वाप्यशुभं किञ्चित् फलपुष्पनिवेदनम्।

भक्त्या निवेदयेत् सर्व्वं नाशुभं किञ्चिदाप्नुयात्॥

इत्युक्तं तत्पूजाङ्गमेव न तु फलार्थं तदश्रवणात्। तत्र "भक्त्या निवेदयेत्सर्व्वं" इति वचनात् "देवीनां चार्कमन्दारौ" इति देवीपुराणनिषिद्धं मन्दारार्कपुष्पादिकं निषिद्धमपि भक्तिविशेषे देयमित्युक्तम्। निषेधस्तु भक्तिरहितपरः। मुकुलादिनिषेधः पूर्व्ववत्। पुष्पाभावे पत्राणि पत्राभावे ओषधीः ओषध्यभावे भक्त्या पूजित इत्यपि पूजाविषयम्।

अथवा परार्थमुद्दिश्य विधिपूजा शुभावहा।

इत्युपक्रम्य—

शिवे विवर्जयेत् कुन्दमुन्मत्तं च हरौ तथा।
देवीनां चार्कमन्दारौ सूर्य्यस्य तगरं तथा॥

इति निषेधः प्रासादे परार्थकृतपूजाविषयः। विधिस्तु गृहे स्वकृतपूजाविषय इति।

यद्यपि ब्रह्मपूजायां पुष्पाणि नोक्तानि तथापि प्रपञ्चसारादिषु पूजासामान्योक्तानि ग्राह्याणि। एवं गणपत्यादिदेवतान्तरपूजायाम्। विशेषतश्च भविष्ये,—

पाटलोत्पलपद्मानि करवीराणि सर्व्वदा।
स्नातो मध्याह्नयोज्यानि स्थिराणि सुरभीणि च॥

इत्येवं स्नातोक्तानि पुष्पाणि पूजायां ब्रह्मणा ग्राह्याणि। यदातु

शिवपूजाङ्गपुष्पाणि वैष्णवानीति तानि वै।
अन्येषामपि देवानां कथितानि मनीषिभिः॥

इति वचनं प्रमाणीक्रियते तदा शिवपुष्पाण्यपि ब्रह्मणो गणेशस्य कार्त्तिकेयादेश्च बोध्यानि।]

अथ धूपाः।

[[1]तत्र सूर्य्यस्य,—

गन्धश्चापि शुभा ये च धूपाश्च विजयादयः।
दिवाकरस्य धर्म्मज्ञै निंवेद्याः सर्व्वदाच्युत॥

इत्यविशेषेण पूजाङ्गधूपं विधाय विषयविशेषात् फलविशेषमाह तेन तेषामेव पूजाङ्गत्वम्। कालान्तरे केवलानां फलार्थत्वञ्च। एवं सर्व्वदेवेषु बोध्यम्।

तत्र सूर्य्याय सघृतगुग्गुलधूपदाने चतुर्वेदिगृहे जन्म।

देवदारु नमेरुञ्च सिल्हकं कटुकं तथा।
श्रीफलञ्चाज्यसम्मिश्रं दत्वा श्रियमवाप्नुयात्॥

(१) Y. Omits the portion bracketed.

तस्मा अर्थे धूपं षट्सहस्रगुणम्।

अगुरु दशसाहस्रं द्विगुणं वा सितागुरुम्।
गुग्गुलं दशसाहस्रं

तदेव सघृतं द्विगुणम्। सिल्हकधूपेन स्वर्गः। कर्पूरागुरु-धूपेन राजसूयफलम्। पक्षं गुग्गुलधूपदानात् ब्रह्महत्यानाशः। संवत्सरेणाश्वमेधफलम्। कृष्णसप्तम्यां साज्यगुग्गुलधूपदाने वर्षशतं सूर्य्यलोके वासः। द्विसहस्रफलसाज्यगुग्गुलधूपे दत्वा सूर्य्यतुल्यो भवति। सूर्य्यगृहे धूपेन सूर्य्यलोकाप्तिः।

अथ शिवस्य।

भविष्ये— कृष्णागुरु सकर्पूरं धूपं दद्यान्महेश्वरे।
नैरन्तर्य्येण मासार्द्धं तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
भुङ्क्ते शिवपुरे भोगान् तस्यान्ते च महीपतिः॥

पक्षं सघृतगुग्गुलधूपदानात् शिवलोके महीयते। कृष्णचतुर्द्दश्यां सघृतगुग्गुलधूपेन शिवसालोक्यम्।

देवदारुसमेतञ्च सर्ज्जश्रीवासकुष्ठकम्।
श्रीफलं चाज्यसम्मिश्रं दत्वाप्नोति परां गतिम्॥
एभ्यः सौगन्धिकं धूपं षट्सहस्रगुणोत्तरम्।
अगुरु दशसाहस्रं द्विगुणं वा सितागुरुम्॥

गुग्गुलुं दशसाहस्रं सघृतं द्विगुणं भवेत्।

द्विसहस्रपलमाहिषाख्यगुग्गुलुसघृतधूपेन शिवतुल्यः। स्कान्द-पुराणेन नन्दितुल्यः। स्कान्दे अमावास्यायां सघृतक्षीरगुग्गुलु-धूपदानेनाक्षयस्थानाप्तिः। कवाटद्वारादिषु पुष्पमालादिभिर्मण्ड-यित्वा धूपने स्वाङ्गामोदेन दिशः पूरयन् कल्पकोटिशतं शिवलोके महीयते। रुद्रावृत्तौ शिवालये धूपने शिवतुल्यः स्यात्।

अथ विष्णोः।]

[१]नारसिंहे,—

माहिषाख्यं गुग्गुलुं य स्वाज्ययुक्तं सशर्करम्।
धूपं ददाति राजेन्द्र नरसिंहाय भक्तिमान्॥
स धूपितः सर्वदिक्षु सर्व्व[२]पापविवर्ज्जितः।
अप्सरोगणयुक्तेन विमानेन विराजितः।
वायुलोकं समासाद्य विष्णुलोके महीयते॥

[३]वामने—

रुहिकाख्यं [४]कणं दारु सिल्हकं सागुरुं सिताम्।
शङ्खं जातीफलं श्रीशे धूपानि स्युः प्रियाणि[५] वै॥

---

(१) Y. नरसिंहपुराणे।
(२) D. स्वर्गलोके महीयते।
(३) Y. वामनपुराणे।
(४) Y. जमं दारु। (५) Y. मे।

रुहिका [१]जटामांसी। कणं गुग्गुलुः। सिता कर्पूरम्। शङ्खं नखी। [२]शङ्खविधानान्न धूपार्थे जीवजातमिति विष्णूक्तनिषेध-[३]स्तदितरविषयः।

तथा—

दत्वा तु गुग्गुलुं धूपं नाकपृष्ठे महीयते।
मधुसर्पिःसमायुक्तं द्वादशाहफलप्रदम्॥

स्कान्दे—

अगुरुन्तु सकर्पूरं [४]दिव्यचन्दनसौरभम्।
दत्वा नित्यं हरेर्भक्त्या कुलानां तारयेत् शतम्॥

तथा,—ये कृष्णागुरुणा कृष्णं धूपयन्ति कलौ युगे।
सकर्पूरञ्च राजेन्द्र [५]कृष्णभक्ता भवन्ति ते॥

[६]विष्णुधर्म्मे—

वसन्ते गुग्गुलेन ग्रीष्मे चन्दनसारेण तुरुष्केण प्रावृषि कर्पूरेण शरदि मृगमदेन हेमन्ते अगुरुसारेण शिशिरे धूपदानात् [[७]क्रमेणा-ग्निष्टोमराजसूयाश्वमेध] फलप्राप्तिः। [८][अत्र गृहीतदीक्षस्य]

---

(१) D. मांसी।
(२) Y. नखिविधाना०
(३) Y. स्तदतिरिक्तविषयः।
(४) Y. दिव्यं चन्दन०
(५) Y. कृष्णतुल्या भवन्ति ते।
(६) Y. विष्णुधर्म्मोत्तरे।
(७) Y. Omits the portion bracketed.
(८) Y Omits the portion bracketed.

अदत्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ।

इति निन्दाकल्पितविधिना धूपदानात् प्राक् गन्धमाल्यदानं विहितम् । तेनाविशेषात् [1]काम्यधूपदानात् पूर्व्वमपि गन्धपुष्पदानमिति वदन्ति ।

घण्टां वामकरे कृत्वा वादयन् धूपयेद् बुधः ।
तस्याः शब्देन विघ्नाश्च यान्ति सर्व्वे दिशो दश ॥
व्याधयो दुर्ग्रहाः सर्व्वे डाकिन्यो भूतराक्षसाः ।
घण्टानिनादश्रवणाद्धृतवीर्य्या भवन्ति ते ॥
[2][घण्टाशब्देन गच्छन्ति दानवाश्च भयङ्कराः ।
आगच्छन्ति च सुप्रीता विष्णुना सर्व्वदेवताः ॥
धूपेऽगुरुः सदा श्रेष्ठो गुग्गुलुः सिल्हकं द्विजाः ।
धूपे द्रव्यत्रयं श्रेष्ठं सगुड़ं सघृतं तथा ॥

एतत् फलाभिधानात् पूजान्तर्गतधूपविषयमिति वदन्ति । तथा]
तत्वसारसंहितायाम्—

उशीरमगुरुश्चैव चन्दनं [3]बिल्वचन्दनम् ।
गुग्गुलुश्चैव क्रोवेरं कर्कन्धूर्घृतमेव च ॥
मधुमुस्तसमायुक्तं [4]दशाङ्गानि तु धूपने ।

---

(१) Y. ताम्रधूप० ।
(२) Y. Omits the portion bracketed.
(३) D. विश्वचन्दनम् ।
(४) Y. दशाङ्गं नित्यधूपकम् ।

[1]तदपि पूजाङ्गमेव । नन्दिपुराणे—

[2]न शल्लकाज्यं न तृणं न सिक्थवसासम्भूतम् ।
धूपं प्रत्यङ्गनिर्मुक्तं दद्यात् कृष्णाय बुद्धिमान् ॥

तृणमुशीरातिरिक्तम् । [3][सिक्थं मधूच्छिष्टम् ।] प्रत्यङ्गनिर्मुक्तं प्राण्यङ्गभवम् ।

इति विष्णुसम्प्रदानककाम्यधूपविधिः ।

---

[4][अथ दुर्गायाः ।

भविष्ये—

कृष्णागुरुं सकर्पूरं गन्धं च सिल्हकं तथा ।
भगवत्यै नरो धूपमिमं दत्वा समाहितः ॥
इह कामानवाप्याग्र्यान् दुर्गालोके महीयते ।

मासार्द्धं साज्यगुग्गुलुधूपदानाद् गोसहस्रफलम् । कर्पूरागुरुधूपेन गोसहस्रफलम् । द्विशतपलाधिकद्विसहस्रपलगुग्गुलुधूपं शुक्लनवम्यां दत्वा चण्डिकाप्रियः स्यात् । माहिषाख्यं सघृतं सबिल्वं वा दत्वा वाजपेयफलं सूर्य्यलोकाप्तिः । कृष्णागुरुधूपे पापक्षयः ।]

---

(१) Y. एतत् पूजाङ्गमेव ।
(२) Y. त्रिशल्लवीजं न तृणं ०
(३) Y. Omits the portion bracketed.
(४) Y. Omits the portion bracketed.

अथ दीपाः ।

[१][सूर्य्यस्य । भविष्ये विष्णुमहादेवौ प्रति ब्रह्मवाक्यम्—

घृतेन दीपं प्रज्वाल्य तिलतैलेन वा पुनः ।
प्रयाति सूर्य्यलोकञ्च दीपकोटिशतैर्वृतः ॥
शिरसा धारयेद् दीपं भास्करस्याग्रतो निशि ।
आप्रभातञ्च यो वीर भक्तिश्रद्धासमन्वितः ॥
ललाटे चैव हस्ताभ्यां समुद्युक्तस्तथोरसि ।
कल्पायुतशतं देवौ सूर्य्यलोके महीयते ॥

कार्त्तिके मासि सप्तम्याममावास्यायां वा दीपमालादाने भास्करायुतसङ्काशः कुलोद्योतकरः । भास्करालये दीपवृक्षदानात् सूर्य्यलोकाप्तिः । कार्त्तिके प्रत्यहं सूर्य्यनामजपः सूर्य्यायतने च दीपदानं जातिस्मरत्वप्रज्ञाव्याहतेन्द्रियत्वफलदम् । प्रतिपच्चं षष्ठ्यामष्टम्यां वा सूर्य्याय दीपदाने कर्पूरमणिमुक्ताढ्यदीपमालाकुलविमानाधिरोहः । अत्र

तान् दत्त्वा न च हिंसेत न च तैलविवर्जितान् ।
कुर्व्वीत दीपहर्त्ता च दरिद्रोऽन्धः प्रजायते ॥

इति वचनाद् दीपदानकाले परहिंसावर्जनम् । तैलञ्च यावत् कालयोग्यं सन्निधेयम् ।

(१) Y. Omits the portion bracketed.

अथ शिवस्य ।

भविष्ये,—

घृतदीपप्रदानेन शिवाय शतयोजनम् ।
विमानं लभते दिव्यं सूर्य्यकोटिसमप्रभम् ॥

कार्त्तिके मासि विशेषतश्चतुर्द्दश्याममावास्यायां दीपमालाकरणे दीपसन्ततिसंख्ययुगसहस्राणि रुद्रलोके महीयते । शिवायतने दीपवृक्षोद्बोधने शिवलोकाप्तिः । शिवाग्रतः शिरसि ललाटे हस्ताभ्यां वक्षसि दीपधारणेन सकलरात्रिनयने

कल्पायुतशतं दिव्यं शिवलोके महीयते ।

स्कान्दे,—

कार्त्तिके प्रत्यहं दीपमालादानमन्ते ब्राह्मणभोजनं गार्हपत्यफलाय ।

अथ विष्णोः ।]

[१]नारसिंहे,—

घृतेन तिलतैलेन दीपं [२]यो ज्वालयेन्नरः ।
विष्णवे विधिवद् भक्त्या तस्य पुण्यफलं शृणु ॥
विहाय पापसकलं सहस्रादित्यसप्रभः ।
ज्योतिष्मता विमानेन विष्णुलोके महीयते ॥

(१) Y. नरसिंहपुराणे ।
(२) Y. प्रज्वालयेन्नरः ।

[[1]वाराहे,—

यस्तु दद्यात् प्रदीपञ्च सर्व्वतः श्रद्धयान्वितः ।
स्वयंप्रभेषु देवेषु तस्योत्पत्तिर्विधीयते ॥

स्वयंप्रभा [2]ब्रह्मलोकादयः ।]

स्कान्दे,—

यो ददाति महीपाल कृष्णस्याग्रे प्रदीपकम् ।
[3]पातकन्तु समुत्सृज्य [4]ज्योतीरूपं लभेत्पदम् ॥
यावदक्षिनिमेषाणि दीपो देवालये ज्वलेत् ।
तावद्वर्षसहस्राणि नाकपृष्ठे महीयते ॥
घृतेनाप्यथ तैलेन दीपं प्रज्वालयेन्नरः ।
विष्णवे विधिवद् भक्त्या विष्णुलोके महीयते ॥
दीपे तैलं सदा शस्तं विष्णुलोकप्रदं नृणाम् ।
तथाच सार्षपं वत्स मर्त्त्यलोके सुखप्रदम् ॥
यो दद्यात् [5]कापिलेनैव प्रदीपं केशवार्च्चने ।
घृतेन स नरो याति विष्णुलोकं निरञ्जनम् ॥
कपिलाया घृतं श्रेष्ठं प्रधानञ्चान्यजं घृतम् ।
सधर्म्मं स्यादजासर्पिः [6]शुद्धतैलं तथैवच ॥

(१) D. Omits the portion bracketed.
(२) E. F. आदित्यलोकादयः ।
(३) Y. पातकं तस्य उत्सृज्य ज्योतीरूपं लभेत् फलम् ।
(४) E. F. विष्णुलोके लभेत्पदम् ।
(५) Y. कापि तेनैव ०
(६) D. शुद्धेरत् ०

[1]दीपको ज्वलते यस्य अहोरात्रं हरेर्गृहे ।
एकादश्यां मुनिश्रेष्ठ स स्वर्गान्नावतारयेत् ॥
निर्बन्धेनापि विप्रेन्द्र कृत्वा चैवात्मविक्रयम् ।
कर्त्तव्यं दीपदानन्तु यावत् कार्त्तिकपूर्णिमा ॥
कृत्वा कोटिसहस्राणि पापानि सुबहून्यपि ।
निमेषार्द्धेन दीपस्य विलयं यान्ति कार्त्तिके ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्द्दने ।
सर्व्वं सम्पूर्णमायाति कार्त्तिके दीपदानतः ॥
दिने दिने जपन्नाम केशवेति समाहितः ।
ददाति कार्त्तिके यो वै विष्ण्वायतनदीपकम् ॥
जातिस्मरत्वं प्रज्ञाञ्च समाप्नोति न संशयः ।
श्रूयते तत्र पितृभिर्गीता गाथा च दीपने ॥
भविष्यन्ति कुलेऽस्माकं पितृभक्ताः सुता भुवि ।
संप्राप्य कार्त्तिकं मासं दयितं माधवस्य च ॥
दीपं दास्यन्ति ये शुद्धा गयायां [2]पिण्डसेवनात् ।
मुक्तिं प्राप्स्यामहे नूनं प्रसादाच्चक्रपाणिनः ॥

तथा,—

[3]यः कुर्य्यात् कार्त्तिके मासि कर्पूरेण च दीपकम् ।
द्वादश्याञ्चाथ वैशाखे तस्य पुण्यं वदामि ते ॥

(१) Y. दीपकं ज्वालयेद् यस्तु अहोरात्रं ०
(२) Y. पिण्डमादरात् ।
(३) Y. यः कार्त्तिके मासि दद्यात् कर्पूरेण च दीपकम् ।

कुले तस्य प्रसूता ये ये भविष्यन्ति नारद ।
समतीताश्च ये केचिद्दयेषां संख्या न विद्यते ॥
क्रीड़िला सुचिरं कालं देवलोके यदृच्छया ।
ते सर्व्वे मुक्तिमायान्ति प्रसादाच्चक्रपाणिनः ॥
वैष्णवो न स मन्तव्यः सम्प्राप्ते कार्त्तिके मुने ।
यो न यच्छति मन्दात्मा दीपं केशवमन्दिरे ॥
कार्त्तिके यत्फलं प्रोक्तं परं दीपप्रबोधने ॥
न तद् भवति विप्रेन्द्र न यज्ञै र्न महामखैः ॥
कार्त्तिकस्यासिते पक्षे कृष्णा या तु चतुर्द्दशी ।
तस्यां दीपः प्रयत्नेन दातव्यो देवताग्रतः ॥

[1]विष्णुधर्म्मे,—

पट्टसूत्रोद्भवां वर्त्तिं गन्धतैलेन दीपिताम् ।
नीरुजः सुभगश्चैव दत्वा भवति मानवः ॥
दीपपंक्तिः सुरचनां कुरुते केशवालये ।
विष्णोर्व्विमाने च तथा स नरः शङ्खचक्रधृक् ॥
कार्त्तिके कार्त्तिकी यावत् प्रासादोपरि दीपकम् ।
यो ददाति मुनिश्रेष्ठ पदमैन्द्रं [2]स गच्छति ॥
दत्वा दीपं न कर्त्तव्यं तेन कर्म्म विजानता ।
यः कुर्य्यात् तेन कर्म्माणि स्यादसौ पुष्पितेक्षणः ॥

येन दीपो दत्तस्तेन तद्दीपेन लौकिकं वैदिकं वा कर्म्मान्तरं

(१) Y. विष्णुधर्म्मोत्तरे ।
(२) D. न दुर्लभम् ।

न कर्त्तव्यम् । अन्यस्यापि तेन कर्म्मकरणं निषिद्धमेव ।

तथाच पठन्ति,—

देवदत्तेन दीपेन कृत्वा कर्म्म सुदुर्म्मतिः ।
जायते कृपणश्चान्धस्तस्मात् तत्परिवर्जयेत् ॥

[1]विष्णुधर्म्मे—

दीपहर्त्ता भवेदन्धः काणो निर्व्वापकस्तथा ।

अत्र हरणं देवाग्रादन्यत्र नयनम् ।

[2]भविष्ये—

यः कुर्य्यात् कार्त्तिके मासि शोभनां दीपमालिकाम् ।
प्रदोषे चैव द्वादश्यामेकादश्यां विशेषतः ॥
यावत् प्रदीपसंख्या च घृतेनापूर्य्य यत्नतः ।
तावद् वर्षसहस्राणि विष्णुलोके महीयते ॥
[3]एकादश्याञ्च द्वादश्यां प्रतिपच्चञ्च यो नरः ।
दीपं दद्यात् स दिव्यञ्च विमानमधिरोहति ॥
करोत्यारात्रिकं यस्तु भक्तिभावपुरःसरम् ।
प्राप्य ज्ञानं [4]प्रयाणान्ते गमिष्यत्यव्ययं पदम् ॥

तथा—

बहुवर्त्तिसमायुक्तं ज्वलन्तं केशवोपरि ।
कुर्य्यादारात्रिकं यस्तु कल्पकोटि दिवं वसेत् ॥

एतन्नीराजनं पूजाङ्गमपि

(१) Y. तथा विष्णुधर्म्मोत्तरे । (२) Y. भविष्यपुराणे ।
(३) D. एकादशीं द्वादशीञ्च ° (४) D. पुराणान्ते°

मन्त्रहीनं क्रियाहीनं यत्कृतं पूजनं हरेः ।
सर्व्वं सम्पूर्णतामेति कृते नीराजने सुत ॥

[1]एतद् वचनात् ।

नीलरक्तदशं दीपं प्रयत्नेन विवर्जयेत् ।

इति । तथा, महाभारते,—

हविषा प्रथमः कल्पो द्वितीयश्चौषधीरसैः ।
वसामेदोद्भवैर्वापि न कार्य्यः श्रेय इच्छता ॥

एतत् पूजान्तर्गतदीपेऽपि ज्ञातव्यम् ।

[2]विष्णुधर्म्मे,—

तथा कर्पूरवर्त्त्या च दीपयेत् सर्व्वसिद्धिदम् ।
प्रज्वाल्य देवदेवस्य कर्पूरेण च दीपकम् ॥
अश्वमेधमवाप्नोति कुलञ्चैव समुद्धरेत् ।
देवस्य दक्षिणे पार्श्वे देया तिलतुला नृप ॥
पलाष्टकयुतां राजन् वर्त्तिं [3]तत्र च दापयेत् ।
महारजनरक्तेन समग्रेण तु वाससा ॥
वामपार्श्वे च देवस्य देया घृततुला नृप ।
पलाष्टकयुतां राजन् वर्त्तिं [4]तत्र च दापयेत् ॥
वाससा च समग्रेण सोपवासो जितेन्द्रियः ।
एकमप्यथवा दद्याद् बुभुक्षुरनयोर्द्वयोः ॥

(१) Y. इति वचनात् ।
(२) Y. विष्णुधर्म्मोत्तरे ।
(३) Y. तत्रैव ० (४) Y. तत्रैव ०

मानुष्ये सर्व्वमाप्नोति स्वर्गलोके चिरं वसेत् ।

एतद्दानकालस्तत्रैव—

[[1]अश्वयुज्यामतीतायां द्वादश्यां दश एव वा ।
तथा,—] नरः स्नात्वा हितपरो नारी वा देवताग्रतः ।
[2]विस्तीर्णे विपुले पात्रे युनक्त्यवेति योजितम् ॥
पीतवस्त्रेण कृष्णाय श्वेतवस्त्रेण शूलिने ।
सूर्य्याय रक्तवस्त्रेण गौर्य्यै कौसुम्भवाससा ॥
तद्विष्णोरिति मन्त्रेण महादीपं प्रदापयेत् ।

अग्ने त्वां कामया गिरा । अग्निं तुभ्यन्तां गिरः । अग्ने येषु राजन्यो नमः स्वाहा इति

एवं मन्त्रेण विधिना ये प्रयच्छन्ति दीपकम् ।
यान्ति ते ब्रह्मसदनं विमानेनार्कतेजसा ॥
तिष्ठन्ति द्योतमानास्ते यावदाभूतसंप्लवम् ।

[[3]वाराहे,—

दीपं ददाति यो देवमभक्त्या तु व्यवस्थितः ।
सान्धकत्वं भवेत् तस्य सप्तजन्मनि सुन्दरि ॥]

विष्णुधर्म्मे—

केशवायतने कृत्वा दीपवृक्षं मनोरमम् ।
अतीव भ्राजते लक्ष्म्या दिवमासाद्य यत्नतः ॥

(१) D. Omits the portion bracketed.
(२) Y. विशीर्णे ०
(३) Y. Omits the portion bracketed.

दीपमालां प्रयच्छन्ति ये नराः शार्ङ्गिणो गृहे।
भवन्ति ते चन्द्रसमाः स्वर्गमासाद्य मानवाः॥
दीपागारं नरः कृत्वा लोके भ्राम्यति शक्रवत्[१]।

[[२]अथ दुर्गायाः।

भविष्ये,—

घृतदीपप्रदानेन चण्डिकां पूजयेन्नरः।
अश्वमेधफलं प्राप्य दुर्गानुचरो भवेत्॥
आत्मदेहवसादीपं चण्डिकापुरतो नृप।
प्रज्वाल्य विधिवद्‌ वीर मोदते चण्डिकालये॥

कार्त्तिके दुर्गायतने दीपमालादाने सूर्य्यलोकाप्तिः। अमावास्यायां नवम्यां वा दीपदाने

यावन्तं दीपसंघातं घृतेनापूर्य्य बोधितम्।
तावद्युगसहस्राणि दुर्गालोके महीयते॥

---

(१) Y. Reads after शक्रवत्—

गोसर्पिषा वा तैलेन वर्त्त्या च लघुगर्भया।
दीपितं सुरभिं शुभ्रं दीपस्तम्भैः प्रदापयेत्॥

इति प्रपञ्चसारे तत्पूजाङ्गदीपपरम्।

विष्णुः— न घृतं तिलतैलं विना किञ्चन दीपार्थे।

विष्णुधर्म्मोत्तरे,—

नीलरक्तदशं दीपं प्रयत्नेन विवर्जयेत्।

(२) Y. Omits the portion bracketed.

अश्मसारमयं कृत्वा नानादीपसमन्वितम्।
दीपवृक्षं समुद्‌बोध्य दुर्गायाः पुरतो नृप।
कल्पायुतशतं साग्रं दुर्गालोके महीयते॥]

---

[१]अथ नैवेद्यानि।

[[२]सूर्य्यस्य। भविष्ये,—

शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम्।
सूर्य्याय च चरुं दत्वा सप्तम्याञ्च विशेषतः॥
संयावकृशरापूपपायसं यावकं तथा।
दध्योदनं रसालांश्च मोदकान् गुड़पूपकान्॥
यावन्तस्तण्डुलास्तस्मिन् नैवेद्ये परिसंख्यया।
तावद्युगसहस्राणि सूर्य्यलोके महीयते॥

रसालशिखरिणी,—

गुड़खण्डघृतानान्तु भक्ष्याणां विनिवेदने।
घृतेन पाचितानाञ्च दत्वा शतगुणं लभेत्॥
रसालपानकाद्यानां भक्ष्याणां फलमीप्सते।
तदर्द्धमखिलस्यापि वासितस्य निवेदने॥
घृतपूपकृतैः सिक्थैः पुण्यं दशगुणोत्तरम्।
उपदंशगुणे ज्ञेयं पुण्यं शतगुणं खग॥

---

(१) Y. अथ नैवेद्यम्।

(२) Y. Omits the portion bracketed.

एवं षष्टिकोदने सहस्रगुणम् । सुगन्धिशाल्यन्नेनायुतगुणम् । रक्तशाल्यन्नेन नियुतम् । कलमान्नेन दशलक्षाधिकम् । क्षीरभक्तेन दशकोटिगुणोत्तरम् । दधिशर्करायुक्तान्नेन ततोऽप्यधिकम् । सुघनशीतकर्पूरयुतरसालया कोटिशतगुणाधिकफलम् । सुगन्धपानानां रसालातुल्यफलम् । नानाविधघृतपक्वमांसैः कोटिकोटिगुणम् । घृतौदने मांसतुल्यफलम् । शर्कराखण्डयुक्तघृतौदने मांसादधिकम् । सर्व्वरत्नसमन्वितापूपदानेऽमरलोकत्वम् ।

मधुमांसासवैश्चापि प्रीयते साधु भास्करः ।
मातुलुङ्गफलादीनि सुपक्वानि निवेदयेत् ॥

एवञ्च पक्वस्य प्राप्तप्रभावात् अपक्वं न निवेदयेत् ।

फलं क्वथितबिल्वञ्च यत्नात् पक्वमपि त्यजेत् ।

इति प्रतिनिधित्वेन प्राप्तस्य निषेधार्थम् । अर्कपर्णपुटेन मधुपर्कसमर्पणेऽश्वमेधफलम् ।

अथ शिवस्य ।

भविष्ये—शालितण्डुलप्रस्थन्तु कुर्य्यादन्नं सुसंस्कृतम् ॥
शिवाय तच्चरुं दद्याच्चतुर्द्दश्यां विशेषतः ॥
संयावकृशरापूपपायसं यावकं तथा ।
घृतगुड़ादिसम्मिश्रमेवमादि प्रकल्पयेत् ॥
यावन्तस्तण्डुलास्तस्मिन् नैवेद्ये परिसंख्यया ।
तावद्युगसहस्राणि रुद्रलोके महीयते ॥

गुड़खण्डयुतघृतपाचितभक्ष्यनिवेदने फलं शतगुणम् ।

सर्ज्जकापानकाद्यानां लक्षार्द्धं फलमिष्यते ।

तदर्द्धं वासितजलस्य ।

स्कान्दे—

दक्षिणायान्तु यो मूर्त्तौ पायसं घृतसंयुतम् ।
निवेदयेद् वर्षमेकं स मे नन्दिसमो भवेत् ॥
चरवो दशसाहस्रा यावकश्च चतुर्गुणः ।
शेषाश्च चरवः सर्व्वे यावकार्द्धेन सम्मिताः ॥
घृतपात्रसमं ज्ञेयं इह प्रेत्य च शाश्वतम् ।
मातुलुङ्गफलादीनि सुपक्वानि निवेदयेत् ॥
शिवाय तत्फलं तस्य यद्भक्ष्याणां निवेदने ।

तथा—

रुद्रायान्नप्रदानेन सिक्थे सिक्थेऽमरैः सह ।
षोड़शैवाब्दलक्षाणि वसेत् श्रद्धासमन्वितः ॥

अथ ब्रह्मादिदेवतान्तराणाम् ।

देवतानाञ्च यो दद्यादन्नाद्यं श्रद्धयान्वितम् ।
सिक्थे सिक्थे वसेल्लक्षं समानाममरैः समम् ॥
एतद्दशगुणं पुण्यमन्ने व्यञ्जनसंयुते ।
यो दद्याद् ब्राह्मणेऽन्नानि तस्माद् द्विगुणितं फलम् ॥
तस्माद् विष्णुश्च दत्तान्नं द्विगुणं फलमश्नुते ।
रुद्रायान्नप्रदानेन फलमेतच्चतुर्गुणम् ॥

यत्तु भविष्यपुराणे ब्रह्मनैवेद्यमधिकृत्य

खण्डलड्डुकश्रीवेष्टकासाराशोकवर्त्तिका।
स्वस्तिका लोपिका दुग्धश्रीवेष्टककिलाटिका॥
फलानि च विपक्वानि खाद्यानि विविधानि च।

तत् पूजानैवेद्यार्थे।

अथ विष्णोः।

लेह्यं पेयं तथा भोज्यं खाद्यञ्चैव चतुर्व्विधम्।
नैवेद्यं विष्णवे दत्वा नरः स्वर्गमवाप्नुयात्॥]
[1]ओदनं व्यञ्जनोपेतं दत्वा स्वर्गमवाप्नुयात्।
[2][दधिभक्तप्रदानेन श्रियमाप्नोत्यनुत्तमाम्॥
सशर्करं दधिभक्तं यो नित्यं विनिवेदयेत्।
सर्व्वैश्वर्य्यमवाप्नोति नात्र कार्य्या विचारणा॥
क्षीरोदनप्रदानेन दीर्घं जीवितमाप्नुयात्।]
परमान्नं तथा दत्वा तृप्तिमाप्नोति शाश्वतीम्॥
विष्णुलोकमवाप्नोति कुलमुद्धरते सदा।
[3]मोदकस्य प्रदानेन कामानाप्नोत्यभीप्सितान्॥

---

(१) Y. विष्णुधर्म्मोत्तरे,—ओदनं व्यञ्जनोपेतं०

(२) Y. Omits the portion bracketed.

(३) E. F. घृतोदनप्रदानेन ०

दीर्घजीवितमाप्नोति घृतपूरनिवेदकः[1]।
यो ददाति च नैवेद्यं [2]माघमासे प्रपिष्टकम्॥
सशर्करमवाप्नोति तिलधेनुफलं नरः।
राजसूयमवाप्नोति पानकैर्व्विनिवेदितैः॥
निवेद्य नारिकेलाम्बु अग्निष्टोमफलं लभेत्।
फाणितस्य प्रदानेन अग्न्याधेयफलं लभेत्॥
तथा गुड़प्रदानेन दशगोदो भवेन्नरः।
सूक्ष्मं खण्डं तथा दत्वा मैत्रीं सर्व्वत्र विन्दति॥
सितायाश्च प्रदानेन सर्व्वान् कामानवाप्नुयात्।
शर्कराञ्च तथा दुग्धं केवलं यो निवेदयेत्॥
प्रियो भवति सर्व्वेषां जनानामिति निश्चयः।
सर्व्वान् कामानवाप्नोति क्षौद्रं यः संप्रयच्छति॥
तदेव तुहिनोपेतं राजसूयमवाप्नुयात्।
धानानां क्षौद्रयुक्तानामग्निष्टोममवाप्नुयात्॥

दानेनेतिशेषः।

इक्षूणाञ्च प्रदानेन परं सौभाग्यमाप्नुयात्।
फलानि यच्छति यो वै सुरूपाणि नरेश्वर॥
कल्पान्तं जायते तस्य सफलस्तु मनोरथः।

---

(१) Y. Adds after this line :—खण्डमिश्रिततण्डुलपिष्टैर्घृतपक्वैरर्द्धघृत-क्षीरेण म्रष्टो घृतपूरः।

(२) Y. मासे मासे ०

[1]विष्णुधर्म्मे—अग्निष्टोममवाप्नोति यावकस्य निवेदकः ।

यावको यवविकारभक्ष्यः ।

अतिरात्रमवाप्नोति तथा [2]पूपनिवेदकः ।

वैदलानाञ्च भक्ष्याणां दानात् काममवाप्नुयात् ॥

वैदला मुद्गचणकादयः ।

नानाविधानां भक्ष्यानां दाता स्वर्गमवाप्नुयात् ॥

[3]भक्ष्याः कठिनलड्डुकादयः ।

भोजनीयप्रदानेन तृप्तिमाप्नोत्यनुत्तमाम् ।

भोजनीयमन्नादि ।

तथा लेह्यप्रदानेन सौभाग्यमधिगच्छति ।

बलवर्णमवाप्नोति चोष्याणाञ्च निवेदने ॥

चोष्यमिक्षुखण्डादि ।

रागषाड़वदानेन पौण्डरीकमवाप्नुयात् ।

दाड़िमीमुष्टिसंयुक्तो मुद्गपूपस्तु षाड़वः ॥

रागषाड़वतां याति शर्करासहितस्तु सः ।

इति सूपकारशास्त्रे ।

पियानाञ्च प्रदानेन वाजिमेधफलं लभेत् ।

त्वगेलानागकुसुमकर्पूरशितसंयुतैः ।

सिताक्षौद्रगुड़ोपेतैर्गन्धवर्णबलान्वितैः ॥

---

(१) Y. विष्णुधर्म्मोत्तरे वह्निष्टोममवाप्नोति ०

(२) Y. पूपनिवेदने ।

(३) D. भक्ष्याः कठिनाः ।

बीजपूरकनारङ्गसहकारसमन्वितैः ।

राजसूयमवाप्नोति पानकैर्व्विनिवेदितैः ॥

शितमत्र दधि । बीजपूरादिफलरसपानकैः त्वगेलादियुक्तैरित्यर्थः ।

कुल्माषोल्लासिकादानादग्न्याधेयफलं लभेत् ।

कुल्माषः किञ्चिदुत्सन्नमाषः । सक्तुलाजाक्षशराणां दाताग्निष्टोम-मवाप्नुयात् । शाकदानाद्द दानप्रस्थफलम् । [[1]नानाविधशाक-दानाद्द विशोकः । व्यञ्जनोपकरणदानात् सत्कुले जन्म । नीलोत्पलपद्मविदारीणां कन्दमूलदानाद्द दानप्रस्थफलम् ।]

त्रपुषोर्व्वारुकदानात् पौण्डरीकफलम् ।

कर्कन्धूवदरे दत्वा तथा पारेवतं फलम् ।

[2]पारुषाकं तथाम्रातं पनसं नारिकेलकम् ॥

भव्यं मोचं तथा वोचं खर्जूरमथ दाड़िमम् ।

आम्रातकः शुवाक्षोटः फलमालपियालकम् ॥

जम्बूबिल्वफले चैव जात्यं वीणातकं तथा ।

नारङ्गबीजपूरौ तु राजफल्गुफलान्यपि ॥

तथा चान्यानि मुख्यानि देवदेवाय भक्तितः ।

एवमादीनि चान्यानि यः फलानि प्रयच्छति ।

क्रियासाफल्यमाप्नोति स्वर्गलोकं तथैव च ।

त्रपुषोर्व्वारुकौ कर्कटीभेदौ । कर्कन्धू स्थूलवदरम् । पारेवतं

---

(१) Y. Omits the portion bracketed.

(२) Y. प्राक्पञ्च तथा ०

कामरूपे प्रसिद्धः। पारुषकं वन्यफलम्। भव्यं कर्म्मरङ्गफलम्। उश्राड़फलञ्च। मोचं कदली। वोचं गुड़त्वक्फलम्। [[1]स्रुवा वैकङ्कतफलम्।] आम्लोटः साहड़ाफलम्। [2]फलमालो बीजपूरभेदः। जात्यं जातिफलम्। वीणातकं खण्डगुड़ इति प्रसिद्धम्। [3]राजफलं चोरिका। फल्गुफलं गोष्ठोदुम्बरिकाफलम्।

प्राप्नोति बलमारोग्यं मृद्विकाविनिवेदकः।

मृद्विका द्राक्षा।

आम्रैरभ्यर्च्य देवेशमश्वमेधमवाप्नुयात्।

तथा,—

प्राचीनामलकं श्रेष्ठं मधुकोदुम्बरं तथा।
यत्नपक्वमपि ग्राह्यं कदलीफलमुत्तमम्॥

अत्र शिष्टाः,—

आम्रं विल्वं गुवाकञ्च खर्ज्जूरमथ दाड़िमम्।
अपक्वान्यपि चैतानि फलानि विनिवेदयेत्॥
नारिकेलफलं वीर त्वचमुत्कृत्य दीयति।
रम्भायाश्च फलं रम्यं त्वचमुन्मुच्य[4]दापयेत्॥
दध्यादिमिश्रितं चान्नं घृतेनोत्प्लुत्य[5]दापयेत्।
यद्‌ यथैव भवेद्भक्ष्यं तत्तथैव निवेदयेत्॥

(१) D. Omits the portion bracketed.
(२) Y. फलमानवी बीजपूरफलभेदः।
(३) Y. राजकं चौरका।
(४) Y. दीयते। (५) Y. दीयते।

अन्यथा ब्रह्महत्याफलम्।

[1]नरसिंहे,—

हविः शाल्योदनं दिव्यमाज्ययुक्तं सशर्करम्।
निवेद्य नरसिंहाय यावकं पायसं तथा॥
समास्तण्डुलसंख्याता यावत्यस्तावती नृप।
विष्णुलोके महाभागो भुञ्जानः स तु वैष्णवः॥

[2]वामने,—

हविषा संस्कृता ये च यवगोधूमशालयः।
तिलमुद्गादयो माषा व्रीहयश्च प्रिया हरेः॥

हविषा घृतेन। देवदेयाधिकारे [3]भविष्ये,—

खण्डलड्डुकग्रीवेष्टकासाराशोकवर्त्तिका।
स्वस्तिका लोपिका दुग्धग्रीवेष्टककिलाटिका॥
[4]फलानि चैव पक्वानि तथा खण्डगुड़ानि च।
एवमादीनि चान्यानि दापयेद्‌ भक्तितो नृप॥

खण्डलड्डुकं खण्डविकारो लड्डुकः। ग्रीवेष्टकं माषामिश्रादिलड्डुकम्। कासारी महिषीक्षीरम्। [5]इदं देवतान्तरे विष्णोर्निषेधात्। अशोकवर्त्तिका पिष्टकभेदः। स्वस्तिका स्वस्तिका-

(१) Y. नरसिंहपुराणे।
(२) Y. वामनपुराणे।
(३) Y. भविष्यपुराणे।
(४) Y. एतानि चैव पक्वानि ०
(५) D. एवं

कारपिष्टकम्। लोपिका अपमालू इति प्रसिद्धा। दुग्धग्रीवेष्टकं दुग्धलड्डुकम्। किलाटिका दुग्धपर्य्याटिका*।

---

* Y. Reads the following after दुग्धपर्य्याटिका :—

माघमासीयपूजाधिकारे स्कन्दपुराणे,—

आत्मनो यान्यभीष्टानि तानि देयानि माधवे।
द्राक्षाकर्पूरपूपानि शर्करञ्च विशेषतः॥
रम्भाफलानि नारङ्ग त्रिनेत्राणि बहून्यपि।
फलानि चारुदेयानि मातुलुङ्गानि वासव॥
गुड़खण्डविकाराश्च दातव्या वैष्णवै र्हरेः।
देयानि चैव शाकानि वर्ज्जयित्वा तु मूलकम्॥

अत्र मूलकस्यादेयत्वं माघमासीयपूजाविषयम्। मासान्तरे तु वराहपुराणवाक्याद्द देयमेव। अतएव

ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम्।

इत्यपि माघमासविषयम्। अतएव

योऽर्च्चयेन्माधवं मूढ़ो भक्षयित्वा तु मूलकम्।
अपराधशतं तेन कृतं भवति माधवे॥

माधवे माधवदैवत्ये माघे। तेन उपक्रमोपसंहारपाठात् मूलकनिषेधो माघमासविषयः।

अथ विष्णुप्रदेयानि।

नरसिंहपुराणे,—

हस्ताभ्यामच्युतं भक्त्या परिधाप्य विचित्रतः।
सोमलोके रमित्वा तु विष्णुलोके महीयते॥

तथा,—

ध्वजञ्च विष्णवे यस्तु गरुड़ेन समन्वितम्।
दद्यात् सोऽपि ध्वजाकीर्णविमानेन विराजता।
विष्णुलोकमवाप्नोति सेव्यमानोऽप्सरोगणैः॥
मुकुटैः कटकाद्यैश्च यो विष्णुं पूजयेन्नृप।
सर्व्वपापविनिर्म्मुक्तः सर्व्वभूषणभूषितः।
इन्द्रलोके वसेत् श्रीमान् यावदिन्द्राश्चतुर्द्दश॥

यो गां पयस्विनीं विष्णोः कपिलां संप्रयच्छति।
स सर्व्वपापरहितः सर्व्वभूषणभूषितः।
गवां सहस्रदानस्य फलं प्राप्य हरिं व्रजेत्॥

दद्यादित्यनुवृत्तौ विष्णुः,—न वासो नीलरक्तं न तथा मणिसुवर्णयोः प्रतिरूपमलङ्करणम्।

तथा,—

शङ्खे कृत्वा तु पानीयं सपुष्पसफलाक्षतम्।
अर्घ्यं ददाति देवस्य ससागरधराफलम्॥
मधुपर्कं तथा दद्याद्द दधि सर्पिस्तथा मधु।
मधुपर्कस्य दानेन परं पदमिहाश्नुते॥
उशीरं कूर्च्चकं दत्वा सर्व्वपापैः प्रमुच्यते।
दत्वा गोवालकं कूर्च्चं सर्व्वान् कामान् व्यपोहति॥
शयनासनदानेन स्थितिं विन्दति शाश्वतीम्।
उत्तरच्छददानेन सर्व्वान् कामानवाप्नुयात्॥
वितानकप्रदानेन सर्व्वपापैः प्रमुच्यते।
शुक्लवस्त्रप्रदानेन श्रियं प्राप्नोत्यनुत्तमाम्॥
नीलरक्तं विनारक्तं शेषरक्तं द्विजोत्तमाः।
दत्वा भवति धर्म्मात्मा सर्व्वव्याधिविवर्ज्जितः॥
अलोमानि च वस्त्राणि कौशेयानि मृदूनि च।
ग्रैवेयकप्रदानाच्च सर्व्वशास्त्रार्थविद्भवेत्॥
कर्णाभरणदानेन भवेत् श्रुतिधरो नरः।
अश्वमेधमवाप्नोति सौभाग्यञ्चैव विन्दति॥
यः प्रयच्छति देवाय सोऽश्वमेधफलं लभेत्।
त्रिवृत् शुक्लं सुपीतं वा पट्टसूत्रादिनिर्म्मितम्॥
यज्ञोपवीतं गोविन्दे दत्वा वेदान्तगो भवेत्।
यज्ञोपवीतदानेन ब्रह्मदानफलं लभेत्॥

तथा स्वर्णदः सर्व्वकामान् रूप्यदोऽभयम्। मुकुटदो मूर्द्धन्ये राजा। केयूरदानात् शत्रुक्षयः। हस्ताङ्गुरीयदानात् सौभाग्यम्। अङ्गददानेन राजा। श्रोणीसूत्रदानेन चक्रवर्त्ती। पादाभरणदानेन सर्व्वस्थानलाभः। पादाङ्गुरीयकदानात् गुह्यकाधिपः। पादुकादानेनानुत्तमा गतिः। उपानद्दानेन विमानाधिरोहणम्।

ग्रैवेयकदानाच्च सर्व्वशास्त्रार्थविद् भवति। कर्णाभरणदानेन श्रुतिधरः अश्वमेधफलं सौभाग्यञ्च।

सर्व्वाभरणदानेन राजसूयफलं लभेत्।
यस्याग्रे तिष्ठते विष्णुर्हेमभूषणभूषितः।
रत्नैर्मुक्ताविशेषेण अहन्यहनि भूभुजः॥
कल्पकोटिसहस्राणि तत्पितृणां हरेः पदे।
वासो भवति विप्रेन्द्र कथितं ब्रह्मणा मम॥

पुनर्व्विष्णुधर्म्मोत्तरे,—

दर्पणस्य प्रदानेन राजसूयफलं लभेत्।
राजा भवति लोकेऽस्मिन् छत्रं दत्वा द्विजोत्तम॥
तालवृन्तप्रदानेन निर्वृतिं विन्दते पराम्।
तथा चामरदानेन श्रीमान् भवति भूतले।
मुच्यते च तथा पापैर्व्विष्णुलोकं स गच्छति॥
प्रदाय चामरवरं श्रद्धया विष्णवे नरः :
परं पदमवाप्नोति यत् सुरैरपि दुर्लभम्॥
पताकाञ्च शुभां दत्वा तथा केशवसद्मनि।
सन्त्यज्य सकलं पापं वायुलोकं स गच्छति॥
वाद्यं दत्वा तथा विप्र मर्त्त्यलोके महीयते।
वाद्यानामपि देवस्य तन्त्रीवाद्यं सदा प्रियम्॥
किं वादित्रसहस्रैस्तु पुरतो वै ममाग्रतः।
नागारिचिह्नितां घण्टां चक्राङ्केण समन्विताम्।
वादयन् कुरुते नाशं जन्ममृत्युसमुद्भवम्॥
यस्तु वादयते घण्टां वैनतेयेन चिह्निताम्।
धूपे नीराजने स्नाने पूजाकाले विलेपने।
ममाग्रे लभते पुण्यं चान्द्रायणशतोद्भवम्॥
वैनतेयाङ्कितां घण्टां सुदर्शनयुतां यदि।
ममाग्रे स्थापयेद् यस्तु देहे तस्य वसाम्यहम्॥
मम नामाङ्किता घण्टा मत्पुरो यदि तिष्ठति।
अन्तिके वैष्णवे गेहे तत्र मां विद्धि वै द्विज॥

मदीयार्च्चनवेलायां घण्टावाद्यं शृणोति यः।
नश्यन्ति तस्य पापानि शतजन्मार्ज्जितानि वै॥
छत्रं दत्वा तथाप्नोति चन्द्रलोकमसंशयम्।
स्वयं घृतेन सम्पूज्य तथैवानुचरो भवेत्॥
प्रधानैर्भक्तिचारैश्च पात्राण्युद्दिश्य जनार्द्दने। (?)
माल्याधारं तथा दत्वा धूपाधारं तथैव च।
गन्धाधारं तथा पात्रं कामानां पात्रतां व्रजेत्॥
गोदानानि पवित्राणि भूमिदानानि यानि च।
दद्याद् वस्त्रान्नदानानि प्रीतये मधुघातिनः॥
विष्णवे भोगमुद्दिश्य क्षेत्रं वा ग्राममेव वा।
यो ददाति स पुण्यात्मा सर्व्वपापैः प्रमुच्यते॥

विष्णुधर्म्मोत्तरे,—सपुष्पैः सफलैर्वृक्षैः पूर्णं कृत्वा जलान्तिकम्।
उद्यानैः पद्मिनीपर्णैरास्रकैश्च मनोरमैः॥
जलाश्रयैः तथा कृत्वा सर्व्वपापैः प्रमुच्यते।
श्वेतद्वीपमवाप्नोति ध्रुवो नावर्त्तते ततः॥
देवाग्रे कारयेद् यस्तु रम्यामापणवीथिकाम्।
राजा भवति लोकेऽस्मिन् विजितारिर्म्महायशाः॥
नगरञ्च तथा दत्वा साम्राज्यमधिगच्छति॥
विष्णोरायतने दत्वा तत्कथापुस्तकं नरः।
ब्रह्मलोकमवाप्नोति बहून् वै वत्सरान् द्विज॥
स्वभूतं वाचकं कृत्वा देवागारे नरः सदा।
विद्यादानफलं प्राप्य ब्रह्मलोके महीयते॥
विष्णोः शङ्खप्रदानेन वारुणं लोकमश्नुते।
सौभाग्यं महदाप्नोति किङ्किणीं प्रददन् नरः॥
यानवाहनदानेन सर्व्वकामसुखी भवेत्।
शिविकां ये प्रयच्छन्ति ते गच्छन्त्यमरावतीम्॥
अश्वदाः सूर्य्यलोकस्था राजन्ते दिवि सूर्य्यवत्।
करीन्द्रदानाच्छक्रस्य पुरे स्थित्वा चिरं वसेत्॥
दासं दत्वा सूर्य्यलोके तिष्ठेद् भूयो न जायते।
दासीं दत्वा तथाप्नोति नात्र कार्य्या विचारणा॥

गणिकां ये प्रयच्छन्ति नृत्यगीतविशारदाम् ।
सर्व्वद्वन्द्वविनिर्म्मुक्तास्ते प्रयान्त्यमरावतीम् ॥
राजलिङ्गानि दत्वा च राजा भवति भूतले ।

वामनपुराणे,—

प्रासादनगरादीनि गृहप्राकारकादिकम् ।
यद्यदिष्टतमं किञ्चिद् यच्चाप्यस्ति गृहे शुचि ।
तत्तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे ॥

विष्णुधर्म्मे मान्धातारं प्रति वशिष्ठवाक्यम्,—

ससमुद्रामिमां लब्ध्वा सर्व्वलोकेश्वरेश्वरम् ।
पूजयाच्युतमीशेशं तमाराध्य न सीदति ॥

इति ।

पुष्पैर्धूपैस्तथा गन्धै र्दीपैर्वस्त्रानुलेपनैः ।
आराधयाच्युतं भक्त्या वेश्मसम्मार्जनादिना ॥
यद्यदिष्टतमं किञ्चिद् यद्यदत्यन्तदुर्ल्लभम् ।
तत्तद् दत्वा जगद्धात्रे वैकुण्ठाय न सीदति ॥
सुगन्धागुरुकर्पूरचन्दनक्षोदकुङ्कुमैः ।
वासोभि र्विविधै र्धूपैः पुष्पस्रक्चामरैर्ध्वजैः ॥
अन्नोपहारै र्विविधैं र्घृतक्षीराभिषेचनैः ।
गीतवादित्रनृत्याद्यैस्तोषयस्वाच्युतं नृप ॥
पुण्यरात्रिषु गोविन्दं नृत्यगीतरसोज्ज्वलैः ।
भूप जागरणैर्भक्त्या तोषयाच्युतमव्ययम् ॥

स्कान्दे,—

सनीरकर्पूरोपेतं कुम्भं कृत्वाग्रतो न्यसेत् ।
कल्पान्तं न जलापेक्षां कुर्व्वन्ति पितरस्तथा ॥
यः कुर्य्यात् कृष्णभवनं कदलीस्तम्भभूषितम् ।
कुरुते चामरैर्युक्तं स्वागतं तस्य देवराट् ॥
कृष्णालयं प्रकुरुते पताकैरुपशोभितम् ।
स दर्श्ने सूर्य्यलोके तु रमेद् यावच्च मेदिनी ॥
ध्वजमारोपयेद् यस्तु प्रासादोपरि भक्तितः ।
तस्य ब्रह्मपदे वासः क्रीड़ते ब्रह्मणा सह ॥

भूप चन्दनमालान्तु कुरुते कृष्णसद्मनि ।
देवकन्यायुतैर्लक्षैः सेव्यते सुरनायकः ॥

चन्दनमाला पत्रपुष्पकृतमाला ।

प्राङ्गणे वर्णकोपेतं स्वस्तिकैश्च समन्वितम् ।
देवदेवस्य कुरुते क्रीड़ते भूवनत्रये ॥
प्रासादे देवदेवस्य चित्रकर्म्म करोति यः ।
वसते रुद्रलोके तु यावत् तिष्ठन्ति भूधराः ॥
दद्याच्चन्द्रातपं यस्तु कृष्णोपरि नरेश्वर ।
वसते चन्द्रलोके तु यावत्तिष्ठति द्वारका ॥
दद्याच्चवं विमानन्तु विष्णवे नरनायक ।
सत्कृतो धनदेनैव वसते ब्रह्मवासरम् ॥

आदित्यपुराणे,—

लेपनाच्छादनञ्चैव यः करोति पुनर्नवम् ।
देवतायतने तस्य न भवेत् कीटजं भयम् ॥

देवगृहाधिकारे यमः,—

विधाय विविधं चित्रं तल्लोकं विन्दति ध्रुवम् ।

विष्णुः,—

यस्य देवस्यायतनं करोति तस्यैव लोकमाप्नोति सुधार्पितं कृत्वा यशसा विराजते ।

[[1]अथ वराहपुराणोक्तानि नैवेद्यानि ।

वाराहे,—

सर्व्वं व्रीहिमयं गृह्यं शुभं सर्व्वरसान्वितम् ।
मन्त्रेण मे प्रदीयेत न कश्चिदपि संस्पृशेत् ॥
इङ्गुदीफलबिल्वानि वदारामलकानि च ।
खर्जूरान् पनसांश्चैव मानवाकपरूषकान् ॥

मानवाके नारिकेलफलम् ।

आम्रानुदुम्बरांश्चैव तथा प्लक्षफलानि च ।
मरीचं शशिपाकञ्च भल्लातकरमर्द्दनम् ॥
* * * * तुम्बरञ्च प्रियङ्गुकम् ॥
द्राक्षा च दाड़िमञ्चैव पिण्डखर्जूरमेव च ।
सौवीरं कोकिलञ्चैव तथा शुभफलानि च ॥
पिण्डारकफलञ्चैव पुन्नागफलमेव च ।
शमी च करवीरञ्च बीजपूरफलं तथा ॥
कुमुदस्य फलञ्चैव उत्पलस्य फलं तथा ।
कर्कारुकफलञ्चैव तथा शिम्बफलानि च ॥
अर्ककर्कोटकञ्चैव तथा तालफलानि च ।
जातीयकफलञ्चैव * * * * ॥
कलिकस्य फलञ्चैव फलं कारूषकं तथा ।
रोतकस्य फलञ्चैव काश्मर्य्याः फलमेव च ॥

---

(१) Y. Omits the portion bracketed.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1160.

नित्याचारप्रदीपः ।

NITYĀCĀRAPRADĪPAḤ.

SIR·WILLIAM·JONES



MDCCXLVI-MDCCXCIV

BY
NARASIMHA VĀJAPEYĪ.
EDITED
PAṆḌITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

VOL. I. FASCICULUS VIII.

CALCUTTA:
PRINTED AT THE SANSKRIT PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.
1907.

Nityācārapaddhati, Fasc. 1-7 @ /10/ each	Rs. 4	6
Nityācārapradīpa, Fasc. 1-7 @ /10/ each	4	6
Nvāyabinduṭīka, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2-6 Vol. II, Fasc. 1-8 @ /10/ each	5	0
Padumawati, Fasc. 1-4 @ 2/	8	0
Pariçiṣṭa Parvan, Fasc. 1-5 @ /10/ each	3	2
Prākṛita-Paingalam, Fasc. 1-7 @ /10/ each	4	6
Prithvīrāj Rāsa, Part II, Fasc. 1 5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/- each	1	0
Prākṛta Lakṣaṇam, Fasc. 1 @ 1/8/ each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1-8 Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Prabandhacintāmaṇi (English) Fasc 1-3 @ 1/4/ each	3	12
Ṣaddarśana-Samuccaya, Fasc. 1, @ /10/ each	0	10
*Sāma Vēda Saṁhitā, Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV 1-6; V, 1-8, @ /10/ each	20	10
Sāṇkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
*Sankara Vejaya, Fasc. 2-3 @ /10/ each	1	4
Srāddha Kriyā Kaumudī. Fasc. 1-6 @ /10/ each	3	12
Srauta Sutra Latyayan, Fasc. 1-9 @ /10/ each	5	10
„ „ Asbalayana, Fasc. 1-11 @ /10/ each	6	14
Sucruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhi Kaumudī, Fasc. 1-4 @ /10/ each	2	8
*Taittreya Brahmana, Fasc. 3-25 @ /10/ each	14	6
„ Pratisakhya, Fasc. 1-3 @ /10/ each	1	14
*Taittirīya Saṁhitā, Fasc. 22-45 @ /10/ each	15	0
Tāṇḍya Brāhmaṇa, Fasc. 1-19 @ /10/ each	11	14
Tantra Vārtika (English) Fasc. 1-6 @ 1/4/	7	8
*Tattva Cintāmaṇi, Vol. I, Fasc. 1 9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1 Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	23	12
Tattvārthādhigama Sutram, Fasc. 1-3 @ /10/	1	14
Trikāṇda-Maṇḍanam, Fasc. 1-3 @ /10/	1	14
Tul'si Satsai, Fasc. 1-5 @ /10/	3	2
Upamita-bhava-prapañca-kathā, Fasc. 1-9 @ /10/ each	5	10
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/-	6	0
Vallāla Carita, Fasc. 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc. 1-6 @ /10/	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /10/ each ...	7	8
Vidhāna Pārijata, Fasc. 1-8 @ /10/	5	0
Vivādaratnākara, Fasc. 1-7 @ /10/ each	4	6
Vrhat Svayambhū Purāṇa, Fasc. 1-6 @ /10/	3	12
*Yoga Aphorisms of Patanjali, Fasc. 2-5 @ /10/ each	2	8
Tibetan Series.		
Pag-Sam Ṭhi S'iñ, Fasc. 1-4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 @ 1/ each	14	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1-6; Vol. II. Fasc. 1-5 @ 1/ each	11	0
Arabic and Persian Series.		
'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /10/ each ...	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ 1/-	3	0
Āin-i-Akbari, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 2/- each	34	0
Akbarnāmah, with Index, Fasc. 1-37 @ 1/8/ each	55	8
Ditto English Vol. I, Fasc. 1-8; Vol. II, Fasc 1-3 @ 1/4/ each	13	12
Arabic Bibliography, by Dr. A. Sprenger @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc. 1-19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts. 1-2 @ 1/- each ...	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farhang-i-Rashīdī, Fasc. 1-14 @ 1/8/ each	21	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each ...	4	0
Futūḥ-ush-Shām of Wāqidī, Fasc. 1-9 @ /10/ each	5	10
Ditto of Āzādī, Fasc. 1-4 @ /10/ each	2	8

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 15, PICCADILLY, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	As.
*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ...	Rs. 1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ...	1	14
*Agni Purāṇa, Fasc. 3-14 @ /10/ each ...	7	8
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each ...	14	6
*Anu Bhashya, Fasc. 2-5 @ /10/ each ...	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/- ...	1	0
Astasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ...	3	12
*Atharvana Upanishad, Fasc. 2-5 @ /10/ each ...	2	8
Açvavaidyaka, Fasc. 1-5 @ /10/ each ...	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-6; Vol. II. Fasc. 1-5 @ 1/ each ...	11	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-2 @ 1/- each ...	2	0
Bālam Bhaṭṭi, Vol. I, Fasc. 1-2 @ /10/ each ...	1	4
Baudhāyana Srauta Sūtra, Fasc. 1-3 @ /10/ each ...	1	14
*Bhamati, Fasc. 4-8 @ /10/ each ...	3	2
Bhaṭṭa Dipikā Vol. I, Fasc. 1-5 @ /10/ each ...	3	2
Brahma Sutra, Fasc. 1 @ /10/ each ...	0	10
Brhaddēvatā, Fasc. 1-4 @ /10/ each ...	2	8
Brhaddharma Purāṇa, Fasc. 1-6 @ /10/ each ...	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-4 @ /10/ each ...	2	8
Çatadūṣaṇi, Fasc. 1-2 @ /10/ each ...	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-7 @ /10/ each ...	11	14
Çatasāhasrikā-prajnāpāramitā, Part I, Fasc. 1-12 @ /10/ each ...	7	8
*Caturvarga Chintāmaṇi, Vols. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10, Vol IV, Fasc. 1-5 @ /10/ each ...	36	4
Çlokavartika, (English) Fasc. 1-5 @ 1/4/ each ...	6	4
*Çrauta Sūtra of Āpastamba, Fasc. 6-17 @ /10/ each ...	7	8
Ditto Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /10/ each; Vol 4, Fasc. 1 ...	10	0
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each ...	1	14
Dān Kriyā Kaumudī, Fasc. 1-2 @ /10/ each ...	1	4
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7 @ /10/ each ...	4	6
Ditto Ācārasāra, Vol. II, Fasc. 1-2 @ /10/ each ...	1	4
Gobhiliya Grihya Sutra, Fasc. 1-12 @ /10/ each ...	7	8
Kala Viveka, Fasc. 1-7 @ /10/ each ...	4	6
Kātantra, Fasc. 1-6 @ /12/ each ...	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each ...	17	8
Kūrma Purāṇa, Fasc. 1-9 @ /10/ each ...	5	10
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each ...	3	0
*Lalitavistara, Fasc. 3-6 @ /10/ each ...	2	8
Madana Pārijāta, Fasc. 1-11 @ /10/ each ...	6	14
Mahā-bhāṣya-pradipodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-4 @ /10/ each ...	15	10
Manutikā Saṃgraha, Fasc. 1-3 @ /10/ each ...	1	14
Mārkandeya Purāṇa, (English) Fasc. 1-9 @ 1/- each ...	9	0
*Markandeya Purana, Fasc. 4-7 @ /10/ each ...	2	8
*Mimāṃsā Darçana, Fasc. 3-19 @ /10/ each ...	10	10
Nyāyavārtika, Fasc. 1-6 @ /10 each ...	3	12
*Nirukta, Vol IV, Fasc. 1-8 @ /10/ each ...	5	0
*Nitisara, Fasc. 2-5 @ /10/ each ...	2	8

	Rs.	As.
Haft Āsmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each	Rs. 0	12
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each ...	7	8
Iqbālnāmah-i-Jahāngiri, Fasc. 1-3 @ /10/ each ...	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each ...	51	0
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each ...	35	0
Maghazi of Wāqidi, Fasc. 1-5 @ /10/ each ...	Rs 3	2
Muntakhabu-t-Tawarikh, Fasc. 1-15 @ /10/ each ...	Rs. 9	6
Ditto (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/ each ...	15	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each ...	11	14
Ma'āsir-i-'Ālamgirī, Fasc. 1-6 @ /10/ each ...	3	12
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ ...	0	10
Nizāmi's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12/ each ...	1	8
Riyāzu-s-Salātīn, Fasc. 1-5 @ /10/ each ...	3	2
Ditto (English) Fasc. 1-5 @ 1/ ...	5	0
Tabaqāt Nasiri, Fasc. 1-5 @ /10/ each ...	3	2
Ditto (English) Fasc. 1-14 @ 1/ each ...	14	0
Ditto Index ...	1	0
Tārikh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni, Fasc. 1-7 @ /10/ each ...	4	6
Tārikh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...	3	0
Wis o Rāmin, Fasc. 1-5 @ /10/ each ...	3	2
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ...	10	10
Tuzuk-i-Jahāngirī (Eng.) Fasc. 1 @ 1/ ...	1	0

ASIATIC SOCIETY'S PUBLICATIONS.

	Rs.	As.
1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each ...	20	0
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.		
3. JOURNAL of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.		
N.B.—The figures enclosed in brackets give the number of Nos. in each Volume		
4. Journal and Proceedings, N.S., 1905, to date, @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members. ...		
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.		
6. Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ...	4	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) ...	4	0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1884. ...	3	8
8. Mahābhārata, Vols. III and IV, @ 20/ each ...	40	0
9. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to. @ 6/ each ...	18	0
10. Tibetan Dictionary, by Csoma de Körös ...	10	0
11. Ditto Grammar " " ...	8	0
12. Kaçmiraçabdāmṛta, Parts I and II @ 1/8/ ...	3	0
13. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson... ...	1	0
14. Memoir on maps illustrating the Ancient Geography of Kaśmir, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899 ...	4	0
15. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott.	10	0

	Rs.	As.
Notices of Sanskrit Manuscripts, Fasc. 1-33 @ 1/ each ...	33	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

1-1-07.

Books are supplied by V. P. P.

[1]सल्लच्छायाः फलञ्चैव कर्णिकारफलं तथा ।
अग्रदायफलञ्चैव शोलायाः फलमेव च ॥
चित्रशालाफलञ्चैव द्विविधा कर्कटी तथा ।
कालिङ्गकफलञ्चैव बृहतीफलमेव च ।
उभे चैव पटोले द्वे तथा रसफलानि च ॥
वचनस्य फलञ्चैव सग्टयाफलमेव च ।
स्यन्दनस्य फलञ्चैव कटुसारफलं तथा ॥
कर्म्मरङ्गफलञ्चान्यत् प्रतिग्टह्णामि माधवि ।
मूलकानां फलञ्चैव कदम्बस्य फलं तथा ॥
धन्यकस्य फलञ्चैव कन्दस्योत्पलकं तथा ।
कन्दञ्च कौमुदञ्चैव द्विविधं स्थलकन्दयोः ॥
पिण्डकन्देति विख्यातं माहिषं कन्दमेव च ।
करमर्द्दककन्दन्तु तथा नीलोत्पलस्य च ॥
मृणालं पुष्करञ्चैव शालूकस्य फलं तथा ।
एतान्यन्यानि बहूनि कन्दमूलफलानि च ॥
एतानि चोपयोग्यानि यान्युक्तानि मया शुभे ।
मूलकस्य च शाकञ्च [2]चं बृषाकं (चन्द्रीशाकं) तथैवच ॥
शाकञ्चैव कलायस्य सर्षपस्य तथैवच ।
वत्सकस्य च शाकञ्च शाकमेकं कलिङ्गकम् ॥
आर्द्रकस्य च शाकञ्च पालाशं शाकमेव च ।
आस्थिकोदकशाकञ्च शाकं कौमारकं तथा ॥

---

(१) E. सल्लिच्छायाः ।   (२) E. चन्दृशाकम् ।

शुकमण्डलपत्रञ्च द्वावेवतु तवानकौ।
वदरस्य च शाकञ्च मधुकोदुम्बरं तथा॥
एते चान्ये च बहवः शतशोऽथ सहस्रशः।
कर्म्मख्यास्ते च सर्व्वे वै ये मया परिकीर्त्तिताः॥
व्रीहीणाञ्च प्रवक्ष्यामि उपयोगञ्च माधवि।
धर्म्मधर्म्मिकरक्तञ्च सुगन्धिरक्तशालिकम्॥
[1]दीर्घशूकं महाशालिवरं कुङ्कुमपच्चिकम्। (०कङ्गुणिकाख्यकम्)
ग्रामशालिसमुद्राणां सुश्रीकां कुलशालिकाम्॥
यवान्नं विविधं देयं कर्म्मख्यं मम माधवि।
कर्म्मख्याश्चैव मुद्गाश्च तिलाः कृष्णाः कुलत्थकाः॥
गोधूमका महामुद्गा कुलत्थमथवाप्यलुम्।
प्रतिगृह्णाम्यहं ह्येतत् सर्व्वं भगवतः प्रियम्॥
पशूनां संप्रवक्ष्यामि वन्यानां मार्गवासिनाम्।
ये ममैवोपयोज्यानि गव्यं मधु घृतं तथा॥
माहिषञ्चाविकं छागमयाज्ञिकमुदाहृतम्।
मार्गं मांसतथा छागं [2]शाशं वा मम युज्यते॥
कर्म्मख्यं रौरवं मांसं मायूरं [3]कुक्कुटं तथा।
[4]लावकं वार्त्तिकञ्चैव प्रशस्तश्च कपिञ्जलः॥

(१) E. दीर्घमूलम्।
(२) E. पाशम्।
(३) E. कौकुरम्।
(४) E. लवकं वाह्लिकञ्चैव।

रैणुकः प्राशिकश्चैव हारीतश्चैव वीर्य्यवान्।
तथा कुरुवकश्चैव (कुररश्चैव) पितॄणां प्रवरः प्रियः*॥

अत्र मांसस्य देयत्वेनोक्तावपि कलियुगे वर्ज्जनं समाचारात्। पठन्ति वाराहीतन्त्रे—

ब्रह्मविष्णुशिवानाञ्च शक्तेश्च श्रीकरस्य च।
राज्ञः श्रियं कुलं हन्ति कलौ मांसेन चार्चनम्॥

* ग्रन्थकृतानेनैतेषां विष्णुनैवेद्यज्ञापकवचनानां शीर्षदेशे "अथ वराहपुराणोक्तानि नैवेद्यानि" इति, तदनन्तरं "वाराहे" इति च कथनादेतानि वराहपुराणादेवोद्धृतानीति स्पष्टं विज्ञापितम्। मयापि ग्रन्थकर्त्तुः कथनानुसारेणैतेषां वचनानां मध्ये यान्यसंलग्नपाठानि यानि च कोषशास्त्रालोचनयाप्यलब्धशब्दार्थानि तेषां यथायथपाठनिर्णयाय सम्यगालोचितं एसियाटिकसोसाइटिमुद्रितं वराहपुराणं किन्तु तत्र न प्राप्तः सकल एष एतदुद्धृतः पाठ इति स सुतरां तथैव रक्षितो यथा दृष्टो मूलपुस्तके। प्राप्तश्च यावत्परिमितः सोऽप्येतद्धृतेन सह सर्व्वत्र न सम्यक् सङ्गच्छत इति सोऽत्र निम्ने सन्निविष्टः। मुद्रितवराहपुराणपाठ एतस्य "वदरस्य च शाकञ्च मधुकोदुम्बरं तथा" इति श्लोकादारभ्य तत्परश्लोकैः सह सम्मेल्य द्रष्टव्यः।

मुद्रितवराहपुराणपाठः—

परमन्तस्य शाकानि मधूकोदुम्बरन्तथा।
एते चान्ये च बहवः शतशोऽथ सहस्रशः।
कर्म्मण्याश्च त एतेषां ये मया परिकीर्त्तिताः॥५॥
व्रीहीणाञ्च प्रवक्ष्यामि उपयोग्यानि माधवि।
एकाग्रं मानसं कृत्वा प्रापणं शृणु सुन्दरि॥६॥
धर्म्मचिल्लिकशाकञ्च सुगन्धं रक्तशालिकौ।
दीर्घशालिमहाशाली वरकुङ्कममाञ्चिकौ॥७॥
आमोदाशिवसुन्दर्य्यौ शिरीकाकुलशालिकाः।
विविधं यावकान्नञ्च ज्ञेयान्येतानि कर्म्मणि॥८॥
कर्म्मण्या मुद्गमाषा वै तिलकङ्गुकुलित्थकाः।
गवेधुकं महामोहं मकुष्ठमथवाहिजाम्।
श्यामाकमितिचोक्तानि कर्म्मण्यानि वसुन्धरे॥९॥

निषिद्धानि ।

विष्णुः,—

नाभक्ष्यं नैवेद्यार्थे । न भक्ष्येऽप्यजामहिषीक्षीरे । पञ्चनखमत्स्य वराहमांसानि च ।

वाराहे,—माहिषं वर्ज्जयेन्नित्यं क्षीरं दधि घृतं तथा ।

विष्णुधर्म्मोत्तरतृतीयकाण्डे,—

उदुम्बरं कपित्थञ्च तथा दन्तशठं तथा ।
एवमादीनि देवाय न देयानि कदाचन ॥

दन्तशठं जम्बीरफलम् ।

नैवेद्यदानानन्तरं नरसिंहे,—

ततस्तदन्नशेषेण मन्दिरस्य समन्ततः ।
पुष्पाक्षतविमिश्रेण बलिं यस्तु प्रयच्छति ॥

कर्म्मिण्यानि च शाकानि विजानीहि वसुन्धरे ।
एतानि प्रतिगृह्णामि यच्च भागवतं प्रियम् ॥१०॥
मार्गमांसं वरं छागं शासं समनुयुज्यते ।
* * * * * *
माहिषं वर्जयेन्मह्यं क्षीरं दधि घृतं ततः ।
* * * * * *
पक्षिणाञ्च प्रवक्ष्यामि ये प्रयोज्या वसुन्धरे ।
ये चैव मम क्षेत्रेषु उपयुज्यन्ति नित्यशः ॥१४॥
लावकं वार्त्तिकञ्चैव प्रशस्तञ्च कपिञ्जलम् ।
* * * * * *

वराहपुराणे ऊनविंशत्यधिकशततमाध्याये ५—१५ श्लोका द्रष्टव्याः ।

मातृभिः सहिताश्चैव लोकपालविनायकाः ।
बलिदानाद् वैष्णवेन तृप्ताः सन्तो दिवौकसः ॥
शान्तिं तस्य प्रयच्छन्ति श्रियमारोग्यमेव च ।

यत्तु बलिदानमभिधाय हयशीर्षे,—

एवम्विधो बलिर्नित्यो भगवद्धाम्नि सर्व्वदा ।
कार्य्यः प्रतिष्ठादिवसमारभ्यानुदिनं बुधैः ॥

तद् बलिदानं पृथक्फलार्थमेव न पूजाङ्गम् ।

विष्णुधर्म्मे—

पूगजातीफले दत्वा जातीपत्रं तथैव च ।
लवङ्गमथ कक्कोलमेलां कटुफलं तथा ॥
ताम्बूलानां किशलयं स्वर्गलोकमवाप्नुयात् ।
सौभाग्यमतुलं लोके तथा रूपमनुत्तमम् ॥

स्कान्दे,—

ताम्बूलञ्च सकर्पूरं सपूगं नरनायक ।
कृष्णाय यच्छते प्रीत्या तस्य तुष्येद्धरिः सदा ॥

अथ कुम्भदानम् ।

स्कान्दे,—

सनीरन्तु सकर्पूरं कुम्भं कृष्णाय यो न्यसेत् ।
कुत्रापि न जलापेच्चां कुर्व्वन्ति प्रपितामहाः ॥

तथा,—

कुम्भं सकरकं दिव्यं फलकर्पूरसंयुतम् ।
न्यसेदर्च्चनकाले तु कृष्णस्यातीव वल्लभम् ॥

अथ दुर्गायाः ।

भविष्ये,—

गुड़खण्डाज्यसम्मिश्रमन्नं दत्वा नराधिप ।
वैष्णवस्य फलं प्राप्य सूर्य्यलोके महीयते ॥
गुड़खण्डयुतानाञ्च तथा शर्करया नृप ।
घृतेन परिपक्वानां प्रदाय ब्रह्मणः पदम् ॥
शाल्योदनं [1]रसालाञ्च पानञ्च विविधं तथा ।
यः प्रयच्छति दुर्गायै स गच्छति शिवालयम् ॥
दुर्गामुद्दिश्य पानीयं केतकीशशिवासितम् ।
यः प्रयच्छति राजेन्द्र स गणाधिपतिर्भवेत् ॥

(१) E. F. रसानाञ्च ।

शशी कर्पूरम् ।

आम्रञ्च नारिकेलञ्च खर्ज्जूरं बीजपूरकम् ।
यः प्रयच्छति दुर्गायै स गच्छति परं पदम् ॥

ब्रह्मणि तु नैवेद्यदाने फलाकथनात् पूजायामेतानि नैवेद्यानि

भविष्ये,—

खण्डलड्डुकग्रीवेष्टकासाराशोकवर्त्तिका(:) ।
स्वस्तिकालोपिकादुग्धग्रीवेष्टककिलाटिका(:) ॥
फलानि चैव पक्वानि तथा खण्डगुड़ानि च ।
अन्नादि विविधं दद्यात् खाद्यानि विविधानि च ।

अथ सूर्य्यस्य नानाविधद्रव्यदानानि ।

भविष्ये,—

वासोभिः पूजयेद्‌ भानुं यानि वाऽस्य प्रियाणि तु ।
तथान्यैश्च शुभैर्द्रव्यैः पूजयेद्‌ वनमालिनम् ॥
वासांसि सुविचित्राणि सारवन्ति मृदूनि च ।
धूपितानि रवौ दद्याद्‌ विकेशानि नवानि च ॥
यावत्तद्वस्त्रतन्तूनां परिमाणं प्रचक्षते ।
तावद्वर्षसहस्राणि सूर्य्यलोके महीयते ॥

त्रिवृत् शुक्लं सुपीतं वा पट्टसूत्रादिनिर्म्मितम्।
दत्त्वोपवीतं सूर्य्याय भवेद् वेदाङ्गपारगः॥

श्वेतमहाध्वजं किङ्किणीमालान्वितं मयूरच्छत्रभूषितं रथं दत्वा मन्वन्तरशतं दिवि मोदते। सूर्य्यगृहे मणिमालादाने महाध्वजाष्टकदाने च कल्पायुतं दिव्यं दिवि मोदते। मणिरत्नमयदण्डं काञ्चनमयदण्डं वा शुभ्रं छत्रं मुक्तामालालङ्कृतं दत्वा सूर्य्यलोके मोदते। शृङ्खलासमायुक्तकांस्यलोहमयमहास्वनघण्टादाने अरुणस्यानुचरः सूर्य्येण सह मोदते। भेरीमृदङ्गपटहतुम्बुरुमुरजवंशकांस्यादिदाने युगायुतशतं सूर्य्यलोके महीयते। [[1]महास्वनशङ्खदाने युगायुतशतं सूर्य्यलोके महीयते।] वह्निवर्णाभं एकवस्त्रं नानावस्त्रचितं वा मध्ये पद्मभूषितं [2][स्रग्घण्टीचामरभूषित] वितानं सूर्य्यस्योपरि दत्वा तद्वस्त्रतन्तुपरिमाणसंख्ययुगसहस्रं सूर्य्यलोके महीयते। [3][सूर्य्ययज्ञोपकरणं दत्वा सूर्य्यलोके महीयते।]

तथा,—

भास्करायतनाभ्यासे सूर्य्यक्षेत्रं समन्ततः।
देहिनां तत्र पञ्चत्वं सूर्य्यसायुज्यकारणम्॥
मनुजैः स्थापिते सूर्य्ये क्रोशार्द्धं स्यात् समन्ततः।
तदर्द्धार्द्धमथो वाऽपि सूर्य्यक्षेत्रं प्रकीर्त्तितम्॥

(१) D. Omits the portion bracketed.
(२) D. Omits the portion bracketed.
(३) D. Omits the portion bracketed.

सूर्य्यस्यायतनाभ्यासे यत्तोयं पुरतः स्थितम्।
सूर्य्यगङ्गेति तज्ज्ञेयं तत्र स्नात्वा दिवं व्रजेत्।
यः कुर्य्याद् दीर्घिकां वापीं तड़ागं भास्करालये।
स तारयेत् कुलशतं सूर्य्यलोके महीयते॥

शङ्खवाद्यगीतनृत्यजयशब्दकरणे भूमिदानकन्यादानफलम्। दासीदासदाने [1]अश्वमेधफलम्। प्रेक्षणीयकदाने राजसूयफलम्। वेश्याकदम्बकं दत्वा परं स्थानं स गच्छति यत्र सूर्य्यस्तिष्ठति। गोमहिषगजाश्वदाने अश्वमेधफलम्। सूर्य्याय गौरीगोदाने स्थावरजङ्गमजगद्दानफलम्। स्नानार्थगोदाने कपिलागोशतदानफलम्। गोवृषं पुष्टं दत्वा वृषसन्ततिरोमसंख्ययुगसहस्रं सूर्य्यलोके महीयते। उभयमुखीं दत्वा सप्तद्वीपमहीदानफलम्। सवृषं गोशतं दत्वा एकविंशतिकुलजैः सार्द्धं सूर्य्यलोके क्रीड़ित्वा तत्र भोगान् भुक्त्वा प्रलये सूर्य्यमण्डलं प्रविशति। सवृषं गोसहस्रं दत्वा अश्वमेधफलम्। गोयुक्तमश्वयुक्तं वा काञ्चनं रौप्यं वा रत्नचित्रं रथं दत्वा सूर्य्यलोकं गत्वा पश्चात् शिवलोके महीयते। दारुरथदाने विमानेनार्कं प्रयाति। घण्टाभूषितगजदाने युगकोटिशतानि स्वर्गं भुक्त्वा पश्चादिन्द्रः स्यात्। सर्व्वशस्यशालिभूमिदाने भूमिरेणुसंख्ययुगसहस्रं सूर्य्यलोके महीयते।

एवं सर्व्वत्र विज्ञेयं फलं भूरेणुमानतः।
ग्रामखेटपुरक्षेत्रविषयादिनिवेदने॥

(१) E. नरमेधफलम्।

नानाफलान्वितनानापुष्पान्वितारामदाने वृक्षपत्रफलसंख्ययुगसहस्रं सूर्य्यलोके महीयते। एवं भानोरायतने प्रपाकरणे परमं स्थानं याति। शीतकाले सूर्य्यायतने [1]वह्निदाने अश्वमेधफलम्। सूर्य्य-स्नानार्थं पञ्चामृतदाने सर्व्वकामाप्तिः। दीपार्थं तैलं दत्वा नरकं न याति। दीपतैलार्थतिलदाने महापातकक्षयः। धनं धान्यं हिरण्यं दत्वा परमां गतिमेति। भानवे भारतपुस्तकं दत्वा विष्णुलोके महीयते। [[2]तथा भास्कराग्रे दक्षिणां दत्वा कल्पायुत-सहस्रं सूर्य्यलोके महीयते।]

सुवर्णमणिमुक्तादि रजतञ्च तथोत्तमम्।
वस्त्राणि विविधानीह यच्चान्यदपि दुर्लभम्॥
पुष्पाणि करवीराणि प्रियं रक्तञ्च चन्दनम्।
गुग्गुलुश्चैव धूपानां नैवेद्यं मोदकाः प्रियाः॥
पूजाकरो भोजकश्च घृतदीपस्तथा प्रियः।
[3]दानं प्रियं खगश्रेष्ठ ये प्रयच्छन्ति मानवाः।
तेषां ददाति विश्वेशो भगवान् मुक्तिमीश्वरः॥

संवत्सरे षण्मासे वा भानोर्यागकरणे न पुनरुद्भवः।

तथा,—

अयं विनैव मन्त्रेण पुण्यराशिः प्रकीर्त्तितः।
स्यादयं मन्त्रयुक्तश्चेत् पुण्यं शतगुणोत्तमम्॥

(१) E. वस्त्रदाने।
(२) D. Omits the portion bracketed.
(३) E. यानम्।

तस्मान्मन्त्रेण सूर्य्याय स्नानं [1]चार्घफलादिकम्।
गजाश्ववस्त्ररत्नादि हेमाद्यञ्च निवेदयेत्॥
खगोल्कायेति विज्ञेयो मन्त्रः सर्व्वार्थसाधकः।
सर्व्वमन्त्राधिकश्चायं प्रणवद्वयमध्यगः॥

अथ सौरधर्म्माः।

भविष्ये,—

सूर्य्यधर्म्मा बुधैरुक्ताः सर्व्वपापभयापहाः।
त्रिसन्ध्यमर्च्चयेद् भानुमग्निकार्य्यञ्च शक्तितः॥
सूर्य्यार्चाग्निपरो नित्यं तद्भक्तातिथिपूजकः।
पर्व्वमैथुनवर्ज्जी स्यात् श्रीमान् सूर्य्यगृहाश्रमी॥
अर्द्धात् तुरीयभागेन प्रकुर्य्यादर्च्चनं रवेः।
धनार्ज्जनं तदर्द्धेन यतोऽनित्यं हि जीवनम्॥
ब्रध्नार्थे ब्रह्मचारी यः सूर्य्यपूजाग्नितत्परः।
भवेज्जितेन्द्रियः शान्तो नैष्ठिकः स्नातकोऽपि वा॥
सर्व्वद्वन्द्वविनिर्मुक्तः कन्दमूलफलाशनः।
सूर्य्यवैखानसो ज्ञेयः सूर्य्यपूजाग्नितत्परः॥
निवृत्तः सर्व्वसङ्गेभ्यः पूजादानरतः सदा।
ज्ञेयः सूर्य्ययतीन्द्रोऽयं पूजानिष्ठो जितेन्द्रियः॥

(१) E. गन्धफलादिकम्।

लिङ्गत्रयस्य यः कुर्य्यात् भस्मना च त्रिपुण्ड्रकम्।
अदृष्यः सर्व्वसत्वानां सूर्य्यलोकं स गच्छति॥
सूर्य्यभक्तैः सदा कार्य्या शिखैका भास्करप्रिया।
कृत्वाग्निकार्य्यं सूर्य्यस्य भस्मना तिलकक्रिया॥

कालिकापुराणे सूर्य्यवाक्यम्,—

मद्भक्तो नहि भुञ्जीत भाजने परिमण्डले।
उष्णोषं वर्ज्जयेच्छत्रं शाकं सौवर्चलं तथा॥
रक्तं माल्यं न सेवेत तथा वस्त्रं विलेपनम्।
गोमयं मूषिकोत्कृष्टं तथा कृष्णाश्च मृत्तिकाः॥
वर्ज्जयेदुपलेपार्थं धूपं देयं न पाणिना।
अदृष्ट्वा मां न भुञ्जीत विण्मूत्रं नैव दर्शयेत्॥
अहोरात्रोषितो भूत्वा सप्तम्यामर्च्चयेन्नरः।
केशांश्च वापयेद् भक्त्या रक्तं मुच्चेन्न मेऽग्रतः॥
मन्नाम्ना पर्य्यटन्तञ्च मद्भक्तं समुपस्थितम्।
मम भोजकमन्यं वा सर्व्वं यत्नेन मानयेत्॥
मच्छास्त्रं लिखितं किञ्चिद् भित्तौ रम्ये शिलातले।
मम ज्ञानोक्तमन्यद् वा न मार्ज्जेत कदाचन॥
मदर्चाधृतनिर्म्माल्यं शरीरेण तु धारयेत्।
दशनानां विशुद्ध्यर्थमर्ककाष्ठं न भक्षयेत्॥
हिरण्यगुल्मकांस्यार्कदार्व्वाश्वत्थशमीभिः।
प्रतिश्रयं पादपीठं पादुके न च धारयेत्॥

उदयास्तमयञ्चैव मद्विम्बं प्रणमेत् सदा।
ईदृग्विधानां भक्तानामहं तुष्याम्यसंशयम्॥

अथ शिवप्रदेयानि।

भविष्ये,— सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
शिवे दत्तं हुतं जप्तं बलिपूजानिवेदनम्।
एकान्ततोऽनन्तफलं तद्भवेन्नात्र संशयः॥

तथा,— वासांसि सुविचित्राणि सारवन्ति मृदूनि च।
धूपितानि शिवे दद्याद् विकेशानि नवानि च॥
यावत् तद्वस्त्रतन्तूनां परिमाणं विधीयते।
तावद्युगसहस्राणि रुद्रलोके महीयते॥
त्रिवृत् शुक्लञ्च पीतं वा पट्टसूत्रादिनिर्म्मितम्।
दत्त्वोपवीतं रुद्राय भवेद् वेदान्तगः सुधीः॥
त्रुटिमात्रञ्च यो दद्याद्धेम लिङ्गे समौक्तिकम्।
इन्द्रस्यार्द्धासने तावद् यावदिन्द्राश्चतुर्द्दश॥

नन्दिपुराणे—

मुक्तां मुक्तार्द्धमात्रं वा तदर्द्धं प्रतिवासरम्।
कनकं यस्य लिङ्गे तु व्रजेत् पदमनुत्तमम्॥
एवमर्थानुसारेण फलं ज्ञेयं समासतः।
योऽर्कपत्रपुटे कृत्वा मधुपर्कं समन्त्रकम्॥

निवेदयति शर्व्वाय सोऽश्वमेधफलं लभेत् ।

भविष्ये,—शिवस्य पुरतो दत्वा दर्पणन्तु सुनिर्म्मलम् ।

कल्पायुतसहस्रन्तु शिवलोके महीयते ॥

तथा,—

श्वेतं महाध्वजं क्वत्वा परं यान्ति शिवान्तिकम् ।

शिवगृहे ध्वजमालादाने अष्टदिक्षु ध्वजाष्टकदाने वा कल्पायुतशतं दिवि मोदते ।

स्कान्दे,—

छत्रं दद्यात्तु यः सोऽपि दीप्यते तेजसा दिवि ।

भविष्ये,—

शरच्चन्द्रांशुविमलं मुक्तादामोपशोभितम् ।

मणिकाञ्चनात्यतमदण्डं छत्रं दत्वा विचित्रच्छत्रशोभितो विमानशतसम्भोगैः शिवपुरे चिरं स्थित्वा समुद्रपर्य्यन्तां महीं भुंक्ते । शृङ्खलासमायुक्तमहास्वनकांस्यलोहान्यतममयघण्टायाः शिवालये बन्धने घण्टाकर्णगणतुल्यः शिवलोके महीयते ।

भेरीमृदङ्गमुरजदुन्दुभीपटहादिकम् ।

वंशकंसालवादित्रं यः शिवाय प्रयच्छति ।

युगायुतशतं दिव्यं शिवलोके महीयते ॥

महास्वनन्तु यो दद्यात् शङ्खयुग्मं शिवालये ।

युगकोटिशतं सार्द्धं शिवलोके महीयते ॥

अन्यत्र च,—

कुर्य्यान्मकरसंक्रान्तौ लिङ्गे तु घृतकम्बलम् ।

स्नापयेद् देवमीशानं क्षीरसारं घृतं विभो(:) ॥

पुण्यकाले करिष्यामि तवैव घृतकम्बलम् ।

देवदेव महादेव नित्यतृप्त निरामय ।

अविघ्नं मेऽस्तु यज्ञस्य प्रसीद कृपया विभो ॥

शालिपिष्टेन दीपांश्च महादीपांश्च कारयेत् ।

तिलैर्होमं प्रकुर्व्वीत दधिमध्वाज्यसंयुतैः ॥

अष्टोत्तरशतञ्चाज्यं मूलमन्त्रेण मन्त्रवित् ।

अथ महास्नानम् ।

कार्त्तिक्यामथ वैशाख्यां शयनादिषु पर्व्वसु ।

दत्वा दीपान् समुद्बोध्य देवस्याग्रे बलिं ततः ॥

भक्तानां देवदेवस्य वाद्यादिषु क्षिपेत्सुधीः ।

सर्व्वत्र देवमामन्त्र्य स्वपेद्भूमौ हरं स्मरन् ॥

उपलिप्य गृहान् गत्वा निराहारो निशि स्वपेत् ।

अपरेऽहनि पूर्व्वाह्ने गत्वा तत्रैव मन्दिरम् ॥

कारयेत महास्नानं हन्तामुं विधिमाशृणु ।

पञ्चविंशत्पलं लिङ्गे अभ्यङ्गं कारयेदथ ॥

शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन च ।
तावता मधुना चैव दध्ना चैव ततः पुनः ॥
तावदेवहि क्षीरेण पञ्चगव्येन वा स्वतः ।
भूयः सार्द्धसहस्रेण पलानामैक्षवेण च ॥
रसेन कारयेत् स्नानं भक्त्या चोष्णाम्बुना ततः ।
शीताम्बुना तयोद्वर्त्त्य वस्त्रपूतेन मन्त्रवित् ॥
स्नापयेद् भक्तितो भूयो गन्धमन्त्रान्वितेन तु ।
विधिना स्नाप्य चानेन सह रोचनयालिपेत् ॥
कुष्ठकुङ्कुमकर्पूरचन्दनागुरुयुक्तया ।
लेपयित्वा ततो लिङ्गमापीठन्तदनन्तरम् ॥
नीलोत्पलसहस्रेण मालां बद्धा प्रपूजयेत् ।
अलाभे तु सहस्रार्द्धं तदर्द्धेनैव पूजयेत् ।
उत्पलानामलाभे तु पत्रैश्च श्वेतरोर्थ्यजेत् ।
पद्मैर्वा चम्पकैर्वापि जात्या पाटलयाऽपिवा ॥
पुन्नागैः कर्णिकारैर्वा श्वेतमन्दारजैरपि ।
दमनैर्म्मरुवकैर्वापि शमीशुक्लार्कनागरैः ॥
यथालाभञ्च पत्रैर्वा निर्ग्रथ्य सुमनोऽन्वितैः ।
सम्पूज्य कारयेद् भक्त्या विमलं पुष्पमण्डपम् ॥
गुग्गुलुञ्चाज्यसंयुक्तमगुरुं वा सितं दहेत् ।
सम्पूज्य गौरीभर्त्तारं गीतवादित्रमङ्गलैः ॥
शालिपिष्टोद्भवैः सिद्धैर्घृतपूर्णैः समुज्ज्वलैः ।
ततो नीराजनं दीपैः षड्विंशद्भिस्तु कारयेत् ॥

सर्षपैर्दधियुक्तैश्च दूर्व्वागोरोचनाक्षतैः ।
गन्धपुष्पादिकं दद्याद् भूयो विचिन्त्य शङ्करम् ॥
वितानं सितपद्माभं मध्ये कमलभूषितम् ।
विचित्रवर्णमेकं वा नववस्त्रोपकल्पितम् ॥
किङ्किणीरवसंयुक्तं वैदूर्य्यैश्च सुशोभितम् ।
लम्बकैः पूतदामैश्च घण्टाचामरभूषितम् ॥
शिवस्योपरि यः कुर्य्यात् पुरतो वाऽपि कल्पयेत् ।
रुद्रवत् सर्व्वलोकेषु युगकोटिं स मोदते ॥

शिवोपरि मौक्तिकमण्डपकरणे कल्पान्तं यावत् शिवपुरे वासः। शिवायतने वस्त्रशोभाकरणे तत्तन्तुसंख्ययुगसहस्रं शिवलोके महीयते। शिवे यज्ञोपकरणं दत्वा शिवलोके महीयते। कृष्णतिलप्रस्थदाने युगायुतसहस्राणि शिवलोके महीयते। शिवाय पयस्विनीगोदाने सचराचरजगद्दानफलम्।

वृषभं शुक्लवर्णं वा नीलं वा विनिवेदयेत् ।
यावत्प्रसूतिरोमाणि तत्प्रसूतिकुलेषु वै ।
तावद्युगसहस्राणि शिवलोके महीयते ॥
कृत्वाग्निकार्य्यं कपिलां दत्वा गोशतजं फलम् ॥
क्रोशमात्रं परं क्षेत्रं शिवस्य परमात्मनः ।
देहिनां तत्र पञ्चत्वं शिवसायुज्यकारणम् ॥
मनुजैः स्थापिते लिङ्गे क्षेत्रमानमिदं स्मृतम् ।
स्वयम्भुवि सहस्रं स्यादार्षे चैव तदर्द्धकम् ॥

यः कुर्य्याद् दीर्घिकां वापीं कूपं वापि शिवालये ।
त्रिसप्तकुलसंयुक्तः शिवलोके महीयते ॥

स्कान्दे,—

दद्यात् कृष्णतिलांश्चैव तथा सिद्धार्थकांश्च ह ।
यो मे देवि सदा भक्त्या स मे नन्दिसमो भवेत् ॥

तथा,—

गोचर्म्ममात्रमपिवा यो मे दद्याद् वसुन्धराम् ।
स मे पुरं समासाद्य गणेशैः सह मोदते ॥

अथ घृतकम्बलविधिः ।

भविष्ये,—

आलिङ्गपीठपर्य्यन्तं यो दद्यात् घृतकम्बलम् ।
घृतेन रूपकं रम्यं कृत्वा शम्भोर्महात्मनः ॥
मन्वन्तरशतं [1]साग्रं रुद्रलोके महीयते ।
सुरूपः सुभगः श्रीमान् परितुष्टोऽपि जायते ॥
रूपं पिष्टमयं कृत्वा विचित्रं रत्नभूषितम् ।
यज्ञोपवीतसंयुक्तं हेमपादं विशेषतः ॥
दन्तेषु मौक्तिकं न्यस्य प्रवालमधरोष्ठयोः ।
दद्याद् वज्रञ्च नेत्राभ्यां वैदूर्य्यं वाऽप्यसम्भवे ॥

(१) E. साग्रम्

हेमरूप्यञ्च हस्ताभ्यां ताम्रं पादतले तथा ।
अगण्डजैर्वनजैर्वस्त्रैर्विचित्रैः परिवेशयेत् ॥
विविधैरथ तोयाद्यैर्लिङ्गपूजां प्रकल्पयेत् ।
भोजयेत् शिवभक्तांश्च विप्रान् भक्त्या च दीक्षयेत् ॥
प्रीयतां मे महादेवो भक्तांस्तान् क्षामयेद् द्विजान् ।
तैरेव सार्द्धं विप्रेन्द्र तद्रूपञ्च शिवालये ।
नीत्वा समर्पयेद् विद्वान् शिवलिङ्गसमीपतः ।
सर्व्वयज्ञफलं प्राप्य सर्व्वदानफलानि च ।
सुरूपो रूपदानेन शिवलोके महीयते ॥
शातकुम्भं ततः पद्ममष्टपत्रं सुशोभनम् ।
मध्ये निवेशयेन्मूर्द्ध्नि लिङ्गस्य [1]कुङ्कुमैः सह ॥
सूक्ष्मवस्त्रयुगं श्वेतं पीतं वा पट्टसम्भवम् ।
चामरं दर्पणञ्चैव दीपवृक्षं प्रदापयेत् ॥
धूपं साधारणञ्चैव सघण्टं पूर्णमेव च ।
वितानकं ध्वजं दद्यात् किङ्किणीरसनान्वितम् ॥
अथाष्टाभिः क्षितिं पीड्य अङ्गैर्भक्त्याच दण्डवत् ।
ततः किञ्चित् पठेत् स्तोत्रं शाङ्करं भवशङ्करम् ॥
प्रदक्षिणं ततो गच्छेत् शनै र्निर्म्माल्यवर्जकः ।
प्रणम्योच्चैः पुनः पश्चान्नैवेद्यं विनिवेदयेत् ॥

(१) E. कुसुमैः सह ।

दीनान्धकृपणांश्चैव तर्पयेदन्नदानतः।
कारयेद् यः शिवे भक्त्या महास्नानं फलं शृणु॥
समुद्धृत्य शतं साग्रं कुलानां पापवर्जितः।
भगवन् ब्रह्मलोकान्तं भुक्त्वा [1]लोकानशेषतः॥
व्रजे क्रीड़ायने तस्मिन् विमाने सोऽमरैर्युतः।
भुक्त्वा यथेप्सितान् भोगान् शिवसायुज्यतां व्रजेत्॥
मायावितान[2]मुद्धृत्य अन्ते मोक्षमवाप्नुयात्।
केवलेनाप्यथाज्येन दध्ना गव्येन वै तथा॥
पयसा पञ्चगव्येन मधुनेक्षुरसेन च।
यः कारयेन्महास्नानं विधिनानेन संयुतः॥
सोऽपि तेनैव मार्गेण गमिष्यति परं पदम्।
विधिनानेन निःस्वोऽपि स्नानं तोयेन कारयेत्॥
नराणां विंशतिर्यावत् सोऽपि यास्यति तत्पदम्।
एवमेष हि धर्म्मस्य राशिर्म्मन्त्रविवर्जितः॥
मन्त्रयुक्तोऽर्चयेद् यस्तु तत्तुल्यो नास्ति धर्म्मवान्।

मन्त्रः शिवमन्त्रः। लिङ्गपुराणे,—

महास्नानञ्च यः कुर्य्याद् घृतेन दधिना ततः।
स याति मम सायुज्यं स्नानेष्वेतेषु [3]सुव्रत॥

---

(१) E. भोगानशेषतः।
(२) E. मुत्सृज्य॰
(३) E. सुव्रते।

स्नाने पलशतं ज्ञेयमभ्यङ्गे पञ्चविंशतिः।
द्वे सहस्रे पलानान्तु महास्नानं प्रकीर्त्तितम्॥
स्नाप्य लिङ्गं मदीयञ्च गव्येनैव घृतेन च।
विशोध्य सर्व्वद्रव्यैश्च तोयेनाप्यभिषेचयेत्॥
महास्नाने नियुक्ते तु स्नानमष्टगुणं स्मृतम्।
जलेन केवलेनैव गन्धतोयेन [1]शक्तितः॥
अनुलेपस्तु सर्व्वत्र पञ्चविंशपलेन वै।
शमीपुष्पञ्च विधिना विल्वपत्रञ्च पङ्कजम्॥
अथान्यानि च पत्राणि विल्वपत्राणि [2]संत्यजेत्।
दशद्रोणैश्च नैवेद्यं सप्तद्रोणैरथापि वा॥
शतद्रोणसमं पुण्यमाढ़केऽपि विधीयते।
वित्तहीनस्य विप्रस्य नात्र कार्य्या विचारणा॥
भेरीमृदङ्गमुरजविषाणपटहादिभिः।
वादित्रैर्विविधैश्चैतै[3]रन्योन्यैर्विविधैस्तथा॥

---

(१) E. भक्तितः।
(२) E. न त्यजेत्।
(३) E. रान्दोलै॰

अथ घृताभिषेकः ।

भविष्ये,— घृताभिषेकं यः कुर्य्यादहोरात्रं शिवस्य तु ।
सहस्रधारेण भाण्डेन पुष्यमासे द्विजोत्तम ॥
गीतनृत्योपचारेण शङ्खवादित्रनिःस्वनैः ।
कुर्य्याज्जागरणं चात्र प्रदीपाद्युपशोभितम् ॥
समस्तपापनिर्म्मुक्तः समस्तकुलवर्द्धनः ।
मुक्तः शिवपुरे नित्यं मोदते शिववत् सुखी ॥
ग्रहणे विषुवे चैव पुण्येषु दिवसेषु च ।
घृताभिषेकं यः कुर्य्यान्महापुण्यं समश्नुते ॥

अथ घृतधारा ।

कलिकापुराणे,—
अथार्घ्यं च सुगन्धेन विन्यसेद्‌ हेमपङ्कजम् ।
प्रत्यहं वाहयेद्‌ धारां यस्तु वै लिङ्गमूर्द्धनि ॥
उत्तरायणमासाद्य ज्ञात्वा संक्रमणं रवेः ।
तदन्ते विधिवत् पूज्य दद्याच्चैव उपस्करम् ॥
गृहं प्राप्य ततो भक्त्या ब्राह्मणान् यतिभिः सह ।
सम्भोज्य दक्षिणां दत्वा क्षमाप्य च विसृज्य च ।
दीनान्धदुःखितानाञ्च कल्पयेदनिवारितम् ॥
कीर्त्तिं लोकेऽतुलां प्राप्य भुक्त्वा भोगाननल्पकान् ।
प्राप्नुयात् परमं स्थानं रुद्रसायुज्यलक्षणम् ॥

अथ शिवप्रजागरः ।

शैवधर्म्मास्तत्वसारसंहितायाम्,—
भस्मपुण्ड्री भवेन्नित्यं शिवपूजापरायणः ।
सिद्धक्षेत्रनिवासी यः शैवीं सिद्धिमवाप्नुयात् ॥
तथा,— लिङ्गार्च्चनं रुद्रजपो व्रतं शिवदिनत्रये ।
वाराणस्याञ्च मरणं मुक्तिरेषा चतुर्विधा ॥
एकादश्यष्टमी चैव चतुर्द्दशी शिवप्रिया ।
तासामाद्यामुपवसेत् दिवा नाद्यात् तथा द्वयोः ॥
अत्र शिवप्रीत्यर्थमेकादशीव्रते शिवपूजाप्यङ्गम् ।

कालोत्तरे,—
दीक्षितानां क्रमेणैव शिवाचारो निगद्यते ।
किं वर्ज्यं किञ्च कर्त्तव्यं शिवमार्गे स्थितेऽप्यथ ॥
अष्टम्याञ्च चतुर्द्दश्यां पक्षयोरुभयोरपि ।
व्यतीपातेषु सर्व्वेषु दिनवृद्धौ दिनक्षये ।
संक्रान्तावयनाभ्यान्तु षड़शीतिमुखे तथा ॥
द्विगुणं पूजनं होमं जपं नक्तेन वर्त्तनम् ।
भीतेषु रक्षणं कार्य्यं वात्सल्यञ्च तपस्विसु ॥
कारुण्यं सर्व्वभूतेषु क्षमा सत्यमचापलम् ।
अनृतं गुरुदेवार्थे न दोषाय प्रकल्पयेत् ॥
रुद्राक्षकटकं कार्य्यं समञ्च विषमं दृढ़म् ।
एकत्रिपञ्चवदनं यथालाभन्तु धारयेत् ॥

द्वित्रिपञ्चमुखं शस्तमव्रणं तीक्ष्णकण्टकम् ।
दक्षवाहौ शिखायां वा धार्य्यं च चतुराननम् ॥
अधारणान्महादोषः सिद्धिस्तस्य सुदूरतः ।
रुद्राक्षं धारणीयन्तु दीक्षितैश्चाप्यदीक्षितैः ॥
नित्यं हेममयी धार्य्या मुद्रिका दक्षिणे करे ।
पद्मरागान्विता कार्य्या नीलेन रचिताऽथवा ॥
धार्य्ये विचित्रहेमाढ्ये कुण्डले रचनान्विते ।
शिवसंज्ञा द्विजस्यैव कवचाख्या नृपस्य च ॥
वैश्यानां शैवसंज्ञा च शूद्राणाञ्च गणान्वितम् ।
अनाथदुर्व्वलं भीतं दुर्गस्थं न परित्यजेत् ॥
गवामुत्थापनं कार्य्यं मग्नानां कर्द्दमादिषु ।
चोदको बोधकश्चैव मोक्षदस्तु तृतीयकः ॥
शिववत् पूजयेत् सर्व्वान् यत्र ते मोक्षदा नृणाम् ।
यः प्रेरयति जन्तूनां शिवे प्रोक्तः स चोदकः ॥
दीक्षागुरु र्मोक्षदस्तु बोधकः शास्त्रदर्शकः ।

तथा,—

स्नानं पूजा जपो ध्यानं होमश्चैव तु पञ्चमम् ।
इति नित्यं सदा कुर्य्यात् परशास्त्रं विवर्जयेत् ॥
पूजनीयो महादेवो नापरं मनसा स्मरेत् ।
न वामहस्ते पूजा तु कर्त्तव्या मनसा अपि ॥
वामहस्तेन लिङ्गन्तु न संस्पृश्यं कदाचन ।
वामाचारं न कर्त्तव्यं तत्र निन्दां च वर्जयेत् ॥

न निन्दाकारणं देवो न शास्त्रं शिवभाषितम् ।
शङ्करो नार्च्चितो यावत् तावन्नान्यत् समाचरेत् ॥
शिववत् शिवभक्तास्तु द्रष्टव्याः शिवमिच्छता ।
न शून्यमस्तकं लिङ्गं दृष्ट्वा यायात् कदाचन ॥

अथ विष्णुप्रदेयानि ।

नरसिंहे,—

वस्त्राभ्यामच्युतं भक्त्या परिधाप्य विचित्रतः ।
सोमलोके रमित्वा तु विष्णुलोके महीयते ॥

तथा,—

ध्वजञ्च विष्णवे यस्तु गरुड़ेन समन्वितम् ।
दद्यात् सोऽपि ध्वजाकीर्णविमानेन विराजता ।
विष्णुलोकमवाप्नोति सेव्यमानोऽप्सरोगणैः ॥
मुकुटैः कटकाद्यैश्च यो विष्णुं पूजयेन्नृप ।
सर्व्वपापविनिर्म्मुक्तः सर्व्वभूषणभूषितः ।
[1]रुद्रलोके वसेत् श्रीमान् यावदिन्द्राश्चतुर्द्दश ॥
यो गां पयस्विनीं विष्णोः कपिलां संप्रयच्छति ।
स सर्व्वपापरहितः सर्व्वभूषणभूषितः ।
गवां सहस्रदानस्य फलं प्राप्य हरिं व्रजेत् ॥

दद्यादित्यनुवृत्तौ विष्णुः,—न वासो नीलरक्तं न मणिसुवर्णयोः

---

(1) E. इन्द्रलोके ।

प्रतिरूपमलङ्करणम् ।

तथा,— शङ्खे कृत्वा तु पानीयं सपुष्पं सफलाक्षतम् ।
अर्घ्यं ददाति देवस्यससागरधराफलम् ॥
मधुपर्कं तथा दद्याद् दधि सर्पिस्तथा मधु ।
मधुपर्कस्य दानेन परं पदमिहाश्नुते ॥
उशीरकूर्चकं दत्वा सर्व्वपापैः प्रमुच्यते ।
दत्वा गोबालजं कूर्चं सर्व्वान् पापान् व्यपोहति ॥
शयनासनदानेन स्थितिं विन्दति शाश्वतीम् ।
उत्तरच्छददानेन सर्व्वान् कामानवाप्नुयात् ॥
वितानकप्रदानेन सर्व्वैः पापैः प्रमुच्यते ।
शुक्लवस्त्रप्रदानेन श्रियं प्राप्नोत्यनुत्तमाम् ॥
नीलरक्तं विनारक्तं शेषरक्तं द्विजोत्तमाः ।
दत्वा भवति धर्म्मात्मा सर्व्वव्याधिविवर्जितः ॥
अलोमानि च सूक्ष्माणि कौशेयानि मृदूनि च ।
यः प्रयच्छति देवाय सोऽश्वमेधफलं लभेत् ॥
त्रिवृद्वृत्तं सुपीतञ्च पट्टसूत्रादिनिर्म्मितम् ।
यज्ञोपवीतं गोविन्दे दत्वा गोदानगो भवेत् ॥
यज्ञोपवीतदानेन ब्रह्मदानफलं लभेत् ।
ग्रैवेयकप्रदानाच्च सर्व्वशास्त्रार्थविद् भवेत् ॥
कर्णाभरणदानेन भवेत् श्रुतिधरो नरः ।
अश्वमेधमवाप्नोति सौभाग्यञ्चैव विन्दति ।
मूर्द्धाभरणदानेन राजसूयफलं लभेत् ॥

दर्पणस्य प्रदानेन दर्पवान् उपजायते ।
राजा भवति लोकेऽस्मिन् छत्रं दत्वा द्विजोत्तम ॥
तालवृन्तप्रदानेन निर्वृतिं विन्दते पराम् ।
तथा चामरदानेन श्रीमान् भवति भूतले ॥
मुच्यते तु तथा पापै र्विष्णुलोकञ्च गच्छति ।
प्रदाय चामरवरं श्रद्धया विष्णवे नरः ।
परं पदमवाप्नोति यत् सुरैरपि दुर्लभम् ॥
पताकाञ्च शुभां दत्वा तथा केशवसद्मनि ।
सन्त्यज्य सकलं पापं वायुलोकञ्च गच्छति ॥
वाद्यं दत्वा तथा विष्णोर्मर्त्यलोके महीयते ।
वाद्यानामपि देवस्य तन्त्रिवाद्यं सदा प्रियम् ॥
किं वादित्रसहस्रैस्तु पुरतो वै ममाग्रतः ।
नागारिचिह्निता घण्टा प्राप्यते यदि कर्हिचित् ॥
नागारिचिह्नितां घण्टां रथाङ्गेन समन्विताम् ।
वादयन् कुरुते नाशं जन्ममृत्युसमुद्भवम् ॥
यस्तु वादयते घण्टां वैनतेयेन चिह्निताम् ।
धूपे नीराजने स्नाने पूजाकाले विलेपने ॥
ममाग्रे लभते पुण्यं चान्द्रायणशतोद्भवम् ।
वैनतेयाङ्कितां घण्टां सुदर्शनयुतां यदि ।
ममाग्रे स्थापयेद् यस्तु देहे तस्य वसाम्यहम् ॥
मम नामाङ्किता घण्टा मत्पुरो यदि तिष्ठति ।
अन्तिके वैष्णवे गेहे तत्र मां विद्धि दैत्यज ॥

मदीयार्च्चनवेलायां घण्टानादं शृणोति यः ।
नश्यन्ति तस्य पापानि शतजन्मार्जितान्यपि ॥
¹वृन्तं दत्वा तथाप्नोति चन्द्रलोकमसंशयम् ।
स्वयं वृन्तेन संयुज्य तस्यैवानुचरो भवेत् ॥
श्रद्दधानै र्भक्तिपरैः पात्राण्युद्दिश्य जनार्द्दने ।
अलेपान्यपि दीयन्ते अकूप्यानि विदुर्बुधाः ॥ (?)
माल्याधारं तथा दत्वा धूपाधारं तथैवच ।
गन्धाधारं तथा पीठं कामानां पात्रतां व्रजेत् ॥
गोदानानि पवित्राणि भूमिदानानि चानघ ।
वस्त्रान्नस्वर्णदानानि प्रीतये मधुघातिनः ॥
विष्णवे भोगमुद्दिश्य चैत्रं वा ग्राममेव वा ।
यो ददाति स पुण्यात्मा सर्व्वपापैः प्रमुच्यते ॥

विष्णुधर्म्मोत्तरे,—

सपुष्पैः सफलै र्वृक्षैः पूर्णं कृत्वा जलान्तिकम् ।
उद्यानैः पद्मिनीषण्डैराश्रमैश्च मनोरमैः ॥
जलाशयं तथा कृत्वा सर्व्वपापैः प्रमुच्यते ।
श्वेतद्वीपमवाप्नोति भुवो नावर्त्तते ततः ॥
देवाग्रे कारयेद् यस्तु रम्यामापणवीथिकाम् ।
राजा भवति लोकेऽस्मिन् विजितारिर्महायशाः ॥
नगरञ्च तथा दत्वा सायुज्यमधिगच्छति ।

(१) E. कृतं ०

विष्णोरायतने दत्वा तत्कथापुस्तकं नरः ।
ब्रह्मलोकमवाप्नोति बह्वन् वै वत्सरान् द्विज ॥

तत्कथापुस्तकं विष्णुपुराणादिरूपम् ।

स्वभूतं वाचकं कृत्वा देवागारे नरः सदा ।
विद्यादानफलं प्राप्य ब्रह्मलोके महीयते ॥
¹विष्णोर्गन्धप्रदानेन वारुणं लोकमश्नुते ।
सौभाग्यं महदाप्नोति किङ्किणीं प्रददन् नरः ॥
यानवाहनदानेन सर्व्वकामसुखी भवेत् ।
शिविकां ये प्रयच्छन्ति ते गच्छन्त्यमरावतीम् ॥
अश्वदाः सूर्य्यलोकस्था राजन्ते दिवि सूर्य्यवत् ।
करीन्द्रदानात् शक्रस्य पुरे स्थित्वा चिरं रमेत् ॥
दासं दत्वा सूर्य्यलोके तिष्ठेद् भूयो न जायते ।
दासीं दत्वा तथाप्नोति नात्र कार्य्या विचारणा ॥
गणिकां ये प्रयच्छन्ति नृत्यगीतविशारदाम् ।
सर्व्वद्वन्द्वविनिर्म्मुक्तास्ते प्रयान्त्यमरावतीम् ॥
राजलिङ्गानि दत्वा च राजा भवति भूतले ।

वामनपुराणे,—

प्रासादनगरादीनि गृहं प्राकारकान्वितम् ।
यद्यदिष्टतमं किञ्चिद् यच्चाप्यस्ति गृहे शुचि ॥
तत्तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे ॥

(१) E. विष्णोः शङ्खप्रदानेन ०

विष्णुधर्म्मे मान्धातारं प्रति वशिष्ठवाक्यम्,—

ससमृद्धिमिमां लब्ध्वा सर्व्वलोकेश्वरेश्वरम् ।
पूजयाच्युतमीशेशं तमाराध्य न सीदति ॥
पुष्पैः फलै र्धूपदीपैस्तथा वस्त्रानुलेपनैः ।
आराधयाच्युतं भक्त्या वेश्मसम्मार्जनादिना ॥
यद्यदिष्टतमं किञ्चिद् यद् यदत्यन्तदुर्लभम् ।
तत्तद् दत्वा जगद्धात्रे वैकुण्ठाय न सीदति ॥
सुगन्धागुरुकर्पूरचन्दनक्षोदकुङ्कुमैः ।
वासोभि र्विविधै र्धूपैः पुष्पस्रक्चामरै र्ध्वजैः ॥
अन्नोपहारै र्विविधै र्घृतक्षीराभिषेचनैः ।
गीतवादित्रनृत्याद्यै स्तोषयित्वाच्युतं नृप ॥
पुण्यरात्रिषु गोविन्दं नृत्यगीतरवोज्ज्वलैः ।
भूप जागरणै र्भक्त्या तोषयाच्युतमव्ययम् ॥

स्कान्दे,—

सनीरं कर्पूरोपेतं कुम्भं कृत्वाऽग्रतोन्यसेत् ।
कल्पान्तं न जलाकाङ्क्षां कुर्व्वन्ति पितरस्तथा ॥
यः कुर्य्यात् कृष्णभवनं कदलीस्तम्भभूषितम् ।
कुरुते चामरैर्युक्तः स्वागतं तस्य देवराट् ॥
कृष्णालयं प्रकुरुते पताकैरुपशोभितम् ।
स दर्शे सूर्य्यलोके तु रमेद् यावच्च मेदिनी ॥
ध्वजमारोपयेद् यस्तु प्रासादोपरि भक्तितः ।
तस्य ब्रह्मपदे वासः क्रीड़ते ब्रह्मणा सह ॥

[१]भूप चन्दनमालाञ्च कुरुते कृष्णसद्मनि ।
देवकन्यायुतैर्लक्षैः सेव्यते सुरनायकः ॥

चन्दनमाला पत्रपुष्पकृतमाला ।

प्राङ्गणं वर्णकोपेतं स्वस्तिकैश्च समन्वितम् ।
देवदेवस्य कुरुते क्रीड़ते भुवनत्रये ॥
प्रासादे देवदेवस्य चित्रकर्म्म करोति यः ।
वसते रुद्रलोके तु यावत्तिष्ठन्ति भूधराः ॥
दद्याच्चन्द्रातपं यस्तु कृष्णोपरि नरेश्वर ।
वसते सोमलोके तु यावत्तिष्ठति द्वारका ॥
दद्यान्नवं विमानन्तु विष्णवे नरनायक ।
सत्कृतो धनदेनैव वसते ब्रह्मवासरम् ॥

आदित्यपुराणे,—

लेपनाच्छादनञ्चैव यः करोति पुनर्नवम् ।
देवस्यायतने तस्य न भवेत् कीटजं भयम् ॥

देवगृहाधिकारे यमः,—

विधाय विविधं चित्रं तल्लोकं विन्दति ध्रुवम् ।

विष्णुः,—यस्य देवस्यायतनं करोति तस्यैव लोकमाप्नोति सुधासितं कृत्वा यशसा विराजते ।

---

(१) E, यूपं चन्दन ०

अथ महास्नानम् ।

महास्नानेन गोविन्दं सम्यक् संस्नाप्य मानवः ।
सर्व्वान् कामानवाप्नोति नात्र कार्य्या विचारणा ॥
उत्तमं स्नपनं कार्य्यं सर्व्वदोषोपशान्तये ।

तद्विधिः,—

अस्त्रेण रचयेद् दुग्धं कवचेनावगुण्ठयेत् ।
अमृतीकरणं कृत्वा वासुदेवेन मन्त्रयेत् ॥
अभिषेकञ्च मूलेन गडुकानां ततो भवेत् ।
अर्घ्यादिधूपपर्य्यन्तं ततो विष्णुं समर्च्चयेत् ॥

एवं दध्यादितिमन्त्रे विशेषः । दधि सङ्कर्षणेन । घृतं प्रद्युम्नेन । मधु अनिरुद्धेन । खण्डं नारायणेन । ॐ नमो भगवते वासुदेवाय । आं नमो भगवते सङ्कर्षणाय आं नमः । आं नमो भगवते प्रद्युम्नाय आं नमः । ॐ नमो भगवते अनिरुद्धाय ॐ नमः । ॐ ॐ नमो भगवते नारायणाय ॐ ॐ नमः । तथा,—

सर्पिःपलसहस्राणां गोविन्दस्य शिवस्य वा ।
महास्नानं नरः कृत्वा सर्व्वपापैः प्रमुच्यते ॥

बृहत्कालोत्तरे,—

पयोदधिघृतानाञ्च सहस्राष्टोत्तरद्वयैः ।
महास्नानं पलानाञ्च [1]तिलानामपि तत्समम् ॥

तथा,—महास्नाने प्रसक्ते तु स्नानमष्टविधं स्मृतम् ॥

(१) E. जलानामपि ०

स्वच्छं हैमं सुगन्धञ्च सरत्नफलपुष्पकम् ॥
सर्व्वौषधिजलञ्चान्यत् स्नापयेत् क्रमशः शुचिः ।

अन्यदिति जलान्तरमष्टविधत्वाय ।

अत्र यद्यपि,—

पलानां द्वे सहस्रे तु महास्नाने प्रकीर्त्तिते ।

इति पञ्चद्रव्येण मिलित्वा सहस्रद्वयमिति प्रतीयते तथापि "सहस्राष्टोत्तरद्वयै"रिति बहुवचनात् "[1]तिलानामिति तत्सम"मिति [2]तिलाष्टकेऽपि सहस्रद्वयविधानाच्च प्रत्येकं सहस्रद्वयम् । केवलदुग्धादिमहास्नाने सहस्रद्वयमेव । तत्राप्यष्टद्रव्यस्नानमङ्गत्वादेतदङ्गभूतनारिकेलोदकादिस्नानं शतपलेन । हेमाद्युदकानि तत्तद्द्रव्ययोगेन । मुरामांस्यादि सर्व्वौषधिगणः । गन्धोदके सर्व्वगन्ध इत्याहुः । चन्दनक्षीवेरागुरुकुष्ठकुङ्कुमोशीरजटामांसीमुरा इति ।

महास्नानप्रयोगः ।

सार्व्वभौमत्वकामः परमैश्वर्य्यकामो ग्रहशान्तिकामो महारोगोपशमनकाम [3]उपद्रवनिवृत्तिकामो वा विष्णुमूर्त्तौ महास्नानमहं करिष्ये इति स्वस्ति वाच्य संकल्प्य वैकल्पिकाच्छिद्रावधारणं कृत्वाचार्य्यं वृणुयात् ।

(१) E. जलाना ०

(२) E. जलाष्ट ०

(३) E. राजाग्निचौरदुर्भिक्षाद्यन्यतमोपद्रवनिवृत्तिकामो वा ।

अथाचार्य्यो द्वारपालपूजां कृत्वा देवगृहे प्रविश्य पञ्चोपचारेण देवं सम्पूज्य प्राणानायम्य देव त्वां स्नानमण्डपं नयामीति विज्ञाप्य तूर्य्यघोषपूर्व्वकं देवं स्नानमण्डपं नीत्वा तत्र धूपामोदं वितानबन्धनं फलपल्लवपुष्पयुक्तकुम्भचतुष्कस्थापनञ्च कृत्वा गीत नृत्ये कृत्वा दीपवृक्षत्रयमुच्छ्रित्य देवदक्षिणे अष्टाधिकशतपल-तैलपात्रे रक्तवस्त्रं प्रज्वाल्य वामे साष्टशतपलघृतपात्रे शुक्लवस्त्रञ्च प्रज्वाल्य परितोऽष्टाधिकशतदीपानभितः प्रज्वाल्य स्नानीय-द्रव्याणि सन्निधाप्य स्वासने उपविश्य भावनाचतुष्टयान्तं समन्त्र-न्यासं कृत्वा स्नपनीयमूर्त्तिं ध्यात्वा सामान्यार्घ्यं संस्कृत्य स्नानो-पयोगि सर्व्वं प्रोक्ष्य पञ्चोपचारैर्देवं सम्पूज्य

गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम्।
आप्यायस्वेति वै क्षीरं दधिक्राव्णेति वै दधि।
तेजोऽसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकम्॥

इति पञ्चगव्यं गृहीत्वा प्रणवेनैकीकृत्य मूलेनाभिमन्त्र्य तेनैव हृदा वा स्नपनम्। अन्तरा शुद्धोदकपलशतेन स्नपनम्। सर्व्वत्रान्त-रास्नानं पलशतेन। मूलेन कुशोदकमभिमन्त्र्य हृदा स्नपयित्वा अन्तरा स्नानं कृत्वा पञ्चोपचारैः सम्पूज्य मूलाभिमन्त्रितघृतपञ्च-विंशतिपलेन मूलेनाभ्यङ्ग्य अन्तरा संस्नाप्य मूलाभिमन्त्रितशालि-पलशतेन मूलेनोद्वर्त्त्यान्तरा स्नानं कृत्वाऽस्त्रेण राजिकाभिः सिद्धार्थैश्च निर्मथ्य मूलाभिमन्त्रितपञ्चविंशतिपलशुद्धामलकेनानुलिप्यान्तरा संस्नाप्य यवचूर्णेन विरूक्ष्यान्तरा संस्नाप्यार्घ्यादिधूपान्तैः संपूज्य शालिपिष्टमयसप्तवर्त्तिकदीपेन नीराज्योदकैः संस्नाप्य विशेषार्घ्यं

संस्कृत्य अष्टोत्तरसहस्रद्वयपलपरिमितक्षीरं संस्कुर्य्यात्। क्षीरमर्घ्या-म्बुना प्रोक्ष्य गन्धपुष्पाभ्यामभ्यर्च्यास्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनु-मुद्रयामृतीकृत्य ॐ नमो भगवते वासुदेवाय ॐ नम इत्यभिमन्त्र्य सुवर्णादिपात्रे कृत्वा देवं स्नानोत्सुकं विचिन्त्य मूलमन्त्रमुच्चार्य्य श्रीकृष्णं स्नपयामीति स्नपयेत्। कर्षाधिकषट्पलमितहेमादि-निर्म्मितजलपलचतुष्टयग्राहिगड्डुकेनाष्टोत्तरशतवारं मूलेन स्नप-नम्। धूपान्तैः सम्पूज्याष्टोत्तर[1]सहस्रद्वयपलदधिसंस्कारः। दधि प्रोक्षणादिभिः संस्कृत्य ॐ नमो भगवते सङ्कर्षणाय आं नम इत्यभिमन्त्र्य पूर्व्ववद्दध्ना स्नानं मूलेन। गड्डुकस्नपनं पूर्व्ववत्। धूपान्तपूजा। [2][अष्टोत्तरसहस्रद्वयपलमिताज्यं प्रोक्षणीभिः संस्कृत्य नमो भगवते प्रद्युम्नाय नम इत्यभिमन्त्र्य मूलेन स्नप-नम्।] अष्टोत्तरसहस्रद्वयपलमितखण्डमिक्षुरसं वा प्रोक्षणा-दिभिः संस्कृत्य ॐ नमो भगवते नारायणाय ॐ नम इत्यभिमन्त्र्य मूलेन स्नपनम्। गड्डुकस्नानं धूपान्तपूजा पूर्व्ववत्। इति प्रधानस्नानम्।

ततोऽष्टोत्तरशतपलमितनारिकेलोदकं संस्कृत्य मूलेनाभिमन्त्र्य तेनैव स्नपनम्। अन्तरा शुद्धोदकस्नपनम्। पञ्चविंशतिपलमित-यवगोधूमचूर्णाभ्यां विरूक्ष्य शुद्धोदकेन संस्नाप्य पञ्चविंशति-पलमितामलकेनानुलिप्योष्णोदकशीतोदकाभ्यां संस्नाप्य पञ्च-विंशतिपलमितविल्वपत्रेण संघृष्य शुद्धोदकेन स्नपयित्वा पञ्च-

(१) E. शतद्वय०

(२) D. Omits the portion bracketed.

विंशतिपलमितचन्दनेनानुलिप्य शुद्धोदकेन संस्नाप्य धूपान्तैः सम्पूज्याष्टोत्तरशतपलमितेक्षुरसं संस्कृत्य मूलेनाभिमन्त्र्य तेनैव स्नपयित्वा शुद्धोदकेन स्नपयेत् ।

अथाष्टविधजलस्नानम् ।

धूपान्तैः सम्पूज्याष्टाधिकसहस्रद्वयपलमितस्वच्छजलं संस्कृत्य मूलेनाभिमन्त्र्य तेनैव स्नपयित्वा शुद्धोदकेन स्नपयेत् ।

धूपान्तैः सम्पूज्याष्टाधिकसहस्रद्वयपलमितहिरण्योदकं संस्कृत्य मूलेनाभिमन्त्र्य तेन संस्नाप्य शुद्धोदकेन स्नपयेत् ।

धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलमितसुगन्धोदकं संस्कृत्य मूलेनाभिमन्त्र्य तेन संस्नाप्य शुद्धोदकेन स्नपयेत् ।

धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलमितरत्नोदकं संस्कृत्य मूलेनाभिमन्त्र्य तेनैव संस्नाप्य शुद्धोदकेन स्नपयेत् ।

धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलमितजातिफलोदकं संस्कृत्याभिमन्त्र्य संस्नाप्य शुद्धोदकेन स्नपयेत् ।

धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलपरिमितपद्मजातिमल्लिकापुष्पोदकं संस्कृत्य तेनाभिमन्त्र्य स्नपयित्वा शुद्धोदकेन स्नपयेत् ।

धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलमितसर्व्वौषधिजलं संस्कृत्य मूलेनाभिमन्त्र्य तेन संस्नाप्य शुद्धोदकेन स्नपयेत् ।

धूपान्तैः सम्पूज्याष्टोत्तरसहस्रद्वयपलमितशुद्धोदकं संस्कृत्याभिमन्त्र्य तेन संस्नाप्य तोयेन स्नपयेत् ।

इत्यष्टविधस्नानम् ।

अथ सुवर्णाद्यन्यतमकलशे वस्त्रपूतमष्टोत्तरशतपलपरिमितं जलं जलदैवतैर्मन्त्रैः पूरयित्वा कुशापामार्गकर्पूरजातीचम्पकपाटलासितकरवीरमल्लिकाकमलोत्पलचन्दनागुरुकुङ्कुमादिकं प्रक्षिप्यानुष्टुप् नारसिंहमन्त्रराजं विन्यस्य मूलेनाभिमन्त्र्य तेन स्नपयेत् । पुरुषसूक्तेन तीर्थोदकेन स्नपयेत् । [1][प्रणवेन शुद्धोदकेन स्नपयेत् ।] सुसूक्ष्मवस्त्रेणाङ्गप्रोञ्छनम् । कर्पूरादियुक्तचन्दनानुलेपनम् । वस्त्रद्वयपरिधानम् । स्वर्णपद्मदानम् । सूक्ष्मसुगन्धिपुष्पमालादानञ्च कृत्वा पुष्पाञ्जलिं दत्वा विलोमार्घ्यंजपस्तुतिप्रणामफलसमर्पणोद्वासनानि कृत्वाऽच्छिद्रावधारणं कृत्वा पूजागारे देवं स्थापयेत् ।

ततो महास्नानाङ्गत्वेन महापूजा ।

पञ्चविंशतिपलमितेन गन्धेनानुलेपनं धूपो दीपश्च इति महापरिमाणः । नीलोत्पलबिल्वपत्रपद्मचम्पकादिनानाविधपुष्पाणि नेत्रपटादिदिव्यवस्त्रम् । भक्ष्यभोज्यपेयादिनानाविधनैवेद्यम् । दशद्रोणमितमन्नं सप्तद्रोणमितं वा । असम्भवे आढकमितम् । दर्पणच्छत्रचामरादिनानाविधराजोपचाराः । इत्येवं पूजासमाप्तावाचार्य्यदक्षिणा ।

इति बृहत्कालोत्तरोक्तविष्णुमहास्नानविधिः ।]

---

(१) D. Omits the portion bracketed.

अथ वैष्णवदीक्षा [1]वराहपुराणोक्ता ।

[2][तथाच वराहे]

दीक्षितात्मा [3]गुरौ भूत्वा वाराहं शृणुयाद् यदि ।
तेन [4]वेदाः पुराणानि सर्व्वे मन्त्राः ससंग्रहाः ॥
जप्ताः स्युः पुष्करे तीर्थे प्रयागे सिन्धुसागरे ।
देवहृते कुरुक्षेत्रे वाराणस्यां विशेषतः ॥
ग्रहणे विषुवे चैव यत् फलं जपतां भवेत् ।
तत्फलं द्विगुणं तस्य दीक्षितो यः [5]शृणोति च ॥
देवा अपि तपः कृत्वा ध्यायन्ति च वदन्ति च ।
कदा नो भारते वर्षे जन्म स्याद् भूतधारिणि ॥
दीक्षिताश्च भविष्यामो वराहं शृणुमः कदा ।
वाराहं षोड़शात्मानं त्यक्त्वा देहं [6]कदा पुनः ॥
यास्यामः परमं स्थानं यद्गत्वा न पुनर्भवेत् ।

वाराहं षोड़शात्मानं षोड़शाक्षरवराहमन्त्रः ॥

तथा,—एवं योऽर्चति तत्त्वेन [7]यश्च पश्यति मण्डलम् ।

(१) Y. वराहपुराणे ।
(२) Y. Omits the portion bracketed.
(३) Y. गुरोर्भूत्वा ।
(४) Y. वेदपुराणानि॰
(५) D. शृणोति नः ।
(६) Y. पुनः कदा ।
(७) Y. ये च पश्यन्ति मण्डलम् ।

यश्चेमं शृणुयाद् देवि सर्व्वे मुक्ता इति श्रुतिः ॥

योऽर्चतीति दीक्षार्चनानुवादः। दीक्षितस्य वराहश्रवणाच्च मुक्तिः फलम्। वराहश्रवणस्य च दृष्टे सत्यदृष्टकल्पनानुपपत्तेः। वराहोक्तवैष्णवधर्म्मानुष्ठानद्वारेण वराहश्रवणं मुक्त्यर्थम्। तेन दीक्षितस्य वराहोक्तवैष्णवधर्म्मानुष्ठानाधिकारः। अतएव द्वात्रिंशदपराधे "अस्माकं यः प्रपद्यते" "शुद्धो भागवतः शुचिः ।"

"पश्चाद्धौतेन वस्त्रेण मम कर्म्माणि कारयेत् ।"

[1]पूजायाश्च तत्र "मम भक्तेन नित्यशः" इत्यादि कीर्त्तनम्। दीक्षारहितानां वराहोक्तवैष्णवधर्म्मानुष्ठानेन यथोक्तं फलम्। किन्तु [2]स्मृत्यन्तरोक्तधर्म्मसमानमेव फलम्। यद्यपि दीक्षा मुक्तिफला तथापि वैष्णवाधिकारसम्पादनमपि संयोगपृथक्त्वात्। तद्यथा उपनयनादिसंस्कारस्याष्टाचत्वारिंशत्संस्कारमध्ये पठितस्य "ब्रह्मभूयाय कल्पते" इति ब्रह्मभावरूपमोक्षफलकत्वेऽपि वैदिककर्म्माधिकारसम्पादकत्वम् ।

दीक्षाक्रमः ।

शुद्धकाले कार्त्तिकशुक्लद्वादश्यां मासान्तरीयद्वादश्यां संक्रान्तिग्रहणयोर्वा दीक्षा कार्य्या। संवत्सरं गुरुमुपासीनाः शौचाचारविष्णुभक्तियुक्ततया गुरुणा परीक्षिता ब्रह्मक्षत्रविशोऽधिकारिणः। संवत्सरान्ते कार्त्तिकशुक्ल[[3]दशम्यां मासान्तरीयशुक्ल]दशम्यां वा

(१) Y. शुचिर्भागवतो भूत्वा पूजायाश्च तत्र॰
(२) Y. स्मृत्युक्तधर्म्मः॰
(३) Y. Omits the portion bracketed.

संक्रान्तिग्रहणपुण्यकालात् पूर्व्वं तृतीयदिने वा प्रातः शिष्यः शिष्यबहवो वा प्रातर्नित्यकृत्यानन्तरं गणपत्यादिपूजास्वस्तिवाचनपूर्व्वकं मम मोक्षप्राप्तये ऐहिकपुत्रधनादिसमृद्धिपूर्व्वकमोक्षप्राप्तये वा गुरुद्वारा दीक्षाभिषिककर्म्म कुर्व्वीयेति संकल्प्य गुरुं प्रार्थयेयुः,—

भगवंस्त्वत्प्रसादेन संसारार्णवतारण ।
इच्छामस्त्वैहिकीं भक्तिं विशेषेण तपोधन ॥

इति सम्प्रार्थ्य वस्त्रकाञ्चनादिभिः सम्पूज्य दीक्षाकर्म्मणि गुरुर्भवेति वृणीयुः । तद्दिने द्वयोरेकभक्तम् । सायं सन्ध्यानन्तरं मूलमन्त्रेणाभिमन्त्र्य गुरुणा दत्तेन दन्तकाष्ठेन शिष्यस्य दन्तधावनम् । रात्रौ हरिं स्मृत्वा देवगृहे शयनम् । स्वप्नपरीक्षा । प्रातः स्वप्नस्य गुरवे निवेदनम् । अशुभस्वप्ने मूलमन्त्रस्य शतं सहस्रं वा गुरोर्जपः । एकादश्यां गुरुशिष्ययोरुपवासः । संक्रान्तिग्रहणपक्षे [1]पूर्व्वदिने उपवासः । द्वादश्यां संक्रान्तौ पुण्यकाले ग्रहोपरागसमये वा स्नात्वा गुरोर्देवालये प्रवेशः उपलिप्तभूमौ बद्धविताने पुष्पमालादिभिरलङ्कृते षोड़शारचक्रनवनाभिनवमण्डलाष्टदल[2]पद्मानामन्यतमस्य लिखनम् । तत्र प्रागाद्यष्टदिक्षु मध्ये च नवकलशस्थापनम् । कलशाः पञ्चरत्नपञ्चपल्लववस्त्रयुगगन्धमाल्यदध्यक्षतसप्तमृत्तिकातीर्थोदकयुक्तास्तण्डुलफलयुक्तसरावापिहितमुखाः । शुक्लवस्त्रबद्धनेत्राणां शिष्याणां गुरोरनुज्ञया प्रवेशः । पूर्व्वाद्यष्ट-

(१) Y. तत्पूर्व्वदिने ॰
(२) Y. पद्मनवनाभान्यतमस्य लिखनम् ।

कलशेषु स्वस्ववैदिकमन्त्रेण वा शक्रादिलोकपालपूजा । मध्ये मूलमन्त्रेण विष्णोरभीष्टमूर्त्तिपूजा । मध्यकुम्भपूर्व्वादिषु बलप्रद्युम्नानिरुद्धवासुदेवानां क्रमेण पूजनम् । ईशाने शङ्खस्य आग्नेये चक्रस्य याम्ये गदाया वायव्यां पद्मस्य नैर्ऋत्यां मुषलस्य दक्षिणे गरुड़स्य वामे लक्ष्म्या देवस्याग्रतो [1]धनुःश्रीवत्सकौस्तुभानां पूजनम् । विष्णुपूजावरणपूजाकाले पूजनं वाऽमीषाम् । ततो गुरुप्रेरितानां शिष्याणां पूजामण्डलदर्शनम् । पुष्पाञ्जलिदानपूर्व्वकं प्रणामः । मण्डलोत्तरे शिष्यस्य शिष्याणां वा क्रमेणोपवेशनम् ।

अथाभिषेकः ।

प्रथमं वैष्णवकुम्भेन तत इन्द्रादिकुम्भैः । एकस्य नवभिः स्नपनं कृत्वा [2]तैरेवान्यस्य । वर्णक्रमेण [3]अभिषेकमन्त्रानुक्तौर्मूलमन्त्रः । अत्र गुणफलानि,—वैष्णवकुम्भस्नाने मोक्षः । ऐन्द्रघटे श्रीः । आग्नेये जयः । याम्ये अपमृत्युजयः । नैर्ऋत्ये दुष्टध्वंसः । वारुणे शान्तिः । वायव्ये पापक्षयः । कौवेरे द्रव्यम् । ऐशाने ज्ञानम् । सर्व्वकुम्भस्नानस्य संयोगपृथक्त्वेन विष्णुसायुज्यं इह राज्यं वा गुणफलम् । परिहितशुक्लवस्त्रयुगबद्धनेत्रं मण्डल-

(१) Y. धेन्वाः श्रीवत्सस्य कौस्तुभस्य च पूजनम् ।
(२) Y. तैरेवान्येषाम् ।
(३) Y. अभिषेकमन्त्रान्तरानुक्तौ मूलमन्त्रः ।

दक्षिणेन प्रवेश्य तद्देहस्थभूतानि रमित्यग्निबीजोत्थेनाग्निना दग्धानि यमिति वायुबीजोत्थवायूद्भूतानि वमिति सोमबीजोत्थजलाप्यायितानि विचिन्त्य प्रणतं प्रह्वीभूतं समयान् श्रावयेत्। ब्राह्मणवेदविष्णुब्रह्मरुद्रादित्याग्निलोकपालग्रहगुरुवैष्णवपूर्व्वदीक्षितानां मानना कार्य्या कदापि निन्दा न कार्य्येति। मण्डले भगवन्तं ॐनमो भगवते विष्णवे सर्व्वरूपिणे हमिति षोड़शाक्षरमन्त्रेण पूजयेत्। अस्य पृथिवी ऋषिरनुष्टुप् छन्दो वराहो विष्णुर्देवता। स्थण्डिलेऽग्निमुपसमाधायाज्यभागान्तं कृत्वा शिष्यदेहे मं नमः पराय [1]जीवात्मने नम इत्यादिरूपद्वात्रिंशत्तत्त्वन्यासं कृत्वा मं नमः पराय जीवतत्त्वात्मने [2]स्वाहा इत्यादि द्वात्रिंशन्मन्त्रैर्जुहुयात्। ततः स्वाहान्तषोड़शाक्षरमन्त्रेण सहस्रं शतं वा हुत्वा तेनैव मन्त्रेण शिष्यस्य गर्भाधानादिविवाहान्तकर्म्मनिमित्तं प्रत्येकं तिस्रस्तिस्र आहुतीर्हुत्वा होमशेषं पूर्णाहुत्यन्तं समाप्य पापनिराकरणबुद्ध्या शिष्यस्य नेत्रबन्धमपनीय ज्ञानरूपहस्तशलाकया नेत्रमुन्मील्य पुष्पाञ्जलिं ग्राहयित्वा

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

इति दत्तपुष्पाञ्जलिं भद्रपीठे उपवेश्य तदन्तिके स्वयमुपविशेत्। शिष्यस्यागृहीतमन्त्रत्वे तत्रैव मन्त्रदानं समाचरात्। तच्चैवम्,—

(१) Y. जीवतत्त्वात्मने नमः इत्यादि रूपेण द्वात्रिंशत्०
(२) Y. स्वाहेति द्वात्रिंशन्मन्त्रैर्जुहुयात्।

गुरुः सुषुम्नान्तर्गतां [1]चित्शक्तिं स्वनासाद्वारानिर्गतां शिष्यनासाद्वारा शिष्यसुषुम्नागतां विचिन्त्य स्वहृदयाच्च मन्त्रवर्णमालारूपेण चिन्मयस्फुलिङ्गमालां शिष्यमुखे प्रविष्टां विचिन्त्य कर्णे [2]त्रिर्मन्त्रं श्रावयेत्। पश्चादर्घ्योदकमादाय इदममुकार्षममुकच्छन्दममुकदैवतं मन्त्रममुकशिष्याय तुभ्यं ददे अद्य आवयोः समानफलदोऽस्त्विति हस्ते जलं दद्यात्। शिष्यगुरुदेवतामन्त्राणामैक्यं ध्यात्वा अष्टकृत्वः शतकृत्वो वा जपेत्। [3]ब्रह्मदक्षिणा गुरुणा होमान्ते दीयते [4]गुरवे हस्त्यश्वरथहेमकटकग्रामादिकमुत्तमदक्षिणा। मध्यमदक्षिणा तदर्द्धं गोमिथुनं हिरण्यं कन्याः सदक्षिणा वा दत्वा यावज्जीवं विष्णुं पूजयिष्यामीति संकल्प्य गुरूक्तदिशा सम्पूज्य पूजितदेवतानामग्नेश्च गुरुणोद्वासने कृते ब्राह्मणान् भोजयित्वा यागोपकरणं गुरवे दत्वा पुनः पुनः गुरुं प्रणम्याच्छिद्रमवधार्य्य यावज्जीवं सभार्य्यापत्यबान्धवो विष्ण्वेकशरणस्तिष्ठेत्। इदञ्च पुत्रकामेन श्रीकामेन व्याधिनाशकामेनापि कर्त्तव्यम्।

इति वराहपुराणीयवैष्णवदीक्षा।

(१) Y. काञ्चित् शक्तिम्।
(२) Y. निर्मितं श्रावयेत्।
(३) Y. जयदक्षिणा।
(४) Y. Reads भगवन्नामपूर्व्वकस्वनामाद्यक्षरयुक्तनामकरणं श्रीकृष्णदासोऽसीति। गुरवे ०

शिष्टाः पठन्ति,—

तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः ।
एते वै पञ्च संस्कारा यस्याऽसौ वैष्णवो भवेत् ॥

तापस्तप्तमुद्राधारणम् । पुण्ड्रं तिलकम् । नाम दीक्षाकालीनम् । यागो दीक्षा ।

तप्तमुद्राविधिश्चैवं [1]नवप्रश्नपञ्चरात्रे,—

सौवर्णं राजतं ताम्रं कांस्यमायसमेव च ।
चक्रं कृत्वा तु मेधावी [2]धारयेत्तु विचक्षणः ॥

चक्रमायुधम् । ब्रह्माण्डे,—

आयुधैर्वैष्णवैः शैवैस्तापितैः स्वतनुं यदि ।
चिह्नयेद् वैष्णवो यस्तु स याति परमां गतिम् ॥

वाराहे,—

शङ्खचक्राङ्कितं कुर्य्यादात्मानं बाहुमूलयोः ।
कलत्रापत्यभृत्येषु पश्वादिषु च सम्पदि ॥
म्लेच्छदेशेऽशुभे वापि चक्राङ्को यत्र तिष्ठति ।
योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे ॥

तत्र शङ्खचक्रगदापद्मखड्गशार्ङ्गशरान् स्वर्णाद्यन्यतमधातुना निर्म्माय स्वनाममन्त्रेण प्रतिष्ठां कृत्वा पूजयित्वाऽग्निमुपसमाधायाभ्यर्च्याज्यभागान्तं हुत्वा "इदं विष्णुः, विष्णोरराटं, [3]अतो देवा अवन्तु

(१) Y. ततः प्रश्नपञ्चरात्रे ।
(२) Y. धारयेच्च विचक्षणः ।
(३) D. ततोदेवा अवन्तु मः ।

नः, नारायणाय विद्महे," इत्येतैर्हुत्वा उदीच्याङ्गं समाप्याग्नौ शङ्खचक्रादीनि निक्षिपेत् । स्वस्ति वाच्य तप्तं चक्रमादाय "सुदर्शन महाज्वाल"इत्यादिपूर्व्वोक्तमन्त्रेण दक्षिणबाहौ चिह्नयेत् । "पाञ्चजन्य निजध्वान"इत्यादिमन्त्रेण [1]वामबाहुं शङ्खेन चिह्नयेत् । "संसारभयभीतानां" इत्यादिमन्त्रेण यत्र क्वापि पद्मेन अङ्कयेत् "ब्रह्माण्ड भुवनारम्भ"इत्यादि गदामन्त्रेण ललाटे गदां चिह्नयेत् ।

शार्ङ्गधारणसंयुक्त [2]ज्वालार्कसदृशप्रभ ।
संसारभयमध्यस्थं रक्ष मां त्वां नमाम्यहम् ॥

इति शिरसि शार्ङ्गचिह्नम् । नन्दकाय नम इति हृदये खड्गचिह्नम् । धारणान्तरमेवं ब्रूयात्

पुत्रमित्रकलत्रादि यः कश्चिन्मत्परिग्रहः ।
सह देवेन सर्व्वोऽसौ विष्णुप्रीत्यै मयाऽर्पितः ॥
पश्चात्तु धर्म्ममास्थाय तिष्ठेदाजीवनं बुधः ।
नान्यदेवं नमस्कुर्य्याद् वैष्णवो न च पूजयेत् ॥
नान्यप्रसादं गृह्णीयात् नान्यनाम प्रकीर्त्तयेत् ।

फलञ्च—

कुलकोटिं समुद्धृत्य विष्णुलोके महीयते ।

तत्त्वसारसंहितायाम्—

अधुना तव वक्ष्यामि वैष्णवं कल्पमुत्तमम् ।
देहे पुण्ड्रं सदा कुर्य्याच्चतुर्द्दश विधानतः ॥

(१) Y. वामबाहौ ।
(२) D. भूलोकसदृशप्रभ ।

शिरोललाटयोस्तद्वद् बाह्वोश्च हृदये तथा ।
दक्षवक्षस्थले ग्रीवामूले तद्दक्षवामयोः ॥
कुक्षिपक्षद्वये नाभौ ग्रीवाजठरवामतः ।
चन्दनेनाथवा कार्य्यं तीर्थजालमृदापि वा ॥
तुलसीजटया 'वापि कार्य्यं सर्व्वसुरेश्वर ।
लिखेद् देहे तु राजेन्द्र मूलमन्त्राभिमन्त्रितम् ॥

अङ्गुष्ठेन पुष्ट्यै भुक्त्यैत्वनामिकया मध्यमया वश्यार्थी न कदाचित् तर्जनीकनिष्ठाभ्याम् ।

तद्भक्तसङ्गसेवी स्यात्सदा कृष्णपरायणः ।
अर्चयेद्धरिमुद्दिश्य चतुर्भुजमहर्निशम् ॥
विष्णूपयुक्तवस्तूनि दापयित्वोपजीवयेत् ।
वैष्णवी या तिथिः शक्र सोपोष्या सर्व्वदेव हि ॥
प्राप्नोति महतीं भक्तिं विष्णुमेवाधिगच्छति ।

विष्णुधर्म्मे प्रह्लादवाक्यम् —

किंलक्षणा भागवता भवन्ति पुरुषा गुरो ।
यच्च भागवतैः कार्य्यं तन्मे कथय भार्गव ॥

शुक्र उवाच,—

कर्म्मणा मनसा वाचा प्राणिनां यो न हिंसकः ।
भावभक्तश्च गोविन्दे दैत्य भागवतो हि सः ॥

---

(१) Y. चैव ० ।

भावभक्तस्तद्विषये प्रेमवान् ।

यो ब्राह्मणांश्च देवांश्च नित्यमेव न निन्दति ।
न च द्रोग्धा परस्वानां दैत्य भागवतो हि सः ॥
सर्व्वान् देवान् हरिं वेत्ति सर्व्वलोकांश्च केशवम् ।
तेभ्यश्च नान्यमात्मानं दैत्य भागवतो हि सः ॥

तथा,—यः कारयति देवार्चां हृदयालम्बनां हरेः ।
पुष्पाणि च सुगन्धीनि मनोज्ञानि च यः पुमान् ।
प्रयच्छति हृषीकेशे स भागवत उत्तमः ॥

महाभारते,—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥
उदाराः सर्व्व एवैते ज्ञानीत्वात्मैव मे मतम् ।

तथा,—मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्द्ध्वं न संशयः ॥
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्म्मपरमो भव ।

तथा,—यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी 'भक्तिमान् यः स मे प्रियः ॥

---

(१) D. भक्तिमान् स प्रियो नरः ।

[१]स्कान्दे चन्द्रशर्म्मवाक्यम्,—

कविना मोहितेनापि न कृतं तव पूजनम् ।
मया पापेन देवेश शिवभक्तिसमादरात् ॥
तव भक्तिः कृता नैव न कृतं तव वासरम् ।
विफलं सुकृतं जातं यन्मया समुपार्जितम् ॥
मत्पूर्व्वजैस्तु कथितं सर्व्वमेतत् सुरेश्वर ।
तत्पुण्यं मा वृथा यातु प्रसादात् तव माधव ॥
दृष्टे तु तव वक्त्रे तु दुर्ल्लभं भुवनत्रये ।
नैवास्ति देवकीपुत्र पुराणेषु श्रुतं मया ॥
सापराधाश्च ये केचित् शिशुपालादयः स्मृताः ।
त्वत्करेणाहताः कोपात् मुक्तिं प्राप्ता महीभुजः ॥
अद्यप्रभृति कर्त्तव्यम् यन्मया कृष्ण तत् शृणु ।
एकादश्यां न भुञ्जीत कर्त्तव्यं जागरं सदा ॥
महाभक्त्या प्रकर्त्तव्यं प्रत्यहं पूजनं तव ।
पलार्द्धेनापि विद्धन्तु न कार्य्यं वासरं तव ॥
[२]त्वत्प्रियार्थं मया कार्य्या द्वादशी व्रतसंयुता ।
कार्य्या भक्तिर्भगवति प्राणैरपि धृतैः सदा ॥
नित्यं नामसहस्रञ्च पठनीयं तव प्रियम् ।
पूजा च तुलसीपत्रैर्मया कार्य्या सदैव हि ॥

---

(१) Y. स्कन्दपुराणे कृष्णाग्रे चन्द्रशर्म्मवाक्यम् ।

(२) Y. त्वत्प्रीत्यर्थं मया ·

तुलसीकाष्ठसम्भूता माला धार्य्या मया[१] हरे ।
नृत्यं गीतं च कर्त्तव्यं संप्राप्ते तव जागरे ॥
तुलसीकाष्ठसम्भूतचन्दनेन विलेपनम् ।
करिष्यामि तवाग्रे तु [२]गुणानामपि कीर्त्तनम् ॥
द्वारकायां प्रकर्त्तव्यं प्रत्यहं गमनं मया ।
त्वत्कथाश्रवणं कार्य्यं नित्यं पुस्तकवाचनम् ॥
नित्यं पादोदकं मूर्द्ध्ना मया धार्य्यं स्वभक्तितः ।
नैवेद्यभक्षणञ्चापि करिष्यामि यतव्रतः ॥
निर्म्माल्यं शिरसा धार्य्यं त्वदीयं सादरं मया ।
त्वया यदवसृष्टन्तु भक्षणीयं सदा मया ॥
तथा तथा प्रकर्त्तव्यं तव तुष्टिर्यथा भवेत् ।
सत्यमेतन्मया कृष्ण तवाग्रे परिकीर्त्तितम् ॥

पलार्द्धेन तिलार्द्धेन दशमीविद्धं एकादशीव्रतं न कार्य्यम् । नित्यं पुस्तकवाचनं नित्यं वैष्णवग्रन्थपर्य्यालोचनम् । त्वया यदवसृष्टमिति यद्भक्षणीयं तत् त्वदुपभुक्तमिति बुद्ध्या भक्षणीयम् । तथा तथा प्रकर्त्तव्यमित्यन्यदपि भगवत्प्रीतिहेतु कर्म्मान्तरमित्यर्थः ।

नारदीयपञ्चरात्रे,—

समयांश्च प्रवक्ष्यामि संक्षेपं पाञ्चरात्रिणाम् ।
न भक्षयेन्मत्स्यमांसं कुर्य्यात् शूकरयोस्तथा ॥
कांस्यपात्रे न भुञ्जीत न पद्मवटपत्रयोः ।
देवागारे न निष्ठीवेत् क्षुतञ्चात्र विवर्ज्जयेत् ॥

---

(१) E. सदा ।   (२) D. गुणानाञ्चापि कीर्त्तितम् ।

सोपानत्कचरणस्तु न विशेत् तत्र कर्हिचित्।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि॥
जागरं तत्र कुर्व्वीत विशेषात् पूजयेद्धरिम्।

तथा,—

न शङ्खेन पिबेत् तोयं न निन्देद् ब्राह्मणं सदा।

अथ दुर्गासम्प्रदेयानि।

भविष्ये,—

मयूरपत्रव्यजनं नानावर्णविचित्रितम्।
भगवत्यै नरो दत्वा लभेद् बहु सुवर्णकम्॥
तालवृन्तं महाबाहो [1]चित्रकर्म्मोपशोभितम्।
भगवत्यै नरो दत्वा वैष्णवस्य फलं लभेत्॥

वैष्णवस्य यज्ञस्य। रूप्यदण्डचामरदाने वायुलोकाप्तिः। ताम्रदण्डचामरदाने मातॄणां स्थानम्। सर्व्वसौवर्णदण्डचामरं दत्वा ब्रह्मलोके महीयते। मणिदण्डसुवर्णरौप्यविचित्रचामरं दत्वा दुर्गालोके महीयते। श्वेतपताकाढ्यं ध्वजं दत्वा [2]दुर्गालोके महीयते। दुर्गायतने ध्वजमालाकरणे महाध्वजाष्टककरणे वा कल्पशतं दुर्गालोके महीयते। धवलप्रवालमणिभूषितमणिदण्डमयच्छत्रदाने शिरसि धार्य्यमाणेन छत्रेण विमानस्थो दुर्गालोके

(१) Y. चित्रकर्म्मप्रशोभितम्।
(२) Y. दुर्गालोकः।

महीयते। दुर्गालये बहुघण्टादाने देवीलोकाप्तिः। भेरीमृदङ्गपटहवेणुवीणादिदाने देवीसालोक्यम्। दुर्गायै मृत्पात्रदानं ब्राह्मणसम्प्रदानकताम्रपात्रदानात् शतगुणफलम्। देव्यै ताम्रपात्रदानं ब्राह्मणसम्प्रदानकस्वर्णपात्रदानात् शतगुणफलम्। दुर्गायै रजतदानं ब्राह्मणसम्प्रदानकनिष्ककोटिसुवर्णदानादधिकफलम्। पयस्विनीगोदानेऽश्वमेधफलम्। स्नानार्थगोदाने गोशतदानफलम्। श्वेतं वृषं दत्वा वृषरोमसंख्यककल्पसहस्रं रुद्रलोके महीयते। [1][दासीदासदाने राजसूयाश्वमेधफलम्। हस्तिदानाद् गजेनेन्द्रलोके क्रीड़नम्। छत्रध्वजकिङ्किणीघण्टाचामरभूषितं रथं दत्वा परमां गतिं याति। जलोपेतशस्यशालिमहीं दत्वा भूमिहस्तसंख्यककल्पसहस्रं दुर्गालोके महीयते। सुसमृद्धकुटुम्बयुतग्रामं दत्वा शक्रलोके महीयते।] विपण्यायतनयुक्तनानाजनसमाकुलं पुरं दत्वा महर्लोके महीयते। सुसमृद्धनगरं परिखादेवायतनप्राकारवीथ्यापणनानाजनाकीर्णं दत्वा अश्वमेधफलं प्राप्य इन्द्रलोके महीयते। नानाफलपुष्पान्विताराम-दाने फलपत्रकुसुमसंख्यकवर्षसहस्रं दुर्गानुचरत्वम्। दुर्गायतने वापीकूपतड़ागदीर्घिकां कृत्वा कुलानां शतं तारयित्वा

चण्डिकापुरमासाद्य मोदते चण्डिकानुगः।

मृदुसूक्ष्मविचित्रवस्त्रदाने वस्त्रतन्तुसंख्यकवर्षसहस्रं मोदते चण्डिकालये। सुवर्णतिलकदाने दुर्गासालोक्यम्। सौवर्णोच्चद्वय-

(१) Y. Omits the portion bracketed.

दाने गोसहस्रदानफलं प्राप्य सूर्य्यलोके महीयते। नानाविधभक्ष्य-भोज्यमद्यमांससमन्वितमष्टम्यां नवम्यां वा सन्ध्याकाले महिषा-जनिपातनैर्बलिकरणे चण्डिकासालोक्यम्।

अथ देवीधर्म्माः।

कालोत्तरे देवीभक्त्याचारप्रसङ्गे,—

कन्यास्त्रीदेवविप्राणां गुरूणाञ्च विशेषतः।
शास्त्राग्निसाधकादीनां निन्दां यत्नेन वर्ज्जयेत्॥
सुगन्धि पुष्पं शिरसि मुखं ताम्बूलसंयुतम्।
हस्ताभ्यां कङ्कणे धार्य्ये कुण्डले चाङ्गुलीयकौ॥
ग्रीवां ग्रैवेयकाद्याञ्च रक्तवस्त्राणि धारयेत्।
रमणञ्च दिवा वर्ज्यं तथा पर्व्वसु सर्व्वदा॥
प्रभातसमये भक्त्या भवानीं पूजयेत् सदा।
यावन्न पूजिता गौरी तावत् किञ्चिन्न भक्षयेत्॥
ताम्बूलवस्त्रगन्धादीन् पूजयित्वा तु धारयेत्।
कण्डनीं पेषणीं चुल्लीं मार्ज्जनीं देहलीं तथा॥
कन्यास्त्रीबालघण्टाञ्च वस्त्रमग्निं द्विजं गुरुम्।
स्थविरं कर्करीं रत्नं विष्णुपादेन संस्पृशेत्। (?)
वामहस्तेन पूजा तु वर्ज्जनीया शिखिध्वज॥

तैलमांसादिकं वत्स वर्ज्यं पर्व्वणि पर्व्वणि।
अष्टम्याञ्च चतुर्द्दश्यां पौर्णमास्यां विशेषतः॥
संक्रान्तौ ग्रहणे चैव षड़शीतिमुखेषु च।
विशेषपूजा कर्त्तव्या आचार्य्यं पूजयेत् सदा॥
तृतीयाजागरः कार्य्यश्चतुर्थ्यां पूजनं तथा।
देव्यै दत्तन्तु नैवेद्यं कुमारीषु प्रदापयेत्॥
अदीक्षितानां पुरतः पूजनं परिवर्जयेत्।
[[1]सितपुष्पाणि सिद्धार्था नीलदूर्व्वाङ्कुरास्तथा॥
नित्यं शिरसि दातव्या देव्या मन्त्रेण मन्त्रिताः।
आदर्शं धारयेन्नित्यं न चितिं न शवं स्पृशेत्॥
न स्पृशेद् भक्तिहीनान्तु कपिलां वाऽथ काञ्चन।
कुष्ठिनं कुब्जखञ्जांश्च केकरं कुटिलाश्रयम्॥
मद्यमांसामिषादीनि प्रयत्नात् परिवर्जयेत्।]
खण्डखाद्यानि देयानि तथा भक्ष्याणि यत्नतः॥
अपर्य्युषितपुष्पाणि दातव्यानि प्रयत्नतः।
कर्पूरयुक्तमुदकं वस्त्रपूतं प्रदापयेत्॥
[2]निर्द्दयत्वममर्य्यादामसत्यं साहसं तथा।
दौत्यमात्मीव (?) हास्यञ्च शयनं शून्यवेश्मसु॥

---

(१) Y. Omits the portion bracketed.
(२) Y. निर्भयत्वममर्य्यादा ०

वापीकूपमहाप्रच्चदेवतायतनेषु च ।
शयनं रोदनञ्चैव भोजनञ्च विशेषतः ॥
न रात्रौ पूजनं शस्तं भोजनञ्च विशेषतः ।
प्राणिहिंसा न कर्त्तव्या परच्छिद्रं न दर्शयेत् ॥
दीर्घसत्रन्तथा मुर्खसङ्गमं परिवर्जयेत् ।
तपस्विषु सदा दानं शिवभक्तेषु नान्यथा ॥
न पठेत् पशुशास्त्रन्तु भूतवादञ्च वर्जयेत् ।
दया च सर्व्वदा कार्य्या भूतानामभयं तथा ॥
इदं शौचविधानन्तु कथितन्ते समासतः ।
नादीक्षितेषु दातव्यं नाभक्तेषु कथञ्चन ॥

अत्र येषां द्रव्याणां समर्पणे अर्चयतिशब्देन विधानमर्चयति प्रायपाठे तत्र ददात्यर्थश्रवणेऽपि "विशये प्रायदर्शनात्" इति न्यायेन पूजात्वमेव निश्चितमिति। पुष्पानुलेपनावस्त्रेण प्रोक्ष्य नेत्रेण वीक्ष्य कवचेनावगुण्ठ्य अस्त्रेण तालत्रयेण संरक्ष्य स्पृष्ट्वा मूलमष्टधा जप्त्वा धेनुमुद्रया अमृतीकृत्य अनुलेपनेन गात्रलेपनम्। पुष्पस्य शिरसि दानम्। धूपस्य घ्राणे सन्निधापनम्। दीपस्य नेत्रे प्रदर्शनम्। नैवेद्ये जलप्रक्षेपः। प्राणादिमुद्रादर्शनम्। अलङ्कारस्य देहे यथास्थानं विन्यासः। वस्त्रस्य परिधापनं यज्ञोपवीतस्य देहे समर्पणमित्यादि यथायोग्यं कार्य्यम्। येषां तद्ददाति प्रायपाठस्तेषां तेनैव न्यायेन दानरूपत्वनिश्चयात् सम्प्रदानम्। देवं गन्धपुष्पाभ्यां सम्पूज्य देयद्रव्यञ्च सम्पूज्य दानवाक्येन दानम्।

[1]इत्यग्निचिद्वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे प्रथमभागे नानाविधदेवकार्य्याणि। श्रीः।

---

[2]अत्र प्रणवोपासकेन प्रातः प्रणवजपः कार्य्यः।

प्रातः स्नातः शुचिर्भूत्वा कृतसन्ध्याजप स्ततः ।
यथोक्तन्यस्तमन्त्रः सन्नष्टोत्तरसहस्रकम् ॥
सप्राणायामकं कुर्य्यात् तदर्थैकाग्रमानसः ।
एवमेव तथा सायं नित्य एष विधिः स्मृतः ॥

नित्यजपेन सर्व्वपापक्षयः सर्व्वकामाप्तिश्च। प्राणायामश्च—

रेचकं दक्षिणेनोक्तं पूरणं वामतश्चरेत् ।
जपारम्भे विधिर्ज्ञेयो विपरीतस्तु संस्थितौ ॥

प्रणवमन्त्रस्य प्रजापति ऋषि र्दैवी गायत्रीच्छन्दः परमात्मा

---

(१) Y. इत्यग्निचिद्वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे नानाविधदुर्गाराधनकर्म्माणि। अथ नानादैवतभक्ष्याणि।

शिवोऽभिषेकसन्तुष्टो भक्ष्यतुष्टो विनायकः ।
अलङ्कारप्रियो विष्णुः प्रीत्या देवः प्रसीदति ॥
ब्रह्माध्ययनसन्तुष्टः कर्म्मणा च शतक्रतुः ।
वैनतेयः सर्पवरै र्भास्करोऽर्घ्येण तुष्यति ॥
होमेन तु ग्रहः प्रीतो दानतुष्टा नवग्रहाः ।
चामुण्डायञ्चदैतेयाः सुरामांसवलिप्रियाः ॥
धर्म्म आचारसन्तुष्टः पायसेन सुधाकरः ।
मन्मथः कुसुमैस्तुष्टो लक्ष्मीः पद्मार्चनप्रिया ॥
ध्यानेन सर्व्वदा सर्व्वे कालयोगेन सुक्तिदाः ।

इति नित्याचारप्रदीपे प्रातःकालीनदेवताकार्य्याणि समाप्तानि।

(२) Y. अतः प्रणवजपः कार्य्यः।

देवता प्रणवजपे विनियोगः। ॐ भूः हृदयाय नमः। भुवः शिरसे स्वाहा। स्वः शिखायै वषट्। महः कवचाय हुम्। जनः नेत्राभ्यां वौषट्। तपः अस्त्राय फट्। इत्यङ्गन्यासः। प्रणवेन सर्व्वशरीरे व्यापकन्यासः। एवं करद्वये अङ्गुष्ठादिकनिष्ठान्तेषु करद्वये युगपन्न्यासः। अकारं प्रथमपर्व्वणि। उकारं द्वितीय-पर्व्वणि। मकारं तृतीयपर्व्वणि। सर्व्वाङ्गुलिव्यापकं प्रणवं न्यसेत्। अकारं नाभौ। उकारं हृदि। मकारं मूर्द्ध्नि। सर्व्वाङ्गे प्रणवः। शरीरं प्रणवं ध्यात्वा तन्मध्ये परमात्मानं विचिन्त्य ब्रह्मकवचेन स्वदेहं परिबन्धयेत्। भूः अग्न्यात्मने हृदयाय नमः। भुवः वाय्वात्मने शिरसे स्वाहा। स्वः सूर्य्यात्मने शिखायै वषट्। ॐ भूर्भुवः स्वः ब्रह्मात्मने कवचाय हुम्। सोमात्मने नेत्राभ्यां वौषट्। सत्यात्मने अस्त्राय फट्। व्याहृतित्रयेण दिग्बन्धनम्। एतद्ब्रह्मकवचम्। एतद्बन्धं दृष्ट्वा हिंस्राः पलायन्ते। अन्तकालेऽनेनैव बद्धो मुक्तो भवति। सोऽहमित्यस्य महावाक्यस्य स्थूल-महाभूतविराट्रूपं हकारार्थं सूक्ष्ममहाभूतावच्छिन्नहिरण्य-गर्भाख्ये सकारार्थे लीनं तच्च मकारार्थेऽव्याकृताख्ये मूलकारणे तच्च दानार्थे (?) शरीरत्रयानुस्यूते ब्रह्मणि तच्च शुद्धं चिन्मात्रं ब्रह्माऽहमस्मीति चिन्तयेत्। असमर्थस्तु

विष्णुं भास्वत्किरीटाङ्गदवलयगलाकल्पहारोदरांघ्रि-
श्रोणीभूषं सवक्षोमणिमकरमहाकुण्डलामण्डिताङ्गम्।
हस्तोद्यच्चक्रशङ्खाम्बुजगदममलं पीतकौशेयवासो-
विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि॥

इति ध्यायेत्।

अथाष्टाक्षरविधानम्।

प्रातः स्नातः समुत्थाय कृतसन्ध्याजपः शुचिः।
जपेदष्टसहस्रं वै नित्य एष विधिः स्मृतः॥
यो मासं द्वापरे भक्त्या पूजयन् लभते फलम्।
नमो नारायणायोक्त्वा तत्कलौ लभते फलम्॥
अष्टाक्षरो महामन्त्रः सर्व्वपापहरः [1]शुभः।
सर्व्वेषां विष्णुमन्त्राणां राजत्वेन प्रतिष्ठितः॥
भूर्ध्वोर्द्ध्ववाहुरद्याहं सत्यपूर्व्वं ब्रवीमि वः।
हे पुत्त्र शिष्याः शृणुत न मन्त्रोऽष्टाक्षरात्परः॥

नारसिंहे,—

किं तस्य बहुभिर्मन्त्रैः किं तस्य बहुभिर्व्रतैः।
नमो नारायणायेति मन्त्रः सर्व्वार्थसाधकः॥
इमं मन्त्रं जपेद् यस्तु शुचिर्भूत्वा दिने दिने।
सर्व्वपापविनिर्म्मुक्तो विष्णुसायुज्यमाप्नुयात्॥
सर्व्वतीर्थफलं ह्येतत् सर्व्वदानफलं नृप।
हरेरर्च्चनमव्यग्रं सर्व्वयज्ञफलं नृप॥

तथा,—गन्धपुष्पादि सकलमनेनैव निवेदयेत्।

कल्पतरौ,—श्रीशुक उवाच,—

किं जपन् मुच्यते तात सततं विष्णुतत्परः।
संसारदुःखात् सर्व्वेषां हिताय वद मे पितः॥

(१) Y. परः।

व्यास उवाच,—

अष्टाक्षरं प्रवक्ष्यामि मन्त्राणां मन्त्रमुत्तमम्।
यं जपन् मुच्यते मर्त्त्यो जन्मसंसारबन्धनात्॥
हृत्पुण्डरीकमध्यस्थं शङ्खचक्रगदाधरम्।
एकाग्रमनसा ध्यात्वा विष्णुं कुर्य्याज्जपादिकम्॥
एकान्ते विजने स्थाने विष्णवग्रे वा जलान्तिके।
वेदे पुराणे प्रसिद्ध एष मन्त्रः [1]पुरातनः॥
एवमष्टाक्षरं मन्त्रं जपेन्नारायणं स्मरन्।
सन्ध्यावसाने सततं सर्व्वपापैः प्रमुच्यते॥
सर्व्ववेदरहस्येभ्यः सार एष उदाहृतः।
विष्णुना वैष्णवानान्तु [2]हितानुश्रयणात् पुरा॥
कीर्त्तितः सर्व्वपापघ्नः सर्व्वकामप्रदायकः।
स्नात्वा शुचिः शुचौ देशे जपेत् पापविशुद्धये॥
गन्धपुष्पादिभिर्विष्णुमनेनाराध्य यो जपेत्।
महापातकयुक्तोऽपि मुच्यते नात्र संशयः॥
जपेत् सहस्रं नियतं शुचिर्भूत्वा समाहितः।
मासि मासि च द्वादश्यामयुतञ्च जपेत् शुचिः॥
प्रथमेन तु लक्षेण आत्मशुद्धिर्भविष्यति।
द्वितीयेन तु लक्षेण [3]मन्त्रशुद्धिमवाप्नुयात्॥

(१) Y. सनातनः।
(२) Y. हितानुशायिना पुरा।
(३) Y. निर्व्वाणमधिगच्छति।

[1][तृतीयेन तु लक्षेण स्वर्लोकं प्राप्नुयात् परम्।
चतुर्थेन तु लक्षेण हरेः सायुज्यमाप्नुयात्॥
पञ्चमेन तु लक्षेण निर्म्मलं ज्ञानमाप्नुयात्।
षष्ठेनैव तु लक्षेण भवेद् विष्णुस्थिता मतिः॥
सप्तमेन तु लक्षेण स्वरूपं प्रतिपद्यते।
अष्टमेन तु लक्षेण निर्व्वाणमधिगच्छति॥]

तथा,—जपेन्नारायणं मन्त्रमेतन्मृत्युभयापहम्।
आयुष्यं धनपुत्रांश्च पशून् विद्यां महद्यशः॥
धर्म्मार्थकाममोक्षांश्च लभते जपकृन्नरः।
दुःस्वप्नासुरपैशाचा उरगा ब्रह्मराक्षसाः।
जपिनं नोपसर्पन्ति चौरा व्याधय एव च॥

पद्मपुराणे,—

अष्टाक्षरञ्च मन्त्रेशं ये जपन्ति द्विजोत्तमाः।
तान् दृष्ट्वा ब्रह्महा शुद्धेत् स्तेयतो वैष्णवः स्वयम्॥

तथा अष्टाक्षरकल्पे,—

पादचारी सहस्रायुरमितायुर्नभश्चरः।
लक्षायुरपि जीवेच्च जपे सातिशये सति॥
कोटिमष्टाक्षरं जप्तुर्न किञ्चिद् दुष्करं भवेत्।
स्तम्भयेदपि खे सूर्य्यमुदधिञ्चापि शोषयेत्॥
अणिमादिगुणान् प्राप्य स्वाराज्ये सुखमश्नुते।

इत्यादिवाक्यबलान्नारायणमन्त्रोपासनपरः प्रातः सहस्रं जपेत्।

(१) Y. Omits the portion bracketed.

यस्तु तेनैव संसारविच्छेदमिच्छति स आवश्यककर्म्मकालातिरिक्तकाले सततं जपेत्।

तथाच,—

तस्मात् सर्व्वेषु कालेषु नमोनारायणेति यः।
जपेत् स याति विप्रेन्द्र निर्व्वाणमधिगच्छति॥ (?)

यत्तु,—

स्वपन्नारायणं मन्त्रं गच्छन्नारायणं तथा।
भुञ्जन् नारायणं विप्र तिष्ठन् जाग्रन् श्वसन्नपि॥
उन्मिषन् निमिषन् वापि नमो नारायणेति यः।
जपेन्नारायणं मन्त्रं प्रणम्य पुरुषोत्तमम्॥

इति। यच्च,—

आसीनो वा शयानो वा तिष्ठन् वा यत्र तत्र वा।
नमोनारायणायेति मन्त्रैकशरणा वयम्॥

इति तत्र गमनादिकाले,—

मन्त्रैकशरणो विद्वान् मनसैव सदा जपेत्।

इति मनसा जपः। एतादृशजपनिष्ठावतो नित्याकरणेऽप्यदोषः समाधिसमानत्वात्।

सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज।

इति भगवद्वचनादित्याहुः। अस्य वैदिकत्वान्न दीक्षादिचिन्ता नवा दीक्षानियमः पुरश्चरणनियमो वा। तथाच नारायणोपनिषद्,—ॐमित्येतदग्रे व्याहरेन्नम इति पश्चान्नारायणायेत्युपरिष्टात् ॐमित्येकाक्षरं नम इति द्वे अक्षरे नारायणायेति

पञ्चाक्षराणि एतद् वै नारायणस्याष्टाक्षरं पदं यो ह वै नारायणस्याष्टाक्षरं पदमध्येत्यनुपप्लवः सर्व्वमायुरप्येति विन्दते प्राजापत्यं रायस्पोषं गौपत्यं स ततोऽमृतत्वमश्नुते। इति। तथात्मबोधोपनिषद्,—ॐनमोनारायणायेति मन्त्रोपासनं वैकुण्ठं गमयिष्यति। इति। प्रपञ्चसारे,—

ऋषिरस्य मनोः साध्यनारायण इतीरितः।
छन्दस्तु देवी गायत्री परमात्माच देवता॥
अथ क्रुद्धमहावीरद्युसहस्रपदादिकैः।
उल्कैर्जातियुतैः कुर्य्यात् पञ्चाङ्गानि मनोः क्रमात्॥
अष्टाक्षरेण व्यस्तेन कुर्य्यादष्टाङ्गकं सुधीः।
सहृत्शिरःशिखावर्म्मनेत्रास्त्रोदरपृष्ठके॥
अर्कौघाभं किरीटान्वितमकरलसत्कुण्डलं दीप्तिराजत्-
केयूरं कौस्तुभाभाशबलरुचिरहारं सपीताम्बरञ्च।
नानारत्नांशुभिन्नाभरणशतयुजं श्रीधराश्लिष्टपार्श्वं
वन्दे दोःसक्तचक्राम्बुरुहदरगदं विश्ववन्द्यं मुकुन्दम्॥

मन्त्रार्थश्च।

सर्व्वज्ञः सर्व्वशक्तिश्च सर्व्वात्मा सर्व्वगो ध्रुवः।
जगज्जन्मस्थितिध्वंसहेतुरेष महेश्वरः॥
एवमेव समुद्दिश्य मन्त्रो नारायणः सदा।

इति सुरेश्वराचार्य्यरीत्या ज्ञातव्यः। अस्यार्थः,—
ब्रह्मलोकानुग्रहार्थं गृहीतदेहो नारायणस्तस्मै नारायणाय नमस्कार इति।

प्रपञ्चसारे च,—

तारः शक्त्यतया निर्द्दिष्टः सोऽहमर्थकः पूर्व्वम् ।
नार्णः प्रतिषेधार्थो मोकारश्चायमर्थको भवति ॥
सलिलानलपवनधराः क्रमेण नारायणाक्षराः प्रोक्ताः ।
चरमैरस्तु विभक्तिव्यक्त्यर्थं दर्शितस्तदर्थार्थं ॥

अयं सलिलतेजोवायुधरात्मकः प्रपञ्चो नास्ति सोऽहं ब्रह्मैवाहमित्यर्थः । अत्राङ्गभूतकिरीटमन्त्रः किरीटकेयूरहारमकरकुण्डलशङ्खचक्रगदाम्बुजहस्तपीताम्बरधरश्रीवत्साङ्कितवक्षस्थलश्रीभूमिसहितस्वात्मज्योतिर्द्वयदीप्तिकराय सहस्रादित्यतेजसे नमः ।
इति व्यापकन्यासः ।

वैष्णवपीठे पूजा ।

अङ्गान्यभ्यर्च्य मन्त्रार्णान् केशरेषु समर्चयेत् ।

पूर्व्वादिचतुर्द्दले वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाः । कोण-[1]दलेषु शान्तिश्रीसरस्वतीरतयः । दलाग्रेषु शङ्खचक्रगदापद्मकौस्तुभमुषलखड्गवनमालाः । अग्रे गरुड़म् । शङ्खपद्मनिधी दक्षिणोत्तरयोः । पश्चिमे ध्वजः । आग्नेये विघ्नराजं । नैर्ऋते तार्क्ष्यं ईशाने सेनानीं इन्द्रादयस्तद्वहिर्वज्रादयः ।

[2]विकारलक्षं प्रजपेन्मनुमेनं समाहितः ।
तद्दशांशैः सरसिजैर्जुहुयान्मधुराप्लुतैः ।
धर्म्मार्थकामान् लब्ध्वान्ते विष्णुसायुज्यमाप्नुयात् ॥

(१) Y. द्वयेषु ।
(२) Y. विकारलक्षं जपेन्मनु ०

प्रयोगश्च ।

सर्व्वार्थसाधनं जप्त्वा विशुद्ध्यत्युपपातकी ।
पञ्चाहं पञ्चगव्याशी निषण्णो दर्भसंस्तरे ॥
अहोरात्रमुपोष्याशु सहस्रेणाभिमन्त्र्य च ।
युक्तानि पञ्चगव्यानि पीत्वा पापैः प्रमुच्यते ॥
शनैश्चरदिनेऽश्वत्थं नित्यमालभ्य पाणिना ।
[1]जपेदष्टोत्तरं शुद्धो म्रियते नापमृत्युभिः ॥
अश्नीयादन्वहं विद्वान् अन्नं सप्ताभिमन्त्रितम् ।
आरोग्यं महदाप्नोति बलं तेजश्च विन्दति ॥
उदकुम्भं नवं पूर्णमुपस्पृश्यायुतं जपेत् ।
तेनाभिषिक्तस्तोयेन व्याधिभिः परिमुच्यते ॥
तिलानां दशसाहस्रैर्होमश्चायुर्विवर्द्धकः ।
दधिमध्वाज्यसंमिश्रां चतुरङ्गुलसम्मिताम् ।
गुलुचीमयुतं हुत्वा मृत्युमेवातिवर्त्तते ॥
सर्व्वान् कामानवाप्नोति घृतहोमेन भूयसा ।
अष्टाक्षरं समुच्चार्य्य वामहस्ताभिमन्त्रिताः ॥
पुनः पुनरपः सिञ्चेत् सर्पदष्टस्तु जीवति ॥
नाभिमात्रोदकस्यान्ते नदीं प्राप्य समुद्रगाम् ।
जप्त्वा सूर्य्यमूर्द्ध्ववाहुरयुतं धनमाप्नुयात् ॥
अभिमन्त्र्याष्टसाहस्रं सर्व्ववीजानि वापयेत् ।
महती शस्यवृद्धिः स्यादाम्रादिष्वप्ययं विधिः ॥

(१) Y. जपेदष्टशतं शुद्धो ०

पुत्रं मासत्रयाद् विन्देत् हुत्वा गोमूत्रयावकम्।

भुक्त्वेति क्वचित् पाठः।

अनुक्तायान्तु संख्यायां विधाने जपहोमयोः।

सर्व्वत्राष्टसहस्रं स्यादेष साधारणो विधिः॥

[[1]इति नित्याचारप्रदीपे अष्टाक्षरविधानं समाप्तम्।]

अथ मुमुक्षुणा प्रातः [2]प्रपञ्चयागविधिः कार्य्यः।

कृते च यस्मिन्निह साधकोत्तमाः

प्रयान्ति निर्व्वाणपदं तदक्षयम्।

इति प्रपञ्चसारवचनात्। सच्चिदानन्दसिद्धिद इति तन्त्रान्तरात्। [3]तत्राङ्गत्वेन प्रथमं महागणपतिमन्त्रस्य न्यासः। महागणपतिमन्त्रस्य गणक ऋषिः नीवृद्गायत्रीच्छन्दः महागणपतिर्देवता गां वीजं स्वाहा शक्तिः ॐ गां हृदयाय नमः ॐश्रीं गीं शिरसे स्वाहा ॐ ह्रीं गुं शिखायै वषट् ॐ क्लीं गैं कवचाय हुं ॐ लं गौं नेत्राभ्यां वौषट् ॐ मं गः अस्त्राय फट्। कल्पद्रुमवने ऐक्षवजलधिलहरीवातशिशिरे सर्व्वर्त्तुसेविते तरुमूले षट्कोणे लिपिपद्मे आसीनस्त्वेकरदो [[4]दशभुजो] गजवदनः।

---

(१) D. Omits the portion bracketed.

(२) Y. पञ्चयोगविधिः कार्य्यः।

(३) Y. तदङ्गत्वेन ०।

(४) Y. Omits the portion bracketed.

वीजापूरगदेक्षुकार्म्मुकरुजाचक्राब्जपाशोत्पल-

व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः।

ध्येयो वल्लभया सपद्मकरया श्लिष्टो ज्वलत्भूषया

विश्वोत्पत्तिविनाशनस्थितिकरो विघ्नो विशिष्टार्थदः॥

अग्रे रमारमेशौ विल्वे। दक्षे वटमूले गिरिजागिरिशौ। पृष्ठे पिप्पलमूले रतिकामौ। सव्ये भूवराहौ प्रियङ्गुमूले। षट्कोणाश्रिषु। अग्रे आमोदः सिद्ध्या। तमभितः प्रमोदः समृद्धा। सुमुखः कान्त्या। दुर्म्मुखो [1]मदनावत्या। तमभितो विघ्नो मदद्रवया। विघ्नकर्त्ता द्राविण्या। सव्ये शङ्खनिधिर्वसुधारया। दक्षे पद्मनिधि र्वसुमत्या। अष्टदेवताः। ततोऽष्टमातरः। इन्द्रादयो वज्रादयश्च। एवं सपरिवारं गणपतिं ध्यात्वा ॐ श्रीं ह्रीं क्लीं लं गणपतये वरवरद सर्व्वजनं मे वशमानय स्वाहेति गणपतिमन्त्रस्य देहे न्यासः। गमिति वीजमन्त्रस्य चतुश्चत्वारिंशद्वारं जपः। गणानां त्वेति मन्त्रस्य सकृज्जपः। महागणपतिमन्त्रस्य चतुर्व्वारं जपः। मातृकामन्त्रस्य ऋष्यादिस्मरणम्। षड़ङ्गन्यासः। मातृकाक्षराणां स्वस्वस्थानेषु त्रिवारं न्यासः। सविन्दुकषोड़शस्वरान्ते आदित्याय नम इति मुखे। कवर्गान्ते अङ्गारकाय नम इति दक्षिणकरे। चवर्गान्ते शुक्राय नम इति वामकरे। टवर्गान्ते बुधाय नम इति दक्षिणपादे। तवर्गान्ते वृहस्पतये नम इति वामपादे। पवर्गान्ते शनैश्चराय नम इति कुक्षौ। यकारादिदशाक्षरान्ते सोमाय नम इति हृदये।

---

(१) Y. मदद्रवत्या।

अथ प्रपञ्चयागन्यासः ।

प्रपञ्चयागमन्त्रस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दः सच्चिदानन्दाद्वयपरिपूर्णं प्रत्यक्ब्रह्मज्योतिर्देवता प्रणवो वीजं हृल्लेखा शक्तिः। स्वाहा हृदयाय नमः। सोऽहं शिरसे। हंसः शिखायै। ह्रीं कवचाय हुम्। ॐ नेत्राभ्यां हरहर अस्त्राय फट्। इति करे षड़ङ्गन्यासं कृत्वा देहे मूलमन्त्रेण व्यापकन्यासं कृत्वा हृदयादिषु षड़ङ्गन्यासः। ॐ ह्रीं हं सः सोऽहं स्वाहेति मन्त्रार्थध्यानम्। सर्व्वात्मकं मायारोपितदेहेन्द्रियादिभेदप्रपञ्चाधिष्ठानरूपं प्रत्यक्ब्रह्मैकभूतं परिपूर्णं ब्रह्मानन्दज्योतीरूपम्। तस्मिन् सोमरूपे ब्रह्महुताशने ज्योतिषि समस्तप्रपञ्चसहितास्तत्तुल्याः संस्थानोपेता मातृकावर्णा हूयन्तु इति भावनीयम्। ॐ ह्रीं हं सः सोऽहं स्वाहा इति क्रमेण। शिरःसहितो अकारो हुत इति बुद्धिः। ॐ आं ह्रीं आं हं सः सोऽहं स्वाहा। वदनवृत्तसहित आकारो ब्रह्मणि हुत इति बुद्धिः। एवं सर्व्वत्र।

एवं न्यासान्ते सर्व्वप्रपञ्चदेहादिशून्यः पूर्णचिन्मात्रस्तिष्ठेत्। एवं न्यासं कुर्व्वतो ब्रह्मज्ञानमस्मिन्नेव जन्मन्युत्पद्यते। मन्त्रोपासकस्य च मन्त्राः सर्व्वदोषरहिता भवन्ति। एतावन्मोक्षफलाय मन्त्रसिद्धये तु वक्ष्यमाणवाग्निहोमः काम्यफलाय।

हव्यैश्च जुहुयादग्नौ मन्त्रवित् तन्त्रचोदितैः।
अश्वत्थोदुम्बरप्लक्षन्यग्रोधसमिधस्तिलाः।
सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः॥

अमीभिर्जुहुयाल्लक्षं तदर्द्धं वा समाहितः।
सर्व्वान् कामानवाप्नोति परां सिद्धिञ्च विन्दति॥
एभिरर्कसहस्राणि हुत्वा मन्त्री विनाशयेत्।
रिपून् क्षुद्रग्रहान् भूतान् शापान् सर्व्वान् सपन्नगान्॥
मन्त्राणामन्यथावृत्तिप्रतिपत्तिसमुद्भवान्।
विकारान् नाशयेदाशु होमोऽयं समुदीरितः॥

एभिस्त्रिमधुरोपेतैर्हुत्वा लक्षं राज्यं लभते। तिललक्षहोमः पापक्षयाय। पद्मलक्षहोमः श्रियै। घृतलक्षहोमः कीर्त्त्यै।

अनया सप्त संजप्तं पिबेत् प्रतिदिने दिने।
सलिलं स भवेद् वाग्मी लभते कवितां पराम्॥
सोमसूर्य्याग्निदैवत्या वर्णा लोहत्रयन्तथा।
रौप्यमिन्दुः स्मृतो हैमं सूर्य्यस्ताम्रो हुताशनः॥
लोहभागाः समुद्दिष्टा स्वराद्यक्षरसंख्यया।

तैर्मुद्रां कृत्वा तां स्पृष्ट्वा सहस्रं संजप्य सहस्रं हुत्वा तत्र संपातं पातयित्वा पङ्कजोपरि क्षीरवृक्षक्वाथपूर्णमष्टगन्धनवरत्नयुतं संस्थाप्य तत्र मुद्रिकां प्रक्षिप्य कुम्भे मातृकां सम्पूज्य स्पृष्ट्वा सहस्रं जप्त्वा तेनाभिषिच्य यस्मै तां मुद्रिकां दद्यात् तस्य तां धारयतः सर्व्वापन्निवृत्तिरोगग्रहभूतविषचौरव्यालादिदोषनिवृत्ति युद्धे जयः। अष्टावष्टौ स्वराः कादयः पञ्चवर्गा यादयो वर्गद्वयमिति नववर्गाणां नवग्रहा देवताः। नवग्रहाणां नवरत्नानि माणिक्यमौक्तिकविद्रुमगारुड़पुष्परागवज्रनीलगोमेदवैदूर्य्याणि एतैर्मुद्रां कृत्वा पूर्व्ववत् संस्कृत्य धारणे ग्रह-

पीड़ाशान्तिसौभाग्यलक्ष्मीसकलापन्निवृत्तिरक्षोभूतपिशाचादिभयाभावधनधान्यसमृद्धिश्च फलम्। एवं केवलमातृकोपासकस्यापि।

अथ प्राणाग्निहोत्रविधिः।

तस्य फलं प्रपञ्चसारे,—

सतारशक्त्याद्यजपान्तमेवं हुत्वा महात्माथ शतार्द्धसंख्यम्।
विन्यस्य तावच्च तथैव सूत्रमात्राकृतिर्नित्यतनुश्च भूयात्॥

इति प्रपञ्चसारवचनान्मोक्षफलकः।

इत्येवं हुतविधिमन्वहं दिनादौ
ये सम्यग् विदधति मन्त्रिणः शतार्द्धम्।
ते रत्नैरपि कनकांशुकैः सधान्यैः
सम्पन्नाः सकलजगत्प्रिया भवन्ति॥

इति वचनाच्च काम्योऽपि। तत्र दिनादावितिवचनात् प्रातः कर्त्तव्यता।

तद्विधिः,—

बद्धा पद्मासनमृजुकायो मन्त्री विशेत् पुरोवदनः।

गुदाद्यङ्गुलोर्द्धस्थाने मेढ्राद्यङ्गुलादधश्च मूलाधारः। तत्र पूर्व्वनैर्ऋतवायुकोणं त्रिकोणं तन्मध्ये हृल्लेखा हकारः। दीर्घ ईकार [1]हकाराभ्यां वेष्टितं त्रिकोणं त्रिकोणमध्ये आवसथ्यकुण्डं त्रिकोणपूर्व्वे सभ्यकुण्डं त्रिकोणपश्चिमे आहवनीयकुण्डं त्रिकोणोत्तरे अन्वाहार्य्यपचनकुण्डं त्रिकोणदक्षिणे गार्हपत्यकुण्डं सर्व्वत्र ज्वलन् वह्निः। इति होमाधिकरणाग्निध्यानम्। सर्व्व-

(१) Y. रेफाभ्यां०

गतचैतन्यप्रकाशप्रतिविम्बहेतुभूतानवच्छिन्नचैतन्यात्मकात् सकलवर्णकारणशब्दरूपब्रह्मात्मकमूलप्रकृत्यात्मनो द्वादशान्तस्थितात् कल्पार्कात् स्नावितामृतमयीमक्षरमालिकां चैतन्यज्योतिषा संभिन्नां जाज्वल्यमानां कल्पान्ताग्निशिखरस्फुरत्कुहरकेषु कुण्डेषु होमयेत्। होमकाले नवरत्नान्यतमवर्णत्वेन ध्यानं तद्यथा क्षकारं मरकतवर्णममृतमयञ्च ध्यात्वा द्वादशान्तपदान्निर्गम्य सुषुम्नामार्गे मूलाधारगतावसथ्यकुण्डपर्य्यन्तं नीत्वा ॐ क्लीं क्षं हं सः सोऽहं स्वाहा। एवं शकारं गोमेदाभममृतमयं द्वादशान्तान्मूलाधारावसथ्यकुण्डं नीत्वा ॐ क्लीं शं हं सः सोऽहं स्वाहेति होमः। एवं मकारं नीलाभं नकारं विद्रुमाभं णकारं वज्राभं ञकारं पुष्परागाभं ङकारं वैदूर्य्याभं विसर्गं मुक्ताभं एकारं मुक्ताभं ऋकारं माणिक्याभं ध्यात्वा पूर्व्ववदावसथ्ये अमीषां होमः। एवमावसथ्ये वर्गान्ते दशवर्णहोमः।

अथ सभ्ये लकारं मरकतवर्णममृतमयं द्वादशान्तान्निर्गत्य सुषुम्नामार्गेण [1]मूलाधारगताहवनीयकुण्डगतं ध्यात्वा ॐ क्लीं लं हं सः सोऽहं स्वाहेति होमयेत्। सभ्यकुण्डे। एवं नववर्णान् सभ्ये। तत्र वकारं गोमेदाभं धकारं विद्रुमाभं ढकारं वज्राभं झकारं पुष्परागाभं घकारं वैदूर्य्याभं अनुस्वारं मुक्ताभं उकारं माणिक्याभं ध्यात्वा पूर्व्ववन्मन्त्रेण सभ्ये होमः।

---

(१) Y. मूलाधारत्रिकोणपूर्व्वगतसभ्यकुण्डपर्य्यन्तं नीत्वा ओं ह्रीं लं हं सः सोऽहं स्वाहेति सभ्ये जुहुयात्। एवं नववर्णान् वक्ष्यमाणसभ्ये। तत्र वकारं०

अथ त्रिकोणपश्चिमस्थाहवनीये। हकारं मरकतवर्णममृतमयं द्वादशान्तान्निर्गत्य सुषुम्नापथा मूलाधारगताहवनीयकुण्डगतं ध्यात्वा ॐ क्रीं ह्रं हं सः सोऽहं स्वाहेति होमयेत्। एवमपरवर्णनवकस्याहवनीये। तत्र लकारं गोमेदाभं बकारं नीलाभं दकारं विद्रुमाभं डकारं वज्राभं जकारं पुष्परागाभं गकारं वैदूर्य्याभं औकारं मुक्ताभं ऌकारं माणिक्याभं इकारं माणिक्याभं ध्यात्वाहवनीये पूर्व्ववन्मन्त्रेण होमः। उत्तरगतान्वाहार्य्यपचनकुण्डे। सकारं मरकतवर्णं ध्यात्वा द्वादशान्तान्निर्गत्य सुषुम्नापथा मूलाधारत्रिकोणोत्तरगतान्वाहार्य्यपचनपर्य्यन्तं नीत्वा ॐ ह्रीं सं हं सः सोऽहं स्वाहेति जुहुयात्। एवमपरनववर्णानन्वाहार्य्ये। तत्र रेफं गोमेदाभं फकारं नीलाभं थकारं विद्रुमाभं ठकारं वज्राभं छकारं पुष्परागाभं खकारं वैदुर्य्याभं ओकारं मुक्ताभं ऋकारं माणिक्याभं ईकारं माणिक्याभं ध्यात्वा पूर्व्ववन्मन्त्रेण होमः।

अथ त्रिकोण[1]दक्षिणस्थाहवनीयकुण्डे। षकारं मरकताभममृतमयं ध्यात्वा द्वादशान्तान्निर्गत्य सुषुम्नापथा मूलाधारगार्हपत्यसमीपं नीत्वा ॐ क्रीं षं हंसः सोऽहं स्वाहेति गार्हपत्ये जुहुयात्। एवमपरवर्णनवकं गार्हपत्ये। तत्र यकारं गोमेदाभं पकारं नीलाभं तकारं विद्रुमाभं टकारं वज्राभं चकारं पुष्परागाभं ककारं वैदूर्य्याभं ऐकारं मुक्ताभं ऋकारं माणिक्याभं आकारं माणिक्याभं ध्यात्वाहवनीये पूर्व्ववन्मन्त्रेण। ततोऽकारं ब्रह्मरूपं सर्व्वाधारं ध्यायेत्।

(१) D. पश्चिमस्था०

अथ ॐ क्रीं हं सः व्योमशब्दजातं सोऽहं स्वाहेति मध्यगतावसथ्यकुण्डे होमः। ॐ क्रीं अनिलं स्पर्शजातं हंसः सोऽहं स्वाहेति पूर्व्वगतसभ्यकुण्डे। ॐ क्रीं तेजोरूपजातं हंसः सोऽहं स्वाहेति पश्चिमगताहवनीये। ॐ क्रीं आपोरसजातं हंसः स्वाहेति उत्तरगतान्वाहार्य्यपचने। ॐ क्रीं पृथिवीगन्धजातं हंसः सोऽहं स्वाहेति दक्षिणगार्हपत्ये। एवं हुत्वा सर्व्वतेजोपसंहारपूर्व्वकं प्रतिलोमं विधाय आनन्दात्मकोऽद्वयः परमात्मरूपपूर्णचिन्मात्रोपतिष्ठेदिति। तत्र प्रपञ्चसारमते टवर्गस्य शुक्रो देवता पुष्परागमणिः तवर्गस्य जीवो देवता विद्रुममणिः। शारदामते क्रमेण टवर्गस्य बृहस्पतिः तवर्गस्य जीव इति शेषः। इति प्राणाग्निहोत्रविधिः। भोजनकालीनप्राणाग्निहोत्रबलिर्वक्ष्यते।

अथ मुमुक्षूणां मन्त्रराजानुष्टुभन्टसिंहाकारब्रह्मविद्योपासनं कर्त्तव्यमिति तदभिधीयते।

पूर्व्वतापनीये,—“य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो भवति स सोमपूतो भवति स सत्यपूतो भवति स ब्रह्मपूतो भवति स विष्णुपूतो भवति स रुद्रपूतो भवति स वेदपूतो भवति स सर्व्वपूतो भवति। य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स मृत्युं जयति स पाप्मानं तरति स सर्व्वहत्यां तरति स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्व्वहत्यां तरति। य एतं मन्त्रराजं नारसिंहमानुष्टुभं

नित्यमधीते सोऽग्निं स्तम्भयति स उदकं स्तम्भयति स वायुं स्तम्भयति स आदित्यं स्तम्भयति स सोमं स्तम्भयति स उदकं स्तम्भयति स सर्व्वान् देवान् स्तम्भयति स सर्व्वान् ग्रहान् स्तम्भयति स विषं स्तम्भयति। य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स देवानाकर्षति स यक्षानाकर्षति स नागानाकर्षति स ग्रहानाकर्षति स मनुष्यानाकर्षति स सर्व्वानाकर्षति। य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स भूर्लोकं जयति स भुवर्लोकं जयति स स्वर्लोकं जयति स महर्लोकं जयति स जनोलोकं जयति स तपोलोकं जयति स सत्यलोकं जयति स सर्व्वलोकं जयति। य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निष्टोमेन यजते स षोड़शिना यजते सोऽतिरात्रेण यजते सोऽप्तोर्यामेण यजते स वाजपेयेन यजते सोऽश्वमेधेन यजते स सर्व्वैः क्रतुभिर्यजते। य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स ऋचोऽधीते स यजूंष्यधीते स सामान्यधीते सोऽथर्व्वाणमधीते सोऽङ्गिरसमधीते स शाखा अधीते स गाथा अधीते स नाराशंसीरधीते स प्रणवमधीते। अनुपनीतशतमेकमेकेनोपनीतेन तत् समम्। उपनीतशतमेकमेकेन गृहस्थेन तत्समम्। गृहस्थशतमेकमेकेन वानप्रस्थेन तत्समम्। वानप्रस्थशतमेकमेकेन यतिना तत्समम्। यतीनां पूर्णशतमेकमेकेन रुद्रजापकेन तत्समम्। रुद्रजापकशतमेकमेकेनाथर्व्वशिरःशिखाध्यापकेन तत्समम्। अथर्व्वशिरःशिखाध्यापकशतमेकमेकेन तापनीयोपनिषदध्यापकेन तत्समम्। तापनीयोपनिषदध्यापकशतमेकमेकेन

मन्त्रराजजापकेन तत्समम्। तद् वा एतत् परं मन्त्रराजाध्यापकस्य। यत्र न सूर्य्यस्तपति यत्र न वायुर्वहति यत्र न चन्द्रमा भाति यत्र न नक्षत्राणि भान्ति यत्र नाग्निर्दहति यत्र मृत्युर्न प्रविशति यत्र न दुःखं सदानन्दं परमानन्दं शान्तं शाश्वतं सदाशिवं योगिध्येयं परं पदं यत्र गत्वा न निवर्त्तन्ते योगिनस्तदेतदृचाभ्युक्तम्,—तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्। तद् विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदमिति तदेतन्निष्कामस्य भवति। य एवं वेदेति महोपनिषत् य एतां महोपनिषदं वेद स कृतपुरश्चरणोऽपि महाविष्णुर्भवति।" तथा "यो मृत्योः पाप्मभ्यः संसाराच्च बिभीयात स एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रतिगृह्णीयात् स मृत्युं जयति स पाप्मानं तरति स संसारं तरति।" तथा "य इह स्थातुमपेक्षते स सर्व्वैश्वर्य्यं ददाति देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे येनासावमृतीभूत्वा सोऽमृतत्वञ्च गच्छति।" तथा तत्र तेषु पदपदाङ्गविधिषु "साम जानीयाद् यो जानीते सोऽमृतत्वञ्च गच्छति।" घोषणा भूयसी। अङ्गिरसकल्पे,—

> शक्तिनिष्ठो भवेत् शैवः शैवो विष्णुं प्रपूजयेत्।
> वैष्णवो नारसिंहः स्यात् सा काष्ठा सा परा गतिः॥

इति सर्व्वोपासनाक्रमफलस्य मोक्षहेतुत्वमुच्यते। हरिवंशे नरसिंहप्रादुर्भावानन्तरं ऋषय ऊचुः,—

> यत्त्वयाभिहितं देव नरसिंहात्मकं वपुः।
> एतदेवार्चयिष्यन्ति परापरविदो जनाः॥

विष्णुधर्म्मोत्तरे विष्णुमूर्त्तिपूजाविशेषाधिकारे ज्ञानकामस्तु नृसिंहमित्युक्तम्। विष्णुधर्म्मे च,—

भगवन्नरसिंहस्य विष्णोः स्तोतुं जिघांसतः।
दृष्टं देहे मया सर्व्वं त्रैलोक्यं सचराचरम्॥
ब्रह्मा प्रजापतिश्चेन्द्रो रुद्रैः पशुपतिः सह।

इत्याद्यभिधाय—

एतच्चान्यच्च यत्किञ्चिद्देवर्षिपितृमानवम्।
सतिर्य्यगूर्द्धपातालं तस्य दृष्टं तनौ मया॥
सोऽहं तमजरं देवं दुष्टदैत्यनिवारणम्।
आराधयितुमिच्छामि तं ममाख्यातुमर्हति॥

वैरञ्चे,—

प्रादुर्भावसहस्रेषु देवदेवस्य शार्ङ्गिणः।
कस्मिन्नभ्यधिका शक्तिरनुभूता त्वया विभो॥

इति नारदप्रश्ने ब्रह्मोवाच,—

योऽसौ हिरण्यकशिपुं जघ्निवान् नृहरिर्नखैः।
नरस्य कृत्वार्द्धतनुं सिंहस्यार्द्धतनुं तथा॥
प्रादुर्भावसहस्रेषु तत्र शक्तिर्विशिष्यते।

भार्गवसंहितायां तथा,—

स एव देवः सर्व्वेषां प्रधानमिति मे मतिः।

भृगुवाक्यं सनत्कुमारं प्रति—

चतुर्व्वर्गस्य कर्त्तारः श्रुता धर्म्मा न तत्श्रुतम्।
मृत्योर्निवर्त्तनं धर्म्मं मे त्वं वक्तुमिहार्हसि॥

अयं हि पञ्चमो वर्गः सर्व्वधर्म्मोत्तमोत्तमः।
अस्मिंस्तु सिद्धे चत्वारो वर्गा अपि करस्थिताः॥
ततः स प्राह मन्त्राणामुत्तमं स्वर्गमोक्षदम्।
मृत्योर्निवर्त्तनोपायं वदामि तव चानघ॥

तथा,—

गच्छंस्तिष्ठन् वसन् वापि जाग्रद्‌ वा शयने स्थितः।
मन्त्रैकशरणो मन्त्री मनसाऽऽत्ममनुं स्मरेत्॥
उच्छिष्टे मैत्रकं कृत्वा मेहित्वा प्राग् विशुद्धितः।
न स्मरेन्मनसाप्येनं स्मरन् नरकमृच्छति॥
आतुरस्य मुमुर्षुश्च विना शौचं स्मरेदपि।

इत्यादिश्रुतिस्मृतिपुराणेतिहासपर्य्यालोचनया नृसिंहाकारब्रह्मोपासनमन्त्रराजकं मोक्षफलप्रदं प्रतीयते। तदुक्तं तापनीयवार्त्तिके,—

नृसिंहब्रह्मविद्यैषा व्याख्याता मुक्तिसिद्धये।
उपासनप्रकारश्च श्रुत्यैव प्रतिपादितः॥

तत्तदागमकल्पग्रन्थेषु बहुषु क्वचित् क्वचिदित्येवं सर्व्वपर्य्यालोचनया शेषपद्धतिः। शङ्कराचार्य्यादिसम्प्रदायाविरोधेन संक्षेपेण किञ्चिदुच्यते। अस्य मन्त्रस्य वैदिकत्वादागमोक्तदीक्षा पुरश्चरणाद्यपेक्षा नास्ति।

तदाहुः,—

मन्त्रिणां भजतामेवं मन्त्रपाठेन धीमताम्।
पुरश्चरणकृत्येन विनापि फलदो मनुः॥

आगमे दीक्षापुरश्चरणादिकं यद्यपि मन्त्रराजमधिकृत्यापि क्वचित् क्वचित् श्रूयते तथापि

यदन्यत् तत्र ह्युदितं तत्सर्व्वमिह नेष्यते।
मन्त्रो गृहीतमात्रोऽयं तारयेत् सकलापदः॥

इति पुरश्चरणापेक्षा कल्पकारमतेऽपि दृश्यते। केवलं तद्विधानासामर्थ्यात् दीक्षापूर्व्वकगृहीतेन तु पुरश्चरणेन चोपासने शीघ्रं मोक्षफलाप्तिः। तत्तत्काम्यफलानामतिशयश्च। एवमयुतादिपुरश्चरणापेक्षा द्वात्रिंशल्लक्षादिपुरश्चरणे बोध्यम्। यत्तु श्रुतौ,—य एतां महोपनिषदं वेद स कृतपुरश्चरणो महाविष्णुर्भवतीति उपनिषज्ज्ञानस्य पुरश्चरणकार्य्यकारित्वोक्तेः पुरश्चरणापेक्षास्तीति। तत्र उपनिषद्ज्ञानस्य तदुक्तोपासनाद्वारा पुरश्चरणकार्य्यकारित्वमित्युपनिषदुक्तोपासनैव पुरश्चरणमित्यर्थः।

भार्गवसंहितायाम्,—

वैदिकोऽयं महामन्त्रो ग्रहणादेव सिद्ध्यति।
तथापि मनसस्तुष्ट्यै पुरश्चरणमुच्यते॥

यत्तु प्रपञ्चसारे,—

[1]द्वात्रिंशत्सहस्रैरधिकृतिरयुतैर्भवेत् पुरश्चरणम्।
ताभिर्लक्षैः सिद्धिः समीरिताऽस्य मनोः॥

(१) प्रपञ्चसार reads.

द्वात्रिंशतिकसहस्रैरधिकृतिरयुतैर्भवेत् पुरश्चरणम्।
तावद्भिस्तावद्भिर्लक्षैः सिद्धिः समीरिताचास्य मनोः॥
प० २४; श्लो० १२।

तत्र द्वात्रिंशत्सहस्रैः पुरः सेवा द्वात्रिंशदयुतैः पुरश्चरणं ताभिर्लक्षैः सिद्धिः मोक्षसिद्धिः। शारदातिलके,—वर्णलक्षं जपेन्मन्त्रमिति वर्णलक्षं चतुर्लक्षम्। वर्णलक्षं द्वात्रिंशल्लक्षमिति यद्यपि मोक्षफलार्थमित्याहुः। मन्त्रदेवप्रकाशिकायान्तु परमेश्वरसाक्षात्कारक्षमं द्वात्रिंशत्पुरश्चरणमित्याहुः।

अन्यत्र च

नियुतञ्च जपेन्मन्त्रमस्यैषा तु पुरष्क्रिया।

नियुतं दशलक्षम्। वैरञ्चे

अष्टलक्षं जपेद्वापि……सिद्ध्यति।

इदञ्च द्वात्रिंशल्लक्षाशक्तौश्च मोक्षफलार्थम्। द्वादशमन्त्राधिकारे आदिब्राह्मे,—

निजेष्टदेवञ्च सपर्य्ययन् जपेत्
शतं शतानां दश मन्त्रसिद्धये।

शतानां शतं दश लक्षमित्यर्थः।

जपन् लक्षेण सिद्धिः स्यात् द्विलक्षेणान्तरीक्षणम्।
त्रिलक्षेण नभोवृत्तिश्चतुर्भिर्मोक्षमाप्नुयात्॥

तत्रापि लक्षेण पुरश्चरणम्। द्विलक्षादिप्रयोगः फलार्थः। वामनभवदासीये,—

विविक्तं स्थानमासाद्य विविक्तं सुमनोहरम्।
तीर्थं वा पुण्यदेशं वा विविक्तं नापि किञ्चन॥ (?)

अयुतञ्च भार्गवसंहितायाम्

कुर्य्यान्मन्त्रस्य संसिद्ध्यै दशसाहस्रकं जपम्।

स्वयं प्रोक्ते च दीक्षामभिधाय

अभिषिक्तोऽथ गुरुणा अयुतं प्रजपेन्मनुम्।
अधिकारी भवेदेवं पुरश्चरणमारभेत्॥
गुरोराज्ञां समादाय ग्रहणे चन्द्रसूर्य्ययोः।
आदितोऽप्यवसानान्तं ध्यायन् देवं जपेन्मनुम्॥

एवञ्च ग्रहणपुरश्चरणमेव स्वयं प्रोक्ते मुख्यम्। अयुतजपः पुरःसेवा। भार्गवसंहितायान्त्वनुकल्पत्वेन ग्रहणपुरश्चरणमुक्तम्।

चन्द्रसूर्य्यविरागेतु पूर्व्वं त्र्यहमुपोषितः।
एकाहं वा जपेन्मन्त्रं स्पर्शान्मुक्त्यन्तमादरात्॥
परेऽहनि च होमादि यथापूर्व्वं समाचरेत्।
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः॥
अथवा सिन्धुतीरेऽपि शुष्कवासा जपं चरेत्।
अथवा भूतलिप्यन्तैरादावन्ते क्रमोत्क्रमात्॥
पुटितं प्रजपेन्मन्त्रमष्टोर्द्ध्वशतसंख्यया।
विना होमादिभिर्मन्त्रः सिद्धत्येव न संशयः॥

भूतलिपिपुटितजपे होमाद्यपेक्षा नास्ति। अन्यत्र तु होमजपतर्पणमार्ज्जनविप्रभोजनैः पञ्चविधं पुरश्चरणम्।

पूजाहोमौ जपश्चेति भवेदंशत्रये तव।

इति पञ्चात्मकपुरश्चरणाशक्तस्यानुकल्पपरमेव।

जपस्य,—

कल्पोक्तैव कृते संख्या त्रेतायां द्विगुणा स्मृता।
द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणा॥

इति वचनात् श्रुतसंख्याचातुर्गुण्यं सर्व्वत्र कल्पयित्वा कर्त्तव्यम्। तद्दशांशेन होमः। तद्दशांशेन तर्पणम्। तद्दशांशेन मार्ज्जनम्। तद्दशांशेन विप्रभोजनमित्यादि।

स्वयंप्रोक्ते—

सहस्राख्येन मन्त्रेण यो हरिं स्तौति मानवः।
अनुष्टुप् तस्य सिद्धिः स्यात् सर्व्वे मन्त्रा वशानुगाः॥

सहस्राख्यमन्त्रस्तत्रैवोक्तः।

तथा,—

तस्मादस्य पुरश्चर्य्यां चरित्वा जीवनावधि।
पूजां जपञ्च सङ्कल्पं विद्वानहरहश्चरेत्॥

अत्र भार्गवसंहितायाम्,—

एवं सिद्धमनुर्मन्त्री नित्यकर्म्मणि निष्ठितः।
काम्यानां फलभागी स्यान्मोक्षमप्याशु गच्छति॥

इति वचनान्नित्यकर्म्मनिष्ठा कार्य्या। नित्यकर्म्माणि तत्रैवोक्तानि,—

कुर्य्याज्जपमशक्तस्तु त्रिकालं वैककालिकम्।
कृत्वा जपं देवपूजां दीक्षोक्तविधिनाचरेत्॥

अत्रापि त्रिकालमशक्त एककालं वेत्यनुषङ्गः।

गच्छन् तिष्ठन् वसन् वापि जाग्रद् वा शयने स्थितः।
मन्त्रैकशरणो मन्त्री मनसामुं मनुं स्मरेत्॥
भुञ्जानो मैत्रकं कृत्वा मेहित्वा प्राग् विशुद्धितः।
न स्मरेत् मनसाप्येनं स्मरन् नरकमृच्छति॥

आतुरस्य मुमुर्षुस्य विना शौचं स्मरेद् यदि।
मन्त्रमेनं जपेन्मन्त्री स्वस्थो नामिषभुग् भवेत्॥
परकांस्याशनो भूत्वा परलालाशनोऽपि वा।
न पर्व्वणि स्त्रियं गच्छेत् न कांचित्परयोषितः॥
न नग्नामवलोकेत नान्यमन्त्ररतिर्भवेत्।
रजन्यामन्तिमे यामे देवं स चिन्तयेत् सदा॥
क्षणं लब्ध्वान्यकालेऽपि स्मरन् वै मोक्षमृच्छति।
स्वर्गं वा धर्म्ममर्थं वा सर्व्वथा निष्फलं न तत्॥
देवतागुरुमन्त्रैक्यं सदा चेतसि धारयेत्।
नारायणमनुं जप्त्वा मन्त्रमेवं जपेद् बुधः॥
अस्य द्वात्रिंशद्वर्णादि अष्टाक्षरसमुद्भवाः।
नारसिंहं सहस्राणं जप्त्वा मन्त्रमिमं जपन्॥
ऐहिकं फलमासाद्य विष्णुलोकञ्च गच्छति।
एवं नियमयुक्तस्य साधितोऽयं मनूत्तमः॥
कामधुक् कल्पवृक्षश्च न ते वन्ध्यावधूरिव।

वैरञ्चे,—

अस्मिन् मन्त्रे रतिः स्यादिति पुरुषवरो नार्चयेदन्यदेवान्
बध्नीयादञ्जलिं वाप्यवनतशिरसा माल्यजातं सुगन्धि।
नैवेद्यं नापि दद्याज्जपति न च परं साधयेदन्यमन्त्रं
हन्याद् विप्रञ्च पूज्यं गुरुमतिभवति प्रायशो नैव दोषः॥

यः पूज्यं गुरुं हन्यात् विप्रं अति अत्यन्तं हन्यात् ताड़येदित्यर्थः।

नाश्नीयात् तैलसिक्तः स्वपतु च विरहे नाभिसि स्त्रीसमेतः
स्वप्नं पश्यत्यनुभवति विधौ दूषयेन्नैव नारीम्।
छायां नैवाश्रयीत क्षणमपि मतिमान् दीपखट्वाङ्गनानां
मार्जारस्तम्भमार्जन्नजखरशशकोष्ट्रवैभीतिकानां॥
शाखोटारीष्टकानामपि खलु करजाभयानां तरूणां
प्राच्योदीच्यादिजातीनपि विकलगुणान् न स्पृशेत् सूतिकांश्च।
माञ्जिष्ठं चारनालं लसुनमपि तथा गृञ्जनं कांस्यसुक्तिं
तुम्बं तैलावसिक्तं यवसमपि नरो वर्जयेद् यातयामम्॥
पीतं स्वादुनिपुणमपि परिवसितं केवलञ्चैव लोणं
विण्मूत्रच्छर्द्दिरेतांस्यपि रसनया न स्पृशेत् मन्त्रजापी।

नाश्नीयाद् दधि ललितं निशासु विल्वं
नोच्छिष्टं घृतरहितं तथाच मन्त्री।
नाभुञ्जयात् प्रतिपदि नैव षष्ठ्यां
नवम्यां पञ्चम्यां प्रयतमना अथेह भक्तः॥

योगो नावश्ययोनावपि खलु मतिमानन्ययोनौ च रेतो-
निष्पत्तिं नैव कुर्य्यात् पयसि पथि वने देवतानां समीपे।
आरामे चैत्यवृक्षे सदसि बहुजने रङ्गभूमौ गुरूणां
……………हुतवहसदने नैव गच्छेच्च गोष्ठम्॥

शून्यागारे पथि च विपिने केवलञ्चैव भूमौ
सन्ध्याकाले स्फटिकशयने न स्तुते वा कटे वा।
निद्रां गच्छेन्न खलु निभृते प्राङ्गणे वाप्युदग्वा
प्रत्यग् वा विन्यसेत्तु न शिरः केवलं मन्त्रजापी॥

धान्यगोगुरुहुताशनराणां न स्वपेदुपरि नाप्यनु वंशे ।
नान्धकारभवने च न नग्नो नार्द्रपाणिचरणोऽप्यमुनिर्वा ॥
वेदस्मृत्योर्विरोधं क्वचिदपि विषये नैव कुर्य्याच्च मन्त्री ।
लोकादृष्टिश्च वश्ये करणमपि तथा तीव्रदुःखात्मकञ्च ॥*

तथा,—

सकलीकृतविग्रहोऽमुना नरसिंहोऽहमिति स्मरेद् बुधः ।
परमायुधभूषणायुतामपि मुद्रां परिकल्पयेत् तनौ ॥

शङ्खारिशार्ङ्गसगदत्रिशिखाशुगाज-
श्रीवत्सकौस्तुभकिरीटवनस्रगाद्याः ।
मुद्रा हरेः प्रियतराः स्वतनौ तु सद्यः
सान्निध्यतर्पणमभूदनया नराणाम् ॥

अत्र शङ्खादिमुद्राणां हस्तेन दर्शनम्। स्वदेहे तिलकेन लिखनमित्यन्ये। सकलीकरणञ्च प्रयोगे वक्ष्यते तच्चावश्यकं तदभावे दोषमाह ।

अन्यथाग्रहणे भवन्ति पुंसां स्मृतिविभ्रान्तिरुपाधिवित्तनाशाः।
सुखमित्रकलत्रपुत्रहानि र्भविता न विचारणीयमस्ति ॥

अन्यथाग्रहणञ्च वक्ष्यमाणसकलीकरणसकलज्ञानविरहः ।

अथोपासनक्रमः ।

रजन्यन्तिमे यामे उत्थायाचम्य प्राणायामभूतशुद्धी कृत्वात्मानं श्रीनृसिंहं ध्यात्वा स्वहृदये अष्टदलपद्मे भक्त्या कियत्कालं ध्यान-

* मूलपुस्तकधृत "वैरञ्च" इतिनामकग्रन्थस्य संवादाप्राप्तेस्तदुद्धृतान्येतानि पद्यानि यथायथमेव रक्षितानि। सं

शतकोक्तवक्ष्यमाणमार्गेण श्रीनृसिंहध्यानम्। शिरसि शुक्लेऽब्जे द्विनेत्रं द्विभुजं गुरुं ध्यात्वा

नमोऽस्तु गुरवे तुभ्यं शुद्धज्ञानस्वरूपिणे ।
यस्य वाक्यामृतं हन्ति विषं संसारसंज्ञितम् ॥

इति नमस्कारः ।

तत्र स्नानादिकम् ।

स्मार्त्तान् ब्राह्ममुहूर्त्तोक्तानाचारान् कृत्वा स्नानतर्पणोपयोगिवस्तून्यादाय तीर्थगमनम्। तत्र सर्व्वं स्थापयित्वा प्रार्थना,—

देवता मुनयः प्रेता भूतानि च यथाक्रमम् ।
अत्रासतां यथाशक्ति तर्पयिष्यामि वो जलम् ॥

मृदमस्त्रेणाष्टधाभिमन्त्र्य खननं प्राङ्मुखस्योदङ्मुखस्य वा। ताञ्च स्नानार्थं शौचार्थञ्च द्विधा कृत्वा स्नानार्थमृदं शुद्धदेशे संरक्ष्य शौचार्थमृदा विण्मूत्रशौचं कृत्वा दन्तधावनं विधाय स्मार्त्तविधिना तर्पणान्तं स्नानं कृत्वा तान्त्रिकस्नानारम्भः। स्नानार्थमृदं त्रिधा विभज्य एकेन भागेन कक्षद्वयपार्श्वद्वयकटिगुह्यसर्व्वाङ्गक्षालनम्। वस्त्रक्षालनम्। पुनराचमनम्। द्वितीयमृद्भागं वामहस्ते कृत्वा मूलेनाष्टधाभिमन्त्र्य पुनस्तां त्रिधा विभज्य प्रथमभागेनास्त्रेण विशुद्धिः (शिरोऽङ्गस्य)। द्वितीयभागेन हृदयाद्यङ्गस्थाने लेपनम्। यस्य यावदङ्गम्। तृतीयभागेन मूलमन्त्रेणापादतलमस्तकं लेपनम्। जले प्रविश्य कराग्रस्थदर्भाग्रान् जले संयोज्य तीर्थान्यावाह्य गङ्गादिनाम्नैव कृत्रिमादिगङ्गादितीर्थावाहनम्। गङ्गायै नमः। गङ्गे त्व-

मेहीति पुनरपि तीरगमनम् । जलं सम्पूज्यमूर्त्तिमयत्वेन ध्यानम् । स्वात्मन इष्टदेवमयत्वेन (च) ध्यानम् । आचमनम् । श्रोत्रनासे पिधाय वक्रस्याईजले निमज्य मूलमन्त्रं स्मृत्वा मज्जनम् । उन्मज्याचम्य तीरं गत्वा पूर्व्वंस्थापितमृदस्तृतीयं भागं त्रिविधा विभज्य वस्त्रचालनार्थं द्वितीयभागं स्थापयित्वा प्रथमभागेन हृदयाद्यङ्गस्थाने लेपनम् । तृतीयेन सर्व्वाङ्गलेपनं कृत्वा जले प्रविश्य मूलमन्त्रेणान्तर्जलजपं कृत्वा उन्मज्य स्वात्मन इष्टदेवं ध्यात्वा शिरस्यभिषेकः । स च कलशमुद्रया मुष्ट्योर्लग्नयोरङ्गुष्ठतर्ज्जन्यौ वहिः कृत्य तर्ज्जन्यग्रेऽङ्गुष्ठाग्रे संयोगरूपया । आपोहिष्ठेति ऋक्त्रयेणाभिषेकत्रयं द्रुपदादिमन्त्रेणैकः शन्न आपइत्यनेनापरः अघमर्षणेनैकः पुनर्भूमेत्यादिभिर्नवभिर्मन्त्रैर्नवाभिषेकाः । निमज्योत्थाय पुनरेवमभिषेकः । इति वारत्रयम् । तूष्णीं पञ्चवारं निमज्योत्थायाचम्य तीरं गत्वा वस्त्रपरिधानम् । यथाविधिसन्ध्योपासनान्ते मूलमन्त्रपञ्चविंशतिवारजपेन मन्त्रसन्ध्या । मूलमन्त्रजपेन ब्रह्मयज्ञः ।

अथ तान्त्रिकतर्पणम् ।

तिलतण्डुलयवान्यतममिश्रतोयेन देवांस्तर्पयामि इति तर्पणम् । ब्रह्म तर्पयामि ब्रह्मर्षींस्तर्पयामि तिलतण्डुलतोयेनाञ्जलिद्वयम् । मनुष्यर्षिगणांश्च तर्पयामीति तिलतण्डुलतोयेनाञ्जलिः । तिलोदकेन पितॄंस्तर्पयामि पितामहांस्तर्पयामि इत्यादिक्रमेण वर्गत्रयतर्पणम् । सर्व्वभूतगणांस्तर्पयामीति

तिलोदकेन । इतरभूतानि तर्पयामीति केवलोदकेन । यवतण्डुलान्यतमोदकेन आधारशक्तिप्रभृतिपीठदेवतानां तर्पणम् । मूलेन स्वेष्टदेवतर्पणम् । आवरणदेवताविश्वक्सेनतर्पणम् । आर्द्रवस्त्रं निष्पीड्य दासवर्गं तर्पयामीति तर्पणम् । अवशिष्टमृदा वस्त्रचालनम् । तीर्थविसर्ज्जनम् । द्विराचम्य देवपितृमनुष्यभूतानि स्वस्थानं गच्छतेति विसृज्य मूलमन्त्रेण तीरचालनम् । अर्घ्यहस्तस्य देवगृहगमनम् ।

अथ पूजारम्भः ।

आचम्य प्रविश्य मूलमन्त्रेण प्रदक्षिणं कृत्वा पूजारम्भः । (एतादृशस्नानाशक्तस्य ब्रह्मज्ञानं मानसस्नानम् । तत्राशक्तस्य सर्व्वेन्द्रियाणां विषयेभ्यः प्रत्याहृत्यात्मन्यवस्थानं द्वितीयं मानसस्नानम् । मूलमन्त्रजपो जाप्यस्नानम् । अन्ये श्रुताध्ययनसम्पन्नं स्नात्वा स्पर्शनं संस्कृतस्नानम् । प्रार्थिता विप्रा यद् वा घोषणं कुर्व्वन्ति तव स्नानं परिपूर्णमस्त्विति तदाघोषणस्नानम् । तव स्नानं जातमिति यदा गुरोराज्ञा तदाज्ञास्नानम् । इत्यशक्तविषयाणि ।)

अत्र ( ) बन्धनीमध्यस्था एते अंशा नैतत्स्थानस्य विषयाः प्रकरणेन सहासङ्गतत्वात् परन्तु एतत्पूर्व्वपृष्ठायामभिविहितस्नानप्रकरणान्तर्गता एवेति प्रतीयन्ते । स्थापिताश्चेह मूलपुस्तकानामनुसारेण । सं.

सूर्य्यार्घ्यं दत्वा प्रथमं द्वारपालपूजा। शङ्खमस्त्रेण प्रोक्ष्य प्रणवेन जलं पूरयित्वा तेनैव गन्धपुष्पे दत्वा शङ्खं स्पृष्ट्वा प्रणवदशवारजपेनार्घ्यं संस्कृत्य तज्जलेनास्त्रेण द्वारं प्रोक्ष्य गन्धपुष्पाभ्यां द्वारपालपूजा। दक्षिणशाखायां मायाशक्तिं वामशाखायां चित्‌शक्तिं सम्पूज्य दक्षिणशाखायां चण्डजयमातङ्गगणानाम्। उत्तरे प्रचण्डविजयविधातृयमुनालक्ष्मीः। तद्दक्षिणवामयोः शङ्खपद्मनिधी। देहल्यां क्षेत्रपालस्य। समुदायेन वा द्वारपालगणेभ्यो नम इति देहल्यामस्त्रं सम्पूज्य ततोदिव्यदृष्ट्यवलोकनाद्दिव्यविघ्ननिवारणम्। अस्त्राद्भिरन्तरीक्षविघ्ननिवारणम्। पार्ष्णिघातत्रयेण भौमविघ्ननिवारणम्। देहलीवामशाखां किञ्चित् स्पृशताङ्गसङ्कोचेन दक्षिणाङ्घ्रिणा प्रवेशनम्। नैर्ऋत्यां दिशि मध्ये वा वास्त्वधिपतये नमः। ब्रह्मणे नमः। प्राङ्मुखतयोदङ्मुखतया वा पद्मासनाद्येकतमासनेन मृद्वासने उपवेशनम्। दक्षिणे भागे पूजाद्रव्यस्थापनं सुवासितजलकुम्भस्य वामे पश्चात् करप्रक्षालनान्यपात्रम्। परितो घृतप्रज्वलितदीपस्थापनम्। दर्पणचामरतालवृन्तादिराजोपचारसन्निधापनम्। अभीष्टदेवस्य परब्रह्मत्वेन ध्यानम्। स्वयं तन्मयत्वेन। वामे गुरुभ्यो नमः दक्षिणे गणेशाय नम इति नमस्कारः। मध्ये ईश्वराय नमः शेषाय नमः श्रीनृसिंहाय नमः इति नमस्कृत्य "भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।

ॐशान्तिः शान्तिः शान्तिः।" प्रथमाभीमिति (?) शक्तिं यागागाररक्षार्थं जालत्वेन प्रकल्प्य अस्त्रेण तालत्रयमूर्द्ध्वोर्द्ध्वं कृत्वा तेनैव दिग्बन्धनम्। ऐन्द्रीं दिशं बध्नामीति नमश्चक्राय स्वाहेति यथालिङ्गं दिग्बन्धनं नाराचमुद्रया। ॐ नमो महासुदर्शनाय महाचक्राय महाज्वालाय दीप्तरूपाय सर्व्वतो रक्ष रक्ष हुं फट् स्वाहेति। अस्य परितोऽग्निप्राकारचिन्तनम्। आसनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः श्रीकूर्म्मो देवता आसनोपवेशने विनियोगः इत्यासनं धृत्वा

पृथिवि त्वं धृता लोका देवि त्वं विष्णुना धृता।
त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम्॥

इति प्रार्थना। आसनशक्तये कमलासनाय नम इति स्वासनमभिमन्त्र्य भूतशुद्धिः।

करकच्छपिकां बद्ध्वा द्वादशान्तपदे भुवे।
सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत्॥
सोऽहं मन्त्रेण भूतानां सूक्ष्मात् पात्रञ्च (?) चिन्तयेत्।
कण्ठभ्रूमध्यपर्य्यन्ते षड्विन्दुयुतमण्डलम्॥
कृष्णं वायोस्तत्र वीजं विचिन्त्य च तदुत्थितैः।
मरुद्भिः शोषयेद् देहं कल्पशेषसमं बुधः॥
नाभ्यादिकण्ठपर्य्यन्ते स्थानेऽग्नेर्वह्निमण्डलम्।
रक्तं त्रिकोणरंवीजयुक्तं स्वस्वस्तिकं ततः॥
तस्य तेनाग्निना देहं कल्मषेण समं दहेत्।
जान्वादिनाभिपर्य्यन्ते स्थानेऽपामर्द्धचन्द्रवत्॥

शुक्लं पद्मान्वितं गङ्गामण्डलं तत्र वं स्मरेत्।
तदुद्यताम्रताम्भोभिः प्लावयेत् सलिलं ततः॥
तत्र एकार्णवध्यानं भुव आब्रह्मरन्ध्रकम्।
आकाशमण्डलं धूम्रं हं वीजाव्यञ्च मध्यजम्॥
विचिन्त्य विपुलाकाशं तदुत्थं चिन्तयेद् बुधः।
पादादिजानुपर्य्यन्तं भूस्थाने वज्रलाञ्छितम्॥
चतुरस्रं भुवोविम्बं पीतं लं वीजमेव तु।
प्रलयाम्भोनिधौ ध्यात्वा ब्रह्माण्डञ्च तदुत्थितम्॥
सौवर्णप्रभवेणैनं द्विधाकृत्वा तु कल्पयेत्।
विचिन्त्य भूतसूक्ष्माणि समानीय परात्मनः॥
कल्पयेदात्मनो देहं कल्मषेण विनोद्य तम्।
हंसमन्त्रेण चात्मानमानयेत् परमात्मनः॥

अथवा गृहस्थो न दहेदिति गृहस्थस्य देहदाहात्मकभूतशुद्धावनधिकारात् एवंविधा भूतशुद्धिः,—धर्म्मकन्दं ज्ञाननालमैश्वर्य्याष्टदलं वैराग्यकर्णिकं हृदयाम्भोजमुकुलितं ध्यात्वा तारेण विकसितं कृत्वा तत्कर्णिकास्थं चैतन्यात्मकं जीवं प्लुतप्रणवोच्चारणेन सुषुम्नानाड़ीमार्गेण निर्गमय्य द्वादशान्तस्थसहस्रदलपद्मस्थपरमात्मना सहैकीकृत्य स्वशरीरकल्मषजातं पुरुषाकारेण कुक्षौ विचिन्त्य—

ब्रह्महत्याशिरस्कन्तु स्वर्णस्तेयभुजद्वयम्।
सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम्॥

तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम्।
उपपातकरोमाणं रक्तश्मश्रुविलोचनम्॥
खड्गचर्म्मधरं कृष्णं कुक्षौ पापं विचिन्तयेत्।

तं पापपुरुषं नाभिप्रदेशस्थषट्कोणषड्विन्दुलाञ्छितकृष्णवर्णवायुमण्डलान्तर्गतयमितिवायुवीजोत्थितवायुना शोषयित्वा पुनस्तं पापपुरुषं हृदयस्थितत्रिकोणस्वस्तिकाङ्किताग्निमण्डलान्तःस्थितरमित्यग्निवीजोत्थिताग्निना दाहयित्वा भस्म दक्षिणनासाद्वारा निःसार्य्य भ्रूमध्यस्थितार्द्धचन्द्राकारपद्माङ्कितशुक्लवर्णामृतं मण्डलान्तःस्थितवमित्यमृतवीजोत्थितामृतधारया निष्कल्मषं स्वशरीरमाप्लाव्य शुद्धं कृत्वा द्वादशान्तस्थितमात्मानं तेन सह सुषुम्नानदीमार्गेण पूर्व्वोक्तहृदयकमले प्रणवेन स्थापयेत्। भूतशुद्ध्यनन्तरं स्वस्य प्राणप्रतिष्ठा। प्राणप्रतिष्ठामन्त्रस्य ब्रह्मा ऋषिः विराट् छन्दः प्राणो देवता ॐ वीजं स्वाहा शक्तिः आं ह्रीं क्रौं यं रं लं वं शं षं सं हं लं क्षं ह्रीं हं सः सोऽहं अमुष्य प्राणा इह प्राणा अमुष्य जीव इह स्थितः अमुष्य सर्व्वेन्द्रियाणि मनोबुद्धिरहङ्कारश्चित्तं पृथिव्यप्तेजोवाय्वाकाशशब्दस्पर्शरूपरसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थजीवप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। ह्रौं हं सः सोऽहं स्वाहा। अमुष्यपदस्थाने मन्त्रिपदं दत्वा स्वस्य प्राणप्रतिष्ठा।

अथ करशुद्धिः ।

गन्धेन करावन्योन्यं घर्षयित्वाऽस्त्रेण तालत्रयदिग्बन्धनम् । मन्त्रराजनृसिंहमन्त्रस्य ब्रह्मऋषिरनुष्टुप् छन्दः श्रीनृसिंहो देवता ह्रं वीजं ईं शक्तिः पूजायां विनियोग इति मूलमन्त्रवारत्रयजपेन दक्षिणनासायां प्राणान् रेचयित्वा पुनर्मूलमन्त्रवारत्रयजपेन वामनासायां पूरणं कृत्वा मूलमन्त्रवारत्रयजपेन निश्चलवामनासापुटद्वयरोधेन कुम्भकं कुर्य्यात् । अपानाकुञ्चनञ्च कुम्भककाले । एवं पुनर्वारद्वयम् ।

ततो मातृकान्यासः ।

मातृकामन्त्रस्य ब्रह्मऋषि र्गायत्रीच्छन्दः सरस्वती देवता न्यासे विनियोगः ।

ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गण्डयोः ।
ओष्ठदन्तोत्तमाङ्गास्ये दोःपत्सन्ध्यग्रकेषु च ॥
पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंऽशके ।
ककुद्यंशे च हृत्पूर्व्वपाणिपादयुगे तथा ॥
जठराननयो र्न्यस्येन्मातृकार्णान् यथाक्रमात् ।

अं नम इति ललाटे आं नम इति मुखवृत्ते इं नम इति नेत्रे ईं नम इति वामनेत्रे उं नम इति कर्णे ऊं नम इति वामकर्णे ऋं नम इति नासिकायां ॠं नम इति वामनासिकायां ऌं नम इति गण्डे ॡं नम इति वामगण्डे एं नम इत्योष्ठे ऐं नम

इत्यधरोष्ठे ओं नम इति दन्तपंक्तौ औं नम इत्यधरदन्तपंक्तौ अं नम इति शिरसि अः नम इत्यास्ये कं नम इति बाहुमूले खं नम इति खर्परसन्धौ गं नम इति मणिबन्धसन्धौ घं नम इत्यङ्गुलिमूलेषु ङं नम इत्यङ्गुल्यग्रेषु । एवं चं नमः छं नमः जं नमः झं नमः ञं नमः । टं नमः उरुमूले ठं नमः जानुसन्धौ डं नमः गुल्फसन्धौ ढं नमः पादाङ्गुलिमूले णं नमः पादाङ्गुल्यग्रकेषु । तं नमः वामोरुमूले थं नमः वामजानुसन्धौ दं नमः वामगुल्फसन्धौ धं नमः वामपादाङ्गुलिमूले । नं नमः वामपादाङ्गुल्यग्रेषु । पं नमः दक्षिणपार्श्वे फं नमः वामपार्श्वे बं नमः पृष्ठे भं नमः नाभौ मं नमः उदरे । यं त्वगात्मने नम इति हृदि रं असृगात्मने नम इति दक्षिणांशे लं मांसात्मने नम इति ककुदि वं मेदआत्मने नम इति वामांशे शं अस्थ्यात्मने नम इति हृदादिदक्षिणबाहौ षं वज्जात्मने नम इति हृदादिवामबाहौ सं शुक्रात्मने नम इति हृदादिदक्षिणपादे हं प्राणात्मने नम इति हृदादिवामपादे ळं शक्त्यात्मने नम इति जठरे क्षं चक्रात्मने नम इति मुखे । इति सर्व्वाङ्गे व्यापकन्यासः । ध्यानम्

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
देशां भास्वत्कपर्द्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणां पद्मसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥

सोऽहमस्मीति ध्यानम् । तत्र एष्वेव स्थानेषु केशवादिन्यासः स च कामवीजपूर्व्वकः । श्रीकामस्य श्रीवीजपूर्व्वकः ।

अमुमेव रमापुरःसरं भजते यो मनुजो विधिं बुधः ।
समुपेत्य रमां प्रथीयसीं पुनरन्ते हरितां व्रजत्यसौ ॥

समुपेत्य रमामन्ते परं पदं यातीति वचनात् । प्रजापतिः । गायत्री । अर्द्धलक्ष्मीश्वरः ।

हस्तैर्विभ्रत्सरसिजगदाशङ्खचक्राणि विद्यां
पद्मादर्शौ कनककलशं मेघविद्युद्विलासम् ।
वामोत्तुङ्गस्तनमविरलाकल्पमाश्लेषलोभा-
देकीभूतं वपुरवतु नः पुण्डरीकाक्षलक्ष्म्योः ॥

ललाटादिस्थानेषु अं श्रीं केशवाय कीर्त्यै नमः । ॐमित्यादि सर्व्वत्र । आं श्रीं नारायणाय कान्त्यै नमः । इं श्रीं माधवाय तुष्ट्यै नमः । ईं श्रीं गोविन्दाय पुष्ट्यै नमः । उं श्रीं विष्णवे धृत्यै नमः । ऊं श्रीं मधुसूदनाय क्षान्त्यै नमः । ऋं श्रीं त्रिविक्रमाय क्रियायै नमः । ॠं श्रीं वामनाय दयायै नमः । ऌं श्रीं श्रीधराय मेधायै नमः । ॡं श्रीं हृषीकेशाय हर्षायै नमः । एं श्रीं पद्मनाभाय श्रद्धायै नमः । ऐं श्रीं दामोदराय लज्जायै नमः । ओं श्रीं वासुदेवाय लक्ष्म्यै नमः । औं श्रीं सङ्कर्षणाय सरस्वत्यै नमः । अं श्रीं प्रद्युम्नाय प्रीत्यै नमः । अः श्रीं अनिरुद्धाय रत्यै नमः । कं श्रीं चक्रिणे जयाय नमः । खं श्रीं गदिने दुर्गायै नमः । गं श्रीं शार्ङ्गिणे प्रभायै नमः । घं श्रीं खड्गिने सत्यायै नमः । ङं श्रीं शिखिने चण्डायै नमः । चं श्रीं हलिने वाण्यै नमः । छं श्रीं मुषलिने विनाशिन्यै नमः । जं श्रीं शूलिने विजयायै नमः । झं श्रीं पाशिने विरजायै नमः ।

ञं श्रीं अङ्कुशिने विश्वायै नमः । टं श्रीं मुकुन्दाय वरदायै नमः । ठं श्रीं सुनन्दाय सुनन्दायै नमः । डं श्रीं नन्दिने स्मृत्यै नमः । ढं श्रीं नराय ऋद्ध्यै नमः । णं श्रीं नरकजिते समृद्ध्यै नमः । तं श्रीं हरये शुद्ध्यै नमः । थं श्रीं कृष्णाय बुद्ध्यै नमः । दं श्रीं सत्याय भक्त्यै नमः । धं श्रीं सात्वताय मत्यै नमः । नं श्रीं शौरये क्षमायै नमः । पं श्रीं शूराय रमायै नमः । फं श्रीं जनार्द्दनाय उमायै नमः । बं श्रीं भूधराय क्लेदिन्यै नमः । भं श्रीं विश्वमूर्त्तये क्लिन्नायै नमः । मं श्रीं वैकुण्ठाय वसुदायै नमः । यं त्वगात्मने पुरुषोत्तमाय वसुधायै नमः । रं श्रीं रक्तात्मने बलिने परायै नमः । लं श्रीं मांसात्मने बलानुजाय परायणायै नमः । वं श्रीं मेदआत्मने वामनाय सूक्ष्मायै नमः । शं श्रीं अस्थ्यात्मने वृषघ्नाय सन्ध्यायै नमः । षं श्रीं मज्जात्मने वृषाय प्रज्ञायै नमः । सं श्रीं शुक्रात्मने हंसाय प्रभायै नमः । हं श्रीं प्राणात्मने वराहाय निशायै नमः । ळं श्रीं शक्त्यात्मने विमलाय अमोघायै नमः । क्षं श्रीं क्रोधात्मने नरसिंहाय विद्युतायै नमः ।

अथ तत्वन्यासः ।

इत्यच्युतोक्ततत्वात्मने नम इत्यादिरूपेण इति सम्प्रदायः । मं नमः पराय जीवतत्वात्मने नमः । भं नमः पराय प्राणतत्वात्मने नमः । इति द्वयं सकलवपुषि । बं नमः पराय मतितत्वात्मने

नम इति हृदये । फं नमः पराय अहङ्कारतत्वात्मने नम इति हृदि । पं नमः पराय मनस्तत्वात्मने नम इति हृदि । नं नमः पराय शब्दतत्वात्मने नमः शिरसि । धं नमः पराय स्पर्शतत्वात्मने नमः मुखे । दं नमः पराय प्राणतत्वात्मने नमः प्राणे । थं नमः पराय रसतत्वात्मने नमः गुह्ये । तं नमः पराय गन्धतत्वात्मने नमः पादयोः । णं नमः पराय श्रोत्रतत्वात्मने नमः कर्णयोः । ढं नमः पराय त्वक्तत्वात्मने नमः चर्म्मणि । डं नमः पराय चक्षुस्तत्वात्मने नमः चक्षुषोः । ठं नमः पराय रसनातत्वात्मने नमः जिह्वायाम् । टं नमः पराय प्राणतत्वात्मने नमः प्राणे । ञं नमः पराय वायुतत्वात्मने नमः मुखे । झं नमः पराय पाणितत्वात्मने नमः करयोः । जं नमः पराय पादतत्वात्मने नमः पादयोः। छं नमः पराय पायुतत्वात्मने नमः पायौ । चं नमः परायोपस्थतत्वात्मने नमः उपस्थे । ङं नमः पराय आकाशतत्वात्मने नमः मूर्द्ध्नि । घं नमः पराय वायुतत्वात्मने नमः मुखे । गं नमः पराय तेजस्तत्वात्मने नमः हृदि । खं नमः पराय वाततत्वात्मने नमः गुह्ये । कं नमः पराय पृथिवीतत्वात्मने नमः पादयोः । शं नमः पराय हृत्पुण्डरीकतत्वात्मने नमः हृदि । हं नमः पराय द्वादशकलात्मने सूर्य्यमण्डलाय नमः हृदि । सं नमः पराय षोड़शकलात्मने सोममण्डलाय नमः हृदि । रं नमः पराय दशकलात्मने वह्निमण्डलाय नमः हृदि । मण्डलत्रये तत्वपदाभाव इत्याहुः । यं नमः पराय परमेष्ठितत्वात्मने वासुदेवाय नमः शिरसि । षं नमः पराय पुंतत्वात्मने सङ्कर्षणाय नमः मुखे । लं नमः पराय विश्वतत्वात्मने प्रद्युम्नाय नमः हृदि । वं नमः पराय निवृत्तितत्वात्मने अनिरुद्धाय नमो गुह्ये । लं नमः पराय सर्व्वतत्वात्मने नारायणाय नमः पादयोः । क्ष्रौं नमः पराय कोपतत्वात्मने नृसिंहाय नमः । इति तत्वन्यासः ।

अथ प्राणायामः ।

तत्राधारभावना ।

आधारनाभिपर्य्यन्ते न्यासचतुष्टयम् । आधारशक्तये नमः । महामण्डुकाय नमः । कालाग्निरुद्राय नमः । कूर्म्माय नमः । दक्षांशे अधर्म्माय नमः । वामांशे ज्ञानाय नमः । वामोरुमण्डले वैराग्याय । दक्षोरुमूले ऐश्वर्य्याय । अधर्म्माय नमः मुखे । वामपार्श्वे अज्ञानाय । नाभौ अवैराग्याय । दक्षिणपार्श्वे अनैश्वर्य्याय । हृदि अनन्ताय । आनन्दकन्दाय । सम्बिन्नालाय पद्माय । प्रकृतिपत्रेभ्यः । विकारकेशरेभ्यः । पञ्चाशद्वर्णवीजादिकर्णिकायै । अं आदित्यमण्डलाय । उं सोममण्डलाय । मं वह्निमण्डलाय । सं सत्वाय । रं रजसे । तं तमसे । आं आत्मने नमः । अं अन्तरात्मने नमः । पं परात्मने । ह्रीं ज्ञानात्मने मुखे विमलायै । वामांशे उत्कर्षिण्यै । वामपार्श्वे ज्ञानाय । वामोरुमूले क्रियायै । नाभौ योगायै । दक्षोरुमूले प्रज्ञायै । दक्षिणपार्श्वे सत्यायै । दक्षांशे ईशानायै । हृदि अनुग्रहायै । ततः पीठमन्त्रन्यासः,—

ॐनमो भगवते विष्णवे वासुदेवाय सर्व्वात्मसंयोगपीठात्मने नमः। इत्याधारभावना।

हृदयभावना।

हृत्पद्मे अव्यक्तं परमाकाशं चिन्तयित्वा तन्मध्ये स्फुरत्तामरसप्रख्यं प्रणवं विचिन्त्य तदुत्थितं विद्युत्पुञ्जसमप्रभं मूलमन्त्रात्मकं तेजश्चिन्तयेत्। इति हृदयभावना।

हृत्पद्मगतप्रणवात्मकतेजसो निर्गतं दीपात् दीपान्तरमिव मूलमन्त्रात्मकं तेजो विचिन्त्य निश्वासमार्गेण करतलद्वयगतं चिन्तयेत्।

ततः करन्यासः।

उग्रं वीरमङ्गुष्ठाभ्यां नमः। महाविष्णुं तर्ज्जनीभ्यां स्वाहा। ज्वलन्तं सर्व्वतोमुखं मध्यमाभ्यां वषट्। नृसिंहं भीषणमनामिकाभ्यां हुम्। भद्रं मृत्युमृत्युं कनिष्ठाभ्यां वौषट्। नमाम्यहं करतलपृष्ठाभ्यामस्त्राय फट्। पञ्चाङ्गपक्षे पादचतुष्टयेनानामिकापर्य्यन्तम्। समस्तेन कनिष्ठाभ्यां फट्। इति हस्तभावना।

अथ देहभावना।

मूलतेजोयुक्तहस्ताभ्यां मूलमन्त्रतेजोव्याप्तं देहं व्यापकन्यासमुद्रया कल्पयेत्। ततोन्यासः,—उग्रं वीरं हृदयाय नमः। महाविष्णुं शिरसे स्वाहा। ज्वलन्तं सर्व्वतोमुखं शिखायै वषट्। नृसिंहं भीषणं कवचाय हुम्। भद्रं मृत्युमृत्युं नेत्राभ्यां वौषट्। नमाम्यहं अस्त्राय फट्। पञ्चाङ्गपक्षे चतुर्भिः पादैश्चत्वारि समेतैस्तैरस्त्रम्।

अथाक्षरन्यासः।

सशिरोललाटदृग्युगमुखकरपदसन्धिकेषु साग्रेषु।
उदरहृद्दोर्गलपार्श्वेषु पृष्ठे ककुदि क्रमान्न्यसेद् वर्णान्॥

"प्रत्यक्षरमुभयत ॐकारो भवतीत्यक्षराणां न्यासमुपदिशन्ति ब्रह्मवादिन" इति श्रुतेः। ॐ उं ॐ इति शिरसि। ॐ ग्रं ॐ ललाटे। एवं क्रमेण। एवं न्यासः। ततो मन्त्रस्याद्यद्वादशाक्षरेषु द्वादशाक्षरमन्त्रस्यैकैकाक्षरयोगः। ततः अष्टाक्षरे अष्टाक्षरस्यैकाक्षरयोगः। पुनश्चेद् द्वादशाक्षरेषु द्वादशाक्षरस्यैकैकाक्षरयोगः। एवं न्यासः। ॐ ॐ उं ॐ शिरसि। ॐ नं ग्रं ॐ ललाटे। ॐ मों वीं ॐ चक्षुषि। एवं क्रमेण न्यासः।

मूर्द्धन्यक्ष्णोश्च वदने दोर्मूले हृदये तथा।
नाभिगुह्योरुजान्वन्तपादेषु पदशो न्यसेत्॥

अत्र जानु जङ्घा । तथा जानुनि पदं जङ्घायां पदमिति न्यासः ।

अथ नरसिंहरक्षाकरसान्निध्यकरसर्व्वरक्षाकरादिदशविधन्यासः । अथ प्रथममक्षरन्यासः । अङ्गुष्ठमूलमध्याग्रपर्व्वसु शेषाङ्गुलौ च हस्तयोरङ्गुष्ठादिक्रमेण त्रिंशदक्षराणि । करतलद्वये अक्षरद्वयम् । अथापरौ मूर्द्ध्नि शिरसि ललाटे भ्रुवोः नेत्रयोः नेत्राधः कपोलयोः दन्तपंक्त्योः चिवुके उत्तरोष्ठे कण्ठे नासिकायां दक्षिणभुजे वामभुजे हृदये सर्व्वतनौ नाभ्यां दक्षिणकरतले वामकरतले कटिस्थाने मेढ्रे उर्व्वोः जान्वोः जङ्घयोः पादाङ्गुलिषु सर्व्वसन्धिषु रोमकूपेषु रक्तास्थिमज्जासु । इत्यक्षरन्यासः ।

अथ द्व्यक्षरन्यासः ।

उग्रं पादयोः । वीरं गुल्फयोः । महा जान्वोः । विष्णुं कट्योः । ज्वलं नाभ्याम् । तं स हृदि । र्व्वतो बाह्वोः । मुखं कण्ठे । नृसिं चिवुके । हं भी दन्ते । षणं ओष्ठे । भद्रं गण्डयोः । मृत्यु कर्णयोः । मृत्युं नासिकयोः । नमा नेत्रे । म्यहं मूर्द्ध्नि ।

अथ पदन्यासः ।

मुखे मूर्द्ध्नि तथा नासाचक्षुःश्रोत्रे च विन्यसेत् ।
आस्ये च हृदये नाभौ कटिजानुपदेष्वपि ॥

मुखे मुखवृत्ते । आस्ये ओष्ठद्वयमध्ये ।

अथ चतुरक्षरन्यासः ।

पादाग्रे नयने श्रवणे नाभौ हृदि मूर्द्ध्नि बाह्वोः पादयोः ।

अथ पादन्यासः ।

मूर्द्ध्नि हृदि नाभौ सर्व्वाङ्गे ।

अथार्द्धन्यासः ।

मूर्द्ध्नि हृदयपर्य्यन्तं अर्द्धं हृदयात्पादपर्य्यन्तमर्द्धम् । ततः समस्तेन सर्व्वाङ्गन्यासः ।

अथ उग्रन्यासः ।

उग्रमुग्रं नमाम्यहमिति मुखे । वीरमुग्रं नमाम्यहमिति शिरसि । महाविष्णुमुग्रं नमाम्यहमिति घ्राणयोः । ज्वलन्तमुग्रं नमाम्यहमिति चक्षुषोः । सर्व्वतोमुखमुग्रं नमाम्यहमिति

श्रोत्रयोः। नृसिंहमुग्रं नमाम्यहमित्यास्ये। भीषणमुग्रं नमाम्यहमिति हृदि। भद्रमुग्रं नमाम्यहमिति नाभौ। मृत्युमृत्युमुग्रं नमाम्यहं नमाम्युग्रं नमाम्यहमहमुग्रं नमाम्यहमिति कट्यादिपादपर्य्यन्तम्। तेष्वेव स्थानेषु उग्रं नरसिंहं नमाम्यहं वीरं नरसिंहं नमाम्यहं महाविष्णुं नरसिंहं नमाम्यहं ज्वलन्तं नरसिंहं नमाम्यहं सर्व्वतोमुखं नरसिंहं नमाम्यहं नृसिंहं नरसिंहं नमाम्यहं भीषणं नरसिंहं नमाम्यहं भद्रं नरसिंहं नमाम्यहं मृत्युमृत्युं नरसिंहं नमाम्यहं नमामि नरसिंहं नमाम्यहमहं नरसिंहं नमाम्यहम्। इत्येकादशविधन्यासः।

अथ मन्त्रार्णोक्तो हरिन्यासः।

मन्त्राद्यवर्णं सविन्दुकं मूलाधारे तदुपरि नाभिपर्य्यन्तं वर्णचतुष्टयम्। तदुपरि भ्रूमध्यपर्य्यन्तं वर्णषट्कम्। ततो वर्णत्रयं नेत्रत्रितये ततो वर्णदशकं वा हृदयाङ्गुलीषु। वर्णद्वयं पादद्वये। ततोऽन्त्यवर्णं मूर्द्धादिपादपर्य्यन्तम्। अयं हरिन्यासो हरिसारूप्यप्रापकः। अस्य माहात्म्यं हरिरेव जानाति नापरः।

अक्षरसकलीकरणम्।

अथ वैरञ्चोक्त-नित्यात्मसकलीकरणमन्त्रात्मकदेवतानामैकीभावना। तत्र सर्व्वभूतात्मानं नरसिंहरूपिणमात्मानं मन्त्रान्त्यवर्णेन

हंकारेण ध्यात्वा म्यइतिवर्णं प्रकृतिरूपं महत्तत्वादुत्पन्नं स्वात्मनि चिन्तयेत्। नमा वर्णौ देहादिस्वात्मवृत्तिरूपावहंकारचित्तयोरुत्पन्नौ विचिन्त्य मृवर्णं निश्चयात्मकरूपमहङ्कारादुत्पन्नं विचिन्त्य त्यु वर्णं सङ्कल्पविकल्पात्मकमनोबुद्ध्योरुत्पन्नं स्वस्मिन् विचिन्तयेत्। मृवर्णात्मक आकाशः सर्व्वावकाशादुत्पन्न इति चिन्त्यः। त्युं वर्णात्मको वायुराकाशादुत्पन्न इति चिन्त्यः। स वायुः स्वशरीरे प्राणादिद्वारावस्थित इति। नृ वर्णात्मकं तेजो वायोरुत्पन्नं तस्य स्वशरीरे चिन्तनम्। णं वर्णात्मिका आपस्तेजस उत्पन्नाः स्वशरीरे विचिन्त्य ष-वर्णात्मिका भूमिरद्भ्य उत्पन्ना तस्याः स्वशरीरे चिन्तनम्। भी-वर्णात्मकं श्रोत्र आकाशादुत्पन्नं तस्य स्वशरीरे चिन्तनम्। सिं वर्णात्मकं चक्षुस्तेजस उत्पन्नं स्वशरीरे चिन्त्यम्। खं वर्णात्मकं घ्राणं पृथिव्या उत्पन्नं स्वशरीरे चिन्त्यम्। मुवर्णात्मकः शब्दो भूताद्यहङ्कारादुत्पन्नः स्वशरीरे चिन्त्यः। तो वर्णात्मकः स्पर्शः शब्दादुत्पन्नः स्वदेहे चिन्त्यः। र्वं-वर्णात्मकं रूपं स्पर्शादुत्पन्नं तत् स्वदेहे चिन्त्यम्। स वर्णात्मको रसो रूपादुत्पन्नः स्वदेहे चिन्त्यः। तं वर्णात्मको गन्धो रसादुत्पन्नः स्वदेहे चिन्त्यः। लं वर्णात्मिका वाचस्तेजसोऽहङ्कारादुत्पन्नाः स्वदेहे चिन्त्याः। ज्व-वर्णात्मकौ पाणी वाच उत्पन्नौ स्वदेहे चिन्त्यौ। ष्णुं वर्णात्मकौ पादौ पाणिरुत्पन्नौ स्वदेहे चिन्त्यौ। वि-वर्णात्मको पायुः पादादुत्पन्नः स्वदेहे चिन्त्यः। हा वर्णात्मक उपस्थः पायोरुत्पन्नः स्वदेहे चिन्त्यः। म-वर्णात्मकं वचनं वाच उत्पन्नं स्वदेहे चिन्त्यम्। रं वर्णात्मकमादानं पाणिरुत्पन्नं स्वदेहे चिन्त्यम्। वी-वर्णात्मकं गमनं पादादुत्पन्नं स्वदेहे

चिन्त्यम्। ग्रं वर्णात्मको विसर्गः पायोरुत्पन्नः स्वदेहे चिन्त्यः। उ-वर्णात्मक आनन्द उपस्थादुत्पन्नः स्वदेहे चिन्त्यः। इत्थं चिन्तयित्वा द्वात्रिंशद्रूपं जगत् स्वदेहे द्वात्रिंशदक्षरमये कल्पयित्वा विराट्रूपेण श्रीनृसिंहोऽहमिति चिन्तयेत्। पुनश्च मन्त्रस्यानुलोमपाठेन उ-वर्णात्मकानन्दस्य ग्रं वर्णात्मके विसर्गे लय एवं क्रमेणाविद्याशक्तिलयपर्य्यन्तं चिन्तयित्वा चिदात्मतया नृसिंहोऽहमिति चिरं तिष्ठेत्। पुनर्म्मन्त्रप्रतिलोमपाठेन यथोक्तरूपेणोत्पत्तिं कल्पयित्वा सर्व्वात्मको नृसिंहोऽहमिति चिन्तयेत्। इत्यक्षरसकलीकरणम्।*

अथ पदसकलीकरणम्।

प्रथमपदं भूः। द्वितीयं जलम्। तृतीयं तेजः। चतुर्थं वायुः। पञ्चममाकाशः। षष्ठं मनः। सप्तमं बुद्धिः। अष्टममहङ्कारः। नवमं चित्तम्। दशमं मूलप्रकृतिः। एकादशमात्मा। अहमात्मनि। नमामि रूपा प्रकृतिः। प्रकृतेर्मृत्यु-मृत्युरूपं चित्तम्। चित्ताद्भद्ररूपोऽहङ्कारः। अहङ्कारात् भीषणपदरूपा बुद्धिः। बुद्धेर्नृसिंहपदरूपं मनः। मनसः सर्व्वतोमुखं रूपमाकाशः। आकाशाज्ज्वलन्तं

---

* अत्र उग्रं वीरमित्यादि द्वात्रिंशदक्षरमयमन्त्रस्य न सर्व्वाक्षराणि सकलीकृतानि नृसिंहमित्यस्य हं पदस्य भद्रमिति पदद्वयस्य च सकलीकरणं सर्व्वेष्वेवादर्शपुस्तकेषु प्रमादात् प्रक्षिप्तम्।

पदरूपो वायुः। वायोर्महाविष्णुं तेजः। तेजसो वीरं पदरूपमापः। एवं अङ्गः उग्रं पदरूपा भूमिः। एवं सर्व्वं स्वदेहे विचिन्त्य विराट्रूपेण श्रीनृसिंहोऽहमिति चिरं विचिन्त्य पुनः पृथ्व्या अप्सु लयः अपां तेजसि तेजसो वायौ वायोराकाशे आकाशस्य मनसि मनसो बुद्धौ बुद्धेरहङ्कारे अहङ्कारस्य चित्ते चित्तस्य विद्यायां तस्याश्चात्मनि लयं चिन्तयित्वा स्वयं बुद्धिचिन्मात्रयोः स्थित्वा श्रीनृसिंहोऽहमिति भावयित्वा पुनः प्रतिलोमपदपातेनोत्पत्तिं पूर्व्ववद् विचिन्त्य सर्व्वात्मकस्तिष्ठेदिति।

अथ पादसकलीकरणम्।

प्रथमपादः पृथ्वी। द्वितीयो जलम्। तृतीयस्तेजः। चतुर्थो वायुः। समस्तमन्त्र आकाशः। हं बीजं परमात्मा पञ्चभूतान्यात्मा। तच्च चित्। नान्यत् किञ्चित्। बीजात्परमात्मन आकाशः। तस्माच्चतुर्थपादरूपो वायुः। तस्मात् तृतीयपादात्मकं तेजः। तस्मात् प्रथमः पादः पृथिवी। एवं स्वदेहे मन्त्रात्मकं सकलं कल्पयित्वा विराट्रूपेण श्रीनृसिंहोऽहमिति चिन्तयेत्। पुनश्चानुलोमक्रमेण पृथिव्या अप्सु अपां तेजसि तेजसो वायौ वायोराकाशे आकाशस्य परमात्मनि लयं कल्पयित्वा शुद्धचिन्मात्ररूपी श्रीनृसिंहोऽहमिति चिरं विचिन्त्य पुनरपि सृष्टिक्रमेण सर्व्वरूपो मन्त्रमयः श्रीनृसिंहोऽहमिति चिरं चिन्तयेत्।

नरसिंहोऽहमित्येवं यावद्बुद्धिः प्रजायते।
यावद्धि बुद्धिविस्तारस्तावद् देहस्य न स्मृतिः॥
अभीक्ष्णाभ्यसनाद् विद्वान् तन्मयत्वमवाप्नुयात्।
शुष्कवृक्षोदरगतो यथा वह्निर्महान् क्रमात्॥
भस्मीकरोति सकलं तद्वत् तन्मयतां व्रजेत्।
स्मृते सकलकल्याणभाजनं यत्र जायते॥
पुरुषस्तमजं नित्यं न स्मरेत्को नु बुद्धिमान्।

अथ साकारध्यानम्।

तत्र शान्तरूपस्य।

जान्वोरासक्ततीक्ष्णस्वनखरुचिलसद्बाहुसंस्पृष्टकेश-
चक्रं शङ्खञ्च दोर्भ्यां दधदनलसमज्योतिषा भग्नदैत्यः॥
ज्वालामालापरीतं रविशशिदहनत्रीक्षणं दीप्तजिह्वं
दंष्ट्रोग्रं धूतकेशं वदनमपि वहन् पातु वो नारसिंहः॥

इति शान्तध्यानम्।

उग्रध्यानम्।

उद्यद्भास्वत्सहस्रप्रभमशनिनिभं त्रीक्षणं विभ्रमन्तं
वक्त्रोनक्राय विद्युत्ततिविततसटाभीषणं भूषणैश्च।
दिव्यैरादीप्तदेहं निशितनखलसद्बाहुदण्डैरनेकैः
सभिन्नं भिन्नदैत्येश्वरतनुमतनुं नारसिंहं नमामि॥

परमायुधभूषणादिमुद्रा-दर्शनम्। शङ्खचक्रशार्ङ्गशरत्रिशूलगदा-पद्मश्रीवत्सकौस्तुभकिरीटवनमालावैनतेयमुद्रा दर्शयेत् सान्निध्य-करणार्थम्।

अत्रावसरे मानसपूजा।

नृसिंहाराधने मानसपूजा मुख्या। "धियैव पूर्व्व" मिति प्रपञ्चसारात्। हृदि बिल्वमुद्रां कृत्वा स्मरबीजोच्चारणं मानस-काले। तत्र विना नैवेद्यं पञ्चोपचारा इति केचित्। अन्ये तु नैवेद्यदानमपीच्छन्ति। मूलमन्त्रमुच्चार्य्य सायुधाय सर्व्वात्मने भगवते नरसिंहाय गन्धं कल्पयामीति वक्ष्यमाणगन्धं मनसा निवेद्य पुष्पधूपदीपान् निवेद्य नैवेद्यं नानाविधं मनसा सङ्कल्प्य निवेदयेत्। भोजनकाले तु वैश्वदेवः। मूलाधारे त्रिकोणाग्नि-कुण्डध्यानम्। तत्र मूलमन्त्रमत्याग्निध्यानम्। धर्म्माधर्म्मेन्ध-नध्यानम्। मनसा स्रुवेण। मूलमन्त्रमुच्चार्य्य एवमस्तं जुहोमि स्वाहा। पैशुन्यं हविः कामो हविः क्रोधो हविः लोभो हविः मोहो हविः मदो हविः मात्सर्य्यं हविः। ततो मूलमन्त्रस्य मनसा जपः। देवाय समर्पणम्। ततोऽर्घ्यसंस्कारः। अग्रे भूमि-लेपनम्। तत्र चतुरस्रलिखनम्। तन्मध्ये षट्कोणं तन्मध्ये त्रिकोणं तत्र आग्नेयादिकोणेष्वङ्गचतुष्टयपूजा। दिक्षु नेत्रस्य मध्ये अस्त्रस्य। तत्र शङ्खाधारस्थापनम्। दशकलात्मने अग्नि-

मण्डलाय नम इति तत्र पूजा। शङ्खस्यास्त्रेण चालनम्। शङ्खाधारे स्थापनम्। तत्र द्वादशकलात्मने सूर्य्यमण्डलाय नम इति शङ्खपूजनम्। प्रतिलोममातृकापाठेन शङ्खे जलपूरणम्। उं षोड़शकलात्मने सोममण्डलाय नम इति शङ्खजले पूजा।

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्म्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु॥

इति सूर्य्यमण्डलात् तीर्थावाहनम्। हृदा गन्धं शिरसा पुष्पं शिखामन्त्रेण तेजोव्याप्तिध्यानम्। नेत्रेण वीक्षणं कवचेनावगुण्ठनमस्त्रेण दिग्बन्धनं धेनुमुद्रया अमृतीकरणं शङ्खमुद्रादर्शनं योनिमुद्रयोद्दीपनमङ्गमन्त्रैः पूजा शिखया। तत्र गालिनीमुद्रादर्शनम् गन्धपुष्पाक्षतयवकुशाग्रतिलश्वेतसर्षपदूर्व्वापयःफलानां शङ्खजले प्रक्षेपः। मूलमन्त्रेण गन्धपुष्पाभ्यामिष्टदेवतापूजनम्। मूलमन्त्रस्याष्टधाजपः। प्रोक्षणीपात्रमस्त्रेण प्रक्षाल्य तत्र जलं पूरयित्वा अर्घ्याम्बु तत्र संयोज्य वीक्षणादिदिग्बन्धनमूलमन्त्रमष्टधा जपैः संस्कुर्य्यात्। प्रोक्षणीजलेन त्रिधा देहप्रोक्षणम्। आत्मतत्वात्मने नमः विद्यातत्वात्मने नमः शिवतत्वात्मने नमः। तज्जलेन पूजोपयोगिसमस्तद्रव्यप्रोक्षणम्।

अथ देहपूजा।

मूलेन ललाटे तिलकम्। मूर्द्ध्नि तेनैव पुष्पम्। आधारशक्त्यादिपीठपूजापर्य्यन्तं स्वदेहे पूजनम्। मूलमन्त्रात्मकं तेजो

मूलाधारे हृदि भ्रूमध्ये ध्यात्वा तद्देवरूपं विचिन्त्य तत्र पूजा। मूलमन्त्रमुच्चार्य्य सायुधाय सर्व्वात्मने भगवते नरसिंहाय गन्धं कल्पयामि। अनामिकया गन्धेन तिलककरणम्। पूर्व्ववन्मूलमन्त्रमुच्चार्य्य पुष्पं ददामीत्युच्चार्य्य शिरोहृदाधारपादसर्व्वाङ्गेषु पञ्चपुष्पाञ्जलिदानम्। ततो धूपदीपौ निवेद्य मूलाधारे मूलाधारया स्वदेहरूपं नृसिंहं तूष्णीं चिन्तयेत्। ततो वैश्वदेवः पूर्व्ववत्। यथाशक्ति मूलमन्त्रजपसमर्पणे कृत्वा

अनुज्ञां देहि भगवन् वहिर्य्यागे मम प्रभो।

इत्यनुज्ञां प्रार्थ्य मन्त्रशुद्धिः।

गुदमेढ्रान्तराले वामपार्ष्णिदानेनापीड्य पूरकेण वायुं पूरयित्वा हुङ्कारेण कुञ्चनेनाधारपद्मं विकसितं कृत्वा नासापुटद्वयरोधेन कुम्भकं कृत्वाधारपद्मत्रिकोणे वह्निं ध्यात्वा तदुत्थितां तन्निभां तत्शक्तिं सुषुम्नारन्ध्रगतां हंसमन्त्रेण बीजात्मना सहैकीभूतां विचिन्त्याधारगतस्वयम्भूलिङ्गं हृद्गतबाणलिङ्गं भ्रूमध्यगतमितरलिङ्गं भित्त्वा निर्गच्छन्तीं चित्शक्तिं ब्रह्मरन्ध्रोपरिगतसहस्रारपद्ममूर्द्ध्नि यत्रादूर्द्ध्वगपरब्रह्मरूपे विष्णोः पदे प्रविशन्तीं विचिन्त्य मूलमन्त्रं प्रणवपुटितं त्रिधा जपेत्। पुनस्तां चित्शक्तिं आधारपद्मत्रिकोणस्थाने प्रविष्टां विचिन्त्य पुनरपि सहस्रारपद्मोपरिगतां विचिन्त्य प्राणोद्घातेन गणपतिं विचिन्तयेत्। उद्घातश्च प्राणस्यापानादूर्द्ध्वगमनमिति योनिमुद्राबन्धेन मन्त्रशुद्धिः।

विना यन्त्रेण चेत्पूजा देवता न प्रसीदति।

इति वचनात् यन्त्रपूजा मुख्या।

पूजनीयदेवतानिर्म्माल्यमपकृष्य हस्तौ प्रक्षाल्यार्घ्याम्बुना प्रोक्ष्य मूलमन्त्रेण हृदयं स्पृष्ट्वा अष्टधा जपेत्। इति देवताशुद्धिः।

अथ देवतापीठाधश्चन्दनादिनाष्टपत्रपद्मलिखनम्। तदुपरि पद्ममुद्रादर्शनम्। तत्र पीठस्थापनम्।

अथ वह्निःपीठे पूजा।

स्ववामे गुरुभ्यो नमः। गुरुपादुकेभ्यो नमः। परमगुरुभ्यो-नमः। परमगुरुपादुकेभ्यो नमः। परात्परगुरुभ्यो नमः। परात्पर-गुरुपादुकेभ्यो नमः। स्वदक्षिणे आचार्य्याय नमः। दुर्गायै नमः। गणेशाय नमः। सरस्वत्यै नमः। मध्ये वास्तुनाथाय नमः। पीठाधः आधारशक्तिमहामण्डुककालाग्निरुद्रकूर्म्मपृथ्वीरत्नद्वीपमणिमण्डप--कल्पवृक्षरत्नवेदीरत्नसिंहासनाद्युपर्य्युपरि सम्पूज्य पीठाग्नेयादिषु धर्म्मज्ञानवैराग्यैश्वर्य्यान् प्रागादिष्वधर्म्माज्ञानावैराग्यानैश्वर्य्यान् पीठमध्ये प्रकृतिपत्रेभ्यो नमः। विकारकेशरेभ्यो नमः। पञ्चाशद्वर्णकान्त्यै नमः। अं आदित्यमण्डलाय नमः। उं सोममण्डलाय नमः। मं वह्निमण्डलाय नमः। सं सत्वाय नमः। रं रजसे नमः। तं तमसे। आं आत्मने। अं अन्तरात्मने। पं परमात्मने। ह्रीं ज्ञानात्मने। अष्टदिक्षु विमलादिनवशक्तयः। मध्ये पीठमन्त्रपूजा। ततः पाद्यादिपात्राणां पञ्चानामस्त्रेण चालितानामर्घ्यस्योत्तरत आसादनमुदकसंस्थम्। तत्र मधुपर्कार्थं

कांस्यपात्रं तृतीयम्। मधुपर्कवर्ज्यमन्यपात्रेषु मूलेन जलपूरणम्। प्रथमं पाद्यपात्रे श्यामाकदूर्व्वापद्मविष्णुक्रान्तानां मूलेन प्रक्षेपः। यस्यासम्भवस्तस्य मनसा चिन्तनम्। द्वितीयाचमनपात्रे जातीफल-लवङ्गकक्कोलकानां पिष्टानां प्रत्येकं मूलपाठेन प्रक्षेपः। तृतीय-मधुपर्कपात्रे दधिमधुघृतानां मूलमन्त्रपाठेन प्रक्षेपः। कांस्ये-नापिधानम्। चतुर्थपुनराचमनपात्रे गन्धपुष्पप्रक्षेपः। स्नानपात्रे गन्धपुष्पप्रक्षेपः। शेषद्रव्याणां वस्त्रयज्ञोपवीतालङ्कारगन्धपुष्पा-दीनां सन्निहितानां स्वस्वकाले संस्कारः। पाद्यस्यास्त्रेण प्रोक्षण्यु-दकेन प्रोक्षणं मूलेन वीक्षणं कवचेनावगुण्ठनम्। अस्त्रेण दिग्बन्धनम्। हस्तेनापिधाय मूलमन्त्रस्याष्टधा जपः। धेनुमुद्रया-मृतीकरणम्। एवमाचमनमधुपर्कादीनां संस्कारः। पीठपूजा-पूर्व्वं पाद्यादिपात्रसंस्कारः। पीठपूजानन्तरं ब्रह्मरन्ध्रान्तर्गता-मृतधारया देहं चालयित्वा हरिन्यासः।

अथावाहनादिकम्।

नवाङ्गुलमानेन स्वेच्छामानेन वा श्रीनृसिंहं ध्यात्वा
स्वात्मस्थमजरं शुद्धं त्वामहं परमेश्वर।
अरण्यामिव हव्यांशं मूर्त्तावावाहयाम्यहम्॥

इति नमः। मूलमन्त्रमुच्चार्य्य श्रीनृसिंह इहागच्छ इत्युच्चारयन् स्वहृदयस्थं परं ज्योतिः सुषुम्नावर्त्मना भ्रूमध्यगतं विचिन्त्य दक्षिण-

नासारन्ध्रेण निर्गतं भानुमण्डलादागतं करस्थपुष्पेषु विचिन्त्य तत्पुष्पाणि प्रतिमायां क्षिपन् तत्तेजः प्रतिमावामनासारन्ध्रेण प्रविश्य तद्धृदयस्थतेजस्येकीभूतं चिन्तयेत्। शालग्रामस्थण्डिलादौ ध्येयमूर्त्तेरेवावाहनम्। आवाहन्यादिमुद्रादर्शनम्। कवचमन्त्रेणावगुण्ठनम्। तत्रानेन धेनुमुद्रादर्शनम्। देवताङ्गे षड़ङ्गन्यासेन सकलीकरणम्। अस्त्रेण परमीकरणम्। शङ्खचक्रगदापद्ममुषलशार्ङ्गखड्गपाशाङ्कुशवैनतेयश्रीवत्सकौस्तुभवेणुभयवरवनमालानाञ्च दर्शनम्। अथवा शङ्खचक्रगदापद्ममुषलखड्गश्रीवत्सकौस्तुभानामष्टमुद्राणां दर्शनम्। पद्ममुद्रां दर्शयन्

अस्मिन् वरासने देव सुखमास्वाक्षरात्मके।
प्रतिष्ठितो वा तिष्ठस्व प्रसीद परमेश्वर॥

मूलमन्त्रमुच्चार्य्य इदमासनं साङ्गाय सायुधाय सर्व्वात्मने श्रीनृसिंहाय आसनं कल्पयामि इत्यासनसमर्पणम्। जलधारादानम्।

यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये।
तस्य ते परमेशान स्वागतं स्वागतञ्च मे॥
कृतार्थोऽस्म्यनुगृहीतोऽस्मि सफलं जीवितञ्च मे।
यदागतोऽसि देवेश सुस्वागतमिदं पुनः॥

मूलमन्त्रमुच्चार्य्य करोमि स्वागतं देवेति वदेत्। स्वागतमुद्रादर्शनम्।

ततः पाद्यम्।

यद्भक्तिलेशसम्पर्कात् परमानन्दसम्भवः।
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये॥

नमः। मूलमन्त्रमुच्चार्य्य उग्रं वीरं हृदयाय नमः। सायुधाय सर्व्वात्मने श्रीनृसिंहाय पाद्यं कल्पयामि नमः। इति पादाम्बुजे दद्यात्। ततः पाद्यमुद्रां दर्शयेत्।

अर्घ्यः।

तापत्रयहरं दिव्यं परमानन्दलक्षणम्।
तापत्रयविनिर्म्मुक्तं तवार्घ्यं कल्पयाम्यहम्॥

नमः। महाविष्णुं शिरसे स्वाहेति साङ्गाय सायुधाय सर्व्वात्मने श्रीनृसिंहाय अर्घ्यं कल्पयामीति शिरसि दद्यात्। अर्घ्यमुद्रां दर्शयेत्।

स्वस्तिमुद्रा द्विहस्ता चेन्मुद्रात्वर्घ्यस्य कीर्त्तिता।

आचमनम्।

देवानामपि देवाय देवानां देवतात्मने।
आचमन्ते करोमीश शुद्धानां शुद्धिहेतवे॥

नमः। ततो मूलमन्त्रान्ते वमित्यमृतबीजमुच्चार्य्य साङ्गाय सायु-

धाय सर्व्वात्मने श्रीनृसिंहाय आचमनं कल्पयामि स्वधेतिमुख-
सन्निधौ दद्यात् ।

देशिनीमूलगाङ्गुष्ठा दक्षिणाधः कनीयसी ।
पर्य्याप्तमध्यमास्तिस्रो (?) मुद्राचामेति कीर्त्तिता ॥[1]

ततो मुखप्रोञ्छनवस्त्रं प्रदर्श्य करदृष्टिं दद्यात् ।

मधुपर्कः ।

सर्व्वकालुष्यहीनाय परिपूर्णसुखात्मकम् ।
मधुपर्कमिमं देव कल्पयामि प्रसीद मे ॥

नमः । मूलमन्त्रमुच्चार्य्य साङ्गाय सायुधाय सर्व्वात्मने श्रीनृसिंहाय मधुपर्कं कल्पयामि स्वधेति अनामिकाङ्गुष्ठाभ्यां मधुपर्कैकदेशं मुखे दद्यात् ।

संयुक्तानामिकाङ्गुष्ठा तिस्रोऽन्याः सम्प्रसारिताः ।

इति मधुपर्कमुद्रा ।

---

(१) अत्र पाठान्तरं हरिभक्तिविलासे ।
देशिनीमूलागाङ्गुष्ठा दक्षिणाधः कनीयसी ।
आचाममुद्रा विख्याता देवताचमने विधौ ॥
षष्ठविलासे आसनाद्यर्पणप्रकरणस्य टीका ।

पुनराचमनम् ।

उच्छिष्टोऽप्यशुचिर्वाऽथ यस्य स्मरणमात्रतः ।
शुद्धिमाप्नोति तस्मै ते पुनराचमनं त्विदम् ॥

मूलमन्त्रान्ते वमित्युच्चार्य्य साङ्गाय सायुधाय सर्व्वात्मने श्रीनृसिंहाय आचमनं कल्पयामीति दद्यात् । आचमनमुद्रां प्रदर्श्य प्रोञ्छनकरदृष्टिं दद्यात् ।

स्नानम् ।

तत्तत्स्नानमण्डपं वितानादिमण्डितं प्रकल्प्य स्नानोपकरणं तत्र सन्निधाप्य पादुके समर्प्य देवं स्नानमण्डपमेहीति प्रार्थ्य छत्रचामरव्यजनदर्पणक्षुद्रविमानादियानारूढं देवं स्नानमण्डपगतं यानादवरुह्य पादुकाभ्यां स्नानमण्डपोपविष्टं विचिन्त्य दिव्याङ्गमर्द्दनदिव्योद्वर्त्तनोष्णोदकस्नानादि कारयित्वा

परमानन्दबोधाब्धिनिमग्ननिजमूर्त्तये ।
साङ्गोपाङ्गमिदं देव कल्पयामीश ते नमः ॥

मूलमन्त्रान्ते साङ्गाय सायुधाय सर्व्वात्मने श्रीनृसिंहाय स्नानं कल्पयामीति पञ्चामृतस्नानं गन्धोदकस्नानं पुष्पफलार्घ्यवर्णोदकस्नानं कारयेत् । सर्व्वत्र स्नानीयं पलशतम् । प्रतिमापूजायां न प्रत्यहं स्नानं पर्व्वणीति केचित् । तस्मिन् पक्षे स्नानीयमन्त्रेण

देवताङ्गं प्रोच्चयित्वा निनयेत् मनसा स्नानं सङ्कल्पयेत्। कनिष्ठां त्यक्त्वा मुष्टिः स्नानमुद्रा। वस्त्रान्तरेणाङ्गप्रोञ्छनमाचमनञ्च पूर्व्ववद् दत्वा वस्त्रं पूर्व्ववत् संस्कृत्य

वस्त्रम्।

मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे।
निरावरणविज्ञान वस्त्रं ते कल्पयाम्यहम्॥

नमः। मूलमन्त्रान्ते श्रीनृसिंहाय पीतवस्त्रं ददामीति कटिदेशे दद्यात्। मध्यमाङ्गुष्ठौ लग्नावन्याः प्रसारिता इति वस्त्रमुद्रा।

उत्तरीयम्।

यमाश्रित्य महामाया जगद् भासयते सदा।
तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम्॥

नमः। मूलमन्त्रान्ते साङ्गाय सायुधाय श्रीनृसिंहाय उत्तरीयं कल्पायामीत्युत्तरीयमरुणवर्णं दद्यात्। पूर्व्ववदाचमनीयम्।

यज्ञोपवीतम्

यज्ञोपवीतं संस्कृत्य

यस्य शक्तित्रयेणेदं सम्प्रोतमखिलं जगत्।
यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये॥

नमः। मूलमन्त्रान्ते साङ्गाय सायुधाय श्रीनृसिंहाय यज्ञोपवीतं कल्पयामीति दद्यात्।

कनिष्ठाङ्गुष्ठकौ सक्तौ तिस्रोऽन्याः सम्प्रसारिताः।

इति यज्ञोपवीतमुद्रा।

भूषणम्।

ततो देवं मण्डपागतं विचिन्त्य अलङ्कारं संस्कृत्य

स्वभावसुन्दराङ्गाय नानाशक्त्याश्रयाय ते।
भूषणानि विचित्राणि कल्पयाम्यपराजित॥

नमः। मूलमन्त्रमुच्चार्य्य साङ्गाय सायुधाय श्रीनृसिंहाय विविधमलङ्कारं कल्पयामीति यथास्थाने दद्यात्। उत्तानहस्तस्यानामिकाङ्गुष्ठौ सक्तौ तिस्रोऽन्याः प्रसारिता इत्यलङ्कारमुद्रां दर्शयेत्।

जलधारा।

देवतादेहनिर्गतं परिचारगणं छत्रचामरव्यजनदर्पणशिविकादिकान् तैर्धृतं ध्यात्वा देवं यागमण्डपमेहीति प्रार्थ्य परिचारगणक्रियमाणतूर्य्यब्रह्मघोषजयशब्दादिपुरःसरं यागमण्डपस्थपूजापीठे निवेश्य परिचारकगणं स्वस्थानस्थं विचिन्त्य

समस्तदेवदेवेश सर्व्वतृप्तिकरं परम्।
परमानन्दसम्पूर्णं गृहाण जलमुत्तमम्॥

नमः । मूलमन्त्रान्ते श्रीनृसिंहाय जलधारां कल्पयामीति कर्पूर-वासितजलं दद्यात् ।

गन्धः ।

ततः—

चन्दनागुरु[1]कर्पूरपङ्कं गन्धमिहोच्यते ।
उशीरं कुङ्कुमञ्चैव मांसी मलयजं तथा ।
[2]तथाम्बुजञ्च ह्रीवेरं कुष्ठञ्चागुरुमेव च ॥

मृगमदजातिफलसम्भवे अवश्यमन्येषामनावश्यकत्वम् । एवं गन्धं संस्कृत्य

परमानन्दसौरभ्यपरिपूर्णदिगन्तरम् ।
गृहाण परमं गन्धं कृपया परमेश्वर ॥

नमः । मूलमन्त्रान्ते साङ्गाय सायुधाय श्रीनृसिंहाय गन्धं कल्पयामि नम इति हृदि लिम्पेत् । मुक्तानामिका मुष्टि गन्धमुद्रा ।

पुष्पम् ।

तुलसीद्वयजातिद्वयकरवीरद्वयोत्पलद्वयकल्हारमल्लिकाकुन्द मन्दारनन्दावर्त्तपलाशपाटलापार्थावर्त्तकचम्पकनागकेशराशोकबि-

(१) E. F. कस्तूरी ।
(२) E. F. ह्रीवेरं सकुरञ्चैव ।

ल्वकर्णिकारसेवतीजातीनामन्येषामपि सुगन्धसुरूपाणां स्वागमोक्तानां यथासम्भवं संस्कृत्य

तुरीयवनसम्भूतं नानागुणमनोहरम् ।
अरण्यसौरभं पुष्पं गृह्यतामिदमुत्तमम् ॥

मूलमन्त्रान्ते साङ्गाय सायुधाय श्रीनृसिंहाय पुष्पं कल्पयामि वौषट् इति पुष्पमाल्यं शिरसि कण्ठे दद्यात् ।

उत्थिताधोमुखी मध्या बिद्धाङ्गुष्ठा यदीतराः ।

तदा पुष्पमुद्रा ।

आवरणपूजा ।

निवेद्य पुष्पपर्य्यन्तमथावरणपूजा ।

अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्चये त्वाऽहमाद्यमावरणार्चनम् ॥

इति प्रार्थ्य प्रथमावरणमङ्गे ।

हारस्फटिकपीताभाः कृष्णनीलाग्निरोचिषः ।
वरदाभयहस्ताश्च प्रधानतनवः स्त्रियः ॥

इति ध्यात्वा उग्रं वीरं हृदयाय नम इति प्रतिमाधारपद्म-केशरेष्वाग्नेयादिकोणेऽङ्गचतुष्टयम् । देवाग्रे नेत्रपूजा । चतुर्द्दिक्षु अस्त्रपूजा । अस्त्राय फट् इत्यादिरेव मन्त्रः । न पृथक् नमः पदम् । पूजा च पञ्चोपचारेण गन्धपुष्पाभ्यां केवलपुष्पेण वा । एवं

भक्त्या समर्चये त्वाऽहं द्वितीयावरणार्चनम्।

इति प्रागादिचतुर्द्दले पद्मीन्द्राय नमः। अनन्ताय नमः। शर्व्वेशाय नमः। कमलोद्भवाय नमः। आग्नेयादिकोणदलेषु श्रियै नमः। क्रियै नमः। धृत्यै नमः। पुष्ट्यै नमः। इति द्वितीयावृतिः। तद्वाह्ये प्रागादिषु स्तम्भनकारिनृसिंहाय नमः। मोहनकारिनृसिंहाय नमः। मारणकारिनृसिंहाय नमः। विद्वेषणकारिनृसिंहाय नमः। आकर्षणकारिनृसिंहाय नमः। पुष्टिप्रदनृसिंहाय नमः। विद्याप्रदनृसिंहाय नमः। इति तृतीयावृतिः।

चक्रं शङ्खं महापद्मं मुषलं देवदक्षिणम्।
शूलखेटगदाशार्ङ्गं पूजयेदेव वामतः॥

इति चतुर्थावृतिः।

लक्ष्मीं दक्षिणतस्तुष्टिं वामे तत्रैव कौस्तुभम्।
श्रीवत्सं दक्षिणे मध्ये वनमालाञ्च पूजयेत्॥
पीताम्बरं ब्रह्मसूत्रं नाभिमध्ये किरीटकम्।
भूषणानि च सर्व्वाणि पुरोभागे च पूजयेत्॥

इति पञ्चमावृतिः।

श्रद्धां मायां तथा कामां भीमां मायां भयानकाम्।
* * * दीप्तिं तथाष्टमीम्॥

इति प्रागादिषु। इति षष्ठावृतिः। इन्द्रादिभिः प्रागादिस्थैः सप्तमावृतिः। ईशानपूर्व्वमध्ये अनन्तः। निर्ऋतिपश्चिममध्ये ब्रह्मा। रक्षोवरुणमध्ये अनन्तः। पूर्व्वेशानमध्ये ब्रह्मा इति वा। एते च

कपिशकपिलकृष्णश्यामलश्वेतधूम्रा—
मलसितशुचिरक्ता वर्णतो वासवाद्याः।

तद्वहिर्लोकपालास्त्राणि स्वस्वदेवस्थाने। वज्रशक्तिदण्डखड्ग-पाशाङ्कुशगदाशूलचक्रपद्मानि। अस्त्ररूपमभ्यर्च्य

अर्च्या वहिर्निजसुलक्षितमौलियुक्ताः
स्वस्वायुधाभयसमुद्यतपाणिपद्माः।

एवं पुरुषाः।

अथ धूपदानम्।

सगुग्गुल्वगुरूशीरसिताज्यमधुचन्दनैः।
साराङ्गारविनिःक्षिप्तैर्मन्त्रानीतैः प्रधूपयेत्॥

इति प्रसिद्धधूपपात्रे साङ्गारे यथासम्भवे गुग्गुल्वादीनि ह्रीवेर-कुन्दबिल्वमुस्तादीनि विक्षिप्य घण्टामस्त्रेण संप्रोक्ष्य गन्धपुष्पैः प्रपूजयेत्। वीक्षणावगुण्ठनदिग्बन्धनधेनुमुद्रामृतीकरणानन्तरं मूलमन्त्रमष्टधा जपैः संस्कृत्य धूपञ्च संस्कृत्य घण्टां वामहस्तेन वादयन् दक्षहस्तेन धूपं गृहीत्वा

वनस्पतिरसो दिव्यो गन्धाढ्यो गन्धवत्तमः।
आघ्रेयः सर्व्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

नमः। मूलमन्त्रमुच्चार्य्य साङ्गाय सायुधाय श्रीनृसिंहाय धूपं कल्पयामि स्वाहा इत्यनुघ्राणं दद्यात्। आचमनं मुखवासं कर-घृष्टिश्च देया।

अङ्गुष्ठतर्ज्जनी लग्नौ तिस्रः सङ्कुचिताः पराः ।

इति धूपमुद्रा ।

अथ दीपदानम् ।

सकर्पूरदशो दीपः फलं दद्यात् शताधिकम् ।

गोघृतेन तैलेन वात्तया वर्त्त्या प्रज्वाल्य चतुरङ्गुलशिखं श्रेष्ठं त्र्यङ्गुलं मध्यं द्व्यङ्गुलं हीनं प्रज्वाल्य वामकरे घण्टां वादयन्

सुप्रकाशो महादीपः सर्व्वतस्तिमिरापहः ।

सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥

नम इति मूलमन्त्रान्ते साङ्गाय सायुधाय श्रीनृसिंहाय दीपं कल्पयामि स्वाहेति नेत्रसन्निधौ पारावतभ्रमाकारं दर्शयेत् । आचमनमुखवासकरघृष्टीश्च देयाः । पुष्पमुद्रैवोत्ताना दीपमुद्रा ।

ततो नैवेद्यहोमबलिजपगण्डूषताम्बूल-नीराजनानि ।

चतुरस्रस्थण्डिलं देवतादृष्टिगोचरे कृत्वा तत्र सुवर्णरजतताम्र-कांस्यशिष्टभोजनयोग्यकदल्यादिपत्रपाषाणादिपात्रेषु वा विशेषेण ताम्रेषु सुप्रक्षालितेषु प्रणवेन प्रोक्षितेषु शाल्यन्नव्यञ्जनदुग्धदधिशर्करापिष्टकप्रपानकपरमान्नकदलीनारिकेलनानाविध--पिष्टकभक्ष्यभोज्यलेह्यपेयरूपं साज्यं प्रस्थचतुष्टयादन्यूनं असम्भवे

पुरुषाहारमात्रमुत्तमं तदर्द्धं मध्यमं तदर्द्धं कनीयः अभावे ग्रासमात्रं नैवेद्यं व्यञ्जनान्वितं प्रकल्प्य संस्कुर्य्यात् । वराहपुराणे च अन्नविशेषाः,—सुगन्धिरक्तशालिदीर्घशूकमहाशालिकुङ्कुमपत्रिक-(कङ्गुणिकाख्यक) शालिप्रभृतिधान्यानां । विविधयवान्नानि । शुक्लमाषाः । तिलाः । कृष्णकुलत्थकाः । गवेधुकाः । मुद्गाः । तथा गोधूमाः । गव्यपयोदधिघृतानि । फलानि प्रसिद्धानि । इङ्गुदीबिल्ववदरामलखर्जूरपनसाम्रोदुम्बरप्लक्षपिण्डारकपुन्नागशमीकवारबीजपूरकुमुदोत्पलककारुनोपकतालकर्म्मरङ्गकदम्बादिमूलफलानि वन्यानि च करमर्द्दनीलोत्पलपद्मशालूकानाम् । तथा शाकानि मूलकवत्सकास्थिकपलाशवदरमधुकोदुम्बरादीनाम् । पशुपक्षिविशेषाणां देयत्वेऽपि कलौ निषेधः ।

तथा—

ब्रह्मविष्णुशिवानाञ्च कलौ मांसेन चार्च्चनम् ।

दातुः श्रियं कुलं हन्ति तस्मात् तत् परिवर्ज्जयेत् ॥

इति पठन्ति । अत्र फलमूलकन्दशाकादीनां येषां तथैव देयत्वमन्येषां व्यञ्जनादिपाकेन ।

आम्रं बिल्वं गुवाकञ्च नारिकेलञ्च दाड़िमम् ।

अपक्कान्यपि चैतानि फलानि विनिवेदयेत् ॥

कदलीफलं यत्नपक्कमपि नान्यत् फलम् । कदल्यास्त्वचमुत्कृत्य नारिकेलफलं मुखमुत्कृत्य । एवं सर्व्वं भक्ष्ययोग्यं कृत्वा अर्घ्याम्बुपुष्पाभ्यामस्त्रेण प्रोक्ष्य चक्रमुद्रादर्शनेन संरक्ष्य यमिति वायुबीजेन जलेन संशोध्य रमित्यग्निबीजमुच्चार्य्य दक्षिणबाहुनाग्निरूपेण

१००

सन्दह्य वमित्यमृतबीजेन वामबाहुना संप्लाव्य अस्त्रेण तालत्रयं दत्वा दिग्बन्धनं कृत्वा कवचेनावगुण्ठ्य मूलेन धेनुमुद्रयामृतीकृत्य मूलेनाष्टधाभिमन्त्र्य पुनर्धेनुमुद्रया पूर्णं ध्यात्वा गन्धपुष्पाभ्यामभ्यर्च्य पुष्पाञ्जलिना नृसिंहमभ्यर्च्य देवमुखात् तेजो निःसार्य्य नैवेद्ये व्याप्तं विचिन्त्य अर्घ्याम्बुपुष्पं हस्ते गृहीत्वा

सत्पात्रसिद्धविःसौख्यं विविधानेकभक्षणम्।

निवेदयामि भवते सानुगाय गृहाण मे॥[1]

नमः। मूलमन्त्रमुच्चार्य्य साङ्गाय सायुधाय सर्व्वात्मने श्रीनृसिंहाय नैवेद्यं कल्पयामि स्वाहेति देवतीर्थेन नैवेद्योपरि अर्घ्याम्बुपुष्पप्रक्षेपः।

पञ्चाङ्गुल्यग्रसंलग्ना प्रोत्थितोर्द्ध्वमुखी यदि।

द्विधा निबद्धा मुद्रेयं नैवेद्यस्य प्रकीर्त्तिता॥

इति मुद्रां दर्शयन्

निवेदयामि भवते जुषाणेदं हविर्हरे।

इति नैवेद्यं समर्प्य देवोपरि पुष्पं प्रक्षिपेत्। ततः अमृतोपस्तरणमसि स्वाहेत्यपोशानं दत्वा विकचोत्पलसन्निभां ग्रासमुद्रां वामेन दर्शयन् दक्षिणेन प्राणादिमुद्रां दर्शयेत् स्वस्वमन्त्रैः। प्राणाय स्वाहा। अपानाय स्वाहा। व्यानाय स्वाहा। उदानाय स्वाहा। समानाय स्वाहा। कनिष्ठानामिकाङ्गुष्ठाग्रयोगेन प्रथमा। तर्जनीमध्यमाङ्गुष्ठाग्रयोगेन द्वितीया। अनामिकामध्यमाङ्गुष्ठाग्र-

(१) E. तत्।

योगेन तृतीया। अनामिकामध्यमातर्जन्यङ्गुष्ठाग्रयोगेन चतुर्थी। कनिष्ठानामिकामध्यमादेशिन्यङ्गुष्ठाग्रयोगेन पञ्चमी। करद्वयानामिकायां स्वस्वाङ्गुष्ठयोगेन निवेदनमुद्रां दर्शयन् ठौं नमः परायावात्मने अनिरुद्धाय नैवेद्यं कल्पयामि। ब्रह्माद्यैः सूपविष्टैः समेतो व्यजनै र्वीज्यमानो नर्म्मक्रीड़ाप्रहसनपरो देवः [1]कनकपात्रेषु भक्ष्यान् भुङ्क्ते इति चिन्ता। भोजनावसरे वैश्वदेवः।

दक्षिणे स्थण्डिलं कृत्वाग्निमुपसमाधाय वीक्षणावगुण्ठनतालत्रयदिग्बन्धनमूलाष्टधाजपधेनुमुद्रादिभिः संस्कृत्य घृततिलपायसानामन्यतमेन हविः संस्कृत्याग्नाविष्टदेवं पञ्चोपचारैः सम्पूज्य प्रणवेन व्याहृतिभिर्व्यस्तसमस्ताभिराहुतिपञ्चकं हुत्वा मूलेन पञ्चविंशतिसंख्यया हुत्वा पुनर्व्याहृतिभि र्हुत्वा पुनः पञ्चोपचारेणाग्निं सम्पूज्य देवं प्रतिमायामुद्वास्याग्निं विसर्जयेत्। होमशेषहविषा गन्धपुष्पाक्षतैर्देवतापार्षदेभ्यो बलिः। तत्र मन्त्रः,—

ये रुद्रा रुद्रकर्म्माणो रौद्रस्थाननिवासिनः।

योगिन्यो रुद्ररूपाश्च गणानामधिपाश्च ये॥

विघ्नभूतास्तथा चान्ये दिग्विदिक्षु समाश्रिताः।

सर्व्वे ते प्रीतमनसः प्रतिगृह्णन्त्विमं बलिम्॥

इत्यष्टदिक्षु दत्वा भूतबलिः। तत्र मन्त्रः—

(१) E. कनकपात्रे षड्रसान्।

भूतानि यानीह वसन्ति भूतले
बलिं गृहीत्वा विधिवत् प्रयुक्तम्।
सन्तोषमासाद्य व्रजन्तु सर्व्वे
क्षमन्तु तान्यत्र नमो नमोऽस्तु ॥

इति वैश्वदेवहोमो बल्यन्त्यः।

होमाशक्तौ द्विगुणो जपः। शक्तस्य होमसंख्यको जपस्तावत् पुष्पदानं मूलेन तावत् प्रमाणं वा। ततः अमृतापिधानमसि स्वाहेत्यपोशानं दत्वा गण्डूषादि कल्पयित्वा सुवासिताम्बुभिर्देवायाचमनं पुनराचमनमन्त्रेण मुखवासकरद्रष्टिं विचिन्त्य ताम्बूलदानम्। ताम्बूलं सकर्पूरं सपूपं चूर्णेन खदिरेण युक्तं संस्कृत्य मूलमन्त्रान्ते ताम्बूलं कल्पयामीति दद्यात्। ताम्बूलदानं नैवेद्योपचाराङ्गम्। ततः पुनर्गन्धपुष्पं धूपदीपनैवेद्यैः प्रपूज्य पुष्पाञ्जलित्रयं दूर्व्वाक्षतं दत्वा नीराजनम्। दीपपात्रमूर्द्धमण्डलाकारं कृत्वा तत्र घृततैलादिवर्त्तिसप्तकं दत्वा ज्वालयित्वा देवमुखे भ्रामयेत्। इति नीराजनं घण्टावादनसहितम्। ततो मूलमन्त्रजपः।*

---

* अत्रातःपरं सर्व्वेष्वेवादर्शपुस्तकेषु अयं श्लोको दृश्यते यथा,—

एतावद्दूरपर्य्यन्तं लिखित्वा वाजपेयिभिः।
स्थितं पत्रान्तरे यस्मात् ततोऽहमलिखं मुदा ॥

श्लोकोऽयं मन्ये तेनैव लेखकेन प्रथमं रचितो येन साक्षान्नरसिंहवाजपेयिन एव स्वहस्तकृतादादर्शाद्द्वितीयादर्शः कृतः। तत आदर्शादादर्शान्तरेषु भ्रमान्मूलपुस्तकपाठरूपेणैव चलित इति सर्व्वेष्वेवादर्शपुस्तकेषु दृश्यते। वस्तुतस्त्वयं लेखककृत इति मूले न सन्निवेशितः। इति सं।

स्तुतिः।

यस्मिन्न्यात् परमापदं प्रणमतां पुंसां सदा क्षेमकृत्
ध्यानं यस्य विमुक्तये च तरणिः संसारवारांनिधेः।
यः क्रुद्धो नखरैर्बिभेद कठिनं दैत्येन्द्रवक्षःस्थलं।
तस्मै मानवसिंहशुभ्रवपुषे नित्यं नमो विष्णवे ॥

तापनीयश्रुत्यनुसारेण नृसिंहोपासना।

तान्त्रिकविधिना प्रातरुत्थाय तान्त्रिकविधिना स्नानतर्पणादिकं कृत्वा गृहमेत्य स्वाचान्तो द्वारपालपूजात्रिविधविघ्ननिवारणपूर्व्वं यथोक्तरीत्या देवागारे प्रविश्य प्राङ्मुख उदङ्मुखो वा मृद्वासन उपविश्य महासुदर्शनमन्त्रेण नाराचमुद्रया विघ्नान् निवार्य्य तालत्रयदिग्बन्धप्राकारचिन्ताशक्तिजालकल्पनाभी रक्षां विधाय ईश्वरं शेषं गुरुं श्रीनृसिंहं नमस्कृत्य "ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्तिन स्तार्क्ष्योअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु। ॐ शान्तिः शान्तिः शान्तिः ॥" आसनबन्धादिकं कृत्वा भूतशुद्धिः। करशुद्धिं विधाय श्रीनृसिंहानुष्टुभो मन्त्रराजमन्त्रस्य विधिर्ब्रह्मा प्रजापतिः ऋषिः। अनुष्टुप्छन्दः। श्रीमहामङ्गलेश्वरो लक्ष्मीनृसिंहो महा-

विष्णुर्देवता । उदात्तः स्वरः । शुक्लो वर्णः । नृ इति दृष्टं कीलकं ज्ञातम् । स सिद्धेरप्रतिबन्धकं स इत्यदुष्टं कीलकं ज्ञातं स सिद्धिप्रदम् । हंबीजम् । ई शक्तिः । उदात्तः स्वरः । शुक्लो वर्णः । परमात्मा चेत्वम् । मोक्षार्थे विनियोगः । इति स्मृत्वा प्रणवशक्तिबीजादिना बीजशक्तिप्रणवान्तेन मूलमन्त्रेण प्रत्येकं त्रिवारजप्तेन प्राणायामत्रयम् । मातृकान्यासः । केशवादिन्यासः । तत्त्वन्यासः । आधारभावना । हृदयभावना । हस्तभावना । काले करन्यासः । पञ्चाङ्गेनाङ्गुलिन्यासः । देहभावना । चतुर्भिः पादैश्चतुष्टयम् । समस्तेनास्त्रमित्यङ्गन्यासः । सान्निध्यकरादिदशन्यासाः । एवं तान्त्रिकपद्धत्यनुसारेण ध्यानम् ।

महाचक्रस्य यन्त्राभिमण्डले त्रिगुणात्मनि ।
सुखसंवित्क्षीरजलं चिन्तयेत् क्षीरसागरम् ॥
श्वेतद्वीपञ्च तन्मध्ये शब्दादिविषयात्मकम् ।
जातिब्रह्मवलोपेतं महत्त्वसिकतान्वितम् ॥
मणिरत्नमये तत्र प्रासादे सुमनोहरे ।
श्वेतसिंहासनं ध्यायेत् श्वेतपद्मोपरिच्छदम् ॥
शेषं तत्र विजानीयात् समत्या पुच्छमण्डलैः ।
फणासहस्रमुपरि छत्रीकृत्य व्यवस्थितम् ॥
श्वेतहारकिरीटाभ्यां दधानं मुषलं हलम् ।
रक्ताक्षं श्वेतपुष्पस्रक्नीलवस्त्रैककुण्डलम् ॥
तदङ्के चिन्तयेद् देवं नृसिंहं पीतवाससम् ।
सूर्य्येन्दुकोटिमहसमरुणोत्तरवाससम् ॥

श्वेताद्रिकान्तिवपुषं सत्यज्ञानसुखात्मकम् ।
आसीनं योगपट्टेन चतुर्दंष्ट्रं चतुर्भुजम् ॥
प्रादक्षिण्येन दधतमूर्द्ध्वदक्षिणबाहुके ।
चक्रं पिनाकमभयं वरं करचतुष्टये ॥
तप्तहाटककेशान्तं चन्द्रार्द्धकृतशेखरम् ।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ॥
चन्द्रसूर्य्याग्निसङ्काशं वृत्तोत्फुल्लत्रिलोचनम् ।
स्फुरत्कमलकिञ्जल्कसमलोमान्तकर्णिकम् ॥
किञ्चिदुन्नतमध्येषु फुल्लनासामनोहरम् ।
ललज्जिह्वप्रपञ्चास्यप्रकाशितरदावलिम् ॥
श्मश्रुलम्बितशुभ्रास्यं किञ्चिदुत्कुञ्चितभ्रुवम् ।
तद्वद्भ्रूलोमपक्ष्माणं तिर्य्यगालम्बिकेशरम् ॥
ककुदंसशिरःकण्ठप्रकुञ्चितकरोच्चयम् ।
नीलग्रीवं प्रकृत्या सश्रीवत्साङ्कितवक्षसम् ॥
विस्तीर्णोरुस्थललसत्पुरुषात्मककौस्तुभम् ।
विष्टब्धपार्श्वपृष्ठास्थिमग्ननाभ्यङ्कितोदरम् ॥
तिर्य्यक्सुस्थिरजंघोरुजान्वाहितकरद्वयम् ।
तीक्ष्णोग्रनखवज्रास्त्ररोचिर्विद्रावितासुरम् ॥
तिर्य्यक्पादतलस्पर्शकृतार्थीकृतशेषकम् ।
किरीटहारकेयूरकाञ्चीकटकभूषितम् ॥
अमुक्तजङ्घाभरणं पादान्तव्याप्तनूपुरम् ।
रत्नाङ्गुलीयकज्योतिरुद्भासितदिगन्तरम् ॥

समकर्णन्तु विन्यस्तचारुकर्णविभूषणम्।
पञ्चभूतात्मिकां पञ्चरूपां मालाञ्च बिभ्रतम्॥
वामोरुगतया लक्ष्म्या श्लिष्टं दक्षिणबाहुना।
दधत्या वामहस्तेन दाड़िमं सुमनोहरम्॥
मुक्ताप्रभाभरणया पीतनिर्म्मलवस्त्रया।
हिरण्यवर्णया न्यस्तदृशा स्वामिमुखाम्बुजे॥
नानारूपधरैः शस्त्रैः पृष्ठपार्श्वगतैः पृथक्।
स्वस्वायुधोद्यतकरैर्मूर्त्तिमद्भिरुपासितम्॥
सचामरैर्वीज्यमानं लक्ष्म्याद्याभिश्च शक्तिभिः।
संसक्ताभ्यनुरक्ताभिरन्याभिः परिवारितम्॥
यक्षपन्नगगन्धर्व्वविद्याधरवधूगणैः
नृत्यवादित्रसङ्गीतस्तुतिभिः कम्पितेक्षणम्॥
सुरासुरगणैश्चैव प्रसादावाप्तदर्शनैः।
कृताञ्जलिभिराज्ञार्थं किङ्करैर्दूरतः स्थितैः॥
अन्तरीक्षगतैः सिद्धै र्योगिभिः सनकादिभिः।
संस्तूयमानमेकाग्रै ऋग्यजुःसाममन्त्रकैः॥
ऐशानीं दिशमारभ्य महाचक्रदलस्थितैः।
पद्मासनैरभिमुखै र्वीक्षमाणैः सुदर्शनैः॥
नारायणै र्वासुदेवैः केशवाद्यैर्यथाक्रमम्।
ब्रह्माद्यै र्नरसिंहैश्च स्वस्ववर्णायुधान्वितैः॥
पुरस्ताद् वसुभिस्तस्य रुद्रैर्दक्षिणतः स्थितैः।
चक्रस्य पश्चादादित्यै र्विश्वेदेवैरथाभ्युदक्॥

सुखोपविष्टैः पादान्ते ब्रह्मविष्णुमहेश्वरैः।
स्वस्वायुधकरैरूर्द्धं कृताञ्जलिपुटैरधः॥
तथैवोपस्थितं चन्द्रसूर्य्याभ्यां पार्श्वयोर्द्वयोः।
महाविभूतिसंस्थानं सर्व्वदैवात्मकं विभुम्॥

द्विस्वरसाम्ना करन्यासः।

ऊर्द्ध्वप्रयत्नोच्चारण उदात्तः। तिर्य्यक्प्रयत्नोच्चारणे स्वरितः। स च पूर्व्वोदात्तापेक्षया अनुदात्तः। अनुदात्तापेक्षयोदात्तः। द्वितीयश्च स्वरितः पूर्व्वोदात्तस्वरितयोरपेक्षयाऽनुदात्तः। अनुदात्तापेक्षयोदात्तः। अङ्गुष्ठाग्रतर्जनीमध्यपर्व्वयोगेनोदात्तगानम्। तर्जनीमध्यमानामिकाकनिष्ठानां मध्यपर्व्वणां क्रमेणाङ्गुष्ठाग्रस्पर्शेन स्वरितगानम्। अङ्गुष्ठाग्रेण कनिष्ठामूलस्पर्शेनानुदात्तस्य गानम्। ह्रस्वस्याप्यन्त्यस्वरस्य गाने प्लुतत्वम्। गाने चान्त्याक्षरस्य त्रिचतुःपञ्चमात्रा। गायमानाक्षराणां दीर्घाक्षरे वामहस्ताङ्गुलिवक्रीकरणात्मकं ग्रहणम्। तथा प्रथमपादस्य प्रणवोऽङ्गः। द्वितीयस्य घृणिमन्त्रः तृतीयस्य यजुर्लक्ष्मीः। चतुर्थस्य नृसिंहगाथा[1]। समस्तस्य महाचक्रम्। एवं गानपरिभाषा।

तत्रादौ द्विस्वरगाने नाङ्गुलिन्यासाः। प्रणवस्य मात्रा अकारोकारमकारोङ्काराकाराश्चतस्रस्तद्द्विरावृत्त्या अष्टौ भवन्ति। अउ उदात्तः। मॐ। अनुदात्तः। अउ उदात्तः। मॐ। अनु-

---

(१) E. नृसिंहगायत्री।

दात्तः । इति प्रागाय शक्त्यक्षरं बीजाक्षरं चतुरावृत्तं कृत्वा इं हं उदात्तः । इं हं अनुदात्तः । पुनः इं हं उदात्तः इं हं अनुदात्तः । ततः प्रथमपादगानम् । उग्रं उदात्तः वीरं अनुदात्तः महा अनुदात्तः विष्णुं अनुदात्तः इति गात्वा पुनः प्रणवगानम् । ततः ॐ इं हं उग्रं वीरं महाविष्णुं ॐ आनन्दात्मने श्वेतवर्णाय अङ्गुष्ठाभ्यां नमः। इति हस्तयोरङ्गुष्ठे न्यासः। ततः। ज्वलं उदा। तं स । अनु । र्व्वतो । उदा । मुखं । अनु । इति प्रागाय। ॐ क्लीं घृणिः सूर्य्यः आदित्यः श्रीं ज्वलन्तं सर्व्वतोमुखं प्रियात्मने कृष्णवर्णाय तर्जनीभ्यां स्वाहा । इति न्यासः । ततः नृसिं उदा । हं भी अनु । षणं उदात्तः । भद्रं अनु । "ॐ भूर्लक्ष्मी भुर्वर्लक्ष्मीः सुवः कालकर्णी । तन्नो महालक्ष्मीः प्रचोदयात् ।" इति सामरहितमुक्त्वा पुनः तृतीयपादं यजुर्लक्ष्मीपूर्व्वकमुक्त्वा घोरात्मने पिङ्गलवर्णाय मध्यमाभ्यां वषट्। इति न्यासः । ततः मृत्यु उदा । मृत्युं अनु । नमा उदा । म्यहं अनुदा । इति गात्वा ॐ नृ उदा । सिंहा अनु । यवि उदा । द्महे अनु । वज्र उदा । नखा अनु । यधी उदा । महो अनुदा । तन्न उदा । सिंहः प्रचो उदा । दयात् अनुदा । इति गात्वा ॐ नृसिंहाय विद्महे वज्रनखाय धीमहि तन्नः सिंहः प्रचोदयात् इत्युक्त्वा मृत्युमृत्युं नमाम्यहं मायात्मने हेमवर्णाय अनामिकाभ्यां हुं इति न्यासः । ततः प्रणवशक्तिबीजसाममन्त्रपादचतुष्टयसाममिश्रणं सामानि गात्वा प्रणवशक्तिबीजपुटितं मन्त्रमुच्चार्य्य महाचक्रं स्मृत्वा ज्ञानात्मने विद्युद्वर्णाय कनिष्ठाभ्यां वौषट्। इति न्यासः ।

अथानुष्टुप-साम ।

प्रथमं प्रणवसाम ततः शक्तिबीजसाम ततः प्रथमपादसाम ततः पुनरङ्गप्रणवसाम गात्वा द्वितीयसामगानम् । ततो घृणिमन्त्रस्य सामरहितस्य पाठः । ततस्तृतीयपादसाम । ततो यजुर्लक्ष्मीमन्त्रस्य सामरहितस्य पाठः । ततश्चतुर्थपादसाम । नृसिंहगायत्रीसाम । इति गात्वा मिश्रणसामगानम् । उच्चैरेवम् । ततः प्रणवप्रथममात्रा ततो बीजाक्षरम्। कनिष्ठामूले। ततः प्रणवद्वितीयमात्रा ततः शक्त्यक्षरम्। प्रणवतृतीयमात्रा ततो बीजाक्षरम् । प्रणवचतुर्थमात्रा ततः शक्त्यक्षरम्। इत्यष्टाक्षराणि । अ हं उदा। उ इं। अनु। म हं उदा। ॐ इं अनु। इति गात्वा । अनेनानुष्टुभेन साम्ना समं व्यापको न्यासः सम्पद्यतामिति न्यासः ।

अथ षट्स्वरसामभिरङ्गन्यासः ।

तत्र प्रथमाक्षरद्वयमुदात्तं तर्ज्जन्यग्रस्पर्शेन । तृतीयमनुदात्तं कनिष्ठामूलस्पर्शेन । चतुर्थः स्वरितः तर्जन्यादिचतुष्कमध्यपर्व्वस्पर्शेन। तर्जन्याद्यङ्गुलमध्यपर्व्वस्पर्शकाले उत्तरोत्तमस्यानुदात्तत्वम् । एकैकाङ्गुलिपर्व्वस्पर्शकाले त्रिचतुःपञ्चमात्रा स्वरितमप्येवं षष्ठमनुदात्तं तर्ज्जनीमध्यपर्व्वस्पर्शेन गेयम् । प्रणवसाम । अउ उदा । म अनु । ॐ स्वरितः । अ स्वरितः । उ उदा । मॐ अनु । शक्तिबीजसाम । इं हं उदा । इं अनु । हं स्वरितः । इं

स्वरितः। हं अनु। प्रथम पादसाम,—उग्रं उदा। वी अनु। रं स्वरि। महा उदा। विष्णुं अनु। गात्वा। तत्र तृतीयषष्ठाक्षरयोर्वामहस्ताङ्गुलिवक्रीकरणात्मकं ग्रहणं प्रथमपादगाने। पुनः प्रणवसाम।

इति श्रीमहामहोपाध्यायाग्निचिद्-वाजपेयि-नरसिंह-विरचिते नित्याचारप्रदीपे नरसिंहोपासना।

इति प्रथमभागकृत्यं समाप्तम्।

श्रीनृसिंह उद्धारकरिवे।

श्रीनृसिंहाय नमः।

नित्याचारप्रदीपस्य प्रथमभागस्य विषयसूचिः।

इति ।

५२३ पत्रात् ५३२ पत्राणि सूर्य्यस्य दर्शनादिफलनामक-विषयस्य पूजास्वरूपविनिर्णयनामकविषयस्य सूर्य्यस्य गन्ध-पुष्प-धूप-दीप-नैवेद्य-नानाविधद्रव्यदाननामकविषयाणां सौरधर्म्मेति नामकविषयस्य च पाठान्तरार्थं द्रष्टव्यानि ।

५३५ पत्रात् ५५२ पत्राणि शिवस्य घृतकम्बलविधि-घृतकम्बलाभिषेक—घृतधारा-महास्नान-दर्शनादिफल-गन्ध-पुष्प-धूप-दीप-नैवेद्येत्यादिनामकविषयाणां शिवप्रदेयशिव-धर्म्मेतिनामक-विषयद्वयस्य च पाठान्तरार्थं द्रष्टव्यानि ।

५५४, ५५५ पत्रे ब्रह्मणो गन्ध-व्यजन-पुष्प-नैवेद्येतिनामक-विषयाणां ब्रह्मधर्म्मेति नामकविषयस्य च पाठान्तरार्थं द्रष्टव्ये ।

५६६ पत्रात् ५७० पत्राणि विष्णोर्म्महास्नान-महा-स्नानप्रयोगाष्टविधजलस्नानेतिनामकविषयत्रयस्य पाठान्तरार्थं द्रष्टव्यानि ।

तान्येतेषां पाठान्तराणि प्रायशः प्रमादबहुलानि ।

BIBLIOTHECA INDICA.

WORK No. 160.

NITYĀCĀRAPRADĪPAḤ.

SANSKRIT TEXT.

नित्याचारप्रदीपः।

NITYĀCĀRAPRADĪPAḤ

BY

NARASIṂHA VĀJAPEYĪ.

VOLUME II.

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬĀCĀRYYA

AND

MAHĀMAHOPĀDHYĀYA SADĀŚIVA MIŚRA.

PRINTED AT THE BAPTIST MISSION PRESS.

PUBLISHED BY THE ASIATIC SOCIETY OF BENGAL.

CALCUTTA.

1928.

NOTE.

Pages 1–384 edited by Paṇḍita Vinoda Vihāri Bhaṭṭācaryya.

Pages 385–748 edited, and indexes prepared, by MM. Sadāśiva Miśra.

Sanskrit

Pur.

नित्याचारप्रदीपे द्वितीयखण्डस्य

सूचीपत्रम् ।

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1194.

SIR·WILLIAM·JONES



MDCCXLVI–MDCCXCIV

नित्याचारप्रदीपः ।

NITYĀCĀRAPRADĪPḤ.

BY

NARASIMHA VĀJAPEYĪ

EDITED BY

PAṆDITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

VOLUME II. FASCICULUS I

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1908.

*Mīmāṁsā Darçana, Fasc. 6–19 @ /10/ each	Rs. 8	12
Nyāyavārtika, Fasc. 1--6 @ /10/ each	3	12
*Nirukta, Vol. IV, Fasc. 1--8 @ /10/ each	5	0
*Nitisara, Fasc. 2-5 @ /10/ each	2	8
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each	4	6
Nityācārapradīpaḥ Vol. I, Fasc. 1--8; Vol. II, Fasc. 1. @ /10/ each ...	5	10
Nyayabinduṭīkā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6; Vol. II, Fasc. 1--3 @ /10/ each	5	0
Padumawati, Fasc. 1--5 @ 2/	10	0
Pariçiṣta Parvan, Fasc. 3--5 @ /10/ each	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Prithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/-	1	0
Prākṛta Lakṣaṇam Fasc. 1 @ 1/8/ each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1--8; Vol. II, Fasc. 1--6; Vol. III, Fasc. 1--6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Saddarsana-Samuccaya, Fasc. 1-4 @ /10/ each	1	4
*Sāma Vēda Saṁhitā, Vols. I, Fasc. 7--10; II, 1-6; III, 1--7; IV, 1--6; V, 1–8, @ /10/ each	19	6
Sāṅkhya Sūtra Vṛtti, Fasc. 1–4 @ /10/ each	2	8
Ditto (English) Fasc. 1–3 @ 1/- each	3	0
*Sankara Vejaya, Fasc. 2-3 @ /10/ each	1	4
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Srauta Sutra Latyayan, Fasc. 1-9 @ /10/ each	5	10
,, ,, Asbalayana, Fasc. 4-11 @ /10/ each	5	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
*Taittreya Brahmana, Fasc. 6-25 @ /10/ each	12	8
,, Pratisakhya, Fasc. 1-3 @ /10/ each	1	14
*Taitterīya Saṁhitā, Fasc. 27–45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 7–19 @ /10/ each	6	14
Tantra Vārteka (English) Fasc. 1-6 @ 1/4/ each	7	8
Tattva Cintāmaṇi, Vol. I, Fasc. 1–9, Vol II, Fasc. 2–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	23	12
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
Upamita-bhava-prapañca-kathā, Fasc. 1-11 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3--6; Vol. II, Fasc. 1--7, @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1–8 Vol- II. Fasc. I @ /10/ each	5	10
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each	1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1. (200 pages.)	1	4

Tibetan Series.

Pag-Sam Ṭhi S'iñ, Fasc. 1--4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6, @ 1/ each	14	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1--6; Vol. II. Fasc. 1--5 @ 1/ each	11	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1--13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--3 @ 1/- each	3	0
Āīn-i-Akbarī, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, Fasc. 1--5, @ 2/- each	34	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each	55	8
Ditto (English) Vol. I, Fasc. 1--8; Vol. II, Fasc. 1-4 @ 1/4/ each	15	0
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc. 1--19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farhang-i-Rashīdī, Fasc. 1–14 @ 1/8/ each	21	0

*The other Fasciculi of these works are out of stock, and complete copies cannot

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,

11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ...	Rs.	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ...	...	1	14
*Agni Purāṇa, Fasc. 3-14 @ /10/ each ...	...	7	8
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	...	14	6
Aitereya Lochana	...	2	0
*Aṇu Bhāshya, Fasc. 2-5 @ /10/ each	...	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-	...	1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	...	3	12
*Atharvana Upanishad, Fasc 3-5 @ /10/ each	...	1	14
Atmatattaviveka, Fasc. I. @ /10/ each ...	...	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each ...	...	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-6; Vol. II. Fasc. 1-5 @ 1/ each...	...	11	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-3 @ 1/- each ...	...	3	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each ...	...	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1 @ /10/ each	...	2	8
*Bhāmatī, Fasc. 4-8 @ /10/ each	...	3	2
Bhaṭṭa Dīpikā Vol. I, Fasc. 1-5 @ /10 each	...	3	2
Brahma Sutra, Fasc. 1 @ /10/ each	...	0	10
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	...	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	...	3	12
Bodhicaryāvatāra of Cāntideva, Fasc. 1-5 @ /10/ each	...	3	2
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	...	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	...	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	...	14	6
Ditto Vol. 6, Fasc. 7	...	1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-12 @ /10/ each ..	...	7	8
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each ..	...	36	14
Ditto Vol. 4, Fasc. 7	...	1	4
Çlockavartika, (English) Fasc. 1-6 @ 1/4/ each	...	7	8
*Çrauta Sūtra of Āpastamba, Fasc. 9-17 @ /10/ each	...	5	10
Ditto Çāṅkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /10/ each; Vol 4, Fasc. 1	...	10	0
Çrī Bhāshyam, Fasc 1-3 @ /10/ each ...	...	1	14
Dāna Kriyā kaumudī, Fasc 1-2 @ /10/ each	...	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	...	4	6
Ditto Āchārasārah Vols. II, Fasc. 1-3 @ /10/ each ...		1	14
Gobhiliya Grihya Sutra, Fasc. 4-12 @ /10/ each	...	5	10
Ditto Vol. II. Fasc. 1	...	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	...	4	6
Kātantra, Fasc. 1-6 @ /12/ each	...	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	...	17	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each ...	...	3	2
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each	...	3	0
*Lalitavistara, Fasc. 3-6 @ /10/ each	...	2	8
Madana Pārijāta, Fasc. 1-11 @ /10/ each	...	6	14
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-6 @ /10/ each	...	16	14
Manutikā Sangraha, Fasc. 1-3 @ /10/ each	...	1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each	...	9	0
*Markandeya Purana, Fasc. 5-7 @ /10/ each			

Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each	Rs.	4	0
Futūḥ-ush-Shām of Wāqidī, Fasc. 1-9 @ /10/ each ...	...	5	10
Ditto of Āzādī, Fasc. 1-4 @ /10/ each ...	...	2	8
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each	...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each	...	7	8
Iqbālnāmah-i-Jahāngīrī, Fasc. 1-3 @ /10/ each	...	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	...	51	0
Ma'āṣir-i-' Ālamgīrī, Fasc. 1-6 @ /10/ each	...	3	12
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each	...	35	0
Maghāzi of Wāqidī, Fasc. 1-5 @ /10/ each	...	3	2
Muntakhabu-t-Tawārikh, Fasc. 1-15 @ /10/ each ...	...	9	6
Ditto (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/ each ...	...	15	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each	...	11	14
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	...	0	10
Niẓāmī's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12/ each	...	1	8
Riyāẓu-s-Salātīn, Fasc. 1-5 @ /10/ each ...	...	3	2
Ditto (English) Fasc. 1-5 @ 1/	...	5	0
Tabaquāt-i-Nāṣirī, Fasc. 1-5 @ /10/ each ...	...	3	2
Ditto (English) Fasc. 1-14 @ 1/ each	...	14	0
Ditto Index	...	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni Fasc. 1-7 @ /10/ each	...	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāī Aīf, Fasc. 1-6 @ /10/ each	...	3	12
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...	...	3	0
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1 @ 1/	...	1	0
Wis-o-Rāmīn, Fasc. 1-5 @ /10/ each	...	3	2
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ...	...	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each	...	20	0
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.			
3. JOURNAL of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members			

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.			
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.			
6. Centenary Review of the Researches of the Society from 1784-1883	...	3	0
A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	...	4	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	...	4	0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1884.	...	3	8
8. Mahābhārata, Vols. III and IV, @ 20/ each	...	40	0
9. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to. @ 6/ each	...	18	0
10. Tibetan Dictionary, by Csoma de Körös	...	10	0
11. Ditto Grammar " "	...	8	0
12. Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	...	3	0
13. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson	...	1	0
14. Memoir on maps illustrating the Ancient Geography of Kasmir, by M. A. Stein PH.D., Jl. Extra No. 2 of 1899	...	4	0
15. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott.	...	10	0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each ...	...	34	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra	...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

7-11-08.

Books are supplied by V. P. P.

नित्याचारप्रदीपः।

द्वितीयभागः।

श्रीगणेशाय नमः। ओंनमः श्रीगोपालाय।

गोवर्द्धनोद्धरणकर्म्मणि संप्रवृत्ते
गोपेषु सस्मितससम्भ्रमसत्वरेषु।
ब्रह्माण्डधारणनियन्त्रितरोमकूपः
कृष्णोऽपि सस्मितमुखो भवतः पुनातु॥

अथ द्वितीयभागकृत्यम्।

तत्र दक्षः,—

द्वितीये च तथा भागे वेदाभ्यासो विधीयते।
वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः।
तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा॥
समित्पुष्पकुशादीनां स कालः समुदाहृतः।

उपादानस्येति शेषः। तत्र प्रथमाध्ययनं तावदुच्यते।

मनुः,—

तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः।

वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना॥

तपोविशेषा [1]ब्रह्मचारिधर्म्मा गुरुशुश्रूषाग्निपरिचर्य्यादिरूपाः।

तथा,—

कृतोपनयनस्यास्य व्रतादेशनमिष्यते।

ब्रह्मणो ग्रहणञ्चैव क्रमेण विधिपूर्व्वकम्॥

ब्रह्मणो वेदस्य। क्रमेण समाम्नानक्रमेण।

तथा,—

अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः।

गुरौ वसन् सञ्चिनुयाद् ब्रह्माधिगमिकं तपः॥

[2][तथा,—]

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।

स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥

[3][याज्ञवल्क्यः,—]

यज्ञानां तपसाञ्चैव शुभानाञ्चैव कर्म्मणाम्।

वेद एव द्विजातीनां निश्श्रेयसकरः परः॥

लघुव्यासः,—

मेखलाजिनदण्डानां धारिभिर्ब्रह्मचारिभिः।

वेदः कृत्स्नोऽधिगन्तव्यः सविज्ञानो द्विजातिभिः॥

(१) B. ब्रह्मचारिणो विहिता गुरुशुश्रूषा ०

(२) A. Omits the portion bracketed.

(३) A. Omits the portion bracketed.

भिक्षाशिभिर्गुरोर्नित्यं शुश्रूषायां रतैस्तथा।

आसमाप्तेर्व्रतं कार्य्यं वेदस्य विधिवद्द्विजैः॥

इत्यादिवचनात् "स्वाध्यायोऽध्येतव्यः" इतिविधेः स्वकीयशाखापरत्वाच्च सम्पूर्णशाखाध्ययनं नित्यम्।

तथाच बौधायनः ऋणत्वेनावश्यकर्त्तव्यतामाह स्वाध्यायस्य

स्वाध्यायेन ऋषीन् पूज्य सोमेन च पुरन्दरम्।

प्रजया च पितॄन् पूर्व्वान् मृतो दिवि विमोदते॥

श्रुतावपि,—जायमानोहवै ब्राह्मणस्त्रिभिर्ऋणवान् जायते। इति। ब्रह्मचर्य्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यत्र ब्रह्मचर्य्यग्रहणं स्वाध्यायोपलक्षणार्थमेव। अतएव शतपथश्रुतिः ऋणं हि बाव जायत इत्युपक्रम्य अथ यदेवानुब्रवीत तेन ऋषिभ्यो ऋणं जायते तद्धि तेभ्यः करोति यदानुब्रूत ऋषीणां निधिप इति ह्यनुगमनमाचष्टे। तदुक्तं जैमिनिना श्रुतिव्याख्यानार्थं "ब्राह्मणस्य तु सोमविद्या प्रजमृणवाक्येन संयोगात्॥" इति ब्रह्मचर्य्यं विद्यात्वेन व्याख्यातम्। नचैकशाखाध्ययनेन ऋणापकरणं स्वाध्यायोऽध्येतव्य इत्यस्य सम्पूर्णशाखाविषयत्वात्। तदुक्तं भट्टैः स्वाध्यायग्रहणे(न)न एकशाखा हि परिगृह्यते वेदः कृत्स्नोऽधिगन्तव्य इति [1]मानववाचा एकशाखाध्ययने विध्यभावात्। न चाध्ययनस्यानुष्ठानोपयोगिकर्म्मणां ज्ञानं फलमिति तत्तत्कर्म्मज्ञानार्थं

(१) P. मानत्वाच्च ०।

तत्तद्वाक्याध्ययनं विधीयते। न तु वाक्यसमुदायरूपा शाखा तस्य ज्ञानाजनकत्वादिति वाच्यम्। स्यादेवं यदि तत्तद्ज्ञानं फलं श्रूयेत। न तु तदस्ति। किन्तु स्वाध्यायोऽध्येतव्य इति श्रूयते। फलं न श्रूयते। तत्र दृष्टे सत्यदृष्टं न कल्प्यत इति न्यायात् यद्यत् स्वाध्यायाध्ययनजन्यं दृश्यते तत्तत् फलं कल्प्यते। तत्र क्वचित् कर्म्मज्ञानं क्वचिज्जपोपयुक्तमन्त्रादौ स्वरूपज्ञानं क्वचिदुपनिषदादौ पुरुषार्थरूपमात्मज्ञानं यथाफलं कल्प्यते।

तथा,—

अरण्ये नियतो जप्त्वा त्रिर्वै वेदस्य संहिताम्।

मुच्यते ब्रह्महत्यायाः

इत्यादिप्रायश्चित्तविधेः फलार्थवेदपारायणविधेः "अग्र्याः सर्व्वेषु वेदेषु" इत्यादिपंक्तिपावनत्वादिसिद्धेश्च सम्पूर्णशाखाग्रहणसाध्यत्वात् सम्पूर्णशाखास्वरूपग्रहणमपि पुरुषाभिलषितत्वादेव क्रतुज्ञानवद् वेदाध्ययनफलम्। न च पारायणाद्यर्थं पृथक् कृत्स्नशाखाध्ययनविधिरस्ति। नचान्यानि तेन पारायणादिकर्म्माणि भवन्ति। तत्रैतत् स्यात्। विधेरेकत्वेऽपि फलभेदाद् विधेयभेदः। विधेयभेदाच्च विधिवाक्यार्थभेदात् फलतोऽध्ययनविधिनानात्वमिति। तन्न। फलभेदासिद्धेः। पुरुषापेक्षितत्वे सत्यध्ययनजन्यत्वोपाधिना सर्व्वेषामेकरूपेण फलत्वात्। अवान्तरापूर्व्वभेदाच्च वाक्यविशेषाध्ययने धर्म्मविशेषविधिः। यथोपनिषदामरण्याध्ययनमश्वमेधाध्ययनेऽश्ववासदानं वा मैत्रावरुणग्रहाभ्यासे श्रयणविधित्वात्।

यत्तु मनुवचनं,—

यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत्।

ब्रह्मच्छन्दस्कृतञ्चैव द्विजो युक्तो ह्यनापदि॥

नानेन ब्राह्मणाध्ययनं काम्यमुच्यते। किन्तु पूर्व्वमुपाकर्म्म कृत्वाऽर्द्धपञ्चमासपर्य्यन्तं छन्दोऽध्ययनं तदूर्द्धं शुक्ले छन्दः पठनमित्यादिना या वेदाध्ययनेतिकर्त्तव्यता कथिता तस्या एव छन्दस्कृतशब्दवाच्ये मन्त्रभागे नित्यतोच्यते। सम्यक्ग्रहणधारणसामर्थ्यात्मकानापदि ब्रह्म ब्राह्मणं छन्दस्कृतं मन्त्रभागं युक्तः पूर्व्वोक्तोपाकर्म्मादिप्रकारयुक्तोऽधीयीत। आपदि तु सम्यक्ग्रहणधारणाऽसामर्थ्ये ब्राह्मणभागं यथोक्तनियमं विनापि नित्यमधीयीतेति मन्दबुद्धेर्नियममपेक्षमाणस्य प्रधानभूतब्राह्मणाध्ययनबाधापत्तेः। "अङ्गगुणविरोधे च तादर्थ्यात्।" इतिन्यायात्। तेन मलवद्-वासोनिषेधवत् विशेषणस्य यथोक्तविधिरूपस्य मन्त्राध्ययने नित्यतोच्यते। ब्राह्मणाध्ययने च ग्रहणसमर्थस्य सुमेधसो [1]नित्यता। मन्दबुद्धेश्च ब्राह्मणाध्ययने यथोक्तविधेरनियम इति। इत्थमेव मेधातिथिप्रभृतिभिरपि व्याख्यातम्। इत्थमेव लक्ष्मीधरः। आपदि मन्त्रजातं यथोक्तविधिना पठेत्। अनापदि मन्त्रजातं ब्राह्मणञ्च यथोक्तविधिना पठेदित्यर्थः। यत्तु तृतीयाष्टमभाष्ये ननु वेदमधीयीतेति वचनात् कृत्स्नो वेदोऽध्येतव्यः। न वेदावयवेनाधिक्रियत इति। उच्यते। तस्मात् क्रत्वन्तरज्ञानमधिकारे नादर्त्तव्यं, सर्व्वे क्रतवः

---

(१) B. यथोक्तविधिनित्यता।

पृथक् पृथक् ज्ञायेरन्निति कृत्स्नस्य वेदस्याध्ययनं युज्यत इति। तथा वार्त्तिके यद्यपि स्वाध्यायग्रहणेन सकलो वेदः परिगृहीतस्तथापि दर्शपौर्णमासौ कुर्व्वाणस्य ज्योतिष्टोममन्त्र-ब्राह्मणं न क्वचिदपि युज्यते इति। तदपि नाधिकारं व्यावर्त्तयति। [1]इष्टवेदेनैव योग्यतासिद्धेः। तेन तद्याजिन-स्तावानेव स्वाध्यायः। यत्त्वसौ सकलः पठ्यते तन्नित्यकाम्य-नैमित्तिकानां यथोत्पन्नकालत्वान्न ज्ञायते किं कदा करिष्यत इति। यत्र पठितं तत्फलप्रार्थनायामविद्यत्वादशक्तः स्यात् तदानीञ्चाधीयमानस्य [2]व्रतनियमवद् वेदाध्ययनासम्भवात्कर्म्मभिश्च विशिष्टक्रियोपात्तवेदनिराकाङ्क्षैस्तादृशस्य ग्रहणाद् वैगुण्य-प्रसङ्गः। कामश्रुत्यपरिग्रहाच्च सर्व्वैरनारभ्य वादविधानो वेदो-पेक्षित इत्यवश्यं ब्रह्मचर्य्यकाल एव समस्तोऽध्येतव्यः। यदि तु कथञ्चिदशक्तो नाधीते सकलं अग्निहोत्रदर्शपौर्णमासमात्रं कथञ्चि-दधिगच्छति न तस्य तत्राप्यनधिकारः। तत्रायमाशयः काम-श्रुतिवशादाक्षेपेणाध्ययनकरणे यदा [3]यत्कर्त्तव्यं तदा तदर्थं तस्य वेदभागस्याध्ययनं कर्त्तव्यं स्यात्। अनारभ्यविधिसत्त्वात्तु काम-श्रुतीनामौदासीन्ये [4]सकलवेदस्य ब्रह्मचर्य्ये अध्ययनं नित्यम्। अशक्तस्य सकलवेदाध्ययनाभावे तु नित्यकर्म्मरूपसकलवेदाध्ययन-लोपात् प्रत्यवायोऽस्त्येव। केवलं यावदधीतं तावतोऽर्थज्ञाने यत्

(१) P. क्वचिद् वेदेनैव ०।
(२) P. कर्म्मकर्त्तव्यव्रतनियम ०।
(३) B. यत् कर्म्म कर्त्तव्यं ०।
(४) B. सकलस्य वेदस्य।

कर्म्म कर्त्तुं शक्यते तत्राधिकारलोपो नास्तीत्युच्यते। क्रतुविधिभि-र्हि स्वस्वज्ञानमेव गृह्यते न क्रत्वन्तरज्ञानमिति।

यत्तु यमवशिष्ठौ—

न शूद्रो वृषलो नाम वेदो हि वृष उच्यते।
यस्य विप्रस्य तेनालं स वै वृषल उच्यते॥
तस्माद् वृषलभीतेन ब्राह्मणेन प्रयत्नतः।
एकदेशोऽप्यध्येतव्यो यदि सर्व्वो न शक्यते॥

इति तदपि प्रत्यवायसत्त्वेऽपि वृषलत्वेन कर्म्माधिकारनिवृत्तिरेक-देशाध्ययने नास्तीत्येवं परमेव। अतएव अजिताकारेण व्याख्यातं इह स्वाध्यायविधिवशेन क्रियमाणमध्ययनं यथाविध्यनुष्ठितं यथा-विभागं कर्म्मसूपयुज्यते तस्मात् सकलस्याध्ययनम्। कथञ्चिदन-ध्ययनेत्विदमुच्यत इति। षष्ठतन्त्ररत्ने च [1]फलाश्रवणाध्ययन-मित्युक्त्वा आवश्यकजपयज्ञप्रायश्चित्तपारायणाद्युपयोगिग्रन्थाव-धारणफलत्वादावश्यकमिति सकलाध्ययनस्य नित्यतामाह। केवलं ग्रहं सम्मार्ष्टीत्यादिवत् स्वाध्यायस्याध्ययनसंस्कार्य्यत्वाद् यावतो भागस्य क्रत्वर्थज्ञानजनकत्वं तावतः संस्कारे क्रियमाणेऽपि क्रत्व-न्तरज्ञानहेतुवेदभागस्य संस्काराभावो न दोषाय। संस्कार्य्याणा-मुद्देशनसाहित्याविवक्षणात्। ग्रहान्तरासम्मार्गोऽपि ऐन्द्रवायव-सम्मार्गस्य च वैगुण्यादैन्द्रवायवयागाञ्चापूर्व्वसिद्धिवत्। ग्रहान्तरा-सम्मार्गात्तु परमापूर्व्वसिद्ध्यभाववत्। सकलाध्ययनाभावे विहिता-

(१) B. फलाविधिवशादध्ययनं नित्यमित्युक्त्वा।

करणात् प्रत्यवायो भवत्येव सकलाध्ययनस्य विहितत्वात् । अन्यथा पारायणाद्यसम्भवादित्युक्तम् । [1]आधाने तद्द्वितीयाश्रुत्याग्निसंस्कारोऽपि गार्हपत्याहवनीयपरत्वेनाग्निशब्दस्य गार्हपत्याहवनीयशब्दयोरलौकिकत्वेन ज्ञातत्वादज्ञातस्य चोद्देश्यस्यापि यूपं छिनत्तीत्यादिवत् स्वरूपस्य जिज्ञास्यत्वेन विशेषणाकाङ्क्षावशादुद्देश्यविशेषणस्यापि विवक्षावशात् सहितयोरेवाग्न्योराधानसंस्कार्य्यत्वमिति । नैवैकाग्निसिद्धग्रर्थसाधनमिति विशेषः । तेन दर्शपौर्णमासमात्रार्थमन्त्रब्राह्मणाध्ययने दर्शपौर्णमासाधिकारो भवत्येव । तथाच हारीतः क्षत्त्रियोऽध्ययनयजनदानधर्म्मादेव व्रतैकदेशोति वेदैकदेशाध्यायिनः क्षत्त्रियस्य यजनं दर्शयति । यानि तु वेदैकदेशाध्ययनानुवादेन वेदार्थज्ञानप्रशंसावाक्यानि

अधीत्य यत्किञ्चिदपि वेदार्थाधिगमे रतः ।

इत्यादीनि तान्यर्थवादरूपाणि ।

यद्वा यो नाम [2]बुद्धिमान्द्यादिना सम्पूर्णशाखाध्ययने तदर्थविचारे चोभयत्राशक्तः स किमर्थज्ञानमुपेक्ष्य यावज्जीवमक्षराण्यभ्यसेत् । किंवा किञ्चिदधीत्य तदर्थं ज्ञात्वा विचार्य्य क्रत्वनुष्ठानं कुर्य्यात् इति संशये तं प्रति एकदेशाध्ययनपूर्व्वकं तदर्थबोधो विहित इति न्यायसिद्धमुच्यते । निरर्थकसकलाध्ययनात् सार्थकं किञ्चिदध्ययनं यज्ञानुष्ठानहेतुत्वात् श्रेय इति । न चैवमेकदेशाध्ययनं विहितम् । तथाच न प्रत्यवायः स्यादिति वाच्यम् ।

(१) B. आधाने तु द्वितीयाश्रुत्याग्निसंस्कारत्वेऽपि ।

(२) B. बुद्धिमान्द्यादापदि वा सम्पूर्ण ० ।

[1]तथाहि—

वर्णिनां हि बधो यत्र तत्र साक्ष्यनृतं वदेत् ।

इति बधानुकूलत्वेन सत्यवदनस्य गुरुतरपापजनकत्वादनृतवदनस्य लघुपापहेतुत्वात् तदेव कृत्वा ततः सारस्वतीष्टिः प्रायश्चित्तं कर्त्तव्येति न्यायसिद्धमुच्यते । एवमिह अर्थज्ञानपूर्व्वकानुष्ठानश्रेयोऽपेक्षया सकलानध्ययनदोषो लघुरित्यवबोध्यते न तु विधीयते ।

एवं सति नित्यकर्म्मापेक्षितवेदभागाध्ययनमेव नित्यमितरभागाध्ययनं काम्यमिति स्वरसंस्कारसहिताध्ययनसामर्थ्ये सत्येव काम्यभागाध्ययनं नित्याध्ययने यथाशक्तिकृताङ्गसाहित्येनावैगुण्यमिति स्वराद्यभावेऽपि न दोष इति मतमपास्तम् । उक्तन्यायेन सकलाध्ययनस्य नित्यत्वेन यथाशक्त्युपबन्धेन स्वराद्यसामर्थ्येऽपि प्रधानभूताक्षररूपवेदस्वीकरणस्यावश्यकत्वात् । यत्तु लघुव्यासवचनम्,—

ऋक्पादमप्यधीयीत मार्गेणानेन धर्म्मवित् ।
नत्वेव चतुरो वेदानन्यायेन कदाचन ॥

इति तदध्ययनाङ्गप्रशंसार्थमेव । तथा—

वेदविप्लावनात् तेन वरं मौनं समाश्रितम् ।
वेदविप्लावनाद् विप्रो नरकं यात्यधोमुखः ॥

इति तत्र वेदविप्लावनमनध्यायेऽध्ययनम् । अनध्यायाध्ययनवर्जनं स्नातकव्रतमध्ये लिखितम् । तदतिक्रमेऽयं दोषः । अन्यथाङ्ग-

(१) B. यथाहि ।

वैगुण्यस्य प्रधानफलानुगत्यैव चरितार्थत्वात् प्रत्यवायहेतुत्वा-
कल्पनात् । तेन शक्तस्यायं दोषः । अशक्तस्य तु प्रधानाध्ययन-
मात्रेऽपि प्रत्यवायाभावः ।

यत्तु मिथ्याधीती संवत्सरं ब्राह्मणगृहे भैक्षं चरेत् इति तद-
ध्ययनाङ्गवैगुण्य समाधानार्थं प्रायश्चित्तम् । न तत्र भयेन सकला-
ध्ययनत्यागः । एतेन ब्रह्मोज्झिताभयेन एकदेशाध्ययनं प्रत्युक्तम् ।
एकदेशस्यापि विस्मरणसम्भवे न तदपि नाध्येयं स्यात् । इदं
चिन्त्यते । इतराङ्गत्यागवत् ब्रह्मचर्य्यरूपाङ्गत्यागेऽध्ययनं भवति
न वेति । [1]तत्र ब्रह्मचर्य्यस्य विध्यन्तरसिद्धत्वात् नित्येषु यथा-
शक्त्युपबन्धस्य विध्यन्तरसिद्धाविषयत्वात् तत्र न यथाशक्त्युपबन्धः ।
यथाहि कर्म्मज्ञानं आहवनीयादयश्च विध्यन्तरसिद्धत्वात् यथाशक्ति
यावज्जीवमग्निहोत्रं जुहुयादिति विधौ अध्ययनजन्यकर्म्मज्ञानं
आहवनीयञ्च त्यक्त्वा नाधिकारः । तत् कस्य हेतोः । यदि जुहुया-
दिति प्रयोगविधिना अनुष्ठाप्यते तत्र यथाशक्तीति विशेषः । न
चाग्निविद्ययोरनेनानुष्ठानचोदनाऽध्ययनविधिसिद्धत्वात् । एवमिह
ब्रह्मचर्य्यस्येति प्रतिभाति । नैवं ब्रह्मचर्य्यस्य [2]विध्यन्तरसिद्धत्वा
भावात् । ब्रह्मचर्य्यं हि नामाश्रमः । गुरुगृहवासः । गार्हस्थ्यं
स्वगृहे वासः । वानप्रस्थं वने वासः । अनिकेतत्वं सन्न्यासः ।
तत्र गुरुगृहवासरूपब्रह्मचर्य्यं सामर्थ्यात्मकलिङ्गेन । तत्तु वाक्यैश्चा-
ध्ययनप्रयोगविधिनैवानुष्ठाप्यत इत्यस्त्येव तत्रापि यथाशक्त्युपबन्धः ।

(१) A. इति ।

(२) B. सिद्धत्वात् ।

तथाच मनुः,—

"गुरौ वसन् सञ्चिनुयाद् ब्रह्माधिगमिकं तपः ॥"

"तपोविशेषैर्वेदः कृत्स्नोऽधिगन्तव्यः ॥"

इति तपःशब्दवाच्यब्रह्मचर्य्यरूप-गुरुगृह वासादिनियमस्याध्ययन-
प्रयुक्तत्वं दर्शयति ।

तथाच बृहस्पतिः,—

एवं दण्डादिकैर्युक्तैः संस्कृत्य तनयं पिता ।

वेदमध्यापयेद् यत्नाच्छास्त्रं मन्वादिकं तथा ॥

एवञ्च सति ब्रह्मचर्य्ये वेदमुपक्रम्य यदि शरीरक्लेशासहत्वेन प्रधान-
रूपाध्ययनविरोधः शङ्क्येत तदा [1]समावर्त्तनानन्तरमपि सकल-
शाखाध्ययनं कार्य्यं तथाधीतेन च यथाशक्तिकृताङ्गसहिताध्ययन-
जन्यक्रतुज्ञानं क्रत्वधिकारसिद्धये समर्थमेव । एतस्मिन्नेव विषये
मनुः—

आ हैव स नखाग्रेभ्यः परमं तप्यते तपः ।

यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥

आ हैव स नखाग्रेभ्यः स्रग्व्यपीति ब्रह्मचर्य्यधर्म्मत्यागेनापीति
लक्ष्मीधरः । स्रग्वी गृहस्थोऽपीति मेधातिथिः । न चैतत्
ब्रह्मयज्ञपरं प्रथमाध्ययनोपक्रमेऽभिधानात् । [2]यद्वा योऽनधीत्य
द्विजो वेदमित्यादिषु प्रथमाध्ययनपरामर्शात् । व्रतस्नातकस्य व्रतं
समाप्य वेदञ्चासमाप्य कृतसमावर्त्तनस्य [3]वचनबलाच्चैकदेशाध्ययन

(१) B. समावर्त्तनोत्तरमपि ।

(२) B. P. उपर्य्यपि योऽनधीत्य ० ।

(३) B. वचनबलाद् वेदैकदेशा ० ।

एव ब्रह्मचर्य्यमङ्गम् । एकदेशान्तरं न ब्रह्मचर्य्यमङ्गमपेक्षत इति विधिबलात् कल्पते । विद्यास्नातकस्यैव सकलाध्ययनेन ब्रह्मचर्य्यमङ्गमिति विशेषः ।

केचित्तु मन्त्रमात्राध्ययनेऽपि ब्राह्मणाध्ययनं विना कल्प-सूत्रादिभ्यः कर्म्मज्ञानेन क्रत्वधिकारसिद्धिः । यथा शाखान्तरा-ध्ययनं कर्म्मज्ञाने वैकल्पिकं एवं कल्पसूत्राध्ययनमपि वैकल्पिकमेव ।

तुल्यार्थानां विकल्पस्तु कर्म्मकत्वे भविष्यति ।

इति न्यायसाम्यात् । तथाच पारस्करः,—वेदमधीत्य स्नायाद् । विधिर्विधेयस्तर्कश्च वेदः । षड़ङ्गमेके । इत्युक्त्वा । कामन्तु याज्ञिकस्य । इत्याह । कल्पसूत्रेण [१]यज्ञज्ञानवतः कामं स्नानं न वेदसमापननियम इत्यर्थः । तथा भट्टाचार्य्यैरप्युक्तं—

वेदादृतेऽपि कुर्व्वन्ति कल्पैः कर्म्माणि याज्ञिकाः ।
नतु कल्पादृते केचिन्मन्त्रब्राह्मणमात्रकात् ॥

इति । [२]स्यादेवं यदि कल्पाध्ययनं वैकल्पिकं स्यात् । कल्पानां वेदाङ्गत्वे वेदाङ्गनिर्णायकरूपोपसंहारार्थत्वेन भिन्नार्थत्वात् । तत्—

उक्तशाखान्तरन्यायस्तुल्याध्येतृकतावशात् ।
सर्व्वशाखाविधित्वं हि स्थितमध्येतृभेदतः ॥

पिकनेमाधिकरणे । सषड़ङ्गवेदाध्ययनजन्यज्ञानादेव क्रियाफलम् । वेदादज्ञातोऽप्यर्थः कल्पादिभ्यो ज्ञातः क्रियाङ्गं यदा तदा अङ्गरूप-

(१) B. यज्ञज्ञानवत इत्येव कामस्नानं ।

(२) A. P. तस्मादेवं यदि ० ।

कल्पसूत्राज्ज्ञाने वेदादज्ञातोऽपि कर्म्माङ्गमिति साहसम् । तेन पारस्करवचनं अङ्गान्तराध्ययनं विनापि वेदात् यज्ञज्ञानवत इत्येव योजयितुं न्याय्यम् । यत्तु भट्टाचार्य्यैः कल्पसूत्राधिकरणपूर्व्वपक्षे वेदादृतेऽपीत्युक्तं तच्छाखान्तरीयाङ्गाभिप्रायं वेदादृते काण्वशाखा-ध्यायिनो माध्यन्दिनशाखारूपवेदाभावेऽपि तदुक्ताङ्गं कल्पादवगम्य याज्ञिकाः कर्म्म कुर्व्वन्ति । नतु कल्पादृते काण्वमन्त्रब्राह्मण-मात्रात् शाखान्तरीयाङ्गज्ञानादित्यर्थः । केवलं यो वेदाध्ययनम-कृत्वा सौकर्य्याय प्रथमं कल्पसूत्रेभ्यो यज्ञं ज्ञातवान् स पश्चाद् गुरु-मुखाद् वेदं श्रुत्वा ततो यज्ञं पुनर्जानाति तस्य नाधिकारापायः । अतएव सम्प्रत्यपि शिष्टाः प्रयोगसूत्राद् यज्ञाज्ञानवन्तोऽपि वेदं पुनर्गुरुमुखाच्छ्रुत्वा यज्ञाधिकारं मन्यन्ते । एवञ्च नित्यवत् काम्ये-ऽप्यधिकारः । विध्यन्तरसिद्धयज्ञज्ञानाविशेषात् तस्य च विधेर्नित्य-त्वेनाङ्गवैगुण्येऽपि प्रधानमात्रात् फलोपादानात् । फलञ्च क्रतुज्ञानं तन्नित्यैरिव काम्यैरपि गृह्यते । एवञ्चाध्ययनाङ्गानामध्ययनप्रति-बन्धनिवृत्तिपराऽङ्गत्वाद् वाक्यान्तरेण खादिरादिवद् गुणफल-सम्बन्धात् पुरुषार्थत्वेन चरितार्थत्वात् ब्रह्मचर्य्यं विनाधीतेन काम्य-कर्म्मण्यधिकारसिद्धिः । [१]नह्यनङ्गत्वाद् जायेत वैगुण्यं अध्ययना-ङ्गाणि च न काम्यक्रत्वङ्गानि । किन्तु तज्ज्ञानं तच्च यथाशक्त्यङ्ग-सहितानुष्ठितमित्यध्ययनविधिना जातमेव क्रतुज्ञानं क्रतुविधि-प्रयुक्तत्वे ह्यध्ययनाङ्गानां स्यादेवं नतु तदस्तीत्यावेदितम् । अतएव

(१) B. P. नह्यङ्गहानौ कर्म्मवैगुण्यम् । अध्ययना० ।

हारीतः शूद्रश्रवणकुतर्ककृतवेदाप्रामाण्याशङ्कनधनदानाद्यर्थपाठन-स्वाध्यायधर्म्मत्यागानभ्यासवेदोक्तरहस्यदेवतादि-ख्यापनाख्यानप्रश्नाः ग्रन्थोपसर्गाः । अव्रताध्ययनानियमाध्ययनगुरुशुश्रूषात्यागक्रिया(?)ध्ययनगुरुद्वेषणमित्यध्ययनोपसर्गाः । अनुपनीताध्यापनपातक्य-ध्यापनख्यातार्थाध्यापनमित्यध्यापनोपसर्गाः । सर्व्वेषामनध्याय-पाठः अशुचिस्थानपाठः अतिविलम्बितपाठः अत्युच्चपाठः अक्षर-वर्णपदपादहीनपाठः परावरोच्चारितग्रहणत्रैस्वर्य्यविच्छेदशून्य-पाठातित्वरितपाठ इति जप्यस्य एते ब्रह्मोपसर्गा इत्युक्त्वा एतैरुप-सृष्टं ब्रह्मक्षत्र(क्षत्रा)क्षममवीर्य्यमतेजस्कमसिद्धमसमृद्धार्थमलावक-मदैवमस्वर्गमल्पफलं(अध्रुवं)भवतीति। अवीर्य्यं रक्षोघ्नादिवीर्य्यशून्यं अतेजस्कं ब्रह्मवर्चसादिरूपफलहीनं असमृद्धार्थं स्तुत्यादिकार्य्ये अशक्तं अलावकं अस्वस्त्ययनादिरूपेण रोगाद्यनिवारकं अदैवं देवताप्रीतौ न क्षमं अस्वर्गं अल्पफलं यं यं क्रतुमधीते तस्य फलं प्राप्नोतीत्येतेन शून्यं अध्रुवमनित्यम् । यथोक्तं

छन्दांस्येनं मृत्युकाले त्यजन्ति ।

तथा,—

उपसर्गविनिर्मुक्तं योऽधीते यं क्रतुं द्विजः ।
तेन तेनेष्टं भवति प्रजापतिवरो यथा ॥

इति । सोपसर्गाध्ययने फलान्तराणामभावं दर्शयति नतु [१]ज्ञान-वैगुण्येन क्रतुफलाभावः । अस्वर्गमित्यस्याध्ययनफलस्वर्गाभाव-

(१) B. क्रतुज्ञानवैगुण्येन ।

परत्वादिति । एवञ्च शाखान्तरीयकर्म्मानुष्ठानं तदध्ययनं विनापि स्मृतिकल्पसूत्रेभ्यो ज्ञात्वा कर्त्तव्यम् ।

यत्तु,—

कुलान्यकुलतां यान्ति यानि हीनानि मन्त्रतः ।

इति मन्त्रमात्राध्ययनेऽपि कुलहानिर्नास्तीति मेधातिथिव्याख्यानं न तेन ब्राह्मणाध्ययनं विना यज्ञाधिकारप्रतिपादनं किन्तु [१]कुल-नाशदोषाभावपरमिति सर्व्वमनवद्यम् ।

---

[२]अथातोऽध्ययनाङ्गानि ।

मनुः,—

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥

आचमनं सकृदेव ।

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥
व्यत्यस्तपाणिना कार्य्यमुपसङ्ग्रहणं [३]गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥

(१) B. कुलनाशनदोषा ० ।
(२) B. तत्राध्ययनानि ।
(३) B. सदा ।

अध्येष्यमाणन्तु गुरुर्नित्यकालमतन्द्रितः।
अधीष्व भो इति ब्रूयाद् विरामोऽस्त्विति चारमेत्॥
ब्रह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा।

तथा,—

प्राक्कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः।
प्राणायामैस्त्रिभिः पूतस्तत ॐकारमर्हति॥

गौतमः,—

प्राणोपस्पर्शनं दर्भैः। प्राणायामास्त्रयः पञ्चदशमात्राः। तैन पवित्रैः पावनं मनूक्तम्। कुशैरिन्द्रियस्पर्शनं गौतमसंवादात्। इन्द्रियाणि दश। मात्रा ह्रस्वाक्षरकालः।

मनुः,—

अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः।
[1]वेदत्रयान्निरमभत् भूर्भुवः स्वरितीति च॥
त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्।
तदित्यृचोऽस्याः साविच्याः परमेष्ठी प्रजापतिः॥

तेनादौ ॐकारव्याहृतित्रयगायत्रीजपः कार्य्यः।

गौतमः,—

ॐकारपूर्व्वा व्याहृतयः पञ्च सत्यान्ताः। तथा सावित्रीचोदितब्रह्मण आदाने भूर्भुवः स्वः पुरुषः सत्यमिति गौतमनीत्या

(१) मुद्रितमनौ, वेदत्रयान्निरदुहद् भूरित्यादि। मनुः, २याध्यायः, श्लोकः ७६।

व्याहृतिपञ्चकम्। तथा अनुज्ञात उपविशेत् प्राङ्मुखो दक्षिणतः शिष्य उदङ्मुखो वा।

यमः,—

कृताञ्जलिर्गुरुं ब्रूयादध्येष्ये [1]भगवन् ऋचम्।

[2][तथा,—]

ॐकारं प्रथमं कृत्वा ततो ब्रह्म प्रवर्त्तयेत्।
ॐकारञ्च ततः कृत्वा भूमिं स्पृष्ट्वा विरामयेत्॥

पैठीनसिः,—

स्वाध्यायमहरहः प्रयुञ्जीत कर्णाविपिधाय पञ्चाक्षराण्यनुजाप्य मस्तकेन पादावालभ्याभिवादयेत्। अनारभ्य [3]गुरुपत्नीम्। पञ्चाक्षराणि ॐ भूर्भुवः स्वः (पुरुषः सत्यम्)।

आपस्तम्बः,—

ॐकारः स्वर्गद्वारं तस्माद् [4]ब्रह्माध्येष्यमाणस्तदादि प्रतिपद्यते। विकथाञ्चान्यां कृत्वा एवं लौकिक्या वाचा व्यावर्त्तते ब्रह्म॥ वेदव्यतिरिक्तकथा चेन्मध्ये क्रियते पुनः प्रणवमुच्चरेत्। एवं लोकवाचो वेदो विविक्तो भवति।

पारस्करः,—

(१) B. भगवन्नृचम्।

(२) B. Omits the portion bracketed.

(३) B. गुरुपत्नी।

(४) मुद्रितापस्तम्बीयधर्म्मसूत्रे (Bühler's edition, Bombay) ० ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत। १। ४। १३। ६।

*अथातोऽधीत्य निराकरणं जपेत्। प्रतीकमेव विचक्षणमित्यादि।(?)

देवीपुराणे,—

जातिसंस्कारहीनस्य द्रव्यसङ्करकारिणः।
शूद्रान्नभोजिनो राजन् न वेदाद् विद्यते फलम्॥
चक्रवृत्तिचरा विप्रा उञ्छकापोतवृत्तयः।
*कुम्भकौशलिकाहारा वैदिकं प्राप्नुयुः फलम्॥

चक्रवृत्तिः **कुम्भकौशलवृत्तिश्च तृतीयभागे वक्ष्यते। एतच्च प्रयोगकालविषयं न प्रथमग्रहणकाले।

तथा,—

नदीसङ्गमगोष्ठेषु विविक्तेषु तटेषु च।
विविक्तभूमिदेशेषु दर्भदूर्व्वावृतेषु च॥
गृहेषु सूपलिप्तेषु विष्णुसूर्य्यगृहेषु च।
पठितव्यः सदा वेदः स्वरवर्णोपलक्षितः॥
प्लुतधर्म्मक्रमां ह्रस्वां सानुस्वारां सुलक्षिताम्।
ऋचमुच्चारयेत् प्राज्ञो न द्रुतं न विलम्बितम्॥

तथा,—

अपशब्दो महादोषः श्रूयते ऋषिभाषितः।
इन्द्रस्तं हन्ति वज्रेण योऽपशब्दं समुच्चरेत्॥

---

* पारस्करे—(Hathuwa maharaja's edition, Benares) न दृश्यते।

** अर्थः पाठश्चात्र सम्यङ् न स्फुटः। तृतीयभागे स्फुटीभवितुमर्हति। इदन्तु सम्भाव्यते यदत्र "कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा।" इति मनुवचनेन (अ॰ ४। श्लो॰ ७।) सहास्ति कश्चिदर्थगतः पाठगतश्च सम्बन्धः।

विष्णुः,—

*यश्च विद्यां समासाद्य तामाजीवेन्न सा परलोके फलप्रदा भवति।

यश्च विद्यया परेषां यशोहन्ति।

वशिष्ठः,—

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति॥

समुपबृंहयेत् वर्द्धयेत्। शङ्खलिखितौ,—

[1]न प्राधीत्योपरमेत प्रारभ्याध्ययनं तथा।

अथ स्वाध्यायविधिर्ब्राह्मणानाम्।

षण्मासानधीत्योत्सृजेयुः। श्रावण्यां पौर्णमास्यां प्रौष्ठपद्यां वा उपाकृत्य छन्दसामध्ययनम्। उपाकृत्य उपाकर्म्माख्यं कर्म्म कृत्वा। अत्र चोपनयनस्याध्ययनाङ्गत्वादुपनयनदिन एव वेदारम्भः।[2]

तथाच मनुः,—

कृतोपनयनस्यास्य व्रतादेशनमिष्यते।
ब्रह्मणो ग्रहणञ्चैव क्रमेण विधिपूर्व्वकम्॥

---

* मुद्रितविष्णुस्मृतौ (Jolly's edition, A. S. B.) यश्च विद्यामासाद्याखिंल्लोके तया जीवेन्न सा तस्य परलोके फलप्रदा भवेत्। यश्च विद्यया यशः परेषां हन्ति। P. 87.

(१) B. न प्राधीत्योपरमेत्तथा प्रारभ्या॰।

(२) P. Adds एवञ्च सति उपाकर्म्मत्वम्।

इति [1]चाव्ययेनोपनयनाव्यवहितकाले ब्रह्मणो वेदस्य ग्रहणं दर्शयति।

याज्ञवल्क्योऽपि,—

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्व्वकम्।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्॥

इत्युपनयनानन्तरं दर्शयत्यध्ययनं आनन्तर्य्यार्थक्त्वाप्रत्ययात्। एवञ्च सति शङ्खोक्तरीत्या उपनयनदिने वेदमारभ्य षण्मासान्ते उत्सर्गः। मन्वादिस्मृत्यन्तरादापौषे कृत्वा श्रावणी-पर्य्यन्तं शुक्लपक्षे वेदाध्ययनं कृष्णपक्षे [2]चाङ्गाध्ययनं कार्य्यम्। श्रावण्यामुपाकर्म्म तदूर्द्धं शुक्ले कृष्णे च वेदाध्ययनं पौषी यावत्। एवञ्च प्रथमाध्ययन-मुपाकर्म्मविधिनैव। [3]प्रथमाध्ययने च श्रावणीप्राप्तावपि नोपाकर्म्म। उत्सर्गानन्तरं पुनरारम्भ एव उपाकर्म्मविधिः। हारीतोऽप्येवं क्रममाह। [4]अर्द्धपञ्चममासानधीत्योत्सृजति। पञ्चार्द्धषष्ठान् वा। तत्रहमनध्यायः। पञ्चाहमेके। उपाकृत्य प्रतिपदि अधीयीत। प्रतिपदि वेदं प्रारभ्य।

याज्ञवल्क्यः—

अध्यायानामुपाकर्म्म श्रावण्यां श्रवणेन वा।
[5]हस्तेनौषधीभावे वा पञ्चम्यां श्रावणस्य च॥

---

(१) P. चशब्देनो ०
(२) A. पञ्चाध्ययनं
(३) B. प्रथमार्द्धे (?) च श्रावणीं प्राप्तावपि नोपाकर्म्म। उत्सर्गस्याकृतत्वात्। उत्सर्गानन्तरं ०।
(४) B. अर्द्धपञ्चमासान ०।
(५) A. हस्तेनौषधिभावे वा ०।

पौषमासस्य रोहिण्यामष्टकायामथापि वा।
जलान्ते च्छन्दसां कुर्य्यादुत्सर्गं विधिवद्द्विजः॥

अध्यायानां स्वाध्यायशब्दवाच्यानां वेदवाक्यानां उपाकर्म्माख्यं कर्म्मसंस्कारः। विष्णुः,—[1]उत्सर्गोपाकर्म्मणोर्मध्ये वेदाङ्गाध्ययनम्।

मनुः,—

[2]पुष्ये तु च्छन्दसां कुर्य्यादुत्सर्गं विधिवद्द्विजः।
माघशुक्लस्य वा प्राप्ते पूर्व्वाह्ने प्रथमेऽहनि॥
यथाशास्त्रन्तु कृत्वैवमुत्सर्गं विधिवद्द्विजः।
विरमेत् पक्षिणीं रात्रिं यद्वाप्येकमहर्निशम्॥
अत ऊर्द्ध्वन्तु छन्दांसि शुक्लेषु नियतः पठेत्।
वेदाङ्गानि तु सर्व्वाणि कृष्णपक्षे समभ्यसेत्॥

गौतमः—

---

(१) मुद्रितविष्णुस्मृतौ उत्सर्जनोपा ० P. 85.
(२) मुद्रितमनौ,—(Visvanātha's edition, Bombay)

पुष्ये तु च्छन्दसां कुर्य्याद्बहिरुत्सर्जनं द्विजः।
... ...
यथाशास्त्रन्तु कृत्वैवमुत्सर्गं छन्दसां बहिः।
विरमेत् पक्षिणीं रात्रिं तदेवैकमहर्निशम्॥
... ...
वेदाङ्गानि च सर्व्वाणि कृष्णपक्षेषु संपठेत्॥
अ० ४। श्लो० ९६-९८।

[1]श्रवणादि वार्षिकं प्रौष्ठपदीं वोपाकृत्याधीयीत च्छन्दांसि। [2]अर्द्धपञ्चमान्मासान् यावद् दक्षिणायनं वा। ब्रह्मचार्य्युत्सृष्ट-[3]होमान् मांसं भुञ्जीत। द्विमासो वा नियमः। श्रवणानक्षत्रेण संयुक्ता श्रवणा अनित्यत्वात् तद्धिताभावः।

अयमर्थः—

वार्षिकं वर्षाकाले भवमध्ययनं श्रवणादि श्रावणपौर्णमास्यवधिकं तच्चोपाकृत्य श्रावण्यामुपाकर्म्म कृत्वा कर्त्तव्यम्। वार्षिकाध्ययनं प्रति उपाकर्म्माख्यकर्म्मणोऽङ्गत्वात्। कालान्तरमाह प्रौष्ठपद्यां वा वार्षिकाध्ययनं उपाकर्म्मपूर्व्वकं प्रारभ्य कार्य्यम्। एवञ्च वेदस्य प्रथमाध्ययनारम्भे नोपाकर्म्माख्यकर्म्मणोऽङ्गत्वम्।

यत्तु उपाकर्म्माख्यं कर्म्म नाध्ययनाङ्गम्। अध्ययनस्वरूपे तत्फले चानुपयोगात्। फलस्यार्थज्ञानस्य दृष्टरूपस्य उपाकर्म्मादृष्टं विनापि सम्भवात्। तेन धनार्ज्जनाश्रितयाजनादिनियमवत् पुरुषार्थरूपं पापक्षयफलकमिति तन्न तुल्यञ्च साम्प्रदायिकमित्यत्राध्ययनाङ्गानां प्रतिबन्धकपापक्षयद्वारा चाध्ययनस्वरूपोपकारकत्वेन तदङ्गत्वकथनात्। उपाकृत्य वार्षिकमधीयीतेति

(१) मुद्रितगौतमस्मृतौ,—(Bhavanicharana's edition, Calcutta) श्रवणादि वार्षिकं प्रौष्ठपदीं वोपाकृत्याधीयीतच्छन्दांस्यर्द्धं पञ्चममासान् पञ्चदक्षिणायनं वा ब्रह्मचार्य्युत्सृष्टलोमा न मांसं भुञ्जीत द्वैमास्यो वा नियमः। १६ अध्यायः।

(२) B. अर्द्धपञ्चमान् वा मासान् ०।

(३) B. होमा न मांसं भुञ्जीत। द्विमासे वा नियमः।

वाक्येनैव वार्षिकाध्ययनं प्रत्यङ्गत्वेन बोधनात्। प्रथमारम्भानङ्गत्वेऽपि तदुत्तराध्ययनेष्वविघ्नार्थत्वेनाङ्गत्वादिति। न फलकल्पनया पुरुषार्थत्वमिति। दक्षिणायनशब्देनात्र भाद्रपदादिषण्मासाः। ब्रह्मचारीत्यादिक[1]मप्यध्ययननियमः। अयमविघ्नार्थ एव। प्रकरणाच्चाङ्गम्।

अथानध्यायाः।

तत्र मनुः,—

इमान् नित्यमनध्यायानधीयानो विवर्ज्जयेत्।[2]
अध्यापनञ्च कुर्व्वाणः शिष्याणां विधिपूर्व्वकम्॥
कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते॥

वर्षास्वेतावनध्यायौ। रात्रौ कर्णग्रहणयोग्यशब्दकरवायुवहनम्। दिवा च पांसूत्क्षेपणसमर्थवायुवहनमिति।

तथा—

विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥

विद्युदादिषु युगपज्जातेषु। [3]एकवारानेकमहोल्कापाते निमित्तकालादारभ्य पुनः परदिने तत्कालपर्य्यन्तमनध्यायः।

(१) P. मप्युपाध्यायनियमः। B. मुपाध्यायनियमः।

(२) A. B. विसर्जयेत्।

(३) P. एकदानेक ०

तथा—

एतांस्त्वभ्युदितान् विद्याद् यदा प्रादुष्कृताग्निषु।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने॥

प्रादुष्कृताग्निषु होमार्थमग्निप्रकाशकर्म्मकालेषु। अनृतौ वर्षादिभ्योऽन्यत्र अभ्राणां दर्शने। समाचाराद् बहूनामित्यर्थः। सन्ध्यासु विद्युदादिसमस्तान्वये तदा सन्ध्यायामेवानध्याय इत्यर्थः। सन्ध्यासु विद्युदादिप्रत्येकदर्शने तदैवानध्याय इति लक्ष्मीधरः। एवमनृतौ बहुमेघदर्शने तदेव।

तथा,—

निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्जने।
एतानाकालिकान् विद्यादनध्यायान् ऋतावपि॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा॥

ऋतावपि वर्षासु। तथा प्रादुष्कृताग्निषु। विद्युत्स्तनितनिःस्वने वर्षासु सज्योतिरनध्यायः। सज्योतिः पूर्व्वसन्ध्यायां दिनमात्रम्। सायं सन्ध्यायां रात्रिमात्रञ्च। विद्युत्स्तनितादन्यत्र निमित्ते रात्रौ दिवाचेत्यर्थः।

तथा—

नित्यानध्याय एव स्याद् ग्रामेषु नगरेषु च।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वशः॥[1]

(१) मुद्रितमनौ,—सर्व्वदा। अ० ४। श्लो० १०७।

अतिशयधर्म्मकामस्यायमनध्यायः काम्यः। इतरेषां ग्रामनगरदुर्गदेशाध्ययनं न वैगुण्यकरम्।

गौतमः,—

नित्यमेके नगरे। एतच्च गोमयापर्य्युक्षितविषयम्।

वशिष्ठः,—

नगरे तु कामं गोमयेन पर्य्युक्षिते परिलिखिते वा। नगरग्रहणं ग्रामस्याप्युपलक्षणम्।

मनुः,—

अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ।
अनध्यायो रुद्यमाने समवाये जनस्य च॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने।
उच्छिष्टः श्राद्धभुक् चैव मनसाऽपि न चिन्तयेत्॥

वृषलस्याधार्म्मिकस्य। रुद्यमाने रोदनसमये। मध्यरात्रे त्रिचतुर्मुहूर्त्तात्मके। निशायां चतुर्मुहूर्त्तमिति गौतमः।

मनुः,—

प्रतिगृह्य द्विजो [1]नित्यमेकोद्दिष्टस्य केतनम्।
त्र्यहं न कीर्त्तयेद् ब्रह्म राज्ञो राहोश्च सूतके॥

एकोद्दिष्टस्य प्रेतैकोद्दिष्टस्य। राज्ञः सूतके पुत्रजननादौ। राहोः सूतके चन्द्रसूर्य्योपरागे।

(१) मुद्रितमनौ,—विद्वानेकोद्दिष्टस्य ०। अ० ४। श्लो० ११०।

तथा,—

यावदेकानुदिष्टस्य [1]स्नेहगन्धश्च तिष्ठति।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत्॥

एतच्च त्रिरात्रादूर्द्ध्वमपि।

तथा,—

शयानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकाम्।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च॥

प्रौढ़पादः आसनाद्यारोपितपादः। अवसक्थिकां जानौ पर्य्यङ्कबन्धरूपाम्।

नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः।
अमावास्याचतुर्द्दश्योः पौर्णमास्यष्टकासु च॥
अमावस्या गुरुं हन्ति शिष्यं हन्ति चतुर्द्दशी।
ब्रह्माष्टकापौर्णमास्यौ तस्मात् ताः परिवर्ज्जयेत्।

बाणशब्दः शततन्त्रिवीणावाची। अष्टकाग्रहणमितराष्टमीष्वल्पदोषार्थम्। शुक्लचतुर्द्दश्यां सर्व्वाष्टमीषु च अष्टकावर्ज्यं नक्तमनध्याय इति स्मृत्यन्तरम्।

गौतमः,—

अमावास्यायां द्व्यहं वा। कार्त्तिकी फाल्गुन्याषाढ़ी पौर्णमासीति तिस्रोऽष्टका त्रिरात्रमन्त्यमेके। अमावास्यायां द्व्यहं अमावास्यानन्तरं प्रतिपच्च। कार्त्तिक्यादीनां पुनः कीर्त्तनं

(१) मुद्रितमनौ,—गन्धो लेपश्च०। अ० ४। श्लो० १११।

दोषातिशयार्थम्। तिस्रोऽष्टका आग्रहायण्यूर्द्ध्वम्। त्रिरात्रमन्त्यमेके अन्त्यायां त्रिरात्रमनध्याय इत्येके। त्रिरात्रञ्च सप्तमीनवम्यावन्तर्भाव्येति मेधातिथिः। एवञ्चान्त्याष्टकायां त्रिरात्रमेकरात्रं वानध्याय इति विकल्पः। अन्ययोस्त्रिरात्रनियमः।

यत्तु,—

प्रजापतिं हि तिष्ठन्ति सर्व्वा विद्याश्च पर्व्वसु।
तस्माद्धर्म्मार्थिकामार्थी नेताः पर्व्वसु कीर्त्तयेत्॥

इति काम्यं पर्व्ववर्जनं यमस्मृतावुक्तं तद्वेदातिरिक्तधर्म्मशास्त्रादिविषयम्।

मनुः,—

पांसुवर्षे दिशां दाहे [1]गोमायुरुदिते तथा।
श्वखरोष्ट्रे च रुदति पंक्तौ च न पठेद् द्विजः॥

पंक्तौ श्वखरोष्ट्रपंक्तौ स्थितायाम्।

वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च॥
प्राणि वा यदि वाऽप्राणि यत्किञ्चित् श्राद्धिकं भवेत्।
तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः॥
चौरैरुपप्लुते ग्रामे सम्भ्रमे चाग्निकारिते।
आकालिकमनध्यायं विद्यात् सर्व्वाद्भुतेषु च॥
उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु॥

ऋत्वन्तासु वसन्तादि ऋत्वन्तासु।

(१) मुद्रितमनौ,—गोमायुविरुते०-श्वखरोष्ट्रे च रुवति०। अ० ४। श्लो० ११५।

तथा,—

नाधीयीताश्वमारूढ़ो न वृक्षं न च हस्तिनम् ।

ना नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥

यानं शकटादि ।

न विवादे न कलहे न सेनायां न सङ्गरे ।

न भुक्तमात्रे नाजीर्णे न वमित्वा न शुक्तके ॥

भुक्तमात्रे यावदार्द्रपाणिरिति स्मृत्यन्तरम् । शुक्तके अम्लोद्गारे ।

अतिथिञ्चाननुज्ञाप्य [1]मारुते चाभिवाति वै ।

अभिवाति अभिमुखेन वाति ।

रुधिरे च स्रुते गात्रात् शस्त्रेण च परिक्षते ।

रुधिरस्रावः शस्त्रं विनापि ।

सामध्वनावृग्यजुषी नाधीयीत कदाचन ।

वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च ॥

अङ्गिराः,—

सामध्वनौ सत्यपि यज्ञेऽधीयीत अन्तर्भूतत्वात् ।

तथा,—

पशुमण्डूकमार्जारश्वसर्पनकुलादिभिः ।

अन्तरागमने विद्यादनध्यायमहर्निशम् ॥

यमः,—

आर्त्तस्वरे वाद्यमाने गीते वा रुदितेऽध्वनि ।

न धाराशनिसम्पाते नाकालस्तनिते तथा ॥

(१) मुद्रितमनौ,—मारुते वाति वा भृशम् । अ० ४ । श्लो० १२२ ।

न श्वसूकरसङ्घाते न च चण्डालसंप्लवे ।

अशनिर्वज्रः । अकालः वर्षाभ्योऽन्यः कालः ।

यमः,—

श्लेष्मातकस्य च्छायायां शाल्मलेर्मधुकस्य च ।

कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥

तथा,—

न संग्रामे न सेनायां विवाहे कलहे तथा ।

शक्रध्वजनिपाते च उल्कापाते तथैव च ॥

नाधीयीतेत्यर्थः ।

तथा,—

अनध्यायस्त्रिरात्रन्तु भूमिकम्पे तथैव च ।

त्रिरात्रन्तु वाक्यभेदात् भूमिकम्पमात्रविषयम् । याज्ञवल्क्योक्त भूमिकम्पग्रहणं क्षुद्रभूकम्पविषयम् ।

याज्ञवल्क्यः,—

अनध्यायस्त्र्यहं प्रेतैः शिष्यर्त्विग्ज्ञातिबन्धुभिः ।

उपाकर्म्मणि चोत्सर्गे स्वशाखाश्रोत्रिये मृते ॥

तथा,—

अमेध्ये शवशूद्रान्तु श्मशानपतितान्तिके ।

नाध्ययनमित्यर्थः ।

गौतमः,—

वर्षति चैके वल्मीकसन्ताने । आचार्य्यपरिवेशे । ज्योतिषोश्च ।

वल्मीकं गृहच्छदिः प्रान्तः । तत्र सन्ततवर्षधारा यदि [1]पतति । आचार्य्ययोर्गुरुशुक्रयोः परिवेशे मण्डले । ज्योतिषोश्च सूर्य्याचन्द्रमसोः परिधौ नाध्येयमित्येके ।

गौतमः,—

आकालिका भूमिकम्पराहुदर्शनोल्काः । अनृतावित्यर्थः । स्तनयित्नुवर्षविद्युत्सु प्रादुष्कृताग्निषु अहः ऋतौ । विद्युति सायं नक्तं चापररात्रात् । सायंकाले विद्युति सत्यामित्यर्थः । त्रिभागादिषु सर्व्वम् । रात्रेरह्नश्च त्रिभागमारभ्य सायं प्रातः सन्ध्यापर्य्यन्तमनुवर्त्तमानायां विद्युति सर्व्वं नक्तं सर्व्वमहरनध्यायः । उल्का विद्युत्समेत्येके । स्तनयित्नुरपराह्णे । अनध्याये विद्युत्समः । [2]प्रदोषेऽप्येके । तथा,–सर्व्वं नक्तमर्द्धरात्रात् । अहश्चेत् सज्योतिः । अर्द्धरात्रपर्य्यन्तं भवन् मेघः सर्व्वं नक्तमनध्यायं करोति । अहश्चेत् प्रागपराह्णादनुवर्त्तते मेघः तदा सर्व्वं दिनमनध्यायः । हारीतः,— सायं सन्ध्यायां स्तनिते रात्रावनध्यायः । प्रातःसन्ध्यायान्त्वहोरात्रमिति । तथा,—विषयस्थे च राजनि प्रेते । अध्ययनदेशाधिपतौ । तथा,—विप्रोष्य । शिष्योपाध्याययोः प्रवासे आकालिकोऽनध्यायः । तथा,—श्राद्धमनुष्ययज्ञे भोजनेन अहोरात्रम् । मनुष्ययज्ञः अतिथिपूजा । अभितो वार्षिकसर्व्वविद्युत्स्तनयित्नुसन्निपाते । वर्षासु सर्व्वविद्युदादिसन्निपात इत्यर्थः । तथा,— अप्रस्यन्दिनि सन्निपाते त्रिरात्रम् । अप्रस्यन्दिनि वर्षाभ्योऽन्यत्र

(१) B. भवति । (२) B. P. प्रदोषेऽप्येवम् ।

विद्युदादिसन्निपात इत्यर्थः । ऊर्द्धं भोजनादुत्सवे । उत्सवे देवताद्युत्सवे भोजनादूर्द्धमनध्यायः । तथाच,—[1]प्राधीतस्य । प्रथमाध्ययनं प्रवृत्तस्य भोजनादूर्द्धमनध्यायः । प्रतिविद्यञ्च यान् स्मरन्ति । विद्याभेदेन येऽनध्यायाः परम्परया शिष्टैः स्मर्य्यन्ते तत्र नाध्येयम् । निर्घातभूमिचलनोल्कापातदिग्दाहपांसुशोणितमांसास्थिकेशदधिलाजाङ्गारवर्षेषु शान्तिस्वस्त्ययने कृत्वा । एतेषु निमित्तेषु शान्तिस्वस्त्ययनकरणावधिरनध्यायः । [2]अशक्तौ शान्तिकरणाभावनिश्चये तदवधि स्वाध्याय इत्यर्थः । तथा,—अभ्युदिताभिनिर्म्मुक्तवान्तस्कन्नननग्नदुःस्वप्नदर्शनेषु । एकोद्दिष्टसूतकमृतकेष्वाद्य प्रायश्चित्तं कृत्वा । उदये सुप्तः अभ्युदितः । अस्ते सुप्तः अभिनिर्म्मुक्तः । स्कन्नः स्खलितरेताः । आद्य भुक्त्वा । बहुलं संज्ञाच्छन्दसोरिति न जग्धिरादेशः । एतेषु प्रायश्चित्तकरणावधिरनध्यायः । प्रायश्चित्ताभावे पूर्व्वोक्ता व्याख्या । पुनर्हारीतः,— चैत्रश्रावणमार्गशीर्षाणामादिप्रतिपदो नित्याः । आदिप्रतिपदः शुक्लप्रतिपदः । नित्या इत्यनेन अन्यासां प्रतिपदां काम्यतोक्ता ।

पुनर्हारीतः,—

न वृक्षस्थो न तीर्थस्थो [3]नाप्सु कूपसभासु च ।

तीर्थं जलावतरणस्थानम् । पुनर्हारीतः,—बलिश्राद्धमहोत्सवेषु भुक्त्वाऽनध्यायः । श्राद्धमत्र पार्व्वणश्राद्धमपि । एकोद्दिष्टे दोषा-

(१) B. प्राधीतस्य च । (२) B. अशक्त्या । (३) B. वापीकूपसभासु च ।

धिक्यम्। अहःशेषमत्रानध्याय इति जयस्वामी। पैठीनसिः,—नीललोहितप्रादुर्भावे देवेन्द्रायुधदर्शने। अहोरात्रमनध्ययनम्। बौधायनः,—ऋत्विक्देशपतिश्रोत्रिय[1]प्राणेष्वहोरात्रम्। रात्रि याज्ञवल्क्येन त्रिरात्रानध्यायवचनाद् देशपतिरत्र देशाधिकारी। श्रोत्रियश्च भिन्नशाखीयः। स्वशाखिनि त्रिरात्रविधानात्। पुनर्बौधायनः,—शूद्रापपातदर्शनश्रवणयोश्च तावन्तं कालम्। अपपातश्चण्डालादिः। पुनर्बौधायनः,—अन्येषु चाद्भुतोत्पातेषु अन्यत्र मानसात्। मानसोऽपि जननमरणयोरनध्यायः। अद्भुतोत्पाताः प्रतिमाहसनादयः। मानसोऽपीत्यपिशब्दाद् वाचिकोऽपि। गौतमः,—मनसाऽप्यशुचिर्नाधीयीतेति। पैठीनसिः,—रात्राविन्द्रधनुर्दृष्ट्वा वज्रपतनात् आचार्य्यमरणात् इन्द्रपतनात् सूर्य्याचन्द्रमसोरुपप्लवात् हेतुदर्शनान्निर्घातात् भूमिचलनादेकैकस्मिन् त्रिरात्रमनध्यायः। आपस्तम्बः,—निगमेष्वध्ययनं वर्जयेत्। [2]आनडुहेन शकृत्पिण्डेनोपलिप्ते अधीयीत। निगमो हट्टः। तथा,—श्मशाने सर्व्वतः शम्याप्रासात्। प्रादेशमात्रा रथशम्या यावति दूरे प्रक्षिप्ता पतति तावद्दूरं सर्व्वतः श्मशानात् परित्यज्याध्येयमित्यर्थः। तथा,—ग्रामेणाध्यवसिते क्षेत्रेण वा नानध्यायः। ज्ञायमाने तु तस्मिन्नेव देशे नाधीयीत। ग्रामतां क्षेत्रतां वा प्राप्ते श्मशाने नानध्यायः। ज्ञायमाने श्मशानत्वेन तस्मिन्नेवानध्यायः। न शम्याप्रासात्।

(१) B. प्रय(ा)णेष्वहो०।

(२) मुद्रितापस्तम्बीयधर्म्मसूत्रे,—आनडुहेन वा शकृत् ० १। ३। ९। ५।

तथा,—श्मशानवच्छूद्रपतितौ। शूद्रायान्तु प्रेक्षणप्रतिप्रेक्षणयो[1]रनध्यायः। तथान्यस्यां स्त्रियां वर्णव्यतिक्रान्तायां मैथुने। अधमवर्णेन मिथुनगताया अन्योन्यदर्शन इत्यर्थः। पुनरापस्तम्बः,—[2]यावता कृष्णां रोहिणीमिति शम्याप्रासाद् विजानीयादेतस्मिन्नेवकाले विद्योतमानायां विद्युति सप्रदोषमहरनध्यायः। [3]ईषदन्धकारे किञ्चिद्दूरे शुक्लकृष्णविवेकः। तत्काले विद्युति सत्यां रात्रि प्रथमप्रहरं दिनञ्चानध्यायः। पुनरापस्तम्बः,—[4]दह्रे चापररात्रे स्तनयित्नुना। ऊर्द्ध्वमर्द्धरात्रादित्येके। दह्रेऽल्पावशिष्टेऽपररात्रे तृतीयभागे शब्दवता मेघेन निमित्तेन सप्रदोषमुत्तरदिनमनध्यायः। तथा,—[5]गवां घासावरोधेन। वध्यानाञ्च यावता हन्यन्ते। घासावरोधे घासविरोधे। वधायानीतानां हननपर्य्यन्तमनध्यायः।

पुनरापस्तम्बः,—

[6]वैरमणे गुरुष्वष्टाक्ये त्र्यहम्। तथा सम्बन्धेषु ज्ञातिषु। मातरि पितरि आचार्य्ये द्वादशाहाः। वैरमणं अध्ययनसमाप्तिः। गुरुषु

(१) मुद्रितापस्तम्बीयधर्म्मसूत्रे,—० रेवानध्यायः। १। ३। ९। ११।

(२) " उपव्युषं यावता वा ० ......विद्योतमाने सप्रदोषमहरनध्यायः। १। ३। ९। २२।

(३) B. ईषद्दर्शकारो हि कियद्दूरे ०।

(४) " दह्रे परराते ० १। ३। ९। २३।

(५) " गवां चावरोधे। १। ३। ९। २५।

(६) " वैरमणे गुरुष्वष्टाक्य औपाकरण इति त्र्यहाः। १। ३। १०। २।

प्रेतेषु । अष्टाक्ये अष्टकायाम् । मातरि जनन्याम् । पितरि जनके । आचार्य्ये उपनीय साङ्गवेदाध्यापके । आपस्तम्बः,—सर्व्वेषु च शब्दकर्म्मसु यत्र संसृज्येरन् । छर्द्दयित्वा स्वप्नान्तम् । सर्पिर्वा प्राश्य । शब्दकर्म्माणि गीतवाद्यानि तेषु सर्व्वेषु सत्सु । पुनरापस्तम्बः,—प्रोदकयोश्च पाण्योः । प्रचुरोदकयोः । काण्डोपाकरणे चामातृकस्य । काण्डसमापने चापितृकस्य । काण्डोपक्रमे समापने चानध्यायः । यत्काण्डमुपाकुर्व्वीत [1]यदनुवाकमुपाकुर्व्वीत न तदहरधीयीत । तथा,—उपाकरणसमापनयोश्च पारायणस्य तां विद्याम् । पारायणं धर्म्मार्थमादित आरभ्य समाप्तिपर्य्यन्तं पठनम् । तद् यस्या विद्यायास्तामेव तदुपक्रमे समाप्तौ च नाधीयीत । तथा,—[2]मनुष्यप्रकृतियज्ञे भुक्त्वेत्येके । ये मनुष्यदेहेनैव देवत्वं गताः नन्दी(श्वर)प्रभृतयः (।) (यागे) तेषामामद्रव्यस्वीकारे अनध्यायः । पुनरापस्तम्बः,—[3]स्वैरकर्म्मसु । नाधीयीतेत्यर्थः । स्वैरकर्म्माणि पादप्रक्षालनमुत्सादनमनुलेपनमुद्वर्त्तनमभ्यङ्ग इत्यादीनि । पुनरापस्तम्बः,—मुहूर्त्तं विरते वाते । सलावृक्यामेकसृक इति [4]स्वप्नपर्य्यन्तम् । [5]नक्तञ्चारण्ये अनरण्ये वा । सलावृकी

(१) मुद्रितापस्तम्बीयधर्म्मसूत्रे,—यस्य चानुवाक्यं कुर्व्वीत नतत्तदहरधीयीत । १ । ३ । ११ । ६

(२) ,, मनुष्यप्रकृतीनां च देवानां यज्ञे भुक्त्वेत्येके । १ । ३ । ११ । ३

(३) ,, स्वैरिकर्म्मसु च । १ । ३ । ११ । १२

(४) ,, ० स्वप्नपर्य्यान्तम् । १ । ३ । ११ । ३३

(५) ,, नक्तञ्चारण्ये नग्नाद्बहिरण्ये वा । १ । ३ । ११ । ३४

शृगाली । एकसृक एकचरः शृगालः । एतयोः शब्दे शयनपर्य्यन्तमनध्यायः । पुनः स एव,—अननूक्तं चापर्त्तौ छन्दसो नाधीयीत । [1]प्रदोषे सार्व्वकालिकम् । अननूक्तं अयनात् पूर्व्वं उपाकर्म्मणः पूर्व्वं नाधीयीत । एतच्च प्रथमारम्भव्यतिरिक्तविषयम् । यत्नो(तत्रो)पाकर्म्मोत्तरताविषयत्वस्य न्याय्यत्वात् । वशिष्ठः,—[2]प्रसारितपादोपस्थकृतस्य गुरुसमीपे ।

तथा विद्युदर्णव पतननादाङ्गकम्पप्रयातेषु । अर्णं प्रतिमा ।

एते उत्पाताश्च । [3]शङ्खलिखितौ,—नगरचतुष्पथमहापथसंक्रमेषु अनध्यायः । राजामात्यमहापुरुषस्वर्य्याणे । अनुकूले मित्रे अतीते । नावभृथयज्ञवाटे । महापुरुष उत्कृष्टगुणशाली । तथा नान्योन्यहस्तसन्धौ कौमुद्यां सर्व्वां रात्रिम् । दोषातिशयार्थमेतत् । विष्णुः,—न नरेन्द्रप्रयाणे ।

मनुः,—

> नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ ।
> न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत् ॥

(१) ,, प्रदोषे च । सार्व्वकालिकमाम्नातम् । १ । ३ । ११ । ३६-३७ ।

(२) मुद्रितवशिष्ठस्मृतौ—Ānandāçrama series स्मृतीनां समुच्चयः) प्रसारितपादोपस्थकृतस्योपाश्रितस्य च गुरुसमीपे । अ० १३ श्लो० ८ । रेखाङ्कितांशा नेह परिस्फुटार्थाः । मुद्रितवशिष्ठस्मृतौ तु "दिङ्नादपर्व्वतनादकम्पप्रपातेषु" इति पाठो दृश्यते । अ० १३ श्लो० ८ ।

(३) मुद्रितशङ्खलिखितयोर्न दृश्यत एष पाठ ।

देवीपुराणे,—

न सङ्कीर्णे जने कुर्य्यात् न च तस्करसन्निधौ ।
न श्मश्रुकरकाकारिक्तकवाकुसमागमे ॥

श्मश्रुकरो नापितः । काकारिः पेचकः । कृकवाकुः कुक्कुटः ।

तथा,—

इन्द्रोत्सवे च दर्शे च संक्रान्तौ च तथायने ।

नरसिंहपुराणे,—

महानवम्यां द्वादश्यां भरण्यामपि चैव हि ।
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद् बुधः ।
माघमासे च सप्तम्यां रथाख्यायाञ्च वर्जयेत् ।
अध्यापनमथाभ्यक्तः स्नानकाले च वर्जयेत् ॥
नीयमानं शवं दृष्ट्वा महीस्थं वा द्विजोत्तमः ।

द्वादश्यां शयनोत्थानद्वादश्याम् । रथाख्यायां सप्तम्यामेव ।

अनध्यायानुवृत्तौ शङ्खः,—

देवायतनवल्मीकश्मशानशवसन्निधौ ।

अत्र देवायतनपदं विष्णुसूर्य्यगृहव्यतिरिक्तपरम् । देवीपुराणे विष्णुगृहेषु चेतिविधानात् ।

श्लोकभीष्मः—

चातुर्मास्यद्वितीयासु मन्वादिषु युगादिषु ।
विषुवायनयोर्द्दन्द्वे शयने बोधने तथा ॥
पक्षादिके त्रयोदश्यां तस्यामेवोत्तरातिथिः ।
दर्शस्य चेद्दिवैव स्यादनध्यायः श्रुतावपि ॥

वृद्धगार्ग्यः,—

शुचावूर्जे तपस्ये च या द्वितीया विधुक्षये ।
चातुर्मास्यद्वितीयास्ताः प्रवदन्ति महर्षयः ॥

आषाढ़पौर्णम्यनन्तरकृष्णद्वितीयायां कार्त्तिकपौर्णम्यनन्तरकृष्णद्वितीयायां फाल्गुनपौर्णम्यनन्तरकृष्णद्वितीयायामित्यर्थः । तत्र [1]चन्द्रक्षयोपक्रमात् । मन्वादयश्च कार्त्तिकचैत्रज्यैष्टफाल्गुनपौर्णम्यः । फाल्गुनदर्शः । आश्विनशुक्लनवमी । कार्त्तिकशुक्लद्वादशी । चैत्रभाद्रपदशुक्लतृतीया । पुष्यसितैकादशी । आषाढ़सितदशमी-पौर्णमास्यौ । श्रावणकृष्णाष्टमी । माघसप्तमीचेति । युगादयः वैशाखशुक्लतृतीया । कार्त्तिकशुक्लनवमी । माघभाद्रकृष्णत्रयोदशी चेत्येता(चेत्येते)युगादयः । विषुवायनयोर्विशेषमाह [2]यज्ञपार्श्वः,—

दिवायने क्रमेद् भानुर्यदि रात्रौ परापरे ।
नाधीयीताहनि रात्रावेवं विषुवयोरपि ॥

दिवासङ्क्रमे पूर्व्वापरयो रात्र्योरनध्यायः । रात्रिसंक्रमे पूर्व्वोत्तरयोर्दिनयोः । त्रयोदश्या उत्तरतिथौ चतुर्द्दश्यां दर्शस्य दिवसे किञ्चिद्दर्शनेऽपि त्रयोदश्यामनध्यायः । श्रुतावपि श्रावण-द्वादश्यामप्यनध्याय इत्यर्थः ।

आभाकासितपक्षेषु मैत्रश्रवणरेवतीः ।
द्वादश्यां संस्पृशेयुश्चेत् तत्रानध्ययनं विदुः ॥

---

(१) A. B. चन्द्रक्षयोपरमात् ।
(२) B. गार्ग्यः ।

श्लोकगौतमः,—

यायाद् यद्यन्तरे व्याघ्रो नैवाधीयीत ह्यायनम् ।

तथा,—

गुर्व्वन्तेवासिनां वेदमध्येतॄणां च मध्यतः ।
ययुः शशश्वपाकाजा नाधीयीतार्द्धवत्सरम् ॥

विश्वामित्रः,—

विहङ्गविड्वराहैश्च ग्रामान्त्यभववायसैः ।
कृतेऽन्तराये पश्वाद्यैरनध्यायस्त्र्यहं मतः ॥

ग्रामान्त्यभवा मनूक्ता रजकचर्म्मकारनटकैवर्त्तादयः ।

वृद्धगार्ग्यः,—

रात्रौ यामद्वयादर्वाक् सप्तमी च त्रयोदशी ।
प्रदोषः स तु विज्ञेयः सर्व्वविद्याविगर्हितः ॥
रात्रौ नवसु नाड़ीषु चतुर्थी यदि दृश्यते ।
प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हितः ॥

शिष्टाः पठन्ति,—

रात्रौ यामत्रयादर्वाक् यदि पश्येत् त्रयोदशीम् ।
प्रदोषः स तु विज्ञेयः सर्व्वविद्याविगर्हितः ॥

मनुः,—

द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः ।
स्वाध्यायभूमिञ्चाशुद्धामात्मानञ्चाशुचिं [1]नरः ॥

(१) सुद्रितमनौ,—० द्विजः । अ० ४ । श्लो० १२७ ।

अत्र इमान् नित्यमनध्यायानिति सर्व्वानध्यायेषु उपक्रमे नित्यताभिधानात् पुनर्द्वावेव नित्यं प्रयत्नतो वर्जयेदिति वचनं पूर्व्वानध्यायेषु ग्रहणधारणादि[1]समर्थविषयत्वं नित्यता । भूम्यशौचात्म(1)शौचयोस्तु समर्थासमर्थसर्व्वसाधारण्यं नित्यत्वमिति मन्दप्रज्ञोऽप्यशुद्धभूमौ आत्माशुद्धौ च नाधीयीतेति विवेकः ।

अत्राध्ययनाङ्गधर्म्मनियमजातस्य ब्रह्मचारिधर्म्मानध्यायवर्जनादिरूपस्य पुरुषार्थत्वमेव । [2]अध्ययनफलस्यार्थज्ञानदृष्टरूपस्य तेन विनाऽपि सिद्धेः । श्रुत्याद्यभावाच्च क्रत्वर्थत्वं नास्तीति ब्रह्मचारिधर्म्मानध्यायवर्जनादिलोपे न क्रतुवैगुण्यं किन्तु धनार्जनाश्रितयाजनादिनियमत्याग इव पुरुषस्य प्रत्यवाय इति केचित् । तन्न । यद्यपि [3]दृष्टरूपमर्थज्ञानं नियमजातं विना सिध्यति तथापि न तेन क्रत्वधिकारः । विधिसिद्धस्य ज्ञानस्य क्रतुभिः स्वीकरणात् । अध्येतव्य इति कर्म्मव्युत्पन्नतव्यप्रत्ययेन स्वाध्यायस्य यथाशक्तिकृताङ्गसहितेनाध्ययनेन संस्कार्य्यत्वप्रतीत्या यथाशक्तिकृताङ्गसहिताध्ययनसंस्कृतेन स्वाध्यायेनार्थं जानीयादिति विधिप्रवृत्तिः । तेन चाध्ययनाङ्गधर्म्मजातस्याविघ्नार्थत्वेन स्वाध्यायाप्तौ सहकारित्वम् । कस्यचिच्च नियमस्य स्वाध्यायाक्षरगतादृष्टरूपातिशयजनकत्वम् । व्रीहिप्रोक्षणादेरिव व्रीहिगतातिशयजनकत्वम् । तेन साङ्गाध्ययनसंस्कृतस्वाध्यायजन्येनैव ज्ञानेन क्रत्व-

(१) B. समर्थविषयवन्नित्यमयाः ।
(२) B. अध्ययनफलस्यार्थज्ञानस्य दृष्टव्ययस्य तेन विनार्थसिद्धेः ।
(३) B. दृष्टपुरुषमर्थ० ।

धिकारः सिद्ध्यति । अङ्गलोपेऽर्थज्ञानमात्रेण न क्रत्वधिकारः । अन्यथा विधिं विनापि यथाकथञ्चिद् वेदार्थज्ञानेन शूद्राधिकार-प्रसङ्गात् । एवञ्च नाध्ययनाङ्गधर्म्मजातस्य पुरुषार्थत्वम् । तदुक्तं जैमिनिना विद्यायां धर्म्मशास्त्रमिति । विद्यायां वेदाक्षरग्रहणे धर्म्मशास्त्रम् । भूमिभोजनाश्वघासादिधर्म्मशास्त्रमङ्गमित्यर्थः । भाष्यकारोऽप्याह । यो धर्म्म उक्तो विद्याग्रहणार्थः । स न कर्म्मणः श्रुत्याद्यभावात् विद्यासंयोगाच्च । तथा वार्त्तिकेऽपि यदि स्वर्गः कल्प्येत पुरुषार्थता स्यात् । अथ [1]क्रतुसिद्धिर्दूरस्थोप-कारितैव । तस्मात् सम्प्रदायस्याक्षरग्रहणं साधयतो धर्म्मजातमनु-ग्राहकमिति । तथाऽविघ्नसाकाङ्क्षितत्वादर्थद्वारेणाविघ्नार्थत्वेन सम्प्रदायाङ्गत्वमिति । अतएव ब्रह्मयज्ञपारायणक्रत्वर्थमन्त्रपाठादौ नानध्यायादरः । अक्षरग्रहणार्थत्वादध्ययनाङ्गानाम् । कर्म्माङ्गत्वे मानाभावाच्चेत्युक्तम् । तदुक्तं विद्यां प्रतिविधानाद्वा सर्व्वकालं प्रयोगः स्यात् ।

मनुश्च—

नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत् स्मृतम् ।

इति न्यायप्राप्तमनुवदति ।

तथा—

वेदोपकरणेचैव स्वाध्याये चैव नैत्यके ।
नानुरोधोऽस्त्वनध्याये होममन्त्रेषु चैव हि ॥

(१) B. क्रतुसिद्धिर्दूरस्थो ० ।

वेदोपकरणं वेदातिरिक्तविद्यास्थानं तेषु वेदाध्ययनाङ्गस्य कः प्रसङ्ग इति सर्व्वोऽयं न्यायप्राप्तानुवादः । तेन यत्रैव सर्व्वा विद्या न पठेदित्याह तत् वचनं तत्रैव । वेदोपकरणेऽनध्यायो न सर्व्वत्र । ब्रह्मयज्ञे च मनसाऽनध्याय [1]इत्यापस्तम्बीयं वचनम् ।

अथाध्ययनक्रमः ।

प्रथमारम्भे तु मातृपूजापूर्व्वकमाभ्युदयिकम् । अग्निस्थाप-नम् । ब्रह्मचारिणमाहूयाग्नेः पश्चात् स्वस्य उत्तरत उपवेश-नम् । [2]ब्रह्मोपवेशनाद्याज्यभागान्ते । यदि ऋग्वेदारम्भः पृथिव्यै स्वाहाग्नये स्वाहा इति द्वे आहुती । यदि यजुर्वेदारम्भः अन्तरिक्षाय वायवे इति द्वे आहुती । यदि सामवेदारम्भः दिवे सूर्य्याय इति द्वे । यद्यथर्व्ववेदारम्भः दिग्भ्यश्चन्द्रमसे इति द्वे हुत्वा ब्रह्मणे स्वाहा छन्दोभ्यः स्वाहा इति सर्व्वत्र । अन्याश्च सप्ताहुतयः । प्रजापतये । देवेभ्यः । ऋषिभ्यः । श्रद्धायै । मेधायै । सदसस्पतये । अनुमतये इति च । ततो भूरादिप्राजापत्यान्ता नवाहुतयः । स्विष्टिकृत् । प्राशनम् । मार्जनम् । पूर्णपात्रं वरो वा ब्रह्मणे । ततः प्रारम्भः । [3]शिष्यस्य सकृदाचमनम् । कर्णावपिधाय ॐ भूर्भुवः स्वरित्युक्त्वा

(१) B. इत्यापस्तम्बवाचनिकम् ।
(२) B. ग्रहोपवेशना ० ।
(३) B. जप्यस्य सकृदा ० ।

[1]मस्तकेन पादावालभ्य व्यत्यस्तपाणिना गुरोः पादोपसङ्ग्रहं अमुकशर्म्मा अहं भो अभिवादयामीतिकृत्वा अग्रेस्थित्वा अञ्जलिं कृत्वा अध्येष्ये भगवन्नहमितिवचनम्। अधीष्व भो इति गुरोः प्रतिवचनम्। अनुज्ञातस्य दक्षिणतः प्राङ्मुखस्योदङ्-मुखस्य वा प्रागग्रेषु कुशेषूपवेशनम्। कुशत्रयेण घ्राणरसन-चक्षुस्त्वक्श्रोत्रवाक्पाणिपादपायूपस्थानां स्पर्शनम्। कुशत्र-यस्य त्यागः। ह्रस्वाक्षरमात्रया पञ्चदशमात्रया प्राणायाम-त्रयम्। तत्र हस्तद्वयसङ्घातरूपब्रह्माञ्जलिं कृत्वा गुरु-मुखावलोकनम्। प्रणवव्याहृतित्रयगायत्रीजपः। ॐ भूर्भुवः स्वः पुरुषः सत्यमितिव्याहृतिपञ्चकस्य वा। गुरुमुखे मनश्च-क्षुर्दाने। दक्षिणजानूपरि संहतहस्तद्वयदानम्। एवं साव-धानेन गुरुमुखात्[2]श्रु(स्नु)तस्य तस्य तस्य ग्रहणम्। मध्ये लौकिक-[3]वाक्प्रयोगे पुनः प्रणवोच्चारणम्। [4]भूमिस्पर्शनम्। आचमनम-पीति केचित्। ततोऽधीत्यानिराकरणजपः। प्रतीकं मे विचक्षणं जिह्वा मे मधु यद्वचः। कर्णाभ्यां भूरि शुश्रुवे मा त्वं हार्षीः श्रुतं मयि। ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठान-मसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि

(१) B. मण्डलेन ०

(२) B. श्रुतस्य ग्रहणम्।

(३) B. वाक् प्रसारे।

(४) B. एवं यथाशक्त्यध्ययनं समाप्यान्ते प्लुतप्रणवोच्चारणं भूमिस्पर्शनं आचमनमपि केचित्।

ब्रह्मकोशं मे विश। वाचा त्वा पिदधामि वाचा त्वा पिदधामीति तिष्ठ प्रतितिष्ठ। स्वरकरणकण्ठौरसदन्त्यौष्ठ्य-ग्रहणधारणोच्चारणशक्तिर्मयि भवतु आप्यायन्तु मेऽङ्गानि वाक्-प्राणश्चक्षुः श्रोत्रं यशो बलम्। यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठत्विति। एवमध्ययनप्रवृत्ताः पौषमासस्य रोहिण्यां मध्यमायां वा अष्टकायामध्यायानामुत्सर्गं कुर्य्युः। यद्यपि पारस्करे-णार्द्धषष्ठान् मासानधीत्योत्सृजेयुः। अर्द्धसप्तमान् वेतिकाल उक्तः। प्रथमाध्ययनानन्तरं बोध्यः। पञ्चमासपक्षे षण्मासपक्षे वा उत्सर्गमध्ये श्रावणीप्राप्तावपि नोपाकर्म्म। उत्सर्गानन्तरमेव पुनरध्ययनार्थमुपा-कर्म्म। यथोक्तकाले नद्याद्युदकान्तगमनम्। सर्व्वेषां स्नानम्। समाचाराद्। देवागातुविदइति जप्यनिवेदनात् प्राचीनस्य माध्याह्निकस्य तर्पणादेः करणम्। नदीकूले पूर्व्वापरायतन-दीर्घमृन्मयपीठकरणम्। लेपनं तत्र प्रथमं सप्तदर्भपत्रैः। गणा-नान्त्वेतिमन्त्रेण ग्रन्थिबन्धनस्थानस्थापनवस्त्रयज्ञोपवीतगन्धपुष्प-धूपदीपनैवेद्यदानानां गणपतेः करणम्। गौतमभरद्वाजजमदग्नि विश्वामित्रवशिष्ठकश्यपात्रीणां सप्तभिः सप्तभिर्दर्भपत्रैः हिरण्यगर्भ इत्यनेन ग्रन्थिबन्धनपूर्व्वकं करणम्। सप्त ऋषय इति मन्त्रेण सप्तानां [1]युगपदभिमन्त्रणम्। इदं विष्णुरिति स्नानम्। प्राक्-संस्थानां उदङ्मुखानां [2]षड़ङ्गुलानां सप्त ते अग्ने इति मन्त्रेण

(१) B. युगपदभिक्रमणं।

(२) B. षड़ङ्गुलान्तरितानां।

स्थापनम्। घृतेनाञ्जनित्यनेनावाहनम्। युवा सुवासा इति वस्त्रम्। तद्विष्णोरिति यज्ञोपवीतम्। तेनैवोत्तरीयम्। गन्धद्वारेति गन्धम्। सम्राडसीति पुष्पम्। धूरसीति धूपम्। ज्योतिरसीति दीपम्। यज्ञेन यज्ञमिति नैवेद्यम्। अनेनैव फलम्। इमावेव गोतमभरद्वाजावयमेव गोतम इत्यादिबृहदारण्यकप्रसिद्धब्राह्मण-कण्डिकयोपस्थापनम्। इति ऋषिपूजा। तत स्तर्पणम्। तत्रोत्सर्गविधौ तर्पणगृह्योक्तस्य सत्वात् तावन्मात्रकरणेऽपि भवति। तद्यथा। देवांश्छन्दांसि वेदानृषीन् पुराणा-चार्य्यान् [1]गन्धर्व्वाचार्य्यान् इतराचार्य्यान् संवत्सरसावयवं पितृना-चार्य्यान् स्वांस्तर्पयेयुः। स्वपितृपितामहप्रपितामहवर्ग[2]मातृ-वर्गाणां पितृधर्म्मेणेत्यर्थः। एवं कृत्वा देवागातुविद इति जप्यनिवेदनं कृत्वा सर्व्वे गुरुशिष्याः समापयेयुः। तत्र ऋषि-स्थानात् पूर्व्वं तदुत्तरे वा सर्व्वे प्रणवव्याहृतित्रयगायत्री-प्रणवान् त्रिः पठेयुः। अपामार्गवृक्षमादाय [3]तपानव(?)मिति त्यजेयुः। काण्डादिति दूर्व्वामादाय त्यागः। एवं पुनर्वारद्वयं अपामार्गदूर्व्वाग्रहणं त्यागश्च। ततः पुनर्गायत्रीं पठित्वा विरताः स्म इति सर्व्वे युगपत् त्रिर्जपेयुः। तत उपविश्य अथ

(१) गन्धर्व्वानितराचार्य्यान् संवत्सरञ्च सावयवं...स्वांश्च तर्पयेयुः। पारस्कर-गृह्यसूत्रे २य काण्डम्, १२ कण्डिका।

(२) B. मातामहवर्गमातृवर्गाणां।

(३) P. अपाघ्नमिति।

वंशः पौतिमास्य इत्यादिकान् [1]चतुर्थषष्ठाष्टमबृहदारण्याध्याय-गतब्राह्मणान् पठित्वा मन्त्राध्यायादीन् पठित्वा मन्त्रान्ति-माध्यायं पठेयुः। एवं ब्राह्मणाध्यायादीन् पठित्वा ब्राह्मणान्ति-माध्यायं पठेयुरिति। ततस्त्रिरात्रमनध्यायः। त्रिरात्रं नख-लोम्नामनिकृन्तनञ्च। त्रिरात्रानन्तरं शुक्लपक्षेषु छन्दांस्य-धीयीरन्। कृष्णपक्षेष्वङ्गानि। एवमर्द्धषष्ठमासमध्ययनम्। पुन-रेवमेवोत्सर्गं विधाय सर्व्वे मिलित्वा उभा कवी युवा यो नो धर्म्मः परापतत्। परिसख्यस्य धर्म्मिणो विसख्यानि विसृजामह इति। सर्व्वे जपेयुः। त्रिरात्रमेकत्र स्थित्वा यथासुखं यत्र तत्र गच्छेयुः। उपाकर्म्मपर्य्यन्तम्। इत्युत्सर्गविधिः।

अथोपाकर्म्म।

पारस्करः,—

अथातोऽध्यायोपाकर्म्म। ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां श्रावणस्य पञ्चमीं हस्तेन वा। अत्र

श्रावण्यां श्रवणा यत्र तत्रोपाकर्म्म कारयेत्।

योगोनास्ति यदाकाले हस्तेनैवतु पञ्चमी॥

इति राजमार्त्तण्डवचनात् पौर्णमास्यां श्रवणाभावे हस्तपञ्चमी। पञ्चम्यामपि हस्तायोगाभावे केवलपौर्णमास्यां तु केवलपौर्ण-मास्यामसम्भवमालोच्य पञ्चम्यामित्यर्थः।

(१) मन्त्रोऽयं २य—४र्थाध्यायषष्ठब्राह्मणयोर्दृश्यते।

गार्ग्यः,—

सिंहे रवौ पुष्यऋक्षे पूर्व्वाह्णे विधिवद्वहिः।
छन्दोगा मिलिताः कुर्य्युरुत्सर्गं सर्व्वछन्दसाम्॥
[1]शुक्लपक्षे च हस्तेन उपाकर्म्मापराह्णिकम्।

एवञ्च प्रौष्ठपद्यां छन्दोगानां कालः। मलिम्लुचेऽपि सिंहादित्ये कर्त्तव्यम्। तथाचान्यत्र

उपाकर्म्म तथोत्सर्गः [2]प्रसवाहोऽष्टकादयः।
मलिम्लुचेऽपि कर्त्तव्याः शेषमन्यच्च वर्जयेत्॥

अन्येषान्तु,—

दशहरासु छन्दोत्कर्षस्तुर्ष्वपियुगादिषु।
उपाकर्म्मणि चोत्सर्गे माघ्याञ्चैव विशेषतः॥

इति। शुद्धमास एवोपाकर्म्म। अत्र चोपाकर्म्मकालोऽपराह्ण-मिति। तिथिद्वैधेऽपराह्णव्यापिदिनग्रहणम्। दिनद्वये तथात्वे श्रवणायोगादिविशेषः। श्रवणायोगाभावे च क्षये पूर्व्वा वृद्धावुत्तरा। दिनद्वयेऽपराह्णव्याप्त्यभावे [3]पराहकरणम्। किञ्च मासवृद्धौ हरिशयनस्य पञ्चमासपर्य्यन्तं व्यापने दोषात्।

श्रवणादित्रिके मासि अधिमासोभवेद् यदा[4]।
सिंहाऽर्के च हरेः स्वापः श्रावण्यां स्यादुपाकृतिः॥

(१) B. P. शुक्लपक्षेऽथ।
(२) A. समवाहोऽष्टकादयः।
(३) B. परत्वकरणं।
(४) B. यदि।

तथा,—

विष्णोस्तु शयनादूर्द्धं मासेनान्तरितं द्विजैः।
उपाकर्म्मच कर्त्तव्यं शयनानन्तरं न तु॥

इति वचनात् हरिशयनादूर्द्धं मासान्तरकालोऽस्य नियतः।

[1]अत्रोपरोक्तोपाकर्म्मकर्म्मण आवसथ्यसाध्यत्वात् साग्निकगुरुकस्याध्ययने उपाकर्म्माङ्गमिति। निरग्निकश्चेद् गुरुस्तदा तद्विनाऽप्यध्ययनं सगुणमित्याहुः। तत्रैव प्रतिभाति।

यथाधिकारमङ्गानां विनियोगो न कल्प्यते।
योगाङ्गविनियोगस्य नाधिकारस्य कल्पनम्॥

इत्युक्तदिशा। यथाज्याविक्षणादिरहितं कुर्व्वन्नन्धोऽधिकारीति न कल्प्यते। एवमुपाकर्म्मरहितं कुर्व्वन् निरग्निरधिकारीति वक्तुं न शक्यते। तेन निरग्नेरध्यापनानधिकार एव प्राप्तः। सुतरां तदङ्गोपनयनेऽनधिकारः। वेदारम्भाङ्गहोमस्याप्यावसथ्यसाध्यत्वात्। एतदेव व्रतादेशनविसर्गेष्विति व्रतादेशपदोक्ते वेदारम्भे विसर्गपदोक्ते समावर्त्तने उपाकर्म्महोमस्यैवातिदेशात् तस्य लौकिकाग्निसाध्यत्वेनाधिकारसम्पादकत्वेऽस्यापि लौकिकाग्निसाध्यत्वं को वारयेदिति।

तत्र यथोक्तदिने ब्रह्मचारिस्नातकगृहस्थत्रिविधशिष्यसहितो गुरुः स्वस्तिवाच्य सङ्कल्पं कृत्वा आवसथ्यसमीपे ब्राह्मणं कृत्वोपवेश्य तदभावे लौकिकाग्निं स्थापयित्वाज्यभागान्तं कुर्य्यात्।

(१) B. अत्र च पारस्करोक्तं उपाकर्म्म ०।

तत्र यजुर्व्वेदोपाकर्म्मणि अन्तरिक्षाय स्वाहा। वायवे स्वाहा। इत्याहुतिद्वयहोमः। ततो ब्रह्मणे स्वाहा। छन्दोभ्यः स्वाहा इति आहुतिद्वयम्। ततः सप्ताहुतयः। प्रजापतये देवेभ्यः ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये अनुमतये। ततः सदसस्पति-मित्यनया ऋचा आचार्य्य आसादिताक्षतधानाभ्यः एकामाहुतिं जुहोति। मन्त्रञ्च सर्व्वे पठन्ति। ततः सर्व्वे गुरुशिष्याश्च सपक्षा-मौदुम्बरीं समिधं तत्सवितुरित्यनया सावित्र्या अग्नावादध्युः। [1][ब्रह्मचारिणश्च ब्रह्मचारिसमिदाधानमन्त्रेण समिधमादध्युः।] एवं द्विरपरं अक्षतधानाहोमादिसमिदाधानान्तम्। ततः सर्व्वे गुरुशिष्या अक्षतधानाभ्य उपकल्पिताभ्य अखण्डयन्तस्तिस्रो भक्ष-येयुः। शन्नो भवन्तु वाजिन इत्यनयर्चा आचम्य दधिक्राव्णो अकारिषमित्यनयर्चा दधि भक्षयेयुः। हुतशेषधानाभ्यः स्विष्ट-कृत्। भूरादिप्राजापत्यान्ता नवाहुतयः। प्राशनम्। मार्जनम्। ब्रह्मणे दक्षिणादानम्।

अत्र च—

उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने तथैव च।
चन्द्रसूर्य्यग्रहे चैव रजोदोषो न विद्यते॥

इति लिङ्गात् समाचाराच्चोत्सर्गवन्नद्यां तर्पणादिकर्म्म। नदी-कूलगमनम्। सर्व्वेषामुत्सर्गवदृषिपूजा इमामेव गोतमभर-द्वाजावित्यादिमन्त्रप्रार्थनान्ता। ततः स्नात्वा सन्ध्याजपार्कोप-

(१) B. Omits the portion bracketed.

स्थानब्रह्मयज्ञान्ते उपाकर्म्माङ्गतर्पणम्। प्रथमं ब्रह्मा तृप्यता-मित्यादिभूतग्रामचतुर्विधान्तं कृत्वा ध्रुवाद्यष्टवसु (वसवः) [1]अजेकपदादिरुद्रा इन्द्राद्यादित्यादीनां इन्द्रः पद्मजश्च ऋत्वादि-विश्वेदेवाः ॐकार(रो)गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगतीनां ऋगादि--चतुर्वेद(:)सर्व्वविद्या(नां)मरीच्यादि--दशर्षि--गौतमादि-सप्तर्षि-कलाकाष्ठा-निमेष-मुहूर्त्ताहोरात्रपक्षमास-ऋतुसंवत्सराणां प्रत्येकं ध्रुवस्तृप्यतामित्याकारेण तर्पणं [2][दैवविधिना। निवीती सनकादितर्पणं] कृत्वा कव्यवाड़नलसोमयमार्य्यमाग्निष्वात्ता-पितृसोमपपितृवर्हिषत्पितॄन् पैत्रविधिना तर्पयित्वा वसु-रुद्रादित्यांश्चाचार्य्यान् यथोक्तम्।

नारासर्य्यः पारासर्य्यः शुकशाल्यक एव च।
याज्ञवल्क्यो जातुकर्ण्यः कात्यायनस्तथैव च॥
आपस्तम्बो बौधायनो वाचक्नवी तथैव च।
वैजवापि ककुश्चैव लोकाक्षीति तथैव च॥
इन्द्रायणीमैत्रावरुणीदाक्षायणीश्च तर्पयेत्।[3]

यमाय नम इत्येवं यमतर्पणम्। स्वपितृतर्पणञ्च। देवा गातुविद-इति जपनिवेदनान्तं गायत्रीं त्रिः पठित्वा गौतमादीन् सम्पूज्य वंशब्राह्मणपठनम्। एतावद्दूरं समाचारप्राप्तं कृत्वा

(१) B. अत्रैकपादादि ०।

(२) B. Omits the portion bracketed. P. वेदविधिना।

(३) नारासर्य्य इत्यादिश्लोकाः कुत्रत्या इति न विज्ञाता इति मूलानुसारेण यथायथं रचिताः।

गृह्योक्तं प्रणवव्याहृतित्रयगायत्रीणां त्रिवारजपपूर्व्वकं इषे त्वा
कृष्णोऽसीत्यादिरूपेण मन्त्राध्यायादिपाठान्ते समाचारादौशावा-
ध्यायपाठः। एवं ब्राह्मणाध्यायादिपाठान्ते समानमासां जीवो-
पुत्रादित्यादिब्राह्मणान्तिमाध्यायपाठः। ततः सर्व्वे जपन्ति।
सहनोऽस्तु सहनोऽवतु सह न इदं वीर्य्यवदस्तु ब्रह्म। इन्द्रस्तद्वेद
येन यथा न विद्विषामहे।

पर्जन्यो वृष्टिमान् भूयाद् भूयाः शस्यवती मही।
[1]महीपालः पालयतु सप्रजामवनिं तथा॥
इत्याद्याशिष यत्त्वेवं बहूनि द्विजसत्तमाः।
विसर्जनमृषीणान्तु उत्तिष्ठ ब्रह्मणस्पते॥

इति। ततो गृहं गत्वा पवित्रप्रतिपत्तिप्रणीताविमोकब्रह्म-
विसर्जनाच्छिद्रावधारणानि।

इत्युपाकर्म्मानन्तरं त्रिरात्रमनध्यायः नखलोम्ना[2]मकृन्तनञ्च।
ततो यावदुत्सर्गं कृष्णे शुक्ले निरन्तरं वेदाध्ययनम्।

इत्युपाकर्म्मविधिः समाप्तः।

---

(१) B. महीपालाः पालयन्तु।

(२) B. मकर्त्तनञ्च।

अथाध्ययनम्।

अध्ययनकाले च गुरुशुश्रूषा ब्रह्मचारिवदब्रह्मचारिणोऽपि।

यमः,—

अनापृच्छ्य गुरुञ्चैव न गन्तव्यं [1]कथञ्चन।
तत्तु शिष्येण कर्त्तव्यं कार्य्यं दासेन यद्भवेत्॥

आपस्तम्बः,—

[2]आहूताध्यायी। महानिशायां गुरुं संवेशयेत् तस्य पादौ
क्षालयेत्। भाषित उत्थाय प्रतिब्रूयात्। गच्छन्तमनुगच्छेत्।
धावन्तमनुधावेत्।

पैठीनसिः,—दन्तकाष्ठशयनास्तरणसंवाहनप्रियवचनादिभि-
र्गुरुं [3]सन्तोषयेत्।

नारदः,—

आविद्याग्रहणात् शिष्यः शुश्रूषेत् प्रयतो गुरुम्।

मनुः,—

हीनाङ्गवस्त्रवेशः स्यात् सर्वदा गुरुसन्निधौ।

---

(१) B. कदाचन।

(२) मुद्रितापस्तम्बीये,—आहूताध्यायी च स्यात्। सदा निशायां गुरुं
संवेशयेत् तस्य पादौ प्रक्षाल्य संवाह्य॥ ... अभिभाषितस्त्वासीनः प्रतिब्रूयात्॥
१।२।५।२६; १।२।६।१।६।

(३) B. तोषयेत्।

बौधायनः,—[1]पूर्वोत्थाय जघन्यसंवेशात् सर्वत्राप्रतिहतगुरुवाक्योऽन्यत्र गुरुपातकात् । आपस्तम्बः,—उच्चैस्तरां नासीत । [2]शय्यासनेऽध्याचरिते नाविशेत् । यानमुक्तोऽध्वन्यन्वारोहेत् । [3]नाभिभाषितो [गुरुणा[4]] गुरुमभिभाषेत । व्यभिहासोदामन्त्रणनामधेयग्रहणप्रेषणानीति गुरोर्वर्जयेत् । सायं प्रातरनाहूतो गुरुं दर्शनार्थं गच्छेत् । विप्रोष्य च तदहरेव पश्येत् । गौतमः,—गुरुदर्शने न कण्ठप्रावृतावसक्थिकापाश्रयणपादप्रसारणनिष्ठीवनहसितविजृम्भितविस्फोटितानि । विष्णुः,—न च गुरुणा सह विरुद्ध कथाः कुर्य्यात् ।

मनुः,—

गोऽश्वोष्ट्रयानप्रासादप्रस्तरे शकटे तथा ।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥

यमः,—

सम्यक् प्रवृत्तश्च गुरुं शिष्यो यस्त्ववमन्यते ।
हरते दुष्कृतं तस्य तिर्य्यग्योनिञ्च गच्छति ॥

---

(१) B. पूर्वोत्थाय जघन्यसन्निवेशात् ° । मुद्रितबौधायने,—पूर्वोत्थायी जघन्यसंवेशी ॥.........अन्यत्र पातकात् । Ānandāsrama Series, Poona, स्मृतीनां समुच्चयः १म प्रश्नः २याध्यायः २० । २१ श्लो° ।

(२) A. शय्यासने सह्राचरिते° । मुद्रितापस्तम्बीये,—शय्यासने चाचरिते नाविशेत् । १ । २ । ८ । ११ ।

(३) मुद्रितापस्तम्बीये,—नानभिभाषितो गुरुमभिभाषेत प्रियादन्यात् ।१।२।८।१४।

(४) B. Omits the portion bracketed.

गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥
नाध्यापयति नाधीते पतनीयेषु वर्त्तते ।
इत्येतल्लक्षणै र्युक्तस्त्यक्तव्यो व्रतिना गुरुः ॥

विस्तरो [1]ब्रह्मचारिधर्म्मप्रकरणे ।

इत्यध्ययनम् ।

अथ विचारो [2]नाम द्वितीयो वेदाभ्यासोऽभिधीयते ।

तत्र वेदाध्ययनस्यानुष्ठानोपयोगिज्ञानार्थत्वात् निर्विचिकित्सैकरूपज्ञानस्यानुष्ठानक्षमत्वात् स्वाध्यायविधिना साङ्गवेदाध्ययनेऽर्थज्ञानेऽपि विचारं विना नानारूपवाक्यार्थज्ञानप्रसङ्गेऽनुष्ठानमशक्यमित्यध्ययनविधिनैव पुरुषार्थरूपज्ञानफललाभाय विचारो विधीयते ।

तदुक्तम्,—

धर्म्मे प्रमीयमाणे तु वेदेन करणात्मना ।
इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति ॥

तेन वेदविचारो मीमांसाध्ययनम् । तन्मूलकान्येव स्मरणानि ।

---

(१) B. ब्रह्मचारिप्रकरणे ।

(२) B. नामा द्वितोयो वेदात् । सोऽभिधीयते ।

मनुः,—

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्योऽध्यवसायिनः॥

अध्यवसायिनः अनुष्ठातारः। तथा

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥

लघुव्यासः,—

न वेदपाठमात्रेण सन्तोषं कारयेद् गुरुः।
पाठमात्रावमानस्तु पङ्के गौरिव सीदति॥
यथा पशुर्भारवाही न भारफलमश्नुते।
[1][द्विजस्तथा ज्ञानहीनो न वेदफलमश्नुते॥]
वेदस्याध्ययनं [2]नित्यं धर्मशास्त्रस्य चापि यत्।
अजानतोऽर्थं तत्सर्व्वं तुषाणां कण्डनं यथा॥
योऽधीत्य विधिवद् विद्वान् वेदार्थं न विचारयेत्।
स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते॥
अधीत्य यत् किञ्चिदपि वेदार्थाधिगमे रतः।
स्वर्गलोकमवाप्नोति कर्म्मानुष्ठानविद् द्विजः॥
अधीतं विधिवद् यच्च श्रुतं यच्च विशेषतः।
अनुष्ठेयन्तु तत्सर्व्वं मनुः स्वायम्भुवोऽब्रवीत्॥

(१) B. Omits the portion bracketed.

(२) B. सर्व्वं ब्रह्मशास्त्रस्य चापि यत्।

श्रुतहीनमधीतं यन्नेह नामुत्र तद् भवेत्।
श्रुतन्तु केवलमपि समुद्धाराय कल्पते॥
श्रुतं गरीयः सर्व्वेभ्यो वित्तादिभ्यो न संशयः।
श्रुतादि चक्रिरे धर्म्मं योऽनूचानः स नो महान्॥
समुच्चितं श्लोकमपि श्रुताधीतं विशिष्यते।

श्रुतमत्र मीमांसा। अनूचानः साङ्गप्रवचनाध्यायी। अर्थज्ञानवानिति यावत्। इति लक्ष्मीधरः। तथा,—

अधीतं श्रुतसंयुक्तं तथा श्रेष्ठं न केवलम्।
पाठमात्ररतान् नित्यं द्विजातींश्चार्थवर्जितान्।
पशूनिव च तान् प्राज्ञो वाङ्मात्रेणापि नार्च्चयेत्॥

हारीतः,—चक्षुर्दीपसमं ज्ञानं यथाहि चक्षुष्मान् पुरुषः प्रदीपप्रकाशेन विषमदुर्गार्थविद् भवति एवं [1]ज्ञानविलोकनवान् शुभाशुभयोः कर्म्मणोर्युक्तिकर्त्ता भवति। तस्यैव ज्ञानस्यार्थविज्ञानं समासतो विशेषतः कृत्स्नतश्चेति। ज्ञानं ज्ञायतेऽनेनेति साङ्गो वेदः। विज्ञानं मीमांसाव्याकरणादि। युक्तिकर्त्ता अनुष्ठाता। तथा स्थाणुरेष भारहरो यो ज्ञानमधीत्यार्थं न विजानाति। ज्ञानविज्ञानविधूतपाप्मा इह चामुत्र चानन्ततो भद्रमश्नुत इति। त्रिविधः प्रत्ययः। आचार्य्यप्रत्ययः। आत्मप्रत्ययः। ज्ञानप्रत्ययश्च। आचार्य्यप्रत्ययः—आचार्य्याद् वेदाक्षरग्रहणम्। आत्मप्रत्ययः-

(१) B. ज्ञानविज्ञानज्ञानवान्

आत्मज्ञानात् अज्ञास्थायिरूपात्मज्ञानात् परलोकनिश्चय इत्यर्थः। ज्ञानप्रत्ययः—ज्ञानाद् वेदाद् विज्ञानं वेदार्थज्ञानम्।

[1][याज्ञवल्क्यः,—

वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च।

तथा महाभाष्ये,—

यदधीतमविज्ञातं निगमेनैव पठ्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥

न ज्वलति न कार्य्यक्षममित्यर्थः। मनुः,—

बिभर्त्ति सर्व्वभूतानि वेदशास्त्रं सनातनम्।
तस्मादेतत् परं मन्ये यज्जन्तोरस्य साधनम्॥]

साधनं सम्पादकं ज्ञानफलकत्वेन।

सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च।
सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति॥
वेदशास्त्रार्थतत्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥

तथा,—

बुद्धिवृद्धिकराख्याशु धन्यानि च हितानि च।
नित्यशास्त्राण्यवेक्षेत नैगमांश्चैव वैदिकान्॥

बुद्धिवृद्धिकराणि वैशेषिकन्यायादीनि। धन्यानि नाड़ीशास्त्राणि। हितानि वैद्यशास्त्राणि। वैदिका निगमा निघण्टुप्रभृतयः।

(१) B. Omits the portion bracketed.

यथा यथा हि पुरुषः शास्त्रं समधिगच्छति।
तथा तथा विजानाति विज्ञानं चास्य रोचते॥

प्रथमाधिगमे जानाति द्वितीये [1]तद्देवोद्भिन्नम्। तथा—

प्रत्यक्षमनुमानञ्च शब्दञ्च [2]विविधागमम्।
त्रयं [3]सुविदितं कार्य्यं धर्म्मशुद्धिमभीप्सता॥

तथा,—

आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः॥

एवमादिशास्त्राध्ययनमपि वेदार्थज्ञानायाध्ययनविधिनैवापेक्ष्यते। तेन वेदविचारान्तःपातिद्वितीयभागे न्यायादिशास्त्राध्ययनम्। तथा शङ्खलिखितौ,—न वेदमधीत्यान्यं विद्वानधीयात् अन्यत्र वेदाङ्गस्मृतिभ्य इति। शास्त्राणां वेदार्थज्ञानोपयोगित्वेनाध्ययनम्। अयञ्च ब्रह्मविचारः वेदाध्ययनोत्तरं [4]गुरुगृहे स्थित्वा समावर्त्तनात् पूर्व्वं कार्य्यः। तदुक्तं शावरभाष्ये,—अधीत्य स्नायादितीमं समाम्नायं विचारविधिना अतिक्रमिष्यामः। अनतिक्रामन्तो वेदमवमन्तं सन्तमनर्थकं कल्पेम इति।[5] तथा वार्त्तिके—

तस्माद् गुरुगृहे स्थित्वा मधुमांसादि वर्जयन्।

वेदस्वरूपग्रहणात्मकेऽप्यध्ययने मधुमांसवर्जनरूपं ब्रह्मचर्य्यमङ्गम्।

(१) B. तद्देवोज्ज्वलम्। (३) B. संविदितं।
(२) B. द्विविधागमम्। (४) B. गुरुगृह एव स्थित्वा
(५) पाठोऽयं मूलानुगतः शावरभाष्येण सह नालोचितः।

न ज्ञानरूपे तत्फले । येन मीमांसाध्ययने तदादरः । गुरुगृहवासस्तु विचारस्वरूपसिद्ध्यर्थमेवापेक्ष्यत इति समावर्त्तनोत्कर्षेण गुरुगृहवासः । तथा लघुव्यासः,—

सम्यग् वेदमधीत्याथ न्यायतस्तु तदर्थवित् ।
[1]सम्यग् भूतानि संसेव्य समावर्त्तनमर्हति ॥

एवञ्चासमाप्य वेदं व्रतं समाप्य [2]व्रतस्नातकं यावद् ब्रह्मचर्य्येऽधीतं तावद् विचार्य्य समावर्त्तते । यस्तु दैवाद् ब्रह्मचर्य्येण मीमांसामधिगच्छति स गृहस्थोऽपि गुरुमुपेत्य पठेत् । तदुक्तं आपस्तम्बेन,—यया विद्यया न विरोचेत पुनराचार्य्यमुपेत्य नियमेन साधयेत्[3] । न विरोचेत नोज्ज्वलज्ज्ञानी भवति ।

आपस्तम्बः,—

निवेशे संवृत्ते संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्य्यकुले वसेद्भूयः श्रुतिमिच्छन्निति श्वेतकेतुः । एतेन ह्यहं योगेन भूयः पूर्व्वस्मात् कालाच्छ्रुतमकुर्व्वीति । तच्छास्त्रैर्विप्रतिषिद्धम् । निवेशे हि वृत्ते नैय्यमिकानि श्रूयन्ते । अग्निहोत्रमतिथयः । यच्चान्यदेवं युक्तम् । निवेशो विवाहः । विवाहानन्तरं प्रति संवत्सरं द्वौ द्वौ मासौ गुरुगृहे मीमांसाध्ययनार्थं वासः ।

एतेन मासद्वयगुरुगृहवासरूपेण योगेन पूर्व्वस्माद् विवाहप्राग्भाविनः कालादभ्यधिकं मीमांसाभ्यसनं कृतवानस्मि । तच्च यावज्जीवश्रुतिविरुद्धम् । गुरुगृहवासे अग्निहोत्रत्यागप्रसङ्गात् । तेन ब्रह्मचर्य्ये मीमांसाभ्यासप्रतिबन्धे सत्येवं कर्त्तुं युज्यते इति तात्पर्य्यम् ।

(१) B. सम्यक् तत्वानि ० ।
(२) B. तत्र स्नातकं ब्रह्मचर्य्येऽधीतमविचार्य्य समावर्त्तते ।
(३) B. Adds here सम्यक् तत्वानि संसेव्य समावर्त्तनमर्हति ।

इति द्वितीयो वेदाभ्यासः ।

अथाभ्यासे तृतीयो वेदाभ्यास उच्यते ।

स च गुणनात्मकपारायणजपब्रह्मयज्ञादिसिद्धिहेतुवेदधारणफलार्थं क्रियमाण आनुषङ्गिकपापक्षयादिफलश्च ।

याज्ञवल्क्यः,—

वेदाभ्यासरतं शान्तं महायज्ञक्रियारतम् ।
न स्पृशन्तीह पापानि महापातकजान्यपि ॥

मनुः,—

अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥

न च ब्रह्मयज्ञ एवाभ्यासः धारणां विना तदभावात् । धारणाऽस्य चाभ्यासः साधनम् ।

अथ जपरूपस्तुरीयो वेदाभ्यासस्तृतीयभागे कर्त्तव्य उच्यते।

योगियाज्ञवल्क्यः,—मनुर्यमोवशिष्ठो हारीतश्चाद्यश्लोकद्वये।

ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम्॥
जप्येनैव तु संसिद्धेद्ब्राह्मणो नात्र संशयः।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते॥

वशिष्ठः,—

यथाग्निर्वायुना धूतो हविषा चैव दीप्यते।
एवं जपपरो नित्यं मन्त्रयुक्तः सदाद्विजः॥[1]

यमः,—

[2]यः संयम्येन्द्रियग्रामं कामतो धारयेदपि।
ब्रह्मचारी जपाच्चैव ब्रह्मलोकमवाप्नुयात्॥

मनुः,—

वेदमेव जपेन्नित्यं यथाकालमतन्द्रितः।
तं ह्यस्याहुः परं धर्म्ममुपधर्म्मोऽन्य उच्यते॥
वेदाभ्यासेन सततं शौचेन तपसैव च।
अद्रोहेणैव भूतानां जातिं स्मरति पौर्व्विकीम्॥

(१) मुद्रितवशिष्ठस्मृतौ,—एवं जप्यपरो नित्यं ब्राह्मणः संग्रहीष्यते। २६ अध्यायः १४ श्लो०।

(२) B. यमयित्वेन्द्रियग्रामं०।

पौर्व्विकीं संस्मरन् जातिं ब्रह्मैवाभ्यसते पुनः।
ब्रह्माभ्यासेन चाजस्रमनन्तं [1]सुखमेधते॥

अत्र जपस्य माध्याह्निककर्म्मणि वस्त्रनिष्पीड़नानन्तरं विहितस्य

अस्नाताशी मलं भुंक्ते अजपी [2]शुक्रशोणितम्।

इत्यादिदोषबलेन नित्यस्य विहितस्य नायं कालः। नापि ब्रह्मयज्ञरूपस्य। [3]अस्य प्रातर्होमानन्तरं तर्पणात् पूर्व्वं वैश्वदेवावसाने वा तैत्तिरीयश्रुत्या रात्रौ वा विधानात्। किन्तु पापक्षयफलकस्य पुत्रपश्वादिकामफलकस्य वायं कालः। ततः प्रणवस्य ऐकान्तिकसच्चिदानन्दब्रह्मपरस्य जपः। सर्व्वपापक्षयद्वारा अन्तःकरणशुद्ध्यापादनेन मोक्षफलः। यजुर्विधाने याज्ञवल्क्यः,—अतः परमोङ्कारकालं व्याख्यास्यामः। यत्र ग्राम्याणां पशूनां शब्दं नोपशृणुयात्। तत्र गत्वा अपां समीपे [4]ब्रह्मवृक्षेणैकस्थूणं प्राङ्मुखं मठं कारयित्वा कुशाच्छन्नं कुशपरिवेष्टितं कुशध्वजं [5]कुशचीरः कुशवासाः [6]कुशयज्ञोपवीती कुशहस्तः शाकयावकपयोभैक्षभक्षो वा अग्निमभिमुख्य ओँकारं पञ्चसहस्राणि जपेत्। ततोऽस्य सर्व्वे वेदा

(१) B. सुखमश्नुते।
(२) B. पूयशोणितम्।
(३) B. तस्य।
(४) A. ब्रह्मवृक्षेणैककुम्भनं एकस्तम्भनं प्राङ्मुखं०।
(५) B. कुशचीरम्।
(६) B. कुशयज्ञोपवीतः।

अधीता भवन्ति। सर्वे देवाः शुभा भवन्ति। सर्वे वर्णा वश्या भवन्ति। सर्वैः क्रतुभिरिष्टैर्यथोक्तं फलमाप्नोति। मातृदोषपितृदोषगाभीदोषै र्न लिप्यते। कपिलाया गोः पयसि स्थालीपाकं श्रपयित्वा [1]अधमसंख्यायामग्निर्हुतं हुत्वा अष्टसहस्रेणाभिमन्त्र्य स्वयमेव प्राश्नीयात्। सप्तानां पुरुषयुगानामलक्ष्मीं निरोधयेत्। ब्रह्मचर्य्यमविच्छिन्नं भवति न पुनर्जायत इति।

तत्र यमः,—

ॐकारः परमं ब्रह्म प्राणायामः परन्तपः।

क्षरन्ति हि क्रियाः सर्व्वाः प्रयुक्ता वैदिकाद् भुवि॥

अक्षरं त्वक्षरं विद्धि ब्रह्म चैव प्रजापतिः।

अक्षरं प्रणवः[2]।

योगियाज्ञवल्क्यः,—

आद्यं यत्राक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता।

सगुह्योऽन्यस्त्रिवृद् वेदो यो वेदैनं स वेदवित्॥

इति। यथा गौर्वत्सरुतं निशम्य हुङ्कृत्य वत्साभिमुखं प्रयाति ब्रह्मापि तत्प्रणवोपहूतं प्रवक्तारमागच्छति। पशुवक्त्रे,—

प्रणवो हि परं ब्रह्म तज्जपः सर्व्वपापहा।

ॐकारायतमभ्यस्य तदक्षैव विशुद्धति॥

(१) A. अष्टशतं समास्ताभिर्हुतं हुत्वा ०।

(२) B. Reads मनुः,—अक्षरं त्वक्षरद्वयं ब्रह्मचैव प्रजापतिः। विद्याकरपद्धतौ आद्यं यत्त्वक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता ०।

यस्तु द्वादशसाहस्रं जपमन्वहमाचरेत्।

तस्य द्वादशभिर्मासैः परं ब्रह्म प्रजायते[1]॥

शुचिर्वाप्यशुचिर्वापि प्रणवं यो जपेत् सदा।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥

अङ्गिराः,—

प्रणवाद्यास्तथा वेदाः प्रणवे पर्य्युपस्थिताः।

वाङ्मयं प्रणवे सर्व्वमभ्यसेत्प्रणवन्ततः॥

प्रणवे नित्ययुक्तस्य व्याहृतिषु च सप्तसु।

त्रिपदायाश्च गायत्र्यां न भयं विद्यते क्वचित्॥

योगियाज्ञवल्क्यः,—

अदृष्टविग्रहो वेदो भावग्राह्यो मनोमयः।

तस्योङ्कारः स्मृतं नाम तेनाहूतः प्रसीदति॥

अथ गायत्रीजपः।

स च द्वेधा। सप्तव्याहृतिदशप्रणवशिरःसाहित्येनैकः। प्रणवव्याहृतित्रयसहितो[2] द्वितीयः। तत्र शङ्खः,—

इति वेदपवित्राण्यभिहितान्येतेभ्यः सावित्री विशिष्यते। नाघमर्षणात्परमन्तर्जलजपे न व्याहृतिभ्यः परं होमे न गायत्र्याः परं जाप्ये। तथा ॐकारस्य प्रणवाख्या। ॐ भूः। ॐ भुवः।

(१) B. प्रकाशते।

(२) B. साहित्येन द्वितीयः।

ॐ स्वः । ॐ महः । ॐ जनः । ॐतपः । ॐ सत्यम् ।
इति महाव्याहृतयः । आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्
इति शिरः । [1]अत्र च वदति श्लोकः,—

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
ये जपन्ति सदा तेषां न भयं विद्यते क्वचित् ॥
शतजप्ता तु [2]सावित्री पातकेभ्यः प्रमोचनी ।
दशसाहस्रजाप्येन [3]सर्वपापप्रणाशिनी ॥
सुवर्णस्तेयकृद् विप्रो ब्रह्महा गुरुतल्पगः ।
सुरापश्च विशुद्ध्यन्ति लक्षजापान्न संशयः ॥
प्राणायामत्रयं कृत्वा कल्यं कल्यं समाहितः ।
अहोरात्रकृतात्पापात् [4]तत्क्षणादेव मुच्यते ॥
सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश ।
अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः ॥

अथ गायत्र्यधिकारात् सप्तव्याहृतिशिरःसहितदशप्रणवयुक्तगायत्र्या प्राणायामः प्रतीयते । तथा,—

हस्तत्राणप्रदा देवी पततां नरकार्णवे ।
तस्मात् तामभ्यसेन्नित्यं ब्राह्मणो हृदये शुचिः ॥

---

(१) B. अत्र च भवति श्लोकः ।
(२) B. सा देवी ।
(३) B. सर्व्वपातकनाशिनी and adds लक्षजप्ता तु सा देवी महापातकनाशिनी ।
(४) B. मुच्यते नात्र संशयः ।

गायत्रीजप्यनिरतं हव्यकव्येषु भोजयेत् ।
तस्मिन् न तिष्ठते पापमब्बिन्दुरिव पुष्करे ॥
सावित्रीजप्यनिरतः स्वर्गमाप्नोत्यनुत्तमम् ।
सावित्रीजप्यनिरतो मोक्षोपायञ्च विन्दति ॥

तेन न भयं विद्यत इत्यत्र नरकभयं संसारभयं नास्तीत्यर्थः ।

इत्येकः प्रकारः ।

मनुर्यमश्च प्रथमे ।

ॐकारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो मुखम् ॥
योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः ।
स ब्रह्म परमभ्येति वायुभूतः खमूर्त्तिमान् ॥

वायुभूतः लिङ्गशरीरनिष्ठः खमूर्त्तिमान् आकाशव्यापी ।

पुनर्यमः,—

गायत्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीं तु जपेन्नित्यं सर्व्वपापप्रणाशिनीम् ॥
गायत्रीञ्चैव वेदांश्च तुलयातोलयत् प्रभुः ।
एकतश्चतुरो वेदाः साङ्गाश्च सपदक्रमाः ।
एकतश्चैव गायत्री तुल्यरूपा तु सा स्मृता ॥

सपदक्रमाः पादक्रमसहिता । अत्र च प्रणवव्याहृतित्रयसहितगायत्रीजपस्य कथनात्

प्रणवाद्यन्तसंरुद्धां जपेत् व्याहृतिभिः सह ।

इति। गायत्रीं प्रणवं चान्त इति च विकल्पपरमेव अन्ते प्रणवोऽस्मिन् पक्षे वैकल्पिकः। मनुः,—

सहस्रकृत्वस्त्वभ्यस्य बहिरेतत् त्रिकं द्विजः।
महतोऽप्येनसो मासात् त्वचेवाहिर्विमुच्यते॥

अत्र बहिर्देशविशिष्टजपविधानात् गृहप्रासादादीनां सामान्यदेशानामिहाप्रसङ्गः। योगियाज्ञवल्क्यः,—

ओँकाराद्यास्त्रिरावृत्ता वेदस्यारम्भणे सदा।
सप्तावृत्ता पुनर्देहं दशभिः प्रापयेद् दिवम्॥
विंशावर्त्तेन सा देवी नयते हीश्वरालयम्।
अष्टोत्तरशतं जप्ता तरते भवसागरात्॥
सर्व्वेषामेव पापानां सङ्करे समुपस्थिते।
दशसाहस्रिकोऽभ्यासो गायत्र्याः शोधनं परम्॥[1]
यत्र यत्र च सङ्कीर्णमात्मानं मन्यते द्विजः।
तत्र तत्र तिलैर्होमो गायत्र्या जप एव च॥
वायुभक्षो दिवा तिष्ठेत् रात्रिं नीत्वाप्सु सूर्य्यदृक्।
जप्ता सहस्रं गायत्र्याः शुद्धि ब्रह्मवधादृते॥
शतेन गायत्र्याः स्नायात् शतमन्तर्जले जपेत्।
अपः शतेन पीत्वा तु सर्व्वपापैः प्रमुच्यते॥

तथा,—

गोघ्नः पितृघ्नो मातृघ्नो ब्रह्महा गुरुतल्पगः।
भ्रूणहा स्वर्णहारी च यश्च विप्रः सुरां पिवेत्॥

(१) B. Adds. इति।

गायत्र्याः शतसहस्रेण जप्येन तु भवेच्छुचिः।

एवं याज्ञवल्कीयजपप्रयोगाणां व्याहृतित्रयविशिष्टगायत्रीविषयत्वम्[1]। [2]ये तु प्रयोगा एतदन्यतरलिङ्गशून्यास्तत्र द्वयोर्विकल्पः। यथा,—

सर्व्वेषामेव पापानां सङ्करे समुपस्थिते।
दशसाहस्रिकोऽभ्यासो गायत्र्याः शोधनं महत्॥
गायत्र्याः शतसाहस्रो जपो [3]नक्ताशिनो भवेत्।
वहिः स्नातस्य तत्रैव सर्व्वकिल्बिषनाशनः॥
दशायुतानि जप्ता च हविष्याशी स मुक्तिभाक्।
गायत्र्यास्तु जपन् कोटिं ब्रह्महत्यां व्यपोहति॥
लक्षाशीतिं जपित्वा तु सुरापानात् प्रमुच्यते।
पुनाति हेमहर्त्तारं गायत्र्या लक्षसप्ततिः।
गायत्र्या लक्षषष्ठ्या तु मुच्यते गुरुतल्पगः॥

अत्र च गुणविशेषात् फलविशेषः। पापक्षयेष्वनुबन्धभेदात् विशेषः।

अथ यजुर्विधाने,—अथातो गायत्रीकल्पं व्याख्यास्यामः। उपोष्य पुष्येण स्थण्डिलमुपलिप्य कुशेषूपविष्टो द्यावापृथिव्योः सन्धिमीक्षमाणो जपेत्। ओँकारपूर्व्वां गायत्रीं जपेत्। यावत्-

(१) B. Adds. शङ्खोक्तानां दशप्रणवयुक्तगायत्रीविषयत्वम्।
(२) B. यत्तु।
(३) A. नक्ताशनो द्विजः।

कालं यथाविद्याज्ञानम्। अग्निमुपसमाधाय चतुर्विंशत्याज्या-हुतिसहस्राणि जुहुयात्। तत्सवितुरिति। समाप्ते होमे दशा-युतानि जप्त्वा सर्व्वपापैः प्रमुच्यते। अत्रोङ्कारपूर्व्वं गायत्री-मात्रस्य जपः। न व्याहृतिप्रवेशेन। यावत्कालं यथाविद्याज्ञान-मिति सिद्ध्यर्थपुरश्चरणजप एषः। अहोरात्रोपोषितः साहस्रिकं होममाचरेत्। त्रिरात्रोपोषितो दशसाहस्रिकमित्यादिवक्ष्यमाण-कालावच्छिन्नजपकल्पनम्। सर्व्वमन्त्राणां पूर्व्वसेवार्थं लक्षमयुतं सहस्रं शतमिति सिद्ध्यपेक्षया कार्य्यमित्युपक्रमे विधानाद् ग्राह्यम्। तथा स्त्रीशूद्रसम्भाषणवर्जी त्रिरात्रमयुतं जप्त्वा विपापो भवति। द्वितीयं विद्यार्थी। तृतीयमारोग्यकामः। चतुर्थं पुत्रकामः। पञ्चमं धनकामः। षष्ठं ग्रामकामः। सप्तमं सौभाग्यकामः। अष्टमे ब्राह्मणवर्जं सर्व्वे वर्णा वश्या भवन्ति। नवमेन गायत्रीं सुरूपां पश्यति। दशमेन ब्रह्मलोकमवाप्नोति।

अथातः काम्यहोमाः।

दूर्व्वामायुःकामः। पशूनामुपघाते कुशान् जुहुयात्। ज्वरा-पनये तु आम्रसमिधो जुहुयात्। खादिरमन्नादिकामस्य। अपामार्गमर्थकामस्य। पद्मानि श्रीकामस्य। वासकपुष्पं कन्यार्थी। अकामोत्वाज्यहोमात् परं ब्रह्माधिगच्छति।

प्राप्य देशञ्च कालञ्च द्विजः सामर्थ्यमेव च।
एकाहं ब्रह्मकूर्च्चाशी एकाहमेकभैक्षभुक्॥

एकाहं ब्राह्मणान्नाशी गायत्रीजपमाचरेत्।
शतं स्नात्वा तु गायत्र्याः शतमन्तर्जले जपेत्॥
अपः शतेन पीत्वा तु सर्व्वपापैः प्रमुच्यते।
गोघ्नश्चैव कृतघ्नश्च ब्रह्महा गुरुतल्पगः॥
भ्रूणहा रत्नहारी च यश्च विप्रः सुरां पिबेत्।
अयाज्यं याजयित्वा तु कृत्वान्यदपि पातकम्॥
न सीदेत् प्रतिगृह्णानः पृथ्वीमपिससागराम्।
ये च केचिद् ग्रहा दुःस्थाः सौम्यास्ते स्युर्न संशयः॥

द्वितीयं विद्यार्थीत्यादिषु समुच्चयः। अयुतद्वयमित्यर्थः। एवं तृतीयादिषु। शतं स्नात्वा तु गायत्र्या इत्यत्र गायत्रीकरणक-स्नानशतं वाक्यार्थः।

[1]योगियाज्ञवल्क्ये ऋग्विधाने च,—शतेन गायत्र्याः स्नायात् इति शतसंख्यकगायत्रीजपकरणकमेव स्नानमिति कर्म्मभेदः। तेन द्वयोर्यावच्छ्रुतेतिकर्त्तव्यतायोगेनानुष्ठानम्।

अथ गायत्रीन्यासः।

योगियाज्ञवल्क्यः,—प्रथमं प्रणवन्यासः। अकारं नाभौ। उकारं हृदि। मकारं मूर्ध्नि। विन्यस्य ब्रह्मरूपतयात्मध्यानम्।

(१) B. योगियाज्ञवल्क्यः ऋग्विधाने।

व्याहृतिन्यासः।

भूः पादयोः। भुवः जानुनो। स्वः कट्याम्। नाभिदेशे महः। जनलोकं हृदये। तपः कण्ठदेशे। भ्रूललाटमध्ये सत्यम्।

गायत्र्यक्षरन्यासः।

पादाङ्गुष्ठे तथा गुल्फे जानुनोर्जङ्घयोस्तथा।
[1]उर्व्वोर्गुह्ये तु वृषणे पायौ नाभ्यां तथैव च॥
जठरे स्तने च हृदये कण्ठे वक्त्रे च तालुनि।
श्रोत्रे चाक्षिणि भ्रुवोर्मध्ये ललाटे पूर्व्वके मुखे॥
याम्ये पश्चिमके चैव उत्तरे च यथाक्रमम्।
अन्तिमं मूर्द्ध्नि विन्यस्य परं ब्रह्म स उच्यते॥

पूर्व्वकं मुखं शिरसः पूर्व्वभागः। एवमन्यत्।

अथ शिरोमन्त्रन्यासः।

गुह्ये वक्षसि वक्त्रे च समीके हृदये तथा।
पायौ नाभ्यां ललाटे च नवमं मूर्द्ध्नि विन्यसेत्॥

समीकं कण्ठदेश इति केचित्। गलपृष्ठं समीकं वा।

---

(१) B. उर्व्वोर्गुह्येऽथ ०।

इदं न्यासचतुष्कञ्च सकृन्न्यस्यति यो द्विजः।
सर्व्वपापविनिर्मुक्तो ब्रह्मसायुज्यमृच्छति॥

अथाक्षरदेवताः[1]।

अग्निर्वायुस्तथा सूर्य्यो विष्णुर्यमो वरुणश्च।
बृहस्पतिश्च पर्जन्य इन्द्रो गन्धर्व्व एव च॥
पूषा मित्रावरुणौ च त्वष्टा च वसवस्तथा।
मरुतः सोमोऽङ्गिराश्च विश्वेदेवास्तथाश्विनौ॥
प्रजापतिश्च वेदाश्च सरुद्रब्रह्मविष्णवः।
जपकाले तु सञ्चिन्त्य तेषां सायुज्यतां व्रजेत्॥

न्यासचतुष्कमक्षरदेवताचिन्तनञ्च [2]काम्यमपि वदति यजुर्विधाने।

अथ रक्षार्थं विद्याङ्गान्युच्यन्ते।

मन्त्राणा[3]मिषेत्वेत्यादीनां खं ब्रह्मान्तानां शिवसङ्कल्पो हृदयम्। पुरुषसूक्तं शिरः। उत्तरनारायणं शिखा। अप्रतिरथं कवचम्। शतरुद्रियमस्त्रम्। [4][शतरुद्रियं] रुद्राध्याय एव

---

(१) B. प्रत्यक्षरदेवता।
(२) B. काम्यमिति वदन्ति।
(३) ० मिषेत्वोर्जेत्यादीनां ०
(४) B. Omits the portion bracketed.

काण्वानाम्। [१]वयं सोमेत्यनुवाकस्यान्तेति(?) रुद्राङ्गेऽधिकसंविधानात्। तथा प्रकारान्तरम्। मनोज्योतिर्हृदयम्। अबोध्यग्निः शिरः। मूर्द्धानं दिवः शिखा। मर्म्माणि ते कवचम्। मानस्तोकेऽस्त्रम्। तथा प्रणवो भूर्भुवः स्वरिति [२]गुह्यहृदयादीनि। ॐ हृदयाय नमः। ॐ भूः शिरसे स्वाहा। ॐ भुवः शिखायै वषट्। ॐ स्वः कवचाय हुम्। ॐ भूर्भुवः स्वः अस्त्राय फट्। एतच्च यजुर्विधानोक्तप्रयोगेषु नित्यमन्यत्र वैकल्पिकम्।

गायत्रीमधिकृत्य योगियाज्ञवल्क्यः,—

प्रणवो भूर्भुवः स्वरित्यङ्गानि हृदयादयः।
द्विधावर्त्त्य ततः पश्चादार्षं छन्दश्च दैवतम्॥

इति। द्विधावृत्तिस्तु व्यस्तसमस्तरूपेण। समस्तेनास्त्रमित्यर्थः। तथा त्रातारमिन्द्र। त्वं नो अग्ने। स्तुचानुपन्याम्।(?) असुन्वन्तम्। तत्त्वायामि। आ नोनियुद्भिः। वयं सोम। तमीशानम्। अग्ने रुद्रा। (?) स्योनापृथिवी। इत्येतत् सम्पुटजपकाले होमकाले रक्षां प्राच्यादिषु कुर्य्यात्।

योगियाज्ञवल्क्यः—

प्रणवाद्यन्तसंरुद्धां जपेद् व्याहृतिभिः सह।
साद्धं प्रणवव्याहृतिभिः स्वाहान्तं होमकर्म्मणि।
प्रतिलोम प्रयोक्तव्या फट्कारान्ताभिचारिके॥

(१) B. Reads. चतुःषष्टिः पुनः षोड़शमेवच। एत चेतनमस्त्रे देवतं विद्वयमेव च। वयं सोमेति दशभिर्माङ्गुष्टमचतुष्टयम्। एतेभ्यः शतरुद्रियम्।

(२) B. गुह्यहृदयादीनि।

तेन सन्ध्याव्यतिरिक्तजपं प्रणवाद्यन्तत्वम्। अत्र—

[१]चावादि (?) यजुषाचैव तेजोसीतिविधानतः।

इति याज्ञवल्क्यपाठेऽपि तेजोसीत्यादिमन्त्र एव तैत्तिरीयसिद्धो ग्राह्यः। विसर्जनमन्त्रोऽपि तत्रैवोक्तः। सन्ध्यास्थले दर्शितौ। नमस्कृत्य विसर्जयेदिति वचनादत्र नमस्कारपूर्व्वता विहिता।

श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा!
श्वेतैर्विलेपनैः पुष्पैरलङ्कारैश्च भूषिता॥
आदित्यमण्डलान्तस्था ब्रह्मलोकस्थिताऽथवा।
अक्षसूत्रधरा देवी पद्मासनगता शुभा॥

इति ध्यानमावश्यकम्।

अथ जपधर्म्माः।

योगियाज्ञवल्क्यः,—

गृहेष्वेकगुणं जप्यं नद्यान्तु त्रिगुणं स्मृतम्।
गवां गोष्ठे [२]शतगुणमग्न्यागारे दशाधिकम्॥
सिद्धक्षेत्रे पुण्यतीर्थे देवतायाश्च सन्निधौ।
सहस्रशतकोटीनामनन्तं विष्णुसन्निधौ॥

(१) B. अप्रवाह(?)यजुषानेन०।

(२) B. दशगुण०।

तथा,—

तिष्ठंश्चेद्वीक्षमाणोऽर्कं जपं कुर्य्यात् समाहितः।

अन्यथा प्राङ्मुखः कुर्य्याद् वक्ष्यमाणक्रमेण तु॥

प्रागग्रेषु कुशेष्वेवमासीनः स्वासने शुभे।

नात्युच्छ्रिते नातिनीचे दर्भपाणिः सुसंयतः॥

अत्रासनस्य वस्त्राजिनचर्म्मादेरनुक्तत्वेऽपि चेलाजिनकुशोत्तरमिति सामान्यतः

सर्व्वसिद्धैर [१][व्याघ्रचर्म्म मोक्षसिद्धौ] मृगाजिनम्।

इत्यादिकमेव ग्राह्यम्। तिष्ठंश्चेद्वीक्षमाणोऽर्कमिति नायं जपमात्रस्य विकल्पेन तिष्ठद्विधिः। किन्तु यत्र तिष्ठत एव जपविधिस्तत्रार्काभिमुखविधिरिति मन्तव्यम्।

तथा,—

उपांशुजपयुक्तस्य शंस्याच्छतगुणो भवेत्।

साहस्रो मानसः प्रोक्तो यस्माद् ध्यानसमो हि सः॥

ध्यानसमत्वेन शब्दार्थचिन्तनाभ्यासरूपत्वमुक्तम्। शंस्यादुच्चैर्जपात्। तथा,—

स्फटिकेन्द्राक्षरुद्राक्षैः पूतञ्जीवसमुद्भवैः।

अक्षमाला प्रकर्त्तव्या प्रशस्ताद्युत्तरोत्तरा॥

कोट्यधिका भवेद् वृद्धिरक्षमाला विशेषतः।

जपस्य क्रियमाणस्य तस्माच्छ्रेष्ठः परः परः॥

(१) B. Omits the portion bracketed.

अभावेत्वक्षमालायाः कुशग्रन्थ्याथ पाणिना।

न चङ्क्रमन् न विहसन् न पार्श्वमवलोकयन्॥

नापि श्रितो न जल्पंश्च न प्रावृतशिरास्तथा।

न पदा पदमाक्रामिन्नचैव हि तथा करौ॥

न चासमाहितमना न तु संश्रावयन् जपेत्।

मानवे च,—

ध्यायेत्तु मनसा मन्त्रं जिह्वोष्ठौ [१]नैव चालयेत्।

न कम्पयेच्छिरोग्रीवं दन्तान्नैव प्रकाशयेत्॥

स्त्रीशूद्रपतितांश्चैव रासभञ्च रजस्वलाम्।

जपकाले न भाषेत व्रतहोमादिकेषु च॥

तुष्णीमासीत च जपंश्चण्डालपतितादिकान्।

दृष्ट्वा तान् पर्य्युपस्पृश्य स्नात्वाभाष्य पुनर्जपेत्॥

आचम्य प्रयतो नित्यं जपेदशुचिदर्शने।

सौरान् मन्त्रान् यथोत्साहं पावमानींश्च शक्तितः॥

रौद्रपैत्रासुरान् मन्त्रान् राक्षसानाभिचारिकान्।

व्याहृत्यालभ्य चात्मानमपःस्पृष्ट्वान्यदाचरेत्॥

यदि वाग्यमलोपः स्याज्जपादिषु कथञ्चन।

व्याहरेद् वैष्णवं मन्त्रं स्मरेद् वा विष्णुमव्ययम्॥

(१) B. नापि ०।

अत्रानेकदिवससाध्ये जपे आहारनियमः ।

योगियाज्ञवल्क्यः,—

शाकयावकभैक्षाणि पयोमूलं फलानि च ।
दधिसर्पिस्तथाद्यापः प्रशस्ताह्युत्तरोत्तराः ॥
चरवोह्युपवासश्च भैक्षं नक्तमयाचितम् ।
विसशृङ्गाटशालूकहविष्यान्नानि यानि तु ॥
एतान्यनुव्रतान्याहुः शस्तानि जपकर्म्मणि ।

यजुर्विधाने,—

शाकयावकपिण्याकपयोभक्षो भिक्षाहारो वा उदकशक्ताहारो वा । तथा हविष्यान्नभोजी क्षीराहारो होमं जपन् तत् निर्वर्त्तयेदिति । अत्र हविष्यान्नानीति स्मृत्यन्तरोक्तहविष्यद्रव्यपरम् ।

तथा छन्दोगपरिशिष्टे,—

हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादीन् सर्व्वालाभेऽपि वर्जयेत् ॥

[1]इत्यनेन माषादीनां प्रतिनिधित्वेनाग्रहणमित्यर्थः ।

तथा भविष्योत्तरे,—

हैमन्तिकं सिता स्विन्नं धान्यं मुद्गास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिड़मोचिका ॥

(१) B. इति माषादीनाम् ।

कालेयं कालशाकञ्च मूलकं केमुकेतरत् ।
कन्दं सैन्धवसामुद्रे लवणे दधिसर्पिषी ॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
पिप्पलीजीरकञ्चैव नागरञ्चैव तिन्तिड़ी ॥
कदली लवली धात्री फलान्यगुडमैक्षवम् ।
अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥

मत्स्यपुराणे,—

[1]मुद्गाश्चणककालाया मिथुनानां हवींषि च ।
एतेभ्योऽन्यानि [2]नाश्नीयान्मिथुनानामनापदि ॥

मिथुनानां द्विदलानाम् । अत्र भविष्योत्तरोक्तहविष्यद्रव्याणां सर्व्वदेशीयशिष्टपरिग्रहेणाप्रामाण्यकारणाभावाद् यत्र यत्र हविष्यद्रव्यविधिस्तत्र तत्र एतान्येव ग्राह्याणि । यत्तु [3]हविषि योग्यं हविष्यमिति हविष्यशब्दस्य यौगिकत्वात् श्राद्धद्रव्ये हविःपदप्रयोगात् श्राद्धद्रव्याण्येव हविष्य[4]शब्देनाभिधीयत इति तदयुक्तम् । यौगिकत्वेऽपि प्रयोगनियमेन पङ्कजादिपदवत् रूढ़ेरपि स्वीकारात् । यथोद्भिदादिपदस्य यौगिकस्यापि रूढ़ित्वम् । यत्तु प्रोक्षण्यधिकरणे सत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यत इति

(१) A. मुद्गाश्चकन्दकालायाः ।
(२) B. चाश्नीया ० ।
(३) B. हविर्योग्यं ।
(४) B. ० शब्देन विधीयत इति ।

योगाभाव एव रूढ़िरित्युक्तं तत् प्रदर्शनार्थम्। किञ्च श्राद्धद्रव्येषु माषमांसादिषु हविष्यपदाप्रयोगात् केवलयौगिकत्वमयुक्तम्। किञ्च शतरुद्रियहोमे गवेधुकानां हविष्ट्वात् वाजप्रसवीयादौ अष्टादशधान्यानां हविष्ट्वात् हविष्यत्वेन ग्राह्यत्वं स्यात्। [1]यदि च मधुमांसपरान्नमिथुनानि व्रतेऽहनि वर्जयेत्।

माषकोद्रवगौरादीन् सर्व्वालाभेऽपि वर्जयेत्।

[2]इति वचनान्तरात् हविष्यत्वेऽपि न ग्रहणम्। तर्हि यत्राष्टादश धान्यमध्ये निषेधवचनं नास्ति तेषां श्राद्धादेयत्वेऽपि हविष्यत्व-प्रसङ्गः। किञ्च—

हवींषि संस्कृता ये च यवगोधूमशालयः।

इति वाराहे

हविः शाल्योदनं विद्यादाज्ययुक्तं सशर्करम्।

इति नारसिंहे च विष्णुनैवेद्येऽपि हविःपदप्रयोगात्। कर्कारुक-फलादावपि हविष्यत्वप्रसङ्गः। नहि श्राद्धदेयमेव हविष्यमिति वचनमस्ति। किञ्च त्र्यम्बकमन्त्ररोगशान्तिहोमेषु ग्रहहोमेषु चाभक्ष्याणामपि होमीयत्वेऽपि न हविष्ट्वात् हविष्यत्वेन ग्राह्यत्वं स्यात्। अत्र जपाङ्गहविष्येऽभ्यङ्गनिषेधे प्रमाणाभावात् [3]अभ्यङ्गे न निषेधः। [4]ब्रह्मचर्य्यस्य अङ्गत्वपक्षेऽपि

(१) B. यदिति।

(२) B. इति वचनात्।

(३) A. अभ्यङ्गे निरोधः।

(४) B. ब्रह्मचर्य्यस्याङ्गत्वेऽपि।

ब्रह्मचर्य्यं हि सर्व्वेषां रेतोधारणमुच्यते।

ऋतुकालं गृहस्थानां नित्यं वा पर्व्ववर्ज्जनम्॥

इति ऋतावभिगमेऽपि न दोषः।

अयञ्चाहारनियमः प्राणायामहोमादावपि अनेकदिवससाध्ये मन्त्रजपाङ्गत्वेन प्रवर्त्तते। यदपि प्राणायामे होमे च मन्त्र-जपोऽङ्गमेव तथापि जपत्वाविशेषात् तद्धर्म्मा हविष्यभोजनादयः प्रधानाविरोधादन्येऽपि जपधर्म्माः कर्त्तव्या एव।

योगियाज्ञवल्क्यः,—

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।

त्रिःपठेदायतप्राणः प्राणायामः स उच्यते॥

सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोड़श।

अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः॥

दह्यन्ते ध्मायमानानां धातूनान्तु यथा मलाः।

तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्॥

षोड़शप्राणायामफलं पञ्चरात्रे,—

प्राणायामैः षोड़शभिर्दिनशोऽनुष्ठितैर्द्विजः।

मासादैहिकपापेभ्यो मुच्यते नात्र संशयः॥

जन्मान्तरोत्थपापेभ्यः षण्मासान्मुच्यते तथा।

संवत्सरेण तद्विष्णोः पदमाप्नोत्यसंशयम्॥

अह्ना रात्र्या च यो जन्तून् हिनस्त्यज्ञानतो द्विजः।

तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् [1]षड़ाचरेत्॥

(१) B. समाचरेत्।

तथा,—

प्राणायामशतं कार्य्यं सर्व्वपापापनुत्तये।
उपपातकजातानामनादिष्टस्य चैव हि॥
ब्रह्महा च सुरापश्च अगम्यागमने रतः।
सुवर्णस्तेयकृच्चैव गोघ्नो विश्रम्भघातकः॥
शरणागतघाती च कूटसाक्षीह्यकार्य्यकृत्।
एवमादिषु चान्येषु पापेष्वभिरताश्चिरम्॥
प्राणायामशतं कुर्य्युः सूर्य्यस्योदयनं प्रति।
निर्म्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥

इति। अत्र ब्रह्महत्यादिषु प्राणायामशतस्यावृत्तिः। चिरमित्युत्तरत्र सम्बध्यते। चिरं शतं कुर्य्युरित्येके। तथा—चक्षुस्त्वक्घ्राणमनोव्यतिक्रमे त्रिभिः प्राणायामैः [1]शुद्ध्यति। शूद्रस्त्रीगमने सप्ताहं सप्त सप्त प्राणायामान् धारयेत्। अभोज्याभक्ष्यापेयानां प्राशने अपण्यविक्रये द्वादशाहं द्वादशप्राणायामान् धारयेत्। पातकोपपातकवर्ज्जेष्वर्द्धमासम्। पातकपतनीयवर्जं [2]महापातकवर्जितेषु द्वादशार्द्धमासम्। [3]महापातकेषु संवत्सरं द्वादशद्वादशप्राणायामान् धारयेत्।

अत्र प्राणायामप्रकार उक्तः योगाङ्गप्रकरणे च वक्ष्यते।

(१) B. विशुद्ध्यति।
(२) B. महापातकवर्ज्जेषु।
(३) B. पातकेषु।

विशेषतश्च महाव्याहृतित्रययुक्त एको मन्त्रायुक्तः। सप्तव्याहृतिसशिरोगायत्रीदशप्रणवयुक्तश्चापरः शङ्खायुक्तः। तयोर्गुणविशेषात् फलविशेषः।

होमश्च।

मनुः,—

सावित्रान् शान्तिहोमांश्च कुर्य्यात् पर्व्वसु नित्यशः।

अत्र पर्व्वस्विति नित्यश इति च पर्व्वानतिक्रमेण यथा नित्यता। तथा शान्तिहोमपदेनैहिकानिष्टहेतुदुरितक्षयकामकर्म्मण उक्तत्वाद् दुरितानिश्चये च

अनिमित्तकृता शान्तिर्निमित्तायोपजायते।

इति प्रसिद्धदोषाद्दुरितनिश्चये हेतुग्रहदौस्थ्यत्रिविधोत्पाताद्यभावे शान्तावनधिकारात् निमित्तनिश्चयमपेक्ष्य नित्यता बोध्या। निमित्तनिश्चये सति सावित्रान् शान्तिहोमान् पर्व्वसु नित्यं कुर्य्यादित्यर्थः। निमित्तसंशये नैमित्तिकानिष्टसंशये दृष्टसामग्रीदर्शनेन वाऽनिष्टसंशयोभये निमित्ते विहितानि कर्म्माणि। (?) अनिष्टशङ्काया एव भयपदार्थत्वात्। तथा सहस्रनाम्नि भयान्मुच्यते भीतश्च। देवीमाहात्म्ये च,—

शत्रुतो न भयं तस्य दस्युतो वा न राजतः।
न शस्त्रानलतोयौघात् कदाचित् सम्भविष्यति॥

यथा वा मन्त्रराजाधिकारे श्रुतौ,—यो मृत्योः [1]पाप्मभ्यः संसाराद्
विभीयात् स एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रतिगृह्णीयात्।
इति। यथा गायत्र्यामेव।

ये जपन्ति सदा तेषां न भयं विद्यते क्वचित्।

इति। तेन ग्रहोत्पातरोगादिनिमित्तेन दुरितनिश्चये तच्छान्ति-
कर्म्माणि। निमित्तसंशयेन त्वनिष्टसंशये भयनिवृत्तिहेतुकत्वेन
विहितान्येव कर्म्माणि कार्य्याणीति सिद्धम्। गायत्र्यधिकारे
शङ्खः,—

हुता देवी विशेषेण सर्व्वकल्मषनाशिनी।
सर्व्वकामप्रदा देवी वरदा भक्तवत्सला॥
शान्तिकामस्तु जुहुयात् सावित्रीं [2]मक्षतैः शुचिः।

अक्षताः सत्वचो यवाः। तेन मनूक्तगायत्रीमन्त्रकशान्ति-
होमोऽप्यक्षतैरेवाविरोधात्। तथा,—

कृच्छ्रो देव्ययुतञ्चैव प्राणायामशतत्रयम्।
तिलहोमसहस्रञ्च वेदपारायणं समम्॥

अत्र तिलहोमो न गायत्र्या। किन्तु न व्याहृतिभ्यः परं
होम इति शङ्खवचनात् अविहितमन्त्रकहोममात्रे व्याहृति
विधिः। तथाच षट्त्रिंशन्मते,—

महाव्याहृतिभिर्होमस्तिलैः कार्य्यो द्विजन्मना।
उपपातकशुद्ध्यर्थं सहस्रपरिसंख्यया॥

(१) B. पापेभ्यः संसाराच्च०।
(२) B. चाक्षतैः०।

महापातकसंयुक्तो लक्षहोमेन शुद्ध्यति।

इति। छन्दोगपरिशिष्टे,—

यत्र व्याहृतिभिर्होमः [1]प्रायश्चित्तात्मको भवेत्।
चतस्रस्तत्र कर्त्तव्याः स्त्रीपाणिग्रहणे यथा॥

इति। ॐ भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः
स्वः स्वाहेति चतस्र आहुतयः। अग्निः। वायुः। सूर्य्यश्च त्रयाणां
देवताः। समस्तानां प्रजापतिः। यजुर्विधाने,—ॐकारपूर्वि-
काभिर्महाव्याहृतिभिराज्याहुतिसहस्रं जुहुयात् सर्व्वदेवताराधने
समर्थो भवति। तेजस्वी भवति।

अथ [2]यथेष्टकरणमित्यादिप्रयोगविधिः।

तत्र व्याहृतित्रयेण होमजपादयः। व्यस्तप्रयोगे माना-
भावात्। तथा,—एताभिरौदुम्बरसमिधो जुहुयात् पशुन्नकामः।
दधि पयो वा शान्तिकामः। अर्कसमिद्भिरग्निं प्रज्वाल्यापामार्ग-
तण्डुलान् जुहुयाद्धिरण्यकामः। अन्नमन्नादिकामः। जातीपुष्प-
कलिकानां युग्मशोग्रथितानामखण्डितानामयुतं जुहुयात् कन्या-

(१) ... प्रायश्चित्तार्थको भवेत्।
चतस्रस्तत्र विज्ञेयाः ... ॥
गोभिलस्मृतिः २य प्र० १४१ श्लो० Ānandāçrama series, Poona, स्मृतीनां समुच्चयः।
(२) B. यथेष्टं करण०।

कामः। अप्सु मध्यस्थितस्तिलतण्डुलान् जुहुयात् ग्रामकामः। अपामार्गवासकशाखोटकान् वशीकर्त्तुकामः। अभिचारार्थं विषरुधिराक्ता [1]व्यापात(?)समिधो जुहुयात्। विभीतकसमिधो जुहुयाद्‌ राजा वश्यो भवति। जनपदमरणे [2]सर्व्वत्र व्रीहीन् जुहुयात् शमयति। [3][सर्व्वत्र व्रीहिभिः] प्ररूढाभिर्हुत्वा राजा वश्यो भवति। दूर्व्वामायुः कामः।[4] कुशाग्राणि ब्रह्मवर्चसकामः। ज्वरापनयने चाम्रसमिधः। खादिरमन्नाद्यकामः। अपामार्गमर्थकामः। ब्रह्मचारी हविष्यभोजी वाग्यतः काम्यानि करोति। [5]कुशतण्डुलान् प्रत्यङ्गिरे (?)। काकोलूकपक्षहोमो विद्वेषणे। वचापलमर्द्धपलं वा ताम्रभाजने शष्पचूर्णानि कृत्वा न्यसेच्चन्द्रग्रहणे कपिलाया घृतं सहस्रसंख्याभिर्हुतं कृत्वा संस्रवेणैव वचामालोड्यायुताभिमन्त्रितं कृत्वा पिवेत् परममेधावी भवति। पुत्रकामो मासमादित्याभिमुखः प्रतिदिनमयुतं जपेत् पुत्रान् लभते। यद्‌यदिच्छेत् तदर्थमपि याज्ञिकद्रव्यं जुहुयात् तत्तल्लभ्यत इति। अनादेशेऽयुतहोमः। ॐकारस्य गायत्र्याश्च पृथगुक्तानि फलानि भवन्ति। तथा सावित्रीमन्त्रस्याप्येष एव विधिः। एषु यजुर्विधानोक्तप्रयोगेषु प्रथमं तुलापुरुषचान्द्रायण-

(१) B. व्याघात?

(२) B. सर्व्वव्रीहीन्।

(३) B. Omits the portion bracketed.

(४) B. Adds पुष्पाणि वस्त्रकामः।

(५) B. कुशकण्टकान् ०।

कृच्छ्रातिकृच्छ्रादिभिः पूतशरीरेण कर्म्मापेक्षया द्वादशरात्रं षड्रात्रं त्रिरात्रमेकरात्रमिति कर्म्माङ्गानि कार्य्याणि। सर्व्वमन्त्राणां पूर्व्वसेवार्थं लक्षमयुतं सहस्रं शतमिति सिद्ध्यपेक्षया कार्य्यम्। ब्रह्मचर्य्यस्थितेन कर्त्तव्यं रहस्ये। कर्म्मावसाने फलप्राप्तिः। कालाश्च सिद्धयो नावमन्तव्याः। तथा तत्रैव प्रदेशान्तरे। कृच्छ्रातिकृच्छ्रचान्द्रायणादिभिः शरीरं संशोध्य शाकादिभक्षो गोमूत्रयावकपयोभैक्षाहारो यदि सहस्रं जुहुयात् दशसाहस्रिकं फलं लभते। दशसाहस्रेण शतसहस्रमिति। अहोरात्रोपोषितः साहस्रिकं होममारभेत्। त्रिरात्रोपोषितो दशसाहस्रिकम्। सप्तरात्रोपोषितो लाक्षिकम्। हविष्यान्नभोजी क्षीराहारो होमं जपञ्च निर्व्वर्त्तयेदिति। तथा तृतीयाध्याये,—अथ प्रयोगः। शाकयावकपयोभक्ष्य उपोष्य द्वादशरात्राणि लघुभ्यो लघूनि महत्सु महान्ति तुलापुरुषचान्द्रायणमिति प्रयोगाङ्गमुक्ता एष एव विधिः [1]कल्पग्रहार्थमाचार्य्यस्य। ॐमित्यभिवाद्य विलम्बेन पठेन्नचैवान्यथा देयमिति प्रयोगोपदेशकाले कृच्छ्रचान्द्रायणादिकं कर्त्तव्यमुक्तम्। अत्र तुलापुरुषकृच्छ्रातिकृच्छ्रादिकमुपलक्षणं यावत्पापक्षयहेतुकर्म्मणा तपोदानतीर्थस्नानगायत्रीजपादिना शरीरशोधनम्। प्रायश्चित्ताधिक्यात् पापक्षयाधिक्ये फलभूयस्त्वमिति।

अत्र च यजुर्विधाने,—[2]अग्निसंस्कारविधिरुक्तः। भूरसीति भूमिं खनतीत्यादिना अन्ते च ततः सर्व्वदेवताराधनसमर्थो

(१) B. कल्पग्रहणार्थं ०।

(२) B. अङ्गसंस्कार ०।

भवति। अथ [1]यथेष्टं कर्म्मकरणमिति। यद्यप्येतत् पाञ्चरात्रिकाद्यग्निसंस्कारवद् यजुर्विधानोक्तहोमकर्म्मणामङ्गभूतं यदि वा नित्यप्राप्तगृह्यविधिं विकृत्य देवताराधनसामर्थ्यरूप[2]फलार्थं गोदोहवत्काम्यत्वेन विधीयते। उभयथापि नैतस्मिन् गृह्यविधिप्रवेशः तेन यावदुक्तमेतावदेव कार्य्यम्। गृह्य[3]विधेश्च एष एव विधिर्यत्र क्वचिद्धोमइति सर्व्वार्थत्वेन विधानाद् विकल्पेनात्रापि प्रवृत्तिरेव। न च याजुर्विधानकविधेर्विशेषत्वेन सामान्यप्राप्तगृह्यविधिवाधकत्वमेव। न तु तुल्यबलत्वमिति वाच्यं गृह्यविधेरपि यत्र क्वचिद्धोम इति यच्छब्देन सर्व्वनाम्ना विशेषरूपेणैव सर्व्वहोमेषूपस्थितेषु प्रवृत्तेर्दुर्व्वलत्वाभावात्। अतएव पाञ्चरात्रिकहोमादिविधावपि विकल्पेन गृह्योक्तविधेः प्रवेशं पाञ्चरात्रिका अपि मन्यन्ते। किञ्च गृह्योक्तविधेर्निःसन्दिग्धत्वाद् याजुर्विधानकविधौ बहुधा सन्देहात् सन्दिग्धमसन्दिग्धेन बाध्यत इति न्यायेन गृह्योक्तविधेरेव कर्त्तव्यइत्यभिप्रेत्य कल्पतरुकारादिभिरन्यैश्च गृह्यविधिरेव सर्व्वत्राहृतः।

यजुर्विधानोक्तविधिः। भूरसीति भूमिं खनति कुण्डविधया। मयि गृह्णामीति अग्निं [4]विगृह्णाति। लिप्ते कुण्डे अग्निं स्थापयतीत्यर्थः। विश्वे अद्येति परिस्तरणं कुशैः पूर्व्वादिदिक्षु। अदितिर्द्यौरित्युपपातनं करोति। उपपातनं

(१) B. यथोक्तम्।
(२) B. फलार्थम्।
(३) B. विरोधश्च।
(४) B. निगृह्णाति।

नाम परिसमूहनमिति प्रतिभाति। पर्य्युक्षणस्योपरिविधानात्। देवसवितरिति पर्य्युक्षति। लौकिकोदकेनैव। नमस्ते रुद्र इति पूर्व्वेणार्घ्यं ददाति। नमो वात्यायेति दक्षिणेन। त्वमग्नेक्रतुभिरिति पश्चिमेन। त्वमग्ने प्रथम इत्युत्तरेण। समास्त्वेत्युपरि अर्घ्यं ददाति। इदं विष्णुरिति स्रुत्वाहुतिं जुहोति। यातुधानाः पलायन्ते। उपनयनाद्यग्निकार्य्यं करोति। आदिपदं प्रकारवाचि उपनयनप्रकारम्। गर्भाधानादिविवाहान्ताग्निसंस्कारविधिरिह प्रणवेन स्रुवाहुतिहोमेन कर्त्तव्य इति प्रतिभाति।

देवीपुराणे जातकर्म्मादिसंस्कारविधिः। स्मार्त्ताग्निविषयेऽपि दृश्यते।

देवीपुराणे,—

अग्नेः परिग्रहः कार्य्यः सर्व्ववेदार्थवेदकैः।
वामदक्षिणसिद्धान्तगृह्यवेदान्तपारगैः॥

इत्युपक्रम्य गर्भाधानं भवेदेवं जातकर्म्म भवेदेवमित्यादि प्रपञ्चेनोक्तम्। तत्र एषा ते अग्ने। एतत्ते देवः सविता। आ मन्द्रैरिन्द्र। सूत्रामानम् (?)। (सौत्रामण्या) त्रातारमिन्द्रम्। यः प्राणतो। य आत्मदा। हिरण्यगर्भः। मामाहिंसीः। येन द्यौरुग्रा। यश्चिदापो। यं क्रन्दसी। आपोह। आपश्चित्। प्रजापते न। एताभिः समिधो हुत्वा शाकलहोमकैश्च जुहुयात्। समिध इत्यर्थः। शाकलहोमकाः देवकृतस्यैनसोवयजनमसीत्यादयः षण्मन्त्राः। अग्निश्च पृथिवीचेत्युपस्थानं कुर्य्यादिति। ततः

सर्व्वदेवताराधनसमर्थो भवति। अथ यथेष्टं [1]करणमिति। नाबादावाघारावाज्यभागौ [2]नवान्ते स्विष्टकृद्भूरादयः।

गृह्योक्ताग्निसंस्कारविधिः।

पारस्करः,—परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य्य प्रणीय परिस्तीर्य्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य निरुप्याज्यमधिश्रित्य पर्य्यग्नि कुर्य्यात्। स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात्। आज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्व्ववदुपयमन कुशानादाय समिधोऽभ्याधाय पर्य्युक्ष्य जुहुयात्। अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्व्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृच्च। एतन्नित्यं सर्वत्र। प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः। कात्यायनः,—पाकयज्ञेष्ववत्तस्यासर्व्वहोमः। हुत्वा च शेषप्राशनम्। पूर्णपात्रो दक्षिणा वरो वा वरो वा। तदिहाज्यभागानन्तरं प्रधानहोमः। तदन्ते स्विष्टकृत्। प्रधानहविषा। ततो भूः स्वाहा भुवः स्वाहा स्वः स्वाहा। त्वन्नो अग्ने। सत्वन्नो अग्ने। अयाश्चाग्ने। येते शतम्। उदुत्तमम्। इति पञ्चमन्त्रैः पञ्चाहुतयः। प्रजापतये स्वाहेति च। आज्यस्यैव प्रधानद्रव्यत्वे अन्ते स्विष्टकृत्। समिधामपि प्रधानद्रव्यत्वे आज्येनैवान्ते स्विष्टकृत्। अत्र देवीपुराणे परिसमूहनादिषु मन्त्रान् दर्शयित्वा शेषेऽभिहितम्।

(१) B. कर्म्मीकरणमिति।

(२) B. न चान्ते।

अन्यथा ये प्रकुर्व्वन्ति सूत्रमाश्रित्य केवलम्।
निराशास्तत्र गच्छन्ति सर्व्वे देवा न संशयः॥

तेन शान्तिके पौष्टिके च होमे देवीपुराणोक्तविधिरावश्यकः। न च विवाहोपनयनादावपि तत्प्रसङ्गः।

एवं लक्षणसंयुक्तं सर्व्वहोमेषु याज्ञिकम्।
विधानं विहितं तत्र ब्रह्मणामिततेजसा॥

इति तत्रैवोक्त्वा फलवद्धोमवाचियज्ञपदेन संस्कारत्वेन नित्यहोमानामग्रहणात्।

यद्यपि गृह्योक्ताग्निस्थापने कुण्डस्थण्डिलादिनियमो नास्ति तथापि शान्तिकपौष्टिकहोमेषु तत्तत्कुण्डानां विधानात् तदसम्भवे च स्थण्डिलस्यापि विधानात् तदन्यतरदाश्रित्य परिसमूहनादि कार्य्यम्। [1]तत्रच,—

द्रवद्रव्ये स्रुवः प्रोक्तः स्रुचा [2]चात्र न (तु) हूयते।

इति छन्दोगपरिशिष्टे यद्यपि स्रुचो ग्राहिता तथापि प्रोक्षणीः संस्कृत्येति सूत्रणात् प्रोक्षणीसंस्कारस्य श्रौते हविर्ग्रहणार्थं दृष्टत्वात् [3]दृष्टाग्निहोत्रहोमाभावे हविर्ग्रहणभावेऽपि गुणलोपे तु मुख्यस्येति न्यायेन तदाधारस्रुङ्मात्रग्रहणम्। तथा पवमानहविषि हविर्ग्रहणार्थमग्निहोत्राभावेनाग्निहोत्रहवन्य-

(१) B. अत्रच।

(२) B. यत्र।

(३) B. दृष्टाग्निहोत्रहोमाभावेन हविर्ग्रहणस्वाभावेन हविर्ग्रहणभावेऽपि ०।

भावेऽपि स्रुङ्मात्रग्रहणम् । एवञ्च प्रोक्षणीपात्र[1]मत्र स्रुगेव वैकङ्कती । अन्यथोत्पवनोद्दिङ्गनादिकमपि न प्रवर्त्तेत । ताम्रादि-पात्रे प्रोक्षणीसंस्कारो निर्मूलः प्रतिभाति । तथा,—

होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः ।
[2]पाणिनैवेतरस्मिंश्च स्रुचा [3]चात्र न हूयते ॥

इति छन्दोगपरिशिष्टे द्रवद्रव्ये स्रुवस्य विधानात् संहतद्रव्ये च

पाण्याहुतिर्द्वादशपर्व्वपूरिका
[4]द्रवादिना चेत् स्रुवमात्रपूरिका ।
दैवेन तीर्थेन च हूयते हविः
स्वङ्गारिणि स्वर्चिषि तच्च पावके ॥

इति च हस्तस्य विधानात् । अन्यत्र गोभिलेन—

गोवक्त्रवत् करं कुर्य्यात् तर्जनीकन्यसाहृते ।
त्रिभिरङ्गुलिभिः स्पृष्टं पूर्व्वमात्रन्तु पूरयेत् ॥
व्रीह्यादीन् होमयेद् विद्वानधोवक्त्रेण यत्नतः ।

इति मध्यमानामिकाङ्गुष्ठयोगेन होमविधानात् स्रुचः प्रसङ्गा-

---

(१) B. मेतत् ।

(२) पाणिरेवेतरस्मिंस्तु स्रुचा चात्र तु हूयते ।
गोभिलस्मृतिः १म प्र० श्लो० १०७ ।

(३) B. यत्र ।

(४) कंसादिना चेत् स्रुवमात्रपूरिका इति गोभिलस्मृतिः । १म प्र० सप्तमी कण्डिका १२२ श्लोकः ।

भावात् स्रुङ्निषेधो नित्यानुवादोऽर्थवाद इति पूर्णाहुतिहोमः स्रुचा क्रियते । अतएव कालातिक्रमे नियतवदिति सूत्रेण जात-कर्म्मादीनां कालातिक्रमे अनादेशप्रायश्चित्तमतिदिश्यमानं स्रुचैव शिष्टाः कुर्व्वन्ति । न चैवमादिष्वेव प्राप्तायाः स्रुचोनिषेधः । अत्र नैमित्तिकत्वेन [1]नित्यवन्निषेधान्नयायात् । लोके चैतदा-दीन्येव कर्म्माणि पुण्याहं स्वस्ति ऋद्धिमितिवचनात् पुण्याह-वाचनमादौ कार्य्यम् । तच्चैवम्,—ब्राह्मणान् यथाशक्ति पूज-यित्वा क्रियमाणेऽस्मिन् कर्म्मणि पुण्याहं भवन्तो ब्रुवन्तु इत्युक्ते पुनन्त्वादित्या इत्यादिमन्त्रं पठित्वा पुण्याहमिति त्रिर्ब्रूयुः । एवं स्वस्ति भवन्तो ब्रुवन्तु इत्युक्ते स्वस्ति न इन्द्र इति पठित्वा स्वस्तीति त्रिर्ब्रूयुः । एवं कर्म्मर्द्धिं भवन्तो ब्रुवन्तु इत्युक्ते ऋद्धाः कर्म्मण्या इति मन्त्रं पठित्वा कर्म्म ऋद्ध्यतामिति त्रिर्ब्रूयुः । ततो यजमानः पुण्याहमिति त्रिः । एवमस्त्विति ब्राह्मणाः । विज्ञा-पयामीति यजमानः । उच्यतामिति द्विजाः । गोब्राह्मणेभ्यः शुभं भवतु । राज्ञः प्रजानां शान्तिर्भवतु इति सर्व्वे । ततो यजमानः अमुकफलार्थं होमकर्म्मारम्भः क्रियते यदा तदा तारा-वारग्रहनक्षत्राणाममृतयोगोऽस्तु नवग्रहाः सम्यग्रूपेण एका-दशस्थाः फलदा भवन्तु शुभं भवतु इति त्रिः । ततः सङ्कल्पः ।

यद्यपि व्रतादन्यत्र जलपात्रग्रहणपूर्व्वकसङ्कल्पे मानाभावः समाचारात् । आपस्तम्बेन च पापकर्म्मसु सङ्कल्पपूर्व्वके दोषाति-

---

(१) P. नित्यवन्निषेधान्वयात् ।

श्रयमुक्ता एवं पुण्यवत्सुचेति विहितकर्म्मसु सङ्कल्पेन फलोत्कर्षाभिधानात्।

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः।
उपवासन्तु गृह्णीयाद् यदा सङ्कल्पयेद् बुधः॥

इत्यत्रान्यदपि यदुपवासातिरिक्तं सङ्कल्पयेत् तदा वारिपूर्णं पात्रं गृहीत्वा इति व्याख्यानस्य बहुसम्मतत्वात् ताम्रपात्रमादयोदङ्मुखस्य होमजपादौ सङ्कल्पः। यद्यप्यत्र स्मार्त्तकर्म्मसु यजमान एव कर्त्ता शास्त्रफलं प्रयोक्तरीतिन्यायात् ऋत्विग्वरणदक्षिणादानाद्यभावात्। [[1]ब्रह्मणस्तु कृताकृतावेक्षकत्वेन वरणात्।] दक्षिणतो ब्रह्मासनमास्तीर्य्य ब्रह्मान्वारब्ध इत्यादि लिङ्गाच्च। अतएव पूर्णपात्रं दक्षिणा वरोवेति ब्रह्मदक्षिणात्वेनोपपन्नत्वादाचार्य्यवरणमाक्षिपति तथापि स्मार्त्तकर्म्मसु।

ब्रह्मणे दक्षिणा देया या च यत्रोपदिश्यते।
विदध्याद्धोत्रमन्यश्चेद् दक्षिणार्द्धहरोभवेत्।
स्वयञ्चेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत्॥

इति छन्दोगपरिशिष्टे यजमानादन्यस्य [2]होमकर्त्तृत्वे दक्षिणार्द्धं ब्रह्मणे दक्षिणार्द्धं होमकर्त्रे दद्यादितिलिङ्गादाचार्य्यवरणमायाति। किञ्च सर्व्वशान्तिकपौष्टिकहोमानां नवग्रहयज्ञ-

(१) A. Omits the portion bracketed.

(२) B. स्मार्त्तकर्म्मजहोमकर्त्तृत्वे आम्नातदक्षिणार्द्धं ब्रह्मणेऽर्द्धं होमकर्त्रे च देयमिति लिङ्गादन्यस्यापि कर्त्तृत्वमिति आचार्य्यवरणमिति। किञ्च °।

विकृतित्वं तत्र कृत्स्नधर्म्मविधानादितरेषां साकाङ्क्षाणां तत एव धर्म्मग्रहणौचित्यात्। तत्र च ऋत्विक्परिग्रहः श्रूयते।

मत्स्यपुराणे,—

नवग्रहमखे विप्राश्चत्वारो वेदपारगाः।
अथवा ऋत्विजौ शान्तौ द्वावेव श्रुतिपारगौ॥

इति सर्व्वत्र ऋत्विक्परिग्रहः। [1]यत्तु भट्टाचार्य्यैः।—

शान्तिपुष्ट्यभिचारार्था एकब्रह्मर्त्विगाश्रयाः।
क्रियास्तु याः प्रतीयन्ते [2]त्वथ्येवात्मीयगोचराः॥

इति शान्तिपुष्ट्यभिचारहोमेषु आथर्व्वणेषु एकर्त्विकत्वमुक्तं तत्र एक आचार्य्यः ब्रह्म च ऋत्विक् यत्रेत्येवं व्याख्येयम्। अथवा शान्तिकपौष्टिकेषु दक्षिणाम्नानवत्सु पुरोहितवत् प्रतिनिधिः कर्त्ता। आचार्य्यः ब्रह्मा च प्रसिद्ध एव। यथा [3]त्रियम्बकाधिकारे वशिष्ठकल्पे,—

[4]परार्थमपि कुर्व्वीत ब्राह्मणो वेदवित्तमः।
दातव्या दक्षिणा तत्र यथा तुष्टो भवेद्गुरुः॥

इत्यादि। यत्र दक्षिणाम्नानं नास्ति तत्रापि यथाप्रतिनिधिकर्त्तृनिवेशस्तथा याजनाधिकारे वक्ष्यते।

प्रजापतिः। अनुष्टुप्। अग्निः।

(१) B. यत्तु शिष्टाचार्य्यैः।

(२) B. त्वीयथ्येवात्मीय °।

(३) B. त्र्यम्बका °।

(४) B. परार्थमत्र °।

यद्देवा देवहेड़नं देवासश्चकृमावयम्।

अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्वंहसः॥

इति कश्यपं स्मृत्वा त्रिः परिसमूहनं कुशैः। कुत्स ऋषिः। [1]जगती। रुद्रः। मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः। मानो वीरान् रुद्रभामिनोवधीर्हविष्मन्तस्सदमित्वाहवामहे। इत्यनेन [2]विश्वेदेवान् स्मृत्वा लेपनं त्रिः। परमेष्ठी प्रजापति ऋषिः अनुष्टुप्। इन्द्रः। त्वां वृत्रेष्विन्द्र सत्पतिन्नरस्त्वां काष्ठास्ववतः। मित्रावरुणौ स्मृत्वा त्रिः परिलेखनम्। परमेष्ठी। यजुः। पुरीषम्। व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मस्तमतोमामौक्। अनेन पृथिवीं स्मृत्वा मृत्तिकोद्धरणं त्रिः। परमेष्ठी। यजुः। सविताश्विपूषा। अश्विनौ सरस्वतीन्द्रः। इति वा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि। सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्यायाभिषिञ्चामि। इन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि। गन्धर्व्वान् स्मृत्वा त्रिरभ्युक्षणम्। परमेष्ठी। गायत्री। अग्निः। अग्नि मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति। अनेन शर्व्वं स्मृत्वा ताम्रपात्रानीतस्य शरावानीतस्य वा

(१) P. गायत्री।

(२) B. विश्वान् देवान् ०।

अग्नेरात्माभिमुखं कुण्डे स्थापनम्। [1]देवीपुराण एवान्यत्र ताम्रपात्रे शरावे वेतिवचनात्। अग्निश्च गृह्यादुद्धृतः। निरग्नेर्ब्राह्मणगृहादानीतः। एवमग्निस्थापनानन्तरं प्रधानहोमसम्बद्धदेवतापूजा कुण्डपूर्व्वे ईशाने वा।

नवग्रहयज्ञे दृष्टत्वात्। अतएव भोजपद्धतौ

सूर्य्येन्दुपर्जन्यसमीरणानां

यागः स्मृतो वृष्टिविकारकालः।

इति मत्स्यपुराणीयाद्भुतशान्तौ सूर्य्येन्दुपर्जन्यसमीरणानां पूजनमित्युक्तम्। ततः कलशस्थापनम्। वरुणस्येति मन्त्रेण। कलशश्च पञ्चरत्नपञ्चभङ्गसमन्वितः दध्यक्षतविभूषितः वस्त्रयुग्मच्छन्नः सफलतण्डुलपूर्णशरावापिहितमुखः।

गङ्गाद्याः सरितः सर्व्वाः समुद्राश्च सरांसि च।

आयान्तु यजमानस्य दुरितक्षयकारकाः॥

इति तीर्थावाहनम्। होमारम्भः। हिरण्यगर्भ इत्यस्य प्रजापति ऋषिः। त्रिष्टुप्। हिरण्यम्।

हिरण्यगर्भः समवर्त्तताग्रे

भूतस्य जातः पतिरेक आसीत्।

सदाधारपृथिवीं द्यामुतेमां

कस्मै देवाय हविषा विधेम॥

ब्रह्माणं स्मृत्वा दक्षिणतो ब्रह्मासनमास्तीर्य्य तत्र ब्रह्मोपवेशनम्।

(१) B. देवीपुराणेन एवान्यत्र ताम्रपात्रेण शरावेणेति वचनात्।

आचार्य्यः कारयेत्। आपोहिष्ठा इत्यस्य सिन्धुद्वीप। गायत्री आपो देवता। त्र्यचेन सागरान् स्मृत्वा उत्तरे प्रणीताप्रणयनम्। दध्यङाथर्व्वण। गायत्री। इन्द्रः। कयानश्चित्र आभुवदूती सदावृधः सखा। कया शचिष्ठया वृता। अनेन नागान् स्मृत्वा परिस्तरणम्। शतक्रतुं ध्यात्वा अर्थवत् पात्रासादनम्। पवित्रच्छेदनानि पवित्रे। प्रोक्षणीपात्रम्। आज्यस्थाली। चरुस्थाली। सम्मार्जन कुशाः। उपयमनकुशाः। तिस्रः समिधः। स्रुवः। आज्यम्। चरुतण्डुलाः। पूर्णपात्रम्। दक्षिणा। वरोवा। परमेष्ठी। यजुः। पवित्रे। पवित्रे स्थो वैष्णव्यौ इति पितॄन् स्मृत्वा पवित्रच्छेदनम्। स्रुचि प्रणीताजलं कृत्वा। परमेष्ठी। यजुः। आपः। सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। इति ब्रह्मविष्णुमहेश्वरान् स्मृत्वा प्रोक्षण्युत्पवनम्। सव्ये कृत्वा दक्षिणेनोद्दिङ्गनम्। प्रणीतोदकेन प्रोक्षणम्। परमेष्ठी यजुः। पात्राणि। दैव्याय कर्म्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदंवस्तच्छुन्धामि। इति वरुणं ध्यात्वा ताभिरद्भिरासादितपात्राणां प्रोक्षणम्। असञ्चरे प्रोक्षणीनिधानम्। परमेष्ठी। यजुः। शाखावत्सा। इषेत्वोर्जेत्वा वायवस्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमायकर्म्मणे इत्याज्य स्थाल्यां वसून् स्मृत्वा आज्यनिर्वपणम्। सोदके चरुपात्रे चरुतण्डुलप्रक्षेपः। वैवस्वतं स्मृत्वा आज्याधिश्रयणम्। सचरौ ब्रह्माज्यमधिश्रयति। चरुकर्त्ता। अचरौ कर्त्तैवाज्यम्। परमेष्ठी। यजुः। रक्षः। अन्तरितं रक्षोऽन्तरिता अरातयः। देवस्त्वा

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1211.

SIR·WILLIAM·JONES



MDCCXLVI–MDCCXCIV

नित्याचारप्रदीपः ।

NITYĀCĀRAPRADĪPAḤ.

BY

NARASIMHA VĀJAPEYĪ

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

VOLUME II. FASCICULUS II.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.

1909.

Mārkaṇḍēya Purāṇa, (English) Fasc. 1–9 @ 1/- each ...	Rs. 9	0
•Markandeya Purana, Fasc. 5-7 @ /10/ each	1	14
*Mīmāṁsā Darçana, Fasc. 10–19 @ /10/ each	6	4
Nyāyavārtika, Fasc. 1--6 @ /10/ each	3	12
*Nirukta, Vol. IV, Fasc. 1--8 @ /10/ each	5	0
*Nitisara, Fasc. 3-5 @ /10/ each	1	14
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each	4	6
Nityācārapradīpaḥ Vol. I, Fasc. 1--8; Vol. II, Fasc. 1. @ /10/ each ...	5	10
Nyayabinduṭīkā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6; Vol. II, Fasc. 1--3 @ /10/ each	5	0
Padumawati, Fasc. 1--5 @ 2/	10	0
*Pariçiṣta Parvan, Fasc. 3--5 @ /10/ each	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Prithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/-	1	0
Prākrta Lakṣaṇam Fasc. 1 @ 1/8/ each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1--8; Vol. II, Fasc. 1--6; Vol III, Fasc. 1--6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1	1	4
Saddarsana-Samuccaya, Fasc. 1-4 @ /10/ each	1	4
*Sāma Vēda Saṁhitā, Vols. I, Fasc. 7--10; II, 1-6; III, 1--7; IV, 1--6; V, 1-8, @ /10/ each	19	6
Samaraieca Kaha Fasc. 1, @ /10/	0	10
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each ...	3	0
•Sankara Vejaya, Fasc. 2-3 @ /10/ each ...	1	4
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sragdharā stotra (Sanskrit and Tibetan)	2	0
Srauta Sutra Latyayan, Fasc. 4-9 @ /10/ each	3	12
,, ,, Asbalayana, Fasc. 4-11 @ /10/ each	5	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each	9	6
,, Pratisakhya, Fasc. 1-3 @ /10/ each	1	14
*Taitterīya Saṁhitā, Fasc. 27–45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each	6	4
Tantra Vārteka (English) Fasc. 1-6 @ 1/4/ each	7	8
Tattva Cintāmaṇi, Vol. I, Fasc. 1–9, Vol II, Fasc. 2–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	23	12
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
Upamita-bhava-prapañca-kathā, Fasc. 1,5-12 @ /10/ each	5	10
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3--6; Vol. II, Fasc. 1--7, @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1-8 Vol- II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2, @ 1/4/	1	4
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each	1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1.	1	4

Tibetan Series.

Baudhyastotrasangraha	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--3 @ 1/- each	3	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam Ṭhi S'iñ, Fasc. 1--4 @ 1/ each	4	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1--6; Vol. II. Fasc. 1--5 @ 1/ each	11	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6, @ 1/ each	14	0

Arabic and Persian Series.

ʿĀlamgirnāmah, with Index, (Text) Fasc. 1--13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--3 @ 1/- each	3	0
Āīn-i-Akbarī, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, Fasc. 1--5, @ 2/- each	34	0

*The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,

11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

•Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	Rs. 1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
*Agni Purāṇa, Fasc. 6-14 @ /10/ each	5	0
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III. Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
Aitereya Lochana.	2	0
•Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-	1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each	1	4
Atmatattaviveka, Fasc. I. @ /10/ each	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-6 ; Vol. II. Fasc. 1-5 @ 1/ each...	11	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-2 @ /10/ each ...	3	2
*Bhāmatī, Fasc. 4-8 @ /10/ each	3	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6 @ /10 each	3	12
Baudhyostatrasangraha	2	0
Brahma Sutra, Fasc. 1 @ /10/ each	0	10
Bṛhaddēvatā. Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fase 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	3	2
Cri Cantinatha Charita, Fasc. 1	0	10
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. I-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3	2
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1--12 @ /10/ each... ...	7	8
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each	36	14
Ditto Vol. 4, Fasc. 7, @ 1/4/ each	1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each	3	12
Ditto Çānkhāyana, Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each	10	0
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each	1	14
Dāna Kriyā kaumudī, Fasc. 1--2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol. I. @ /10/ each	3	2
Ditto Vol. II, Fasc. 1-2 @ 1/4/ each	2	8
Haralata	1	14
Karmapradiph, Fasc. I	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Kṛtantra, Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	17	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each	4	6
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each	3	0
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc 1-12 Vol. III, Fasc. 1-8 @ /10/ each	18	2
Manuṭīkā Saṇgraha, Fasc. 1-3 @ /10/ each	1	14

Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each	Rs. 55	8
Ditto (English) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-6 @ 1/4/ each	16	4
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc. 1--19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farnang-i-Rashīdī, Fasc. 1-14 @ 1/8/ each	21	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ...	4	0
Futūḥ-ush-Shām of Wāqidī, Fasc. 1--9 @ /10/ each	5	10
Ditto of Āzādī, Fasc. 1--4 @ /10/ each	2	8
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
History of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each	7	8
Iqbālnāmah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-'Ālamgīrī, Fasc. 1--6 @ /10/ each	3	12
Maāṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each	3	2
Muntakhabu-t-Tawārīkh, Fasc. 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each	16	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each	11	14
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmī's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāẓu-s-Salātīn, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Tabaquāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni Fasc. 1--7 @ /10/ each ...	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each	20	0
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.		
3. JOURNAL of the Assiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.		
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.		
6. Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
7. Catalogue of the Library of the Asiatic Society, Bengal, Part I, A to E ...	2	0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each	15	0
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ...	10	0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each	34	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

30-6-09.

Books are supplied by V. P. P.

सविता अपयतु वर्षिष्ठेधिनाके। अनेन मरुतः स्मृत्वा द्वयोः पर्य्यग्निकरणम्। [1]अर्द्धस्रुते (?)। परमेष्ठी। अग्निर्वा। त्रिष्टुप्। इन्द्रः। त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्तिनो मघवा धात्विन्द्रः। इति स्रुवप्रतपनम्। परमेष्ठी। यजुः। स्रुवः। अनिशितासि सपत्नक्षिद्वाजिनीन्त्वा वाजेध्यायै सम्मार्ज्मि। अदित्यै रास्नासि विष्णोर्वेष्पो स्यूर्जत्वादब्धेनत्वा चक्षुषावपश्यामि। अनेन स्रुवसम्मार्जनम्। अभ्युक्षणम्। परमेष्ठी। यजुः। रक्षः। प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातय इत्यनेन पुनः प्रतपनम्। स्कन्दं स्मृत्वा आज्योद्वासनम्। परमेष्ठी। यजुः। आपः। सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिरिति चन्द्रं स्मृत्वा आज्योत्पवनम्। सवितुर्वः प्रसव उत्पुनामीत्यादिना सूर्य्यं स्मृत्वा प्रोक्षण्युत्पवनम्। सर्व्वा दिशः स्मृत्वा आज्यावेक्षणम्। आज्ये स्रुवयोजनम्। अभिघार्य्य चरोरुद्वासनम्। आज्योद्वासनानन्तरं वा चरोरुद्वासनम्। उपयमनकुशादानम्। समिद्धमग्निमिति कण्डिकाद्वयस्य प्रजापतिः। गायत्री। अग्निः। समिद्धमग्निमिति कण्डिकाद्वयेन लक्ष्मीं स्मृत्वा समिदाधानम्। परमेष्ठी। यजुः। धूः। धूरसि धूर्व्व धूर्व्वन्तं योऽस्मान् धूर्व्वति तं धूर्व्वयं वयं धूर्व्वामः। देवानामसि सस्नितमं वह्नितमं पप्रितमं जुष्टतमं देवहूतमम्। अह्रुतमसिहविर्धानं दृंहस्वमाह्वार्मार्ति यज्ञ

(१) P. अर्द्धस्रते (?)।

पतिर्ह्यांक्रसीत्। अनेन प्रोक्षणीशेषजलेन पर्य्युक्षणम्। उमां देवीं स्मृत्वा प्रणीतासु पवित्रस्थापनम्। ब्रह्मास्वयम्भूः। अनुष्टुप्। परमात्मा।

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद्‌ब्रह्म त आपः स प्रजापतिः॥

इत्यग्निपूजनम्। ततः प्रजापतये स्वाहा। इन्द्राय स्वाहा। अग्नये स्वाहा। सोमाय स्वाहा। अन्तरिक्षाय स्वाहा। ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ततो मूलहोमः। मूलहोमसमाप्तौ प्रधानद्रव्येण स्विष्टकृत्। भूरादिप्राजापत्यान्ते ग्रहयज्ञप्रकरणे,—

ॐ पूर्णाहुतिञ्च मूर्द्धानं दिव इत्यभिघातयेत्।

इति मत्स्यपुराणात् शान्तिकपौष्टिकेषु पूर्णाहुतिः। मूर्द्धानमित्यस्य परमेष्ठी। त्रिष्टुप्। अग्निर्वैश्वानरः। मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम्। कविं सम्राजमतिथिं जनानामासन्ना पात्रञ्जनयन्त देवाः॥ स्वाहा वौषट् इति यजमानान्वारब्धे तिष्ठतो होमः।

अत्र पृथगाज्यसंस्कारं कुर्व्वन्ति तत्र मूलं न पश्यामः। [1]चतुर्गृहात् ग्रहणमिदाधानफलपुष्पाक्षतादिसंयोगश्च समाचारात्। आधानिकपूर्णाहुतितोऽतिदेशपक्षे प्रमाणसत्त्वे पृथगाज्यसंस्कारः।

(१) चतुर्गृहीतग्रहणं समिदाधानफलपुष्पाक्षतादिसंयोगश्च समाचारात्। इत्येवं पाठ एवार्थसङ्गतः। सं

संस्रवप्राशनं मार्जनम्। तेन कलशेन यजमानस्य हेमस्रग्विभूषितस्य ब्राह्मणचतुष्टयेन प्रागुदङ्मुखेनाभिषेकः।

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणः प्रभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः समागताः।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः॥
ऋषयो मुनयो गावो देवमातर एव च।
देवपत्न्यो ध्रुवोनागा दैत्याश्चाप्सरसाङ्गणाः॥
अस्त्राणि सर्व्वशास्त्राणि राजानो वाहनानि च।
औषधानि च रत्नानि कालस्यावयवाश्च ये॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एतास्त्वामभिषिञ्चन्तु सर्व्वकामार्थसिद्धये॥

ततः सर्व्वौषधैः सर्व्वगन्धैस्ते यजमानं पृथग्जलेन स्नपयेयुः। ततः शुक्लाम्बरमाल्यगन्धधरस्य [1]दक्षिणादानम्। पवित्रप्रति-

पत्तिः। प्रणीताविमोकः। देवताग्निब्रह्मविसर्जनम्। ब्राह्मण-
भोजनमच्छिद्रावधारणमिति।

इति शान्तिकपौष्टिकसामान्येतिकर्त्तव्यता।

ऐहिकामुष्मिकसर्व्वकामेप्सूनां त्र्यम्बकमन्त्रजपः।

तत्र यजुर्विधाने त्र्यम्बकेणापमृत्युं जयति। मृत्युमेव वा।

वाशिष्ठयोगे,—

संसारदावदग्धानां योगिनामप्ययोगिनाम्।
[1]नान्यत्पश्यामि भेषज्यं मृत्योस्त्र्यम्बकादृते॥

वशिष्ठकल्पे,—

मृत्युभीतस्त्वशुद्धोऽपि सर्व्वावस्थासु सर्व्वदा।
सर्व्वापत्सु च सर्व्वत्र मृतसञ्जीवनीं जपेत्॥

तद्विधिश्च वशिष्ठकल्पे वशिष्ठ उवाच,—

अहमस्य ऋषिः प्रोक्तश्छन्दोऽनुष्टुविहोच्यते।
देवता त्र्यम्बको रुद्रः पञ्चाङ्गानि शृणुष्व मे॥

अग्नये हृदयाय नमः। त्र्यम्बकाय शिरसे स्वाहा। त्रिने-
त्राय शिखायै वषट्। वशिष्ठाय कवचाय हुम्। अनुष्टुप्छन्दसे
अस्त्राय फट्।

प्राच्यादिषु चतुर्द्दिक्षु दिग्बन्धं कारयेत् क्रमात्।

(१) P. तन्नपश्यामि ०।

दुर्गा विनायकश्चैव नन्दीशः क्षेत्रपालकः।
एते दिग्बन्धमन्त्राः स्युरन्ततो नम उच्यते॥

[1][मन्त्रार्थस्तु] द्यौरापः पृथिवीचेति लोकमातरोऽस्य सेवका
इति त्र्यम्बकस्त्रिनेत्रश्च। लोकेषु शोभनो योगन्धः स सर्व्वोऽस्य
अतः सुगन्धिः। अथवा दीयमानचन्दनपुष्पादिगन्धैः सुगन्धिः।
सर्व्वेषां देवादीनामपि पुष्टेरैश्वर्य्यस्य वर्द्धकः। ईदृशं यजामहे
वयम्। यथा उर्व्वारुकं कर्कटीफलं बन्धनात् स्वयं मुच्यते। एवं
त्वत्प्रसादादहं मृत्योर्लोकभयङ्करान्मुच्चीय मोक्षं [2]लभे। माऽमृतात्।
[3][अमृतात्मा मुच्चीय।] अमृतात्मना त्वया मम भेदो माऽस्तु।
त्वमेवाहं स्यामित्यभेदप्रार्थनम्।

एवं विदित्वा मन्त्रार्थं ऋषिच्छन्दोऽधिदेवतम्।
जपहोमादि कर्त्तव्यं साक्षान्मृत्युं जयत्यतः॥
एवं मन्त्रं त्रयीसारं नाऽभक्त्या धारयेन्नरः।
तस्मादाचार्य्यतो लब्ध्वा सम्यग्वेदव्रतो द्विजः।
मृतसञ्जीवनीं विद्यां गोपयेच्च प्रयत्नतः॥

तेन गुरुमुखाद् यत्नेन ब्रह्मचर्य्यादिना मन्त्रग्रहणम्।

ततः पुरश्चरणम्।

पर्व्वताग्रे नदीतीरे गोष्ठे देवालयेऽपि वा।
अन्येषु पुण्यदेशेषु यत्र वा रमते मनः॥

(१) P. Omits the portion bracketed.
(२) P. लभेम।
(३) P. Omits the portion bracketed.

ध्यात्वा त्रैयम्बकं देवं सततञ्च नमस्कृतम्।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा॥
यावता वा जपेनासौ पूतोऽहमिति मन्यते।
मन्त्रं प्रणवसंयुक्तं जपेत् तावत् समाहितः॥

अत्र च ध्यानस्यानुक्तेः वक्ष्यमाणध्यानविशेषाणां काम्यत्वात् तन्त्रान्तरोक्तध्यानं [1]ग्राह्यम्।

अच्छस्वच्छारविन्दस्थितिरुभयकराङ्कस्थितं पूर्णकुम्भं
द्वाभ्यां वेदाक्षमाले निजकरकमलाभ्यां घटौ नित्यपूर्णौ।
द्वाभ्यां चैव स्रवन्तौ शिरसि शशिकलाबन्धुरैः प्लावयन्तौ
देहं देवो दधानः प्रदिशतु विपदाकल्पजालः श्रियन्नः[2]॥

अत्र,—

गोमयेनोपलिप्तायां भूमौ दर्भान् विकीर्य्य च।
जपहोमादि कर्त्तव्यं साक्षान्मृत्युं जयार्थिना॥
प्राङ्मुखोदङ्मुखो वाऽपि दर्भेष्वासीत वाग्यतः।
ततः कायविशुद्ध्यर्थं प्राणायामान् षड़ाचरेत्॥

इति षट्प्राणायामाचरणञ्च यद्यपि पुरश्चरणाङ्गत्वेनोक्तं तथाप्यन्यत्रापि प्रवर्त्तते इत्येके।

आत्मार्थं जपहोमादि नित्यं कुर्य्यादतन्द्रितः।
परार्थमपि कुर्व्वीत ब्राह्मणो मन्त्रवित्तमः॥

(१) P. कार्य्यम्।

(२) सारदातिलकधृत हस्ताभ्यां कलशद्वयामृतैरित्यादित्र्यम्बकध्यानं द्रष्टव्यम्।

दातव्या दक्षिणा तत्र यथा तुष्टो द्विजोत्तमः।
आत्मार्थं वा परार्थं वा नैव कुर्य्यादमन्त्रवित्॥
यदि कुर्य्याज्जपादीनि मोहादज्ञानतोऽपि वा।
तयोसारेण मन्त्रेण स्वयमेव विनश्यति॥

तथा,—

आर्द्रायां शान्तिकर्म्माणि आयुष्यं वैष्णवे तथा।
शान्तिकर्म्माभिचाराणामपमृत्युं जयं तथा॥
त्रिषूत्तरासु पूर्व्वासु जन्मर्क्षेष्वपि च त्रिषु।
सम्यक् कर्म्म च [1]मैत्रेषु कान्यान्यपि च कारयेत्॥
आत्मनश्चानुकूलेषु शान्तिकर्म्माणि कारयेत्।
परस्य प्रतिकूलेषु विद्वेषोच्चाटनादिकम्॥
सर्व्वदा नियताहारो जपेन्मन्त्रं समाहितः।
शान्तये सर्व्वरोगाणां तथैवानुद्भवाय च॥

तथा,—

अथवाऽनेन मन्त्रेण पावमानीभिरेव वा।
ज्वररोगग्रहादीनां [2]सर्व्वेषामपि शान्तये॥
अथवा तर्पणं कुर्य्यान्मन्त्रपूर्व्वोक्तसंख्यया।
नद्यां समुद्रगामिन्यां तड़ागेषु सरित्सु च॥

तर्पणञ्च ऋष्यादिन्यासपूर्व्वकं जले त्र्यम्बकपूजापूर्व्वकम्।

(१) P. मैत्रेण ०।

(२) P. सर्व्वेषामेव ०।

त्र्यम्बकं ध्यात्वा त्र्यम्बकमन्त्रान्ते तर्पयामि नम इति प्रयोगेण देवतामुखेऽमृतबुद्ध्या जलप्रक्षेपः।

अथास्य होमविधिः।

आदौ विनायकं पूज्य पुण्याहं वाचयेत् ततः।
अथवा चतुरस्रे तु सर्व्वकर्म्माणि कारयेत्॥

इति वचनात् चतुरस्रं सत्रिमेखलं कुण्डम्।

औपासनाग्निमानीय तस्मिन् कुण्डे विनिक्षिपेत्।
अथवा श्रोत्रियागारान्मथित्वा वा समाहितः॥
औपासनेन कुर्व्वीत विद्वेषोच्चाटनादिकम्।
बहवो यदि होतारः शान्तिके पौष्टिके तथा॥
लौकिकेऽग्नौ तदा होमो गृह्येऽग्नौ न कदाचन।
कुण्डस्य पुरतो विद्वान् देवदेवं त्रियम्बकम्॥
आत्माभिमुखमासीनं ध्यात्वा सम्यक् प्रपूजयेत्।
अर्च्चयेल्लोकपालांश्च प्रागारभ्य प्रदक्षिणम्।
तेषामनुचरांश्चैव कुण्डमध्ये हुताशनम्॥

कुण्डपूर्व्वे वेद्यां त्र्यम्बकपूजनम्। कुण्डाष्टदिक्षु शक्रादिपूजनम्। इन्द्रानुचरेभ्य इत्यादिनानुचरपूजनम्। अग्निस्वरूपं तत्रैव।

सप्तहस्तश्चतुःशृङ्गः सप्तजिह्वो द्विशीर्षकः।
त्रिपात्प्रसन्नवदनः सुखासनसमन्वितः॥

स्वाहा दक्षे। वामे स्वधा। दक्षिणहस्तेषु शक्तिमन्नं स्रुवं स्रुचम्। वामे चामरं व्यजनं घृतपात्रम्। एवं ध्यात्वा

पूजनं होमश्च। कुण्डस्य पूर्व्वदिग्भागे कालीजिह्वा। आग्नेय्यां कराली। दक्षिणे लोहिता। नैर्ऋत्यां मनोजवा। पश्चिमे धूम्रवर्णा। वायव्यां स्फुलिङ्गिनी। सौम्ये विश्वरुचिः। काल्यां कराल्यां वा शान्तिकपौष्टिकम्। लोहितायां भूतप्रेतादिशान्तिः[1]। वृष्टिकामे धूम्रायां। स्फुलिङ्गिन्यामुच्चाटनम्। विश्वरुचिजिह्वायां सर्व्वसाधनम्। ईशाने वसुधारेत्युपजिह्वा तत्र श्रीकामहोमः। कुण्डस्य मध्यभागोऽग्नेरास्यं तत्र सर्व्वाणि कर्म्माणि। तत्रैव दिग्भेदेन जिह्वाभेदाः। अत्र च शान्तिकपौष्टिकसामान्यप्राप्तकलशस्थापनम्। पूर्णाहुतिश्च मूर्द्धानमिति मन्त्रेण। अन्ते च सुरास्त्वामभिषिञ्चन्त्वित्यादिनाभिषेकोऽपि कार्य्यः।

तत्र कृत्वाज्यभागान्तं सर्व्वमुल्लेखनादिकम्।
स्वगृह्योक्तविधानेन ततो होमं समाचरेत्॥

इति वचनात् गृह्योक्तविधिप्रवृत्तिः। [2]तत्प्रवृत्त्या च देवीपुराणोक्तवैदिकाग्निसंस्कारविधिप्रवृत्तिः। न चाज्यभागानन्तरमितिवचनात् वैकल्पिकाग्निपक्षे च व्याहृत्यहेतुत्वान्न वैदिकाग्निप्रवेशः। लिङ्गमात्रस्यासाधकत्वात्। अनुवादत्वेनाज्यभागयोरन्ते यो व्याहृत्यादिहोमः(?)। तदुपलक्षणत्वात्। आज्यासादनं कृत्वेत्यत्र यथाज्यासादनपदम्। आत्मालम्भोपलक्षणमेव [3]मन्त्रेति।

---

(१) मनोजवायां कार्य्यं कर्म्म नोक्तम्। सं
(२) P. तत्र प्रवृत्त्या च ०।
(३) P. मन्त्रमिति।

ब्राह्मणान् भोजयेन्नित्यं वेदवेदाङ्गपारगान्।

इति वचनात्। यावद्दिनानि होमस्तावद्दिनानि बहुब्राह्मणभोजनम्।

तथा,—

आरोग्यकामो [1]जुहुयादर्ककाष्ठैर्घृतप्लुतैः।
पलाशसमिधैर्वापि सर्व्वरोगोपशान्तये॥
सर्व्वरोगप्रशान्तिः स्याद् रोगाणां वाप्यनुद्भवः।

अथ काम्यानि।

श्रीकामोविल्ववृक्षस्य समिद्भिरथवा फलैः।
पत्रैर्वा जुहुयान्मासं गोकामः पयसैव तु॥
विद्याकामः क्षीरभोजी रुद्राक्षैराज्यसंप्लुतैः।
अन्नादिकामो जुहुयादन्नमेव घृतप्लुतम्।
पलाशसमिधैर्हुत्वा ब्रह्मवर्चसमाप्नुयात्॥

वृष्टिकामः—आपोहिष्ठा। हिरण्यवर्णा। पावमानीभिर्देवं संस्नाप्य त्र्यम्बकेण षोड़शोपचारेण सम्पूज्य प्रणिपत्य पयोऽक्तवेतसैरयुतं जुहुयात् पयसा वा। दशाहान्ते वृष्टिर्भवति। ब्राह्मणभोजनम्। पुण्याहवाचनम्।

आर्द्रवासाः पयोभक्षः क्षीरवृक्षसमुद्भवैः।
समिद्भिर्जुहुयान्मन्त्री सद्योवृष्टिमवाप्नुयात्॥
पुत्रकामस्तु जुहुयात् पायसं घृतसंप्लुतम्।
चरुशेषं स्वयं भुक्त्वा पुत्रमाप्नोति मानवः॥

---

(१) P. जुह्वयाद्दिड़िकाष्ठै॰।

गोमयोपलिप्तगोचर्म्ममात्रभूभागे धान्यराशिं कृत्वा तत्र सितवस्त्रसितसूत्रचन्दनपञ्चपल्लवादि[1]युतजलपूर्णं विंशतिकलशं संस्थाप्य [2]प्रत्येकं तानभिमन्त्र्य ततस्तेन त्र्यम्बकेण बन्ध्यां स्त्रियमभिषिञ्चेत्। अचिरादायुष्मत्पुत्रलाभः।

यद्वर्णं जुहुयात् पुष्पं तद्वर्णं वस्तुमाप्नुयात्।
धान्यहोमेन धान्यानि लाजैः कन्यामवाप्नुयात्॥

अष्टोत्तरसहस्रमिति पायसहोमेन गुड़संयुतक्षशरहोमेन वा हविः शेषभोजनसहितेन देवताप्रत्यक्षा वरं ददाति।

इच्छन् लोकं वशीकर्त्तुं नक्षत्रे रुद्रदैवते।
घृतोदनेन जुहुयादष्टोत्तरसहस्रकम्॥
शमीसमिद्भिरथवा घृताक्तैस्तिलसर्षपैः।
अपामार्गसमिद्भिस्तु मधुत्रितयसंयुतैः॥
हुत्वा तद्भस्म [3]संमृज्य अष्टोत्तरशतं जपेत्।
भस्मनानेन संस्पृष्टाः सर्व्वे वश्या भवन्ति हि॥
पलाशसमिधैर्हुत्वा सर्व्वान् कामानवाप्नुयात्॥
परविद्वेषणं कर्त्तुं करवीरसमुद्भवैः।
समिद्भिर्जुहुयान्मासं मिथो विद्वेषणं भवेत्॥
शत्रोरुच्चाटनार्थन्तु नक्षत्रे रुद्रदैवते।
करवीरसमिद्भिस्तु तैलेनाक्तैर्घृतेन वा॥

---

(१) P. पूतजलपूर्णविंशति॰।

(२) P. प्रत्येकमनभिमन्त्र्य।

(३) A. संस्टह्य।

अष्टोत्तरसहस्रन्तु हुत्वैवोच्चाटनं भवेत्।
काकपञ्जरहोमेन काकवद् भ्रमते रिपुः॥
उन्मत्तसमिधैर्होमादुन्मादो जायते रिपोः।
तत्सर्व्वं नैव कर्त्तव्यं ब्राह्मणेन विजानता।

वशिष्ठः,—

सर्व्वदेवपवित्राणि वच्याम्यहमितः परम्।

अघमर्षणम्। देवकृतम्। अस्मच्छाखायां यद्देवादेवहेलनमित्यृचः। आपोहिष्ठेति तृचम्। नमस्ते रुद्र इत्यध्यायः। हंसः शुचिषदित्यृक् विमलसंज्ञकः। शिवसङ्कल्पसंज्ञको यज्जाग्रत इति मन्त्रः। पावमानीसंज्ञकाः पुनन्तु मा इत्याद्या नवर्चः। पुरुषसूक्तसंज्ञकः सहस्रशीर्षेत्यध्यायः। अप्रतिरथसंज्ञक आशुः शिशानो इत्यनुवाकः। आरण्याख्यं ऋचं वाचं इत्यध्यायः। सुक्रियाख्यो विश्वानि देव सवितरित्यध्यायः। आदिरन्तश्च देवदानवाना(?)मिति। एषामेकैकस्येति वचनादेषामेकवारजपः सर्व्वपापक्षयार्थः। चत्वारि शृङ्गा इति ऋचं शतं परिवर्त्तयेत्। अगम्यागमनात् पूतो भवति।

[१]हुत्वा होमानिमान् सर्व्वान् त्रिः पठेदघमर्षणम्।
यथाश्वमेधावभृथस्तथा तन्मनुरब्रवीत्॥

मुञ्चन्तु मा शपथ्यादिति रहस्यो मन्त्रः सर्व्वपापप्रणाशनः। यजुर्विधाने,—

(१) P. हुत्वा लोकानि मातृर्वा त्रिः पठेदघमर्षणम्।

इदमापः। सुमित्रिया नः। [१]अप्राप्तं (?)। द्रुपदादिव। पुनर्मनः। दधिक्राव्णः। षण्मन्त्राः पापनाशनाः। चतुःस्वस्ति। पयः पञ्च। षट् विष्णो। द्वादशदेवताः।

अष्टौ शान्तिं प्रकुर्व्वीत पुनर्जन्म न विद्यते।

चतुःस्वस्ति—स्वस्ति न इन्द्र इति मन्त्रः। पयः पञ्च—पयः पृथिव्यामित्यादिको मन्त्रः। षट् विष्णो—विष्णो रराटमसीति मन्त्रः। द्वादशदेवता—अग्निर्देवता इत्यादिको मन्त्रः। अष्टौ शान्तिः—द्यौः शान्तिरित्यादिको मन्त्रः।

हिरण्यगर्भः। यः प्राणतो। ब्रह्मयज्ञानां। मही द्यौः। उपश्वासय। अग्ने नय। या ते घर्म्म। अग्नये स्वाहा। इत्यष्टौ जप्त्वा स्वरूपकृताया ब्रह्महत्याया मुच्यते। स्वरूपकृताच हत्या साक्षाद्वधरूपा।

वाजे वाजे वत। विमुच्यध्वम्। एतज्ज्ञानाय। आयन्तु नः। घृतेनाञ्जन्। यद्वविष्यम्। परं मृत्योः। [२]इत्यष्ट जप्त्वा सर्व्वपापैः प्रमुच्यते।

सुक्रियारण्यकजपो गायत्र्याश्च विशेषतः।
सर्व्वपापविनाशाय रुद्रैकादशिनी तथा॥

रुद्रैकादशिनी वक्ष्यते।

अग्ने वागिति ज्वलनादि हंकारान्तं (?) जले स्थित्वा मन्त्रं जपेत्।

(१) P. अयादयं (?)।
(२) मन्त्रास्तु सप्त दृश्यन्ते। सं

उपपातककोट्यस्तु भ्रूणहत्यार्बुदानि च।
ब्रह्महत्यादिकं पापं सर्व्वं नश्यति तत्क्षणात्॥

देव सवितरित्यध्यायं जप्त्वा सर्व्वैः क्रतुभिरिष्टं यथोक्तफल[1]माप्नुयात्। सहस्रशीर्षेत्यध्यायं जप्त्वा गुरुतल्पगो मुच्यते।

पौरुषं सूक्तमावृत्य मुच्यते सर्व्वपातकैः।
सुरापो ब्रह्महा चैव तथैव गुरुतल्पगः॥
पापेभ्यो विप्रमुच्यन्ते जप्त्वा [2]सूक्तन्तु पौरुषम्।

विष्णुधर्म्मोत्तरे,—

पौरुषेण तु सूक्तेन प्राणायामो महाफलः।

नरसिंहपुराणे,—

एतत् पठन् केवलमेव सूक्तं
दिने दिने भावितविष्णुबुद्धिः।
स सर्व्वदुःखानि विहाय वैष्णवं
पदं प्रयात्यच्युततुष्टिकृन्नरः॥

यजुर्विधाने,—तद्देवेत्यध्यायं जप्त्वा नान्यतरः स हि योगी भवति। नान्योऽस्य तुल्यः [3]श्रेष्ठो भवतीत्यर्थः। अपेत इत्यध्यायं जप्त्वा अपमृत्युं जयति। सर्व्वशान्तिमृचं वाचमिति द्विरावृत्तं जपेत् मातृपितृभ्रातृदुहितृपुत्रैः कृतात् पापान्मुच्यते। देवस्यत्वेत्यध्यायं जप्त्वा धेनुशतदानफलं प्राप्नोति। स्वाहा प्राणेभ्य इत्यध्यायं जप्त्वा

(१) P. माप्नोति।
(२) P. सूक्तञ्च।
(३) A. श्रेष्ठत्वे।

संहिताजपस्य फलं प्राप्नोति। ईशावास्यमध्यायं जप्त्वा कुरुक्षेत्रे सन्निहितफलं प्राप्नोति। तथा,—उद्वयमित्यादित्योपस्थानेन पापनाशनम्। विश्वानि देव सवितरित्यादित्योदयकाले उपतिष्ठेत विपापो भवति। उदकशक्ताहारो जपेन्मासमेकं सहस्रब्रह्महत्याया मुच्यते। असि यमो इति तिलाहुतीनां मधुसहितानां सहस्रं [1]जुहुयात् तद्देवतं मासं तथैवार्चयेद् विपापो भवति। ब्रह्मघ्नमपि लक्षहोमेन तारयेत्। अथ महापातकसंयुक्तः पञ्चगव्याहारः गोष्ठमध्येऽग्निमुपसमाधाय गोमयेनावलिप्ताङ्गः कुष्माण्डा इत्यृचं अयुतं जप्त्वाऽष्टसहस्रं जुहुयाद् विपापो भवति। अपाघमित्यपामार्गहोमः सर्व्वपापप्रणाशनः। दुःस्वप्ननाशनः। देवा यज्ञमतन्वतेति ब्राह्मणानुवाकं जप्त्वा ब्रह्मलोकमवाप्नोति। उदुत्यमिति सप्तावर्त्तेन आदित्योपस्थापनं पुरुषस्य दुष्कृतमपि हरति। सुरावन्तमिति चतुर्ऋचेन पौर्णमास्यां संवत्सरं [2]सोममुपतिष्ठेत ब्राह्मणाय गां दत्वा क्षिप्रं सोमयाजी भवति। पितृभ्यः स्वधायिभ्य इत्यनुवाकशेषेणोत्तरेण चानुवाकेन श्राद्धे जप्तेन [3]पितॄणामक्षया तृप्तिर्भवति।

रुद्रजपविधिः।

यजुर्विधाने,—

(१) P. जुहुयाद्देव तं मासं।
(२) P. सोममुपतिष्ठेद् ब्राह्मणाय्यं दत्वा भुञ्जीत क्षिप्रं ०।
(३) P. पितॄणामक्षय्या ०।

रुद्रजापी शुचिः पुण्यः पवित्रः पंक्तिपावनः।
कुलं तारयते भक्त्या दश पूर्व्वान् दशावरान्॥
एकतः सर्व्वशास्त्राणि रुद्रजापी तथैकतः।
रुद्रजापिहुतं दत्तं तदानन्त्याय कल्पते॥
एकादशगुणान् वापि रुद्रानावर्त्त्य धर्म्मवित्।
महापातकयुक्तोऽपि मुच्यते नात्र संशयः॥

कालिकापुराणे गायत्रीविधानानन्तरम्,—

यः पुनः सततं भक्त्या अभ्यर्च्य शशिशेखरम्।
जपेत् ध्यायेत् सदा रुद्रं सोऽपि याति परं पदम्॥
अथेहते फलं किञ्चिदैहिकं पुष्कलं यदा।
तदा तानेव [1]विप्रेन्द्र जपेद् वै विधिपूर्व्वकम्॥

तथा,—

रुद्रेभ्यश्च परं नास्ति जपे ध्याने परन्तप।
जपो दानञ्च तीर्थानि तस्मात् तानि च योऽभ्यसेत्॥
लब्ध्वा जन्म पुरः प्राप्य रुद्राद् वै ब्राह्मणोत्तमः।
भारते कर्म्मभूमौ च मनसा किं स तप्यति॥
बहवस्तन्मया जाता जप्त्वा रुद्रान् पुनः पुनः।
तेजस्विनो महावीर्य्या रुद्रा रुद्रपरायणाः॥

तथा,—

लिङ्गार्चनं रुद्रजपो व्रतं शिवदिनत्रये।
वाराणस्याञ्च मरणं मुक्तिरेषा चतुर्विधा॥

(१) A. पुत्रेन्द्र०।

शिवदिनत्रयम्,—

एकादश्यष्टमी चैव चतुर्द्दशी शिवप्रिया।
तासामाद्यासूपवसेद् दिवा नाद्यात् तथान्ययोः॥

रुद्रजपश्च त्रिधा एको यजुर्विधानरीत्या द्वितीयः कालिकापुराण-रीत्या तृतीयश्च बौधायनरीत्या। तत्र यजुर्विधानोक्तप्रकारे तदुक्तशरीरशुद्धिपुरश्चरणादिकं कृत्वा जपारम्भः।

अथ ऋष्यादिन्यासः।

यजुर्विधाने,—अघोर ऋषिः रुद्रो देवता गायत्र्यादीनि छन्दांसीत्युक्तम्। अनुक्रमण्यान्तु परमेष्ठी ऋषिः देवा वा प्रजा-पतिर्वा मानोदये कुत्सः[1] (?)। आद्यानुवाकस्य प्रथमा गायत्री तिस्रोऽनुष्टुभः तिस्रः पंक्तयः सप्तानुष्टुभः द्वे जगत्यौ मध्ये सर्व्वाणि यजूंषि। नमो हिरण्य इत्यादयस्तिस्र उभयतो नमस्काराः[2]। अन्त्यानुवाके आद्योपरिष्टाद् बृहती द्वितीया जगती द्वे त्रिष्टुभौ द्वे अनुष्टुभौ दशानुष्टुभः। त्रयो यजूंषि आद्ये अनुवाके। एक-रुद्रो देवता। अन्त्यानुवाके सप्तस्वेकरुद्रो देवता। शेषेषु बहवो रुद्रा देवता। जपादौ विनियोगः। शिवसङ्कल्पो हृदयम्। पुरुषसूक्तं शिरः। उत्तरनारायणं शिखा। अप्रतिरथं कवचम्।

(१) P. Adds here अन्त्यानुवाके जगत्याकुत्सः।
(२) P. Adds here अन्त्येऽन्यतरतो नमस्काराः।

शतरुद्रीयमस्त्रम्। वयं सोमेत्यनुवाकश्चात्र शिवसङ्कल्पश्चात्र माध्यन्दिनोक्तं यज्जाग्रत इत्यादि षड् ऋचम्। उत्तरनारायणं अद्भ्यः सम्भृत इत्यादि षडृचम्। आशुः शिशानो इत्याद्यप्रतिरथं सप्तदश कण्डिकाः। शतरुद्रीयं रुद्राध्यायः समस्तः वयं सोमेत्यनुवाकसहितः अस्त्रम्।

तथा,—

या ते रुद्रेति शिखायाम्। अस्मिन् महत्यर्णवे इति शिरसि। असंख्याता इति ललाटे। त्र्यम्बकमिति नेत्रयोः। नमःक्षतायेति कर्णयोः। मानस्तोके इति नासिकायाम्। अवतत्येति मुखे। नीलग्रीवा इति कण्ठे। नमस्त आयुधायेति वाह्वोः। नमो वः किरिकेभ्यो इति हृदये। हिरण्यगर्भ इति नाभ्याम्। ये वृक्षेषु कट्याम्। नमो वृक्षेभ्यो इति पृष्ठे। इमा रुद्राय इति गुह्यस्थाने। मा नो महान्तमित्युर्व्वोः। एष ते रुद्रेति जानुनोः। ये यथा (?) इति पादयोः। अध्यवोचदिति कवचे। नमो बिल्मिन इत्युपकवचे। कवचपार्श्वे इत्यर्थः। नमोऽस्तु नीलग्रीवायेति तृतीयनेत्रे। प्रमुञ्च धन्वन इत्यस्त्रम्। एतावन्तमिति दिग्बन्धः। मा नो महान्तमित्यावाहनम्। रुद्र इहागच्छेति वदेत्। मा नस्तोकइत्यर्चनम्। आवाह्य पूजादिना। देहे रुद्राय नम इति पूजा। चत्वारि शृङ्गेति पुरश्चरणम्। अस्य मन्त्रस्य यथाशक्ति जप इत्यर्थः। एष ते इति मुद्रा। शैवमुद्रां दर्शयेत्। इति प्रथमोन्यासः। ॐ नमो भगवते रुद्रायेति शरीरे न्यासः। समस्तस्यास्य न्यासा-

नन्तरं व्यस्तस्य। यथा—ॐकारस्य मूर्द्ध्नि। नकारं नासिकयोः। मोकारं ललाटे। भकारं मुखमध्ये। गकारं कण्ठे। वकारं हृदि। तेकारं दक्षहस्ते। रुकारं वामहस्ते। द्राकारं नाभौ। यकारं पादयोः। इति द्वितीयोन्यासः। बौधायनोक्तरीत्या तृतीयोन्यासः। सद्योजातमिति पादयोः। वामदेवाय नम इत्युरुमध्ये। अघोराय इति हृदये। तत्पुरुषाय इति मुखे। ईशानः [1]सर्व्वदेवानामितिमन्त्रान्ते हंस हंस इत्युक्त्वा शिरसि। इति तृतीयो न्यास इत्युक्तः।

त्रातारमिन्द्रम्। त्वन्नो अग्ने। सुचान्नुपन्याम्(?)। असुन्वन्तम्। तत्वायामि। आनोनियुद्भिः। वयंसोम। तमीशानम्। अस्मे रुद्राः। स्योनापृथिवी। इत्येतैः प्रतिदिक्षु सम्पुटम्। अस्मे रुद्रा इत्युपरि। स्योना पृथिवीत्यधः। बौधायने दिग्बन्धनानन्तरं चतुर्थो न्यास उक्तः। मनोज्योतिर्जुषतामाज्यं। विच्छिन्नं यज्ञं समिमं दधातु। या इष्टा उषसो या अनिष्टाश्च ताः सन्दधामि हविषाघृतेन इति गुह्ये। अबोध्यग्निः समिधा जनानां प्रतिधेनुमिवायतीमुषासम्। यह्वा इव प्र वयामुज्जिहाना प्र भानवः सिस्रते नाकमच्छ इत्युदरे। मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानर मृत आ जातमग्निम्। कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः। इति हृदये। मर्म्माणि ते वर्म्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्तां। उरोर्वरीयो वरुणस्ते

(१) P. सर्व्वविद्याना०।

कृणोतु जयन्तं त्वानु देवा मदन्तु । इति मुखे । जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोऽसि । शं प्रजाभ्यो यजमानाय लोकम् । ऊर्जं पुष्टिं ददद्भ्यावहृत्स्व । इति शिरसि ।

इति चतुर्थो न्यासः ।

शिवसंकल्पादिन्यासेन सह पञ्चन्यासा । [1]पञ्चाङ्गानां रुद्राणां न्यासपूर्व्वकमित्यनेनोक्तः । अथात्मनो रुद्ररूपत्वेन ध्यानम् । त्रिनेत्रं चतुर्भुजं सर्व्वाभरणभूषितं नीलग्रीवं शशिशेखरं स्फटिकाभं [2]नागयज्ञोपवीतिनं व्याघ्रचर्म्मोत्तरीयं कमण्डल्वक्षसूत्राभयवरत्रिशूलहस्तं कपिलजटं अमृतप्लुतं दिग्देवतासमावृतं सुरासुरैर्नमस्कृतम् ।

नित्यञ्च शाश्वतं [3]शुद्धं ध्रुवमक्षरमव्ययम् ।
अव्यक्तं विश्वरूपिणमिति ध्यात्वा पूजारम्भः ।

सुगुप्ते पुण्यदेशे गोचर्म्ममात्रलिप्ते स्थण्डिले पञ्चवर्णेन पद्मं कृत्वा तत्र लिङ्गं स्थापयित्वा पूजोपकरणं स्थापयित्वा अर्घ्यसंस्कारादिकं कृत्वा नमः शम्भव इति मन्त्रेण प्रोक्षणं सर्व्वद्रव्याणाम् । ततः स्वललाटे ज्योतीरूपं रुद्रं ध्यात्वा मा नो महान्तमिति मन्त्रं जप्त्वा प्लुतं प्रणवमुच्चार्य्य ॐ रुद्र इहागच्छ इहतिष्ठेति लिङ्गे तस्यावाहनम् । मा नस्तोक इति मन्त्रेण नमः शम्भव इति

(१) P. पञ्चाङ्गरुद्राणाम् । ०

(२) P. नागयज्ञोपवीतं ० ।

(३) P. सिद्धम् ।

मन्त्रेण द्वाभ्यां वा पाद्यार्घ्याचमनीयमधुपर्कस्नानवस्त्रयज्ञोपवीतालङ्कारगन्धपुष्पधूपदीपनैवेद्यैर्यथालाभं पूजनम् । ॐ नमो भगवते रुद्रायेति नमस्कारः । हिरण्यगर्भः । यः प्राणतो । ब्रह्म यज्ञानां । मही द्यौः । उपश्वासय । अग्ने नय । या ते अग्ने । यज्ञीयातन्वा (?) । यथा वा स्वाहाग्नये । इत्यष्टमन्त्रैः प्रणामः । एवं पूजापूर्व्वकं जपहोमादयः कर्त्तव्याः । अन्ते चाष्टाङ्गैः प्रणम्य विकिरेदिति विसर्जनम् ।

एकैकस्यैकादशधा रुद्रानावर्त्त्य धर्म्मवित् ।
महापातकयुक्तोऽपि मुच्यते सर्व्वपातकैः ॥

एकैकस्यैकादशधेति चमकयोगं विनापीत्यर्थः । यद्वा पञ्चाङ्गावृत्तिं विना केवलस्येत्यर्थः । तथातुरार्त्तः सकृज्जप्ते सुस्थो भवति । विनायकोपसृष्टकाकबन्ध्यापुत्त्रहीनमृतवत्सानां दोषशान्तयेऽभिषेकः । शुभदिने सहिरण्यवस्त्रसर्व्वौषधिफलमूलपञ्चपल्लवोपेतगन्धतोयपूरितकलशैकादशस्थापनम् । एकस्य कलशस्य रुद्रैकादशवारजपेनाभिमन्त्रणम् । तेनोपसृष्टस्याभिषेकः । एवं प्रतिदिनं रुद्रैकादशवारजपकलशेन तस्यैवैकादशदिनपर्य्यन्तमभिषेकः । एवमेकादशदिनैरेकैककलशाभिषेकेण एकादशकलशाभिषेकः । तत्तद्दोषप्रशान्तये रुद्राध्यायं मानस्तोकीयं वा ।

कालिकापुराणोक्तविधिः ।

आदौ कृच्छ्राचरणम् । [1][ततः पराकः ।] तदसम्भवे

(१) P. Omits the portion bracketed.

तत्प्रत्याम्नातधेनुदानम्। गायत्रीजपो वा। शुभदिने महादेवं ध्यात्वा पूजनम्। सप्तदिनपर्य्यन्तमावश्यकं कृत्वान्तरालकाले [1]रुद्रजपकरणम्। प्रतिदिनं पयोभक्षो वा हविष्यभोजी वा अष्टमदिने घृतमात्रप्राशनम्। नवमदिने भास्कराभिमुखस्य पुनारुद्रजपो बहुकृत्वः। तदपरदिने घृताक्तविल्वपत्रैः समस्तेन रुद्रेण प्रतिमन्त्रं वा यथाशक्तिहोमः। एवं रुद्रस्य पुरश्चरणं कृत्वा प्रयोगः। सकृद्रुद्रजपेन ससागरपृथ्वीदानफलप्राप्तिः[2]। श्रीकामस्य विल्ववृक्षं स्पृष्ट्वा जपे सुवर्णलाभः। मध्वाक्तवेतससमिद्धोमो महाधनलाभाय। वशीकरणकामस्य नाभिमात्रजले स्थित्वा रुद्रजपः। यश्चादित्याभिमुखो रुद्रमभ्यर्च्य रुद्रं बहु जपेत् तस्य रुद्रः स्वयं वरद आयाति। रुद्रकालं ध्यात्वा सप्तदिनं रुद्रं जपेत् शत्रुक्षयः। भूतप्रेतपिशाचराजचौरव्याघ्रादयो रुद्रं जपन्तं दृष्ट्वा पलायन्ते।

बौधायनोक्तानुसारेण रुद्राभिषेकविधिः।

तस्य फलमाह बौधायनः—पापक्षयार्थी व्याधिविमोचनार्थी जीवनार्थी श्रीकामः पुष्टिकामो मोक्षार्थी च कुर्य्यात्। तीर्थे स्नातः शुचिः शुक्लवासाः दक्षिणाप्रत्यग्देशे तन्मुखः स्थित्वा देवाभिमुखः पूर्व्वोक्तपञ्चन्यासानन्तरं षष्ठन्यासः। प्रजनने ब्रह्मा तिष्ठतु पादयोर्विष्णुस्तिष्ठतु हस्तयोर्हरस्तिष्ठतु बाह्वोरिन्द्रस्तिष्ठतु जठरेऽग्निस्तिष्ठतु हृदये शिवस्तिष्ठतु कण्ठे शर्व्वस्तिष्ठतु

(१) P. रुद्रप्रकरणम्।

(२) P. Adds एवं सर्व्वयज्ञसर्व्वतीर्थफलप्राप्तिः।

वक्त्रे सरस्वती तिष्ठतु नासिकयोर्वायुस्तिष्ठतु नयनयोः सूर्य्याचन्द्रमसौ तिष्ठेतां कर्णयोरश्विनौ तिष्ठेतां ललाटे रुद्रास्तिष्ठन्तु मूर्द्धनि आदित्यास्तिष्ठन्तु शिरसि महादेवस्तिष्ठतु पुरतः शूली तिष्ठतु पृष्ठे पिनाकी तिष्ठतु पार्श्वयोः शिवशङ्करौ तिष्ठेतां सर्व्वतो वायुस्तिष्ठतु ततो वह्निः सर्व्वतोज्ज्वालामालापरिवृतोऽग्निस्तिष्ठतु सर्व्वाङ्गेषु सर्व्वदेवता यथास्थानं तिष्ठन्तु। ततः अग्निर्मेवाचि श्रितः वाक् हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणि। इति वाचं स्पृशेत्। वायुर्मे प्राणे श्रितः प्राणो हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति [1]नासां स्पृशेत्। सूर्य्यो मे चक्षुषि श्रितः चक्षुर्हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति चक्षुस्पर्शनम्। चन्द्रमा मे मनसि श्रितः मनो हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति वक्षसि। दिशो मे श्रोत्रे श्रिताः श्रोत्रं हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति श्रोत्रे। आपो मे रेतसि श्रिताः रेतो हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति गुह्ये। पृथिवी मे शरीरे श्रिता शरीरं हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति सर्व्वशरीरे। ओषधिवनस्पतयो मे लोमसु श्रिताः लोमानि हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति रोमकूपेषु। इन्द्रो मे बले श्रितः बलं हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति बाह्वोः। पर्जन्यो मे मूर्द्ध्निश्रितः मूर्द्धा हृदये हृदयं मयि अहममृते अमृतं

(१) P. नासायां।

ब्रह्मणीति मस्तके। ईशानो मे मन्यौ श्रितः मन्युर्हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति मन्युस्थाने हृदये। आत्मा मे आत्मनि श्रितः आत्मा हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणीति वक्षसि। पुनर्मे आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्। वैश्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः। इति सर्व्वशरीरे। ततः स्वदेहं रुद्ररूपिणं ध्यात्वा स्वदेहपूजनम्। तत्रावाहनमन्त्रः—

आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः।
आराधयामि भक्त्या त्वं मां गृहाण महेश्वर॥

त्र्यम्बकेण गन्धपुष्पाक्षतधूपदीपदानम्। मनसा नैवेद्यमपीति केचित्। एवं देहपूजानन्तरं वहिर्लिङ्गादौ पूजा।

आ त्वा वहन्तु हरयः सुचेतसः
श्वेतैरश्वैः सहकेतुमद्भिः।
वाताजवै [1]र्बलिभिर्मनोजवै-
रायाहि शीघ्रं मम हव्याय शर्व्व॥

इति मन्त्रान्ते सद्योजातं प्रपद्यामि रुद्र इहागच्छ इह तिष्ठेत्यावाहनम्। सद्योजाताय वै नमः रुद्रायासनं ददानीत्यासनम्। भवेभवे नातिभवे भजस्व माम्। रुद्राय पाद्यं ददानीति पाद्यदानम्। भवोद्भवाय नमः अब्लिङ्गाभिरापो हिष्ठेत्यादिभिश्च अर्घ्यः। अद्भिस्तर्पयति। भवं देवं तर्पयामि।

(१) P. बलवद्भि°।

शर्व्वं देवं तर्पयामि। रुद्रं देवं तर्पयामि। ईशानं देवं तर्पयामि। पशुपतिं देवं तर्पयामि। भीमं देवं तर्पयामि। तर्पयित्वा ज्येष्ठाय नम इत्याचमनं ददाति। श्रेष्ठाय नम इति गन्धम्। कलविकरणाय नम इति पुष्पम्। सर्व्वभूतदमनाय नम इति धूपम्। मनोन्मनाय नम इति दीपम्। भवोद्भवाय नम इति फलनैवेद्यम्। अथाष्टमन्त्रैरष्टपुष्पाञ्जलिं ददाति। भवाय देवाय नमः। शर्व्वाय देवाय नमः। पशुपतये देवाय नमः। रुद्राय देवाय नमः। उग्राय देवाय नमः। भीमाय देवाय नमः। महादेवाय देवाय नमः। अथास्याघोरतनुः। अघोरेभ्य इति उपतिष्ठते। अस्य रुद्रस्य अघोरात्मकं शरीरं अघोरेभ्य इत्यनेन मन्त्रत्रयेण उपतिष्ठते तद्यथा अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्व्वतः सर्व्वदेवेभ्यो नमोऽस्तु रुद्ररूपेभ्यः। तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्। ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मशिवोमेऽस्तु सदाशिव ॐ।

अथोपस्थानानन्तरं अथैतस्य मूर्द्ध्नि हिरण्येन कलशेन [1]सततधारामभिषिञ्चेत् मधुना पयसा सर्पिषेक्षुरसेन नारिकेलोदकेन वाऽम्ररसेन वा तदभावे उदकेन वा नमस्ते रुद्रमन्यव इत्येकादशानुवाकानामन्ते चमकानुवाकानामेकैकं जपेत्। सर्व्वेषां पारे पुनराराधयेदुत्तमाराधनेन तदेतद्विधानं प्रोक्तम्। अनुवा-

(१) P. सततं धारा°।

कानां सर्व्वेषामन्ते पुनरुक्तमाराधनेन पूर्व्वरीत्या पूजनम् । चमकानुवाकानामेकैकयोगेन एकादशावृत्तिर्वा । यद्यपि काखानां नवैव चमकानुवाकास्तथापि चरमानुवाकस्यावृत्त्या एकादशसंख्यां सम्पाद्य प्रतिरुद्रावृत्ति चमकानुवाकयोगं कृत्वैकादशधावृत्तिः कार्य्या । सर्व्वो वै । रुद्राय । नमोऽस्तु । नमो हिरण्यबाहवे । सद्योजातमिति पञ्चानुवाकानन्यांश्च रुद्रमन्त्रान् । यथाशक्तीत्येके । व्याधिविमोचनार्थे [1]विनियोगः । अद्भिर्व्यामित्यनुवाकेन तेनोदकेन पादान् सम्मृज्यात् । रोगिणमित्यर्थः । आचार्य्याय दक्षिणां ददाति दश गाः सवत्साः सुवर्णभूषिताः वृषभैकादशाः । तदभावे एकां गां दद्यादित्याह भगवान् बौधायनः ।

अत्र बौधायनः,—

षडङ्गैकादशा रुद्राः चमकानुवाकयोगतः ।
रुद्रस्यैकादशावृत्त्या रुद्रैकादशिनी मता ॥
एकादशभिरेताभि र्महारुद्रश्च कथ्यते ।
एकादशमहारुद्रैरतिरुद्र उदाहृतः ॥

अत्र रुद्रपदस्य काखतैत्तिरीयसाधारणचमकाध्यायवाचित्वाच्चमकस्यैकैकानुवाकयोगेन रुद्रस्यैकादशधावृत्तिरितिविहिते यथासङ्ख्यं क्रमेण प्रथमाद्वितीयाद्यावृत्तौ प्रथमाद्वितीयादि

(१) P. विशेषः ।

चमकानुवाकयोगकल्पनेन चरमावृत्तिद्वये [1]काखानां चमकानुवाकाभावेऽपि नवमानुवाकस्यैवावृत्त्या सम्बन्धकल्पना । न च तैत्तिरीयाणां चमकस्यैकादशानुवाकसम्भवेन तमादाय विध्युपपत्तौ नावृत्तिकल्पनया [2]काखविषयत्वं कल्प्यमिति वाच्यम् । न चैकं प्रतिशिष्यत इति शाखान्तराधिकरणेन च यत्काठकेऽग्निहोत्राङ्गं [3]तत्काठकीयमग्निहोत्रं प्रतिशिष्यत इति तैत्तिरीयस्य तदङ्गमेवेति व्याख्यानात्तेनैव न्यायेन रुद्रशब्दस्य काखरुद्रसाधारण्येन तदेकादशावृत्तौ चमकानुवाकयोगकल्पनादशायां पश्चात्प्रतीतगुणभूतचमकानुवाकेष्वावृत्तिकल्पनायाः प्रामाणिकत्वात् । अन्यथा प्रथमप्रवृत्तरुद्रपदे तैत्तिरीयरुद्रपदत्वे लक्षणा स्यात् । प्रधानत्वाच्च तत्र लक्षणा न युक्ता । यथा त्रयो वेदा अजायन्त [4]इत्युपक्रम उच्चै ऋचा क्रियते इत्यादिश्रवणे वेदपदस्य उपक्रमस्थत्वेनासञ्जातविरोधित्वान्न लाक्षणिकत्वमिति तदनुरोधेन ऋगादिपदमेव वेदलक्षणापरमित्युक्तम् । किञ्च यजुर्विधानेऽप्यथातः पञ्चाङ्गरुद्राणां न्यासपूर्व्वकं जपहोमार्च्चनविधिं व्याख्यास्याम इत्युपक्रम्य न्यासकथनात् न्यासत्रयस्य च

(१) P. काख्यानां चमकानुवाकानां भावेऽपि ० ।
(२) P. काख्यविषयत्वं ।
(३) P. तत्काठकेय ० ।
(४) P. इत्युपक्रम्य उच्चैरुपक्रियत इत्यादि ० । स्थत्वेनाज्ञजातविरोधित्वान्न०

कथनात् पञ्चाङ्गरुद्रपदस्य पञ्चसंख्यका येऽङ्गन्यासास्तत्परत्व-प्रतीत्या न्यासद्वयं बौधायनोक्तं गृह्यते। एवम्—

एकादशगुणान् वापि रुद्रानावृत्य धर्म्मवित्।

इत्याद्येकादशावृत्तिविधौ बौधायनोक्तचमकानुवाकयोग-कल्पने बाधकाभावात् भवत्येव काण्वानामपि चमकानुवाक-योगेन रुद्ररुद्रैकादशिनीमहारुद्रातिरुद्रप्रयोगः।

अत्रच जपहोमार्चनविधिं व्याख्यास्याम इति यजुर्विधाने होमप्रतिज्ञानात् तिलाक्षतसमिधो जुहुयादिति द्रव्यमात्रनिर्द्देशे-ऽपि होमप्रकारानिर्द्देशात् रुद्राध्यायेन समस्तेन होमः। अथवा प्रतिकण्डिकं कण्डिकापरिच्छेदस्य स्मार्त्तविनियोगपरत्वात्। तेन महारुद्रादौ दशांशेन प्रतिकण्डिकं होमः कर्त्तव्यः। एवं चमकानुवाकस्यापि प्रतिकण्डिकमिति। पक्षान्तराणां महार्णवे प्रमाणसत्वेऽस्तु नाम कल्पना।

श्रीकामस्य जपाः।

ऋग्विधाने,—

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
श्रियः पञ्चदशर्चञ्च श्रीकामः सततं जपेत्॥
अश्वदायि गोदायि धनदायि महाधने।
धनं मे जुषतां देवि सर्व्वकामार्थसिद्धये॥

हिरण्यवर्णमित्यादि पञ्चदशर्चस्य श्रीसूक्तस्य आनन्दविज्ञात-कर्दमेन्दिरासुता ऋषयः श्रीर्देवता आद्या स्तिस्रोऽनुष्टुभः

अन्त्या प्रस्तारपंक्तिः द्वे त्रिष्टुभौ सप्त आद्या अनुष्टुभः अन्त्या प्रस्तार पंक्तिः जपे विनियोगः। हिरण्यवर्णमित्यादि श्रीसूक्तं पञ्चदशर्चम्। श्रीमन्त्रोपासना पञ्चरात्रे,—

वान्तं वह्निसमारूढं वामनेत्रेन्दुसंयुतम्।
वीजमेतत् श्रियः प्रोक्तं चिन्तारत्नमिवापरम्॥
ऋषिर्भृगुर्निवृत्छन्दो देवता श्रीः समीरिता।

मं वीजं ऋं शक्तिः।

षड्दीर्घयुक्तवीजेन कुर्य्यादङ्गानि षट्क्रमात्॥
कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजै-
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम्।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्वलां
क्षौमाबद्धनितम्बविम्बललितां वन्देऽरविन्दस्थिताम्॥
भानुलक्षं जपेन्मन्त्री दीक्षितो विजितेन्द्रियः।
तत्सहस्रं प्रजुहुयात् कमलैर्मधुरोक्षितैः॥
जपान्ते जुहुयान्मन्त्री तिलैर्वा मधुराप्लुतैः।
विभूतिरुन्नतिः कान्तिर्दृष्टिः कीर्त्तिश्च सन्नतिः।
व्युष्टिरुत्कृष्टि ऋद्धिश्च रमाया नव शक्तयः॥
मूलेनैवासनं दद्यात् केशरेष्वङ्गकानि तु।
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः॥

इति दिग्दलेषु।

दमनकः सलिलश्चैव गुग्गुलश्च कुरुण्टकः।

इति गजान् विदिग्दलेषु। देव्या दक्षिणे स्वदयितया

शङ्खनिधिः । वामतः पद्मनिधिः स्वदयितासहितः । दलाग्रेषु बलाक्याद्याः । बलाकी । विमला । कमला । मालिका । विभीषिका । पालिका । शङ्करी । वसुपालिका ।

लोकपालान् यजेदन्ते वज्राद्यस्त्राणि तद्वहिः ।
इत्थं यो भजते देवीं श्रियमाप्नोत्यनिन्दिताम् ॥
वक्षःप्रमाणे सलिले स्थित्वा मन्त्रमिमं जपेत् ।
त्रिलक्षं संयतो मन्त्री देवीं ध्यात्वार्कमण्डले ॥
स भवेदल्पकालेन रमाया भवनं स्थिरम् ।
वैष्णवेऽहनि विल्वस्य मूलमासाद्य मन्त्रवित् ॥
त्रिलक्षं प्रजपेन्मन्त्रं वाञ्छितं लभते धनम् ।
श्रियोमन्त्रं जपेन्मन्त्री श्रीसूक्तमपि सञ्जपेत् ।
भूयसीं श्रियमाकाङ्क्षन् सत्यवादी भवेत्सदा ॥
प्रत्यगाशामुखोऽश्नीयात् स्मितपूर्व्वं प्रियं वदेत् ।
भूषयेद् गन्धपुष्पाद्यैरात्मानं नियतः सदा ॥
नग्नो नावतरेदप्सु तैलाभ्यक्तो न भक्षयेत् ।
हरिद्रां न मुखे लिम्पेत् पुष्पादिषु न संविशेत् ॥
[1]न वृथा विलिखेद् भूमिं न विल्वं द्रोणमम्बुजम् ।
धारयेन्मूर्द्ध्नि नाङ्गारलेपं तैलञ्च केवलम् ॥
मलिनो [2]न भवेज्जातु कुत्सितान्नं न भक्षयेत् ।

(१) P. न इच्चान् विलिखेद् भूमिं ० ।
(२) P. न भवेज्जन्तुः ० ।

स हि देवीमिन्द्रवर्न्नीं श्रीदेवीं विष्णुवल्लभाम् ॥
कन्यां जम्बूप्रवालञ्च शीलयेन्मूर्द्ध्नि सर्व्वदा ॥

वक्रतुण्डषडक्षरमन्त्रजपः ।

श्रीकामस्य ।

वक्रतुण्डाय हुमिति मन्त्रराजः षडक्षरः ।
ऋषिर्भृगुरनुष्टुपच्छन्दो देवो गणेश्वरः ॥

गणेशाय हृदयाय नमः । एकदंष्ट्रिणे शिरसे स्वाहा । लम्बोदराय शिखायै वषट् । चलत्कर्णाय कवचाय हुम् । गजवक्त्राय नेत्राभ्यां वौषट् । सर्व्वविघ्नोपशमनाय अस्त्राय फट् ।

लम्बोदरं त्रिनयनं पाशाङ्कुशधरं परम् ।
वरदाभयहस्तञ्च चलत्कर्णं सचामरम् ॥
द्रुतचामीकरप्रख्यं वक्रतुण्डं विनायकम् ।
चतुर्भुजं गजवक्त्रं प्रणमामि गणेश्वरम् ॥
एवं ध्यात्वा जपेन्मन्त्रं पुरश्चरणसिद्धये ।
मन्त्री द्वादशसाहस्रं हविरश्नन्नतन्द्रितः ॥
चित्तप्रसादो मनसश्च तुष्टि-
[1]रल्पाशिता स्तेयपराङ्मुखत्वम् ।
स्वप्ने गजानामुपलम्भनञ्च
सिद्धस्य चिह्नानि भवन्ति भूयः ॥

(१) P. रल्पश्रिता ० ।

नित्यं मम ध्यानपरो ममाग्रे
जपेत् सहस्रं त्रिशतं शतं वा।
अष्टोत्तरं मन्त्रविदप्रमत्तो
लभेत बह्वीमचिरेण लक्ष्मीम्॥
अङ्गारकदिने प्राप्ते चतुर्थ्याञ्च [1]विशेषतः।
अभ्यर्च्य गन्धपुष्पाद्यैर्हविषा पायसेन [2]माम्॥
भोजयेत् कार्य्यसिद्ध्यर्थं मन्त्रविद् वरदं शुभम्।
यथाग्निकुण्डं चतुरस्रं देवाग्रे हस्तसम्मितम्॥
आरण्येयं त्वाष्ट्रकुलाद् विप्रगेहाद्धुताशनम्।
कृत्वा तत्राङ्गविन्यासं प्राणानायम्य सर्व्वतः॥
पुष्पैर्विकीर्य्य दर्भैश्च परिस्तीर्य्य विनायकम्।
तत्र ध्यात्वार्चयित्वा च जलेनाग्नौ प्रसेचनम्॥
तारार्द्धेन षडन्तेन स्वाहान्तेनाथ होमयेत्।
आज्येनाष्टसहस्रञ्च सिद्धये कामसम्पदः॥

प्रत्यहं सिद्धौदनत्रिशतहोमो मासत्रयेण महानिधिप्राप्तिकरः।

तथा,—

यो वै ममाग्रे पृथुकैर्गुड़ाक्तैः
सनारिकेलैर्मरिचाज्ययुक्तैः।
अग्नौ सहस्रं जुहुयात् स मन्त्री
धनं लभेताक्षयमद्भुतञ्च॥

---

(१) P. समाहितः।
(२) P. च।

ब्रह्मप्रोक्ते गायत्रीकल्पे,—

ब्रह्मचारी मिताहारो यः सहस्रद्वयं जपेत्।
संवत्सरेण विप्रोऽसौ महदैश्वर्य्यमाप्नुयात्॥
त्रिरात्रोपोषितो भूत्वा घृतं हुत्वा सहस्रशः।
सहस्रं प्राप्नुयाद्धोमं हुत्वा वै खादिरेन्धनैः॥

विश्वामित्रकल्पे,—

श्रीकामो रक्तपद्मैश्च हुत्वा श्रियमवाप्नुयात्।
शालितण्डुलहोमाश्च समिद्भिः श्रीफलस्य वा॥
विल्वस्य सकलैर्हुत्वा पत्रैः पुष्पैः फलैरपि।
शतं शतञ्च सप्ताहं हुत्वा श्रियमवाप्नुयात्।
यवागूं ग्राममाप्नोति हुत्वा शालिसमन्विताम्॥

यजुर्विधाने,—द्रुणा इत्यौदुम्बरान् जुहुयाद्धनकामः। सजूरब्दो इत्याज्याहुतिसहस्रं जुहुयात् कुशपुष्पहस्तः सुवर्णमुत्पद्यते। तुभ्यन्तामङ्गिरः। अग्निः प्रियेषु। स्वस्ति न। इति त्रिभिः पलाशसमिधदधिमधुघृताक्तानां सहस्रं जुहुयात् कार्षापणानां शतसहस्रमुत्पद्यते। हिरण्यपाणिमूतये इत्यर्कसमिधामयुतं जुहुयात् सुवर्णमुत्पद्यते। श्रीश्चतइति सुगन्धिकुमुदोत्पलादीनां शतसहस्रं जुहुयात्। अप्सु प्रविश्य तावत् सहस्रं जपेत्। श्रीमान् भवति। उभावपितमश्विनोरित्यश्विनौ सुवन्नधिकतमां परमसमृद्धिं लभते।

त्र्यम्बकाधिकारे वशिष्ठः,—

अन्नाद्यकामो जुहुयादन्नमेव घृतप्लुतम्।

यजुर्विधाने,—अन्नपत इति सर्व्वोपकरणयुक्तानामन्नाहुतीनां शतसहस्रं जुहुयाद् यावज्जीवमन्नमक्षयं भवति। नदीप्रस्रवणं गत्वा स्थालीविधानविधानेनाग्निमुपसमाधाय औदुम्बरीणां समिधां अयुतं जुहुयाद् ग्राम्या व्रीहयोऽक्षय्या भवन्ति। विधृतिं नाभ्या इत्याज्याहुतीनामष्टसहस्रं जुहुयात्पर्य्याप्तां भूमिं लभते। इमं स्तनमिति समुद्रगां नदीं गत्वोदकमवतीर्य्यायुतं जप्त्वा सहस्रं जुहुयाद् ग्रामं लभते। अभ्यावर्त्तस्वेति तिलतण्डुलान् दधि-मधु-घृताक्तान् जुहुयात् ग्रामं लभते। नमो विधिः किरिकेभ्य इति उत्पलपद्मानां शतसहस्रं जुहुयाद् राजलक्ष्मीरुपतिष्ठते। राज्य-कामः पद्मसौगन्धिकोत्पलादीन् भगवती महेश्वरस्योभयचन्द-नाक्तान् शिरसि शतसहस्रमारोपयेत् सहस्राख्यस्य श्रीरुपेत्य भ्रातृतां भजति। तत्पुरुषादघोराद् वा प्रत्यमित्राणां वेति। (?) अनवक्रद्वि (?) तृतीयेन शतसहस्रेण साक्षादुपतिष्ठते। नमो हिरण्यवाहव इति राज्यकामः कुमुदसौगन्धिकोत्पलादीन् पूर्व्वकल्पेनारोपयेत् साक्षात् भगवती श्रीरुपतिष्ठते।

ब्रह्मोक्तगायत्रीकल्पे,—

आदित्याभिमुखो भूत्वा नाभिदघ्ने जले जपेत्।
हुत्वा राज्यमवाप्नोति लक्षं निर्वृत्तकण्टकम्॥

विश्वामित्रगायत्रीकल्पे,—

जपाद् विल्वं समाश्रित्य मासं राज्यमवाप्नुयात्।
विल्वं हुत्वाप्नुयाद् राज्यं समूलं यवपल्लवम्।
हुत्वा पद्मशतं मासं राज्यमाप्नोत्यकण्टकम्॥

मन्त्रराजाधिकारे भार्गवसंहितायाम्,—

अयुतं विल्वपत्राणां हुत्वा राज्यमवाप्नुयात्।

[1]चातुर्मास्यदशमीव्रतेषु सु(सौ)वर्णमिन्द्रं पूजयित्वा तं ब्राह्मणाय दत्वा राजा स्यात्।

हयशीर्षे लक्ष्मीप्रतिष्ठाधिकारे,—

तथैव राज्यकामानां सम्यग्राज्यफलप्रदम्।

भविष्ये पूजाधिकारे,—

राज्यं त्वष्टा च चित्रायां निःसपत्नं प्रयच्छति।
इष्टसन्तर्पितः प्रीतः स्वात्यां वायुः पुनः परम्॥

तथा,—

इन्द्राग्नी च विशाखायां रक्तैः पुष्पैः [2]प्रयच्छतु।
धनं राज्यं लभे देहतेजांसि च विशेषतः॥
दत्वा च राज्यलिङ्गानि राज्यमाप्नोत्यकण्टकम्।

राज्यलिङ्गानि छत्रचामरादीनि।

मेधाकामजपः। या मेधामिति नित्यं जपेन्मेधाकामः। मित्रं वो इति मेधाकामो घृतं जुहुयात् सहस्रसम्पाताभिहुतं संस्रवेणैव वचामालोड्य सप्ताभिमन्त्रितं कृत्वा पयः (पिवेत्)

---

(१) P. चातुर्मस्यव्रते,-दशमीषु सुवर्णमिन्द्रं पूजयित्वाऽन्ते तं ब्राह्मणाय दत्वा राजा स्यात्।

(२) A. प्रयच्छति।

पपरममेधावी भवति । [1]सदसस्पतिमिति स्रुवेणाज्याहुतीनां सहस्रं जुहुयान्मेधाकामः । वचामष्टसहस्राभिमन्त्रितं कृत्वा पिवेत् परममेधावी भवति । चिदसीति ऋचं सहस्रं जपेत् सहस्रोत्तरवादी भवति ।

वृष्टिकामप्रयोगाः ।

देवं वर्षयितुकामः उदुम्बरविल्ववेतसवारणादीन् दधि-मधु-घृताक्तानयुतं जुहुयान्महावर्षं करोति । व्यक्तवह (?) इत्यावहशब्दः प्लुतः कार्य्यः । आपो देवा इति देवं वर्षयितुकामः उदुम्बर-विल्ववेतसवारणादीन् दधि-मधु-घृताक्तानयुतं जुहुयाद् देवो वर्षति । अपां चाम्भ इति देवं वर्षयितुकामः उदम्बरविल्ववेतस-वारणानां घृताक्तानां जुहुयाद् वृष्टिर्भवति । अपः पिवन् वेति शिखण्डविल्ववेतसवारणानां दध्यक्तानां जुहुयान्महावृष्टिर्भवति असौ यस्ताम्र इति ऋग्द्वयेन देवं घृतेन क्षीरेण स्नापयेत् । प्रसन्नो भवति वर्षति च । वेतससमिधां घृताक्तानां अयुतं जुहुयान्महा-वृष्टिर्भवति । ऋण आनिति षडृचेनाज्याहुतिसहस्रं जुहुयाद् [2]वर्षति । विश्वस्य मूर्द्धन्निति देवं वर्षयितुकामः उदके प्रविश्य अहोरात्रं जपेद् वर्षति । अभित्वेति सप्तभिर्देवं वर्षयितुकामः उदके प्रविश्य अहोरात्रं जपेद् वर्षति । वेदाहमेतमिति देवं वर्षयितुकामः अंशमात्रमुदकमवतीर्य्यादित्याभिमुखो जपेन्मध्या-

(१) P. तद्रसस्पतिमिति (?) ० ।

(२) P. महावृष्टिर्भवति ।

ह्नाद् वर्षति । स्वाहा सूर्य्यस्येति वृष्टिकामः पयसामयुतं जुहु-यान्महावृष्टिर्भवति ।

विश्वामित्रगायत्रीकल्पे,—

वेतसः समिधो हुत्वा वृष्टिं विन्देत पुष्कलाम् ।
युक्ताभिः पयसा पत्रैः पुष्पैर्वा वेतसस्य तु ॥
पायसेन शतं हुत्वा सप्ताहं वृष्टिमाप्नुयात् ।

ब्रह्मोक्तगायत्रीकल्पे,—

हुत्वा वै विल्वपत्राणि घृताक्तानि हुताशने ।
लक्षमात्रेण मन्त्रज्ञो महावृष्टिमवाप्नुयात्[1] ॥

यजुर्विधाने,—अग्न आयूंषि प्रसव इति अग्ने पवस्वेति ब्रह्म वर्चसकामस्याज्यहोमः । सोमं राजानमिति पौर्णमास्यां संवत्-सरं सोममुपतिष्ठते । ब्राह्मणायाग्रं दत्वा भुञ्जीत क्षिप्रं सोमयाजी भवति । परमस्या इति वैकङ्कती जुंहुयाद् रक्षणाय । नमः सुत इति निगड़बद्धो जपेत् व्यसनस्थो वा । निगड़स्फोटनं भवति व्यसनान्मुच्यते । उर्जोदपातमिति मन्त्रेण दधि घृतं जुहुयाद-पायान्मुच्यते[2] । अश्वत्थे वो इत्यश्वत्थपर्णहोमो गोकामस्य । अनया या ओषधी गृंह्यते सा रक्षोघ्नी भवति । नमस्ते रुद्र मन्यव

(१) P. Adds. ब्रह्मोक्तगायत्रीकल्पे,—नाभिदघ्ने जले जप्त्वा सप्ताहं वृष्टिमाप्नुयात् ।

(२) P. Adds. यद्वक्था इत्येतां जप्त्वा नावसीदति । उच्छुष्मा इति वन्धनस्थो जपन्मुच्यते ।

इति चतसृभिः यवगोधूमजतिलगवेधुकानां दधिमधुघृताक्तानां शतसहस्रं जुहुयादेकादशरात्रेण द्वादशरात्रेण जनपदमरण-मुपशमयति[1] । विंशतिरात्रेण देशोपद्रवं शमयति । मासेन पृथिव्यां जनपदमरणमुपशामयति । तथा काण्डात् काण्डादित्यु-भयेन दुर्वाप्रवालानामयुतं जुहुयाद् ग्रामे जनपदमरणमुपशमयति। [[2]द्विगुणेन नगरे । त्रिगुणेन विषये । द्विपदचतुष्पदादीनामुप-घाते भेषजमसीति दधि मधु घृतं जुहुयात् शान्तिर्भवति । उग्रश्च भीमश्चेति महाजनपदमरणे ग्राममध्ये नगरमध्ये वा विल्वकाष्ठै-रग्निं प्रजाल्य औदुम्बरसमिधां शतं जुहुयात् शान्तिर्भवति। तन्नोमित्र इति जनपदमरणे चतुष्पदानाञ्चोपसर्गे वैकङ्कतसमिधाम-युतं जुहुयात् सर्व्वमुपशमयति ।] [3]अवोचदिति पथि गच्छन् जपेत् क्षेमेण कृतार्थं आगच्छति । नमोऽस्तु नीलग्रीवायेति सप्तधा तोयमभिमन्त्र्य विषग्रस्तगात्रे क्षिपेत् कालदष्टोऽप्युत्तिष्ठति । ज्वर-भूतग्रहडाकिनीभयग्रस्तं प्रमुञ्च धन्वन इति भस्मसर्षपैस्ताड़येत् मुञ्चमुञ्चेति वदेत् शीघ्रं मुञ्चति । नमो हिरण्यवाहव इति वशीकर्त्तुमिच्छन् पलाशाश्वत्थापामार्गवैकङ्कतानां प्रतिवर्णं घृत-मधु-क्षीरतैलाक्तानामयुतं जुहुयात् क्रमशो वर्णचतुष्टयं वशमान-यति । रुद्रो नो अग्निराहुत इति आदित्यस्योदयकाले जपेत्

(१) Adds. पञ्चविंशतिरात्रेण राष्ट्रोपद्रवं शमयति ।

(२) A. Omits the portion bracketed.

(३) P. अध्यवोचदिति ० ।

सुभगो भवति । अग्न आगच्छेति गोरोचनामष्टसहस्राभि-मन्त्रितां कृत्वा ललाटे तिलकं कुर्य्यात् सर्व्वजनप्रियो भवति। यास्ते अग्न इति सौभाग्यकाम आज्याहुतिसहस्रं जुहुयात् । बृहस्पते सवितरिति सौभाग्यकामो दधि-मधु-घृतं जुहुयात् सुभगो भवति । परीमे गामनेषतेति तुषहोमो वशार्थः । राजानं वीक्ष्य जपेद्वश्यो भवति । हन्तुमागतं दृष्ट्वा जपेत् प्रणमति । एत-देव सौभाग्यकरणं स्नेहच्छेदे । मानस्तोकइति सर्व्वगन्धैर्योजन-शतस्थं पुरुषमाकर्षति । गुग्गुलगुटिकानां चणकप्रमाणानामष्ट-सहस्रं जुहुयाद् यस्य नाम्ना स वश्यो भवति । भद्रं कर्णेभिरिती-न्द्रियविकलो जपेत् पूर्णेन्द्रियो भवति । यदाबध्नन्निति हिरण्यं सहस्राभिमन्त्रितं कृत्वा दक्षिणहस्ते बध्नीयात् पापचक्षुर्व्यपोहति । न च राजा किञ्चिद् विचारयति प्रियदर्शनो भवति । परं मृत्यो इति बालानां गर्भिणीनां हस्ते सूत्रबन्धो जपहोमश्च शक्तितः कार्य्यः शान्तिर्भवति । बृहद्गर्भाया आज्यं दातव्यं प्रौढ़गर्भ-प्रसवकाले अकालगर्भपातप्रसवसाधारणे च । युञ्जाहीत्यु-पस्कृतमहोरात्रोपोषितः कुर्य्यात् यथा भविष्यं श्रूयते वर्त्तमानं भूतं वा । एतानि निमित्तनिश्चये कर्म्माण्युक्तानि ।

यत्रतूत्पातादिग्रहदौस्थ्यादिनिमित्तसंशयेनानिष्टशङ्का चक्षुषाऽ-दृष्टसामग्रीदर्शनेन वाऽनिष्टशङ्का सा भयमित्युच्यते । तत्र भये निमित्ते विहितानि कर्म्माणि कार्य्याणि । तद् यथा यजुर्विधाने,—नमः सिकत्यायेति कलशमभिमन्त्र्य अष्टशतेना-त्मानं स्नापयेत् । सर्व्वभयेभ्यो विनायकेभ्यश्च मुच्यते । मीढ्हुष्टमा

शिवतमेति सर्पभयेऽग्निभये चौरभये प्राणसंशये मानसं जपेत् सर्वेभ्यो भयं न भवति। परीमेगामनेषतेति भयेषु जपेदभयं भवति। प्राणसंशये जपेन्मुच्यते। याः सेना इति निपाते अन्नं जुहुयाद् भयं न भवति। ऋग्विधाने,—

अशक्ये चाप्रतीकारे भये प्राणान्तिके तथा।
जातवेदस इत्येतां जपन्नेव विमुच्यते॥

इति जातवेदोमन्त्रजपः। तद्विधिरायुःकामप्रयोगे वक्ष्यते। वशिष्ठकल्पे मुद्रिकासंस्कारविधौ ग्रहरोगोरगादिभ्यो भयं न जायत इति। तापनीयश्रुतौ,—यो मृत्योः पाप्मभ्यः संसाराच्च बिभीयात् स एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रतिगृह्णीयादिति। महाभारते,—

भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदि।

इति सहस्रनाम्नि। देवीमाहात्म्यमधिकृत्य मार्कण्डेयपुराणे,—

शत्रुतो न भयं तस्य दस्युतो वा न राजतः।
न शस्त्रानलतोयौघात् कदाचित् सम्भविष्यति॥

इति। तथा सर्व्वभयेषु विष्णुधर्म्मोक्ताभयस्तवः पठनीयः। दाल्भ्य उवाच,—

भगवन् सर्व्वकालेषु भयत्रस्ता मनीषिणः।
[1]किं कुर्व्वन्तोऽभयं तेषां यथावद् वक्तुमर्हसि॥

पुलस्त्य उवाच,—

(१) P. किं कुर्व्वन्नभयं तेषाम्। ०

अहं ते कथयिष्यामि शृणु दाल्भ्य यथासुखम्।
इहलोकभयं नास्ति परलोकभयं तथा॥
प्रणवाग्रमजं नित्यं परमार्थमतीन्द्रियम्।
ये स्मरन्ति हरिं श्रेष्ठं न तेषां विद्यते भयम्॥
हृदिस्थं सर्व्वभूतानां वाह्याभ्यन्तरवर्त्तिनम्।
ये स्मरन्ति हरिं श्रेष्ठं न तेषां विद्यते भयम्॥
दिशश्च विदिशश्चैव व्याप्तलोकं निरन्तरम्।
ये स्मरन्ति हरिं [1]श्रेष्ठं न तेषां विद्यते भयम्॥
अक्षरं निर्म्मलं शान्तमन्तःकरणवर्जितम्।
ये स्मरन्ति हरिं श्रेष्ठं न तेषां विद्यते भयम्।
प्रकृतिं पञ्चभूतानामिन्द्रियाणां गुणातिगम्॥
ये स्मरन्ति ०
वासितं सर्व्वभूतानां वासुदेवमजं विभुम्।
ये स्मरन्ति ०
मत्स्यकूर्म्मादिरूपाणां प्रादुर्भावं महात्मनः।
ये स्मरन्तीह गोविन्दं न तेषां विद्यते भयम्॥
शङ्खचक्रगदापाणिं गरुड़स्थमरिन्दमम्।
ये स्मरन्ति च गोविन्दं न तेषां विद्यते भयम्॥
[2][श्रीधरं श्रीपतिञ्चैव श्रीवत्सोरसि भूषितम्।

(१) P. नित्यं ० ।
(२) P. Omits the portion bracketed.

ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम्।
नररूपधरं देवं नारायणमकल्मषम्॥
ये नमस्यन्ति ०
अतसीपुष्पसङ्काशं पीतवाससमच्युतम्।
ये नमस्यन्ति ०
सिद्धगन्धर्व्वयक्षाणां सुरासुरगुरोर्गुरुम्।
ये नमस्यन्ति ०
दुर्गमे कुपथे वापि व्याघ्रचौरभयाकुले।
ये स्मरन्ति हृषीकेशं न तेषां विद्यते भयम्॥
ग्रहभूतपिशाचाद्यैर्व्याधिभिः परिपीड़िताः।
ये स्मरन्ति ०
विद्युद्वज्रनिपातैश्च वाय्वग्निभिरुपद्रवैः।
ये स्मरन्ति ०]
संसारभयभीताश्च शत्रुभीताश्च सर्व्वदा।
ये स्मरन्ति ०

भयमपनय समस्तमेतज्जपतो हरिगोविन्दहृषीकेशम्।
इति सततमिदं स्तुवंस्तु दाल्भ्य सुखमभयञ्च ददाति तत्र तत्र॥

नामत्रयमिदं पुण्यं पवित्रं पापनाशनम्।
दुर्लभं परमं गुह्यं द्वौ त्रीणि चतुराक्षरम्॥

अथ रोगशान्तये जपाः।

तत्र कर्म्मविपाकसंग्रहे—

दृष्टापचारतः कश्चित् कश्चित् पूर्व्वापचारतः।
तत्सङ्कराद् भवत्यन्यो व्याधिरेवं त्रिधा मतः॥
यथानिदानदोषोत्थः कर्म्मजो हेतुभिर्विना।
महारम्भोऽल्पको हेतावन्तिमो दोषकर्म्मजः॥

तत्र दोषजस्यौषधैरुपशमः। अथौषधैरनुपशमे निष्कृत्या प्रायश्चित्तादिरूपया कर्म्मजत्वं निश्चित्य शमःकार्य्यः। निष्कृत्यौषधाभ्यामुभयजस्य। शातातपीयकर्म्मविपाके,—

दुष्कर्म्मजा नृणां रोगा यान्ति चैवं क्रमाच्छमम्।
जपैः सुरार्च्चनैर्होमैर्दानैस्तेषां शमो भवेत्॥

जपा वेदपारायणमहासौरघोषशान्तिशतरुद्रियपुरुषसूक्तत्र्यम्बकमन्त्रराजमृत्युञ्जयसहस्रनामापामार्जनविष्णुहृदयादीनाम्। सुरार्च्चना सूर्य्यपूजा विष्णुमहेश्वरादिपूजा च। होमो गायत्र्याज्यतादिहोमाः। तत्रायुतहोमादयः। त्र्यम्बकहोमादयश्च। दानानि गोभूतिलहिरण्यदानानि।

तथा,—

दानैर्दयादिभिरथ द्विजदेवतागो-
देवार्च्चनाप्रणतिभिश्च जपैस्तपोभिः।
इत्युक्तपुण्यनिचयैरुपचीयमाना
प्राक्पापजातमशुभं प्रशमं नयन्ति॥

पापजातमशुभं रोगम् । अत्रच ये वातपित्तादिधातुप्रकोपजा रोगास्तेष्वौषधवत् त्र्यम्बकजपादिकमपि कर्त्तव्यमेवाविशेषेण रोगमुद्दिश्य विधानात् । ये कर्म्मजा उभयजाश्च तत्र प्रायश्चित्तपूर्व्वकमेव रोगशान्तये जपादिकरणं तथाहि दानादिभिर्वर्त्तमानरोगनाशेऽपि तन्मूलपापानाशे रोगान्तरोत्पत्त्यापत्तेः । न च प्रायश्चित्तमात्रं तर्हि क्रियतां पापनाशे सुतरां रोगनाशादितिवाच्यम् । आरब्धरोगरूपफलस्य पापस्य नाशेऽपि रोगसत्वे बाधकाभावात् । नहि निमित्तकारणनाशे कार्य्यनाशावश्यकत्वं किन्तु समवायिकारणनाशे तच्च शरीरमस्त्येव । [1]तत्रौषधादि यथाविधप्रयोगेऽपि यस्य रोगस्य नोपशमस्तस्य कर्म्मजत्वं निश्चित्य मूलभूतपापक्षयार्थं प्रायश्चित्तं कृत्वा रोगशान्त्यर्थविहिततत्तत्कर्म्मापि कर्त्तव्यम् । किं बहुना तत्र त्र्यम्बकजपादिकमपि मूलपापप्रायश्चित्तपूर्व्वकमेव कर्त्तव्यम् । व्याधिप्रतिकृतिदानादिकञ्च रोगशान्त्यर्थविहितमपि मूलपापक्षये पुनरुत्पत्त्यापत्तेस्तत्पापशान्तये प्रथमं कर्म्मानुरूपकृच्छ्राद्याचरणम् । ननु च कर्म्मविपाकसारे,—

अथ कर्म्मक्षयोपायौ [2]कृच्छ्रव्याधिविपर्य्ययौ ।

इति कर्म्मणः पापस्य नाशकत्वेन कृच्छ्राद्याचरणं व्याधिविपर्य्ययशब्देन व्याधिप्रतिमादानञ्च वैकल्पिकत्वेनोक्तम् । तत्कथं प्रतिकृतिदानस्थलेऽपि पापशान्तये पृथक् कृच्छ्राद्याचरण-

(१) P. तेनौषधादि ०

(२) P. कृच्छ्रव्याधिविषया विपर्य्ययाविति ० (?) ।

मित्युच्यते । अत्र कर्म्मपदस्य पापतज्जन्यरोगरूपकारणकार्य्योभयपरत्वात् ।

तथाच स्मरन्ति

पूर्व्वजन्मकृतं पापं व्याधिरूपेण जायते ।

इति । तेन कृच्छ्रादिकं कारणभूतपापरूपकर्म्मनाशोपायः । प्रतिकृतिदानञ्च कार्य्यं रोगरूपकर्म्मनाशोपाय इति दृष्टौ भिन्नकार्य्यत्वात् समुच्चयः । यत्तु कर्म्मविपाकमहार्णवे कृच्छ्रादिकरणमेका कोटिः व्याधिप्रतिकृतिदानमपरा कोटिरित्युक्तं तन्न वैकल्पिकत्वाभिप्रायेण किन्तु भिन्नकार्य्यकारित्वेन स्वस्वकार्य्ये नैरपेक्ष्यदर्शनाय । तथाचान्यत्र तेनैव प्रायश्चित्तं कृत्वा प्रतिकृतिदानादि कार्य्यमित्युक्तम् । एतत्सर्व्वमभिप्रेत्य कर्म्मविपाकसंग्रहे,—

प्रायश्चित्तमकृत्वा तु न कुर्य्यात् कर्म्म किञ्चन ।
[1]अनिस्तीर्णमघं नित्यं वर्धते द्विगुणं पुनः ॥

अत्र महार्णवकारेण प्रथमतः प्रायश्चित्तं कृत्वा प्रतिकृतिदानादि कार्य्यमिति व्याख्यातम् । न चेतद्रोगमूलपापभिन्नपापपरं तस्य कर्म्मविपाकेऽनुपयोगात् । महापातकव्यतिरिक्तपापानां कर्म्माधिकारविरोधाभावेन तन्निवर्त्तनस्य प्रायश्चित्तानुपयोगात् महापातकिनाञ्च कर्म्मानधिकारादेवास्य तत्परत्वेन वैयर्थ्यात् । जन्मान्तरमहापातकिनान्तु तच्चिह्नासत्वेऽपि यथा कर्म्मानधिकारस्तथोक्तं प्रायश्चित्तप्रदीपेऽस्माभिः । परिशेषाद्

(१) P. अनिस्तीर्य्यमघं ० ।

रोगमूलपापपरमेवेदं वचनमिति। अत्र रोगमूलभूतपापप्रायश्चित्तं रोगप्रायश्चित्तञ्च पर्षदुपस्थानपूर्व्वकमेव कर्त्तव्यम्।

विख्यातदोषः कुर्व्वीत पर्षदोऽनुमतं व्रतम्।

इति याज्ञवल्क्यवचनात्। रोगेण तन्मूलपापस्य विख्यातत्वात्। न चैवं ग्रहदौस्थ्योत्पातादावपि पर्षदुपस्थानप्रसङ्गः पापे निमित्ते तत्क्षयकामविहितकर्म्मणः प्रायश्चित्तत्वेन ग्रहदौस्थ्यादिशमनकर्म्मणः पापक्षय(१)काम्यया विहितत्वाभावात्। तिलदानादेः पापक्षयकामिकर्त्तव्यत्वेऽपि पापे निमित्ते विधानाभावात्। पातकोपपातकादौच तन्निमित्तक एव प्रायश्चित्तविधिः। प्रतिकृतिदानादौ च रोगस्य पापात्मकत्वाद् रोगनिमित्तकत्वादेव पापनिमित्तकत्वम्। [(२)यद्वा] शातातपीयकर्म्मविपाकपरिभाषायां रोगप्रशमनहेतुप्रायश्चित्तान्येवोपक्रम्य पर्षदुपस्थानविधानात् पृथगेव रोगप्रायश्चित्ते पर्षदुपस्थानं विहितमिति न ग्रहदौस्थ्यादौ तत्प्रसङ्गः। अतएव रोगनाशकत्वाविशेषेऽपि कर्म्मविपाकोक्त एव रोगप्रायश्चित्ते पर्षदुपस्थानम्। न त्र्यम्बकसहस्रनामजपादाविति विवेकः। यच्च सुमन्तुवचनं रागद्वेषादिलभ्यमानेषु प्रायश्चित्तेषु यज्ञभवनाध्ययनब्रह्मचर्य्यपरो भैक्षाशी दण्डी मेखली स्वयमेव वत्सरेण महापातकानि तत्परो व्यपोहति किल्विषं न ब्राह्मणस्य पतनमिच्छन्त्याचार्य्याः। अस्यार्थः—यदि केनापि निमित्तेन पर्षद्व्रतं न जानीते तदा स्वयं ज्ञात्वा व्रतं

(१) B. कामनया ०।

(२) B. Omits the portion bracketed.

कुर्य्याद् ब्राह्मणस्य न पतनमस्ति तदेव तदसम्भवे ब्राह्मणस्य बोध्यम्। तत्र शातातपीयविधिमात्रानुष्ठानेऽपि

स्मृतिशास्त्रविकल्पः स्यादाकाङ्क्षापूरणे सति।

इति न्यायाद् दशदानाद्यकरणेऽपि न विरोधः। शातातपः,—

दश पञ्चाथ चतुर उपवेश्य द्विजान् शुचीन्।
तेषामनुज्ञया सर्व्वं प्रायश्चित्तमुपक्रमेत्॥
विधाय वैष्णवं श्राद्धं संकल्पं द्विजकाम्यया।
धेनुं दद्याद् द्विजेभ्योऽथ दक्षिणाञ्च स्वशक्तितः॥
अलङ्कृत्य यथाशक्त्या वस्त्रालङ्करणैर्द्विजान्।
याचेत दण्डवन्नत्वा प्रायश्चित्तं यथोदितम्॥
तेषामनुज्ञया कृत्वा प्रायश्चित्तं यथाविधि।
पुनस्तान् परितुष्ट्यर्थमर्चयेद् विधिवद् द्विजान्॥
दद्याद् व्रताङ्गदानानि तेभ्यः श्रद्धासमन्वितः।
गोभूहिरण्यरजततिलवासोघृतानि च॥
गुड़धान्ये च लवणं देयानि श्रद्धया ततः।

प्रायश्चित्तमुपक्रमेदित्यतः पूर्व्वं विधाय वैष्णवं श्राद्धमिति सम्बन्धः। पर्षदो व्रतं निश्चित्य वैष्णवं श्राद्धं कृत्वा व्रतमुपक्रमेदित्यर्थः। सङ्कल्पपदं श्राद्धविशेषणं पिण्डार्घ्यादीतिकर्त्तव्यतानिरासाय। द्विजानलङ्कृत्य वस्त्राद्यैरथ धेनुं दक्षिणां दद्यादिति सम्बन्धः। स्वशक्तित इत्यनेन धेनोः साक्षाद् बहुभ्यो दानासम्भवात् तन्मूल्यं शक्तितो दद्यादित्यर्थः। अत्रायं क्रमः। दश पञ्च चतुरो वा ब्राह्मणानुपवेश्य वस्त्राद्यैः पूजा।

अङ्गिराः,—

सचेलं वाग्यतः स्नात्वा क्लिन्नवासा समाहितः ।

तेन सचेलस्नात आर्द्रवासाः पर्षदं त्रिः प्रदक्षिणीकृत्य दण्डवत् प्रणम्योत्थाय न किञ्चिद् ब्रुवन् आर्त्तिमान् दीनः पर्षदभिमुखस्तिष्ठेत् ।

तं दृष्ट्वा पर्षदां प्रश्नः ।

किं ते कार्य्यं वदास्माभिः किं वा मृगयसे द्विज ।
तत्त्वतो ब्रूहि तत्सर्व्वं सत्यं हि गतिरात्मनः ॥
सत्येन द्योतते राजा सत्येन द्योतते रविः ।[1]
सत्येन द्योतते वह्निः सर्व्वं सत्ये प्रतिष्ठितम् ॥
भूर्भुवस्स्वस्तथा सर्व्वे लोकाः सत्ये प्रतिष्ठिताः ।
अस्माकञ्चैव सर्व्वेषां सत्यमेव परं बलम् ॥
यदि चेद् वक्ष्यसे सत्यं नियतं प्राप्स्यसे शुभम् ।
यद्वा गतोऽस्यसत्येन त्वं न सिद्ध्यसि कर्हिचित् ॥

एवमुक्त उपविश्य एतत् पर्षदुपविष्टेभ्यो धेनुमूल्यं निष्कं निष्कार्द्धं वा पादं [2]पञ्चकार्षापणानि वा त्रिकार्षापणानि वा ददानीति दद्यात् । उत्थाय पापनिवेदनम् । अमुकरोगहेतुभूतपापवानस्मि [3][अमुकरोगवानस्मि तत्प्रायश्चित्तोपदेशेन भवन्तो मामनु-

(१) P. Adds सत्येन क्लेदयन्त्यापः सत्येन पवते मरुत् ।

(२) P. पञ्चकार्षापणानीति वा ददानीति दानम् ।

(३) P. Omits the portion bracketed.

गृह्णन्तां] ततः प्रायश्चित्तिन उत्सारणम् । पर्षदां प्रायश्चित्तविमर्शः ।

सर्व्वेषां निश्चितं यच्च यच्च प्राणान् न पीड़येत् ।

एनांसि गुरूणि गुरूणि । लघूनि लघूनीत्येवम् । ततोविधायकवरणम् । एभिर्वस्त्रकाञ्चनफलैस्त्वमेतत् पर्षदुपदिष्टः प्रायश्चित्तविधायको भवेति । भवानीति प्रतिवचनम् । ततो विधायकमाहूय तदग्रे पर्षदां प्रायश्चित्तस्वरूपकथनम् । ततो विधायकस्य प्रायश्चित्तिनमाहूय प्रायश्चित्तकथनम् ।

शृणु भो त्वमिदं विप्रैर्यत् तवादिश्यते व्रतम् ।
तत्ते यत्नेन कर्त्तव्यमन्यथा तद्वृथा भवेत् ॥
यच्चान्यदशुभं किञ्चित् कृतं यद्वा करिष्यसि ।
पृथक् तवैतदेतस्मात् शुद्धिर्यत्ते निवेदितम् ॥
यदा त्वया भवेच्चीर्णं व्रतं शुद्धिकरं महत् ।
तदा कुर्य्याः प्रयत्नेन शक्त्या विप्राभिपूजनम् ॥

तदा अमुकरोगमूलभूतपापक्षयार्थं मन्वादिभिरमुकप्रायश्चित्तमाम्नातं अमुकरोगक्षयार्थञ्चामुकप्रायश्चित्तमाम्नातं [1][तदुभयं कृत्वामुकपापक्षयपूर्व्वकं अमुकरोगान्मुक्तो भवत्विति पर्षदा निर्द्दिष्टम् ।] तदुभयं कृत्वाऽमुकपापक्षयपूर्व्वकं अमुकरोगान्मुक्तो [2]भवेति त्रिः कथनं द्वयोर्भिन्नकाले करणे तु अमुकपापा-

(१) B. Omits the portion bracketed.

(२) B. भवेतिकथनम् ।

न्मुक्तो भव। अमुकरोगान्मुक्तो भवेति वाच्यम्। ततः प्रायश्चित्त-स्वरूपं ज्ञात्वा स्नात्वा आर्द्रवस्त्रं विहाय शुक्लमाल्यवस्त्रधरः स्वस्ति वाच्य प्रायश्चित्तसंकल्पं कुर्य्यात्। ततो वैष्णवश्राद्धम्। एतानि भोज्यानि चतुःपरिमितानि विष्णवे नमः। एतत्प्रतिष्ठार्थं दक्षिणां ददानीति दक्षिणादानम्। यथाशास्त्रं रोगमूलभूतपाप-प्रायश्चित्तम्। ततो रोगप्रायश्चित्तञ्च कृत्वा तस्मिन्नेव दिने समाप्तौ तानेव ब्राह्मणानुपवेश्य [[१]गन्धवस्त्राद्यैः पूर्व्ववत्] पूजा। ततस्तेभ्यो व्रताङ्गदानम्। एतत्पर्षदुपविष्टेभ्यो ब्राह्मणेभ्य एतानि गोभूतिलहिरण्याज्यवासोधान्यगुड़रौप्यलवणानि ददे इत्युत्सृज्य दानम्। गोदानमन्त्रः,—

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्द्दश।
यस्मात् तस्माच्छिवं मे स्यादिह लोके परत्र च॥

भूदानमन्त्रः,—

सर्व्वभूताश्रया भूमि र्वराहेण समुद्धृता।
अनन्तशस्यफलदा अतः शान्तिं प्रयच्छ मे॥

तिलदानमन्त्रः,—

महर्षे र्गोत्रसम्भूताः कश्यपस्य तिलाः स्मृताः।
तस्मात् तेषां प्रदानेन मम पापं व्यपोहतु॥

हिरण्यदानमन्त्रः,—

(१) P. Omits the portion bracketed.

हिरण्यगर्भगर्भस्थं हेम वीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

आज्यदानमन्त्रः,—

कामधेनोः समुद्भूतं सर्व्वक्रतुषु संस्थितम्।
देवानामाज्यमाहारमतः शान्तिं प्रयच्छ मे॥

वस्त्रदानमन्त्रः,—

शरणं सर्व्वलोकानां लज्जाया रक्षणं परम्।
सुवेशकारि वस्त्र त्वमतः शान्तिं प्रयच्छ मे॥

धान्यदानमन्त्रः,—

सर्व्वदेवमयं धान्यं सर्व्वोत्पत्तिकरं महत्।
प्राणिनां जीवनोपायमतः शान्तिं प्रयच्छ मे॥

गुड़दानमन्त्रः,—

यथा देवेषु विश्वात्मा [१]प्रवरश्च जनार्द्दनः।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम्॥
प्रणवः सर्व्वमन्त्राणां नारीणां पार्व्वती यथा।
तथा रसानां प्रवरः सदैवेषु रसो मतः॥
मम तस्मात् परां शान्तिं ददस्व गुड़ सर्व्वदा॥

रजतदानमन्त्रः,—

प्रीतिर्यतः पितॄणाञ्च विष्णुशङ्करयोः सदा।
शिवनेत्रोद्भवं रौप्यमतः शान्तिं प्रयच्छ मे॥

(१) P. प्रवर्त्तश्च०।

लवणदानमन्त्रः,—

यस्मादन्नरसाः सर्व्वे नोत्कृष्टा लवणं विना।

शम्भोः प्रीतिकरं नित्यमतः शान्तिं प्रयच्छ मे॥

ततः,—

सन्तुष्टा ब्राह्मणा ब्रूयुरच्छिद्रं व्रतचारिणे।

अच्छिद्रवाक्यं यथा,—

व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्म्मणि।

सर्व्वं भवतु तेऽच्छिद्रं यस्येच्छन्ति तव द्विजाः॥

सम्पन्नमिति यद्वाक्यं वदन्ति चितिदेवताः।

प्रणम्य शिरसा धार्य्यमग्निष्टोमफलं लभेत्॥

भोजयित्वा द्विजान् शक्त्या भुञ्जीत सह बन्धुभिः।

अत्र रोगमूलभूतपापप्रायश्चित्तमावश्यकम्। [1]रोगक्षयार्थं कर्म्मविपाकोक्तप्रायश्चित्तासामर्थ्येऽपि त्र्यम्बकजपादिनाऽपि रोगक्षयः कार्य्यः। कालान्तरे रोग[2]क्षयार्थंप्रायश्चित्तकरणे पृथक् पर्षदुपस्थानं कार्य्यमिति विवेकः। अत्र च रोगक्षयार्थं शातातपीये

जपैः सुरार्चनैर्दानैर्होमैस्तेषां शमो भवेत्।

इत्यभिधानात्

वेदमेव जपेन्नित्यं यथाकालमतन्द्रितः।

इति सामान्यतः कर्त्तव्यजपमात्रोद्देशेन वेदस्य मानवेऽभिधानात्। आश्वलायने च

(१) P. रोगक्षयाय०। (२) P. क्षयप्रायश्चित्त०।

वेदाध्यायी सदैव [1]स्यादपाप्मा सत्यवाक् शुचिः।

यं यं कामयते कामं तं तं वेदेन साधयेत्॥

इति सर्व्वार्थत्वस्य कथनात् रोगशान्त्यर्थं वेदपारायणं कार्य्यम्। तथा तन्मूलपापक्षयार्थञ्च। तथाश्वलायने पारायणेन पापक्षयः स्मर्य्यते। एकेन पूतत्वं द्वाभ्याममृतान्मोचः। त्रिभिः पातकेभ्यः। चतुर्भिः शूद्रान्नभोजनात्। पञ्चभिरयाज्ययाजनात्। अग्राह्यग्रहणात् षड्भिः। सुवर्णस्तेयात् पतितसम्प्रयोगात् सप्तभिः। गुरुतल्पगमनादष्टभिः। सुरापानान्नवभिः। दशभिरश्रोत्रियशूद्रयाजनात्। एकादशभि र्ब्राह्मणहननात्। द्वादशभिः पूर्व्वजन्मेहजन्मकृतैः सर्व्वैः पापैः प्रमुच्यते। तथाच मनुः

अरण्ये नियतो जप्त्वा त्रिर्वै वेदस्य संहिताम्।

मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च॥

इति। तेन गुरुपापे चेद् वेदपारायणस्य नाशकत्वं लघुपापे सुतरामिति रोगमूलपापक्षयार्थमपि तत्कार्य्यम्। तद्विधिः। बौधायनः—

तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते।

कलशं सुव्रतं तत्र सुनिर्णिक्तं विभूषितम्॥

पुष्पपल्लवमालाभिश्चन्दनैः कुङ्कुमादिभिः।

मृत्तिकायवसम्मिश्रं वेदविद् विन्यसेत् ततः॥

(१) P. स्याद् यद्दाय सत्य०।

पञ्चाशद्भिः कुशैः कार्य्यो ब्रह्मा पञ्चमुखः स्थितः।
[१]स्थापितः स्नापितः कुम्भे चतुर्बाहुश्चतुर्मुखः॥
वत्सजान्वाकृतिं देवमर्द्धभागैः कुशैः कृतम्।
ब्रह्मोपधाने दत्वा तं ततः स्वस्त्ययनं पठेत्॥
प्रतिष्ठां कारयेत् पश्चात् पुजाद्रव्यमथोच्यते।
यज्ञोपवीतनैवेद्यवस्त्रचन्दनकुङ्कुमैः॥
सधूपदीपताम्बूलैरक्षतैश्च पितामहम्।
ब्रह्मयज्ञानमिति वा गायत्र्या वा प्रपूजयेत्॥
उपाध्यायञ्च सम्पूज्य यथापाठं पठेत् ततः।

तथा स्थण्डिलं परिकल्पयित्वाग्निमुपसमाधाय परिस्तीर्य्याज्येन देवताभ्यो जुहोति। अग्नये। सोमाय। इन्द्राय। विश्वेभ्यो देवेभ्यः। ऋषिभ्यः। ऋग्भ्यः। यजुर्भ्यः। सामभ्यः। श्रद्धायै। मेधायै। [२]प्रज्ञायै। धारणायै। श्रियै। भियै। सावित्र्यै। सवित्रे। प्रजापतये काण्डर्षये। सोमाय काण्डर्षये। अग्नये। विश्वेभ्योदेवेभ्यः। काण्डर्षिभ्यः। संहिताभ्यः। उपनिषद्भ्यः। हव्यवाहाय। विश्वेभ्यः। वारुणेभ्यः। अनुमत्यै। स्विष्टिकृते। पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः परिसिञ्चति। समाप्तौ चैतद् यजुषा तर्पयति। एवमृग्वेदस्य काण्डर्ष्यादिवर्जमास्विष्टकृत्। तेषां स्थाने शतर्चिभ्यो मध्यमेभ्यश्च

(१) P. स्नापितः स्थापितः कुम्भे०।
(२) P. संज्ञायै श्रियै सावित्र्यै।

गृत्समदाय विश्वामित्राय देवायाग्नये भरद्वाजाय जामदग्नये गौतमाय वशिष्ठाय प्रागाथेभ्यः क्षुद्रसूक्तेभ्यो महासूक्तेभ्यो महानाम्नीभ्य इति। ततो वेदादिमारभ्य सन्ततमधीयीतेत्याह भगवान् बौधायनः। उक्तस्थाने शुभदिनेऽमुककामो वेदपारायणमहं करिष्य इति सङ्कल्प्य स्थण्डिलेऽग्निमुपसमाधाय ततः पूर्व्वं यथोक्तकलशे पञ्चविंशतिकुशकल्पितवत्सजान्वाकृतिर्देवोपरि पञ्चाशत्कुशनिर्म्मितं ब्रह्माणं दशभिर्दशभिः कुशैः प्रतिदिक्षु कृतमुखाकारग्रन्थिमुपरि दशकुशैः कुशग्रन्थिं ब्रह्माणं स्थापयित्वा स्नापयित्वा ब्रह्मन् सुप्रतिष्ठितो भवेति प्रतिष्ठाप्य यथोक्तोपचारैः पूजा। तत्र उपाध्यायपूजा। ततो गृह्योक्तविधिना ब्रह्मोपवेशनाद्याज्यभागान्तं कृत्वा आज्येनाग्नये स्वाहेत्यादिभिर्होमः। ऋग्वेदपारायणे स्विष्टकृतः पूर्व्वकाण्डर्ष्यादि लोपयित्वा तत्स्थाने शतर्चिभ्य इत्यादि होमः। होमसमाप्तौ होमसम्बन्धिनीं देवतां जलेन तर्पयति। व्याहृतीभ्यश्च तर्पयति। भूर्देवांस्तर्पयामि। भुवोदेवांस्तर्पयामि। भूर्भुवः स्वर्देवांस्तर्पयामि। ततो वेदादिमारभ्य सतताध्ययनसमाप्तौ नान्तरा व्याहरणम्। नान्तरा विरामः। अन्तराविरामे प्राणायामत्रयम्। प्रणवपूर्व्वं पुनरारम्भः। समाप्तौ भूरादिभिस्तर्पणम्। गुरवे यथाशक्ति दक्षिणा ब्राह्मणभोजनञ्च। अत्रच [१]भोजनानन्तरं न पठनम्। इत्थमेवायुतहोमादौ पारायणम्। अनश्नत्पारायणे विशेषः। ग्रामात् प्राच्यामुदीच्यां वा दिश्युप-

(१) P. भोजनादूर्द्ध्वं न पठनम्।

क्रमः । आवेदसमाप्तेरभोजनम् । अशक्तौ जलं दुग्धं फलं हविष्यं वा किञ्चिद् भोज्यम् । भोजनानन्तरमपि पुनः पाठः । नान्तरा विरामः । न लौकिकवाक्योच्चारणम् । अन्तराविरामे प्राणायामत्रयं कृत्वा प्रणवपूर्व्वमारम्भः । सन्ध्याद्वये महानिशायां संग्रामेऽरण्ये वृष्टौ च न पाठः । अन्यदा नित्यकर्म्मकालपरिहारेण सर्व्वदा पाठः । आदौ ब्राह्मणमन्ते च । गुरवे दक्षिणा । पूर्व्ववद्ब्रह्मपूजाद्याज्यभागान्ते । अग्नये सोमाय इन्द्राय प्रजापतये बृहस्पतये विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यो ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डर्षये सोमाय काण्डर्षये अग्नये काण्डर्षये विश्वेभ्यो देवेभ्यः संहिताभ्यो देवताभ्यः । उपनिषद्भ्यो देवताभ्यः । वारुणीभ्यो देवताभ्यः । हव्यवाहाय । विश्वेभ्योदेवेभ्यः । अनुमत्यै । स्विष्टकृते । पृथक् स्वाहाकारेण होमः । ऋग्वेदिना काण्डर्ष्यादिप्राक्स्विष्टकृत्स्थाने शतर्च्चिभ्यो मध्यमेभ्यः गृत्समदाय विश्वामित्राय वामदेवाय अत्रये भरद्वाजाय जामदग्नये गौतमाय वशिष्ठाय प्रागाथेभ्यः पावनीभ्यः क्षुद्रसूक्तेभ्यः महासूक्तेभ्यः महानाम्नीभ्यश्च । होमसमाप्तौ भूरादिभिः पूर्व्ववत् तर्पणं अग्न्यादीनां होमदेवतानाम् । ततो वेदमारभ्य समापनम् । अन्ते पूर्व्ववत् तर्पणम् । ब्राह्मणभोजनं दक्षिणादानञ्च । अस्यैव पूर्व्वोक्तानि फलानि ।

इत्याश्वलायनोक्तानश्नत्-पारायणविधिः ।

अथ सर्व्वरोगनाशाय घोषशान्तिः ।

यद्यपीयं प्रतिकृतिदानाङ्गत्वेन विहिता तथापि [1]सर्व्वदेशीयविशिष्टशिष्टाचारात् पृथक् क्रियते । रात्रौ च । अमुकरोगशान्तये आश्वलायनोक्तघोषशान्तिकर्म्म कुर्व्वीयेति । ततो वरणम् । व्रती जपति ऋष्यादिस्मरणपूर्व्वकम् । आ नो भद्रा इति दशर्चं सूक्तं अदितिर्जातमदितिर्जनित्वमित्यन्तम् । अस्य गौतमो राहुगण ऋषिः विश्वेदेवा देवता आद्याः पञ्च सप्तमी च जगत्यः षष्ठी विराट् शेषास्त्रिष्टुभः । स्वस्ति नो मिमीताम् इति पञ्चर्चस्तत्परिशिष्ट-ऋग्द्वयेन सप्तर्चः [2]अभयं नो इत्यन्ताः । अस्यात्रेय ऋषिः तिस्रस्त्रिष्टुभः द्वे अनुष्टुभौ पुनर्द्वेत्रिष्टुभौ विश्वेदेवा देवताः । शन्न इन्द्राग्नीति पञ्चदशर्चं सूक्तं यूयं पात स्वस्तिभिः सदा नः इत्यन्तम् । वशिष्ठ ऋषिः त्रिष्टुप्छन्दः विश्वेदेवा देवताः । रक्षोहणमित्यादिपञ्चदशर्चं सूक्तं बलं चित्तञ्च वीर्य्य(?)मित्यन्तम् । आङ्गिरसो वायु ऋषिः त्रिष्टुप्छन्दः चतुर्थ्यनुष्टुप् अग्निर्देवता । आशुः शिशानो इति त्रयोदशर्चं सूक्तं अनाधृष्या यथासथ इत्यन्तम् । ऐन्द्रोऽप्रतिरथ ऋषिः त्रिष्टुप्छन्दः चतुर्थी वा इति(?) अन्त्यानुष्टुप् इन्द्रो देवता । मुञ्चामीत्येतत् पञ्चर्चं सूक्तं सर्व्वमायुश्च तेऽविदमित्यन्तम् । प्राजापत्यो यक्ष्मनाशनऋषिः त्रिष्टुप्छन्दः अन्त्यानुष्टुप् इन्द्रो देवता । अमुष्य त्वोदानमिति तृचं सूक्तं युवन्त्विव(?)दशर्चं इत्यन्तम् । अरिष्टनेमि-

(१) P. सर्व्वदेशीयाविगीतशिष्टाचारात् ० ।

(२) P. अभयं नोऽस्तु इत्यन्तः ।

तार्च्यऋषिः त्रिष्टुप्छन्दः तार्च्योदेवता। सर्व्वेषां शान्तिपाठे विनियोगः। इति स्मृत्वा यथाक्रमं सप्तसूक्तानां [1]त्रिःसप्तति-ऋचा पाठः। अन्ते च संहितावसाने ऋग्द्वयपाठः तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्द्धं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे। ततः परिधानीयां त्रिः पठेत्। ॐ नमो ब्रह्मणे नमोऽग्नये नमः पृथिव्यै नम ओषधीभ्यो नमो वाचे नमो वाचस्पतये नमो विष्णवे नमो महते करोमि भद्रन्नो अपि वाचस्पतये नमः। शान्तिः शान्तिः शान्तिः। समाप्तौ यथाशक्ति दक्षिणादानम्।

इत्याश्वलायनीयघोषशान्तिः।

अथ तैत्तिरीयाणां घोषशान्तिः।

परमेष्ठी ऋषिः आद्या षट्पदा जगती द्वितीया गायत्री इन्द्राये वा स्वस्तीति द्वे यजुषी। आ वात वाहि द्वे अनुष्टुभौ। यदतो वात पञ्चपदापंक्तिः। आवात आवात्विति द्वे गायत्र्यौ। भूः प्रपद्यइति अन्तरिक्षं इति प्राणापानाविति त्रीणि यजूंषि। द्युभिरक्तुभिरिति त्रिष्टुप्। कयानश्चित्र इति तिस्रोगायत्र्यः। वयः सुपर्णा इति त्रिष्टुप्। शन्नोदेवीरिति द्वे गायत्र्यौ। सुमित्रिया न इति दुर्मित्रिया इति द्वे यजुषी। आपो हिष्ठेति तिस्रो गायत्र्यः।

(१) एकीकृताभिर्ऋग्भिर्नेयं संख्या संवदति। इति सं।

पृथिवी शान्तेति अन्तरिक्षं शान्तिरिति द्यौः शान्तेति पृथिवी शान्तिरिति तयाहं शान्त्येति इह श्रीश्चेति षट् यजूंषि। तदायुश्चेत्यनुष्टुप्। तच्चक्षुः, इन्द्रियाय इति पञ्चदशादिपंक्तिश्चतुष्पदा। ब्रह्मणश्चोभयस्य त्रियंजुरादिका (?) मा मोदोषोरिति द्वे एकपदा गायत्री। मेधामनीषेति यजुः। आभिर्गीर्भिरित्यनुष्टुप् ब्रह्माग्रे ज्येष्ठमिति यजुः। विश्वेदेवा देवताः शान्तिपाठे विनियोगः। शेषे ॐ शान्तिः शान्तिः शान्तिः।

इति तैत्तिरीयाणां घोषशान्तिः।

---

[1]अथ महासौरशान्तिः।

"आरोग्यं भास्करादिच्छेत्" "आदित्यस्य सदा पूजन"मित्यादि वचनमेव तत्प्रमाणम्। तन्मन्त्रोपस्थानस्यापि पूजात्वादेव क्वचित् य एतेन सूर्य्यमहरहरुपतिष्ठन्ति तआयुष्मन्त आरोग्यवन्तो भवन्ति सर्व्वकाम्या भवन्ति सूर्य्यसायुज्यं गच्छन्तीति स्मर्य्यते। शातातपीये च जपैः सुरार्चनैरित्यादिना जपस्य रोगक्षयहेतुत्वेनोक्तत्वात्। उदुत्यं जातवेदसमिति त्रयोदशर्चं सूक्तं [2]इन्द्राहं द्विषतेरध(?)मित्यन्तं प्रस्कन्न ऋषिः गायत्रीच्छन्दः अन्त्याश्च तिस्रोऽनुष्टुभः। चित्रं देवानामिति षडृचं सूक्तं अदितिः शिशुः पृथिवी-

(१) उद्धृतः ऋचोऽस्मिन् महासौरशान्तिप्रकरणे बहुलं भ्रमसङ्कुलत्वात् शोधनानर्हा इति यथायथं रक्षिताः। इति सं।

(२) P. इन्द्राम्नरोऽहं • (?)।

रुतद्यौ(?)रित्यन्तं आङ्गिरसः कुत्स ऋषिः त्र्यष्टुप् छन्दः। इन्द्रमिन्द्रावरुणमिति(?) तृचं पृथिवी विधन्त(?) इत्यन्तं चतुर्ऋचो दीर्घतमा ऋषिः त्रिष्टुप् छन्दः। हंसः शुचिषदित्यस्य गौतमपुत्रो वामदेव ऋषिः जगतीच्छन्दः। यद्यदसूर्य्ये(?)त्यस्य मित्रो ऋषिः अनुष्टुप् छन्दः इत्यस्य सूर्य्य इति तृचं [1]कामघृष्टं रयस्तेना(?) इत्यन्तं मैत्रावरुणोवशिष्ठ ऋषिः विराट् छन्दः। उद्यत्येति च तिस्रोऽर्द्धर्चश्च विराट् छन्दः। उदित्यदर्शित(?)मिति तिस्रः मैत्रावरुणो वशिष्ठ ऋषिः दर्शत(?)मिति ब्रहती शान्तोशान्त(?)इति सतोब्रहती तत्त्वचु(?)रित्युष्णिक् [2]वण्महां (?) इति ब्रहती षट्सूर्य्य (?) इति सतोब्रहती भृगुपुत्रोजमदग्नि ऋषिः नमो मित्रस्येति द्वादशर्चं सूक्तं सूर्य्यपुत्रोऽभिहिततपा ऋषिः जगतीच्छन्दः शताभवेति (?) त्रिष्टुप् सूर्य्योनोदिवस्पात्विति पञ्चर्चं सूक्तं सूर्य्यपुत्रोऽभिहिततमा ऋषिः जगतीच्छन्दः विभ्राड़िति त्र्यृचं सूक्तं सूर्य्यपुत्रोऽभिहिततमा ऋषिः आस्तारपंक्तिः आयङ्गौरिति तृचं सूक्तं सर्पसंज्ञा ऋषिः गायत्रीच्छन्दः। सर्व्वत्र सूर्य्योदेवता इति महासौरमन्त्राः सौर्य्योपस्थाने विनियुक्ताः। महाभारते सहस्रनामाधिकारे—

रोगार्त्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात्।

विष्णुधर्म्मे श्रोदाल्भ्य उवाच,—

भगवन् प्राणिनः सर्व्वे ज्वररोगाद्युपद्रवैः।
दुष्टग्रहोपघातैश्च सर्व्वकालमुपद्रुताः॥

---

(१) P. कामं पूर्षं (?)।
(२) P. वभ्रमहां (?)।

आभिचारिककृत्याभिः स्पर्शरोगैश्च दारुणैः।
सदा संपीड्यमानास्तु तिष्ठन्ति मुनिसत्तम॥
केन कर्म्मविपाकेन विषरोगाद्युपद्रवाः।
न भवन्ति नृणां तन्मे यथावद् वक्तुमर्हसि॥

पुलस्त्य उवाच।

व्रतोपवासैर्यैः विष्णुर्नान्यजन्मनि तोषितः।
ते नरा मुनिशार्द्दूल ग्रहरोगादिभागिनः॥
यै र्न तत्प्रवणं चित्तं सर्व्वदैव नरैः कृतम्।
विषज्वरग्रहाणां ते मनुष्या दाल्भ्य भागिनः॥
आरोग्यं परमामृद्धिं मनसा यद्यदिच्छति।
तत्तदाप्नोत्यसन्दिग्धं परत्राच्युततोषकृत्॥
नाधीन् प्राप्नोति न व्याधीन् न विषग्रहवर्द्धनम्।
कृत्यास्पर्शभवं वापि तोषिते मधुसूदने॥
सर्व्वे दुष्टाः समास्तस्य सौम्यास्तस्य सदा ग्रहाः।
देवानामप्यधृष्योऽसौ यस्य तुष्टो जनार्द्दनः॥
यः समः सर्व्वभूतेषु यथात्मनि तथा परे।
उपवासादिना येन तोषितो मधुसूदनः॥
तोषिते तत्र जायन्ते नराः पूर्णमनोरथाः।
अरोगाः सुखिनो भोगान् भोक्तारो मुनिसत्तम॥
न तेषां शत्रवो नैव स्पर्शरोगाभिचारिकम्।
ग्रहरोगादिकं वापि पापकर्म्म न जायते॥

अव्याहतानि कृष्णस्य चक्रादीन्यायुधानि तम्।
रचन्ति सकलापद्भ्यो येन विष्णुरुपासितः॥

दाल्भ्य उवाच।

अनाराधितगोविन्दा ये नरा दुःखभागिनः।
तेषां दुःखाभिभूतानां यत्कर्त्तव्यं दयालुभिः॥
पश्यद्भिः सर्व्वभूतस्थं वासुदेवं महामुने।
समदृष्टिभिरासीनैस्तन्मम ब्रूहि शेषतः॥

पुलस्त्य उवाच।

गृहीत्वा तु समूलाग्रान् कुशान् शुद्धांश्च रोगिणः।
मार्ज्जयेत् सर्व्वगात्राणि कुशाग्रैर्दाल्भ्य शान्तिकृत्॥
रोगग्रहविषार्त्तानां कुर्य्यात् शान्तिमिमां शुभाम्।
विष्णुभक्तो विशेषेण शुचिस्तद्गतमानसः॥
ध्यात्वा भूत्वा शुचिर्विष्णोर्नामान्यङ्गेषु विन्यसेत्।
पूर्व्वे नारायणः पातु वारिजाचस्तु दच्चिणे॥
प्रद्युम्नः पश्चिमे पातु वासुदेवस्तथोत्तरे।
ऐशान्यां रचको विष्णुराग्नेय्यान्तु जनार्द्दनः॥
नैर्ऋत्यां पद्मनाभस्तु वायव्यां मधुसूदनः।
ऊर्द्ध्वं गोवर्द्धनो देवो धरण्यान्तु जनार्द्दनः॥
एताभ्यो दशदिग्भ्यस्तु सर्व्वतः पातु केशवः।
अङ्गुष्ठाग्रे च गोविन्दस्तर्ज्जन्याञ्च [1]गदाधरः॥

(१) P. मङ्गीधरः।

मध्यमायां हृषीकेशोऽनामिकायां त्रिविक्रमः।
कनिष्ठायां न्यसेद् विष्णुं करमध्ये च वामनम्॥
शिखायां केशवं न्यस्य मूर्द्ध्नि नारायणं न्यसेत्।
माधवञ्च ललाटे तु गोविन्दन्तु भ्रुवोः स्मृतम्॥
चक्षुर्मध्ये न्यसेत् कृष्णं श्रवणे मधुसूदनम्।
त्रिविक्रमं कपोलयोर्वामनं कर्णमूलयोः॥
दामोदरं दन्तपंक्तौ वराहं चिवुके तथा।
जिह्वायां वासुदेवन्तु त्वक्स्थितं गरुड़ध्वजम्॥
हृषीकेशं चोत्तरोष्ठे पद्मनाभं तथाधरे।
वैकुण्ठं कण्ठमध्ये तु अनन्तं नासिकोपरि॥
दच्चिणे तु भुजे विप्र विन्यसेत् पुरुषोत्तमम्।
वामे भुजे महायोगं राघवं हृदि विन्यसेत्।
पीतवासं सर्व्वतनौ हरिं नाभ्यान्तु विन्यसेत्।
करे तु दच्चिणे विप्र ततः सङ्कर्षणं न्यसेत्॥
वामे रिपुहरं विद्यात् कटिमध्ये जनार्द्दनम्।
पृष्ठे चितिधरं विद्यात् अच्युतं स्कन्धयोर्द्वयोः॥
वचःस्थले माधवन्तु कचयोर्योगशायिनम्।
स्वयम्भुवं मेढ्रमध्ये ऊर्व्वोश्चैव गदाधरम्॥
चक्रायुधं जानुमध्ये जङ्घयोरच्युतं तथा।
गुल्फयोर्नरसिंहन्तु पादपीठे मितौजसम्॥
अङ्गुल्यां श्रीधरं न्यस्य पङ्कजाचञ्च सन्धिषु।
रोमकूपे गुड़ाकेशं कृष्णं रक्तास्थिमज्जसु॥

नखेषु माधवञ्चैव न्यसेत् पादतलेऽच्युतम् ।
एवं न्यासविधिं कृत्वा यत् कार्य्यं शृणुत द्विजाः ॥
वैष्णवेन तु कर्त्तव्या सर्व्वसिद्धिप्रदायिनी ।
पूजाकाले च देवस्य स्नानकाले तथैवच ॥
होमारम्भे च कर्त्तव्यं त्रिसन्ध्यासु च नित्यशः ।
अभयं सर्व्वभूतेभ्यो विष्णुलोकञ्च गच्छति ॥

ॐनमः परमार्थायेत्याद्यपामार्जनमन्त्रस्य पुलस्त्य ऋषिः अनुष्टुप् छन्दः नरसिंहो देवता हरामुकस्येति वीजं तप्तहाटककेशान्त इति कीलकं अभीष्टसिद्धौ विनियोगः । पुलस्त्य उवाच ।

ॐनमः परमार्थाय पुरुषाय महात्मने ।
अरूपबहुरूपाय व्यापिने परमात्मने ॥
निष्कल्मषाय शुद्धाय ध्यानयोगरताय च ।
नमस्कृत्य तु वक्ष्यामि यत्तत् सिद्ध्यन्तमेवच ॥
त्रिविक्रमाय रामाय वैकुण्ठाय नराय च ।
नमस्कृत्वा प्रवक्ष्यामि यत् तत् सिद्ध्यन्तमेवच ॥
वराह नरसिंहेश वामनेश त्रिविक्रम ।
हयग्रीवेश सर्व्वेश हृषीकेश हराशुभम् ॥
अपराजित चक्राद्यैश्चतुर्भिः परमायुधैः ।
अखण्डितानुभावैस्त्वं सर्व्वदुष्टहरो भव ॥
हरामुकस्य दुरितं दुष्कृतं दुरुपोषितम् ।
मृत्युबन्धाभिरहितं दुरिष्टस्य च यत् फलम् ॥

[1]परापध्यानराहित्यं प्रत्युक्तं परिचारिकम् । (?)
परस्पर्शमहारोगप्रयोगं जरयाजर ॥
ॐनमो वासुदेवाय नमः कृष्णाय खड्गिने ।
नमः पुष्करनेत्राय केशवायादिचक्रिणे ॥
नमः कमलकिञ्जल्कपीतनिर्मलवाससे ।
महाहवरिपुस्कन्धघृष्टचक्राय चक्रिणे ॥
दंष्ट्रोद्धृतक्षितिभृते त्रयीमूर्त्तिमते नमः ।
महायज्ञवराहाय शेषभोगोरुशायिने ॥
तप्तहाटककेशान्त ज्वलत्पावकलोचन ।
वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते ॥
कश्यपाय द्विहस्ताय ऋग्यजुःसामरूपिणे ।
तुभ्यं वामनरूपाय क्रमते गां नमो नमः ॥
वराहशेषदुष्टानि सर्व्वपापहराणि वै । (?)
मर्द्द मर्द्द महादंष्ट्र मर्द्द मर्द्द च तत् फलम् ॥
नरसिंह करालास्य दन्तप्रान्तानलोज्ज्वल ।
भुक्तिमुक्तिनिदानेन दुष्टान् न्यस्यार्त्तिनाशन ॥
ऋग्-यजुः-सामगर्भाभि र्वाग्भिर्वामनरूपधृक् ।
प्रशमं सर्व्वदुष्टानि नमनस्य (?) जनार्द्दन ॥
ऐकाह्निकं द्व्याह्निकं च तथा त्रिदिवसज्वरम् ।
चातुर्थिकं तथात्युग्रं तथैकसन्ततज्वरम् ॥

(१) P. परापध्यानसहितैः प्रत्युक्तं गर्भचारिकम् । (?)

दोषोत्थं सन्निपातोत्थं तथैव चान्तकं ज्वरम् ।
शमं नयाशु गोविन्द छिन्धि छिन्ध्यस्य वेदनाम् ॥
नेत्रदुःखं शिरोदुःखं दुःखञ्चोदरसम्भवम् ।
अन्तःश्वासं वह्निः श्वासं परितापं सवेपथुम् ॥
गुदघ्राणाङ्घ्रिरोगांश्च कुष्ठरोगं तथा क्षयम् ।
कामलादीन् तथा रोगान् प्रमेहांश्चापि दारुणान् ॥
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
कफोद्भवाश्च ये केचिद् ये चान्ये सान्निपातिकाः ॥
अधातवश्च ये रोगा लूताविस्फोटकादयः ।
ते सर्व्वे प्रलयं यान्तु वासुदेवापमार्जिताः ॥
विलयं यान्तु ते सर्व्वे विष्णोरुच्चारणेन तु ।
क्षयं गच्छन्तु चाशेषास्ते चक्राभिहता हरेः ॥
अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥
स्थावरं जङ्गमं वापि कृत्रिमं वापि यद् विषम् ।
दन्तोद्भवं नखोद्भूतं आकाशप्रभवं विषम् ॥
लूतादिप्रभवं यच्च विषमत्यन्तदुःखदम् ।
शमं नयतु तत्सर्व्वं कीर्त्तितोऽस्य जनार्द्दनः ॥
ग्रहान् प्रेतग्रहांश्चैव तथावै डाकिनीग्रहान् ।
वेतालांश्च पिशाचांश्च गन्धर्व्वान् यक्षराक्षसान् ॥
शकुनीपूतनाद्यांश्च तथा वैनायकान् ग्रहान् ।
मुखमण्डां तथा क्रूरां रेवतीं वृद्धरेवतीम् ॥

वृद्धकाख्यांस्तथा चोग्रांस्तथा मातृग्रहानपि ।
बालस्य विष्णोश्चरितं हन्तु बालग्रहानिमान् ॥
वृद्धानां ये ग्रहाः केचिद् ये च बालग्रहाः क्वचित् ।
नरसिंहस्य ये दृष्ट्या दग्धा ये वापि यौवने ॥
सटाकरालवदनो नरसिंहो महाबलः ।
ग्रहानशेषान्निःशेषान् करोतु जगतः पतिः ॥
नरसिंह महासिंह ज्वलमानोज्ज्वलानन ।
ग्रहानशेषान् सर्व्वेश खाद खादाग्निलोचन ॥
ये रोगा ये महोत्पाता यद्विषं ये महाग्रहाः ।
यानिच ग्रहभूतानि ग्रहपीड़ाश्च दारुणाः ॥
शस्त्रक्षतेषु ये दोषा ज्वालागर्द्दभकादयः ।
तानि सर्व्वाणि सर्व्वात्मन् परमात्मन् जनार्द्दन ॥
अमोघकीर्त्ते सर्व्वात्मन् नित्याखण्डितशासन ।
किञ्चिद् रूपं समास्थाय वासुदेवास्य नाशय ॥
क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालातिभीषणम् ।
सर्व्वदुष्टोपशमनं कुरु देववराच्युत ॥
सुदर्शन महाज्वाल छिन्धि छिन्धि महारव ।
सर्व्वदुष्टानि रक्षांसि क्षयं यान्तु विभीषिताः ॥
प्राच्यां प्रतीच्यां दिशि च दक्षिणोत्तरतस्तथा ।
रक्षां करोतु सर्व्वात्मा नरसिंहः स्वगर्जितैः ॥
भुव्यन्तरीक्षे च तथा पार्श्वतः पृष्ठतोऽग्रतः ।
रक्षां करोतु भगवान् बहुरूपी जनार्द्दनः ॥

यथा विष्णु र्जगत् सर्व्वं सदेवासुरमानुषम् ।
तेन सत्येन दुष्टानि शममस्य व्रजन्तु वै ॥
यथा विष्णौ स्मृते सद्यः संक्षयं याति पातकम् ।
सत्येन तेन सकलं दुष्टमस्य प्रशाम्यतु ॥
परमात्मा यथा विष्णु र्वेदान्तेष्वभिधीयते ।
तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु ॥
यथा यज्ञेश्वरो विष्णुर्वेदान्तेष्वभिधीयते ।
तेन सत्येन सकलं यन्मयोक्तं तथाऽस्तु तत् ॥
शान्तिरस्तु शिवञ्चास्तु प्रणश्यत्वसुखञ्च यत् ।
वासुदेवशरीरोत्थैः कुशैर्निर्मार्जितं मया ॥
अपामार्जितगोविन्दो नरोनारायणस्तथा ।
तवास्तु सर्व्वदुःखानां प्रशमो वचनाद्धरेः ॥
शान्तिं समस्तरोगास्ते ग्रहाः सर्व्वे विषाणि च ।
भूतानि च प्रयान्त्वाशु संस्तुते मधुसूदने ॥
एतत् समस्तरोगेषु भूतग्रहभयेषु च ।
अपामार्जनकं शस्तं विष्णुनामाभिमन्त्रितम् ॥

एते कुशा विष्णुशरीरसम्भवा
जनार्द्दनोऽहं(यं) स्वयमेव चाग्रतः ।
हतं मया दुष्टमशेषमस्य च
स्वस्थो भवत्वेष यथा वचो हरेः ॥

शान्तिरस्तु शिवञ्चास्तु दुष्टमस्य प्रशाम्यतु ।
यदस्य दुरितं किञ्चित् तत्क्षिप्तं लवणार्णवे ॥

स्वास्थ्यमस्य सदैवास्तु हृषीकेशस्य कीर्त्तनात् ।
यत एवागतं पापं तत्रैव पथि गच्छतु ॥
एतद्रोगादिपीड़ासु जन्तूनां हितमिच्छता ।
विष्णुभक्तेन कर्त्तव्यमपामार्जनकं परम् ॥
अनेकसर्व्वदुष्टानि प्रशमं यान्त्यसंशयम् ।
सर्व्वभूतहितार्थाय कुर्य्यात् तस्मात् सदैव हि ॥

अत्र वरणाभावे विष्णुभक्तेन करुणया स्वेच्छया कार्य्यम् । अविशेषात् स्वदेहेऽपि ।

इत्यपामार्ज्जनस्तोत्रम् ।

विष्णुधर्म्मे विष्णुपञ्जरस्तोत्रम् ।

शौनक उवाच ।

त्रिपुरं जघ्नुषः पूर्व्वं ब्रह्मणा विष्णुपञ्जरम् ।
शङ्करस्य कुरुश्रेष्ठ रक्षणाय निरूपितम् ॥
वागीशेन च शक्रस्य बलं हन्तुं प्रयास्यतः ।
तस्य स्वरूपं वक्ष्यामि तन्निबोध महीपते ॥
विष्णुः प्राच्यां स्थितश्चक्री विष्णुर्दक्षिणतो गदी ।
प्रतीच्यां शार्ङ्गधृक् विष्णु र्विष्णुः खड्गी तथोत्तरे ॥
तिर्य्यङ्मनुष्यकुष्माण्डप्रेतादीन् हन्त्वशेषतः ।
खड्गधाराज्वलत्-ज्योत्स्नानिर्द्धूता ये समाहताः ॥

तेषान्तु सौम्यता सद्यो गरुड़ेनेव पन्नगाः ।
ये कुष्माण्डा स्तथा यक्षा ये दैत्या ये निशाचराः ॥
प्रेता विनायकाः क्रूरा मनुष्या जम्बुकाः खगाः ।
सिंहादयो ये पशवो दन्दशूकाश्च पन्नगाः ॥
सर्व्वे भवन्तु ते सौम्याः कृष्णशङ्खरवाहताः ।
चित्तवृत्तिहरा ये मे ये च मे स्मृतिहारकाः ॥
बलौजसाञ्च हर्त्तारश्छायाविभ्रंशकाश्च ये ।
ये चोपभोगकर्त्तारो ये च लक्षणनाशकाः ॥
कुष्माण्डास्ते प्रणश्यन्तु विष्णुचक्ररवाहताः ।
बुद्धिस्वास्थ्यं मनःस्वास्थ्यं स्वास्थ्यमैन्द्रियिकं तथा ॥
ममाऽस्तु देवदेवस्य वासुदेवस्य कीर्त्तनात् ।

पृष्ठे पुरस्तान्मम दक्षिणोत्तरे
विकोणतश्चास्तु जनार्द्दनो हरिः ।
तमाद्यमीशानमनन्तमीश्वरं
जनार्द्दनं न प्रणतोऽवसीदति ॥
यथा परं ब्रह्म हरिस्तथा परं
जगत्स्वरूपश्च स एव केशवः ।
सत्येन तेनाच्युतनामकीर्त्तनात्
प्रणाशमेतु त्रिविधं ममाशुभम् ॥

तथा नृसिंहकल्पे पातालनृसिंहाधिकारे,—

यन्मन्त्रजपसिद्ध्यर्थताड़िता डाकिनीग्रहाः ।
विद्रवन्ति भयत्रस्ताः पिशाचा ज्वरराक्षसाः ॥

इति । अनेन रक्षा ।

जङ्घाभ्यामन्त्रमाले तदुदरवितते खेटखड्गे च दोर्भ्यां
चापं बाणं कराभ्यां कमलमपि गदां पाशमप्यङ्कुशञ्च ।
ऊर्व्वोर्निक्षिप्य दैत्यं तदुदरकुहरं दारयन्तञ्च दोर्भ्यां
रक्ताज्वालामयं तं ज्वररणसमये चिन्तये दिव्यसिंहम् ॥

ॐ नमो भगवते नृसिंहाय प्रदीप्तसूर्य्यकोटिसहस्रसमतेजसे वज्रनखदंष्ट्रायुधाय स्फुटविकटविकीर्णकेशरमणिक्षुभितमहाम्भोधिदुन्दुभिनिर्घोषाय सर्व्वमन्त्रोत्ताराय एह्येहि भगवन्नरसिंह पुरुषपरापरब्रह्म सत्येन स्फुर स्फुर विजृम्भ विजृम्भ आक्रम आक्रम गर्ज गर्ज मुञ्च मुञ्च सिंहनादान् विद्रावय विद्रावय आविशय आविशय सर्व्वमन्त्ररूपाणि सर्व्वमन्त्रजातीश्च हन हन छिन्धि छिन्धि संक्षिप संक्षिप दर दर दारय दारय स्फुट स्फुट स्फोटय स्फोटय ज्वालामालासङ्घातमय सर्व्वतोऽनन्तज्वालवज्राशनिरवेण सर्व्वपातालान् छादय छादय सर्व्वतोऽनन्तज्वालवज्रशरपञ्जरेण सर्व्वपातालान् परिवारय सर्व्वपातालासुरलोकवासिनां हृदयान् व्याकर्षय व्याकर्षय शीघ्रं दह दह पच पच मथ मथ शोषय शोषय विक्रान्त विक्रान्त तावद् यावन्मे वशमागताः । पातालेभ्यः फट् आसुरीभ्यः फट् यन्त्ररूपेभ्यः फट् सहायमागच्छ भगवन् नृसिंहरूप विष्णो सर्व्वापद्भ्यः सर्व्वक्षयरूपेभ्यः रक्ष रक्ष हूं फट् स्वाहा नमोऽस्तु ते । इति केचित् पठन्ति ।

रोगार्त्तेन नामत्रयजपः कार्य्यः।

तद्विधिश्च। ब्रह्मोवाच—

अच्युतानन्तगोविन्दैश्चतुर्थ्यन्तैस्त्रिभिः पदैः।
नमोऽन्तैर्जपकाले च मूलमन्त्र उदाहृतः॥
अथवाऽपि समस्तैस्तु चतुर्थ्यन्तैकमन्त्रता।
तदृषिः शौनको ज्ञेयः पृथक्पक्षे पराशरः॥
व्यासश्च नारदश्चैव, विराट् छन्द उदाहृतम्।
परं ब्रह्म तथा प्रोक्ता हरिणा देवतेत्यपि॥
जपकाले च पूजायां नमः शब्दं प्रयोजयेत्।
तर्पणे तर्पयामीति द्वितीयान्तं प्रयोजयेत्॥
स्वाहान्तु होमकाले च चतुर्थ्यन्तं प्रयोजयेत्।
षडङ्गमन्त्र एतैश्च हृदयादिक्रमेण तु॥
नैतान्तं स्वयमेवैते प्रयोज्या मन्त्रिसत्तमैः।
अविदित्वा ऋषिच्छन्दोदेवताङ्गान्यपि द्विजाः॥
केवलं स्वयमेवैतज्जप्तारं रक्षति ध्रुवम्।
साङ्गन्तु योजयेन्नित्यं सप्त सप्त च सप्त च॥
अथ ध्यानं प्रवक्ष्यामि सर्व्वपापप्रणाशनम्।
शङ्खचक्रधरं देवं चतुर्भुजं किरीटिनम्॥
सर्व्वायुधैरुपेतं तं गरुड़ोपरिसंस्थितम्।
सनकादिमुनीन्द्रैश्च सर्व्वदेवैरुपासितम्॥

श्रीभूमिसहितं देवमुदितादित्यसन्निभम्।
प्रातरुद्यत्सहस्रांशुमण्डलोपमकुण्डलम्॥
सर्व्वलोकस्य रक्षार्थमनन्तं नित्यमेव च।
अभयं वरदञ्चैव प्रयच्छन्तं मुदान्वितम्॥
एवं ध्यात्वा हरिं नित्यं परब्रह्मस्वरूपिणम्।
प्रातर्मध्यन्दिने चैव सायाह्ने च विशेषतः॥
अर्च्चयेद् देवदेवेशं गन्धपुष्पजलादिभिः।
हविषा जलेन गन्धैश्च पुष्पैश्च मनसा हरिम्॥
अर्च्चन्ति शुचयो नित्यं ध्यानेन रविमण्डले।
किञ्चिद्ध्यानार्च्चनं कृत्वा जपेन्नित्यमतन्द्रितः॥
अशुचिश्चात्मना वापि मनसा पापमाचरन्।
शुचिरेव भवेन्नित्यं नामत्रयजपाद् द्विजः॥
अष्टोत्तरसहस्रं वा शतं वा जपसंख्यया।
रोगार्त्तान् मार्जयेन्मूर्द्ध्नि कुशैरेवाद्भिरेव वा॥
अभिषिञ्चेत् तथा मूर्द्ध्नि रविवारे तथाम्भसा।
नित्यमेव पिबेत् तोयमष्टाविंशतिसंख्यया॥
हुते घृततिलैर्दूर्व्वागुलूचीभिः पृथक् पृथक्।
लक्षं चैव जपेन्मन्त्रं महारोगस्य शान्तये॥
श्रीवृक्षाश्वत्थमूले वा रोगिणं संस्पृशेत् जपन्।
स्पृशन् जप्त्वा निरीक्षेत आदित्यं मनसा स्मरन्।
एवं कृतवतः पुंसो रोगशान्तिर्भविष्यति॥

तथा,—

रविवारे जले स्थित्वा नाभिमात्रे जपेन्नरः।
अष्टोत्तरसहस्रन्तु ज्वरशान्तिर्भविष्यति ॥
क्रूरग्रहादिग्रस्तन्तु स्पृष्ट्वा लक्षं जपेन्मनुम्।
असाध्योऽपि भवेत्स्वस्थो भस्मना ताड़येद्बुधः ॥

सुरार्चना च रोगशान्तये। आदित्यपूजा। ग्रहपूजा च।

महाभारते विष्णुपूजायाम्,—

तमेव चार्चयेन्नित्यं भक्त्या पुरुषमव्ययम्।
ध्यायंस्तुवन्नमस्यंश्च सर्व्वदुःखातिगो भवेत् ॥

तथा,—

चतुर्विधा भजन्ते मां द्विजाः सुकृतिनोऽर्जुन।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

आर्त्तो रोगी। धनिष्ठानक्षत्रे च सुपूजा व्याधिनाशाय। द्विजनक्षत्रे मम पूजा रोगनाशाय।

ब्रह्मपुराणनारदीयसंहितयोः,—

यं यं काममभिध्यायन् यजते नरकेश्वरीम् (?)।
तं तं काममवाप्नोति नरो वै नात्र संशयः ॥

रुद्राभिषेके बौधायनो व्याधिविमोचनार्थी। विष्णुधर्म्मोत्तरे,—

सर्व्वेषामेव कामानामीश्वरो भगवान् हरिः।
तस्य सम्पूजनादेव सर्व्वकामार्थमश्नुते ॥
विष्णुं सहस्रमूर्द्धानं चराचरजगद्गुरुम्।
सुवन्नामसहस्रेण ज्वरान् सर्व्वान् व्यपोहति ॥

त्रिशुक्लञ्च बलिं दत्त्वा मुच्यते मानवो ज्वरात्।
घृतोदनं पायसञ्च तथा दध्योदनं द्विज ॥
त्रिशुक्लस्तु बलिः पूर्व्वं सर्व्वकामप्रदः शुभः।

विष्णवे एष त्रिशुक्लबलिर्नम इति बलिदानम्। एवमन्यत्।

तिलक्षौद्रघृतैर्देवं स्नापयित्वा जनार्द्दनम्।
कृष्णत्रयेणानुलिप्य सम्पूज्य कुसुमैः सितैः ॥
पञ्चमुद्गं बलिं दत्त्वा ह्यतीसारात् प्रमुच्यते।

कृष्णत्रयं कस्तूरिकाकर्पूरकुङ्कुमानि।

वटकानि च भक्ष्याणि कल्माषं गाड़वं तथा।
मुद्गं पुष्पोदनञ्चैव पञ्चमुद्गो बलिः स्मृतः ॥

पुष्पमिश्रमोदनं पुष्पोदनम्। गाड़वाः स्वाद्वम्लकटुपाकवस्त्वाद्याः प्रलेह्याः।

त्रिसरस्नापितं देवं त्रिसुगन्धानुलेपितम्।
कृत्वा दत्वा त्रिशुक्लञ्च बलिं कासाद् विमुच्यते ॥

घृततैलमधुस्नानं त्रिसरस्नानम्। कर्पूरकुङ्कुमचन्दनैस्त्रिभिः सुगन्धिभिरनुलेपनम्। त्रिशुक्लबलिः पूर्व्वोक्तः।

तथा,—

स्नापयित्वा च तैलेन त्रिभिः कृष्णैर्विलेपयेत्।
पञ्चमाषं बलिं दत्वा वातव्याधिं विमुञ्चति ॥

कृष्णत्रयमुक्तम्।

कल्माषैरण्डरिकासचटकैर्गाड़वान्वितैः।
पञ्चमाषो बलिः प्रोक्तः सदामांसयुतैर्द्विजाः ॥

द्विस्नेहस्नापितं देवं शीतोष्णेनानुलेपितम्।
सम्पूज्य यमलैः पुष्पैः कोठं व्याधिं विमुञ्चति॥

घृतक्षीराभ्यां स्नानं द्विस्नेहस्नानम्। चन्दनकुङ्कुमाभ्यामनुलेपनं शीतोष्णानुलेपनम्। जातीनीलोत्पलं यमलं पुष्पम्।

तथा,—

संस्नाप्य पञ्चगव्येन दत्वा पञ्चानुलेपनम्।
पञ्चशस्यबलिं दत्वा कुष्ठं त्यजति मानवः॥

पञ्चगव्यं प्रसिद्धम्।

चन्दनागुरुकर्पूरमृगदर्पैः सकुङ्कुमैः।

पञ्चानुलेपनम्।

सपिष्टकमसूरैश्च समशस्योदनैश्च वै।

पञ्चशस्यो बलिः।

सर्व्वव्याधिसाधारणीं पूजामाह।

पञ्चभिः स्नापयित्वातु रसै र्देवं सनातनम्।
अनुलिप्य च धर्म्मज्ञ तथा पञ्चसुगन्धिना॥
पञ्चवर्णानि पुष्पाणि तथा दत्वा यथाविधि।
धूपञ्च पञ्चनिर्य्यासं दग्ध्वा चैवाप्यनन्तरम्॥
ततस्तु पञ्चमधुरं बलिं सम्यक् निवेदयेत्।
एतस्माद् व्याधितः पूर्व्वं मुच्यते नात्र संशयः॥
घृतं क्षीरं तथा क्षौद्रं दधि क्षीरञ्च पञ्चमम्।

इति पञ्चरसस्नानम्। पञ्चसुगन्धीन्युक्तानि। पीतशुक्लकृष्णरक्तश्यामवर्णानि पञ्चवर्णपुष्पाणि। शल्लकीगुग्गुलुकर्पूरवकुलकस्तूरिकाभिः पञ्चनिर्य्यासधूपः। क्षीरं क्षौद्रं घृतं द्राक्षां शर्कराञ्च पञ्चमधुरं बलिं दद्यात्।

चातुर्म्मास्यव्रते प्रत्यहं गणेशप्रणामाद् वा रोगनाशः। महास्नानाधिकारे,—

राजाग्निचौरदुर्भिक्षमहारोगाद्युपद्रवे।
उत्तमं स्नपनं कार्य्यं सर्व्वदोषोपशान्तये॥

इति वचनाद् विष्णोर्महास्नानं रोगशान्तये कर्त्तव्यम्। वशिष्ठकल्पानुसारे त्र्यम्बकमन्त्रेण महेशपूजायां रोगनाशः। पूजा च पञ्चोपचारेण। चित्रपटे घृतकुम्भे वा। लिङ्गे वा। प्रथममेवंरूपेण त्र्यम्बकध्यानं कार्य्यं मुक्तास्फटिकसङ्काशं रोगान् प्रति क्रोधावेशेन किञ्चिदारक्तमुखं साधकान् प्रति सुप्रसन्नमुखं चन्द्ररश्मिसमरश्मिभिः परीतं देव्या सपीनोत्तुङ्गकुचया सर्व्वावयवसन्निर्यातनेत्रया मुकुटालङ्कृतया माणिक्याभरणया एकहस्तस्थशर्कराखण्डखाद्यादिपूर्णपात्रया ऊर्द्धहस्तद्वयस्थपाशाङ्कुशया दक्षिणाधःकरस्थदर्व्या परिवेषितं दध्यन्नं हिरण्मयेन पात्रेण दक्षिणाधःस्थले गृह्णानं त्रिशूलमुद्गरनागपाशाङ्कुशयुक्तहस्तचतुष्टयं एकहस्तेन दध्यन्नकवलं ग्रसन्तं अपरहस्तेन वाहुमुद्रया शिरसि केशान् संयमयन्तं एवं षट्हस्तं हिरण्मयचन्द्रकान्तमयसप्तदशघटैः ऋषिभि र्देवकन्याभिश्चानवरतं मुहुर्मुहुरमृताम्भसा

सिच्यमानं ब्रह्मादिदेवैर्बृहस्पतिमुखमुनिभिः सिद्धार्थाचतदूर्व्वाचत-हस्तैर्नानास्तुतिभिः स्तूयमानं ध्यात्वा पूजनम् ।

अथवा—

येन रोगेण यथार्त्तस्तस्य रोगस्य चोपरि ।
नृत्यन्तं विभुमीशानं चिन्तयेत् तस्य शान्तये ॥
सञ्चिन्त्यैवं महादेवं ततः पञ्चोपचारकैः ।
पूजयेत् परया भक्त्या द्रव्यैर्द्रव्यमयै(?)रपि ॥

अत्र रोगमूर्त्तिं चिन्तयित्वा तस्योपरि नृत्यमानमीशं चिन्तयित्वा पूर्व्वोक्तान्यतमस्थाने पञ्चोपचारेण पूजनम् । एतावतापि रोगशान्तिः ।

इति कर्म्मविपाकोक्ता सुरार्चनारूपा रोगशान्तिः ।

जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमो भवेत् ।

इति कर्म्मविपाकोक्तहोमरूपा द्वितीयरोगशान्तिरुच्यते ।

तत्रच,—

शान्तिके गणशान्तिश्च ग्रहशान्तिकपूर्व्वकम् ।

इति शातातपीयकर्म्मविपाकोक्तेर्गणशान्तिर्विनायकशान्तिः कार्य्या । तथा ग्रहशान्तिश्च कार्य्या ।

जपकालेऽपि तत्सूक्तं कुष्माण्डगणहोमकृत् ।
सर्व्वपापविशुद्धयर्थं कुष्माण्डगणहोमकृत् ॥

इति कर्म्मविपाकोक्तेः कुष्माण्डहोमो गणहोमश्च कर्म्मविपाकमहार्णवविधिना सर्व्वरोगेषु कार्य्यः ।

वशिष्ठकल्पे,—

आरोग्यकामो जुहुयादर्ककाष्ठैर्घृतप्लुतैः ।
पयसा वापि जुहुयाद् गव्येनाज्येन वा पुनः ॥
पलाशस्य समिद्भि र्वा सर्व्वरोगोपशान्तये ।
एवं रोगः प्रशान्तः स्याद् रोगाणामप्यनुद्भवः ॥
अच्छिद्रैराम्रपत्रैस्तु पयोऽक्तैर्जुहुयाज्ज्वरे ।
गुलूचीगण्डिकाभि र्वा खादिरै र्वा घृतप्लुतैः ॥
प्रमेहे मधुना होमः पयसा वा घृतेन वा ।
औदुम्बरैः समिद्भि र्वा होम आमलकेन वा ॥

आमलकेन फलेन ।

गुग्गुलैश्चात्र होमः स्यात् तिलैः कृष्णैर्घृतेन वा ।
वर्द्धमानसमिद्धोमः सद्यः शूलहरो भवेत् ॥
करञ्जसमिधैर्वापि निर्गुण्डीसमिधैस्तथा ।
तैलाभ्यक्तैश्च जुहुयाद् वातरोगप्रशान्तये ॥
शान्त्यर्थमच्चिरोगाणां पलाशसमिधैर्हुनेत् ।
उन्मत्तसमिधा होमादपस्माराद् विमुच्यते ॥
कुबेराचीन्द्रवल्लीभ्यामन्त्ररोगप्रशान्तये ।
तैलेनाभ्यज्य जुहुयाद् वज्रकन्दैस्तथैव च ॥
मातुलुङ्गगुलूचीभ्यां होमः कामलनाशनः ।
मधुत्रितयहोमेन शान्तिः स्याद् राजयक्ष्मणः ॥
होमेनोत्पलमूलानां गर्भरोगः प्रशाम्यति ।
इच्छन् मधुरिकाशान्तिं मधुत्रितयसंयुतैः ॥

सक्तुकैर्वापि जुहुयात् पलाशे वा घृतप्लुतैः ।
देवकाष्ठैश्च जुहुयात् कण्ठरोगप्रशान्तये ॥
दन्तरोगेषु जुहुयाद् दन्तकाष्ठैर्घृतप्लुतैः ।
अथवा तैलसंयुक्तैर्जुहुयाद् गौरसर्षपैः ॥
ये चान्ये मुखजा रोगा कण्ठरोगास्तथैव च ।
ते सर्व्वे प्रशमं यान्ति तिलहोमात् घृतप्लुतात् ॥
औरसानाञ्च सर्व्वेषां रोगाणां शान्तिमिच्छता ।
शुण्ठीलवणपत्रांश्च होमं कुर्य्याद् द्विजोत्तमः ॥
अन्तस्तापे तु जुहुयात् पद्मपत्रैर्घृतप्लुतैः ।
दूर्व्वाभि र्वा पयोऽक्ताभि र्जुहुयाच्चन्दनेन वा ॥
शृङ्गाटकसमिद्धोमादतीसारः प्रशाम्यति ।
वैद्यशास्त्रेषु यत्प्रोक्तं यस्य रोगस्य भेषजम् ॥
तस्य रोगस्य शान्त्यर्थं तेन तेन तु होमयेत् ।
अथवानेन मन्त्रेण पावमानीभिरेव वा ॥
ज्वररोगग्रहादीनां सर्व्वेषामेव शान्तये ।
अथवा तर्पणं कुर्य्यान्मन्त्रं पूर्व्वोक्तसंख्यया ॥
नद्यां समुद्रगामिन्यां तड़ागेषु सरित्सु च ।
सर्व्वदा नियताहारो जपेन्मन्त्रं समाहितः ॥
शान्तये सर्व्वरोगाणां तथैवानुद्रवाय च ।
एवं होमं द्विजः कुर्य्यात् तर्पणं जपपूर्व्वकम् ॥
एकाहं वा त्र्यहं वापि दशाहं द्वादशाहकम् ।
पक्षं मासं द्विमासं वा मासत्रयमथापि वा ॥

अथवा चतुरोमासान् षण्मासानथ हायनम् ।
अब्दद्वयं त्रयं वापि मन्त्री कुर्य्यात् समाहितः ।
आकल्पत्र कालं कुर्व्वीत जपहोमादिकाः क्रियाः ॥

अत्र कालविशेषानुसारेण शतं सहस्रमयुतं नियुतं वा लक्षं वा कोटी र्वा कल्पनीयम् ।

रोगशान्तये दानानि ।

प्रतिकृतिदानं कर्म्मविपाकसारे,—स्वस्ति वाच्य सङ्कल्प्याचार्य्यब्रह्मजापकचतुष्टयवरणम् । आचार्य्यकर्म्म । षोड़शद्वादशाष्टहस्तो वा मण्डपः । त्रिभागेण मध्ये वेदी । आग्नेय्यां दिशि कुण्डम् । स्थण्डिलं वा हस्तमितम् । स्वर्णपलेनातङ्कनाम्नो रोगप्रतिमा । तदर्द्धेन सूर्य्यप्रतिमा । अथवा तदर्द्धेन द्वयो र्वा पलमानेन । व्याधिप्रतिमालक्षणं तत्तद्ग्रावैर्भिन्नम् ।

सूर्य्यलक्षणम् । सूर्य्यो द्विलोचनः पद्मयुतहस्तद्वयः । आचार्य्यः कृतोपवासो रात्रौ आतङ्कनाम्नोममुकव्याधिदेवतामधिवासयामीति मण्डपवेद्यां रोगप्रतिमां संस्थाप्य आतङ्कनाम्नेत्र अमुकरोगदेवतायै नम इति षोड़शोपचारैः पूजयेत् । ॐ घृणिः सूर्य्य आदित्यः ओरित्यष्टाक्षरमन्त्रेणाधिदैवतसूर्य्यप्रतिमामधिवास्य पूजयेत् । अर्द्धरात्रे मण्डपप्राच्यां पायसमांसादिभिर्बलिं चतुर्भिर्विप्रैर्युक्तो दद्यात् । अत्र मन्त्रः,—

आदित्या वसवो रुद्रा देवा भूतानि पन्नगाः।
बलिनानेन दत्तेन शान्तिं कुर्व्वन्तु सर्व्वशः॥

रात्रौ जागरणं कृत्वा प्रातः स्नात्वा नवे वाससी परिधाय शुक्लमाल्यगन्धः मण्डपं प्रविश्य वेदिकायां पिष्टचूर्णेन मण्डलं चतुरस्रं वा कृत्वा तन्मध्येऽष्टदलपद्मं विलिख्य तदुपरि तिलद्रोणानामष्टपञ्चचतुरस्रं वा कुर्य्यात्। तदुपरि पलचतुष्टयेन द्वयेन वा ताम्रपात्रम्। तत्पात्रं शालितण्डुलपूर्णं कृत्वा तण्डुलोपरि पद्ममष्टदलं लिखेत्। तदुपरि पञ्चगव्येन संस्नाप्य व्याधिप्रतिमां निवेश्य सूर्य्यप्रतिमामपि पूर्णपङ्कजोपरि निवेशयेत्। स्वर्णाब्जद्वन्द्वदलमूले शुक्रः दक्षिणे भौमः पश्चिमे बुधः उत्तरे राहुः। आग्नेयादि दलमूलेषु गुरुशनिचन्द्रकेतवः स्थाप्याः। सूर्य्यसमीपे अश्विन्यादिनक्षत्रत्रयम्। पूर्व्वादिदलाग्रेषु रोहिण्यादीनि त्रीणि। तत आतङ्कनाम्नीं व्याधिप्रतिमां सम्पूज्य सूर्य्यसौराष्टाक्षरेण ग्रहान् नक्षत्राणि च स्वस्वनाम्ना पूजयेत्। क्षीरं नैवेद्यम्। चतुर्भिर्ऋत्विग्भिः सहित आचार्य्यः वेदिकापूर्व्वे धान्यराशौ पञ्चरत्नस्वर्णयुतान् अश्वस्थानगजस्थानवल्मीकसङ्गमराजद्वारमृत्तिकान्वितान् चन्दनगोरोचनागुग्गुलुपुण्यतीर्थजलपूरितान् पञ्चपल्लवमुखान् श्वेतवस्त्रवेष्टितान् पञ्चकलशान् स्थापयेत्। तत आपो हिष्ठेति तृचेन हिरण्यवर्णा इति तृचेन पावमानाद्यनुवाकै र्वा शन्न इन्द्रानुवाकेन घोषशान्तिवाचनम्। चतुर्भि र्ब्राह्मणै र्बह्वृचघोषशान्तिवर्गास्तैत्तिरीयघोषशान्तिवर्गाश्च पठनीयाः। ततश्चतुर्भि र्जापकै र्मूलव्याधिदेवतामन्त्रः सूर्य्याष्टाक्षरमन्त्रः अयुतद्वयं

अयुतार्द्धं अयुतपादं वा जप्तव्यः। शुक्रादिग्रहाश्विन्यादिनक्षत्रमन्त्राणां शतं शतं सहस्रं सहस्रं वा दश दश वा जपः। सर्व्वव्याधिप्रतिमादाने सूर्य्याष्टाक्षरमन्त्र एव वा समुद्रादूर्म्मिः, वयं स्याम, चत्वारश्च, गाः, मूर्द्धानं दिवः, पुनस्त्वादित्या, सप्तते अग्ने इत्येतैः पूर्णाहुतयः। सर्व्वत्र हुतशेषसम्पातरक्षणम्। प्रणीतादिविमोक्षान्ते सुवर्णशलाकागर्भस्थेनाग्रदर्भमुष्टिना होमशेषसम्पृक्तेन प्राङ्मुखस्य रोगिणः शिरःप्रभृतिपादपर्य्यन्तं मार्जयेत्। ततो ब्राह्मणैः सह कलशै रोगिणं स्नापयेत्। स्नपनकाले सर्व्वे स्वस्वशाखोक्तशान्तिं पठेयुः। मङ्गलस्नानार्थं जलरक्षणम्। ग्रहाणां ग्रहशान्तिविधिना शक्तौ सत्यां पूजाहोमौ। अशक्तौ आवरणपूजारूपेण पूजा। बद्धानां बन्धनाद् विमोचनं आचार्य्यं पूजाभिमुखमभ्यर्च्य तदनुज्ञया अन्यं वा मध्याह्ने तस्मै व्याधिप्रतिमां सोपकरणां दद्यात्। तत्र मन्त्रः—

पद्मासनः पद्मकरः सप्ताश्वरथवाहनः।
प्रतिमानेन दत्तेन तुष्येत् सर्व्वजगद्गुरुः॥
इह जन्मनि यत् पापमन्यजन्मनि वा कृतम्।
प्रत्ययाप्रत्ययाभ्यां वा तत्सर्व्वं शमयत्वसौ॥

इमां व्याधिप्रतिमां सूर्य्यप्रतिमां सोपकरणां तुभ्यमहं सम्प्रददे। दक्षिणा निष्कशतम्। पञ्चगोदानाशक्तस्य पञ्च सुवर्णानि। प्रणिपत्य ग्रामसीमान्तमनुव्रज्य तन्मुखं नावलोकयेत्। अन्यस्य प्रतिग्रहीतृत्वे आचार्य्याय किञ्चिद् दत्वा सन्तोषात्तदनुज्ञया गृहं गत्वा ऋत्विग्भ्यो दक्षिणां दत्वा अश्विनौ पूजयित्वा धन्वन्तरि-

मभ्यर्च्य दीनानाथान् सन्तोष्य मङ्गलध्वनिना कुम्भावशिष्टजलेन स्नात्वा स्वस्ति वाच्य मिष्टान्नेन शतं तदर्द्धं भोजयित्वा बन्धुभिः समं स्वयं भुञ्जीत।

इति रोगप्रतिमादानविधिः। सर्व्वरोगेषु
तत्तत्रोगलक्षणं ज्ञात्वा कर्त्तव्यः।

अथासाध्यसर्व्वरोगसाधारणप्रतिमादानम्।

ब्रह्माण्डे,—शतनिष्केण तदर्द्धेन त्रिंशता वा काञ्चनेन व्याधिप्रतिमा। रत्नाभ्यां चक्षुषी रजतेनाक्षिगोलकम्। एवं कृत्वा ताम्रादिपात्रे श्वेततण्डुलपूर्णे निधाय वासोयुग्मेन वेष्टयित्वा हिरण्यभूषणमगुरुलेपनं दत्वा अलङ्कृताय विप्राय दद्यान्मन्त्रेण।

ये मे रोगाः प्रबाधन्ते देहस्थाः सततं ततः।
गृह्णीष्व प्रतिरूपेण तान् रोगान् द्विजसत्तम॥

प्रतिग्रहीता—

वाढ़मित्येव तद्वाक्यं गृह्णीयाद् व्याधिभिः सह।

नात्र पूर्व्ववन्मण्डपकुण्डादिकं यावदुक्तं ज्ञातव्यम्।

स्कन्दपुराणे सर्व्वव्याधिहरकांस्यदानम्। देव्युवाच।

केनोपायेन देवेश सर्व्वव्याधिसमन्वितः।
मुच्यते तन्महादेव ब्रूहि शम्भो वरप्रद॥

महादेव उवाच।

द्वात्रिंशत्पलसंयुक्तं कांस्यपात्रन्तु कारयेत्।
रम्यं हृद्यन्तु वै कार्य्यं तन्मध्यं घृतसंयुतम्॥
तन्मध्ये स्थापयेद् रोगी स्वर्णद्वयमतन्द्रितः।
गोमयेनोपलिप्ते तु भूमिभागे समाहितः॥
चतुर्द्रोणप्रमाणे तु तण्डुले तन्निवेशयेत्।
वस्त्रेणावेष्ट्य सूक्ष्मेण गन्धपुष्पैरलङ्कृतम्॥
ब्राह्मणं यौवनावस्थं वेदवेदाङ्गपारगम्।
आनीय तं गृहे रोगी पूजयेद् विधिपूर्व्वकम्॥
ब्राह्मणं मन्यते विष्णुं सदा धर्म्मविदुत्तमम्।
दद्याद् विप्राय विधिवत् तत्पात्रं ससुवर्णकम्॥
दक्षिणां तत्परीमाणां सुवर्णं च स्वशक्तितः।
शक्तौ सत्यां कदाचित्तु हानिपक्षो न युज्यते॥
अनेन विधिना यस्तु दद्याद्दानमनुत्तमम्।
कुष्ठी वा कुनखी वापि भगन्दरयुतोऽपि वा॥
नानाव्याधिसमायुक्तो मुच्यते नात्र संशयः।
चन्द्रवद् राजते रोगी पुष्टाङ्गः कामरूपधृक्॥

इति सर्व्वरोगहरकांस्यदानम्।

वायुपुराणे सर्व्वरोगहरदक्षिणामूर्त्तिदानम्।

पलत्रितयमितहेम्ना महेश्वरमूर्त्तिः सवराभयहस्ता। गोमयोपलिप्तभूमौ पञ्चवर्णेन पद्मं तदुपरि पद्मपुष्पं तत्र देवस्थापनम्। संसारतारकदयालसर्व्वसर्व्वकारणवेदवेदत्वेन ध्यानम्। श्वेतचन्दनश्वेतपद्मैः कर्पूरागुरुधूपक्षौमवस्त्रद्वयपायसनैवेद्यैः पूजा। वेदवेदाङ्गविदं शान्तं शैवं ब्राह्मणं पूजयित्वा तस्मै दद्यान्मन्त्रेण।

यत्पापं वाङ्मनःकायसम्भवं मम शङ्कर।
तव रूपप्रदानान्मे विलयं यान्तु सर्व्वशः॥
अन्ते पापि निरालम्बे त्वामेव शरणं गते।
मयि सर्व्वाघनाशाय दयां कुरु महेश्वर॥

शिवः संप्रीयतामिति दद्यात्। क्रियां तत्फलमात्मानञ्च समर्पयेद् भगवति।

महाभारते स्रग्गन्धधूपस्नानीयानुलेपनप्रत्येकदानं रोगनाशाय। पद्मपुराणे,—

पानीयं पायसं मुद्गाः शर्कराघृतसंयुताः।
इदमावश्यकं देयं सर्व्वरोगप्रशान्तये॥

सर्व्वरोगहरशतमानदानं बौधायनोक्तम्। अष्टपलमितकांस्यपात्रे तिलार्चनम्। तिलोपरि शुभ्रशालितण्डुलास्तदुपरि शुद्धसुवर्णेन शतकुञ्जलमितं शतमानं तत्र सवितृष्टाक्षरमन्त्रेणावाह्य रक्तवस्त्रमाल्यपुष्पप्रधानषोड़शोपचारेण सूर्य्यपूजा। गुणवते ब्राह्मणाय प्राङ्मुखाय स्वयमुदङ्मुखो दद्यान्मन्त्रेणानेन

पद्मोद्भवः पद्मकरः सप्ताश्वरथवाहनः।
शतमानेन दत्तेन तुष्टः सर्व्वजगद्गुरुः॥
इह जन्मनि यत्पापमन्यजन्मनि यत्कृतम्।
तत्प्रत्ययाप्रत्ययाभ्यां तत्सर्व्वं क्षपयत्वसौ॥

बौधायनः,—

असाध्यव्याधिना ग्रस्त उग्रेण प्राणहारिणा।
आ ते पितस्त्वित्यनेन सूक्तेन प्रत्यृचं शुचिः।
पूर्व्वमाज्याहुतीर्हुत्वा उपस्थाय च शङ्करम्।
हविः शेषेण वर्त्तेत एकान्तरमतन्द्रितः॥
पूर्णे मासे जयेन्मृत्युं रोगेभ्यश्च प्रमुच्यते।
होमः शक्त्या तु कुर्व्वीत तज्जपं द्विगुणं बुधः॥

सर्व्वरोगेषु,—

सर्व्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्।
धनं ना जीवनायालं गृहं वा सपरिच्छदम्॥

ब्रह्माण्डे,—

सर्व्वरोगप्रशमनं सौवर्णं दानमुच्यते।
ज्वरे मसूरिकायाञ्च राजयक्ष्मणि चैव तत्॥
गुल्मे तथायसं प्रोक्तं कुष्ठे राजतमुत्तमम्।
रत्नदानाच्छमं यान्ति गुदोत्पन्नाश्च सर्व्वशः॥
शमः स्यादपरव्याधे भूदानात् कमलासन।
शमार्थं वातरोगाणां पयोदानं विधीयते॥

कण्ठरोगोद्भवादीनां रोगाणां शान्तिमिच्छता।
धान्यं वासो हिरण्यञ्च दातव्यानि प्रयत्नतः॥
सर्व्वेषामक्षिरोगाणामाज्यं कनकसंयुतम्।
पानीयं पायसं मुद्गाः शर्करामधुसंयुताः॥
सर्व्वाङ्गवेपे कासे च खट्वां वै सोपवर्हणाम्।
दद्याद् वै कण्डुरोगाणां कम्बलं कमलोद्भव॥

विष्णुधर्म्मोत्तरे,—

लवणाज्यगुड़ोपेतमपूपं सूर्य्यवासरे।
सहिरण्यं नरो दत्वा न रोगैरभिभूयते॥

सम्बर्त्तः,—

औषधं स्नेहमाहारं रोगिणां रोगशान्तये।
ददानो रोगरहितः सुखी दीर्घायुरेवच॥

गारुड़पुराणे,—

लोके न सर्व्वरोगाणां क्षये कांस्येन तोलयेत्।
फलोद्भवं तथा दद्याद् ग्रहपीड़ार्थदारुणे॥
गौड़ं भस्मकरोगे च पैष्टं स्याद् गण्डमालके।
जाङ्गलं चाग्निमान्द्ये च रोगोत्पाते तु पौष्पकम्॥

जाङ्गलं कापित्थम्।

मधूद्भवं तथा देयं कासश्वासजलोदरे।
घृतोद्भवं तथा देयं छर्द्दिरोगोपशान्तये॥
क्षैरं पित्तविनाशाय दाधिकं भगदारणे।
लावणं वेपनाशाय पैष्टं दद्रुविनाशने॥

अन्नञ्च सर्व्वरोगस्य नाशने स्मृतमेव च॥
फले सोमो गुड़े आपस्ताम्बूले च विनायकः।
गन्धर्व्वाः कुसुमे चैव जाङ्गलेऽग्निस्तथैव च॥
मधूद्भवे च लक्ष्मीश्च घृते मृत्युञ्जयः स्मृतः।
क्षीरे तारागणाः सर्व्वे दध्नि सर्पाः प्रकीर्त्तिताः॥
पिष्टे प्रजापतिर्देवो ह्यन्ने सर्व्वाश्च देवताः।

एतेषु तुलापुरुषदानेषु मृत्युञ्जयपूजा पूर्व्वं कर्त्तव्या। प्रतिग्रहीतारमाचार्य्यं कृत्वा तेन पूजा। अष्टदलपद्मं कृत्वा तत्र लिङ्गं स्थापयित्वा मृत्युञ्जयमन्त्रस्य कह्लोल ऋषिः देवी गायत्रीच्छन्दः मृत्युञ्जयो देवता जंबीजं सः शक्तिः जां हृदयाय नमः जीं शिरसे स्वाहा जूं शिखायै वषट् जैं कवचाय हुं जौं नेत्रत्रयाय वौषट् जः अस्त्राय फट् एवमङ्गन्यासः। शिरोललाटकण्ठजिह्वामूलगण्डद्वयनाभिब्रह्मरन्ध्रगुह्येषु समस्तस्य मन्त्रस्य प्रत्येकं न्यासः। चतुर्भुज स्त्रिनेत्री दक्षोर्द्ध्वेऽक्षमाला वामोर्द्ध्वेऽमृतकुम्भः दक्षाधोऽभयं वामाधो वरं त्रिनेत्रो नीलवासाः शुक्लः। एवं ध्यानम्। ॐमिति तारेणावाहनम्। ॐ जुस इति गवादिभिः पूजा। जया विजया अजिता अपराजिता भद्रकाली कपाली क्षेमा मृत्युपराजिता इत्यष्टशक्तीनां पूर्व्वादिषु पूजा। ॐकारमुच्चार्य्य मृत्युञ्जय क्षमस्व यजमानहृदये स्थिरो भवेति यजमानहृदये विसर्ज्जनम्। आर्त्तदेहे स्वदेहवत् कराभ्याञ्च न्यासः। शिरोललाटजिह्वामूलगण्डद्वयनाभिब्रह्मरन्ध्रगुह्येषु। ॐ जुस इति न्यासः। तुला च सारदारुणा चतुर्हस्तमिता। काण्डयोरुत्तरं चतुर्हस्तं तोरणयुक्तं तत्र

शिक्यद्वयेन पट्टद्वयोपरिद्र्व्ययजमानयोरवस्थानम् । ततोऽवरुह्य दानम् ।

विष्णुधर्म्मोत्तरे,—

पुण्यं दिनमथासाद्य तृतीयायां विशेषतः ।
गोमयेनोपलिप्तायां भूमौ कुर्य्याद् धटं शुभम् ॥
दारवं शुभवृक्षस्य चतुर्हस्तप्रमाणतः ।
सुवर्णं तत्र बध्नीयात् स्वशक्त्या घटितं धटे ॥
सौवर्णं स्थापयेत् तत्र वासुदेवं चतुर्भुजम् ।
शिक्यद्वयन्तु बध्नीयात् स्थापयेत् पटिके ततः ॥
तत्रारोहेत वस्त्रस्रक्पुष्पालङ्कारभूषितः ।
अभीष्टदेवतां गृह्य स्नापयित्वा घृतादिभिः ॥
तुलादानस्य सर्व्वस्य विधिरेष प्रकीर्त्तितः ॥

एतावन्मात्रं कार्य्यम् । कृच्छ्रादिकरणाशक्तौ प्रत्याम्नायः ।

प्राजापत्ये तुलामेकां दद्यात् सान्तपने उभे ।
पराककृच्छ्रातिकृच्छ्रेतु तिस्रस्तिस्रस्तु ताः स्मृताः ॥
अष्टौ चान्द्रायणे देया स्तिस्रो वा शक्त्यपेक्षया ।
गवामभावे निष्कं स्यात् तदर्द्धं पादमेव वा ॥
कृच्छ्रोऽयुतञ्च गायत्र्या उदवासस्तथैव च ।
समुद्रगानदीस्नानं सममेतच्चतुष्टयम् ॥
कृच्छ्रो देव्ययुतञ्चैव प्राणायामशतद्वयम् ।
तिलहोमसहस्रञ्च वेदपारायणं तथा ॥

अन्यत्र च—

प्राजापत्ये भवेद्धेनुस्तिस्रः सान्तपने तथा ।
पञ्च चान्द्रायणे प्रोक्तास्तस्रो वापि धेनवः ॥

तथा,—

द्वेऽतिकृच्छ्रे समाख्याते धेनुः पञ्च पुराणिका ।
षष्ठी चतुर्विंशतिर्वा भोज्या द्वादश वा द्विजाः ॥
तत्समृद्धासमृद्धिभ्यां संख्यावैषम्यमुच्यते ।

तत्र गोमूल्यनिष्कं दीनारनिष्कं

दीनारो रौप्यकैरष्टाविंशत्या परिकीर्त्तितः ।
सुवर्णस्य सप्ततितमो भागो रौप्यक उच्यते ॥

अन्यत्र निष्कं सुवर्णाश्चत्वार इति ग्राह्यम् । शातातपः,—

गोदानेन वत्सयुक्ता गौः कृष्णा वासः सकाञ्चनम् ।

निवर्त्तनानि भूदानादीनि दद्यात् द्विजातये ।
सदुकूलं गवां दाने अश्वं सोपस्करं विदुः ।
महिषीं महिषीदाने दद्यात् स्वर्णाम्बरावृतान् ॥
दद्यादजमजदाने सुवर्णपलसंयुतम् ।
लक्षं पुष्पं पुष्पदाने सहस्रं विप्रभोजने ॥

इदं शक्तस्य अशक्तस्य न्यूनमपि । रुद्रजपो लक्षपुष्पैः पूजयित्वा त्र्यम्बकम् ।

एकादश जपेद् रुद्रान् दशांशं गुग्गुलेन तु ।
हुत्वाभिषेचनं कुर्य्यात् मन्त्रैर्वरुणदैवतैः ॥

धान्यदाने शुभं धान्यं खारीषष्टिसमन्वितम्।
वस्त्रदाने दुकूलञ्च देयं कर्पूरसंयुतम्॥

इति सामान्येन रोगनिवर्हणानि।

अथ ज्वरहराणि।

गार्ग्यः,—ज्वरकर्म्मणां शीतज्वरः तत्र जातवेदसमन्त्रेणायुतजपः शक्त्या द्विजभोजनम्।

सहस्रकलशस्नानं शतभोजनमेव च।

सहस्रकलशस्नानं रुद्रेणेनस्य पुरुषसूक्तेन विष्णोः। शतभोजनमङ्गम्। तथा मङ्गलकार्य्येषु सततं कोपादुष्णज्वरः। तत्र शान्तिः कर्म्मविपाकसंग्रहे,—सहस्रकलशस्नानं रुद्रेणेनस्य शतभोजनमङ्गम्। शातातपः,—

देवस्वहरणाच्चैव जायते विविधज्वरः।
ज्वरे रुद्रजपं कुर्य्यान्महारुद्रं महाज्वरे॥
महारुद्रं जपेद्रौद्रे वैष्णवे तदुद्वयं जपेत्।

रौद्रे ज्वरे महारुद्रं वैष्णवे ज्वरे पुरुषसूक्तरुद्रादिजपम्।

सर्व्वज्वरहरकुम्भदानम्।

अगारदाही ज्वरवान् तत्र कुम्भदानम्। आचार्य्यब्राह्मणयोवरणम्। शुभस्थाने द्रोणपञ्चकमितशुभतण्डुलस्थापनम्। तदुपरि

नवमयवस्त्रवेष्टितपुष्पमालालङ्कृतकुम्भस्थापनम्। मधुघृतखण्डगुड़जलानामन्यतमेन पूरणम्। तत्र शैवमन्त्रेण तान्त्रिकेण वैदिकेन वा महेश्वरपूजनम्। एवं वैष्णवमन्त्रेण विष्णुपूजनम्। कुण्डदक्षिणे स्थण्डिलेऽग्निस्थापनम्। तत्र शैवमन्त्रेण च समिदाज्यचरूणामेकैकस्य षट्त्रिंशद्व्यवस्थयाऽष्टोत्तरशतहोमः। एवं षट्वैष्णवमन्त्रेण समिदाज्यचरूणां प्रत्येकं त्रिंशद्व्यवस्थयाष्टोत्तरशतहोमः। त्रिभिः शतं शतं वा मार्जनान्ते ब्रह्मणे दक्षिणा। अथ हुतवते आचार्य्याय यथाशक्तिहिरण्यसहितकुम्भदानम्। देशकालवाक्यानन्तरं—

महेश देवदेवेश वासुदेव परात्पर।
कुम्भदानेन दत्तेन ज्वरः क्षिप्रं प्रशाम्यतु॥
ऐकाहिकं सान्निपातं तृतीयकचतुर्थकौ।
पाक्षिकं मासिकं वापि सांवत्सरिकमेव वा॥
नाशयेतां मम क्षिप्रं वासुदेवमहेश्वरौ।

ज्वरशान्तये हिरण्यसहितमिमं कुम्भं ददानि। ततो दक्षिणा पवित्रप्रतिपत्त्यादि।

अथ ज्वरतर्पणम्।

तत्र गोविन्दसंज्ञकतर्पणम्। ततोऽपुत्रतापसस्य। ततो ज्वरस्य।

योऽसौ सरस्वतीतीरे वत्सगोत्रसमुद्भवः।
त्रिरात्रज्वरदाहेन मृतो गोविन्दसंज्ञकः॥
ज्वरापनुत्तये तस्मै ददाम्येतत् तिलादिकम्।

इति त्रिः। योऽसौ गोदावरीतीर इति क्वचित् पाठः। ततः,—

योऽसौ च नर्म्मदातीरे अपुत्रस्तापसो मृतः।
रात्रौ ज्वरविनाशाय तस्मै दद्यां तिलोदकम्॥

इति त्रिस्तर्पणम्। ततोऽष्टशतं सहस्रमयुतं वा ज्वरस्य। तत्र मन्त्रः—

त्रिपाद् भस्मप्रहरणस्त्रिशिरा रक्तलोचनः।
स मे प्रीतः सुखं दद्यात् सर्व्वामयपतिर्ज्वरः॥

इति तर्पणम्। अथवा ज्वरशान्तये ज्वरप्रतिकृतिदानम्।

वशिष्ठकल्पे,—

अच्छिन्नैराम्रपत्रैश्च पयोऽक्तै र्जुहुयाज्ज्वरे।
गुलूचीपठिकादूर्व्वाखदिरै र्वा घृतप्लुतैः॥

नरसिंहपुराणे,—

तथा महाज्वरग्रस्ते धारां देवस्य मूर्द्धनि।
सन्ततां नरसिंहस्य कुर्य्याद् वा कारयेद् बुधः॥
होमश्च भोजनञ्चैव तस्य दोषः प्रशाम्यति।

सन्ततधाराहोमभोजनानां पृथगेव ज्वरशमकत्वम्। निरपेक्ष-विधानात्। तथा सुवर्णदानाधिकारे,—

ज्वरे मसूरिकायाञ्च तदेव परिकीर्त्तितम्।

———

अथ ब्रह्मपुराणोक्तज्वरबलिः।

अश्विनीनक्षत्रे शनैश्चरयुक्तवारे क्लेशितः पीड्यते दिनान्येकविंशतिः। अन्यवारे पञ्चदिनान्येकं वा। क्षीरवृक्षसमिद्भिर्होमः घृततिलैर्वा। पिष्टमयाश्वमुखे अश्विनावभ्यर्च्य सप्तव्रीहिबलिदानम्। अश्विनौ देवता। अश्विना भेषजमिति मन्त्रः। अश्विनोर्भैषज्येनेति केचित्। दानं दद्यात् सुवर्णम्। एवं सर्व्वत्र पिष्टमयी आकृतिः। भरण्यां सोमबुधवारेषु महता कष्टेन जीवति। होमस्तिलैः समधुघृतैः। गजमुखे तिलतण्डुलोदकदानं बलिः। यमो देवता। यमेन दत्तमितिमन्त्रः। कृष्णवर्णवस्त्रदानम्। कृत्तिकानक्षत्रगुरुवारे दिनानि षष्टिः। अन्यवारे नवदिनानि। घृतेन होमः। छागमुखेऽग्निमभ्यर्च्य दध्यन्नं दद्यात्। अग्निर्देवता। अग्नेत्वमिति मन्त्रः। सुवर्णरजतदानम्। रोहिण्यां रविबुधवारे सप्तरात्रमन्यवारे त्रिरात्रम्। कुङ्कुमेन होमः। ग्राम्यवीजेन वा। नागमुखे प्रजापतिमभ्यर्च्य दधिपयसा बलिः। मधुसर्पिषा वा। प्रजापतिर्देवता। प्रजापते न त्वदिति मन्त्रः। घृतकुम्भदानम्। मृगशिरसि सोमगुरुवारे रुद्रसंख्या दिवसाः। अन्यवारे पञ्च। गव्यपयसा होमः। मृगमुखे सोममभ्यर्च्य मृगमांसं दद्यात्। सोमो देवता। सोमोधेनुमिति मन्त्रः। पयस्विनीं श्वेतधेनुं दद्यात्। आर्द्रायां भौमशुक्रवारे सन्देहः। अन्यवारे न जीवति। सकृत् दध्ना होमः। ससर्पिर्मधुना वा। छागमुखे रुद्रमभ्यर्च्य रक्तं देयम्। रुद्रो देवता। नमस्ते रुद्र इति मन्त्रः। वृषसुरभी-

दानम्। पुनर्वसौ सोमवारे पञ्चरात्रं अन्यवारे सप्त। तिलैर्होमः। घृताक्तै स्तिलतण्डुलकैर्वा। शूकरमुखेऽदितिमभ्यर्च्य धान्याञ्जलिः। मर्कटमुखे वा। अदिति देवता। अदितिर्द्यौरितिमन्त्रः। सुवर्णं कम्बलं वा दद्यात्। पुष्यायां बुधवारे त्रयोदशदिनानि। अन्यवारे सप्त वा दश वा दिनानि। पायसतण्डुलै र्होमः। घृतपायसेन वा। नागमुखे बृहस्पतिमभ्यर्च्य दधिदानम्। बृहस्पति देवता। बृहस्पते अतीति मन्त्रः। सुवर्णदानम्। अश्लेषायां सोमशुक्रवारे न जीवति। अन्यवारे नवरात्रम्। सर्पिर्युक्तैर्ग्राम्यौषधिभिर्होमः। वटबीजैर्वा। मार्जारमुखे सर्पानभ्यर्च्य दधि मधु घृतं दद्यात्। सर्पोदेवता। नमोऽस्तु सर्पेभ्य इति मन्त्रः। घृतपूर्णघटदानम्। मघायामादित्यबुधशनिवारे नवदिनानि। अन्यवारे न जीवति। घृताक्ततिलतण्डुलै र्होमः। वानरमुखे पितॄनभ्यर्च्य तिलमाषं दद्यात्। पितरो देवता। नमो वः पितर इति मन्त्रः। तिलमाषदानम्। पूर्व्वफल्गुन्यां सोमशुक्रवारे दिनान्येकादश। अन्यवारे मासद्वयम्। माषयुक्ताक्षतैर्होमः। कपिमुखे तिलोदनदानम्। भगो देवता। इमा गिर इति मन्त्रः। घृतपूर्णताम्रपात्रदानम्। पञ्चरत्नानि वा। उत्तरफल्गुण्यां भौमशुक्रवारे दिनान्येकविंशतिः। अन्यवारे पञ्चदश। सर्पिःप्रियङ्गुभिर्होमः। दध्ना वा। सर्पिः पलाशेन वा। गोमुखे प्रभूतशाकदानम्। प्रभूतगव्यं वा। अर्य्यमा देवता। महि त्रीणामिति मन्त्रः। हिरण्यं रजतं वा देयम्। हस्तायां शनैश्चरादित्यबुधवारे दिनानि पञ्चदश। अन्यवारे नव। दध्यक्ततिलै र्होमः। महिष-

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1235.



नित्याचारप्रदीपः ।

NITYĀCĀRAPRADĪPAḤ.

BY

NARASIṂHA VĀJAPEYĪ

EDITED BY

PAṆḌITA VINODA VIHĀRI BHAṬṬĀCĀRYYA.

VOLUME II. FASCICULUS III.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS.
No. 5, Nandakumar Choudhury's 2nd Lane.

AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.

1910.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,

11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

•Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ... ... Rs.	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
*Agni Purāṇa, Fasc. 6–14 @ /10/ each	5	0
Aitarēya Brāhmaṇa, Vol. 1, Fasc. 1–5 ; Vol. II, Fasc. 1–5 ; Vol. III. Fasc. 1–5, Vol. IV, Fasc. 1–8 @ /10/ each	14	6
Aitereya Lochana.	2	0
•Aṇu Bhāṣhya, Fasc. 2–5 @ /10/ each	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-	1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each	1	4
Atmatattaviveka, Fasc. I. @ /10/ each	0	10
Açvavaidyaka, Fasc. 1–5 @ /10/ each	3	2
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–6 ; Vol. II. Fasc. 1–5 @ 1/ each	11	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1–2, Vol 2, Fasc. 1 @ /10/ each	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-2 @ /10/ each ...	3	2
*Bhāmatī, Fasc. 4–8 @ /10/ each	3	2
Bhaṭṭa Dīpikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ...	4	6
Baudhyostatrasangraha	2	0
Brahma Sutra, Fasc. 1 @ /10/ each	0	10
Bṛhaddēvatā Fasc. 1–4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1–6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	3	2
Cri Cantinatha Charita, Fasc. 1	0	10
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1–7, Vol II, Fasc. I-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3	2
Ditto Voi. VII, Fasc. 1-3 @ /10/	1	14
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1–12 @ /10/ each	7	8
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1–25 ; Vol. III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 Vol. IV. Fasc 1–6 @ /10/ each	36	14
Ditto Vol. 4, Fasc. 7, @ 1/4/ each	1	4
Ditto Vol. IV, Fasc. 8, @ /10/	0	10
Çlockavartika, (English) Fasc. 1- 7 @ 1/4/ each	8	12
*Çrauta Sūtra of Āpastamba, Fasc. 12–17 @ /10/ each	3	12
Ditto Çānkhāyana, Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 ; Vol 4. Fasc. 1 @ /10/ each	10	0
Çrī Bhāshyam, Fasc 1–3 @ /10/ each	1	14
Dāna Kriyā kaumudī, Fasc 1--2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1–7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol. I. @ /10/ each	3	2
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each	2	8
Haralata	1	14
Karmapradiph, Fasc. I	1	4
Kāla Viveka, Fasc. 1–7 @ /10/ each	4	6
Kātantra, Fasc 1–6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ 1/4/ each	17	8
*Kūrma Purāṇa, Fasc. 8–9 @ /10/ each	4	6
Lalita-Vistara, (English) Fasc. 1–3 @ 1/- each	3	0
Madana Pārijāta, Fasc. 1–11 @ /10/ each	6	14
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1–9 ; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-9 @ /10/ each	18	12
Manuṭikā Sangraha, Fasc. 1–3 @ /10/ each	1	14

Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each ... ... Rs.	55	8
Ditto (English) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-6 @ 1/4/ each	17	8
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc. 1--19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farnang-i-Rashīdi, Fasc. 1–14 @ 1/8/ each	21	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ...	4	0
Futūḥ-ush-Shām of Wāqidī, Fasc 1--9 @ /10/ each	5	10
Ditto of Āzādi, Fasc. 1--4 @ /10/ each	2	8
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi. Fasc. 1 @ /12/ each ...	0	12
History of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each	7	8
Iqbālnāmah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-' Ālamgīrī, Fasc. 1--6 @ /10/ each	3	12
Maāṣīr-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each	3	2
Muntakhabu-t-Tawārikh, Fasc. 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc 1 @ 1/ each	16	0
Muntakhabu-l-Lubāb, Fasc. 1- 19 @ /10/ each	11	14
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmi's Khiradnāmah-i-Iskandari. Fasc 1–2 @ /12/ each	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāzu-s-Salātīn, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Tabaquāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni Fasc. 1--7 @ /10/ each ...	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif. Fasc. 1--6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngirī, (Eng) Fasc. 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each	3	2
Ẓafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each 20 0
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Assiatic Society for 1870 (8). 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7). 1877 (8). 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, Part I, A to E ; Part 2, F to M 4 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each 18 0
9. Kaçmīraçabdāmṛta, Parts I & II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each 34 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer, Asiatic Society," only.

1-7-10.

Books are supplied by V. P. P.

मुखे पुष्करदानम्। सविता देवता। देव सवितरिति मन्त्रः। पयस्विनीधेनुदानम्। चित्रायां सोमवारे दिनानि दश। अन्यवारे सार्द्धमासम्। सघृतदुग्धनवान्नैर्होमः। व्याघ्रमुखे तगरपुष्पबलिः। त्वष्टा देवता। चित्रावसो इति मन्त्रः। घृतोदनदानम्। स्वातौ शनिवारे दिनानि सप्त। अन्यवारे मासद्वयम्। साज्ययवैः साज्ययवभक्तैर्वा होमः। महिषमुखे गुड़तण्डुलाः। वायुर्देवता। आ नो नियुद्भिरिति मन्त्रः। पयःकुम्भदानम्। विशाखानक्षत्रे भौमादित्यवारे महता कष्टेन जीवति। अन्यवारे विंशतिदिनानि। अष्टाविंशति र्वा। पयोवसाहोमः। व्याघ्रमुखे गुड़ोदनम्। इन्द्राग्नी देवता। इन्द्राग्नी आगतमितिमन्त्रः। पीतरक्तवस्त्रदानम्। अनुराधायां बुधवारे चत्वारिंशद्दिनानि। अन्यवारे दश। माषभक्तेन होमः। गोमुखे जलसहितं गुड़ोदनम्। मृगमुखे वा। मित्रो देवता। मित्रस्य चर्षणी धृत इति मन्त्रः। चन्दनदानम्। ज्येष्ठायां गुरुशुक्रवारे दिनानि दश। अन्यवारे पञ्चदश। कण्टकमिश्रगोरोचनाधान्यमिश्रितयवै र्वा होमः। सिंहमुखे तिलदानम्। मार्जारमुखे वा। कपिमुखे सौवीर इति केचित्। इन्द्रोदेवता। सजोषा इन्द्रइतिमन्त्रः। सुवर्णदानम्। मूलायां भौमशनिवारे महता कष्टेन जीवति। अन्यवारे न जीवति। क्रमुकमूलेन होमः। धान्यतिलयवगोधूममधुमाषै र्वा। यथोपपन्नमूलै र्वा। अश्वमुखे मार्जारमुखे वा तिलदानं बलिः। अजामुखे शीतजलमिति क्वचित्। निर्ऋति र्देवता। असुन्वन्तं इति मन्त्रः। कृष्णवस्त्रतिलमाषकाष्टदानम्। पूर्व्वा-

षाढ़ायां सोमबुधवारे पञ्चदिनानि। अन्यवारे त्रीणि। शाकबीजेन शालिभक्तघृतदुग्धेन वा होमः। कुम्भीरमुखे लवणदानम्। कूर्म्ममुखे वा। आपो देवता। इदमाप इति मन्त्रः। जलकुम्भदानम्। उत्तराषाढ़ायां गुरुवारे दिनत्रयम्। अन्यवारे सप्तदिनानि विंशति र्वा। करञ्जबीजैर्माषतिलै र्वा होमः। गोमुखे गोमायुमुखे वा तिलोदनं बलिः। विश्वेदेवा देवता। विश्वे देवास इति मन्त्रः। सुवर्णमाषद्वयदानम्। श्रवणायां शनिरविवारे दिनानि पञ्च। अन्यवारे मासद्वयम्। रक्तधान्यतण्डुलहोमः। महिषमुखे रक्तबलिः। हरिर्द्देवता। तद्विष्णोरितिमन्त्रः। पीतवस्त्रदानम्। धनिष्ठायां सोमसौम्यवारे दिनानि पञ्च विंशति र्वा। अन्यवारे पञ्चदश। न्यग्रोधोदुम्बराश्वत्थसमिद्भिर्होमः। माषभक्ततिलै र्वा। मनुष्यमुखे शीतलजलं बलिः। वसवो देवता। वसूनां भागो इति मन्त्रः। सुवर्णदानम्। शतभिषायां गुरुशुक्रवारे दिनानि शतम्। अन्यवारे एकादश। यवैरन्नतिलाभ्यां वा होमः। परिजातपुष्पैरिति क्वचित्। गोमायुमुखे तण्डुलम्। वरुणो देवता। इमं मे वरुण इति मन्त्रः। पञ्चरत्नदानम्। पूर्व्वभाद्रपदे भौमशनिवारे कष्टेन जीवति। अन्यवारे मासद्वयम्। पलाशसमिद्भिर्होमः। गोमुखे गोमायुमुखे वा तण्डुलबलिः। अजैकपाद् देवता। ऋतधामासीतिमन्त्रः। पयस्विनीधेनुदानम्। उत्तरभाद्रपदे सोमबुधवारे दिनान्यष्टौ। अन्यवारे पञ्चदश। पयसा घृतेन जातीपत्रैर्वा होमः। पृषदाज्येन वा। गोमुखे तण्डुलबलिः। अहिर्बुध्नो देवता। तत्र अहिर्बुध्न्यो इति मन्त्रः।

घृतकुम्भदानम्। रेवत्यां गुरुवारे दिनैकम्। अन्यवारे दश। सयवाक्षतैः पलाशसमिद्भि र्वा होमः। अखण्डफलानामष्टोत्तरशतं वा। गजकुम्भे मधुयुक्तशष्कुलीयुग्मं बलिः। पूषादेवता। पूषन्नेकर्षे इति मन्त्रः। नानापिष्टकदानम्।

अत्र होमद्रव्याणां गायत्र्याभिमन्त्रणम्। तत्तन्मन्त्रैर्होमः। होमश्च रात्रौ सन्ध्याप्रभृति। होमानन्तरं बलिः। तदनन्तरं दानमिति केषाञ्चित् सम्प्रदायः। अन्येषां तु गायत्र्या सर्व्वनक्षत्रशान्तौ यथोक्तद्रव्यहोमः।

पूर्व्वोक्त एव। होमानन्तरं दानम्। सन्ध्यानन्तरं पिष्टमयप्रतिकृतिमुखे तत्तन्मन्त्रैस्तत्तद्देवतापूजनम्। ततोऽश्विभ्यामेष बलिर्नम इत्येवं बलिदानम्। एवं त्रिरात्रं पञ्चरात्रं सप्तरात्रं वा व्याधिगुरुलाघवमपेक्ष्य। अत्र सर्व्वज्वरेषु

मृत्युञ्जयाणुना होमः कर्त्तव्यो ज्वरशान्तये।

इति कर्त्तव्यम्।

इति ज्वरहराणि।

अथातीसारहरम्।

कर्म्मविपाके,—

स्मार्त्ताग्निं शमयेद् यस्तु सोऽतिसारयुतो भवेत्।
अग्निरस्मीत्यृचं जप्त्वा दशांशं जुहुयात् तिलान्॥
सर्पिषा वा प्लुतान् दद्याद्धिरण्यं ब्राह्मणाय वै।

जपसंख्या व्याध्यनुसारेण। तत्राग्न्युत्सादप्रायश्चित्तमपि कर्त्तव्यमिति महार्णवे।

पाद्मे,—त्रेताग्निनाशादतीसारः। तत्प्रतीकारो बौधायनोक्तः—पलेनार्द्धेन वा सुवर्णेन ताम्रेण वह्निमूर्त्तिं मेषस्थां कृत्वा रक्तवस्त्ररक्तचन्दनरक्तपुष्पमुक्तादामविभूषितां कृत्वा ब्राह्मणायाग्निहोत्रिणे ब्रह्मचर्य्यस्थाय वस्त्राङ्गुलीयकभूषिताय दद्यात्।

'त्रेताग्निरूपोऽग्निस्त्वमन्तश्चरसि वै नृणाम्।
त्वं वेत्थ प्राक्तनं पापमतीसारं विनाशय॥

अनेन मन्त्रेण दानम्। शातातपः,—

स्त्रीहन्ता चातिसारी स्यादश्वत्थान् रोपयेत्तु सः।
दद्याच्च शर्करां धेनुं भोजयेच्च शतं द्विजान्॥

प्रत्येकं समस्तं वा रोगानुरूपेण।

दावाग्निदायकश्चैव रक्तातीसारवान् भवेत्।
तेनोदपानं कर्त्तव्यं रोपणीयस्तथा वटः॥

उदपानं शक्त्या कूपादि।

अथ ग्रहणीरोगे।

कर्म्मविपाके,—कारणं विना भार्य्यात्यागे ग्रहणीरोगः। तत्र शिवसङ्कल्पसूक्तस्य माध्यन्दिनषड़र्चस्याष्टोत्तरसहस्रजपः। सौरमन्त्रस्य उद्यन्नुद्यन्निति तृचस्य जपः।

(१) P. त्रेताग्निरूपोऽग्निरीड्यस्त्वमन्त०।

धेनुं सलक्षणां दद्याद् वस्त्राभरणभूषिताम्।

पद्मपुराणे,—'ग्रहणीवान् प्रत्युहेत निदानम्। हेमशृङ्गा रौप्यखुरा वासोभिर्वेष्टिता घण्टाचामरभूषिता पयस्विनी धेनुर्देया। इदं विष्णुः, प्रोत विष्णुः, विष्णोर्नुकमिति मन्त्रत्रयेण समिदाज्यचरुहोमः। होमान्ते हुतवते तस्मै वस्त्राङ्गुलीयकैः पूजिताय विष्णुवद्दानम्। तत्र मन्त्रः—

देवकीपुत्र चानूरकंसासुरविनाशक।
कृतेनानेन दानेन ग्रहणी शान्तिमृच्छतु॥

प्रत्येकं द्रोणपञ्चकमिति धान्यनवकेन सह दानमिदम्। हिरण्यदक्षिणासहितञ्च।

अर्शोरोगहरम्।

कर्म्मविपाके,—भृतकाध्यापक--भृतकाध्यापित--गणपूर्व्वक--होमयज्ञकर्त्ता अर्शोरोगवान्।

तन्निवृत्तौ प्रकुर्व्वीत कृच्छ्रं चैवातिकृच्छ्रकम्।
चान्द्रायणञ्चैव तथा जपेत्सूक्तञ्च पौरुषम्॥
उद्यन्नुद्यन्नृचं विष्णुर्हृदयञ्च जपेत् तथा।
अग्निवर्णां शुभामिति जपेत् सूक्तं समाहितः॥
सहिरण्यं घृतं दद्यात् श्रोत्रियाय कुटुम्बिने।

(१) P. ग्रहणीवानप्रत्यहेतुनिदानं। (पाठद्वयस्य कस्यापि नार्थः सङ्गच्छते। सं।)

कृच्छ्रादीनां व्याधिशक्त्याद्यनुसारेण व्यस्तानि वा समस्तानि वा योज्यानि।

गुदरोगहरम्।

शातातपीये,—देवालये शकृत्करणात् गुदरोगः। मासं सुरार्च्चनम्। गोदानद्वयम्। प्राजापत्यञ्चैकम्। तत्र निष्कृतिः। व्यस्तं समस्तं वा। सुरार्च्चनं सूर्य्यार्च्चनम्। विण्मूत्रोत्सर्गेऽकृतशौचस्य भोजने सततं गुदस्रावः। कृच्छ्रातिकृच्छ्रचान्द्रायणानि। व्यस्तसमस्तानि। अक्षीभ्यामिति सूक्तेन क्षीरसर्पिर्होमः। उद्यन्नुद्यन्नृचस्य जपः।

श्वासरोगे।

कृतघ्नो जायते मर्त्त्यः कफवान् श्वासकासवान्।

कर्म्मविपाकसमुच्चये,—

चान्द्रायणत्रयं कुर्य्यात् पञ्चाशद्विप्रभोजनम्।
अग्निर्नेताख्यसूक्तेन चरुणा सर्पिषा युतम्॥
अष्टाधिकं च जुहुयादस्य रोगस्य शान्तये।

वायुपुराणे तु तद्विष्णोरिति सूक्तेन जपो ब्राह्मणभोजनञ्च। एतद्व्यस्तं समस्तं वा। अन्यत्र च कुरुक्षेत्रादिदेशेषु महादानग्रहणं निषिद्धं कृष्णाजिनादिग्रहणं स्वस्यापात्रस्य (शय्यापात्रस्य)

वा प्रतिग्रहः निन्दितेभ्यो वा ग्रहणं श्वासकासहेतुः। तत्प्रायश्चित्तं महिषीदानम्। पुरुषसूक्तजपः। सहस्रनामजपो वा। उद्यन्नुद्यन्नृच (चा) चर्व्वाज्यहोमश्चाष्टोत्तरशतम्। हिरण्यदानम्। रक्तवस्त्रत्रयदानम्। पञ्चाशद्विप्रभोजनम्। सहस्रकलशस्नानञ्च रुद्रेण। तत्रापि व्यस्तं समस्तं वा। शातातपे तु पिशुनः श्वासकासी घृतपलसहस्रं दद्यात्। पाद्मे,—ध्वजपाशदानम्। सुवर्णेन रौप्येण वा पलेन पलार्द्धेन वा ध्वजं पाशञ्च कारयेत्। मुक्ताविसक्तमरकतयुक्तं ध्वजं पाशञ्च। तत्र शुभस्थाने कुम्भस्थापनम्। कुम्भे तिलद्रोणपञ्चकस्थापनम्। कुम्भस्य वस्त्रेण वेष्टनम्। गन्धपुष्पाक्षतैः पूजनम्। तदुपरि ध्वजपाशयोः स्थापनम्। तत्पार्श्वे निष्कद्वयस्थापनम्। कुम्भे वरुणवायुपूजनम्। षोडशोपचारेण तल्लिङ्गमन्त्राभ्याम्। स्वनाममन्त्रेण ध्वजपाशपूजनम्। श्रोत्रियाय कुटुम्बिने दानम्। तत्र मन्त्रः—

नमः पाशभृते तुभ्यं नमो ध्वजधराय ते।
जलाधिपतये तुभ्यं वायो सर्व्वजनप्रिय॥
युवयोः प्रीतये दत्तौ ध्वजपाशौ सुरार्च्चितौ।
श्वासकासौ हरेतां मे प्रीतौ सर्व्वजनाश्रयौ॥

इत्युक्त्वा निष्कद्वयसहितौ दद्यात्। दक्षिणा काञ्चनम्।

क्षयरोगहराणि।

ब्रह्महा क्षयरोगी स्यात्।

प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एवच।

इति षड़ब्दकृच्छ्रं प्रायश्चित्तम्। कदलीदानम्। बौधायनः,— पत्रयुतः कदलीवृक्षः फलेन मत्वा फलद्वयेन त्रयेण वा सूत्रेणावेष्टितः। कदलीवृक्षपूजानन्तरं ब्राह्मणत्रयभोजनम्। त्र्यम्बकेण तिलाज्याष्टोत्तरशतहोमः। होमकर्त्रे ब्राह्मणाय वस्त्रालङ्कारपूजिताय धर्म्मज्ञायात्मवेदिने स्वर्णकदलीदानम्। तत्र मन्त्रः,—

हिरण्यगर्भ पुरुष परापर जगन्मय।
रम्भादानेन देवेश क्षयं नाशय मे प्रभो॥

ततः पुण्याहवाचनम्। बन्धुभिः सह भोजनम्।

शातातपः,—

राजहा राजयक्ष्मी स्यादेषा तस्यापि निष्कृतिः।
गोभूहिरण्यमिष्टान्नजलवस्त्रप्रदानतः॥
गुड़धेनुप्रदानेन जलवस्त्रप्रदानतः।
इत्यादिभिः क्रमेणैव यक्ष्मरोगः प्रशाम्यति॥

आदिशब्दात् ग्रहशान्तिर्विनायकशान्तिश्च। एते च व्याध्यनुसारेण व्यस्ताः समस्ता वा।

मात्स्ये घृतधेनवः। गोमयोपलिप्तदर्भास्तत्र भूमौ चतुर्हस्त कृष्णाजिनास्तरणम्। तत्र प्राक्शीर्षधेनुकल्पनम्। एवमुदक्शीर्ष वत्सकल्पनम्। माषचतुष्टयेन उत्तमा धेनुः। द्वाभ्यां मध्यमा।

माषेण कनिष्ठा। वत्सश्चतुर्थांशेन। ताम्रकुम्भे धेन्वाकारेण घृतं कल्पयम्। मुक्ताशुक्तिद्वयेन कर्णद्वयम्। मुक्ताद्वयेन चक्षुर्द्वयम्। शुक्लकम्बलो गलकम्बलः। सितसूत्राणि शिरास्थाने। ताम्रं पृष्ठं ककुच्च। सितचामरेण पुच्छः। नवनीतेन स्तनौ। कांस्येन दोहः। इन्द्रनीलं चक्षुस्तारका। सुवर्णेन शृङ्गः। रौप्येण खुराः। कर्पूरेण पादाः। नानाफलानि दन्ताः। गन्धकरण्डको घ्राणः। एवमादि सर्व्वं वत्सस्यापि। एवं कृतौ धेनुवत्सौ गन्धपुष्पधूपदीपैः प्रपूजयेत्।

तत्र मन्त्रः,—

धेनुस्त्वं पृथिवीतुल्या यस्मात् केशवसम्मिता।
सर्व्वपापहरा नित्यं ततः शान्तिं प्रयच्छ मे॥
* चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च।
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदाऽस्तु मे॥

इत्यामन्त्र्य दानम्। अत्र दक्षिणा निष्कशतं पञ्चाशद् वा। अथवा पञ्च सुवर्णाः।

---

* P. adds here इति पूजा। अथ धेनूनामामन्त्रणम्।

या लक्ष्मीः सर्व्वदेवानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
देहस्था या च रुद्राणां शङ्करस्य प्रिया सदा।
धेनुरूपेण सा देवी मम पापं व्यपोहतु॥
विष्णोर्वक्षसि या लक्ष्मीर्या च स्वाहा विभावसोः।
चन्द्रार्कशक्तिर्या नित्या धेनुरूपास्तु सा श्रिये॥

शूलरोगे।

याज्ञवल्क्यः,—

ब्रह्महन्ता आमयी स्यात्। आमयः शूलरोगः। अत्रोपपातक-प्रायश्चित्तं त्रैमासिकम्। सार्द्धसप्तकृच्छ्राणि।

चिन्तामणौ,—

शूलेन मनुष्याणां हिंसकः शूली। तस्य शूलदानं प्रायश्चित्तम्। पलेन पलार्द्धेन वा सौवर्णशूलम्। राजतं वा ताम्रं वा लौहं वा खादिरं वा। आचार्य्यब्राह्मणयोर्वरणम्। आचार्य्यस्तिल-द्रोणोपरि तदर्द्धे तत्पादे वा शूलं स्थापयेत्। रक्तवस्त्रेण वेष्टयेत्। शैवपद्धत्युक्तेन त्र्यम्बकमन्त्रेण शूलं पूजयेत्। शूलस्य दक्षिणतः स्थण्डिलेऽग्निस्थापनम्। अग्नेः पूर्व्वे नवग्रहयज्ञवत् कलश-स्थापनम्। ब्रह्मोपवेशनाद्याज्यभागान्ते पुरुष एवेदमितिमन्त्रेणा-ष्टोत्तरशतसंख्ययज्ञीयसमिद्धोमः। त्र्यम्बकमन्त्रेण तावदेवाज्य-होमः। इत इन्द्र भयामहेत तेनो अभयं कृधि। मघवंच्छग्ध वेतन्न भजये विद्विषो विमृधो जहि (?) इति मन्त्रेण तिलहोमः। होमान्ते कलशनिकटे [1]घोषशान्तिपाठः। यस्यां शाखायां या शान्तिः सैव पठनीया। कलशोदकेन सुरास्त्वामभिषिञ्चन्त्वित्यनेन रोगिणोऽभिषेकः। ततो हुतवते पूजयित्वा प्राङ्मुखाय स्वय-मुदङ्मुखः पूर्व्वपापं स्मृत्वा मन्त्रेण शूलं दद्यात्। मन्त्रो यथा,—

---

(१) P. दोषशान्तिपाठः।

त्वं शूल ब्रह्मणा सृष्टं त्रिपुराणां विनाशनम्।
दैत्यानां दानवानाञ्च शङ्करस्यायुधं तथा॥
कुक्षिस्थमथ पार्श्वस्थमथवा पृष्ठसङ्गतम्।
शूलं विनाशय त्वं मे महादेवेन धारितम्॥

ततो दक्षिणा।

ततः स्नात्वातु भुञ्जीत ब्राह्मणैः सह बन्धुभिः।

इति सर्व्वशूलहरशूलदानम्॥

अरुचिशूलहरम्।

कर्म्मविपाकसमुच्चये,—

चान्द्रायणं चातिकृच्छ्रं प्राजापत्यमथापरम्।
होमाद्यपि च कुर्व्वीत व्याध्यादेरनुरूपतः॥

कर्म्मविपाकसंग्रहे,—

शूद्रान्नभोजनव्रात्यद्विजान्नभोजनं चाजीर्णशूलकरं सकाञ्चन-रूप्यपलत्रयदानं च तन्निष्कृतिः। विश्वस्तविषदाने प्लीहशूलं चान्द्रायणपराकं उद्यन्नद्यन्निति त्र्यचो जपः। सन्ध्यात्रयेऽपामर्जन-स्तोत्रजपश्च। तत्रैव

दातुं ब्राह्मणमाहूय दानेन जठरे शूलम्।

तत्र कृच्छ्रातिकृच्छ्रचान्द्रायणानि। तत्रैव गोगामी कटिशूली। कृच्छ्रातिकृच्छ्रसौरजपान् कुर्य्यात्। गां वस्त्रं काञ्चनं दद्यात् सहिरण्यघृतैः। आज्यावेक्षणमन्त्रः।

अलक्ष्मीर्यत्र दौर्भाग्यं सर्व्वगात्रेष्ववस्थितम् ।
तत् सर्व्वं शमयाज्य त्वं लक्ष्मीं पुष्टिञ्च वर्द्धय ॥

तत्रैव सन्ध्याद्यकरणे हस्तशूलं । निष्कद्वादशदानं ब्राह्मणभोजनं सौरमन्त्रजपः हिरण्यदानम् । तत्रैव पित्रोर्मैथुनश्रवणे कर्णशूलम् । कुटुम्बिने निष्कविंशतिदानं वैष्णवमन्त्रजपः अपामार्जनस्तोत्रमन्त्रितजलपानं ब्राह्मणभोजनम् । तत्रैव नग्नपरस्त्रीदर्शने अस्तमनोदये सूर्य्यदर्शने च नेत्रशूलम् । वर्चोदा असि, वर्चो मे देहीति दशाक्षरमन्त्रेणाष्टोत्तरायुततिलाज्यहोमः । प्रजापति ऋषिः अतिजगतीच्छन्दः अग्निर्देवता । वयः सुपर्णामिति मन्त्रेण जलेनाक्षिसेचनम् । अक्षीभ्यान्ते इति सूक्तस्यायुतजपः ।

शातातपः,—

शूली परोपतापेन वपुषा जायते तनुः ।

अन्नदानं रुद्रजपश्च । तन्मते सर्व्वशूलेषु ।

कर्म्मविपाकसमुच्चये,—

शेषं कृच्छ्रद्वयं कुर्य्यात् गायत्र्याश्चायुतं जपम् ।
तिलहोमसहस्रन्तु जपेन्मृत्युञ्जयं तथा ॥

मृत्युञ्जयस्त्र्यम्बकस्तस्यायुतं जपः । व्यस्तं समस्तं वा । कर्म्मविपाकसंग्रहे तु पुण्यस्थाने वृक्षच्छायानदीपुलिनादिषु मूत्रपुरीषष्ठीवनादिकरणे खेदः । इदं व इति मन्त्रस्यायुतजपः । आपोहिष्ठेतितृचेन चरुणा युतसर्पिषा अयुतं होमः ।

पाण्डुरोगे ।

कर्म्मविपाके,—

देवद्विजद्रव्यहारी पाण्डुरोगी । कृच्छ्रातिकृच्छ्रं चान्द्रायणम् । कुष्माण्डहोमः । स्वर्णरजतचन्द्रं वासोद्वयञ्च दद्यात् । शिरोवेदनासहितपाण्डुरोगे कृच्छ्रातिकृच्छ्रे चान्द्रायणं मिष्टान्नेन शतब्राह्मणभोजनञ्च । पाण्डुरोगहरपृथ्वीदानम् । पलत्रयेण तदर्द्धेन वा पृथ्वीं सपर्व्वतवनसागरां कृत्वा नवरत्नान्वितां श्वेतवाससावेष्ट्य पलाष्टमितकांस्यपात्रे कृत्वा

एह्येहि देवि धात्री त्वं रूप्येऽस्मिन् सम्यगाविश ।
सहिता पर्व्वतैर्द्वीपैः सपवित्रैर्मनोहरैः ॥

इत्यावाह्य षोड़शोपचारैः पूजा । अग्निपूर्व्वं वेष्टिताश्वत्थादिमृत्तिकायुतकुम्भस्थापनम् । भूमिर्भूम्नेति मन्त्रेण समिद्धोमः । भूर्भूमिमगान्माता मातरमप्यगादिति घृतहोमस्तिलहोमश्च । होमान्ते पावमानादिमन्त्रैरभिषेकः । शान्तोवात इत्यनुवाकेन शान्तिपाठः । अक्षीभ्यामित्यनुवाकेन रोगिणोऽङ्गमार्जनम् । ततः

धात्री धरित्री भूतानां वराहेणोद्धृता पुरा ।
रत्नगर्भा समुद्रैकवसना सर्व्वशोभना ॥
दानेनानेन सुप्रीता पाण्डुरोगं व्यपोहतु ।

इति मन्त्रः । ततो दक्षिणा ।

शीतोष्णज्वरगुददाहे।

वैश्यबधे गात्राणां छेदात् शीतोष्णज्वरी गुददाहश्च। प्रायश्चित्तं कृच्छ्रमतिकृच्छ्रं शतविप्रभोजनं उद्यन्निति तृचस्य जपः अयुत-संख्यः। अन्ते पितरिति सूक्तेन चरुणा होमः। आज्यशतहोमश्च अथवा महिषीदानम्। यथेच्छसुवर्णघटिता महिषी।

अन्तर्वृद्धिहरनारायणदानम्।

हयशीर्षे,—

ऊर्द्धाधः करयोश्चक्रशङ्खौ दक्षिणयोः क्रमात्।
वामयोश्च गदापद्मे श्रीः पुष्टिश्चास्य पार्श्वयोः॥

*लक्ष्मीर्वीणाहस्ता पुष्टिः पद्महस्ता। व्यवहारिकनिष्काभ्यां निष्केण वा स्वर्णेन। पञ्चगव्येन स्नाप्य कुङ्कुमोपरि स्थापनम्। श्वेतवस्त्रेणावेष्ट्य षोड़शोपचारैः पूजा नारायणमन्त्रेण। तेनैव समिदाज्यतिलहोमः। प्रत्येकं शतं शतं व्याहृतिभिश्च तिल-होमः। ततो नारायणमन्त्रेण रोगी नारायणमर्चयेत्। ततः प्राङ्मुखाय हुतवते उदङ्मुखस्य रोगिणो दानम्।

नारायण जगन्नाथ शङ्खचक्रगदाधर।
पूर्व्वजन्मनि यन्नादेर्विघ्नाद् यद् वैकृतं मम॥

* लक्ष्मीः पद्महस्ता पुष्टिर्वीणाहस्ता इति पाठ एव सम्भाव्यते। इति सं

अन्तर्वृद्धिं महारोगं दानेनानेन तोषितः।
शङ्खचक्रगदापाणे शमयाशु जगत्पते॥

इति मन्त्रः। ब्राह्मणभोजनं बन्धुभिः सह भोजनञ्च।

वातरोगहराणि।

कर्म्मविपाकसंग्रहे,—

देवब्राह्मणधनहरणात् स्वामिद्रोहाद् वातरोगी।

कृच्छ्रातिकृच्छ्रौ कुर्व्वीत चान्द्रायणमथापरम्।
वात आदत्त मन्त्रञ्च जपेदयुतसंख्यया।
अग्निरग्नोत्यृचं चैव जपेच्च जुहुयादपि॥

होमद्रव्यमाज्यम्।

कर्म्मविपाकसारे,—

गुरुप्रत्यर्थी वातरोगी।

नामत्रयेण कुर्व्वीत जपहोमञ्च शान्तये।

उन्मादे।

कर्म्मविपाकसमुच्चये,—

परमोहनेन स्वकार्य्यसम्पादनमुन्मादहेतुः। तत्र कृच्छ्रं

चान्द्रायणं सारस्वतमन्त्रजपः ब्राह्मणतर्पणञ्च । यद् वागिति, देवीं वाचमजनयन्त देवा इत्ययुतादिसंख्या ।

धनुर्वातहरम् ।

तत्रैव,—

अनिच्छन्तीमुपनतामुपभुङ्क्ते परस्त्रियम् ।
सर्व्वाङ्गवेदनायुक्तो धनुर्वातयुतो भवेत् ॥
कृच्छ्रातिकृच्छ्रचान्द्रायणं महिषीदानमेवच ।
उद्यन्नुद्यन् जपश्चैव शक्त्या ब्राह्मणतर्पणम् ॥
नामत्रयायुतत्रयं जपेन्नामसहस्रकम् ।
जपेत् पुरुषसूक्तञ्च तद्रोगस्योपशान्तये ॥

महिषीदानमन्त्रः श्वासकासहरे दर्शितः ।

पक्षवातहरम् ।

तत्रैव,—

सभायां पक्षपातीच जायते पक्षवातवान् ।
निष्कशतमितं हेम दद्याद्दानं द्विजातये ॥
श्राद्धञ्च वैष्णवं दद्यादात्मनोहितमिच्छता ।
सप्तधान्यानि दद्याच्च गोदानं तत्र कारयेत् ॥

वातहरमृगदानम् ।

वायुपुराणे,—वातव्याधियुक्तः स्तेयात् ।

बौधायनः,—

हिरण्यं कारयेत् ताम्रं घनन्तु दशभिः पलैः ।
तदर्द्धेन तदर्द्धेन शृङ्गे रूप्यमये कृते ॥
तण्डुलोपरि संस्थाप्य ब्राह्मणाय निवेदयेत् ।
आढ़कत्रितयं वापि तदर्द्धं वा स्वशक्तितः ॥
पदेषु चतुर्षु स्थाप्यं कांस्यपात्रे चतुष्टयम् ।

वायुदैवतमन्त्रेण समिद्धोमः । चरुहोमः । एवं होमोऽष्टशतमष्टाविंशति र्वा प्रत्येकद्रव्यस्य । हुतवते हिरण्यदानम् । तत्रमन्त्रः

लक्ष्मीपते देवकिनन्दनेश
क्षीराब्धिशायिन् वचसामगम्य ।
गोविन्द दामोदर वातरक्तं
विनाशयाशु क्षयितारिवर्ग ॥

ततो दक्षिणादि ।

रक्तवातः ।

शातातपः,—

रक्तवस्त्रप्रवालानां हारी स्याद् रक्तवातवान् ।
चान्द्रायणद्वयं कुर्य्यादितद्रोगस्य शान्तये ॥

बौधायनस्तु,—

सवर्णागमने वातरक्तवान् जायते नरः।

एतद्रोगनिवृत्त्यर्थं षडङ्गं कृच्छ्रमाचरेत्॥

[1]इति धनुर्वातः।

अथ रक्तवातहराणि।

शातातपः,—

रक्तवस्त्रप्रवालानां हारी स्याद् रक्तवातवान्।

सवस्त्रां महिषीं दद्यात् पद्मरागसमन्विताम्॥

वस्त्रं रक्तम्। महिषीदानमन्त्रः कासश्वासहरे उक्तः।

वातपित्तहरम्।

कर्म्मविपाकसंग्रहे,—

लशुनं गृञ्जनं तालफलं चाश्नाति यो नरः।

स वातरोगी भवति कृच्छ्रं चान्द्रायणं चरेत्॥

वातपित्ते लक्ष्मीनारायणदानम्। मन्त्रे वातपित्तं विनाशये-त्यूहः।

(१) अत्र "इति धनुर्वातः" इति समाधानं न सङ्गच्छते। सं

रक्तपित्तहरम्।

शातातपः,—

मद्यपो रक्तपित्ती स्यात् स दद्यात् सर्पिषोघटम्।

मधुनोऽर्द्धघटञ्चैव सहिरण्यं विशुद्धये॥

अत्र मद्यपानप्रायश्चित्तं त्रैमासिकादिषडब्दपर्य्यन्तं व्याधिहरमभावे न कार्य्यम्। व्याधिनाशाय घृतघटदानम्। मधुघटदानञ्च। एवमन्यत्।

अथ श्लेष्महरम्।

शातातपः,—

त्रपुहारी श्लेष्मणः। तत्र शान्तपनं कृच्छ्रम्। तथा नित्यानुष्ठानविमुखः कफरोगी। तत्र मासमेकं यावकम्। सहस्रनामपाठः। नामत्रयेण चर्व्वाज्ययोरष्टोत्तरायुतहोमः।

अपस्मारे।

शातातपः,—

धूर्त्तोऽपस्माररोगी। ब्रह्मकूर्च्चत्रयं धेनुदानञ्च तत्र प्रायश्चित्तम्। कर्म्मविपाकसंग्रहे तु गुरुस्वामिद्रोहेणापस्मारः। तत्र चान्द्रायणम्। सदसस्पति मन्त्रेण चर्व्वाज्यहोमः। ब्राह्मणभोजनम्। हिरण्यदानम्। व्यस्तं समस्तं वा।

व्रणहराणि।

शातातपः,—

जात्यन्तरस्त्रीगमने मस्तकव्रणम्। प्राजापत्येन शुद्धिः। नासिकाव्रणे प्राजापत्यचतुष्टयम्।

कर्म्मविपाकसंग्रहे,—

कर्म्मकालेऽश्वकुक्कुटखरादिदर्शने नासिकाव्रणम्। तत उद्यन्नुद्यन्निति तृचेनाज्यायुतहोमः। चरोश्च। श्रीसूक्तजपः। शिवसंकल्पेन मन्त्रयित्वा दूर्व्वां तस्य शिरसि बध्नीयात्।

शातातपः,—

स्वदारत्यागे हृदयव्रणम्। तत्र प्राजापत्यम्। कर्म्मविपाकसमुच्चये,—

आत्मघाते वक्षसि व्रणम्। तत्र गोदानद्वयम्। पञ्चाशद्विप्रभोजनम्।

शातातपः,—

पितृष्वस्रभिगमने दक्षिणोष्ठे व्रणम्। तत्राज्यदानम्। तथा मातृष्वस्रभिगमने दक्षिणाङ्गे व्रणम्। तत्र दासीदानं तामलङ्कृत्य।

एवं दासी मया तुभ्यं स्त्रीवत् सम्प्रतिपादिता।
सदा कर्म्मकरी भोग्या यथेष्टं भोगमश्नुताम्॥

तथा फलचौर्य्येणाङ्गुलीव्रणम्। तत्र नानाफलायुतदानम्। तथा हीनस्त्रीगमने चरणव्रणम्। तत्र प्राजापत्यम्। भगव्रणे कर्म्मविपाकसमुच्चये मृते भर्त्तरि व्यभिचारेण योनिव्रणम्। तत्र

नीलवर्णवृषदानम्। मधुसर्पिस्तिलदानञ्च। भगन्दरे वाराहे उत्कोचेन धर्म्मनिर्णयात् भगन्दरः। पाद्मे आचार्य्यभार्य्यागमने भगन्दरः। वृद्धगौतमः—तत्र ग्रहवेद्यां ग्रहपूजां कृत्वा ग्रहहोमं कृत्वा सौवर्णे राजते ताम्रे वा पात्रे गव्यघृतपूरिते माणिक्यपद्मरागहीरकवैदूर्य्यगोमेदमरकतपुष्परागमौक्तिकहरितरत्नानि नव कृत्वा दद्यान्मन्त्रेण

आदित्यादिग्रहाः सर्व्वे नवरत्नप्रदानतः।
विनाशयन्तु मे हृष्टाः क्षिप्रमेव भगन्दरम्॥

शातातपः,—

स्वगोत्रस्त्रीगमने भगन्दरः। तत्र मेषीदानम्। तत्राग्निमाण्डोक्तमेषीदानेतिकर्त्तव्यतान्वये मानाभावात् स्वरूपमेषीदानमात्रं कर्त्तव्यम्। पूयव्रणे,—लोभादिना धर्म्मनिश्चयान्यथाचरणे पूयव्रणम्। तप्तकृच्छ्रं तिलप्रस्थदानम्। चरुघृततिलैरष्टोत्तरशतहोमो व्याहृतिभिः। सहस्रं वा। ब्राह्मणभोजनञ्च। नाड़ीव्रणे,—परेषां व्रणभेदेन नाड़ीव्रणम्। तत्र चान्द्रायणमतिकृच्छ्रं चातिचान्द्रायणम्। अन्ते रौद्रेणाष्टोत्तरशताज्यहोमः। कुष्माण्डहोमः। सौम्यरुद्रजपः। यत्किञ्चेदमित्यस्यायुतजपः। एतद्व्यस्तं समस्तं वा।

कर्म्मविपाकसमुच्चये,—

गुरुं वञ्चयित्वाध्ययने अभक्ष्यभक्षणे वा गण्डमाला। तत्र कृच्छ्रत्रयं चान्द्रायणं पुरुषसूक्ताष्टोत्तरशतजपः। अक्षीभ्यामिति मार्जनञ्च ब्राह्मणभोजनञ्च।

कर्म्मविपाकसमुच्चये,—

अनिर्दशाया गोः क्षीरं पीत्वा स्फोटकवान् भवेत् ।
उपवासत्रयं कृत्वा भोजयेद् विंशतिर्द्विजान् ॥

तथा,—

भर्त्तारं हित्वा जारालिङ्गने स्तनस्फोटः । तत्र गोपञ्चकदानम् । लवणहरिद्राधान्यदानम् । उमामहेश्वरपूजा । द्वादशनिष्कदानम् । तामग्निवर्णामितिसूक्तजपः ।

शिरोरोगे ।

शातातपः,—

[1]शिवहरणे शिरोरोगः । तत्रोपोष्य शिवशतफलदानम् ।

नारदः,—

ब्रह्मचारिणो भिन्नपात्रभोजने एकाङ्गे शिरोरोगः । तत्राचीभ्यामितिसूक्तशतजपः । चरुघृतहोमस्तेनैव । शातातपः,—

श्वमार्जारादिस्पृष्टस्य भक्षणे मुखे पूतिगन्धः । तत्र गोमूत्रपानम् । विप्रत्रयभोजनञ्च । कर्म्मविपाकसंग्रहे तु कृच्छ्रातिकृच्छ्रौ चान्द्रायणं कुष्माण्डहोमः गायत्र्ययुतजपः । हिरण्यदानं व्रीहिदानञ्च ।

(१) शिवफलमन्नातं । सं ।

शातातपः,—

आमान्नहरणे चैव दन्तपीड़ा । तत्र हेमनिष्कद्वयनिर्म्मिताश्वद्वयदानम् ।

तथा,—

शूकरवधे दन्तुरः । तद्विशुद्ध्यर्थं घृतकुम्भदानम् ।

तथा,—

सुरापः श्यावदन्तः । प्राजापत्याष्टकं चरेत् । शर्करां तु सप्त दद्यात् । महारुद्रं जपेत् । दशांशं तिलहोमः । वारुणमन्त्रैरभिषेकः ।

तथा,—

परोद्वेगकरातिनिष्ठुरोक्तिः । हास्यकरणातिक्रूरोक्तिः । गर्द्दभस्वरत्वञ्च । तत्र मुक्ताकाञ्चनयोर्दानम् ।

तथा,—

मूको भ्रातृवधात् । तत्र चातिचान्द्रायणत्रयम् । सुवर्णपलयुतपुस्तकदानम् । पुस्तकदानमन्त्रः,—

सरस्वति जगन्मातः शब्दब्रह्माधिदेवते ।
दुष्कर्म्मकारिणं पापं रक्ष मां परमेश्वरि ॥

कर्म्मविपाकसङ्ग्रहे,—

वेदधर्म्मशास्त्रमूल्यपूर्व्वकाध्यापने जिह्वास्खालनमस्फुटवाक्यत्वम् । जिह्वाव्रणञ्च । कृच्छ्रातिकृच्छ्रौ चान्द्रायणं कार्य्यम् । तामग्निवर्णामिति सूक्तस्यायुतजपः । विप्रेभ्यो हिरण्यदानम् । ब्राह्मणभोजनञ्च ।

वायुपुराणे,—

वाग्विरोधं गुरोः कृत्वा वाचा गद्गदवान् भवेत्।

तत्र सरस्वतीदानम्। सरस्वती दक्षिणे वराक्षसूत्रहस्ता वामेऽभयपुस्तककरा हंसवाहना। पलतदर्द्धतच्चतुर्थांशकल्पिता। शुद्धरौप्येणासनं कृत्वा तदुपरि शक्त्या सुवर्णपद्मं दत्वा तत्र सरस्वतीं स्थाप्य मुक्तामालाश्वेतवस्त्रश्वेतगन्धमाल्यैः पूजा यद्वागिति ऋग्द्वयेन कार्य्या। तेनैव शालिपयसाऽष्टशतहोमः। समिदाज्यतिलानां प्रत्येकमष्टशतम्। एवं प्रथमदिने कृत्वा आचार्य्यब्रह्मयजमानानामुपवासेन रात्रिनयनम्। प्रातः सरस्वतीपूजा। हुतवते ब्राह्मणाय दानम्। मन्त्रः—

या वक्त्रं ब्रह्मणो देवी या सा वागीश्वरी परा।
ब्रह्मविष्णुशिवैश्छन्दैः पूजिता सर्व्ववन्दिता॥
तुष्टा भवतु दानेन दत्तेनानेन वाक् परा।
वाग्विरोधं गुरोः कृत्वा यन्मे गद्गदभाषणम्।
तत्सर्व्वं क्षपय क्षिप्रं ब्राह्मि त्वं लोकपावनी॥

शातातपः,—

[1]विद्यापुस्तकहारी एड़मूकः। महाभारतपुस्तकं दद्यात्।

कर्म्मविपाकसंग्रहे,—

लवणहरणे घ्राणरोगः। उद्वयद्यमृचस्याष्टोत्तरायुतजपः।

(१) P. विद्यापुस्तकहारी तु एड़मूकः।

अनेनैव चरुघृतहोमः। रक्तवस्त्रत्रयदानम्। काञ्चनदानम्। गोत्रयदानम्। सूर्य्यपूजा च।

शातातपः,—

कुटुम्बबधे वक्त्रनाशः। निष्कदानम्।

तथा,—

घृतचौरो नेत्ररोगी। घृतधेनुं दद्यात्।

कर्म्मविपाकसमुच्चये,—

परदृष्टिरोधे भिषक्मिथ्याचरणे कामात् परस्त्रीदर्शने नेत्ररोगः। चान्द्रायणं पराकः। पञ्चाशद्विप्रभोजनम्। वयः सुपर्णेति चरुणा घृतेनाष्टोत्तरसहस्रहोमः। वर्चोदा असि, वर्चो मे धेहीति मन्त्रजपः। आज्यदानं काञ्चनदानम्। एतद्रोगशान्तये पापनाशाय प्रायश्चित्तं कल्पयम्।

अन्धत्वहरम्।

शातातपः,—

मातृहा अन्धः। तत्र पलचतुष्टयकृतताम्रपात्रे स्वर्णनिष्ककृतवासुदेवप्रतिमां यदुवंशकृतां संस्थाप्य तदग्रे स्वर्णपलमितनौकां रौप्यपलमितनौकादण्डं संस्थाप्य विष्णुं सम्पूज्य दद्यात्। मन्त्रः—

वासुदेव जगद्वन्द्य सर्व्वभूताश्रये स्थित ।
पातकार्णवमग्नं मां तारयाश्रिततारक ॥

[1]अर्थिभ्योऽपि किञ्चिद् दद्यात् ।

पाद्मे,—

पराक्षिरोधे अक्षिपीड़ा। तत्र गरुड़दानम्। स्वर्णपलेन गरुड़ः। पक्षौ राजतौ रत्नबद्धौ। माणिक्याभ्यामक्षिद्वयम्। पादयोः स्वर्णवलयं रत्नान्वितम्। कण्ठे स्वर्णभूषणम्। नासायां वैदूर्य्यमौक्तिकान्वितभूषणम्। नानाविधवस्त्रैरलङ्करणम्। विष्णुप्रतिमायाः शालग्रामस्य वा अग्रे स्थापनम्। ब्राह्मणस्य वस्त्रादिभिः पूजा। सुपर्णोऽसि गरुत्मानित्यादिभिर्गरुड़प्रकाशकैः पूजा अन्ते समिदाज्येन तिलैश्चरुणा च प्रत्येकं शतं जुहुयात्। ततः स्वस्तिवाचनान्ते प्राङ्मुखाय पूजितायोदङ्मुखस्य दातुर्दानम्। तत्र मन्त्रः,—

देवदेव जगन्नाथ लक्ष्मीप्रियपरायण ।
वाहनस्य प्रदानेन हर कर्म्म विपाकजम् ॥
अक्षिरोगं जगन्नाथ नारायण जगन्मय ।
पुष्पं वा पटलं वापि अतिरक्तमथापिवा ।
रक्तं वाप्यथ रक्ताक्षं तथार्वुदमथापि वा ॥

स्नात्वा स्वस्ति वाच्य विप्रभोजनं स्वयञ्च ।

कर्म्मविपाकसंग्रहे,—

(१) P. अन्येभ्योऽपि०।

मातापितृगुरुनिन्दाश्रवणे कर्णे रक्तस्रावः। पूयःस्रावो वा। तत्र कृच्छ्रचतुष्टयं हिरण्यदानम् रक्तवस्त्रदानं विप्रभोजनं सौरमन्त्रजपः तेन होमः। एतद्व्यस्तं समस्तं वा।

कृमिकर्णेन पञ्च नीलवृषा देयाः। शातातपः,—विश्वस्तघाती वधिरः। अतिचान्द्रायणं कृत्वा अन्ते स्वर्णपलयुक्तं पुस्तकं दद्यात्।

सरस्वति जगन्मातः शब्दब्रह्माधिदैवते ।
दुष्कर्म्मकारिणं पापं रक्ष मां शरणागतम् ॥

कर्णकुब्जः शय्यां दद्यात्।

विविधरोगे।

ब्रह्माण्डे,—

कण्ठरोगोऽभक्ष्यभक्षणात्। अत्र कृच्छ्रत्रयं धेनुश्चैका कम्बलदानम्। तत्र मन्त्रः।

ऊर्णाच्छादन लोकानां शीतवातभयापह ।
सर्व्वदुःखभयादस्मादतः शान्तिं प्रयच्छ मे ॥

विकृतस्वरः कृच्छ्रमेकं कर्पूरफलं दद्यात्। चौरहारी खिन्नपाणिः। कुङ्कुमफलत्रयं दद्यात्।

शातातपः,—

[1]अयोनौ गमनाद् भुजस्तम्भः। रुद्रेण शम्भोः पूजा। सहस्रकलसस्नानम्। चान्द्रायणम्। तप्तकृच्छ्रञ्च।

उदक्यां वीक्ष्यान्नभोजी कृमिलोदरी। सप्तरात्रं गोमूत्रयावकाहारः स्यात्।

शातातपः,—

हृदयकृमित्वे भीष्मपञ्चकव्रतम्।

उदरगुल्म इक्षुविकारहरणात्। तत्र गुड़धेनुदानम्।

गुरुप्रत्यर्थी वातगुल्मवान्। मासं पयोव्रतम्।

मुञ्चामि त्वेति प्रत्यृचं चरुसर्पिर्होमः अयुतसंख्यः। वात आ वातु भेषजमिति सूक्तस्य जपः। अन्नदानम्।

अन्त्यजागमने गुल्मी। तत्र बौधायनः,—सुवर्णरजतताम्रार्कमूलकाष्ठान्यतमेन विनायकः। पुष्करः। स्वर्णेन चक्षुर्द्वयम्। [2]देवद्रव्यजातीयेनाखुः। नागयज्ञोपवीती स्वर्णेन। चन्दनागुरुपुष्पाद्यैः पूजा। विनायकमन्त्रेणाज्येनाष्टशतहोमः। ततो दक्षिणाभिमुखाय विप्राय दानम्। मन्त्रः,—

विनायक गणेशान सर्व्वदेवनमस्कृत।
पार्व्वतीनन्दन मम गुल्ममाशु विनाशय॥

शातातपः,—

गर्भपातने यकृत्-प्लीह-जलोदराः। तत्र जलधेनुदानम्। स्वर्णरौप्यताम्राणां प्रत्येकस्य पलदानम्।

(१) P. क्षत्रिययोनौ।

(२) आखुर्निर्म्माणवस्तुनः सम्यक् प्रतिग्रहे असमर्थः। सं।

कर्म्मविपाकसङ्ग्रहे,—

अयुतत्रयं श्रीसूक्तजपः। प्रत्यृचं चरुघृतहोमः।

उदरव्याधौ।

कृच्छ्रातिकृच्छ्रचान्द्रायणानि। शिवस्य सहस्रकलशस्नानम्। उद्यन्नुदान्नित्यृचस्यायुतजपः। अन्ते पितरिति सूक्तेन घृतेन सहस्रहोमः। चरुणा च। हिरण्यमधुघृतदानं जलोदरे। मासत्रयं पयोव्रतम्। [1]इणस्य सहस्रकलशस्नानम्। शतविप्रभोजनञ्च।

नित्ययागाननुष्ठाने मन्दाग्निः। तत्र प्राजापत्यत्रयम्। शतविप्रभोजनञ्च।

अश्वहन्ताऽजीर्णी। उपवासत्रयम्। प्राजापत्यं वा। अग्निरग्नीत्यृचाष्टसहस्रं मधुहोमः। तावदेव घृतहोमः।

मूत्रव्याधौ।

पराशरः,—

प्रज्ञाहीनोऽतिकृच्छ्रं चान्द्रायणं कुर्य्यात् मूत्रकृच्छ्रे।

शातातपः,—

गुरुतल्पगो मूत्रकृच्छ्री। गुरुतल्पप्रायश्चित्तार्द्धं पादं वा कुर्य्यात्।

(१) P. ईशस्य।

तथा,—

पशुयोनिगमनान्मूत्रकृच्छ्री। तिलपात्रत्रयं दद्यात्। षोड़श-पलमितताम्रपात्रे तिलपूर्णे हिरण्यं दत्वा दानम्। दक्षिणा काञ्चनञ्च।

मातुः सपत्नीगमने जायते अश्मरी। तत्र त्रैमासिकं प्रायश्चित्तं मधुधेनुदानम्। मधुधेनुदानं घृतधेनुवत्। बहुमूत्रत्वे गुड़धेनुः।

कर्म्मविपाकसमुच्चये,—

सोदरागमने बहुमूत्रम्। पराकद्वयं त्रिंशद् वा ब्राह्मणभोजनम्। अन्ते सूक्तेनाष्टोत्तरसहस्रहोमः। घृतेन चरुणा च। जपो वा। सहस्रनामजपो गायत्रीजपो वा।

प्रमेहे।

तथा प्रमेहे,—

चाण्डालीगमनात् सर्व्वप्रमेहः। यवमध्यचान्द्रायणमेकं पिपीलिकामध्यचान्द्रायणत्रयम्। इदमाप इति द्वाभ्यामुदुत्तममित्येकया च घृतहोमः। जपश्च।

शूलमेहः।

सान्तपनमहासान्तपनातिसान्तपनानि।

वातप्रमेहः। मधुमेहः। लिङ्गव्याधिश्च।

सवर्णागमने। अत्र चान्द्रायणत्रयम्।

मातृगामी मधुमेही। भगिनीगामी इक्षुमेही। षड़ब्दं पञ्चाब्दं त्र्यब्दञ्च क्रमात् प्रायश्चित्तम्। सर्व्वत्र सौरमन्त्रेण जपहोमौ वा।

शातातपः,—

मातृगमने लिङ्गनाशः। भूभागे लिप्ते उत्तरत्र नवग्रहयज्ञोक्तोपकरणं कुम्भं संस्थाप्य तच्च कृष्णवस्त्रच्छन्नं कृष्णमालालङ्कृतं कृत्वा तदुपरि कांस्यपात्रं स्थापयेत्। सुवर्णनिष्कनिर्म्मिता धनदमूर्त्तिः वराभयहस्ता नरवाहना तत्र स्थाप्या। निष्कविंशतिमितसुवर्णेन लिङ्गहानिप्रतिमा कार्य्या। द्वयोः कुम्भस्थकांस्यपात्रे स्थापनम्। पुरुषसूक्तेन धनदपूजा। लिङ्गहानिप्रतिमायै नम इति रोगप्रतिमापूजा। तस्मिन्नेव दिने अथर्व्ववेदपारायणारम्भः। यावद्दिनैरथर्व्ववेदसमाप्तिस्तावद्दिनानि प्रतिमाद्वयपूजा। [1]पारायणे तु अनेन दानेन निष्कामः स्यामिति रोगप्रतिमादानम्। धनददाने मन्त्रः,—

निधीनामधिपो देवः शङ्करस्य प्रियः सखा।
सौम्याशाधिपतिः श्रीमान् मम पापं व्यपोहतु॥

द्वयोराचार्य्याय पारायणकर्त्रे दानम्।

---

(१) P. पारायणान्ते तु।

दुष्टवादात् षण्ढः। रौप्यपलत्रयं पुष्पफलत्रययुतं दद्यात्।

कर्म्मविपाकसङ्ग्रहे,—

दोषं विना भृत्यादिहस्तच्छेदने व्रषणव्याधिः। अग्निदग्ध इव भवति सव्रणश्च। तत्र महारुद्रजपः। अतिरुद्रजपो वा। यतिचान्द्रायणं गोत्रयदानं वा।

पादरोगे।

शातातपः,—

हरिणे निहते खञ्जः। शृगाले निहते स्तब्धपादः। स्वर्णनिष्केणाश्वं कृत्वा अश्विनं मन्त्रेण सम्पूज्य दद्यात्।

कर्म्मविपाकसङ्ग्रहे,—

अश्ववधे वक्रपादः। निष्कत्रयं दद्यात्। सर्व्वपादरोगेष्वश्वदानं वा।

कर्म्मविपाकसङ्ग्रहे,—

स्वगोत्रस्त्रीगमने श्लीपदम्। योन्यामसृक्स्रावः। तत्र चान्द्रायणं मासं पयोव्रतञ्च।

चर्म्मरोगे।

पतितसंसर्गे वल्मीकाकारव्याधिः। तत्र—

गोमूत्रयावकाहारो मासार्द्धेन विशुद्ध्यति।

सहिरण्यं घृतं दद्यात्। वल्मीके क्रमौ वल्मीकप्रतिमादानम्। त्वग्दोषे चान्द्रायणत्रयमौषधदानञ्च। गुरुतल्पगो दुश्चर्म्मी। गुरुतल्पप्रायश्चित्तं पादोनं कुर्य्यात्।

बौधायनः,—

ब्राह्मणाङ्गपीड़या दद्रुरोगः। तत्रोमामहेश्वरदानम्। सुवर्णेन तदर्द्धेन पादेन वा उमामहेश्वररूपम्। ईशश्चतुर्भुजः। त्रिनेत्रः। अक्षमाला शूलञ्च दक्षहस्तयोः। वामकर एको देवीपृष्ठगतः अपरो वरदः। उमा वामोत्सङ्गगता द्विभुजा शिवपृष्ठगतैकहस्ता। रूप्यमयो वृषः घण्टामालावृतः। वृषोपरि द्वयोरुपस्थानम्।

सर्व्वेश्वराय विद्महे शूलहस्ताय धीमहि।
तन्नो रुद्रः प्रचोदयात्॥

इति रुद्रगायत्र्या पूजा। त्र्यम्बकेण समिधां द्रुमायेति (?) घृतस्य रुद्रगायत्र्या तिलानां प्रत्येकं शतं शतं होमः।

ब्रह्मोद्वासनान्ते पूजा। होमकर्त्रे आचार्य्याय प्रतिमादानं मन्त्रेण।

कैलासवासिन् भगवन्नुमया सहितः परः।
त्रिनेत्र हर मे दद्रुरोगमाशु विनाशय॥

ब्राह्मणान् भोजयित्वा स्वयं भोजनम्।

शातातपः,—

गोवहा 'नुतकी। प्राजापत्यशतं कृत्वा भूमिं दत्वा भारतं शृणुयात्।

लोहहारी वर्व्वराङ्गः। उपोष्य लोहशतपलं दद्यात्। तैलचौर्य्येण कण्डूयनः। उपोष्य तैलघटद्वयं दद्यात्। वस्त्रहारी शीर्णाङ्गः। निष्कद्वयं हेम दद्यात् वस्त्रयुग्मञ्च।[2] दद्रुमण्डले दोहधेनुः पलषष्टिमिता सप्तधान्ययुता देया।

शातातपः,—

विश्वस्तभार्य्यागमने गजचर्म्मता। तत्र षड़ब्दं प्रायश्चित्तम्। मयूरबधेन कृष्णमण्डलः। निष्कत्रयमितस्वर्णमयूरं दद्यात्।

कर्म्मविपाकसमुच्चये,—

अमेध्यप्रदाता विषमव्याधिवान्।
मासं पयोव्रतं कुर्य्यादन्ते दद्यात् पयस्विनीम्।

दुर्गन्धत्वं कन्याहरणात्। पद्मलक्षहोमेन शाम्यति।

शातातपः,—

मधुचौरो वस्तिगन्धिः। मधुधेनुं दद्यात्।

कामलरोगे।

वृद्धगौतमः,—

कामली भक्तचौरः। यथाशक्ति सुवर्णेन गरुड़ः। पञ्चयो-

(१) सर्व्वपुस्तकेष्वयमेव पाठः।

(२) P. Adds होमश्च।

मौक्तिकद्वयं नासायां मौक्तिकं राजतमुत्तरीयं तिलद्रोणोपरि संस्थाप्य श्वेतवस्त्रेण वेष्टनीयः। तत्राचार्य्यस्तिलद्रोणस्थं गरुड़ं सम्पूज्य तिलद्रोणस्य वायव्यां दिशि तीर्थोदकपूरितं पञ्चरत्नपञ्चपल्लवाश्वस्थानादिपञ्चमृत्तिकागोरोचनायुतं सितवस्त्रवेष्टितं कुम्भं स्थापयित्वा गरुड़ादाग्नेय्यां स्थण्डिलेऽग्निमुपसमाधाय पलाशसमिधामष्टशतं घृताष्टशतं गरुड़गायत्र्या हुत्वा व्याहृतिभिस्तिलाष्टशतं हुत्वा स्विष्टकृदादिशेषं समापयेत्। आपोहिष्ठा त्र्यृचेन हिरण्यवर्णा त्र्यृचेन स्वादिष्ठयेति सूक्तेन पवमानः सुवर्जन इत्यनुवाकेन रोगिणं कलशेन स्नापयेत्। स्नातः शुक्लमाल्यानुलेपनो रोगी उदङ्मुखः प्राङ्मुखायाचार्य्याय मन्त्रेण दद्यात्।

श्रीकृष्ण परमानन्द जगतः परिपालक।
पूर्व्वजन्मनि यत्पापं मुक्तस्थैर्य्यं मया कृतम्॥
तेन प्राप्तन्तु वैरूप्यं यन्मया अतिदुःसहम्।
कामलोत्थमिदं देव तव वाहनदानतः॥
विनाशयाशु मे कृष्ण जगतः पालकोऽसि।
एवं गरुड़दानन्तु कृत्वा मर्त्त्यः सुखी भवेत्॥

कुष्ठरोगे।

शातातपः,—

ब्रह्महा शुक्लकुष्ठी। तत्र प्रायश्चित्तं षड्वार्षिकम्। रोगप्रायश्चित्तम्। पञ्चरत्नपञ्चपल्लवपञ्चमृत्तिकासर्व्वौषधिसितवस्त्रा-

श्वत्थादिपञ्चत्वक्कषाययुक्ताश्चत्वारः कलशाः प्रतिदिशं स्थाप्याः। मध्ये पञ्चमः कलशः। मध्यकलशे राजतमष्टदलं पद्मम्। तदुपरि स्वर्णपलार्द्धेन तदर्द्धेन वा चतुर्भुजो वासुदेवः। आचार्य्यः पुरुषसूक्तेन वासुदेवं पूजयेत्। यजमानाश्चत्वारो ब्राह्मणाश्चतुर्षु कुम्भेषु वेदपारायणं कुर्य्युः। पूर्व्वे ऋग्वेदी। दक्षिणे यजुर्वित्। पश्चिमे सामगः। उत्तरे अथर्व्वी। द्वादशदिनैर्व्वेदसमाप्तिः। प्रतिदिनं वासुदेवपूजा त्रिकालम्। प्रथमदिने कुण्डपूर्व्वे ग्रहवेद्यां ग्रहपूजा। प्रतिदिनं यावता वेदभागं समाप्नोति तद्दशांशेन होमः। व्याहृतिभिर्घृततिलैर्यवैर्वा। ततो भद्रासनोपविष्टस्य यजमानस्य पञ्चभिः कलशैः सहस्राक्षं शतधारं सुरास्त्वामभिषिञ्चन्त्वित्याद्यैरभिषिञ्चेयुः। ततो यथाशक्ति गोभूहेमतिलदानम्। आचार्य्याय स्वर्णप्रतिमादानं मन्त्रेण।

आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः।
प्रीताः सर्व्वे व्यपोहन्तु मम पापं सुदारुणम्॥

अन्येभ्योऽपि दक्षिणा।

तत्रैव कुष्ठहरप्रदानम्। गोवधेन कुष्ठम्। पूर्व्वोक्तरीत्या कलशं रक्तचन्दनभक्तपुष्पयुक्तं दक्षिणे न्यसेत्। तदुपरि ताम्रमयतिलपात्रम्। तदुपरि दक्षिणहस्तधृतदण्डो वामहस्तधृतपाशः महिषारूढः स्वर्णनिष्केण यमः। पुरुषसूक्तेनास्य पूजा। कुम्भवामे सामवेदपारायणं कश्चित् कुर्य्यात्। कुण्डे प्रतिदिनं व्याहृतिभिर्दशांशेन तिलहोमः। वेदपारायणसमाप्तौ कुम्भोदकेन पावमान्या स्वादिष्ठयेत्याद्ययाभिषेकः।

यमो महिषमारूढो दण्डपाणिर्भयावहः।
दक्षिणाशापतिर्देवो मम पापं व्यपोहतु॥

इत्यनेन दत्वा मासं गोभक्तिः।

शिवगीतायाम्,—

जन्तुवधे कुष्ठम्। तत्र सान्तपनम्। इदं क्षुद्रकुष्ठे।

वायुपुराणे तु,—

त्रिभिर्द्वाभ्यां वा एकेन वा रजतपलेन वृषः। हेमशृङ्गः। हेमखुरः। सुवर्णस्य पलैस्त्रिभिर्द्वाभ्यामेकेन वा वृषोपरि उमामहेश्वरप्रतिमा। अष्टपलमितकांस्यपात्रे तस्य स्थापनम्। श्वेतवस्त्रपुष्पैरभ्यर्च्य गृह्योक्तविधानेनाज्यभागान्तं कृत्वा शिवमन्त्रेण समिच्चर्वाज्यतिलहोमः। प्रत्येकमष्टोत्तरशतसंख्यः। उदङ्मुखायाचार्य्याय मन्त्रेण दद्यात्।

अष्टमूर्त्तेरधिष्ठानं कृपया वृषभध्वज।
श्वेतमौदुम्बरं सर्व्वमथवा श्वित्रमेव वा॥
त्वग्दोषजनितं यच्चेन्मण्डलाय यथाहर।
सर्व्वकर्म्मविपाकोत्थं पार्व्वतीनाथ सर्व्वशः॥
कुष्ठहा भव सर्व्वेश रक्ष मां पार्व्वतीपते।

शातातपः,—

दीक्षितस्त्रीगमने रक्तकुष्ठी। प्राजापत्यचतुष्टयं कुर्य्यात्। भगिनीगमने पीतकुष्ठम्। पूर्व्ववत् कलशः पूर्व्ववत्। पीतवस्त्रं पीतमाल्यं कलशे। तदुपरि यथाशक्तिकृतहेमपात्रे स्वर्णनिष्कषट्कृतः शक्रो वज्रहस्तो गजारूढः। तथा कुष्ठरोगप्रतिमा

कुञ्जः शूलयज्ञोपवीतवान् वृद्धस्त्रिनेत्रः किङ्किणीयुतः दशसुवर्णेन कार्य्यः । पुरुषसूक्तेनेन्द्रपूजनम् । कुष्ठप्रतिमायै नम इति रोगप्रतिमापूजनम् । कुम्भसमीपे ऋग्वेदस्य पारायणम् । यावद्वेदपारायणं द्वयोः पूजा । प्रतिदिनं वेदपारायणं दशांशेन व्याहृतिभिस्तिलहोमो यवहोमो वा । वेदपारायणसमाप्तौ प्रतिमाद्वयदानम् । अनेन रोगप्रतिमादानेन निष्पापः स्यामिति रोगप्रतिमादानम् ।

देवानामधिपो देवो वज्री वज्रनिकेतनः ।
शतयज्ञः सहस्राक्षो मम पापं व्यपोहतु ॥

अनेन शक्रदानम् । एवं रक्तकुष्ठेऽपि । कुम्भे रक्तवस्त्रमाल्यं विशेषः ।

गुल्मकुष्ठे,—

भ्रातुर्भार्य्यागमने गुल्मकुष्ठः ।[१] वैदुर्य्यमणिद्वयं दद्यात् । रूप्यहारी श्वेतकुष्ठी । प्राजापत्यद्वयं कृत्वा रूप्यपलद्वयं दद्यात् ।

ताम्रचोर उदुम्बरकुष्ठी । प्राजापत्यत्रयं कृत्वा ताम्रशतपलद्वयं दद्यात् ।

---

(१) P. Adds स्वबन्धुगमने कृष्णकुष्ठः तत्र त्रैवार्षिकम् । पितृपत्नीगमने कटिकुष्ठगमनं तत्र त्रैवार्षिकम् । मातुलानीगमने नेत्रकुष्ठं तत्रापि त्रैवार्षिकं कृष्णाजिनदानञ्च । कृष्णाजिनदानविधिर्लेखिष्यते । ताम्बूलहरणे श्वेतकुष्ठम् ।

अपुष्पवतीत्वहरम् ।

क्षुत्पिपासातुरा नारी भर्त्तारमवमन्य या ।
मिष्टान्नं स्वयमश्नाति न सा पुष्पवती भवेत् ॥

तन्निवृत्तये स्त्रीपुंमिथुनानि पञ्चाशत् भोजयेत् । तेभ्यः सौभाग्याष्टकदानम् । इक्षवः । कर्पूरम् । हरिद्रा । धान्यकम् । आमिक्षादिगोक्षीरविकाराः । कुसुम्भम् । कुङ्कुमम् । लवणञ्चाष्टमम् । हरिद्रास्थाने निष्पेषो वा जीरकम् । प्रतिबन्धकाधिक्ये आवृत्तिरस्य कर्म्मणः । बन्ध्यात्वहरसुवर्णधेनुदानम् ।

वायुपुराणे,—

सुवर्णपलेन गौस्तत्पादेन वत्सः । खुरा रूप्येण । पुच्छे मुक्ता । गले घण्टा । गुणवन्तं ब्राह्मणं कृत्वा तेन धेनुवत्सयोः पूजा । सोमो धेनुमितिमन्त्रेण चन्दनागुरुकर्पूरगन्धमाल्यवस्त्रप्रभृतिषोड़शोपचारैः पायसनैवेद्यैः कारयेत् । मोदकपूपलवणगुड़जीरकाणि सूर्पे सम्भृत्य धेन्वग्रे स्थापयेत् । तादृशमेव सूर्पषट्कं ब्राह्मणस्त्रीषु दद्यात् । ततः समिदाज्यचरुभिः शतं शतं सोमो धेनुमितिमन्त्रेण होमः । ततो होमकर्त्रे प्राङ्मुखाय स्वयमुदङ्मुखो मन्त्रेण धेनुं दद्यात् ।

धेनुर्याङ्गिरसां सत्रे प्रतिष्ठा सुरभेश्च या ।
दुहिता या तथा भानोरग्नेश्च वरुणस्य च ॥
याश्च गावः प्रवर्त्तन्ते वनेषूपवनेषु च ।

प्राणभृतां मम स्याद् वा पुत्रपौत्रप्रदा भृशम् ।
अविच्छेदमविच्छेदमविच्छेदञ्च सन्ततम् ॥

इति दत्वाष्टोत्तरशतविप्रभोजनम् ।

गर्भस्रावे ।

कुलजवधे गर्भस्रावः ।

वायुपुराणे,—

पलेनार्द्धेन तदर्द्धेन वा हैम्नोपवीतम् । तन्मितेन रौप्येणोत्तरीयम् । ग्रन्थिप्रदेशे मौक्तिकमभ्रञ्च । द्वयोर्गायत्र्या पञ्चगव्येन चालनम् । ताम्रपात्रे दधिद्रोणं दत्वा तदुपरि घृतं दत्वा यज्ञोपवीतमुत्तरीयञ्च तत्र स्थाप्यम् । गायत्र्यैव द्वयोः पूजा । गायत्र्या मधुघृतमिश्रतिलैरष्टशतहोमः । हुतवते दानं मन्त्रेण ।

'उपवीतं परिमितं ब्रह्मणा विधृतं पुरा ।
भवनोकांश्चदानेन गर्भं सन्धारयेद्ध्रुवम् ॥

दक्षिणां दत्वा अनुव्रज्य क्षमापणम् ।

योनिस्रावे ।

कर्म्मविपाकसमुच्चये,—

मासोपवासिनी यदि व्यभिचरति तदा स्रवद्योनिशोणिता भवति । तत्र मासोपवासं मासं पयोव्रतं प्रायश्चित्तञ्च ।

(१) सर्व्वपुस्तकेष्वयमेव पाठः ।

स्तन्यस्रावे ।

स्त्री दुग्धचौरा स्तन्यक्षरणरोगिणी । सा चौरान्नमधुमण्डकेन ब्राह्मणत्रयं भोजयेत् । ब्राह्मणोच्छिष्टपादोदकमनुलिम्पेत स्तनेन । भूतेभ्यः पञ्चभ्यः सुरामांसमधुघृतपिष्टकानि गन्धपुष्पैर्बलिः ।

अर्वुदरोगे ।

शातातपः,—

वैश्यहन्ता रक्तार्वुदी । चत्वारि प्राजापत्यानि कृत्वा सप्तधान्यानि दद्यात् ।

प्रदरे ।

गुरुभिः शास्त्रनिर्णये स्वक्षीयां प्रदररोगः । तत्र चान्द्रायणं कृच्छ्रम् । तद्विष्णोरित्ययुतजपः । दधिघृतमण्डकैर्विप्रत्रयं भोजयित्वा तत्पादोदकेन प्रदरमार्जनम् ।

पाद्मे,—

तथा पशुवधेऽसृक्प्रदरः ।

गौतमः,—

लोहितां धेनुं स्वर्णशृङ्गीं रूप्यखुरां रक्तवस्त्रपलतदर्द्धतत्पादमितहैमयुतां ब्राह्मणाय अग्निवर्णाय मन्त्रेण दद्यात् ।

गावो मे हृदये सन्तु पार्श्वतः पृष्ठतोऽपि वा।
देवानां त्वं हि सुरभिः चपयास्त्वग्वरं मम॥

मेदोवृद्धौ।

शातातपः,—

दधिचौरो मेदोवृद्धिमान्। स दधिधेनुं दद्यात्।

मृतभार्य्यत्वे।

ज्येष्ठेऽनूढे स्वयं विवाहं चेत्करोति मृतभार्य्यः।

सप्राजापत्यमैन्द्रवचयं च कुर्य्यात्। तामग्निवर्णामित्यनया-र्चाज्येनाष्टोत्तरायुतहोमः। चरुणा च तावन्तम्। ब्राह्मणत्रय-भोजनम्।

शातातपे तु,—

मित्रभार्य्यागामी मृतभार्य्यः। ब्राह्मणोद्वाहेन शुद्ध्यति।

मृतवत्सत्वे।

बालघाती च पुरुषो मृतवत्सः प्रजायते।
ब्राह्मणोद्वाहनञ्चैव कर्त्तव्यं तेन शुद्ध्यति॥
श्रवणं हरिवंशस्य कर्त्तव्यञ्च यथाविधि।
महारुद्रजपञ्चैव कारयेत्तु यथाविधि॥

जुहुयाच्च दशांशेन दुर्व्वामाज्यपरिप्लुताम्।
एकादश स्वर्णनिष्काः प्रदातव्या च दक्षिणा॥
एकादश पशूंश्चैव दद्याद् वित्तानुसारतः॥

पशुरत्र गौः।

अन्येभ्योऽपि यथाशक्त्या द्विजेभ्यो दक्षिणां दिशेत्।
स्नापयेद् दम्पती पश्चान्मन्त्रैर्वरुणदैवतैः।
आचार्य्याय प्रदेयानि वस्त्रालङ्करणानि च॥

ब्राह्मणोद्वाहनमेका निष्कृतिः। हरिवंशश्रवणं द्वितीया। तत्र स्वर्णशृङ्गी गौर्दक्षिणा शक्त्या। वाऽन्यत्र महारुद्रजपस्तृतीया। पयस्विनीधेनुदानं वा प्रायश्चित्तमिति क्वचित् पाठः। समस्तं वा प्रायश्चित्तं व्यस्तं वा।

विविधविपाकः।

कर्म्मविपाकसमुच्चये,—

निषिद्धद्रव्यप्रतिग्रहनिषिद्धयोनिगमनब्राह्मणस्वहरणशस्त्रजीवि-काभिः **सर्व्वाङ्गवेदना।** तत्र कृच्छ्रातिकृच्छ्रचान्द्रायणानि। गोभूहिरण्यवासोदानम्। तद्विष्णोरितितृचस्यायुतत्रयजपः।

प्रीतिभङ्गकरणात् **अप्रतिष्ठः।** शमीवरमश्वत्थमभिषिञ्चेत्। तच्चात्मरोपितमश्वत्थं शम्या सह विवाहयेत्। शुभदिने अश्वत्थं शमीञ्च वस्त्रादिभिर्भूषयित्वा व्याहृतिभिस्तिलहोमं कृत्वा ब्राह्म-

णान् भोजयित्वा दक्षिणां दद्यात्। तत्र विनायकं व्याहृतिभिः संस्थापयेत्।

पुण्डरीकरोगे।

शातातपः,—

कांस्यहारी पुण्डरीकरोगवान्। उपोष्य कांस्यपलशतं दद्यात्।

कुब्जो मूषिकहन्ता स्यात्। सप्तधान्यं सकाञ्चनं दद्यात्।

सर्व्वकार्य्येष्वसिद्धार्थो गजघाती भवेन्नरः।

स गणनाथस्य प्रासादं कारयेत्। गणानान्त्वेतिमन्त्रं लक्षं जपेत्। रक्तकरवीरपुष्पैर्दशांशेन होमः।

दारिद्र्यहरधनदमूर्त्तिदानम्। वायुपुराणे,—

दानविघ्नकारी दरिद्रः। स्वर्णपलेन अर्द्धेन चतुर्थांशेन वा कुवेरमूर्त्तिः। द्विबाहुर्गदाहस्ता नरवाहना शङ्खपद्मनिधिपार्श्वस्था। तण्डुलद्रोणचतुष्टयं द्वयमेकं वा तदुपरि मूर्त्तेः स्थापनम्। श्वेतगन्धमाल्यैः पूजा। समिदाज्यतिलैराग्नेय्यां होमः। राजाधिराजायेति मन्त्रः। व्याहृतिभिस्तिलहोमः। ततो होमं कृतवते प्रतिमादानं मन्त्रेण।

उत्तराशापते देव कुवेर नरवाहन।
शङ्खपद्मनिधीनां त्वं पतिः श्रीकृष्णवल्लभः॥

प्रदानेन यथाप्राप्तं दारिद्र्यं मम दुःखदम्।
तत्सर्व्वं मम दानेन पापमाशु विनाशय॥

कर्म्मविपाकसमुच्चये,—

ऋणं दत्त्वा अधिकवृद्धिग्रहणे अन्येषां भयोत्पादने पाषाणादिप्रहारे च दारिद्र्यं देशान्तरवासः महाक्लेशी हृद्रोगी उदावर्त्ती च। तत्र कृच्छ्रमतिकृच्छ्रं चान्द्रायणम्। आज्यचरुभ्यां होमो व्याहृतिभिः। यत्किञ्चेदमिदं सूक्तं अजितां वा जपेत्।

अथ ब्रह्मराक्षसत्वहरम्।

कर्म्मविपाकसमुच्चये,—

अन्यायवृत्तिनृपतिसेवनात् विप्रहिंसनात् महादानसमादानात् गुरुभार्य्याभिमर्द्दनात् दंष्ट्रिभ्यश्च मरणात् गुरुब्राह्मणनिर्दयात् वेदवाह्यस्य शास्त्रस्य पठनात् कर्म्मसेवनात्।

विषोद्बन्धनशस्त्राद्यैः परस्त्रीगमनात् तथा।
श्रुताध्ययनसम्पन्नश्रोत्रियब्राह्मणस्य तु॥
उदासीनः सभामध्ये कृत्वा भङ्गं सुदारुणम्।
परीक्षासमये प्राप्ते कृत्वा भङ्गं सुदारुणम्॥
वेदाध्ययनसम्भूतफलदानाविशेषतः।
देवब्राह्मणराज्ञाञ्च स्वर्णापहरणात् तथा।
अरण्ये निर्जले देशे जायते ब्रह्मराक्षसः॥

ब्रह्मराक्षसत्वं पिशाचत्वस्याप्युपलक्षणम्। श्रुताध्ययनयुक्त

एतन्निमित्तवांश्चेद् ब्रह्मराक्षसः। श्रुताध्ययनरहित एतन्निमित्त-वांश्चेत् पिशाचः। अत्र—

पुत्रादिभिर्गयाश्राद्धजपहोमादिभिस्तथा।
ब्रह्मस्वार्पणतस्तस्य वेदं वा नित्यशो जपन्॥
देवतातीर्थे * * * कन्यादानेन चैवहि।
ब्रह्मराक्षसपैशाचान्मुच्यते मनुरब्रवीत्॥

जपो वेदपारायणं होमो लक्षहोमादि। ब्रह्मस्वार्पणं पिता यस्मात् कृतं तद्द्रव्यस्य पुत्रेण तस्मै समर्पणम्। पुरुषसूक्तादि-नित्यजपः। पुत्रादिभिरेवमादिकरणाद्ब्रह्मराक्षसपैशाचान्मुक्ति-रित्यर्थः।

इत्यग्निचिद्-वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे द्वितीयभागकृत्ये जपरूपवेदाभ्यासप्रसङ्गेन रोगनिवर्हणानि।

अथाध्यापनरूपः पञ्चमो वेदाभ्यासोऽभिधीयते।

तत्र दक्षः,—

तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा।

तत्र पुत्राध्यापनं नित्यं तथाच श्रुतिः। तथा तस्य पुत्रमनु-शिष्टं लोकमाहुः तस्मादेनमनुशासति।

याज्ञवल्क्यः,—

कृतज्ञोऽद्रोही मेधावी शुचिः कल्याणसूचकः।
अध्याप्याः साधुशक्ताप्तस्वार्थदा धर्मतस्त्विमे॥

कृतज्ञ उपकारज्ञाता। अद्रोही प्रसिद्धः। शुचिः पातकादि-रहितः। कल्याणसूचकः शुभलक्षणयुक्तः। साधुर्धार्म्मिकः। शक्तो वेदाक्षरग्रहणधारणे। आप्तो हितैषी। स्वः स्वकीयो ज्ञात्यादिः। तथा वित्तदः स्वेच्छया न तु पणपूर्व्वकम्।

मनुः,—

आचार्य्यपुत्रः शुश्रूषु र्ज्ञानदो धार्म्मिकः शुचिः।
[1]आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्म्मतः॥

ज्ञानदो विद्यान्तरदाता।

विद्यादानेन सुमतिर्ब्रह्मलोके महीयते।
विद्यादानात् परं दानं त्रैलोक्येऽपि न विद्यते॥
येन दत्तेन चाप्नोति शिवं परमकारणम्।
यावच्च पातकं तेन कृतं जन्मशतैरपि॥
तत्सर्व्वं नश्यते तत्र विद्यादानेन देहिनाम्।
पराध्ययनतः क्लेशं पुरुषस्तु यदश्नुते॥
तपस्तत्परमं तस्य ब्रह्मलोकप्रदं स्मृतम्।

यमः,—

संवत्सरोषिते शिष्ये गुरुर्ज्ञानमनुं दिशन्।
हरते दुष्कृतं तस्य शिष्यस्य वसतो गुरुम्॥

---

(१) Mss. read—

शक्तोऽर्थदाता स्वः साधुरध्याप्या दश धर्म्मतः।

मनुः,—

आचार्य्यपुत्रः शुश्रूषुर्ज्ञानदो धार्म्मिकः शुचिः ।

[1]आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्म्मतः ॥

विष्णुः,—

नापरीक्षितं याजयेन्नाध्यापयेन्नोपनयेत् ।

[2]विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम् ।

असूयकाय मां मा दा स्तथा स्यां वीर्य्यवत्तमा ॥

शेवधिर्निधिः । अत्र यद्यपि ।

अध्यापनमध्ययनं यजनं याजनं तथा ।

दानं प्रतिग्रहश्चैव षट् कर्म्माण्यग्रजन्मनः ॥

षसान्तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका ।

याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥

इत्यध्यापनस्य जीविकात्वमुक्तं तेनास्य धर्म्मजनकत्वे मानाभावः । तथा शुश्रूषा (?) [-षया] विद्यान्तरप्राप्तिप्रत्युपकारादिकामनया क्रियमाणस्य धर्म्मजनकत्वे मानाभावः । तथापि सर्व्वथा

---

(१) Mss. read—

शक्तोऽर्थदाता स्वः साधुरध्याप्या दश धर्म्मतः ।

पाठेऽस्मिन् दश न सङ्गच्छत इत्ययं परित्यक्तः । सं

(२) P. Adds—आपस्तम्बः,—जात्याचारसंशये धर्म्मार्थमागतमग्निमुपसमाधाय जातिमाचारं पृच्छेत् । साधुतां चेत् प्रतिजानीते शास्त्रं प्रतिपाद्यते अग्न्युपसमाधानं संशयार्थं यमः,—नापृष्टः कस्यचित् ब्रूयात् । न चान्यायेन पृच्छतः । जानन्नपि हि मेधावी जड़वल्लोकमाचरेत् ॥ मनुः,—विद्ययैव समं कामं कर्त्तव्यं ब्रह्मवादिना । आपद्यपि हि कष्टायामिति ।

दृष्टफलाभिसन्धानमन्तरेण परोपकारबुद्ध्या क्रियमाणस्याध्यापनस्य ब्रह्मलोकादिसफलार्थत्वं बोध्यम् । अत्र शिष्टाः,—

गृह्णीत योऽननुज्ञातः परस्मात् पठतो द्विजः ।

ब्रह्मस्तेयेन संयुक्तः स याति नरकं ध्रुवम् ॥

यश्च श्रुत्वान्यतः शास्त्रं संस्कारं प्राप्य वा शुभम् ।

अन्यस्य जनयेत् कीर्त्तिं गुरोः स ब्रह्महा भवेत् ॥

एकमप्यक्षरं यस्य श्रुतस्योपकरोति यत् ।

पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सुकृती भवेत् ॥

कपिलानां सहस्रेण सम्यग्दत्तेन यत्फलम् ।

तत्फलं सकलं लेभे धर्म्मशास्त्रप्रदायकः ॥

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् ।

सामस्वरविधिज्ञश्च पंक्तिपावनपावनः ॥

तथा,—

त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ।

नरकादुद्धरन्त्येताः

इत्यादिवाक्यबलाद् विद्यान्तरदानमपि तत्फलार्थं काम्यमित्यध्यापनान्तर्गतमेव ।

बृहस्पतिः,—

एवं दण्डादिकैर्युक्तः संस्कृत्य तनयं पिता ।

वेदमध्यापयेत् यत्नाच्छास्त्रं मन्वादिकं तथा ॥

मनुः,—

भार्य्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥

इति श्रीमहामहोपाध्यायाग्निचिद्वाजपेयिनरसिंहविरचिते
नित्याचारप्रदीपे द्वितीयभागकृत्यम् ।

अथ तृतीयभागकृत्यम् ।

तत्र दक्षः,—

तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम् ।
माता पिता गुरुर्भार्य्या प्रजा दीनः समाश्रितः ॥
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ।
ज्ञातिबन्धुजनः क्षीणस्तथाऽनाथः समाश्रितः ॥
अन्येऽपि धनयुक्तस्य पोष्यवर्ग उदाहृतः ।
ज्ञानविद्भ्यश्च दातव्यमन्यथा नरकं व्रजेत् ॥
भरणं पोष्यवर्गस्य प्रशस्तं धर्म्मसाधनम् ।
नरकं पीड़ने तस्य तस्माद् यत्नेन सम्भरेत् ॥
स जीवति पुमानेको बहुभि र्योऽनुजीव्यते ।
जीवन्तोऽपि मृतास्त्वन्ये पुरुषाः सोदराम्भराः ॥

अर्थसाधनं धनार्जनं। दीनः समाश्रितः न तु सम्पन्न आश्रितोऽपि। अभ्यागतः सम्बन्धी ग्रामान्तरादागतः। ज्ञातिः पितृबन्धुः। बन्धुर्मातृबन्धुः। जन आत्मजनः। अनाथः पित्रादिपोषकरहितः। तत्र मात्राद्यन्यानां कष्टायामप्यापदि गर्हितेनाप्युपायेन पोषणीयत्वम्। ज्ञात्यादीनां सम्भवे नातिगर्हितेनोपार्जनेन पोषणम् ।

गुरून् भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन् देवतातिथीन् ।
सर्व्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ॥

इति मनुवचनात् न तु तृप्येत् प्राणयात्रामात्रं कुर्य्यादेव ।

तथा,—

श्रीमन्तं ज्ञातिमासाद्य यो ज्ञातिरवसीदति ।
सीदता यत्कृतं पापं तेन पापेन लिप्यते ॥

इति मार्कण्डेयपुराणाच्च ।

ज्ञातिसमानत्वान्मातृबन्ध्वादीनामपि सम्भवे पोष्यत्वमवगम्यते। अतएव गुर्व्वादीनामपि प्रकारान्तरेण वृत्तिसम्भवे न पोष्यवर्गत्वम्।

गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन् ।
आत्मनो [1]वृत्तिसिद्ध्यर्थं गृह्णीयात् साधुतः सदा ॥

इति। विना वा तैर्गृहे वसन्निति तेषां प्रकारान्तरेण वृत्तिसिद्धादितिभावः ।

वामनपुराणे,—

ततश्च कुर्य्यान्निजजातिधर्म्मं
देशानुशिष्टं कुलधर्म्ममग्र्यम् ।
स्वगोत्रधर्म्मं न हि सन्त्यजेत

निजजातिधर्म्मं ब्राह्मणस्य याजनादीत्येवम्। देशानुशिष्टं

---

(१) मुद्रितमनौः—वृत्तिमन्विच्छन् ०। Prof. Jolly's edition. अ० ४। श्लो० २५२।

यस्मिन् देशे य उपायः शक्यत्वेन विधिविषयस्तं कुर्य्यात् । कुलधर्म्मं वक्ष्यमाणशालीनयायावरत्वादिरूपम् । तस्यावश्यकत्वाय स्वगोत्रेत्यादि ।

विष्णुपुराणे,—

यज्ञसंस्था हविःसंस्थाः सोमसंस्थाश्च संस्थिताः ।
धने यस्मान्मनुष्याणां यतेतातो धनार्जने ॥

महाभारते,—

अर्थेन च विहीनस्य पुरुषस्याल्पमेधसः ।
उच्छिद्यन्ते क्रियाः सर्व्वा ग्रीष्मे कुसरितो यथा ॥
दुर्भिक्षादेव दुर्भिक्षं क्लेशात् क्लेशं भयाद्भयम् ।
गृहेभ्यः प्रसृता यान्ति दरिद्राः पापकारिणः ॥

तथा,—

धर्म्मेणार्थः समाहार्य्यो धर्म्मलब्धं त्रिसाधनम् ।
कर्त्तव्यं धर्म्मपरमं मानवेन प्रयत्नतः ॥
एकेनांशेन धर्म्मस्तु कर्त्तव्यो भूतिमिच्छता ।
एकेनांशेन कामश्च एकमंशं विवर्द्धयेत् ॥

मार्कण्डेयपुराणे,—

पादेन तस्य पारत्र्यं कुर्य्यात्सञ्चयमात्मवान् ।
अर्द्धेन चात्मभरणं नित्यं नैमित्तिकं तथा ॥
पादं चार्द्धार्द्धमर्द्धस्य मूलभूतं विवर्द्धयेत् ।

इति । पादमित्यस्य विवरणमर्द्धार्द्धमर्द्धस्येति । तच्चार्द्धेन वृत्त्यन्तरासम्भवमालोक्य कुसीदवृत्त्यभिप्रायं वेश्याभिप्रायं वा ।

नारदः,—

धनमूलाः क्रियाः सर्व्वा [1]यत्नस्तस्यार्जने मतः ।
रक्षणं वर्द्धनं भोग इति तस्य विधिः क्रमात् ॥
[2]यथैतत् त्रिविधं ज्ञेयं शुक्लं शबलमेव च ।
कृष्णञ्च तस्य [3]विज्ञेयो विभागः सप्तधा पुनः ॥
श्रुतशौर्य्यतपःकन्याशिष्ययाज्यान्वयागतम् ।
धनं सप्तविधं [4]शुद्धमुदयोऽप्यस्य तद्विधः ॥
कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः ।
कृतोपकारादाप्तञ्च शबलं समुदाहृतम् ॥
[5]पार्श्विकद्यूतचौरार्त्तिप्रतिरूपकसाहसैः ।
व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम् ॥

श्रुतेनाध्यापनेन । शौर्य्येण विजयादिना । कन्यालब्धं कन्यया सह श्वशुरगृहाल्लब्धम् । शिष्यागतं गुरुदक्षिणया । याज्यागतं दक्षिणात्वेनागतम् । अन्वयागतं दायलब्धम् । उदयः फलञ्च तद्विधः शुक्लः । अनुवृत्तिः सेवा । पार्श्विकं उत्कोचादिलब्धम् ।

---

(१) मुद्रितनारदस्मृतौः—यत्नस्तत्साधने मतः । Prof. Jolly's edition. प्रकरणं ऋणादानं नाम प्रथमं व्यवहारपदं श्लो० ४३ ।

(२) „ तत् पुनस्त्रिविधं ० do श्लो० ४४ ।

(३) „ विज्ञेयः प्रभेदः do श्लो० ४४ ।

(४) „ शुक्लस्तद्योगस्तस्य तद्विधः do श्लो० ४५ ।

(५) „ उत्कोचद्यूतदौत्यार्त्तप्रति ० ० कृष्णं हि तदुदाहृतम् । do श्लो० ४७ ।

आर्त्तिः पीड़ा। प्रतिरूपं द्रव्याभ्यासः। साहसं पौतयात्रादि। व्याजो द्रव्यमिश्रीकरणम्।

तथा पुनर्नारदः,—

[1]तत्पुनर्द्दादशविधं प्रतिवर्णतया श्रुतम्।
साधारणं स्यात् त्रिविधं विशेषं नवधा विदुः॥
क्रमागतं प्रीतिदायः प्राप्तञ्च सह भार्य्यया।
अविशेषेण वर्णानां सर्व्वेषां त्रिविधं धनम्॥
वैशेषिकं धनं विद्याद् ब्राह्मणस्य त्रिलक्षणम्।
प्रतिग्रहेण यल्लब्धं याज्यतः शिष्यतस्तथा॥
त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम्।
युद्धोपलब्धं काराच्च दण्डाच्च व्यवहारतः॥
वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम्।
कृषिगोरक्षवाणिज्यैः शूद्रस्यापि त्वनुग्रहात्॥

(१) मुद्रितनारदस्मृतौ:—
तत् ॰ प्रतिवर्णाश्रयात् स्मृतम्।
साधारणं ॰ शेषं नवविधं विदुः॥ ५०
क्रमागतं ॰। ॰ त्रिविधं शुभम्॥ ५१
॰ धनं ज्ञेयं ब्रह्मणस्य शुभं त्रिधा।
॰ स्यापि शुद्धं वैशेषिकं ॰।
कराद् युद्धोपलब्धञ्च दण्डाच्च व्यवहारतः॥ ५२
॰ स्यापि त्रिधा शुभम्।
॰ वाणिज्यैः शूद्रस्यैषामनुग्रहात्॥ ५४
Prof. Jolly's edition. ऋणादानं नाम प्रथमं व्यवहारपदम्।

कारः प्रजाभ्यः करः। व्यवहारतो दण्डतः। शूद्रस्यानुग्रहात् शुश्रूषाकृतात्।

विष्णुः,—

अथ गृहाश्रमिणस्त्रिविधोऽर्थो भवति। शुक्लः शबलोऽसितश्च। शुक्लेनार्थेन यदौर्द्ध्वदेहिकं करोति तेनास्य देवत्वमासादयति। यच्छबलेन तन्मानुष्यम्। यत्कृष्णेन तत् तिर्य्यक्त्वम्। स्ववृत्त्युपार्जितं सर्व्वेषां शुक्लम्। [1]अनन्तरवृत्त्युपार्जितं कृष्णम्।

क्रमागतं प्रीतिदायः प्राप्तञ्च सहभार्य्यया।
अविशेषेण सर्व्वेषां धनं शुक्लमुदाहृतम्॥

सम्पद्यापदि वा यस्य या वृत्तिर्विहिता तल्लब्धं शुक्लम्। तेन कर्म्मकरणे देवत्वम्। यदविहितमप्रतिषिद्धं सामान्येनानुज्ञातं तल्लब्धं शबलम्। यदत्यन्तविगर्हितं विपद्यपि निषिद्धं तत्कृष्णम्। तेन तिर्य्यक्त्वमिति विभागः। एतदेव सात्विकं राजसं तामसं चेत्याख्यायन्ते। यद्यपि धनार्जननियमो न क्रत्वर्थः पुरुषार्थ एवेति चतुर्थे साधितं तथापि वचनबलात् फलतारतम्यमिति उपायान्तरेणार्जने क्रतुवैगुण्याभावः। तथा उपायाः।

तत्र विष्णुनारदौ,—

क्रमागतं प्रीतिदायः प्राप्तञ्च सहभार्य्यया।
अविशेषेण वर्णानां

इत्यनेन सर्व्वेषां शुद्धधनत्वेन कथितवन्तौ। तेन प्रीतिदायेन

(१) मुद्रितविष्णुस्मृतौ:—अनन्तरवृत्त्युपात्तं च कृष्णं। ८। Prof. Jolly's edition. ५८ प्रकरणम्।

विवाहकाले श्वशुरदत्तेन पितृपितामहादिक्रमागतधनेन वा धनवतो न तृतीयभागे धनार्जनार्थमाह।

तथाच मनुः,—

[1]नेहेत वा प्रसङ्गेन न विरुद्धेन कर्म्मणा।
न कल्पमानेष्वर्थेषु नार्त्यामपि यतस्ततः॥

प्रसङ्गेन गीतवाद्यादिना। कल्पमानेष्वर्थेषु पित्रादिक्रमागतविवाहादिलब्धेषु। तस्य पित्रादिधनेनैव यावत् स्वकर्त्तव्यदृष्टादृष्टार्थकर्म्मनिर्वाहात्। पाकसंस्थादिवाजपेयपौण्डरीकगोसत्रादिमहायज्ञान्तकर्म्मणामपि बहुतरधनसाध्यानां पित्रादिक्रमागततावद्धनवतः कर्त्तुं सौकर्य्यात्। एवं

वृत्त्यर्थादधिकं गृह्णन् नरो भवति किल्विषी।

इति बहुतरधनस्वीकारदोषस्य दायादिष्वसम्भवः। तस्य प्रतिग्रहादिविषयत्वात्।

तथाच व्यासः,—

प्रतिग्रहरुचि र्न स्यात् वृत्त्यर्थं तं समाचरेत्।
[2]स्थित्यर्थादधिकं गृह्णन् ब्राह्मणो यात्यधोगतिम्॥

इति। किञ्च

विद्वांस्तु ब्राह्मणो [2]लब्ध्वा पूर्व्वोपनिहितं निधिम्।
अशेषतोऽप्याददीत सर्व्वस्याधिपतिर्हि सः॥

---

(१) मुद्रितमनौः—नेहेतार्थान् प्रसङ्गेन ०। Prof. Jolly's edition. अ० ४ श्लो० १५।

(२) मुद्रितमनौः—दृष्ट्वा ०। Prof. Jolly's edition अ० ८। श्लो० ३७।

इति मनुवचनेन निधिग्रहणे दोषाभावात् तद्धनवतो महायज्ञाद्यनुष्ठानम्। एवं तपसा जपहोमादिना यल्लब्धं। तथा यजुर्विधानादौ सुवर्णपात्रशतमुत्पाद्यत इत्यादिश्रवणात् तल्लब्धधनवतो बहुधनसाध्यकर्म्मानुष्ठानम्। एवं सति

धर्म्मार्थं यस्य वित्तेहा तस्यानीहा गरीयसी।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्॥

इत्येतन्महाभारतवचनम्। तन्निन्दितमहादानादिप्रतिग्रहादिपरमेव। प्रक्षालनाद्धि पङ्कस्येति वाक्यशेषात् दायाद्यादिधने पङ्काभावात्।

यस्य त्रैवार्षिकं [1]द्रव्यं पर्य्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति॥

इत्यादिना मनुवचनेन त्रैवार्षिकाधिकान्नत्वस्य दायाद्यादिधनवत्तयैव विवक्षितत्वात्।

यत्तु ब्रह्मवैवर्त्ते,—

मातापितृगुरोरर्थे विवाहार्थेश्च धर्म्मतः।
अध्वरार्थञ्च विदुषा ग्रहीतव्यं धनं सदा॥

इति तन्नित्यसोमयागार्थं सत्प्रतिग्रहाभ्यनुज्ञातं मातापित्रादिनित्यपोष्यसाहचर्य्यात्।

ननु च गृहस्थमात्राधिकारिकत्वान्महाक्रतुविधीनां पुनश्च स्नातकधर्म्मत्वेन पाकसंस्थाहविःसंस्थासोमसंस्थामहायज्ञस्वरूप-

---

(१) मुद्रितमनौः—भक्तं। Prof. Jolly's edition. अ० ११ श्लो० ७।

पञ्चविधक्रतूनां देवलप्रभृतिभिः स्मरणात् तेषाञ्च धनं विना अशक्यानुष्ठानत्वेन महादानादिप्रभृतिग्रहेणापि धनार्जनं क्रतुविधिभिरेव प्रयुज्यते। यद्यपि धनार्जनं क्रत्वङ्गं नचाधानवद् विध्यन्तरासिद्धमुपजीव्यते। यस्मिन् प्रीतिः पुरुषस्य [1]तल्लिप्सार्थलक्षणेति। स्वतः प्राप्तत्वेनाविधेयत्वात्। किन्तु उपायान्तरपरिसंख्यारूपेण प्राप्यते। तदुक्तं भाष्यकृता द्रव्यवत्ता तु न केनचिद्विधिना क्लृप्तेति। तथापि द्रव्यं विनाऽसिद्धता क्रतुना द्रव्यमाक्षिप्यते द्रव्येण तु तदुपार्जनाक्षिप्यत इत्येवमपि प्रतिग्रहादिकविध्यपेक्षितत्वात् कर्त्तव्यमेव। अतएव षष्ठे त्रयाणां द्रव्यसम्पन्नः कर्म्मणो द्रव्यसिद्धित्वादिति पूर्व्वपक्षं कृत्वा अनित्यत्वात्तु नैव स्यादिति निर्धनोऽप्यर्जयित्वा अधिक्रियेतेत्युक्तमिति चेन्नैवम्। यद्यपि क्रतुविधिभिर्द्रव्यमाक्षिप्यते द्रव्येण तु नार्जनोपाय आक्षेप्तुं शक्यते। उपायं विनापि दायादिधनसम्भवेनानैकान्तिकत्वात्। यत्तु षष्ठे—निर्धनोप्यर्जयित्वा अधिकारी इति तत्र नायमर्थः क्रत्वर्थमर्जनं कर्त्तव्यमिति। किन्तु निर्धनस्य पुरुषस्य धनमभिलषितमेव तेन तदुपाये तस्य प्रयत्नः सिद्ध एव। स यदि धनं लभ्यते तदा क्रतुकरणे शक्तत्वादधिक्रियत एवेति। तत्रैतत् स्यात् जीवनार्थं धनसत्त्वेऽपि क्रतुपर्य्याप्त धनाभावे जीवनार्थं धनेच्छा किन्तु क्रत्वर्थमेवेति फलतः क्रत्वर्थमेव धनार्जनमिति। नैवं न जीवनमात्रपर्य्याप्तधनवन्तं प्रत्याह

(१) P. तन्निष्टार्थ०।

स्यक्रान्त(?)विधिरस्य करोति किन्त्वविशेषफलार्थिनं कर्त्तृशक्तिमन्तं तेन जीवनार्थोपात्तधनेनैव निराकाङ्क्षत्वात् क्रतुविधिर्न स्वयं धनार्जनं प्रयुङ्क्ते। पुरुषस्तु यदि जीवनार्थधनस्याल्पत्वेन बहुधनसाध्यक्रतावपर्य्याप्तत्वेन क्रतुसिद्धिमेवोद्दिश्य प्रतिषिद्धोपायेन धनमर्जयति तदा तदपि धनं क्रतुना गृह्यत एव। धनं क्रत्वङ्गं नोपायः। जीवनार्थमपि धनं जीवनार्थत्वेन क्रत्वङ्गं किन्तु व्रीहित्वादिरूपेण क्रतुमुद्दिश्यार्जितमपि व्रीह्यादिकं व्रीह्यादिकमेव। यथा क्रतुफलमुद्दिश्य क्रियमाणमप्याधानं न तु क्रतुविधिना प्रयुज्यते। तत्र स्वविधिसिद्धवदिहापि द्रव्यस्वरूपस्य पुरुषाभिलक्षितत्वमेव तदुपाये प्रवर्त्तकम्। अयन्तु विशेषः द्रव्यस्याभिलषितत्वं कदाचिज्जीवनोपायत्वेन कदाचिच्च क्रत्वादिफलाकाङ्क्षया। तदुपायप्रवृत्तिश्च लोकतः। आहवनीयादीनामपेक्षितत्वञ्च क्रतुफलद्वारकमेव तदुपायश्चाधाने शास्त्रत एव प्रवृत्तिः। न चैतावता क्रतुविधिभिराहवनीयोपायग्रहणं द्रव्योपायग्रहणं वा मानाभावात्। पुरुषस्य धनार्जने उपायविशेषनियमात् तदतिक्रमे यथाशास्त्रं प्रायश्चित्तम्। यत्तु मनुवचनम्,—

सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥

इति। तत्र दायः पित्रादिक्रमागतम्। लाभो निध्यादिलाभः। क्रयः प्रसिद्धः। जयः क्षत्रियस्य। ब्राह्मणस्यापदि युद्धाद् विना (?)। प्रयोगः कुसीदवृत्तिः। कर्म्मयोगः कृषिवाणिज्यादि वैश्यस्य। ब्राह्मणस्याप्यापदि। सत्प्रतिग्रहः द्विजातिभ्यः प्रशस्तेभ्यः।

इत्यादि यद्धर्म्महेतुत्वमर्जनस्योक्तं नैतावतापि क्रतुविधिप्रयुक्तत्वं किन्तु पुरुषस्य शुद्धधनेन कर्म्मकरणे देवत्वमित्यादिकमेव वचनात् कल्प्यते। केवलं यो लोभेन गर्हितमहादानादिप्रतिग्रहं करोति लोभेन भ्रमेण वा तत्त्यागपूर्व्वकं प्रायश्चित्तमकृत्वा पश्चात् तापेन तेन महायज्ञं करोति तस्य क्रतुफलं स्यादेव। धनस्य राजसत्वादिना फलं मध्यमम्। प्रतिग्रहदोषस्तु स्यादेव। धर्म्माकाङ्क्षया तत्करणमनुचितम्। निन्दितः प्रतिग्रहः कृतः। कदाचिच्च दैवमानुषविघ्नेन धर्म्मो नानुष्ठितः तदा महाननर्थः स्यात्।

हारीतः,—

पतितदुष्कृतेभ्यः प्रतिगृहीतमस्वर्ग्यमयज्ञीयं न च तेन पुण्यार्थानाप्नोति। इति वचनात् पतितादिचाण्डालादिप्रतिगृहीतेन धनेन यज्ञादिकरणे फलाभावः। तस्माद् गृहिभिस्तत्र कर्त्तव्यम्। तत्सिद्धं दायाद्यादिधनासत्वेनार्जनार्थं तृतीयभागे यत्नः।

तथाच मनुः,—

नेहेतार्थान् प्रसङ्गेन न विरुद्धेन कर्म्मणा।
न कल्पमानेष्वर्थेषु नार्त्यामपि यतस्ततः॥

अर्थेषु कल्पमानेषु जातेषु धनार्थं नेहेतेत्यर्थः। यस्य तन्नास्ति समाप्तं वा तस्य शास्त्रोक्ता वृत्तयः।

तत्र मनुः,—

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव षट् कर्म्माण्यग्रजन्मनः॥

षस्नान्तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः॥

विशुद्धोऽत्र यदीयप्रतिग्रहे न विशेषतः प्रायश्चित्तमाम्नातम्। च शब्दाद् देशकालद्रव्यस्वरूपनिबन्धनदोषाभावरूपविशुद्धत्वं प्रतिग्रहविशेषणम्।

याज्ञवल्क्यः,—

इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च।
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा॥

गौतमः,—

द्विजातीनामध्ययनमिज्यादानं ब्राह्मणस्याधिका प्रवचनयाजनप्रतिग्रहाः। पूर्व्वेषु नियमः। पूर्व्वेष्वध्ययनादिषु आवश्यकत्वं नियमः। न तु प्रवचनादिषु विभागादिप्राप्तकुटुम्बपोषणपर्य्याप्तधनस्य धनार्जननियमाभावादिति विज्ञानेश्वरः।

मनुः,—

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि॥
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः।
अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयम्॥
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा।
सत्यानृताभ्या'मथवा न श्ववृत्त्या कदाचन॥

---

(१) मुद्रितमनौः—मपि वा ०। Prof, Jolly's edition. अ० ४ श्लो० ४।

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतन्तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेत् ॥

गौतमः,—

आद्यास्त्रयः श्रेष्ठाः स्युः । उञ्छशिलायाचितयाचितरूपास्त्रयस्त्र इत्यर्थः ।

हारीतः,—

ऋतामृतसत्योपहृतसम्पन्नापवृत्तयो भवन्ति । ऋतमुञ्छशिलम् । भैक्ष्यममृतम् । अयाचितोपपन्नं सत्यम् । अध्यापनाच्छिष्योपहितम् । सम्पन्नवृत्तिः सद्भ्यो याचितम् । अपवृत्तिः कृषिः । तासां पूर्व्वाः पूर्व्वा श्रेयस्यो भवन्ति । ब्राह्मणस्येत्यनुवृत्तौ ।

गौतमः,—

कृषिवाणिज्ये वाऽस्वयं कृते कुसीदञ्च । कुसीदं स्वयं कृतमपि । कुसीदवृत्तिर्धर्म्मेऽरति प्रदेशान्तरे गौतमेनाप्यभिधानात् ।

पैठीनसिः,—

गृहस्थधर्म्मांश्चरिष्यन् न लोभेत येन धर्म्मस्य वृत्तिमुपाददीत ।

आपस्तम्बः,—

दायाद्यं शिलोञ्छौ यच्चापरिगृहीतम् । अपरिगृहीतमस्वामिकं शाकनीवारादिकमिति लक्ष्मीधरः । निध्यादिकं वा ।

अत्र च शाल्यादेर्निपतितस्य परित्यक्तवल्लरीग्रहणं शिलम् । एकैकस्य त्यक्तस्य कणस्योपादानं उञ्छमिति विज्ञानेश्वरः ।

हारीतः,—

अयोनि । कण्डनम् । गोस्थानम् । धान्यकरणम् । लवनम् । इति पञ्च उञ्छस्थानानि । लूनं शीर्णमनुज्ञातं शिलमित्याहुः । अयोनि मार्गादि । कण्डनस्थानं प्रसिद्धम् । गोस्थानं गोभ्यो धान्यादिदानस्थानम् । धान्यकरणं खलम् । लवनं लूयतेऽस्मिन् इति व्युत्पत्त्या क्षेत्रम् । अनुज्ञातं स्वाम्युपेक्षितम् । अयाचितं याचितञ्च प्रतिग्रहरूपं प्रीतिदायरूपं च विशेषेण निर्द्देशात् ।

अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः ।
अन्यत्र कुलटाषण्डपतितेभ्यस्तथा द्विषः ॥

इति याज्ञवल्क्येन प्रतिग्रहप्रकरणेऽभिधानात् । अपि दुष्कृतकर्म्मणः किमुत विशुद्धादित्यर्थः ।

प्रख्यापनं प्रध्यापनं प्रश्नपूर्व्वः प्रतिग्रहः ।
याजनेऽध्यापने वादः षड्विधो वेदविक्रयः ॥
न वेदविक्रयं कुर्य्यादग्निविक्रयमेव च ।

इति भारते याजनाध्यापननिन्दा वेतनपूर्व्वकयाजनाध्यापनविषयेति लक्ष्मीधरव्याख्यानात् । भृतकाध्यापनस्य उपपातकमध्ये गणनाच्च । अपणपूर्व्वकं ये याजनाध्यापने तयोरनावृत्तित्वम् । अतएव

कृतज्ञोऽद्रोही मेधावी शुचिः कल्याणसूचकः ।
अध्याप्या धर्म्मतः साधुशक्ताप्तज्ञातिवित्तदाः ॥

इति याज्ञवल्क्यवचने वित्तदस्याध्यापनानुज्ञा । तत्रच वित्तद इति अपणपूर्व्वकमर्थप्रदातेति विज्ञानेश्वरेण व्याख्यातम् ।

यत्तु मनुः,—

राजतो धनमन्विच्छेत् संसीदन् ब्राह्मणः क्षुधा ।
याज्यान्तेवासिनो वापि नत्वन्यत इति स्थितिः ॥

तथाच याज्ञवल्क्यः,—

राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा ।

इति याजनाध्यापनयोरापद्धर्म्मत्वमुक्तम् । वृत्तौ सीदन्निति-पदाद् विधानाभाव इति विज्ञानेश्वरेण व्याख्यानात् न वृत्त्यन्तरासम्भवरूपत्वेन आपद्वृत्तित्वम् । यद्वा राजप्रतिग्रहसाहचर्य्यात् पणपूर्व्वकयाजनाध्यापनापरम् । सीदन्निच्छेदिति धनकामनया पणपूर्व्वकयाजनाध्यापनप्रतीतिः । तेन अपणपूर्व्वकप्रशस्तयाजनाध्यापनयोरनापद्यपि स्नातकधर्म्मत्वम् ।

तथाच ब्रह्माण्डे,—

अनापद्यपि धर्म्मेण याज्यतः शिष्यतोऽपि वा ।
गृह्णन् प्रतिग्रहं विप्रो न धर्म्मात् परिहीयते ॥

तत्सिद्धम् ।

याजनाध्यापनप्रतिग्रहा मुख्या-वृत्तयः । तत्रापि प्रतिग्रहाऽसम्भवे अध्यापनम् । अध्यापनासम्भवे याजनम् । ब्राह्मणस्येत्यनुवृत्तौ गौतमः,—

याजनाध्यापनप्रतिग्रहाः सर्व्वेषां पूर्व्वः पूर्व्वो गुरुः । सर्व्वेषां प्रशस्तानामपि गुरु दोषावहः । विशुद्धप्रतिग्रहाद् विशुद्धाध्यापनं गुरुः । विशुद्धाध्यापनाच्च विशुद्धयाजनं गुरुरिति भावः । युक्तञ्चैतत् । पतितसंसर्गे याजनाध्यापनयोः सद्यः पातित्यहेतुत्वम् । पतितप्रतिग्रहस्य संवत्सरेणेति गौरवस्य व्यक्तत्वात् ।

यत्तु याजनाध्यापनप्रतिग्रहमध्ये प्रतिग्रहस्य गर्हितत्ववचनं मानवे—

प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ।

इति तद्विशुद्धयाजनाध्यापनापेक्षया गर्हितप्रतिग्रहविषयम् । तथाच वाक्यशेषे ।

याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम् ।
प्रतिग्रहस्तु क्रियते [1]शूद्रादप्यन्त्यजन्मनः ॥

इति याज्यशिष्ययोः संस्कृतत्वेन प्रशस्तत्वं याजनाध्यापनप्राशस्त्ये हेतुः । अन्त्यः शूद्रश्चाण्डालादिरूपः प्रतिग्रहगर्हितत्वे हेतुरुक्तः ।

यच्च हेत्वन्तरमुक्तम्,—

जपहोमैरपैत्येनो याजनाध्यापनैः कृतम् ।
प्रतिग्रहनिमित्तन्तु त्यागेन तपसैव च ॥

इति तदपि विशुद्धयाजनाध्यापनापेक्षया गर्हितप्रतिग्रहस्य निन्दापक्षे सङ्गच्छते । अन्यथा निन्दितयाजनाध्यापनयोरिति धनत्यागपूर्व्वकमेव प्रायश्चित्तमिति । जपहोमैरपैत्येन इत्यसङ्गतिः ।

(१) मुद्रितमनौ :—शूद्रस्याप्यन्त्यजन्मनः । Prof. Jolly's edition. अ० १० श्लो० ११० ।

यद्गर्हितेनार्जयन्ति कर्म्मणा ब्राह्मणा धनम् ।
तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसैव च ॥

इति मनुविष्णुभ्यां गर्हितार्जनमात्रे सामान्येन त्यागविधानात् । तथा पुरोहितयाजनाध्यापनाधिकारे यमेन

कर्म्मणा गर्हितेनेह यद्वित्तं समुपार्जितम् ।
तस्य त्यागेन शुद्ध्यन्ति * * * न्वेषणेन च ॥

हारीतः,—

शूद्रयाजने गर्हितधनं न............प्रक्षिप्य ब्राह्मणानुपेत्य ब्रूयादिति ।

वशिष्ठः,—

गर्हितयाजनाध्यापनदक्षिणात्यागात् पूता भवन्ति । अयाज्ययाजने पुनः संस्कारः श्रूयते । नत्वस्य प्रतिग्रहे । पतितयाजने पातित्यं न पतितप्रतिग्रहे । तस्माद् यथोक्तमेव सम्यक् । अतएव लक्ष्मीधरेण तथैव व्याख्यातम् । प्रतिग्रहः प्रत्यवर इति प्रतिग्रहनिन्दा प्रशस्तयाजनापेक्षयेति ।

यत्तु वशिष्ठवचनम्,—

अग्नय इव दीप्यन्ते जपहोमैर्द्विजातयः ।
प्रतिग्रहेण शाम्यन्ति उदकेनाग्नयो यथा ॥

इति । तत्र प्रतिषिद्धप्रतिग्रहेणेति लक्ष्मीधरेण व्याख्यातम् ।

मनुः,—

कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ॥

चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम् ।
ज्यायान् परः परो ज्ञेयो धर्म्मतो लोकजित्तमः ॥
षट्कर्म्मैको (१)भवेदेषां त्रिभिरन्यः प्रवर्त्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥

कुसूलधान्यकः कोष्ठिकापरिमितधान्यवान् । कुम्भी मृद्भाण्डविशेषः । ईहा चेष्टा तस्यां भवं ऐहिकं त्र्यहं ऐहिकं यस्य स तथा । श्वोभवं श्वस्तनं अन्नं न तदस्तीत्यश्वस्तनिकः सद्य इत्यर्थः । अत्र चाश्वस्तनापेक्षया त्र्यहैहिके त्रैगुण्यदर्शनात् कुसूलकुम्भीधान्यकयोरपि पूर्व्वं पूर्व्वं त्रिगुणम् । कुम्भीधान्यकः त्र्यहत्रिगुणनवदिनकुटुम्बभरणयोग्यधान्यवान् । एवं कुसूलधान्यकः नवत्रिगुणसप्तविंशतिदिनकुटुम्बभरणयोग्यधान्यवान् । दर्शाद्यर्थघृतश्राद्धाद्युपकरणवस्त्रव्यजनदक्षिणादिसाधनमजाद्रव्यं प्रविश्य दिनपर्य्याप्तिसाधनत्वं धान्यानां बोद्धव्यम् । षट्कर्म्मैको भवेदेषामिति एषां चतुर्णां मध्ये एकः कुसूलधान्यकः षट्कर्म्मा भवेत् । षड्भिः कर्म्मभिः सप्तविंशतिदिनपर्य्याप्तधनमर्जयेत् । षट्कर्म्माणि च पूर्व्वोक्तानि उञ्छशिलायाचितयाचितकृषिवाणिज्यरूपाणि । अन्यो द्वितीयः कुम्भीधान्यकः त्रिभिरुञ्छशिलायाचितैर्नवदिनपर्य्याप्तधनमर्जयेत् । एकस्तृतीयः त्र्यहैहिकः उञ्छशिलाभ्यां त्रिदिनपर्य्याप्तधनमर्जयेत् । चतुर्थस्तु अश्वस्तनिकः केवलेन उञ्छेन जीवति । दिनमात्रपर्य्याप्तधनमर्जयेत् । ब्रह्म-

(१) मुद्रितमनौ :—भवत्येषां ० । Prof. Jolly's edition. अ० ४ श्लो० ९ ।

सत्रशब्द उञ्छपरः । ब्रह्म सततं त्रायत इति व्युत्पत्त्या । एते च वृत्तिप्रकारा न सर्व्वेषां ब्राह्मणानाम् । तथा सति—

यस्य त्रैवार्षिकं द्रव्यं पर्य्याप्तं भृत्यवृत्तये ।
अधिकं वापि विन्देत स सोमं पातुमर्हति ॥

इत्यादिना मनुनैव सप्तविंशतिदिनाधिकधनवतो गृहस्थस्य दर्शितत्वात् तद्विरोधापत्तेः । किन्तु धनसाध्यकर्म्मणा यः परलोकजयं नेच्छति धनजीवयोरनियतकालनाशित्वात् किन्तु वृत्तिसङ्कोचेनैव तपोरूपेण परलोकमिच्छति तस्येमे वृत्तिविशेषाः । तत्राप्युत्तरोत्तरस्य दुःखातिशयेन तपःप्रकर्षात् श्रेष्ठलोकप्राप्तिः फलम् ।

तदेतदुक्तम्,—

ज्यायान् परः परो ज्ञेयो धर्म्मतो लोकजित्तमः ।

इति । तेन कृच्छ्रचान्द्रायणादिकतपोरूपत्वेनैषां वृत्तिविशेषाणां फलसाधनत्वम् ।

कृच्छ्रकृद्धर्म्मकामस्तु महतीं श्रियमाप्नुयात् ।

इत्यादिवत् । तदुक्तं श्रीधरेण

अयञ्च वृत्तिविशेषपरिग्रहो धर्म्मातिशयार्थिगृहस्थमात्रविषयः ।

अत्रैव याज्ञवल्क्यः,—

कुसूलकुम्भीधान्यो वा त्र्यहिकोऽश्वस्तनोऽपि वा ।
जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः ॥

इति । अत्र विज्ञानेश्वरव्याख्या,—कुसूलधान्यो द्वादशाहकुटुम्बपोषणपर्य्याप्तधनः । कुम्भीधान्यः षडहपर्य्याप्तधनः ।

त्र्यहिकस्त्र्यहपर्य्याप्तधनः । अश्वस्तनः एकदिनपर्य्याप्तधनः । एते चत्वारः शिलवृत्तयः उञ्छवृत्तयो वेति जीवेद्वापि शिलोञ्छेनेत्युक्तम् । गृहस्थो द्विविधः । शालीनो यायावरश्च । तत्र प्रतिग्रहाधिको विप्र इत्यादिना

त्रैवार्षिकाधिकान्नो यः स हि सोमं पिवेद् द्विजः ।
प्रतिसंवत्सरं सोमं पशुः प्रत्ययनं तथा ॥

इत्यादिना शालीनस्य वृत्तयो दर्शिताः । कुसूलकुम्भीधान्योवेत्यादिना यायावरस्य चतुर्विधस्य शिलोञ्छवृत्तिरुक्ता । यदाह

देवलः,—

द्विविधो गृहस्थो यायावरः शालीनश्च । तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहरिक्थचयविवर्जनात् । षट्कर्म्माधिष्ठितः प्रेष्यचतुष्पदगृहग्रामधनधान्ययुक्तो लोकानुवर्त्ती शालीन इति । शालीनोऽपि चतुर्विधः । याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपाल्यैः षड्भिर्जीवत्येकः । याजनाध्यापनप्रतिग्रहैरन्यः । याजनाध्यापनाभ्यामपरः । चतुर्थस्तु अध्यापनेनैव ।

यदाह मनुः,—

षट्कर्म्मको भवेदेषां त्रिभिरन्यः प्रवर्त्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥

इति । तत्र विज्ञानेश्वरमते ब्रह्मसत्रपदमध्यापनपरम् ।

नैत्यिके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम् ।

इति ब्रह्मयज्ञे मनुनैव ब्रह्मसत्रशब्दप्रयोगात् ।

हारीतः,—

द्विविधमेव गृहस्थं प्राहुः। शालीनं यायावरञ्च। शालीनात् पुण्यतरो यायावरः। श्रेयान् सर्व्वारम्भेषु। शाला विद्यतेऽस्य इति शालीनः। स द्विविधः। सम्पन्नवृत्तिरसम्पन्नवृत्तिश्च। तयोरसम्पन्नवृत्तिः श्रेयान्। उञ्छशिलवृत्तिरित्यर्थः। सम्पन्नवृत्तिश्च उञ्छशिलभैक्ष्यायाचिताध्यापनयाजनकृषिवाणिज्यवृत्तिरिति शालीनो द्विविध इत्युक्त्वा यायावरं प्रत्याह शालीनात्मवृत्तियापनतया यायावरः। दश दश रात्रिर्वा वसन् यातीति यायावरः। वरासु वा वक्ष्यमाणासु वृत्तिषु यापयत्यात्मानमिति वा यायावरः। स द्विविधः कृतप्रस्थानोऽकृतप्रस्थानश्च। यस्य ऋत्विजः वपनपूर्व्वं पूर्व्वेद्युराग्नेयीं कारयित्वा प्रातर्वैश्वानरीं कारयित्वा इमां दिशं व्रज इदं द्रव्यमाहरेति व्यवस्थापयन्ति स कृतप्रस्थानः। अकृतप्रस्थानश्च यस्य ऋत्विजः वपनं कारयित्वा प्रातर्वैश्वदेवेनेष्ट्वा अस्यां दिशि इदं व्रीह्यादिद्रव्यं तिष्ठतीति कथयन्ति न स्वयं गच्छन्ति।

स एतयोरुभयोः साधारणधर्म्मानाह मन्वतः,—

शयनासनाहारविहारोत्थानाशनप्रतिग्रहाः। पर्व्वसु वपनम्। पञ्चाग्निपरिचरणम्। स्वयं होमोपस्थानम्। यथोक्तबलिहोमकरणम्। स्वाश्रमधर्म्मचरणम्। निषेधवर्जनम्। धनमाहृत्य गार्हपत्याय निवेदनम्। षण्मासकृच्छ्राचरणम्।

अस्य वृत्तयश्च,—

उञ्छशिलमयाचितम्। तच्चासम्भवे शूद्रादपि द्रव्यं वाप्युपेक्षितस्य व्रीह्यादेः स्वामिसन्दर्शने ग्रहणं न तु प्रार्थनमसन्दर्श्य वा ग्रहणं स्वर्णवर्णवृषस्कन्धे वा हलवाहनं चतुर्विंशतिसीतापर्य्यन्तं पलाशशाखया चतुःपञ्चाञ्जलिक्रमेण वीजवपनं यावत् तावत् कृष्या वा जीवनं राज्ञो भागदानम्। पक्षे कुदालेन वा यावत् कर्षितुं शक्नोति तावता जीवनम्। तत्र नियमेन राज्ञे भागदानम्। अयाचितादिभ्योऽन्नाधिक्ये सोमयागं साग्निचित्यमनग्निचित्यं कृत्वा तत्र सर्व्वस्वं दत्त्वा पूर्व्ववत् पात्रं ग्रीवायामासज्य धान्यवहनपात्राद् भिन्नाद् विशीर्णाद् भूमौ पतितधान्यं तस्मादनामिकाङ्गुष्ठाभ्यामेकैकं धान्यमादाय पात्रे करोति तेन जीवनं भिन्नवृत्तिः। एतासामष्टवृत्तीनामेकया वृत्त्या द्रव्यमाहृत्य गार्हपत्ये निवेद्य कालं नयन् संवत्सरमध्ये षण्मासं प्राजापत्यं कृच्छ्रं कुर्व्वन् यमनियमवान् यायावरो भवति। तस्य फलं परं ब्रह्मामृतमाप्नोतीति यद्गत्वा नेह जायेतेत्यत्रापि यायावरस्य वृत्तिविशेषाणां ब्रह्मावाप्तिरूपमोक्षफलार्थविधानात् यथोक्तकृष्यादेरपि विहितत्वादेव नाधर्म्मजनकत्वम्।

अत्र बौधायनः,—

शालीनयायावरचक्रचरधर्म्मकाङ्क्षिणां नवभिर्वृत्तिभिर्वर्त्तमानानाम्। तेषान्तद्वर्त्तनाद्वृत्तिरित्युच्यते। शालाश्रयत्त्वाच्छालीनत्वम्। वृत्त्या वरया यातीति यायावरत्वम्। अनुक्रमचरणाच्चक्रचरत्वम्। ता अनु व्याख्यास्यामः। इत्युक्त्वा तत्र धर्म्मविशेषानुक्त्या दशधा वृत्तिमाह। तत्र धर्म्मविशेषाः,—

आ नववृत्तेः। केशश्मश्रुवपनम्। कृष्णाजिनकमण्डलुभार-

यष्टिखनित्राणानुपकल्पनम् । त्रैधातवीयेन वैश्वानर्य्या पूर्व्वदिने इष्ट्वा प्रातरुदिते प्रस्थानम् । आहवनीये वास्तोष्पतीयं हुत्वा ग्रामान्तेऽवस्थानम् । तत्र मठं कृत्वा प्रवेशः । अन्यकृते मठे वा प्रवेशः । वक्ष्यमाणध्रुवावृत्तिपक्षे तत्र कृष्णाजिनादीनामुपयोगं कृत्वा वृत्त्यवगमनम् । वृत्त्या यदर्जयति तेषां विश्वेभ्यो देवेभ्यो जुष्टं निर्वपामीति निर्वापः । विश्वेभ्यो देवेभ्यो जुष्टं प्रोक्षामीति प्रोक्षणम् । तूष्णीं वा । तेन द्रव्येणाग्निहोत्रं दर्शपौर्णमासौ आग्रयणञ्च संस्कृत्य पक्त्वा पञ्चयज्ञानुष्ठानपूर्व्वकं व्रतोपायनम् । भोजनं क्षीरलवणमांसपर्य्युषितवर्ज्जं सर्पिर्दधिमिश्रम् । ब्रह्मचर्य्यमृतौ वा गमनम् । पर्व्वणि पर्व्वणि केशश्मश्रुनखरोमवपनम् । मृज्जलादिना वाह्यशुद्धिः । सत्यदमादिनान्तरशुद्धिः । एते दशवृत्तीनां साधारणधर्म्माः ।

दश वृत्तयश्च,—

षण्निवर्त्तनी । कौद्दाली । ध्रुवा । सम्प्रक्षालनी । समूहा । पालनी । शिलोञ्छा । कापोता । सिद्धेच्छा । वान्या ।

तत्र,—

दशहस्तेन दण्डेन त्रिंशद्दण्डा निवर्त्तनम् ।

षण्निवर्त्तनपरिमितां भूमिं अस्यूतनासिकाभ्यां समुष्काभ्यां कर्षति भोजनपर्य्यन्तं नातिश्रमं कृत्वा यावद्भिर्दिनैस्तावद्भूमिकृषिनिर्वाहो भवति तावत् कर्षणीयं तेन जीवनं षण्निवर्त्तनी ।

जलाभ्यासे कुद्दालेन फालेन तीक्ष्णेन काष्ठेन वा खात्वा धान्यवपनं कन्दमूलफलशाकौषधिनिष्पावनं तेन जीवनं कौद्दाली ।

अथ ध्रुवा । पूर्व्वोक्तमठे भूत्यै त्वा शिरो वेष्टयामीति शुक्लवासोधारणम् । ब्रह्मवर्चसमसि, ब्रह्मवर्चसाय त्वेति कृष्णाजिनदानम् । अद्भ्यः इति पवित्रम् । बलमसि, बलाय त्वेति कमण्डलुधारणम् । धान्यमसि, पुष्ट्यै त्वेति भारयष्टिधारणम् । सखा मा गोपायेति [1]खनित्रम् । यथोपनिष्क्रम्य व्याहृतीर्जपित्वा दिशामनुमन्त्रणम् ।

पृथिवी चान्तरिक्षं च द्यौश्च नक्षत्राणि च या दिशः ।
अग्निर्वायुश्च सूर्य्यश्च पान्तु मां पथि देवताः ॥

इति पृथिव्यन्तरिक्षं द्यौ र्नक्षत्राणि या दिशः मानस्तोकीयं जपित्वा गच्छन् गृहद्वारे भारयष्ट्या सहात्मानं सन्दर्शयेत् तत्र यावल्लभेत तेन जीवनं ध्रुवा । तत्र यद्यपि न लभेत यद्यपि बहु लभेत तथापि तस्यां निवर्त्तमानत्वाद् ध्रुवा वृत्तिः । एतद्वृत्तिसम्बन्धादेव चक्राचर इति प्रसिद्धः ।

अथ सम्प्रक्षालनी । यथाकथञ्चिद् व्रीह्यादिकं लब्ध्वा सद्य एव तद्भूत्वा पाकपात्राणि प्रक्षाल्य न्युब्जतया स्थापयति न दिनान्तरार्थं सिद्धमन्नं पाकपात्रे स्थापयति न वा कुशूले धान्यं स्थापयति न वाऽन्यहस्ते तण्डुलादिकं स्थापयति सा सम्प्रक्षालनी ।

---

(१) मुद्रितबौधायने,—दण्डम् । Ānandāśrama Series स्मृतीनां समुच्चयः । ३यप्रश्ने । २याध्याये । १५ सूत्रम् ।

अथ समूहा। पथि वा क्षेत्रे वा यत्र यत्रौषधयः प्रकीर्णा-स्तिष्ठन्ति स्वाम्युपेक्षितास्तत्रोञ्छनादिना खण्डीकृत्य ताभिर्जीवनं समूहा।

अथ पालनी। बीजनाशभयान्न च धान्यानि गृह्णाति किन्तु सज्जनेभ्यस्तुषविहीनतण्डुलान्येव चिनोति तेन जीवनं बीज-पालनाद् बीजरक्षणाच्च पालनी।

अथ शिलोञ्छा। यत्रौषधयो विद्यन्ते तत्राङ्गुलिभ्या-मेकैकमुञ्छयित्वा शिलैर्वर्त्तयतीति शिलोञ्छा।

अथ कापोता। अवारितस्थानेषु पथिषु क्षेत्रेषु वा अप्रति-हतावकाशेषु यत्र यत्रौषधयो विद्यन्ते तत्र तत्राङ्गुलिभ्यामेकैक-मादाय कपोतवत् सन्दर्शनात् कापोता।

अथ सिद्धेच्छा वृत्तिः। श्रान्तो वृद्धो य आत्मन्यग्नीन् समा-रोप्य सन्न्यासिवदुदासीनवृत्तिः पुत्रभार्य्यादिकं परित्यज्य सज्जनेभ्यः सिद्धान्नं भक्षयति तेन जीवनं सिद्धेच्छा।

अथ वान्या। वन्येन श्यामाकनीवारादिना वृक्षगुल्मलता-दिना वा वर्त्तनं वान्या।

एतासां दशवृत्तीनां एकया वर्त्तयन् पूर्व्वोक्तधर्म्मवान् नरो भवति न पुनः संसारं प्रविशतीति मुक्तिफलत्वम्। एवं वृत्तिभि-र्मुक्तिफलमभीप्सतां वृत्तय उक्ताः। ये तु प्रवृत्तिधर्म्मेण धन-साध्यकर्म्मभिरेव धर्म्ममोक्षाभिलाषुकास्तेभ्यः प्रतिग्रहाध्यापन-याजनादयो वृत्तयः। तत्र प्रथमं उञ्छवृत्तिः ततः शिलवृत्तिः तयोश्च प्रशस्तादाहरणमेव मुख्यवृत्तिः। तदाहृतेनाग्निहोत्र-

दर्शपौर्णमासपशुबन्धपर्य्यन्तश्रौतकर्म्माणि श्राद्धदेवपूजातिथिपूजा स्मार्त्तकर्म्माणि च कुर्य्यात्। यदाह मनुः,—

वृत्तयश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः।
इष्टीः पर्व्वायणान्तीयाः केवला निर्वपेत् सदा॥

इति। पर्व्वणि अयने च तदन्ते वा भवा इष्टयः पर्व्वान्ते दर्शपौर्णमासाग्रयणादि। अयनान्ते पशुबन्धः। यत्तु—

प्राक् सौमिकीः क्रियाः कार्य्या यस्यान्नं वार्षिकं भवेत्।

इति याज्ञवल्क्यीयं तत्प्रतिग्रहादिवृत्तिकगृहस्थविषयमेव। शिलोञ्छवृत्तेस्तावद्धनाभावान्मनुना दर्शाद्यविधानादिति।

प्रशस्तस्थानात् शिलोञ्छवृत्त्यभावे यतस्ततोऽपि कष्टादपि शिलोञ्छवृत्तिः। न तु प्रतिग्रहः।

यदाह मनुः,—

शिलोञ्छमप्याददाति विप्रो जीवन् यतस्ततः।
प्रतिग्रहाच्छिलः श्रेयान् ततोऽप्युञ्छं प्रशस्यते॥

यतस्ततोऽपीत्यपिशब्दः क्रमः। शिलः श्रेयान् श्रेष्ठप्रतिग्रहादप-कृष्टोऽपि शिलः श्रेयान्।

अथायाचितम्।

तद्द्विविधम्। प्रीतिदायरूपं प्रतिग्रहरूपञ्च। तद्द्विविधमपि ब्राह्मणक्षत्रियवैश्येभ्यः साधुवृत्तेभ्यः। साधुवृत्त्यसम्भवे जातिमात्रेभ्यो न कथञ्चिदपि शूद्रात्।

यदाह व्यासः,—

द्विजातिभ्यो धनं लिप्सेत् प्रशस्तेभ्यो द्विजोत्तमः।
अपिवा जातिमात्रेभ्यो न तु शूद्रात् कदाचन॥

लिप्सेत् स्वीकर्त्तुमिच्छेत्।

बौधायनः,—

तस्य वृत्तिर्ब्राह्मणक्षत्रियवैश्यरथकारेभ्यो धनं लिप्सेत्। अयाचितमिति शेषः। रथकारश्च माहिष्येण करण्यां जातः।

शूद्रयाजनान्तरं मनुः,—

वेदवानपि विप्रोऽस्य कृत्वा लोभात् प्रतिग्रहम्।
विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि॥

याज्ञवल्क्यः,—

अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः।
अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा द्विषः॥

एतेन शूद्रादपि अयाचिताहृतं ग्राह्यमुक्तम्। जातिमात्रद्विजादयाचितासम्भवे चैतत्। न तु शूद्रादिति पर्य्युदासात्।

आहृताभ्युदितां भिक्षां पुरस्तादप्रचोदिताम्।
मेने प्रजापतिर्ग्राह्यामपि दुष्कृतकर्म्मणः॥
नाश्नन्ति पितरस्तस्य दशवर्षाणि पञ्च च।
न च हव्यं वहत्यग्निर्यस्तु तामवमन्यते॥
चिकित्सकाकृतज्ञानां शल्यहन्तुश्च वार्द्धुषेः।
षण्ढस्य कुलटायाश्च उद्यतामपि वर्जयेत्॥

आहृताभ्युदितां प्रतिग्रहीतृगृहे आनीयोपस्थापिताम्। भिक्षां कुटुम्बभरणयोग्यद्रव्यरूपाम्। आमान्नसिद्धान्नरूपामिति भ्रमो न कार्य्यः।

यमः,—

चिकित्सकस्य मृगयोर्वेश्यायाः कितवस्य च।
षण्डसूतिकयोश्चैव उद्यतामपि वर्जयेत्॥

अयाचिताधिकारे वशिष्ठः,—

अश्रद्दधानस्य भोक्तव्यं चौरस्यापि विशेषतः।
नत्वेव बहुयाज्यस्य यश्चोपनयते बहून्॥

जाबालः,—

अभ्युदितं गृहे भैक्ष्यं ग्राह्यं तत्सर्व्वतः स्वयम्।
आत्मन्येव शुभायातं नियुञ्ज्यात् भृतकेऽपरम्॥

एवकारो भिन्नक्रमः। शुभायातमेवात्मनीत्यर्थः। अपरं निन्दितप्रकारोपलब्धं भृतकेऽवश्यभरणीये नियुञ्ज्यात् इत्यर्थः।

एतदयाचितं राजमहिषीराजामात्यपुरोहितेभ्योऽपि गृह्णीयात्। अयाचितानुज्ञाकाले विशेषतः कलत्रादीनामेव पर्य्युदासात्।

यत्तु यमः,—

तथैव राजमहिषीराजामात्यपुरोहिताः।
पापेनार्द्धेन संयुक्ताः सर्व्वे ते राजधर्म्मतः॥

इति प्रतिग्रहनिन्दामाह तदयाचितप्रतिग्रहेऽपि सङ्कुचत एव।

एवं राज्ञोऽप्ययाचितं ग्राह्यमेव । अयाचितवाक्ये द्विजातिमात्रो-पादानात् राज्ञश्च कुलटादिमध्ये प्रवेशात् प्रतिप्रसवाभावात् । यत्तु आदित्यपुराणेऽपि,—

अपि पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः ।
पृथिवीं नान्यदिच्छन्ति पावनं ह्येतदुत्तमम् ॥

इति राजकीयद्रव्येषु ग्राह्यत्वेन पृथिव्या एव नियमात् । द्रव्या-न्तरमयाचितमप्यग्राह्यमिति । तदपि पापकृतामिति विशेषणो-पादानात् तदीयद्रव्यविषयमेव । अथवा याचितप्रतिग्रहविषयम् । तत्र दुष्कृतकर्म्मभ्यो ग्रहणं नानुज्ञातमिति राज्ञोऽयाचितप्रति-ग्रहे भूमिर्ग्राह्यत्वेन नियम्यते ।

अतएव मनुः,—

राजतो धनमन्विच्छेत् संसीदन् ब्राह्मणः क्षुधा ।
याज्यान्तेवासिनो वापि नत्वन्यत इति स्थितिः ॥

तथा याज्ञवल्क्यः,—

राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा ।

अत्र सीदन्निति प्रशस्तद्विजातिभ्यो याचितायाचितप्रतिग्रहवृत्त्य-सम्भवे राजतोऽपि अयाचितं धनं ग्राह्यमिति गम्यते । विज्ञाने-श्वरेण तु सीदन्निति दादाद्यधनाभावे राजप्रतिग्रहशिष्यधन-ग्रहयोर्ग्राह्यत्वमिति व्याख्यातम् ।

न चैतद् राजपदं परिपालनवृत्तिक्षत्रियपरमिति वाच्यम् । नारदेन परिपालनवृत्तिक्षत्रियधनग्रहणस्य मुख्यकल्पत्वेनाभि-धानात् ।

तथाच नारदः,—

[१]अर्थानां भूरिभावाद्धि देवतात्वान्महीभृताम् ।
श्रेयान् प्रतिग्रहो राज्ञां नान्येषां ब्राह्मणादृते ॥
ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतिं श्रितौ ।
नैतयोरन्तरं किञ्चित् प्रजाधर्म्माभिरक्षणात् ॥
धर्म्मज्ञस्य कृतज्ञस्य रक्षार्थं शासतोऽशुचीन् ।
मेध्यमेव धनं ग्राह्यं तीक्ष्णस्यापि महीपतेः ॥
शुचीनामशुचीनाञ्च सन्निपातो यथाम्भसाम् ।
समुद्रे समतां याति तद्वद्राज्ञां धनागमः ॥

---

(१) मुद्रितनारदस्मृतौः—

अर्थिनां भूरीभावाच्च देयत्वाच्च महात्मनाम् ।
श्रेयान् परिग्रहो राज्ञां सर्वेषां ब्राह्मणादृते ॥ ४१
ब्राह्मणश्चैव ॰ दृढ़व्रतौ ।
नानयोरन्तरं किञ्चित् प्रजा धर्म्मेण रक्षतोः ॥ ४२
मेध्यमेव धनं प्राहुस्तीक्ष्णस्यापि ॰ ।
॰ तद्वद्राज्ञो धनागमः ॥ ४५
यथाह्यग्नौ स्थितं दीप्ते ॰ ।
॰　मायान्ति राजसु ॥ ४६
॰ ब्राह्मणस्तिष्ठेद् ॰
॰ परिगृह्णीयात् वर्णेभ्यो नियमे सति ॥ ५१
॰　भवति मानवः ।
॰　सम्यक् कथं राजा ॰ ॥ ५२
तस्य ते प्रतिगृह्णन्तो न लिप्यन्ते कथञ्चन ॥ ४३
Prof. Jolly's edition. प्रकीर्णकं नाम व्यवहारपदं सप्तदशम् ।

यथाग्नौ संस्थितं दीप्ते शुद्धिमायाति काञ्चनम्।
एवं धनागमाः सर्व्वे शुद्धिमायान्ति राजनि॥
स्वधर्म्मे ब्राह्मणस्तिष्ठन् वृत्तिमाहारयेन्नृपात्।
नासद्भ्यः प्रतिगृह्णीयाद् ब्राह्मणो विभवे सति॥
अशुचि र्वचनाद् यस्य शुचिर्भवति पूरुषः।
शुचिश्चैवाशुचिः सद्यः कथं राजा न दैवतम्॥
विदुर्य्य एवं देवत्वं राज्ञो ह्यमिततेजसः।
तस्य ये प्रतिगृह्णन्ति न दूष्येयुः कथञ्चन॥

देवत्वञ्च राज्ञो मन्वादिभिरष्टलोकपालांशत्वेन स्तवनात्। तीक्ष्णस्यापीति दण्डप्रधानत्वात् पीड़ापरस्यापि। बहुधनिकत्वेन तदन्वयस्य च ग्राह्यत्वम्। भारते अगस्त्येन समानान्वयराज्ञो धनस्वीकारात्। अद्रोहेणैव भूतानामिति मनुवचनात्। अशुचिर्वचनात् शुचिः। जननाद्यशौचे राजा यस्य शुद्धिमिच्छेत् स शुद्धो भवतीति स्मृतिः। शुचेरशुचित्वं दण्डादिना। तत् सिद्धं परिपालनादिगुणयुक्तात् क्षत्रियादयाचितप्रतिग्रहे न दोषः। याचितप्रतिग्रहे तु क्षत्रियनृपते र्विशेषतो निन्दावचनाभावेऽपि याचितप्रतिग्रहे द्रव्यविशेषनियमादेव तदितरप्रतिग्रहे दोषः। तथाच मनुः,—

सीदद्भिः कूप्यमिच्छद्भि र्धनं वा पृथिवीपतिः।
याचितः स्नातकै र्विप्रैरदित्संस्त्यागमर्हति॥
अकृतञ्च कृतं क्षेत्रं गौरजाविकमेव च।
हिरण्यं धान्यमन्नञ्च पूर्व्वं पूर्व्वमदोषवत्॥

कूप्यं सुवर्णरजताभ्यामन्यद् द्रव्यम्। अकृतं अकृष्टं क्षेत्रं भूमिः। पूर्व्वं पूर्व्वमदोषवदिति पूर्व्वपूर्व्वालाभे उत्तरोत्तरस्वीकारे न दोषः। अदित्संस्त्यागमर्हतीति यदा न ददाति तदा न तस्य राष्ट्रे वस्तव्यमित्युक्तं भवति।

एवञ्च सत्ययाचितप्रतिग्रहाभावे प्रशस्तेभ्यो याचितप्रतिग्रहालाभे च एषा वृत्तिरित्युक्तं भवति। ननु कृष्यादिवृत्त्यर्थमपि च देशवाससम्भवानिन्दितेतरकृष्यादिवृत्त्यन्तरासम्भव एव एषा वृत्तिरिति वाच्यम्। तस्य स्वधर्म्म एव श्रेयान्, स्वल्पोऽप्यनुष्ठितो नान्य आदरसेवितः, स स्यात् प्रशस्तसमयाचारः, सर्व्वतः प्रतिगृह्णीयादिति शङ्खलिखिताभ्यां सर्व्वप्रकारप्रतिग्रहासम्भवे सत्येव पारक्यकृष्यादिकस्यानुज्ञानात्।

मनुरपि,—

वरं स्वधर्म्मो विगुणो न पारक्यस्त्वनुष्ठितः।
परधर्म्मेण जीवन् हि सद्यः पतति याचितः॥

तेन तद्राजनि प्रहिग्रहालाभे देशान्तरे प्रतिग्रहसम्भावनया गच्छन् न तत्रैव कृष्यादिवृत्त्या तिष्ठेदित्यर्थः। एवं शूद्रादिभ्यो याचितायाचितप्रतिग्रहालाभे पारक्यकृष्यादिवृत्तिरित्यवगन्तव्यम्।

यस्तु क्षत्रियव्यतिरिक्त उच्छास्त्रेणैव परिपालको भवति तस्य याचितायाचितरूपो द्विविधोऽपि प्रतिग्रहो न ग्राह्यः। याचितप्रतिग्रहे तावन्नृपस्य दशवेश्यासमत्वप्रतिपादनात् वेश्यायाश्च यमेन

चिकित्सकस्य मृगयो र्वेश्यायाः कितवस्य च।

इति निन्दनात्। अयाचितप्रतिग्रहे प्रतिप्रसवान्न प्रतिग्रहप्रसङ्गसम्भावनाऽपि। प्रतिग्रहानुज्ञावचनानां राजपुरस्कारेण प्रवृत्तेः। राजशब्दस्य च अव्यध्यधिकरणन्यायेन क्षत्रियनृपतिविषयत्वात्। वर्णान्तरनृपेऽनुज्ञावचनान्न प्रतिग्रहनिन्दावचनानां वर्णान्तरनृपविषयत्वान्नितरां वर्णान्तरनृपान्नायाचितप्रतिग्रहः। तथाच,—

निन्दावाक्येषु सर्व्वेषु अराजन्यप्रसूतितः।

अराजन्यप्रसूतस्येत्येवं विशेषणं दृश्यते न चैतदुद्देश्यविशेषणस्यापि ब्राह्मणपदस्य विवक्षा। न च नारदवचनमत्यन्तापदि अक्षतञ्च क्षतं चेत्रमित्यादिना द्रव्यविशेषप्रतिग्रहो योऽनुज्ञातस्तत्प्रशंसापरत्वेन सामान्यतो राजप्रतिग्रहानुज्ञापरमिति शङ्कनीयम्। अक्षतञ्च क्षतं चेत्रमित्यादेर्याचितविषयत्वेन नारदवचनस्यायाचितविषयत्वेन सामान्याकारत्वेऽपिच संहितान्तरगतत्वेनासन्निधानात् स्तावकत्वानुपपत्तेः। तदुक्तं जैमिनिना विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधिना स्युरिति।

तत्राक्षत्रियनृपप्रतिग्रहे मनुः,—

न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम्॥
दशसूनासमं चक्रं दशचक्रसमो ध्वजः।
दशध्वजसमो वेश्या दशवेश्यासमो नृपः॥
दश सूनासहस्राणि यो वाहयति सौनिकः।
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः॥

यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्त्तिनः।
स पर्य्यायेण यातीमान् नरकानेकविंशतिम्॥
तामिस्रमन्धतामिस्रं महारौरवरौरवौ।
नरकं कालसूत्रञ्च महानरकमेव च॥
सञ्जीवनं महावीचिं तपनं सम्प्रतापनम्।
सङ्घातञ्च सकाकोलं कुड्मलं पूतिमृत्तिकम्॥
लोहशङ्कुमृजीषञ्च पन्थानं शाल्मलीं नदीम्।
असिपत्रवनञ्चैव लोहचारकमेव च॥
एतद्विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः।
न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकाङ्क्षिणः॥

अत्र यो राज्ञः प्रतिगृह्णाति लुब्धस्येति निषेधान्तरं तेन लुब्धस्य शास्त्रातिक्रमकारिणः क्षत्रियाक्षत्रियस्य नृपमात्रस्य प्रतिग्रहोऽनेन निषिध्यते।

तथाच याज्ञवल्क्यः,—

न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिनः।
प्रतिग्रहे सूनी चक्री ध्वजी वेश्या नराधिपाः।
दुष्टा दशगुणं पूर्व्वात् पूर्व्वादेते यथाक्रमम्॥

सूना प्राणिबधस्थानं यस्य जीविकात्वेन धर्म्मः स सूनी। यथा मांसविक्रयी। चक्री तैलकारः। ध्वजी शौण्डिकः। वेश्या प्रसिद्धा। यमः,—

अराजन्यप्रसूतस्य राज्ञः स्वच्छन्दवर्त्तिनः।
घोरः प्रतिग्रहस्तस्य मध्वास्वादो विषोपमः॥

राजकिल्बिषदग्धानां विप्राणामकृतात्मनाम् ।
छिन्नानामिव बीजानां पुनर्जन्म न विद्यते ॥
तस्मात् प्रतिग्रहं राज्ञो वर्जयन्ति मनीषिणः ।
देवताग्नैर्द्विजाग्नैश्च पुनराप्याययन्ति ये ॥
तथैव राजमहिषीराजामात्यपुरोहिताः ।
तत्पापेनार्द्धसंयुक्ताः सर्व्वे ते राजधर्म्मिणः ॥

देवताग्नैरिति देवस्वब्राह्मणस्वाभ्यामाप्याययन्ति शरीरं न तु राजप्रतिग्रहं कुर्व्वन्तीति तात्पर्य्यम् ।

हारीतः,—

दश सूनासहस्राणि अह्ना राजा करोति वै ।
अन्यच्च कुरुते रात्रौ घोरस्तस्य प्रतिग्रहः ॥

इति यद्यपि क्षत्रियनृपस्यापि दण्डादिना दशसूनासहस्रकरणं समानं तथापि तस्य सम्यक् परिपालनात् तद्राज्यवासिधर्म्माचरणषष्ठांशेन तत्पापक्षयात् तद्दोषाभावात् तत्प्रतिग्रहे न दोषः । यथा गृहस्थस्य पञ्चस्थानसूनावतः पञ्चमहायज्ञानुष्ठाने तद्दोषाभावात् तदन्नभोजनम् । यस्य तु पञ्चमहायज्ञानुष्ठानं नास्ति तदन्नमभोज्यमिति । तथाच महाभारते धर्म्मेण चण्डालरूपेण राजप्रतिग्रहे दोषमभिधाय,—

यद्ददाति यज्जुहोति यत्तपस्यति यदर्चति ।
तस्य षड्भागभुग् राजा सम्यग्भवति रक्षणात् ॥
आहिताग्निस्तु यो विप्रः प्रातःस्नायी जितेन्द्रियः ।
तस्य षड्भागमात्रेण तत्पापं सन्तरिष्यसि ॥

अतएव—

राजान्तेवासिशिष्येभ्यः सीदन्निच्छेद्धनं क्षुधा ।

इत्यत्र विज्ञानेश्वरेण राज्ञो विदितवृत्तान्तादिति व्याख्यातम् ।

अयाचितन्तूच्छास्त्रवर्त्तिनोऽपि नृपाद् भूमिमात्रं ग्राह्यम् । नान्यत् । आदित्यपुराणेऽपि पापकृतामित्यनुज्ञानात् ।

यत्तु मनुवचने अकृतं क्षेत्रमित्यादि द्रव्यान्तरानुज्ञावचनं तत्र नृपपदस्य राजन्यशास्त्रातिक्रान्तनृपविषयत्वेऽपि देवब्राह्मणद्रव्यस्तेयवृत्त्यपेक्षया तदीयधनप्रतिग्रहगुरुत्वाभिधानात् सर्व्वप्रकारस्वकीयवृत्त्यसम्भवे

कर्म्मणा येन केनापि मृदुना दारुणेन वा ।
उद्धरेद्दीनमात्मानं समर्थो धर्म्ममाचरेत् ॥

इति न्यायेन प्राप्तस्योच्छास्त्रराजप्रतिग्रहस्य द्रव्यविशेषनियमः क्रियते अकृतञ्च कृतं क्षेत्रमित्यादिना ।

तस्मिन् क्षत्रियनृपादयाचितं मुख्यवृत्तिः । अयाचितासम्भवेऽपि तत्प्रतिग्रहप्रसङ्गे क्षित्यादिद्रव्यविशेषनियमः । तस्याप्युच्छास्त्रवर्त्तिनः प्रतिग्रहो न याचितो ग्राह्यः । दशवेश्यासाम्यात् । याचितप्रतिग्रहस्तु कष्टायामापदि द्रव्यविशेषो भूमिस्तस्या ग्राह्यतैव । अराजन्यनृपस्य तु नायाचितप्रतिग्रहो न वा याचितप्रतिग्रहो ग्राह्यः । सर्व्वप्रकारस्वकीयवृत्तिराजवृत्तिसेवादिवृत्त्यन्तरासम्भवे तस्य अकृतञ्च कृतं क्षेत्रमेवं रूपेण द्रव्यविशेषप्रतिग्रह इति ब्राह्मणवृत्त्यन्तरं स्मृतिः । तदसम्भवे क्षत्र-

वृत्त्या वैश्यवृत्त्या वाऽसाधुभ्यः प्रतिगृह्णीयात्। असाधुरत्र यदीय-प्रतिग्रहः कृष्याद्यपेक्षया हीनः। श्रेयान् स्वधर्म्म इति तु विगुण-प्रतिग्रहश्रेष्ठत्वं शूद्रादिप्रतिग्रहविषयम्। तेन वैश्यवृत्त्यसम्भवे उच्छास्त्रवर्त्तिराजादिप्रतिग्रह इति लक्ष्मीधराभिप्रायः।

इति राजप्रतिग्रहविधिनिषेधौ।

अथ शूद्रप्रतिग्रहः।

अयाचितप्रतिग्रहविषये,—

अयाचिते प्रीतिदाये च जातिमात्रद्विजातिभ्योऽप्यलाभे शूद्रादपि प्रसङ्गोऽस्ति। तदुक्तं हारीतेन,—ब्राह्मणक्षत्रियविड्भ्यो-ऽयाचितोपपन्नं शूद्रेभ्योऽप्येक आपदीति। एवञ्च नार्त्तामपि यतस्तत इति मनुवचनं चाण्डालादिपरम्। अतएव कल्पतरौ तस्य स्वधर्म्म एव श्रेयान्, नान्य आदरसेवितः, स स्यात् प्रशस्त-समयाचारः, सर्व्वतः प्रतिगृह्णीयादिति शङ्खलिखितवाक्ये सर्व्वतः शूद्रादेः प्रतिगृह्णीयान्न तु क्षत्रियादिवृत्तिं कुर्य्यादिति व्याख्यातम्। याचितविषये तु द्रव्यविशेषप्रतिग्रहगुणदोषौ वक्ष्यामः।

यत्तु याज्ञवल्क्यः,—

शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥

इति एतदतिरिक्तशूद्रेभ्योऽयाचितमग्राह्यमिति। तत्र

हारीतेनायाचितविषये द्विजातिभ्योऽलाभे शूद्रादपि अयाचित-प्रतिग्रहाभ्यनुज्ञानादस्याविशेषप्रवृत्तस्य याचितविषयमौचित्यात्।

यमः,—

अनिर्द्दशाहे प्रेतस्य प्रतिगृह्णन्ति ये द्विजाः।
समागतं समग्रं ते नरकं पर्य्युपासते॥

इति। अत्र यद्यप्ययाचितप्रतिग्रहे विशेषेण कुलटादि-वन्मृतकाशौचद्रव्यप्रतिप्रसवो नास्ति तथापि तद्द्रव्यस्याशुचित्व-प्रसिद्धेस्तस्य दातृत्वाभावात् तेन प्रतिदत्तमप्ययाचितं न ग्राह्यम्।

अङ्गिराः,—

संस्कारैः शुद्ध्यति ह्यामं धान्यं तेन शुचि स्मृतम्।
तस्माद्धान्यं ग्रहीतव्यं मृतिसूत्यन्तरेष्वपि॥
पक्वान्नवर्जं विप्रेभ्यो गौ र्धान्यं क्षत्रियात् तथा।
वैश्येभ्यः सर्व्वधान्यानि शूद्राद् ग्राह्याः पणास्तथा॥

एतेन एतेभ्य एते द्रव्यविशेषा ग्राह्या मृतकेऽपि।

यत्तु कल्पतरौ,—

एतत्सर्व्वमापद्गतस्य बोद्धव्यं शूद्रस्य सर्व्वथा अप्रतिग्राह्य-धनस्याशौचे पणग्रहणाभ्यनुज्ञानादिति।

तत्र शूद्रस्याप्रतिग्राह्यधनत्वेन तद्विषयमात्रमापद्विषयम्। ब्राह्मणादीनान्तु तथात्वाभावेन तद्विषये अनापद्यपि मृतककाले द्रव्यविशेषप्रतिग्रहे अनुज्ञायाः किं बाधकम्। अत्र पठन्ति

लवणं सर्पिर्मांसञ्च पुष्पमूलफलानि च।
काष्ठं शाकं तृणं तोयं दधि क्षीरं घृतं तथा॥

औषधं तैलमजिनं शुष्कमन्नञ्च नित्यशः।

अशौचिनां गृहाद् ग्राह्यं स्वयं शस्यञ्च मूलकम्॥

इति। एवञ्च तोयस्य ग्राह्यत्वमयाचितविषये। याचित-विषये तु,—

अङ्गिराः,—

सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः।

पिबेत् पानीयमज्ञानात् सम्यक् स्नायात् स्पृशेच्च वा॥

पानीयमाने कुर्व्वीत पञ्चगव्यस्य भक्षणम्।

इति ब्रह्मचारिसाहचर्य्येणायाचितविषयत्वासम्भवात्। यद्यप्यत्राशौचिनां गृहाद् ग्राह्यमित्यस्य विशेषण उक्तं नत्वयाचितमित्युक्तं तथाप्ययाचितस्य सामान्यतोऽपि दुष्कृतकर्म्मणः अनुज्ञानेन लब्धत्वात् तद्विषयत्वमेव न्याय्यम्। एवमशौचिनामपि मृतिसूतिसाधारणमेव। सूतौ द्रव्यसामान्यनिषेधाभावेन तन्मात्रविषये द्रव्यविशेषानुज्ञावैयर्थ्यादिति। अत्र गारुड़पुराणे—

द्रव्यराशिरपि श्रेयान् न निन्द्यात् प्रतिगृह्णताम्।

निन्द्यस्य द्रव्यलेशोऽपि निरयायैव जायते॥

एवं दातृविशेषेणायाचितप्रतिग्रहप्रीतिदाययोर्ग्राह्याग्राह्यत्वमुक्तं तत्तद्द्रव्यविशेषेणोच्यते। वशिष्ठः,—शस्त्रं विषं अग्राह्याणि ब्राह्मणस्य। शङ्खलिखितौ,—न मद्यं दद्यान्न प्रतिगृह्णीयात्। मद्यं मादकं सुराभिन्नमपि जातिफलादि। आदित्यपुराणे—

तरिष्यन्नित्यसौ विप्रो गृह्णन्नुभयतोमुखीम्।

सहस्रं वारुणान् पाशानात्मनि प्रतिमुञ्चति॥

सहस्रं वारुणाः पाशाः क्षुरधाराग्निसन्निभाः।

पूर्णे वर्षसहस्रे तु पाश एको विमुच्यते॥

एतामवस्थामाप्नोति गृह्णन्नुभयतोमुखीम्।

आग्नेयपुराणे,—

हस्त्यश्वरथयानानि मृतशय्यासनानि च।

कृष्णाजिनञ्च गृह्णाति अनापत्सु गतो द्विजः॥

निरयं यातीत्यर्थः।

कृष्णाजिनाधिकारे मत्स्यपुराणे,—

अस्पृश्यः स द्विजो राजन् चितियूपसमो हि सः।

दाने च श्राद्धकाले च दूरतः परिवर्जयेत्॥

मृतशय्याधिकारे पद्मपुराणे—

तेन दुष्टा तु सा शय्या न ग्राह्या द्विजसत्तमैः।

गृहीतायान्तु तस्यां स पुनः संस्कारमर्हति॥

स्कन्दपुराणे,—

अजिनं मृतशय्याञ्च मेषीञ्चोभयतोमुखीम्।

कुरुचेले च गृह्णानो न भूयः पुरुषो भवेत्॥

पद्मपुराणे,—

ब्रह्माण्डं भूमिदानञ्च ग्राह्यं नैव च तद् भवेत्।

भूमिदानमत्र ब्रह्माण्डसाहचर्य्यात् षोड़शमहादानान्तर्गतकाञ्चनमेदिनीदानमिति हेमाद्रिः। विद्याकरपद्धतौ,—

ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतः सदा।

अन्यश्वतिलपात्रञ्च मणिहेमांश्च वर्जयेत्॥

ध्वनिः प्राणी । अत्र तिलशब्दो निन्दिततिलधेन्वादिपरः ।
तिलानां सामान्यतोऽग्राह्यत्वाभिधानात् ।

अजिनं मृतशय्याञ्च धेनुञ्चोभयतोमुखीम् ।
कृष्णाजिनद्वयग्राही न पुनर्मानवो भवेत् ॥

तथा —मर्त्त्याद् यद् गृहीतन्तु तत् कथं सन्तरिष्यति ।
मर्त्त्यान्मुमूर्षोः । मृतस्य चेति पठन्ति ।

शय्यालङ्कारवस्त्राणि मृतस्य प्रतिगृह्य च ।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीमपि ॥

तथा उदीच्याः पठन्ति ।

तिलधेनुर्गजो वाजी प्रेतान्नमजिनं मणिः ।
सूरिभिः श्रूयमाणाश्च घोराः सप्त प्रतिग्रहाः ॥

शतपथश्रुतिः,—तस्माद्धस्ती दुष्प्रतिग्रह इत्याहुः । तथा न केशरिणो ददाति नोभयतोदतः प्रतिगृह्णाति । तथाच शाबरभाष्ये अश्वाश्वोपकारकरा भवेयुर्यद्येषां दानप्रतिग्रहौ न प्रतिषिद्धौ स्याताम् । तथा रोगप्रतिकृतिदानाधिकारे

दुष्प्रतिग्रहदग्धस्य तस्य विप्रस्य नो सुखम् ।

पश्येदिति । हारीतः,—मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् । पञ्च मध्यमे दशोत्तमे । तथा नारदः,—

हिरण्यरत्नकौषेयाः स्त्रीपुंसौ गजवाजिनः ।
देवब्राह्मणराज्ञाञ्च द्रव्यं विज्ञेयमुत्तमम् ॥

देवलः,—अन्नमधुदधिगोरुक्माश्वहस्तिदानान्युत्तमदानानि ।
तथा मध्यमद्रव्ये नारदः,—

वासः कौषेयवर्ज्जञ्च गोवर्जं पशवस्तथा ।
हिरण्यवर्जं लोहञ्च मध्यं व्रीहियवा अपि ॥

देवलः,—रत्नक्षेत्रे वेश्म हेमरूप्यान्याभरणानि धान्यकार्षापणादीनि मध्यानि । एतद्व्यतिरिक्तानि द्रव्याण्यधमानि । एषां मध्ये यन्नामतो निषिद्धं तत्र न प्रतिग्रहप्रायश्चित्तम् । अन्येषान्तु देशकालाद्यपेक्षया अग्राह्यत्वदशायां ग्रहणे प्रायश्चित्तविशेषविधानम् । न तु उत्तमादिद्रव्याणां तेन रूपेण ग्राह्यत्वमिति । तथा—

एकां गां प्रतिगृह्णीयान्नद्वितीयां कदाचन ।

अत्र महादानानां ब्रह्माण्डमेदिनीव्यतिरिक्तानां विशेषेण निषेधाभावेऽपि कर्म्मविपाके महादानग्रहणस्य रोगहेतुत्वब्रह्मराक्षसादिहेतुत्वस्मरणादग्राह्यत्वम् । तथा ब्रह्माण्डे,—

समाः षण्मासमासैकषड़हत्रिदिनक्षपम् ।
एकाह्निकञ्च धर्माय गृह्णीयादुत्तरोत्तरम् ॥

इति वर्षपर्य्यन्तकुटुम्बभरणयोग्यधनस्य कथञ्चिदनुज्ञायामपि तदधिकग्रहणे

स्थित्यर्थादधिकं गृह्णन् नरो भवति किल्बिषी ।

इति दोषापत्तेः । त्रैवार्षिकाधिकान्नादेश्च दायाद्यनिध्यादिधनेनाप्युपपत्तेरित्युक्तत्वात् ।

तथा,—शतपथश्रुतौ 'गायत्रीब्राह्मणे । अन्यदिह वाप्येवं विद्वदिव प्रतिगृह्णाति न हैतत् गायत्र्या एकञ्चन पदं प्रतीति ।(१)

(१) P. गायत्रीब्राह्मणोऽन्यदिह ०।

बहुप्रतिग्रहस्यातिदुष्टस्यापि गायत्र्युपासनं तारकमित्युक्तम्। स य इमांस्त्रीन् लोकान् पूर्णान् प्रतिगृह्णीयात्तत्साचादेतदेवं प्रथमं पदमाप्नुयादित्येवं रूपेण प्रतिग्राह्यद्रव्यबाहुल्यं दोषातिशयहेतुत्वेन गायत्रीप्रशंसयैव दर्शयति। तदुक्तं सुरेश्वरवार्त्तिके,—

महाप्रतिग्रहेणापि [1]नैवंविद्दोषमृच्छति।

द्रव्यदर्शनस्तुतिरेवेयं स य इत्यादिनोच्यते।

प्रतिग्रहस्य निन्दा वा विद्वान् वा तत्प्रसक्तितः।

निःशेषपुण्यमोषित्वान्निषेधार्थाय कुत्स्यते॥

विद्वानप्येतादृशं प्रतिग्रहं न कुर्य्यादिति दर्शयितुं श्रुतिराह नैव कश्चनाप्य कुत्रचित् एतावद्गृह्णीयादिति। निन्दा प्रशंसैवैषा बहुप्रतिग्रहस्य निन्द्यत्वञ्च लिङ्गादवगम्यत इति वार्त्तिकार्थः।

बौधायनः,—बहु प्रतिगृह्य तरत्समन्दीयं जपेत्।

छन्दोगब्राह्मणे,—यो बहुप्रतिगृह्य गरगीरिव मन्येत स पुनस्तोमेन यजेत। गरं विषं गिरतीति गरगीर्विषभोजिनमात्मानं मन्यत इत्यर्थः।

एवञ्च प्रीतिदायरूपेणापि बहुधनस्वीकारो निषिद्ध एवेत्यवगम्यते। महादानानि मत्स्यपुराणे,—

आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञकम्।

हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम्॥

कल्पपादपदानञ्च गोसहस्रञ्च पञ्चमम्।

हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च॥

(१) P. नैवं विद्वेषमृच्छति।

हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा।

पञ्चलाङ्गलकं तद्वद्धरादानं तथैव च॥

द्वादशं विश्वचक्रञ्च तथाकल्पशतात्मकम्।

सप्तसागरदानञ्च रत्नधेनुस्तथैव च॥

महाभूतघटस्तद्वत् षोड़शः परिकीर्त्तितः।

तथा—

धान्यलवणतिलसुवर्णगुड़कार्पासघृतरत्नरौप्यशर्करारूपदशाचलदानानि।

तथा—

कनकाश्वतिला नागा दासीरथमहागृहाः।

कन्या च कपिलाधेनुर्महादानानि वै दश॥

अत्र यस्य प्रतिग्रहो विशेषेणाम्नातस्तद् विहायान्येषां ग्रहणे दोषः। एतेषान्तु विशेषेणायाचितोपस्थितानामप्यग्राह्यत्वम्। अयाचिताभ्यनुज्ञावाक्ये दातृदोषस्यैव सह्यत्वेनोक्तत्वात् अपि दुष्कृतकर्म्मण इति।

अथ देशविशेषेऽग्राह्याणि।

तत्र प्रयागप्रतिग्रहे तीर्थनिष्पन्नत्वमभिधाय मत्स्यपुराणे,—

न तस्य फलदं तीर्थं [1]यावत्तद्धनमश्नुते।

तस्मात्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च॥

(१) P. ० यावत्तत्फलमश्नुते।

निमित्तेषु च सर्व्वेषु अप्रमत्तो भवेद् द्विजः।

अत्र तीर्थशब्देन पुण्यप्रदजलाशयस्थानमुच्यते। समुद्रगङ्गापुष्कर-सरस्वतीप्रभृतीनि। पुण्यायतनशब्देन क्षेत्रमुच्यते। पुरुषोत्तम-कुरुक्षेत्रवाराणसीप्रभृतीनि।

तत्र तीर्थप्रतिग्रहनिषेधातिक्रमेऽनिष्टफलापेक्षया न तस्य फलदं तीर्थमिति वाक्यशेषोपात्ततीर्थफलानुत्पत्तिरेवानिष्टफलत्वेन कल्प्यते। नाधिकं नरकपातादि। तीर्थफलानुत्पत्तिरपि प्रतिग्रहधनसत्त्वे तदुपभोगकाले च द्रव्यक्रयविक्रयलभ्यद्रव्यान्तरसत्त्वेऽपि [1]तद्धनाविशेषात्। तद्धनसमाप्तौ न तीर्थफलप्रतिबन्धः।

याजनादौ तु तीर्थे कृते तद्धनसत्त्वेऽपि न तीर्थफलप्रतिबन्धः। प्रतिग्रहनिषेधवाक्य एव तीर्थफलप्रतिबन्धश्रवणात्। याजनादौ दक्षिणास्वीकारे प्रतिग्रहस्वरूपाविशेषेऽपि क्रय इव प्रतिग्रहदोषाभावात्। अतएव वाजपेयादौ हस्त्यश्वानां बहुशः प्रतिग्रहेऽपि न प्रतिग्रहदोषः।

यत्तु वार्त्तिककारैरश्वप्रतिग्रहाधिकरणेऽश्वक्रयोऽपि अश्वप्रतिग्रहरूप इत्युक्तं तत्प्रौढ़िवादमात्रम्।

एवं श्राद्धेऽपि देवतोद्देश्यद्रव्यत्यागस्य श्राद्धपदार्थत्वाद् ब्राह्मणस्याहवनीयादिवत् प्रक्षेपाधारत्वाच्छ्राद्धद्रव्यस्वीकारस्य न प्रतिग्रहरूपत्वम्। पितृभ्यो यद्ददातीति दानश्रुतावपि पितृणां

(१) P. तत्फलाविशेषात्। तत्फलसमाप्तौ न ०।

प्रतिग्रहीतृत्वाभावाद् ब्राह्मणस्य प्रतिग्रहीतृत्वेऽपि दानविधावुद्देश्यत्वात्। उद्देश्यत्वे सति प्रतिग्रहीतुरेव सम्प्रदानत्वात्। [1]सम्प्रदानानि दद्यादित्यर्थस्याभावात् श्राद्धस्य त्यागरूपत्वमेव।

न च

कृत्वा ध्येयाश्च पितरस्तएव द्विजसत्तमाः।

इत्यादिवचनात् पित्रादिरूपेण ध्यातेभ्यो ब्राह्मणेभ्यो दानं श्राद्धं न पित्रादिभ्य इति वाच्यम्। वचनाभावात्। पित्राद्यावाहनं पित्रादिरूपध्यानं शङ्खवचनात्। आहवनीयेऽग्न्याद्यावाहनवत्। पशोर्यागसाधनत्वे विशसनानन्तरं हृदयादिद्रव्यावस्थपशोर्यागसाधनत्ववत् पित्रादेर्देवतात्वावगमस्य ब्राह्मणद्वारकत्वे मानाभावात्। अतएव विज्ञानेश्वरः श्राद्धं नाम पितॄनुद्दिश्य द्रव्यत्याग इत्येतावन्मात्रमेव श्राद्धपदार्थमाह।

तथा मेधातिथिः,—

परिवेषणकालेऽपि पितर एवोद्देश्या [2]युष्मभ्यमिदं न ममेति। ब्राह्मणस्त्वाहवनीयस्थानीयः। एतावांस्तु विशेषो यदाहवनीये हविः प्रक्षिप्यते। ब्राह्मणाः सन्निधाप्यन्ते।

तेन यागोऽपि सन् श्राद्धकर्म्म पित्रर्थमिति। ब्राह्मणस्वीकारस्य श्राद्धपदार्थान्तर्भावे प्रमाणसत्त्वेऽपि असम्प्रदानस्वीकारगर्भत्वात् दानशब्दार्थाभावाच्च। एवं प्रक्षेपाधिकरणक-

(१) P. सम्प्रदानत्वे दद्यादित्यर्थस्याभावात् ०।
(२) P. युष्मभ्यं नम इति।

ब्राह्मणस्वीकारोपाधिकं श्राद्धं नाम कर्म्मान्तरम् । यथा यागे प्रक्षेपाधिको होमः । एवञ्च श्राद्धे [1]प्राक् पितॄनुद्दिश्य द्रव्यत्याग-माचरन्ति शिष्टाः । विष्टरब्राह्मणकश्राद्धञ्च कुर्व्वन्ति । व्यक्तञ्चै-तदस्मत्कृते श्राद्धप्रदीपे । तेन सर्व्वथा श्राद्धस्य दानरूपत्वा-भावाच्छ्राद्धद्रव्यस्य प्रतिग्रहो न प्रतिग्रहवृत्तिप्रविष्टः । तेन तीर्थे श्राद्धप्रतिग्रहे न तीर्थफलप्रतिबन्धः । एवं चैत्रे पुण्यदिवसे च प्रतिग्रहे न दोषः । द्रव्यविशेषप्रतिग्रहदोषश्च नेह केवलं पतित-श्राद्धस्वीकारे शूद्रश्राद्धस्वीकारे च याजनान्तर्गतत्वान्महान् दोषः । एवं देवेभ्यो दत्तस्य नैवेद्यस्य ।

विप्रेभ्यस्त्वथ तद्देयं ब्रह्मणे यन्निवेदितम् ।

[2]तद्दानतत्स्वीकारे न दोषः । नैवेद्यप्रतिपत्तेरपि पूजाङ्ग-त्वेन स्विष्टिकृद्भिरित्युक्तम् । स्वीकारपूर्व्वकदानत्वेऽपि पूजा-प्राधान्यात् तत्स्वीकारो याजनान्तर्गत एव । एवं व्रताङ्गदानादा-वपि बोद्धव्यम् । यथा जन्माष्टम्याम् ।

हिरण्यं रजतं गावो वासांसि कुसुमानि च ।

इत्यादि । तुलापुरुषादौ तु ऋत्विजां दानाङ्गहोमसम्बन्धेऽपि प्रतिग्रहप्राधान्यान्न याजकत्वम् ।

गङ्गातीरे विशेषः,—

सार्द्धहस्तशतं यावत् परितस्तीरमुच्यते ।

---

(१) P. पृथक् ० ।

(२) P. तद्दानं तत्स्वीकारे न प्रतिग्रहदोषः ।

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1308.



नित्याचारप्रदीपः ।

NITYĀCĀRAPRADĪPAḤ.

BY

NARASIMHA VĀJAPEYĪ

EDITED BY

PANDITA VINODA VIHĀRI BHATTĀCĀRYYA.

VOLUME II FASCICULUS IV.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS.
No. 5, Nandakumar Chawdhury's 2nd Lane.

AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET

1911.

	Rs.	As.
•Markandeya Purana, Fasc. 5-7 @ /10/ each	1	14
*Mimāmsā Darçana, Fasc. 10-19 @ /10/ each	6	4
*Nyāyavārtika, Fasc. 1--6 @ /10/ each	3	12
Nirukta, Vol. IV. fasc. 1-8 @ /10/ each	5	0
Nitisara, Fasc. 3-5 @ /10/ each	1	14
Jityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each	4	6
Jityācārapradīpaḥ Vol. I. Fasc. 1--8 ; Vol. II, Fasc. 1-3. @ /10/ each ...	6	14
Nyayabinduṭīkā, Fasc. 1 @ /10/ each	0	10
Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--3 @ /10/ each	5	0
yayasarah	2	0
adumawati, Fasc. 1--5 @ 2/	10	0
ariçiṣta Parvan, Fasc. 3--5 @ /10/ each	1	14
‌ikrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
ithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/-	1	0
ākrta Lakṣaṇam Fasc. 1 @ 1/8/ each	1	8
arāçara Smṛti, Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraieca Kaha Fasc. 1-3, @ /10/	1	14
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
•Sankara Vijaya, Fasc. 2-3 @ /10/ each	1	4
Six Buddhist Nyaya Tracts.	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sragdharā Stotra (Sanskrit and Tibetan)	2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta fasc. 1	1	4
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each	9	6
,, Pratisakhya, Fasc. 1-3 @ /10/ each	1	4
•Taitterīya Saṁhitā, Fasc. 27-45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10-19 @ /10/ each	6	14
Tantra Vārteka (English) Fasc. 1-8 @ 1/4/ each	10	0
*Tattva Cintāmaṇi, Vol. I, Fasc. 1-9, Vol II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV. Fasc. 1, Vol. V, Fasc. 1--5, Part IV. Vol. II, Fasc. 1-12 @ /10/ each	24	6
Tattva Cintamani Didhiti Vivriti, Fasc, 1, @ /10/ each	0	0
Ditto Prakas, fasc. 1-2, @ /10/ each	1	4
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Tirthacintamoni, fasc, 1, @ /10/ each	0	10
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
•Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each ...	6	14
Vidhāna-Pārijata, Fasc. 1-8 Vol. II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-4 @ 1/4/	3	12
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each	1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1-3	3	12
Tibetan Series.		
Baudhyastotrasangraha, Vol. I (Tib. & Sans.)	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each	4	0
Nyayabindu of Dharmakirti. Fasc. 1	1	0
Pag-Sam S'hi Ṭiñ, Fasc. 1--4 @ 1/- each	4	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans. Avadāña Kalpala Vol. I, Fasc. 1--8 ; Vol. II. Fasc. 1--7 @ 1/- each	15	0
Sher-Phyin, Vol. I, Fasc 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-6, @ 1/ each	14	0
Arabic and Persian Series.		
'Ālamgirnāmah, with Index, (Text) Fasc. 1--13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each	4	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each...	55	8

•The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

•Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	Rs.	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each		1	14
*Agni Purāṇa, Fasc. 6-14 @ /20/ each		5	10
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each		14	6
Aitereya Lochana.		2	0
•Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each		2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-		1	0
Aṣtasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each		3	12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each		1	4
Atmatattaviveka, Fasc. I. @ /10/ each		0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each		3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7 ; Vol. II. Fasc. 1-7 @ 1/ each		15	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each		1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-3 @ /10/ each ...		3	12
*Bhāmatī, Fasc. 4-8 @ /10/ each		3	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ...		4	6
Baudhyostatrasangraha		2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each		2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each		3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each		3	2
Cri Cantinatha Charita, Fasc. 1-3		1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each		1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. I-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each		14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each		3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/		3	2
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1--14 @ /10/ each		8	12
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc 1-6 @ /10/ each ...		36	14
Ditto Vol. 4, Fasc. 7-8. @ 1/4/ each		2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/		1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each		8	12
*Çrauta Sūtra of Āpastamba. Fasc. 12-17 @ /10/ each		3	12
Ditto Çānkhāyana, Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each		10	0
Çrī Bhāshyam, Fasc 1-3 @ /10/ each		1	14
Dāna Kriyā kaumudī, Fasc 1--2 @ /10/ each		1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each		4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each		3	2
Gobhiliya Grihya Sutra, Vol I @ /10/ each		3	2
Ditto Vol. II. Fasc. -2 @ 1/4/ each		2	8
Ditto (Appendix) Gobhila Parisista		2	0
Ditto Grihya Sangraha		0	10
Haralata		1	14
Karmapradipb, Fasc. I		1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each		4	6
Kātantra, Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each		17	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each		4	6
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each		3	0
Madana Pārijāta, Fasc. 1-11 @ /10/ each		6	14
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each		19	6
Ditto Vol. IV, fasc. 1 @ 1/4		1	4
Manuṭīkā Sangraha, Fasc. 1-3 @ /10/ each		1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each		9	0

Āīn-l-Akbarī, Fasc. 1-22 @ 1/8/ each		33	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, ...		36	0
Ditto (English) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-7 Vol 3 @ 1/4/ each		20	0
Arabic Bibliography, by Dr. A. Sprenger, @ /10/		0	10
*Bādshāhnāmah, with Index, Fasc. 1--19 @ /10/ each		11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	Rs.	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each		2	(
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each		3	C
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each		31	[illegible]
Farhang-i-Rashīdī, Fasc. 1-14 @ 1/8/ each		21	
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ...		4	
Futūḥ-ush-Shām of Wāqidī, Fasc. 1--9 @ /10/ each		5	1
Ditto of Āzādī, Fasc. 1--4 @ /10/ each		2	[illegible]
History of Gujarat		1	[illegible]
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...		0	1
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each		7	
Iqālnamah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each		1	1
Iṣābah, with Supplement, 51 Fasc. @ 1/- each		51	(
Ma'ṣāir-i- Ālamgīrī, Fasc. 1--6 @ /10/ each		3	12
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each		35	0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each		3	2
Marhamu 'L-Ilali 'L-Mu'Dila		1	0
Muntakhabu-t-Tawārikh, Fasc. 1--15 @ /10/ each		9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc 1 @ 1/ each		16	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each		11	14
Ditto Part 3, Fasc. 1		1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/		0	10
Nizāmī's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each		1	8
Qawanimu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott		5	0
Riyāẓu-s-Salātīn, Fasc. 1--5 @ /10/ each		3	2
Ditto (English) Fasc. 1--5 @ 1/		5	0
Tadhkira-i-khushnavīsān		1	0
Tabaqāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each		14	0
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barnī Fasc. 1--7 @ /10/ each ...		4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/ each ...		3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each		3	0
Tuzuk-i-Jahāngirī, (Eng) Fasc. 1 @ 1/		1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each		3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc 1--8 @ /10/ each		10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each 20
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Assiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts 1--III. with 8 coloured Plates, 4to. @ 6/ each 18 8
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each 34 0

Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only.

Books are supplied by V. P. P.

3-12-11.

तत्र नारायणः स्वामी नान्यः स्वामी कथञ्चन ॥
तत्र न प्रतिगृह्णीयात् प्राणैः कण्ठगतैरपि।
गङ्गाविक्रयणाद् राजन्! विष्णोर्विक्रयणं भवेत् ॥
विक्रीते तु जगन्नाथे विक्रीतं भुवनत्रयम्।

इति वचनात् तत्र प्रतिग्रहः अधर्म्मजनकोऽपि क्षेत्रप्रतिग्रहे तत्तत्तीर्थवद् वाक्यविशेषाभावान्न क्षेत्रफलप्रतिबन्धः फलं किन्तु पुरुषार्थोऽधर्म्मः।

कुरुक्षेत्रे विशेषः स्कन्दपुराणे,—

कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत्।

निमित्तेषु सर्व्वेष्विति निमित्तपदेन प्रतिग्रह उपरागार्द्धोदयादिप्रशस्तकाल उच्यते। तत्राप्ययाचितोपस्थितमपि न ग्राह्यम्। तत्र विशेषो मनुः—

जाते कुमारे यत्नः स्यात् कामं कुर्य्यात् प्रतिग्रहम्।
हिरण्यधान्यगोवासस्तिलाज्यगुड़सर्पिषाम् ॥

शङ्खः—

कुमारप्रसवे नाड्यामच्छिन्नायां गुड़तिलहिरण्यवस्त्रगोधान्यप्रतिग्रहेऽप्यदोषः। अन्यदपि। कुमारप्रसवनिमित्तद्रव्यान्तरप्रतिग्रहेऽप्यदोषः।

बृहस्पतिः,—

विवाहोत्सवकालेषु अन्तरा मृतसूतके।
पूर्व्वसङ्कल्पितं द्रव्यं न दुष्यति कदाचन ॥

अथ प्रतिग्रहविध्यनभिज्ञेनाप्रतिग्राह्याणि।

तत्र मनुः,—

न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे।
प्राज्ञः प्रतिग्रहं कुर्य्यादवसीदन्नपि क्षुधा॥
हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतम्।
अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवत्॥
हिरण्यमायुरन्नञ्च भूर्गौश्चाप्योषतस्तनुम्।
अश्वश्चक्षुस्त्वचं वासो घृतन्तेजस्तिलाः प्रजाः॥

एतद्द्रव्याणां प्रतिग्रहं विध्यनभिज्ञेन कृतानामिमे न दोषाः। इतरद्रव्याणां प्रतिग्रहविध्यज्ञानेऽपि दोष ऊहनीयः।

प्रतिग्रहविधिः।

पारस्करे छागलेयः,—

दक्षिणहस्तमध्ये ब्राह्मणस्याग्नेयं तीर्थं तेन प्रतिगृह्णीयात्।

विष्णुधर्म्मोत्तरे,—

प्रतिग्रहीता सावित्रीं सर्व्वत्रैवानुकीर्त्तयेत्।
ततस्तु कीर्त्तयेत् सार्द्धं द्रव्ये तद्द्रव्यदेवताम्॥
समापयेत् ततः पश्चात् कामस्तुत्या प्रतिग्रहम्।
तदन्ते कीर्त्तयेत् स्वस्ति प्रतिग्रहविधिस्त्वयम्॥
प्रतिग्रहे पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात्।
मन्दं पठेत्तु राजन्यादुपांशु च तथा विशः॥

मनसा तु तथा शूद्रात् स्वस्तिवाचनकं भवेत्।
सोङ्कारं ब्राह्मणे कुर्य्यान्निरोङ्कारं महीपतौ॥
उपांशु च तथा वैश्ये स्वस्ति शूद्रे प्रकीर्त्तयेत्।

वृद्धपराशरः,—

भूमिः प्रतिग्रहं कुर्य्याद् भूमिं कृत्वा प्रदक्षिणम्।
करे गृह्य तथा कन्यां दासीदासौ तथैव च॥
करन्तु हृदि विन्यस्य धर्म्मो ह्येष प्रतिग्रहः।
आरुह्य तु गजस्योक्तः कर्णे चाश्वस्य कीर्त्तितः॥
तथा चैकशफानाञ्च सर्व्वेषामविशेषतः।
प्रतिगृह्णीत गां पुच्छे शृङ्गे कृष्णाजिनं तथा॥
कर्णेऽजां पशवः सर्व्वे गृह्याः सर्व्वैं र्विचक्षणैः।
प्रतिग्रहं तथोष्ट्रस्य आरुह्यैकन्तु पादुके॥
ईक्षायान्तु रथो ग्राह्यश्छत्रदण्डे[1] च धारयेत्।
द्रुमाणामथ सर्व्वेषां मूले न्यस्तकरो भवेत्॥
आयुधानि समाधाय तथामुच्य विभूषणम्।
वर्म्मध्वजौ तथा स्पृष्ट्वा प्रविश्य च तथा गृहम्॥
अवतीर्य्य च सर्व्वाणि जलस्थानानि चैव हि।
उपविश्य तु शय्यायामुपस्पृश्य करेण वा॥
द्रव्याण्यन्यान्यथादाय स्पृष्ट्वा वा ब्राह्मणः पठेत्।
कन्यादाने तु न पठेत् द्रव्याणि तु पृथक् पृथक्[2]॥

---

(१) P. छत्रहस्ते।

(२) P. Adds after it प्रतिग्रहं द्विजश्रेष्ठा स्तत्रैवान्तर्भवन्ति ते।

आमुच्य अङ्गे धृत्वा।

विष्णुधर्म्मोत्तरे,—

गृह्णीयान्महिषं पृष्ठे खरं वै पृष्ठदेशतः।
प्रतिग्रहमथोष्ट्रस्य यानानाञ्चाधिरोहणात्॥
बीजानां मुष्टिमादाय रत्नान्यादाय सर्व्वतः।
वस्त्रं दशान्तादादद्यात् परिधायाथवा पुनः॥
आरुह्योपानहौ चैवमारुह्यैव तु पादुके।

परिशिष्टे,—

प्रतिगृह्णीत गां पुच्छे कर्णे वा हस्तिनं करे।
रत्यै भार्य्यां परां दूर्व्वां प्रतिगृह्णीत पार्श्वगाम्॥
पुत्रमुत्सङ्गमारोप्य प्रतिगृह्णीत दत्तकम्।
रथं रथमुखे स्पृष्ट्वा प्रतिगृह्णीत कूवरे॥

अत्र गवादीनां स्थलभेदे प्रतिग्रहा वैकल्पिकाः।

विष्णुधर्म्मोत्तरे,—

अभयं सर्व्वदैवत्यं भूमिर्वै विष्णुदेवता।
कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः॥
प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः।
तथा चैकशफं सर्व्वं कथितं यमदैवतम्॥
महिषश्च तथा याम्य उष्ट्रो वै नैरृतो भवेत्।
रौद्री धेनुर्विनिर्द्दिष्टा छाग आग्नेय ईरितः॥
शेषन्तु वारुणं विद्याद् वराहो वैष्णवः स्मृतः।
आरण्याः पशवः सर्व्वे कथिता वायुदैवताः॥

जलाशयानि सर्व्वाणि वारिजानि कमण्डलुः।
कुम्भं सकरकं चैव वारुणानि विनिर्दिशेत्॥
समुद्रजानि रत्नानि सामुद्राणि तथैव च।
आग्नेयं कनकं प्रोक्तं सर्व्वं लोहं तथैव च॥
प्राजापत्यानि बीजानि यज्ञीयमपि च द्विजाः।
ज्ञेयानि सर्व्वबीजानि गान्धर्व्वाणि विचक्षणैः॥
बार्हस्पत्यं स्मृतं वासः सौम्यान्यथ रसानि तु।
पक्षिणश्च तथा सर्व्वे वायव्याः परिकीर्त्तिताः॥
विद्या ब्राह्मी समुद्दिष्टा विद्योपकरणानि च।
सारस्वतानि सर्व्वाणि पुस्तकादीनि पण्डितैः॥
सर्व्वेषां शिल्पभाण्डानां विश्वकर्म्मैव दैवतम्।
द्रुमाणामथ सर्व्वेषां लताहरितकैः सह॥
फलानामपि सर्व्वेषां तथा ज्ञेयो वनस्पतिः।
मत्स्यमांसे विनिर्द्दिष्टे प्राजापत्ये तथैव च॥
छत्रं कृष्णाजिनं शय्या रथमासनमेव च।
उपानहौ तथा यामं यच्चान्यत् प्राणिवर्ज्जितम्॥
उत्तानाङ्गिरसश्चैव प्रतिगृह्णीत मानवः।
जपोपकरणं द्रव्यं कथितं शक्रदैवतम्॥
गृहञ्च शक्रदैवत्यं यदनुक्तं द्विजोत्तमाः।
तज्ज्ञेयं विष्णुदैवत्यं सर्व्वं वा विष्णुदैवतम्॥

अथ प्रतिग्रहीतृभेदेन निषेधः ।

याज्ञवल्क्यः,—

विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥

मनुः,—

अतपा ह्यनधीयानः प्रतिग्रहरुचिर्द्विजः ।
अम्भस्यश्मप्लवेनेव सहितेनैव मज्जति ॥
तस्मादविद्वान् विभियाद् यस्मात् कस्मात् प्रतिग्रहात् ।
स्वल्पकेनाप्यविद्वान् हि पङ्के गौरिव सीदति ॥

अत्र—

मन्त्रपूर्व्वन्तु यद्‌द्रव्यममन्त्राय प्रदीयते ।
दातुर्निकृत्य हस्तं हि भोक्तुर्जिह्वां निकृन्तति ॥

एतेन विद्यातपोहीनेन प्रीतिदायादिरूपमेव प्रतिग्रहीतव्यं न समन्त्रकप्रतिग्रहरूपमिति ।

याज्ञवल्क्यः,—

प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥

अत्रायाचितप्रतिग्रहोपस्थितौ त्यागी यद्दानसम्बन्धप्रतिग्रहस्तद्दानफलं प्राप्नोति । यत्तु गृहागतस्य त्यागी दोषश्रवणं नाश्नन्ति पितरस्तस्येत्यादि तद्विहितविषयत्वासम्भवाद्दानफलकामिनश्च प्रतिग्रहत्यागस्य विहितत्वादन्यपुरुषं प्रति दोषः ।

मनुः,—

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्ज्जयेत् ।
प्रतिग्रहेण तस्याशु ब्राह्मं तेजः प्रशाम्यति ॥
सर्व्ववेदाधिगमनात् सर्व्वतीर्थावगाहनात् ।
गवां कोटिप्रदानाच्च श्रेयान् हस्तस्य निग्रहः ॥

इदन्तु सर्व्ववेदाध्ययनसर्व्वतीर्थस्नानकोटिगोप्रदानाधिकफलप्राप्तिफलकं यावज्जीवप्रतिग्रहनिवृत्तिसङ्कल्परूपं कर्म्मान्तरम् । तेन गृहीतद्रव्यत्यागनिषेधो विहितैतत्सङ्कल्पव्यतिरिक्तविषय एव । एवमयाचितप्रतिग्रहालाभे प्रशस्तेभ्यो द्विजातिभ्यो निषिद्धद्रव्यनिषिद्धदेशनिषिद्धकालपरिहारे याचित्वाऽपि प्रतिगृह्णीयात् । प्रीतिदायेन च प्रतिगृह्णीयात् । अध्यापनयाचनयोर्याचितप्रतिग्रहापेक्षयाऽपि गुरुत्वात् । तदसम्भवे निर्गुणेभ्योऽपि निन्द्यवर्ज्जितेभ्यः । तदसम्भवे धार्म्मिकक्षत्रियनृपात् ।

अकृतञ्च कृतं चेत्रं गौरजाविकमेव च ।
हिरण्यं धान्यमन्नञ्च पूर्व्वं पूर्व्वमदोषवत् ॥

एवं क्रमेण । तत्र निषिद्धदातृविषये यमः,—

नटनर्त्तक[1]वैताल चर्म्मकारसुवर्णकृत् ।
स्थाणुकाषण्डगणिका अभोज्यान्नाः प्रकीर्त्तिताः ॥
गन्धर्व्वो लोहकारश्च शुचिकस्तन्तुवायकः ।
चक्रोपजीवी रजकः कितवस्तस्करस्तथा ॥

---

(१) P. तक्षकः ।

ध्वजी मीनोपजीवी च शूद्राध्यापकयाजकौ।
कुलालश्चित्रकर्त्ता च वार्द्धुषी चर्म्मविक्रयी॥
समार्घ्यं पण्यमादाय महार्घ्यं यः प्रयच्छति।
स वै वार्द्धुषिको नाम यश्च वृद्धिं प्रयोजयेत्॥
वृथाश्रमी वृथा दाता आश्रमाणाञ्च दूषकः।
पुण्यस्य विक्रयी यश्च योनिसंकरजश्च यः॥
रङ्गोपजीवी कुण्डाशी वीरहा गुरुगुप्तिकः।
भिषक् च गरदश्चैव रूपाजीवी च सूचकः॥
शौण्डिकः पार्ण्णिकश्चैव निषादेन समाः स्मृताः।
कर्म्मस्वेतेषु यो मोहाद् ब्राह्मणो वर्त्तते सदा॥
प्रायश्चित्तेऽपि चरिते परिहार्य्यो भवेत् स हि।
एते ब्राह्मणचण्डालाः सर्व्वे ब्रह्महताः किल॥
तस्माद्दैवे च पित्र्ये च वर्ज्जयेत् तत्त्वदर्शिभिः।
एतेषामेव सर्व्वेषां प्रत्यावृत्तिं तु मार्गताम्॥
भिक्षान्नमुपयुञ्जानो द्विजश्चान्द्रायणं चरेत्।
एतेषां ब्राह्मणो भुक्त्वा दत्वा कृत्वा प्रतिग्रहम्॥
प्राजापत्येन शुद्ध्येत तस्मात् पापान्न संशयः।

स्थाणुका अभ्रात्मती। गन्धर्व्वो गायनवृत्तिः। कुलालोऽत्रास्वकीयः। देवलेन कुलालस्य भोज्यान्नताभिधानात् तस्य स्वकीयविषयत्वम्। वृथा दाता दृष्टादृष्टप्रयोजनमनुद्दिश्य दाता। आश्रमभेदको दूषकः। गुरुगुप्तिकः गुरुं गोपायति। रूपाजीवी वेशकरणेन यो जीवति। पार्ष्णिकः पत्नोपजीवी।

सुमन्तुः,—अभिशस्तपतितपौनर्भवभ्रूणहपुंश्चल्यशुचिशस्त्रकारतान्तिकतैलिकध्वजीसुवर्णकारषण्डबन्धकिगणिकान्नानि वर्ज्जयेत्। शौनिकव्याधचर्म्मकारनिषादानामन्नमप्रतिग्राह्यम्। तदशनप्रतिग्रहयोश्चान्द्रायणं चरेत्। तत्पदेनाभिशस्तादयः सर्व्वे परामृश्यन्ते। अत्रापि प्रायश्चित्तं साकाङ्क्षत्वात्। तेनैतेभ्यः प्रतिग्रहो निषिद्धः।

हारीतः,—पतितदुष्कृतेभ्यः प्रतिगृहीतमस्पर्श्यमयज्ञीयं तेन न पुण्यार्थानाप्नोति आदेशवद्यथार्थं ब्राह्मणमभिजित्य तामसमन्यस्मै दीयमानं प्रतिषिद्धस्त्वयं प्रतिगृहीतस्य दुष्कृतमाप्नोति। आनृण्यार्थे प्रतिगृहीतेभ्योऽकृत्वोपयोगात् स्तैन्यम्। असत्कार्य्यार्थं निमज्जत्यात्मार्थे निबध्नीतेत्याहुः। एते प्रतिग्रहोपयोगाः। यैः प्रतिगृह्णन् निरयाय कल्प्यते।

अथ द्रव्यविशेषेण निषिद्धेभ्योऽपि प्रतिग्रहानुज्ञा।

तत्र गौतमः,—एधोदकमूलफलशय्यासनावसथयानपयोदधिधानाप्रियङ्गुशाकान्यप्रणोद्यानि सर्व्वेभ्यः। पितृदेवगुरुभृत्यभरणे चान्यत्। सर्व्वेभ्य इति। निन्दितेभ्योऽपि दातृभ्यः। केवलमयाचितप्रतिग्रहे येषां कुसूलादीनां प्रतिप्रसवः। येषामयाचितप्रतिग्रहे नचैतदेवमपि वचनमयाचितप्रतिग्रहविषयं किन्त्वेष्यते।

अत्राभ्युदितपदेनायाचितस्य द्रव्यमात्रस्य पृथगुपादानात्। अयाचितप्रतिग्रहे निषिद्धकृष्णाजिनादिव्यतिरिक्तद्रव्यमात्रस्याप्रत्याख्येयत्वेन द्रव्यविशेषानर्थक्यात्। तेन सामान्यप्रार्थनया दाता

चेदेधोदकादिद्रव्यं दित्सति तदा तन्न प्रत्याख्येयमित्येवं युज्यते। एवमुत्तरत्रापि पितृदेवभृत्यभरणार्थं याचितमयाचितं वा लब्ध्वा न प्रत्याख्यानं कुर्य्यादित्यर्थः।

केवलं,—

न यज्ञार्थं धनं शूद्राद् विप्रो भिक्षेत कर्हिचित्।
यजमानो हि भिक्षित्वा चण्डालः प्रेत्य जायते॥

इति मनुवचनान्न यज्ञार्थं शूद्रात् प्रार्थनम्। अयाचितं यज्ञार्थं शूद्रादपि ग्राह्यम्। पितृदेवभृत्यभरणे चान्यदिति देवार्थस्य प्रत्याख्याननिषेधात्। केवलं—

यज्ञार्थं लब्धमददन्भासः काकोऽपि वा भवेत्।

इति याज्ञवल्क्यवचनात् तस्यान्यत्र विनियोगो न कार्य्यः।

सुमन्तुः,—अभोज्यान्नानामपि पुष्पमूलफलशाकतृणकाष्ठधान्यानि क्षेत्रस्थानि गोष्ठस्थं पयश्चाददतामदोषः। क्षेत्रमत्र उत्पत्तिस्थानम्। मनुः—

एधोदकं मूलफलं पुष्पमभ्युद्यतं च यत्।
सर्व्वतः प्रतिगृह्णीयात् तथैवाभयदक्षिणाम्॥
शय्यां गृहं कुशान् गन्धानापः पुष्पं मणिं दधि।
धान्यं मत्स्याः पयो मांसं शाकञ्चैव न निर्वपेत्॥

न नीत्वा कुर्य्यात्। एवं निन्दितद्विजातिभ्य एतानि द्रव्याणि प्रतिगृह्यन्ते न शूद्रात् किमपि।

अङ्गिराः,—

षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं जुगुप्सितम्।

जीवन् स च भवेच्छूद्रो मृतः श्वा चाभिजायते।
एते दोषा भवन्त्यत्र शूद्रादेव प्रतिग्रहे॥

तथाच मनुः,—

वेदविच्चापि विप्रोऽस्य कृत्वा लोभात् प्रतिग्रहम्।
विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि॥

तथा—

शूद्रोऽपि धनवान् भूत्वा ब्राह्मणानेव बाधते।
प्रतिग्रहदानेन नरकपातात्।

तथा—

पक्वान्नवर्ज्जं विप्रेभ्यो गौधान्यं क्षत्रियादपि।
वैश्यस्य सर्व्वधान्यानि शूद्राद् ग्राह्यं न किञ्चन॥

तथापि निर्गुणद्विजातिभ्यः प्रतिग्रहलाभे प्रशस्ताध्यापनयाजनासम्भवे अयाचितशूद्रप्रतिग्रहासम्भवे शूद्रादपि याचितप्रतिग्रहः।

तथाचाङ्गिराः,—

अनुगृह्य प्रवृत्तस्य न दोषोऽङ्गिरसो मतम्।
गुर्व्वीयमतिथीनाञ्च भृत्यानाञ्च विशेषतः॥
शूद्रान्नं प्रतिगृह्णीयात् न तु भुञ्जीत स्वयं ततः।

अनुगृह्य प्रवृत्तस्य गुर्व्वाद्यनुग्रहप्रवृत्तस्य न तु स्वयं भुङ्क्ते इति गोपालादिव्यतिरिक्तशूद्रविषयम्।

तत्र तु याज्ञवल्क्यः,—

शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥

एषामन्नं प्रतिगृह्य स्वयमपि भुञ्जीतेत्यर्थः।

यत्तु क्षेत्रगतं धान्यं खले वाथ गृहाद् वहिः।
सर्व्वकालं ग्रहीतव्यं सर्व्वेभ्योऽङ्गिरसो मतम्॥

सर्व्वकालमनापत्तावपि। तथा--

स्वपात्रे यच्च निक्षिप्तं दुग्धं तच्छुचिरिष्यते।
पात्रान्तरगतं ग्राह्यं शूद्रात् स्वगृहमागतम्॥
शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि।
निमित्तेनैव भोक्तव्यं शूद्रान्नं तदपि स्मृतम्॥
आमं मांसं दधि घृतं धाना क्षीरमथौषधम्।
शुक्तक्षैयरसा ग्राह्या निवृत्तेनापि शूद्रतः॥
शाकमत्स्यमृणालानि कन्दुकाः शक्तवस्तिलाः।
इक्षुः फलानि पिण्याकं प्रतिग्राह्याणि सर्व्वतः॥

सर्व्वतः सूतकादावपि सवर्णेभ्यश्च।

मनुः,—

नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः।
आददीताममेवास्मादावृत्तावेकरात्रिकम्॥

आवृत्तौ आपदि। याज्ञवल्क्यः,—

कुशाः शाकाः पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः।
मांसं शय्यासनं धान्यं प्रत्याख्येयं न वारि च॥

अङ्गिराः,—

संस्कारैः शुद्ध्यति ह्यामं धान्यं तेन शुचि स्मृतम्।
तस्माद्धान्यं ग्रहीतव्यं मृतसूतान्तरेष्वपि॥

पक्वान्नवर्जं विप्रेभ्यो गोधान्यं क्षत्रियात् तथा।
वैश्येभ्यः सर्व्वधान्यानि श्राद्धाद् ग्राह्याः पणास्तथा॥

संस्कारैस्तक्षणादिभिः। ताम्रिकः कार्षिकः पणः। एतच्चापद्गतस्येति लक्ष्मीधरः।

अत्र गर्हितप्रतिग्रहाणां धनत्यागपूर्व्वकं प्रायश्चित्तम्। धनभोगेऽवशेषधनत्यागपूर्व्वकं प्रायश्चित्तम्। भोगेन धनसमाप्तौ वैराग्ये धनत्यागरूपाङ्गवैगुण्यात् प्रायश्चित्तं कर्त्तव्यं न वेति सन्देहे कर्त्तव्यमेवेति निर्णयः। आदिष्टप्रायश्चित्तानामसम्भवेऽपि

यच्चोक्तं यत्र वा नोक्तमिह पापप्रणाशनम्।
प्राजापत्येन कृच्छ्रेण शुद्ध्यते नात्र संशयः॥

इति विशेषप्रायश्चित्तस्थलेऽपि प्राजापत्यकृच्छ्रविधानात् तदेव कर्त्तव्यम्। गुरौ च दोषे तस्यावृत्तिः। एनसि गुरुणि गुरूणीति स्मरणात्। प्रायश्चित्तविशेषात् तद्विधिश्च प्रायश्चित्तप्रदीपेऽस्मत्कृतेऽनुसन्धेयः। यथोक्तासत्प्रतिग्रहप्रायश्चित्तमितिधनत्यागरूपाङ्गत्यागाभावेऽपि कर्त्तव्यम्। नैमित्तिकेऽशक्याङ्गहीनेऽपि पापक्षयफलोत्पत्तिः।

अन्ये त्वाहुः,--अति निषिद्धानभ्यनुज्ञातप्रतिग्रह एव धनत्यागपूर्व्वकमेव प्रायश्चित्तम्। यस्यां दशायां यः प्रतिग्रहोऽनुज्ञातस्तत्प्रतिग्रहस्य कालान्तरे निषिद्धत्वेऽपि गर्हितपदानुविधेयत्वाच्च न तत्र धनत्यागपूर्व्वकं प्रायश्चित्तम्।

यद्गर्हितेनार्ज्जयन्ति कर्म्मणा ब्राह्मणा धनम्।
तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसैव च॥

इति वचनात्। तेनाधर्म्मत्वेनाम्नातशूद्रप्रतिग्रहादेरपि धनत्यागपूर्व्वकं प्रायश्चित्तम्।

किन्तु पतितचाण्डालादिधनप्रतिग्रहे तथेति चौर्य्यादेरपि सर्व्वथाननुज्ञातत्वं तत्रापि धनत्यागपूर्व्वकमेव प्रायश्चित्तम्।

यस्तु परोपकारार्थमेव गृह्णातीति कुटुम्बभरणे विनियुङ्क्ते तस्य गर्हितप्रतिग्रहेऽपि दोषाभावः। मनुः,—

असाधुभ्योऽर्थमादाय साधुभ्यो यः प्रयच्छति।
स कृत्वा प्लवमात्मानं सन्तारयति तावुभौ॥

बृहस्पतिः,—

असतो यः समादाय साधुभ्यः संप्रयच्छति।
धनस्वामिनमात्मानं सन्तारयति दुष्कृतात्॥

यमः,—

यस्तु द्रव्यं पुनर्दद्यात् प्रतिगृह्य यतस्ततः।
यमः पृच्छति राजानं कैषा भवति दक्षिणा॥
जानताऽजानता वापि यत्किञ्चिद् दुष्कृतं कृतम्।
सर्व्वं तरति धर्म्मात्मा प्रतिगृह्य पुनर्द्ददत्॥

इति प्रतिग्रहप्रकरणम्।

अध्यापनप्रकरणम्।

एवं प्रतिग्रहेण वृत्त्यसम्भवे साधुभ्योऽध्यापनेन जीवनम्। प्रतिग्रहसम्भवे न तत्कार्य्यम्। तच्च मूल्यनिर्णयं विनैव।

गृहीत्वाऽपि च यो विद्वान् दक्षिणां न प्रयच्छति।

तस्य कृतघ्नत्वस्मरणात् कृतघ्ने नास्ति निष्कृतिरिति दोषातिशयस्मरणाच्च शिष्यैर्द्दीयते तेन जीवनम्।

वेदाक्षराणि यावन्ति नियुज्यन्तेऽर्थकारणात्।
तावतीर्भ्रूणहत्यास्तु वेदं विप्लाव्य चाप्नुयात्॥
भृतकाध्यापको यस्तु भृतकाध्यापितश्च यः।
तावुभौ पतितौ विप्रौ स्वाध्यायक्रयविक्रयात्॥

इति दोषः। एवं सम्पूर्णे वेदाध्यापने मूल्यपणपूर्व्वके पातित्यश्रवणात् एकदेशस्य पणपूर्व्वकाध्यापने चोपपातकश्रवणाद् वर्जनीयम्। अन्यो यदि मूल्यं दत्वा धर्म्मार्थं परानध्यापयेत् तदाध्यापकस्य धर्म्मविक्रय एव परार्थजपादिवत्। धर्म्मविक्रयोऽपि निषिद्ध एव।

अत्र वेदविक्रय एव दोषाभिधानाद् वेदादिमीमांसादीनां पणपूर्व्वकमध्यापनेऽप्यदोषः। तथा पुराणश्रावणमध्यापनान्तर्गतम्। यत्तु व्यवहारनिर्णयोऽपि शास्त्रोपदेशरूपमेवेति नाध्यापनान्तर्भावः। व्यवहारान् नृपः पश्येदिति क्षत्रियधर्म्मविधानात् क्षत्रियवृत्तिमध्ये देवलेन गणनाच्च क्षत्रियवृत्तिरूपमेव व्यवहारार्ज्जनम्। एवं पर्षदि स्नात्वा प्रायश्चित्तस्योपदेशोऽपि नाध्यपनान्तर्गतः किन्तु पृथगेव कर्म्मान्तरम्।

आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः।
जानन्तो न प्रयच्छन्ति तेषां ते फलभोगिनः॥

इत्यादिकमन्यविधिविषयम्। सत्वादण्डधेनुग्रहणञ्च नैमित्तिक-

दानप्रतिग्रहरूपमेव। एवं महापातकादावपि नाध्यापनात् सद्यः पातित्यम्। एवं न शूद्राय मतिं दद्यादिति न चास्योपदिशेद्धर्म्ममिति चानुपसन्नशूद्रविषयमिति व्याख्यानात्। उपसन्नशूद्रे दोषाभावः। अनुपसन्ने तु स्नातकव्रतलोपमात्रमिति न धर्म्मोपदेशस्याध्यापनान्तर्गतिः। एवं यज्ञादावुपदेष्टृत्वेन ऋत्विजां कर्म्मप्रचारणमपि नाध्यापनं याजनान्तर्गतम्। तन्मूल्यग्रहणं प्रीतिदायरूपम्। पणपूर्व्वकञ्च प्रत्युपकारदानस्वीकारः। प्रस्तरेभ्यश्चान्यदिति यद्दीयते यच्चात्रेयाय हिरण्यं ददातीत्यादि तत्प्रतिग्रहान्तर्गतम्। यज्ञार्थप्रतिग्रहपदार्थत्वेनार्त्विज्यं याजनान्तर्गतं चेति नाध्यापने प्रवेशः। व्रात्याधिकारे पारस्करः,—नैतानुपनयेयुर्नाध्यापयेयुः।

अथ शूद्रपतिताध्यापने महान् दोष इति सर्व्वथा न कर्त्तव्यम्। पतिते पातित्यं शूद्रे च। यमः,—

वृषलाध्यापको यश्च वृषलाध्यापितश्च यः।
तावुभौ नरके मग्नौ वसेतां शरदां शतम्॥

शूद्राध्यापकयाजकानित्युक्त्वा यमः,—

एते ब्राह्मणचण्डालाः सर्व्वे दुर्ब्राह्मणाः किल।

इति दोषाधिक्यात्। विकर्म्मस्थब्राह्मणाध्यापनमपि यथा कथञ्चिदपि। शूद्रापप्रतिग्रहासम्भवे पापसंसर्गगुरुत्वात्।

कृतज्ञोऽद्रोही मेधावी शुचिः कल्प्योऽनसूयकः।

इति शुचेरध्यापनीयत्वात्।

इत्यध्यापनप्रकरणम्।

याज्यप्रकरणम्।

एवमध्यापनवृत्त्यसम्भवे प्रशस्तयाजनं वृत्तिः। तस्य तु महत्त्वं प्रतिग्रहाध्यापनापेक्षया प्रशस्तत्वम्। प्रतिग्रहः प्रत्यवर इति मनुः। तथा पद्मपुराणे,—

अयाज्यानां याजकश्च याज्यानां च विवर्ज्जकः।
रेतोविण्मूत्रसेवी च स प्रेतो जायते नरः॥

याज्यत्यागे दोषकीर्त्तनात् प्रशस्तत्वं गम्यते। तथा

याजनाध्यापनादिभ्यस्तथा दानप्रतिग्रहैः।
विरजाः स्वर्गमायान्ति विमानैः सङ्गता दिवः (?)॥

इति प्रशस्तता स्मर्य्यते। तेन पौण्डरीकबहुसुवर्णवाजपेयादियाजनेन बहुग्रहणेऽपि न दोषः। एवं प्रशस्तयाज्यत्यागे दोषश्रवणाच्च बहुयाजनेऽपि न दोषः।

वृत्त्यर्थादधिकं गृह्णन् नरो भवति किल्बिषी।

इति तस्य प्रतिग्रहविशेषपरत्वात्। यत्तु बहुयाजक इति निन्दावचनं तत् "तथैव ग्रामयाजकः" "याजयन्ति च ये बहून्" इति वाक्ययोः समवादायाद् बहुवर्णयाजक इत्येवंपरम्। तदुक्तं दानसागरे,—बहुयाजको बहुवर्णयाजक इति। ब्रह्मपुराणे,—

यश्चोपनयनं चक्रे बहूनां बहुयाजकः।

इति। याजनं नाम श्रौतकर्म्मणि ग्रहयज्ञादि स्मार्त्तकर्म्मणि च वरणाभरणाभ्यां सत्कृतेन दक्षिणालाभमुद्दिश्याध्वर्य्यवादि कर्म्मकरणम्। षोड़शर्त्विजो नवग्रहमखे चत्वार ऋत्विज इत्यादि

रूपेण यत्र ऋत्विक्समाख्या तत्र ऋत्विग्भ्यो दक्षिणां ददातीति ऋत्विक्सम्प्रदानकदानस्य दक्षिणात्वादृत्विजामेव याजनं वृत्तिरिति केचित्।

अन्येषान्तु चमसाध्वर्य्युप्रभृतीनां न याजनवृत्तिरिति केचित्। ऋत्विग्यज्ञकृदुच्यते इति स्मृतेः यजमानस्याप्यार्त्विज्यात्। ऋतुयजननिमित्तत्वाच्च यज्ञार्थकर्त्तृत्वञ्च ऋत्विक्त्वम्। तन्निमित्तधनार्जनमेव याजनम्। कल्पसूत्रेतु व्यवहारार्थं संज्ञाकरणमिति प्रतिभाति।

यत्तु वरणपूर्व्वकं त्र्यम्बकजपसहस्रनामदेवीमाहात्म्यादिपाठदेवपूजातीर्थस्नानगयाश्राद्धादिकं परार्थं कृत्वा दक्षिणाग्रहणं तन्न याजनम्। यज्ञसम्बन्धाभावात्।

तत्र त्र्यम्बकजपादौ—

भ्रातरं पितरं शिष्यं गोसहस्रप्रदायिनम्।

रक्षेदनेन मन्त्रेण—

इति दक्षिणाभिधानमस्ति। यत्र सहस्रनामपाठादौ समाचारप्रमाणकं दक्षिणादानं तदुभयत्रापि प्रतिग्रहशब्दार्थसत्वात् प्रतिग्रहरूपमेव।

अर्थलोभेन यो दद्याद् गृह्णीयाच्च प्रतिग्रहम्।

स पूर्व्वं नरकं याति ब्राह्मणस्तदनन्तरम्॥

इति यच्छातातपवचनं तद्द्रव्यलोभरूपकार्य्यविषयमेव। तेनात्र तुलापुरुषादिदक्षिणावद्दक्षिणाशब्दाद्दक्षिणाग्रहणेतिकर्त्तव्यता नैतद्दानेतिकर्त्तव्यता। तच्च प्रत्युपकारार्थं दानमेव।

यथा गीतायाम्।—

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।

दीयते तु परिक्लिष्टं तद्राजसमुदाहृतम्॥

इति। यथा व्रतादौ

असामर्थ्ये शरीरस्य व्रते च समुपस्थिते।

कारयेद्धर्म्मपत्नीं वा पुत्रं वा विनयान्वितम्॥

इति।

भ्रातरं पितरं शिष्यं ब्राह्मणं दक्षिणादिभिः।

इति। अत्र पत्न्यादीनां प्रतिनिधित्वेन कर्म्मकर्त्तृत्वम्। दक्षिणाक्रीतस्य न प्रत्युपकारलाभेन प्रतिनिधित्वमिति विशेषः। यद्यपि तथा स्वामिनः फलसमवायादिति षष्ठाधिकरणन्यायेन स्वामिनः प्रतिनिधिर्नास्ति। कर्त्रंशे तु भवत्येव। तदुक्तं '(१)बहूनान्तु प्रवृत्तावन्यमागमयेदवैगुण्यादित्यधिकरणे सत्रे कस्मिंश्चिद् यजमाने मृते तत्स्थानेऽन्यः प्रतिनिधेयः सप्तदशसंख्याधिकरणककर्त्तृकत्वनिर्वाहाय इत्युक्तम्। तथा स्मरन्ति

यज्ञदानव्रतजपतीर्थयात्रादिकञ्च यत्।

यस्त्वेवं कारयेदन्यं तेन सर्व्वमनुष्ठितम्॥

इति। एतेन पौरोहित्यं व्याख्यातम्। तत्रापि

नित्ये नैमित्तिके काम्ये त्वं मे प्रतिनिधिर्भव।

इति स्मरणात्।

---

(१) मुद्रितपुस्तके,—बहूनां तु प्रवृत्तेऽन्य० जैमिनीयन्यायमालाविस्तरः अ० ६, पा० ३ सू० २२।

त्वया मया च भोक्तव्यमिदं राज्यमकण्टकम्।

इति धनदानस्वीकाराद् व्यक्तमेव प्रतिनिधिकर्त्तृत्वम्। तत्र प्रतिनिधित्वेन वरणविधिवत् तत्रापि कारयेदिति कर्त्तारं प्रयोजयेदिति विधानादेव प्रतिनिधित्वम्। अतएव मण्डनः,—

पत्नग्रामपित्वशक्तायां नियुक्तः कश्चनो यजेत्।

इति स्वयमेव यागेऽपि प्रतिनिधिकर्त्तारं दर्शयति।

प्रभासखण्डे च,—

पत्नी पुत्रः पुरोधाश्च भ्राता वापि सखाऽपिवा।

यात्रायां धर्म्मकार्य्येषु जायते प्रतिहस्तकाः॥

एभिः कृतं महादेवि स्वयमेव कृतं भवेत्।

आपस्तम्बः,—

प्रयोजयिता अनुमन्ता कर्त्तेति स्वर्गनरकफलेषु भागिनः केवलम्।

तथैव राजमहिषी राजामात्यपुरोहिताः।

पापेनार्द्धेन संयुक्ताः सर्व्वे ते राजधर्म्मिणः॥

इति यमवचनात् पुरोहितवृत्तिर्गर्हिता। स्तुतिजपपाठादिकरणं न तथा गर्हितमिति विशेषः। तेन प्रतिग्रहाश्रयदेशकालद्रव्यदोषास्तत्रापि भवन्त्येव। यत्तु—

इष्टमध्यापितं पूर्त्तं तप्तं वा ह्यात्मनस्तपः।

प्रयच्छत्यपरेभ्यश्च धनार्थं धर्म्मविक्रयी॥

इति वरणव्यतिरेकेण स्वयमेव यागं कृत्वा जपं कृत्वा तपः कृत्वा परस्माद्धनलाभेन तद्विक्रीणीते न कर्म्मणा तस्य वृत्तिः स्वकृतापूर्व्वं

विनश्यति धनदातरि चापूर्व्वमुत्पद्यत इति कल्प्यते स धर्म्मविक्रयः।

देवतानां गुरूणाञ्च मातापित्रोस्तथैव च।

पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचित्॥

इति पुण्यदानविधौ पुण्यस्य कृतस्य दानेन स्वगतापूर्व्वं नश्यति सम्प्रदानेऽपूर्व्वान्तरमुत्पद्यते तत्र धर्म्मविक्रये। यथा,—

तस्माद् यत् सुकृतं किञ्चिन्ममास्ति त्रिदशाधिप।

तेन पुण्येन मुच्यन्तां पितरो यातनागताः॥

इति पुण्यदानम्। तथाच ययातेः स्वर्गप्रच्युतस्य दौहित्रदत्तपुण्येन स्वर्गगमनम्। एवं धर्म्मविक्रयः कृतस्य धर्म्मस्य मूल्यग्रहणपूर्व्वकं परस्मै दानम्। स च निषिद्धः। पुण्यविक्रये तप्तकृच्छ्रं कुर्य्यादिति प्रायश्चित्तविधानात्। तथाच शङ्खलिखितौ,—चैत्यदेवगृहोद्यानारामसभाप्रपापुण्यतड़ागसेतुविक्रयं कृत्वा तप्तकृच्छ्रमाचरेदिति। तेन परार्थजपाद्याचरणं न धर्म्मविक्रयो न याजनं तद्धनग्रहणं प्रतिग्रह एव। मनुः—

गोबधायाज्यसंयाजपारदार्य्यात्मविक्रयी।

इत्यादिनाऽयाज्ययाजनमित्ययाज्ययाजननिन्दायां तिलोत्पादनविक्रययोर्निन्दनाच्च तिलवपनमस्वकृतकृषौ कृष्यन्तरासम्भवे। एवमिक्षुं न पीड़येत् इक्षुघ्नोह्यात्मघातक इति पीड़ननिषेधादिक्षुकृषिरपि न कार्य्यः। हारीतः—

अष्टगवं धर्म्महलं षड्गवं जीवितार्थिनाम्।

चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम्॥

तथा--

बालानां दमनञ्चैव वाहनं न च शस्यते ।
वृद्धानां दुर्ब्बलानाञ्च प्रजापतिवचो यथा ॥

देवलः—

पुंस्त्वोपघातं नस्यं वा वाहनानां न कारयेत् ।
वृद्धं युगे न युञ्जीत जीर्णं व्याधितमेव च ॥
न षण्डं वाहयेदेनं न च भारेण पीड़येत् ।
न वाहनीयाः शिखरे वृषभा यत्र कुत्रचित् ॥

देवीपुराणे--

सुक्रतान् (?) पृष्ठदेशे तु स्कन्धदेशे तु यो वृषम् ।
वाहयेद् गुरुभारेण स तु भारशतं बहेत् ॥

रामायणे,—

यो दुर्बलं परिश्रान्तं बालिशः पापनिश्चयः ।
वाहयिष्यत्यनड्वाहं स गोघ्नः पापमाप्स्यति ॥
शक्तं समर्थं बलिनं वृषं यो वाहयिष्यति ।
ग्रासोपहारसंयुक्तं न स पापमवाप्स्यति ॥

स्वयं कृषौ विशेषः । पुण्याहे लाङ्गलयोजनमिति गृह्यानुसाराल्लाङ्गलयोजनविधिना कृष्यारम्भः । तथा—

ब्रह्मा विष्णुश्च रुद्रश्च कश्यपः सुरभिस्तथा ।
इन्द्रः प्रचेताः पर्ज्जन्यः शेषचन्द्रार्कवह्नयः ॥
बलदेवो हलं भूमिर्वृषभौ रामलक्ष्मणौ ।
रक्षोघ्नौ जानकी सीता युगं गगममेव च ॥

एते द्वाविंशतिः प्रोक्ताः कृष्यारम्भमहोत्सवे ।

हारीतः,--आपस्तु कृषिं प्राहुः कृषेरायोजनवदायोज्यं बालवृद्धकृशादीन् वर्ज्जयेत् । आयोजनवत् चयनभूसंस्कारः कृषावायोजनं यथा समन्त्रकं क्रियते तथेत्यर्थः ।

देवलः—

यो लाङ्गले तु सम्पूज्य कृष्यारम्भमहोत्सवे ।
गन्धैः पुष्पैस्तथा धूपैर्माल्यै रत्नैः पृथक् पृथक् ॥
सदक्षिणैर्दधानेन होमैर्ब्राह्मणतर्पणैः ॥
ततः शक्तिविमुक्तेन ब्रह्मवादेन भूरिणा ।
हलयेद् वाहयेद् भूमिं स्वयं स्नातः स्वलङ्कृतः ॥
पूर्व्वोत्तरां दिशं गच्छेत् क्रमात् पौरन्दरीं शुभाम् ।
कृत्वा प्रदक्षिणावृत्तिमीशानाभिमुखस्ततः ॥
विमुच्य वृषभं बीजं पुरुषो लक्षणान्वितः ।
तुष्टः सुवासाः स्रग्वी च सुवर्णं जलसेचकः ॥
सुवर्णपात्रसंयुक्तं प्राङ्मुखो निवपेत् भुवि ।
उप्त्वा बीजञ्च तत्रैव भोक्तव्यं सह बन्धुभिः ॥
उत्सवश्चैव कर्त्तव्यो गीतवाद्यसमाकुलः ।

हारीतः,—अदीर्घेण प्रतोदेन शनैः शनैर्वाहयेत् । न पर्व्वसु सन्धिवेलयोर्वाहयेत् । द्विहलकृते परित्यागेऽवसृज्य मेक्षणम् । तथा वाहकानां छायासु करणं जलदानं घासदानं दंशाद्युपद्रवनिवारणं रोगार्त्तानां चिकित्सनञ्च हारीतोक्तं कर्त्तव्यम् । धान्यवपनकाले छेदनकाले मर्द्दनकाले निर्वपणकाले गृहानयनकाले

च बलिहोमकरणञ्च हारीतोक्तम्। गवां स्वस्तिकामनया ब्राह्मण-भोजनम्। स्नापयित्वानडुहामलङ्करणम्।

धान्यानयनकाले च बृहस्पतिः—

राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंशकम्।
विंशभागञ्च विप्राणां कृषिं कृत्वा न दोषभाक्॥

पुनर्हारीतः—

यूपोऽयं निहितो मध्ये मेध्यानामिह कर्षकैः।
तस्मादतन्द्रितो दद्यादत्र धान्यञ्च दक्षिणाः॥
भूमिं भित्त्वौषधीर्भित्त्वा भित्त्वा कीटपिपीलिकाः।
पुनन्ति खलयज्ञेन कर्षका नात्र संशयः॥

खलयज्ञो यथोक्तरूपेण खले विभज्य दानम्।

इति कृषिप्रकरणम्।

कृष्या जीवनासम्भवे स्वयङ्कृतवाणिज्येन जीवनम्। तत्र शङ्खलिखितौ,—आपद्गतो ब्राह्मणः कामं जिजीविषुः वैश्याचरणम्। वृत्तिमास्थाय न पण्यं पण्यमिति ब्रूयात्। सकृदेवोक्तं मूल्यमिच्छेदित्यर्थः। आपस्तम्बः,—अक्रीतपण्यैर्व्यवहरेत। मुञ्ज-बल्वजैर्मूलफलैः। तृणकाष्ठैरविकृतैः। नात्यन्तमवस्येत्। वृत्तिं प्राप्य विरमेत्। अक्रीतपण्यैः क्रयादतिरिक्तव्यवहारवर्जितैः। नात्यन्त-मवस्येदासक्तो भवेदित्यर्थः। अत्र मूलफलानामविक्रेयत्वे अक्रीत-त्वेन विक्रेयत्वम्। विक्रयनिषेधः क्रीतमूलफलविषय इत्येके। एवञ्चास्य मते फलानां विक्रयनिषेधः क्रीतलब्धफलविषयः।

बौधायनः—

पशवश्चैकतोदन्ता अश्मा च लवणादृते।
एतद् ब्राह्मण ते पण्यं तन्तुश्चारजनीकृतः॥

लवणादृते लवणादन्यः पाषाणः। अयमश्मनो विक्रयोऽत्यन्ता-पदि स्मृत्यन्तरे निषेधादिति लक्ष्मीधरः। अरजनीकृतः कुसुम्भा-दितररक्तीकृतः। नारदः,—

ब्राह्मणस्य तु विक्रेयं शुष्कं दारु तृणानि च।
गन्धद्रव्यैरकावेत्रं तूलस्तूलीकृतादृते॥
स्वयं शीर्णञ्च विदलं फलानां वदरेङ्गुदे।
रज्जुः कार्पाससूत्रञ्च तच्चेदविकृतं वदेत्॥

एरका तृणविशेषः। तूलः शाल्मल्यादिभवः। विदलं वल्कलम्।

तथाऽविक्रेयाणि। याज्ञवल्क्यः,—

लाक्षालवणमांसानि पतनीयानि विक्रये।
पयो दधि च मद्यञ्च हीनवर्णकराणि च॥

हीनवर्णः शूद्रः। हारीत मनु-वशिष्ठ-शातातपाः,—

त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्।
सद्यः पतति मांसेन लाक्षया लवणेन च॥
इतरेषामपण्यानां विक्रयादिह कामतः।
ब्राह्मणं सप्तरात्रेण वैश्यभावं नियच्छति॥

मनुः अविक्रेयाधिकारे

सर्व्वान् रसानपोहेत कृतान्नञ्च तिलैः सह।
अश्मनो लवणञ्चैव पशवो ये च मानवाः॥

सर्व्वन्तु तान्तवं रक्तं शाणक्षौमाविकानि च ।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः ॥
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्व्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधुगुड़ं कुशान् ॥
आरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च ।
मद्यं नीलिञ्च लाक्षाञ्च सर्व्वानेकशफांस्तथा ॥
रङ्गं सीषं तथा लोहं तैजसानि च सर्व्वशः ।
बालान् चर्म्म तथास्थीनि [1]सस्नायूनि च वर्जयेत् ॥

अपोहेत त्यजेत । कृतान्नं पक्वान्नम् । रसनिषेधेन सिद्धेऽपि पुनर्लवणनिषेधो दोषाधिक्यार्थः । याज्ञवल्क्यः,—

[2]फलौषधक्षौमसोममनुष्यापूपवीरुधः ॥
तथा सृक्चर्म्मशुष्काणि केशतक्रविषक्षितीः ॥
शाकार्द्रौषधिपिण्याकपशून् पक्षींस्तथैव च ।
वैश्यवृत्त्यापि जीवंस्तु विक्रीणीत ना जातुचित् ॥

न विक्रीणीतेत्यनुवृत्तौ यमः,—

कुसुम्भनारिकेलञ्च छत्राकं पूतिकं तथा ।
सोमः श्लेष्मातको धर्म्मस्तोमं यज्ञश्च सर्व्वशः ॥

शङ्खलिखितौ,—यानभक्ष(?)जतुलोह-पाषाण-कृतपशस्त्रविष-

(१) मूले—० वसुस्पर्द्धिनि रोचनाः (?) ॥

(२) मुद्रितयाज्ञवल्क्ये,—फलोपलक्षौम ० ॥ सृक्चर्म्मपुष्पकुतपकेशतक्र ० ॥ शाका—पश्मून् गन्धांस्तथैवच । वैश्य—जीवन्नो विक्रीणीत कदाचन ॥ ३यः प्रायश्चित्ताध्यायः । आपद्धर्म्मप्रकरणम् । श्लो० ३५—३७ । आनन्दाश्रम Series.

मानुषक्षौमकृष्णाजिनैकशफेभ्यः । ब्राह्मणानुवृत्तौ गौतमः,—तस्यापण्यं क्षीरं सविकारम् । अपथ्यानि । पशवश्च हिंसासंयोगे । पुरुषवशाकुमारीवेहतश्च नित्यं ब्रीहियवाश्च । ऋषभधेन्वनडुहश्चैके । अपथ्यं विषादि । वशा बन्ध्या गौः । कुमारी अवद्धसास्ना गौः । वेहद् गर्भघातिनी गौः । विष्णुः,—श्लेष्मतोक्म मधूच्छिष्टशङ्खशुक्तित्रपुसीसकृष्णलोहोदुम्बरविक्रयी महासान्तपनम् । बौधायनः,—श्लेष्म-तोक्म-किण्व-सुकृता अविक्रेया इत्यर्थः । श्लेष्मा चर्म्मादिसन्धानहेतु वृक्षनिर्यासः । तोक्म ईषद्विरूढ़ं बीजम् । किण्वं सुरासाधनमन्नम् । सुकृता दुहिता । तथा,—धान्यस्य मध्ये तिलतण्डुला अविक्रेयाः । पैठीनसिः,—जिह्वापूर्त्तिमपुंगावः शङ्खश्चोर्ला चेत्यविक्रेयाणि । बौधायनः,—पितॄन् वा एष विक्रीणीते यस्तिलान् विक्रीणीते तण्डुलान् विक्रीणीते । मनुः,—

भोजनाभ्यञ्जनाद्दानाद् यदन्यत्कुरुते तिलैः ।
[1]कृमिर्भूतः स विष्ठायां पितृभिः सह मज्जति ॥

तथा —

काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः ।
विक्रीणीते तिलान् शुद्धान् धर्म्मार्थमचिरस्थितान् ॥

एवञ्चात्र शुद्धान् द्रव्यान्तरामिश्रितान् । अचिरस्थितान् मूल्याधिक्याय चिरं न रक्षयेदित्यर्थः । विक्रयश्चात्र धान्येन विनिमयः ।

(१) मुद्रितमनौ,—कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ।
१०माध्यायः श्लो० ९१ ।

अशक्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च।
यद्यवश्यञ्च विक्रेयास्तिला धान्येन तत्समाः॥

धान्यसामान्यन्तु धान्यान्यूना देया इत्यर्थः।

विक्रेता दानपुण्यानां प्रोच्यते भ्रूणहा बुधैः।
वक्ता च दानधर्म्माणां शपथे सोमविक्रयी॥
रत्नशुक्तिप्रबालानां मणीनां मत्तिकस्य च।
प्रतिरूपककर्त्ता च भ्रूणहा प्रोच्यते बुधैः॥

दानपुण्यानां शपथे वक्ता एतन्मिथ्या मम दानपुण्यं नश्यतीत्येवं रूपेण। भविष्यपुराणे—

अनुयोगेन यो दद्याद् ब्राह्मणाय प्रतिग्रहम्।
स पूर्व्वं नरकं याति ब्राह्मणस्तदनन्तरम्॥
वेदाक्षराणि यावन्ति नियुज्यन्तेऽर्थकारणात्।
तावतीर्भ्रूणहत्यास्तु वेदविक्रय्यवाप्नुयात्॥
गवां विक्रयकारी तु गवि रोमाणि यानि तु।
तावद्वर्षसहस्राणि गवां गोष्ठे कृमिर्भवेत्॥

छागलेयः,—

न वेदविक्रयं कुर्य्यादग्निविक्रयमेव वा।
प्रख्यापनं प्राध्ययनं प्रश्नपूर्व्वः प्रतिग्रहः॥
याजनाध्यापने वादः षड्‌विधो वेदविक्रयः।

अग्निविक्रयश्चानाहिताग्नित्वम्। शङ्खलिखितौ,—वस्त्राश्वादीन्नविक्रीणीयादित्युक्त्वा सद्यः पततीत्याह। सुमन्तुः,—देवर्षिसोमचैत्यापत्यभृत्योदपानानां विक्रयी तप्तकृच्छ्रम्। देव-

प्रतिमा। ऋषिप्रतिमा। अन्यत् प्रसिद्धम्। भविष्यपुराणे,—गुड़तिलविक्रयं तप्तकृच्छ्रापनोद्यमाह। हारीतः,—हिङ्गुहिङ्गुलसर्जरसमनःशिलाञ्जनक्षीरलवणगैरिकमणिमौक्तिक-प्रबालावर्त्तनशङ्खशुक्तिवेणुवैणवमृन्मयविक्रये तथारामतड़ागोदपानपुष्करिणीपुण्यसुकृतविक्रये त्रिषवणस्नायी अधःशायी चतुर्थकालभुक् संवत्सरेण पूतो भवति। हारीतः,—

यस्तु सम्भृत्य सम्भारं दुर्भिक्षं समुदीक्षते।
हीनार्थमानदाता वै प्रोक्तो दुर्भिक्षकण्टकः॥
हीनसङ्करमानैश्च यश्चैव हरते मलम्।
स मलः प्रोच्यते पापः प्रजानां मलहारकः॥

हीनोऽर्थो मानञ्च यस्य द्रव्यस्य तस्य बहुमूल्येन विक्रीणीत इत्यर्थः। हीनेनाल्पसारेण। सङ्करेणापद्रव्यमिश्रीकरणेन। मानेन तत्तद्द्रव्याल्पहेतुना। एतैर्यो हरते मलं मलिनद्रव्यं पापहेतुत्वात्। हारीतः,—मानोन्मानसङ्कीर्णसङ्करविक्रये। मानं मापकादि। उन्मानं तदादिमापनेन विक्रयः। सङ्कीर्णं द्रव्यान्तरमिश्रणम्। सङ्करः सङ्कीर्य्यत इति कृत्यया। द्रव्यं कु[सु]म्भादि।

अथ विनिमयः।

यद्यपि द्रव्यविनिमय इतिस्मृतेः क्रयोऽपि विनिमय एव तथापि लोके साक्षादुपयोगिद्रव्यं गृहीत्वा द्रव्यादानं विनिमय उच्यते। कपर्द्दकताम्रमुद्रादिग्रहणपूर्व्वकं द्रव्यादानं विक्रय

उच्यते । द्रव्यहारद्वैविध्येन पदार्थद्वैविध्यं स्मृतावपि क्रयस्य परिवृत्तिश्चेत्येवं निर्द्देशभेदो दृश्यते तेन येषां पदार्थानां विक्रये दोषः स विनिमये नास्ति । कपर्द्दकसङ्कलनया यदि द्रव्यमेव मूल्यरूपेण गृह्यते तदा क्रय एव । तदा च क्रयदोषः स्यादेव । न च येषामेव द्रव्याणां रसारसैर्निमीतव्य इत्येवं विनिमयः श्रूयते तेषामेव विनिमयदोषाभावो नान्येषां विनिमये दोषः स्यादिति वाच्यं तथा सति परिसंख्यायां त्रिदोषापत्तेः । न च विनिमयस्य विक्रयविशेषत्वे दोषप्रसङ्गे प्रतिप्रसवार्थं वचनम् । यत्र प्रतिप्रसववचनं नास्ति तत्र दोष एवेति वाच्यम् । व्यवहारद्वैविध्येन क्रयत्वसिद्धेः । किन्त्वप्राप्तविध्यपेक्षया नियमविधेर्लाघवात् तेषु द्रव्येषु विनिमये द्रव्यविनिमयः । सोमाभावे पूतिकाप्रतिनिधिनियमवदिति । द्रव्यान्तरे यथेष्टद्रव्यैरेव विनिमयेन दोष इति । नन्वेवं

विनिमयस्तु रसादीनां विक्रयो नैव दुष्यति ।
यज्ञार्थदक्षिणानाञ्च प्रजापतिवचो यथा ।

इति । हारीतेन विनिमयरूपे विक्रये रसादीनां दोषाभावादिति चेत् मैवं तत्र रसादिविनिमये दोषाभावमनूद्य यज्ञार्थदक्षिणाविक्रये विभागार्थं अश्वादेः क्रियमाणे ऋत्विजां न दोष इति कथ्यते अन्यथा वाक्यभेदापत्तेः ।

तत्र विनिमयः । वशिष्ठः,—रसा रसैः समतो वा न्यूनतो वा विनिमातव्याः । नत्वेव लवणं रसैः । तिलतण्डुलपक्वान्नविद्यामनुष्याश्च विहिताः परिवर्त्तकेन । न्यूनत इति स्वयं न्यूनग्रहणेनेत्यर्थः । तिलतण्डुलानुवृत्तावापस्तम्बः,—विहितश्चैषां मिथो विनिमयोऽन्नेनान्नस्य । मनुष्याणां मनुष्यैः । रसानां रसैः । गन्धानां गन्धैः । विद्यया विद्यानाम् । गौतमः,—विनिमयस्तु रसै रसानां पशूनाञ्च । न लवणकृतान्नयोस्तिलानाञ्च समेनासमेन तु पक्वान्न[स्य] सम्प्रत्यर्थे । पशूनां पशुभिरित्यर्थः । पक्वान्नस्य सम्प्रत्यर्थं आमस्य तदानीमुपयोगाय पक्वान्नं दत्वा संग्राह्यमित्यर्थः । लवणस्य च रसत्वेन रसेन विनिमये प्राप्ते पर्य्युदासः । तेन लवणव्यतिरिक्तरसै रसानि मातव्यानीत्यर्थः । एवञ्च तस्य रसव्यतिरिक्तद्रव्यान्तरेण विनिमये दोष इति प्रतिभाति ।

इति वाणिज्यप्रकरणम् ।

एवं वाणिज्येन जीवनासम्भवे कुसीदवृत्त्या जीवेत् । एतस्य च स्वयं कृतमपि काम्यम् । स्मृत्यन्तरे च ।

बहवो वृत्तिदोषा ये ऋषिभिः परिकीर्त्तिताः ।
सर्व्वेषामपि चैतेषां कुसीदमधिकं विदुः ॥

इति प्रशंसादर्शनाच्च ।

यत्तु नारदः,—

आपत्स्वपि च कष्टासु ब्राह्मणो न च वार्द्धुषी ।
वृद्धिस्तयोक्ता धान्यानां वार्द्धुष्यं तदुदाहृतम् ॥

छागलेयः,—

न कुर्य्याद् ब्राह्मणो वृद्धिं ब्रह्महत्याविशेषतः ।
ब्रह्महत्याञ्च वृद्धिञ्च तूलया समतोलयत् ॥

इति वचनात् कृषिवाणिज्यादिवैश्यवृत्तिसम्भवे न कर्त्तव्यं कुसीदम् । प्रशंसावाक्यं कृषिवाणिज्यासम्भवविषयम् ।

मनुः,—

ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत् ।
कामन्तु खलु धर्म्मार्थं दद्यात् पापीयसेऽल्पकम् ॥

धर्म्मार्थं कृषिवाणिज्यासम्भवेऽवश्यकर्त्तव्यधर्म्मार्थमित्यर्थः । पापीयसे हीनवर्णाय । अल्पकं अवश्यकार्य्यार्थम् । नतु भोगार्थमित्यभिप्रायः । व्यासः,—

सबन्धे भाग आशीतः साष्टभागः सलग्नके ।
निराधानं द्विकशतं स्यासलाभ उदाहृतः ॥

सबन्धके ऋणप्रयोगे आशीतो भागः । अशीतिकार्षापणे कार्षापणं मासेन वर्द्धते । सलग्नके यत्र दर्शनप्रत्ययवानेकत्र प्रतिभूस्तिष्ठति तत्र धनप्रयोगे पणद्वयाधिककार्षापणो वर्द्धते । अशीतितमभागस्याष्टमांशप्रवेशात् । निराधाने बन्धकप्रतिभूरहिते द्विकशतं द्विसहितं शतं गृह्णीयात् । शतपणस्य मासे पणद्वयवृद्धिरित्यर्थः । एतच्च ब्राह्मणात् । याज्ञवल्क्यः,—

वर्णक्रमाच्छतं द्वित्रिचतुः पञ्चकमन्यथा ।

शतपणस्य ब्राह्मणात् पणद्वयवृद्धिग्रहणम् । क्षत्रियात् पणत्रयग्रहणम् । वैश्याच्चतुःपणी । शूद्रात् पञ्चपणी । मासि मासि वृद्धिरित्यर्थः । तथा—

कान्तारगातुर्द्दशकं सामुद्राद् विंशकं स्मृतम् ।

कान्तारं वर्त्म दुर्गमम् । समुद्रगाः पोतवणिजः । कान्तारगेभ्यः

शतपणस्य दशपणवृद्धिर्मासि मासि ग्राह्या । सामुद्रेभ्यः पणशतस्य विंशतिपणवृद्धिर्मासि मासि ग्राह्या । मूलनाशस्य शङ्कितत्वात् ।

याज्ञवल्क्यः,—

सन्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणापहा ।
वस्त्रधान्यसुवर्णानां चतुस्त्रिद्विगुणापहा ॥

पशुस्त्री यदि व्याधेर्हीयते तदा तस्य सन्ततिवृद्धिः । रसस्य वृद्ध्यर्थं दत्तस्य मासि मासि वृद्धिं चेन्न गृह्णाति तदा बहुकालातिक्रमेऽपि अशीतिभागद्विशतादिक्रमेणाष्टगुणपर्य्यन्तमेव अतोऽधिकत्वेऽपि न ग्राह्यम् । एवं वस्त्रे चतुर्गुणपर्य्यन्तं वृद्धिः काष्ठा । धान्ये त्रिगुणपर्य्यन्तम् । हिरण्ये द्विगुणपर्य्यन्तम् ।

मनुः,—

धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चताम् ।

शदः क्षेत्रफलं लवो मेषलोमानि वाह्योऽश्वबलीवर्द्दादिः । एतेषु पञ्चता नातिक्रामति पञ्चगुणपर्य्यन्तं वृद्धिर्भवतीत्यर्थः । अत्र धान्यस्य त्रिगुणं पञ्चगुणं वा अधमर्णयोग्यतावशेन दुर्भिक्षादिकालवशेन व्यवस्थितम् । वशिष्ठः,—द्विगुणं हिरण्यम् । त्रिगुणं धान्यम् । धान्येनैव रसा व्याख्याताः । पुष्पफलानि चातुलाष्टतमष्टगुणम् ।

कात्यायनः,—

मणिमुक्ताप्रवालानां सुवर्णरजतस्य च ।
तिष्ठति द्विगुणा वृद्धिः फलकैट्याविकस्य च ॥

कौश्यं कीटप्रभवं आविकं कम्बलादि । बृहस्पतिः,—

हिरण्ये द्विगुणा वृद्धि स्त्रिगुणा वस्त्रकुप्यके ।
धान्ये चतुर्गुणा प्रोक्ता शदवाहलवेषु च ॥

बृहस्पतिः,—

तृणकाष्ठेष्टकासूत्रकिण्वचर्म्मास्थिवर्म्मणाम् ।
हेतिपुष्पफलानान्तु वृद्धिस्तु न निवर्त्तते ॥

एतद्विगुणाधिकं मासि मास्यनर्पणे । मासि मासि ग्रहणे तु द्विगुणाधिकमपि बहुकालेन वर्द्धते । तथा पुरुषान्तरसञ्चाराद्विनाधिकवृद्धौ न दोषः । सकृदाहितेति मनुवचनात् ।

याज्ञवल्क्यः,—

[1]बहुवासकृतां वृद्धिं सर्व्वे सर्व्वासु जातिषु ।

स्वयमेतदशीतिभागन्यूना ततोऽप्यधिका वा धनिकाधमर्णाभ्यां कृतसबन्धके वर्द्धते न वा तदा तामेव वृद्धिं विदुः । अन्यच्च न्यूनग्रहणे न दोषः । अधिकस्यात्मकृतत्वेऽपि ग्रहणे न दोषः । अशीतिभागं द्विकशतं वा गृह्णानो न भवत्येव किल्बिषीति वचनात् ।

तथा कृतवृद्धिः । कात्यायनः,—

कृत्वोद्धारमदत्वा यो याचितस्तु दिशं व्रजेत् ।
ऊर्द्धं मासत्रयात् तस्य तदर्द्धं वृद्धिमाप्नुयात् ॥

(१) मुद्रितयाज्ञवल्क्यस्मृतौ न दृश्यत एष श्लोकार्द्धः । (ĀnandāÇrama series.)

पथि गृहीत्वा यो मूल्यमदत्वैव दिशं व्रजेत् ।
ऊर्द्धं मासत्रयात् तस्य तद्धनं वृद्धिमाप्नुयात् ॥
निक्षेपं वृद्धिशेषञ्च क्रयं विक्रयमेव च ।
याचमानो न चेत् दद्याद् वर्द्धते पञ्चकं शतम् ॥
यो याचितकमादाय तमदत्वा दिशं गतः ।
ऋतुत्रयस्योपरिष्टात् धनं वृद्धिमवाप्नुयात् ॥

अथाग्राह्या वृद्धिः ।

याज्ञवल्क्यः,—

दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम् ।
[1]मध्यस्थस्थापितस्यास्य वर्द्धते न ततः परम् ॥

नारदः,—

पण्यमूल्यं भृतिन्यासो दण्डो यच्चाभिहारिकम् ।
वृथादानाक्षिकपणा वर्द्धन्ते नापि वर्द्धिताः ॥

आभिहारिकं छलेन । आक्षिकं द्यूतोत्थम् ।

कात्यायनः,—

धर्म्मांशन्यासवद्द्यूतपणमूल्येन सर्व्वदा ।
विशुल्केन च वृद्धिः स्यात् प्रातिभाव्यागतेषु च ॥

(१) मुद्रितयाज्ञवल्क्ये,—मध्यस्थस्थापितं तत्स्यात् वर्धते न ततःपरम् । ĀnandāÇrama series व्यवहाराध्यायः ऋणादानप्रकरणम् ।

सम्वर्त्तः,—

न वृद्धिः स्त्रीधने लाभे निक्षेपे च तथा स्थिते।
सन्दिग्धे प्रातिभाव्ये च यदि न स्यात् स्वयं कृतः॥

याज्ञवल्क्यः,—

गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते।

अथ गर्हिता वृद्धिः।

मनुः,—

नातिसंवत्सरीं वृद्धिं न चादृष्टां पुनर्हरेत्।
चक्रवृद्धिर्न च ग्राह्या कारिका कायिका च या॥

मासमारभ्य संवत्सरपर्य्यन्तं वृद्धिनिर्णय उत्तमर्णेन कर्त्तव्यः। अधिकमधमर्णे चेच्छया। संवत्सरादूर्द्धमपि वृद्धिं दास्यति यदि मया ऋणं देयमिति समयो न कर्त्तव्य इत्यर्थः। एवञ्च भूम्यादौ बन्धककरणे समयसमाचारो लाभमूल एव। न चादृष्टां शास्त्रेणा-निरूपितामशीतिभागाधिकां स्वयं कृतामपि न गृह्णीयात्।

याज्ञवल्क्यः,—

(१)वृद्धेर्वृद्धिश्चतुर्वृद्धिः प्रतिमासं तु कालिका।
इच्छाकृता किरिका स्यात् कायिकाकायकर्म्मजा॥

नारदमते—अशीतिभागस्य प्रतिदिनं व्यवस्थां कृत्वा दिने

(१) मुद्रितयाज्ञवल्क्ये न दृश्यत एष श्लोकः Ānandāçrama series.

दिने ग्रहणं कायिकेत्युक्तम्। एतेन मासवृद्धिरपि पीड़या प्रति-मासमवश्यं न ग्राह्या। किन्त्वधर्म्मत्वाच्छन्देनेत्युक्तं भवति।

मनुः,—

धर्म्मेण व्यवहारेण छलेनाचरितेन च।

धर्म्मेण सत्यबलेन व्यवहारेण साक्ष्याद्युपन्यासेन। छलेन उत्सवादिव्याजेन। अलङ्करणादिग्रहणात्। आचरितेन अभो-जननिगड़बन्धनादिना।

याज्ञवल्क्यः,—

हीनजातिं परिक्षीणमृणार्थं कर्म्म कारयेत्।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्॥

अधिकं विज्ञानेश्वरनिबन्धादावनुसन्धेयम्।

इति कुसीदवृत्तिप्रकरणम्।

कुसीदवृत्त्यसम्भवे पाशुपाल्यम्। मूल्यं गृहीत्वा गोमहिषी-जातिरक्षणम्। गोषु विशेषः। शङ्खलिखितौ—गां रक्षेत्। तासु पीतासु पिबेत्। तिष्ठन्तीषूपविशेत्। न स्वयमुत्थापयेत्। शनै-रार्द्रशाखया पृष्ठतोऽभिहन्यात्। नातीर्थे न विषमे नाल्पोदके अवतारयेत्। बालवृद्धरोगार्त्तश्रान्तमुपासीत शक्तितः। प्रतिकारं कुर्य्यात्। गवामेषधर्म्मोऽन्यथाभिप्लवः। ब्रह्मपुराणे,—

उन्मार्गगां तर्जयेत् तां चौरवृत्त्योत्थविल्वजैः।
हे श्रीमातर्मां पाहि वत्सायेति ब्रुवन् वचः॥

गोब्राह्मणार्थे संग्रामे निहतः शङ्करं पदम् ।
गोपकश्चेन्नरो याति किं पुनर्ब्राह्मणादयः ॥

इति पाशुपाल्यम् ।

अथात्यन्तापद्वृत्तयः ।

तत्र न वृत्तिसङ्करं कुर्य्यादिति वृत्तिसङ्करनिषेधातिक्रमेणापि वर्त्तनम् । न च क्षत्त्रादिपरवृत्तिपरस्य प्रतिग्रहालाभे योगानौचित्याद् वृत्तिसङ्करनिषेधः सद्वृत्तिकाले न्यायप्राप्तकुवृत्तिनिषेधानुवाद इति वाच्यम् । अतोऽन्यतमया वृत्त्या वर्त्तयन्नित्यनुवादायोगात् । किन्तु विपत्तौ नियमान्तरवदयमपि नियमस्त्याज्य एव । तथाच गौतमः,—सर्व्वथा वृत्तिरशक्तौ । सर्व्वथा प्रतिषिद्धवृत्तिसङ्करादिभिरिति लक्ष्मीधरः । यच्छङ्खलिखितौ,—नान्तरितां नाविशिष्टां नाधिकां नासमां न हीनां न कुत्सितां नानर्थकरीं वृत्तिं लिप्सेत् । अन्तरिता व्यवहिता । यथा क्षत्रियस्य शूद्रवृत्तिः । विशुद्धासम्भवेऽविशुद्धा प्रतिग्रहरूपा । अधिका तूत्कृष्टवर्णसम्बन्धिनी । असमा अवश्यभृत्यभरणासम्बन्धा । हीना वर्णसम्बन्धिनी । कुत्सिता गर्हिता चौर्य्यवर्ज्जिता । अनर्थकरी अहिता । हारीतः,—अपरे श्ववृत्तिश्चिकित्सितम् । उपपतिवृषवेश्योपजीवनम् । वणिक् किरटकवार्द्धुषिकौ । अनृता कितववृत्तिः । विवादप्रेष्यवृत्तिस्तार्किकवृत्तिः । राजपौरुषादिभिर्स्जीवनं वकवृत्तिः परस्वापहरणं स्तेयवृत्तिः । बधबन्धोपजीवनप्रभृतयश्चैताः किल्विषवृत्तयो भवन्ति । किल्विषवृत्तयो निरयानुशिष्टाः पापयोनिषु जायन्ते । वृषवेश्योपजीवनं गोषु वृषदानेन मूल्यग्रहणम् । वणिक् पण्योपजीवनम् । किरटो घृतादिविक्रयी । निषिद्धवृद्ध्युपजीवी वार्द्धुषी । एतत्त्वनृतवृत्तिः । कलहेन जीवनं विवादवृत्तिः । सेवया प्रेष्यवृत्तिः । हेतुवादजीवनं तार्किकवृत्तिः । राजभयदर्शनेन उत्कोचग्रहणं राजपौरुष्यम् । देवलः,—

चिकित्सां ज्योतिषं रूपं शकटं तिलपातनम् ।
सुरातुलाञ्च नाजीवेत् पुत्राचार्य्यत्वमेव च ॥

रूपं अर्जनार्थं शरीरशोभाकरणम् । शकटं वाहनान्मूल्यदानेन । सुरा विक्रयेण । परस्य द्रव्यस्य क्रयादिकालोत्तलनया जीवनं तुला । पुत्राचार्य्यत्वम् अध्याप्य पुत्रान् धनग्रहणम् । मनुः,—

नेहेतार्थं प्रसङ्गेन न विरुद्धेन कर्म्मणा ।
न कल्पमानेष्वर्थेषु नान्त्यामपि यतस्ततः ॥

प्रसङ्गेन गीतवाद्यादिना । यतस्ततोऽभिशस्तपतितादेः । अतिकष्टायामप्यापदि एतान् न कुर्य्यादित्यर्थः । अतिकष्टापद्दुर्भिक्षादौ सामान्यानुज्ञातं सर्व्वमेव कर्त्तव्यम् । किन्तु विशेषेण यस्यानुज्ञा तदसम्भवे पूर्व्वोक्ताः कुवृत्तयः ।

अथ विशेषविहिताः।

अत्र मनुः,—

विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः।
[1]धृतिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः॥

विद्या गारुड़ादिविद्या। शिल्पं चित्रादिकर्म्म। भृतिर्वेतनम्। कर्म्मकरणार्थम्। सेवा प्रसिद्धा। धृतिर्धैर्य्यम्। गर्हितकृषिवाणिज्यकुसीदानामत्र निर्द्देशः। बृहस्पतिः,—

सेवा गोशकटारामयाच्ञावृत्तिर्वणिक् कृषिः।
अनूपं पर्व्वतो राजा विपत्तौ जीवनानि तु॥

अनूपं जलप्रायो देशः। शालूकाद्याहरणेन। राजा सर्व्वप्रकारवृत्त्यसम्भवे अशास्त्रवृत्त्यराजन्यप्रसूतोऽपि प्रतिग्रहेण जीवनहेतुः। छागलेयः,—

शकटं शाकटी गावो जालमस्पन्दनं वनम्।
अनूपं पर्व्वतो राजा विपत्तौ नृप वृत्तयः॥

शाकटी शाकटिकः। एतद्द्वयं धान्यादिवहनमूल्यभावेन। जालं मत्स्यादिहरणेन। अस्पन्दनम् एकत्रावस्थानम्। व्ययाधिकविरहात्। ऋणादिलाभाच्च जीवनं फलमूलाहरणेन। यत्तु हारीतस्मृतौ शकटनिन्दनं तत् सुस्थविषयम्। यथाह युक्तभारमयोगक्षेमपञ्चशून(?)मनो मन्यते। दशशूनं (?) रात्रौ। शतशूनं (?) वर्षासु। तस्मान्न रात्रौ चरेन्न वर्षासु। मासेन किलानोवृत्तिः पतति। धर्म्मविद्योऽग्निदेवातिथिगृहयज्ञोपकरणेनानेनोभवती

(१) मनु reads गिरिर्भैक्ष्यं०।

त्याहुः। शतशून(?)मित्ययन्त्वम्। भारो व्रीह्यादिसमूहः। अयोग्यशाकटिकाधिष्ठितत्वेनायोगक्षेममनः शकटं रात्रौ दशशूनम् (?)। अग्न्याद्युपकरणसमिदाहरणादनेनो निष्पापो भवतीत्यर्थः।

गौतमः,—सर्व्वधातुवृत्तिरशक्तावशूद्रेण तदप्येके प्राणसंशये। तद्वर्णसङ्करोऽभक्ष्यनियमस्तु प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीत। अशक्तौ सर्व्ववृत्त्यसम्भवे अशूद्रेण सेवादि। शूद्रवृत्तिव्यतिरेकेण सर्व्वथा वृत्तिसङ्करादिनापि वृत्तिः। शौद्रमपि प्राणसङ्करे तद्वर्णसङ्करः। शूद्रवर्णसहासनादिनियमवृत्तिरित्यर्थः। अङ्गिराः,—

व्याधितस्य कदर्य्यस्य कुटुम्बात् प्रच्यावितस्य।
अथानङ्गप्रचालस्य भिक्षाचर्य्या विधीयते॥

मनुः,—

तथैव सप्तमं भक्तं भक्तानि षड़नश्नता।
अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः॥
खलात् क्षेत्रादगाराद्वा यतो वाऽप्युपलभ्यते।
ख्यातव्यन्तु तदा तस्मै पृच्छते यदि पृच्छति॥

स्वामिनि पृच्छति वक्तव्यमुपवासत्रयं कृतमलाभे न तेन नीयत इति। इदं चाब्राह्मणात्। अब्राह्मणाद्धरेदिति याज्ञवल्क्यात्। ब्राह्मणयोरपि नित्यकर्म्महीनयोर्हर्त्तव्यम्।

दस्युनिष्क्रिययोश्च स्वमजीवन् हर्त्तुमर्हति।

इति मनुवचनात्।

अधिकारी तु यो यस्य सदस्यस्तस्य कीर्त्तितः।
तस्यापि योत्तमेनैतदकार्य्यं कर्म्मगर्हितम्॥ (?)

इति हारीतवचनं स्वस्थविषयम्। अधिकारः परद्रव्यरक्षणाय व्ययादिकरणेनोपजीवनम्।

याज्ञवल्क्यः,—

आपद्गतः सम्प्रगृह्णन् भुञ्जानोऽपि यतस्ततः।
न लिप्यतैनसा विप्रो ज्वलनार्कसमो हि सः॥

अत्र येषां निषिद्धानां कथञ्चिदनुज्ञातेऽप्यत्यन्तकष्टापदि दोषाभावः। येषां विशेषानुज्ञा नास्ति किन्तु सामान्यानुज्ञा तत्र कियान् दोषः।

तदुक्तं भट्टैः—

एकं विनाप्यनुज्ञानात् क्रियते न्यायसम्भवात्।
क्रियतेऽनुज्ञया चान्यद् विशेषश्च तयोर्महान्॥
सामान्येनाभ्यनुज्ञानाद् विशेषो हि विशिष्यते।
विशेषोऽत्यन्तनिर्दोषस्तोकदोषितरा क्रिया॥

तथा,—

तत्रत्यपापशेषाणामन्ते शौचं विधीयते।
कर्म्मणा येन केनेह मृदुना दारुणेन वा॥
उद्धरेद्दीनमात्मानं समर्थो धर्म्ममाचरेत्।
धर्म्मश्च प्रथमं तावत्प्रायश्चित्तात्मको भवेत्॥
ततस्तेन विशुद्धस्य फलार्थोऽन्यो भविष्यति।

इति नित्याचारप्रदीपे तृतीयभागकल्पे वृत्तिनिर्णयप्रकरणम्।

अथ तृतीयभागे देवतायतनगुरुधार्म्मिकब्राह्मणगृहगमनम्। योगक्षेमार्थमीश्वरसन्निधिगमनञ्च।

अलब्धलाभो योगः। लब्धपरिपालनं क्षेमः। मनुः,—

दैवतान्यधिगच्छेच्च धार्म्मिकांश्च द्विजोत्तमान्।
ईश्वरं चैव रक्षार्थं गुरूणेव च पर्व्वसु॥
अभिवादयेत वृद्धांश्च दद्याच्चैवासनं स्वकम्।
कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात्॥

तथा—

ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते॥
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारस्तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम्॥

वृहस्पतिः—

सांख्यं सामाधिकैः कुर्य्यादुपेयादीश्वरं सदा।

इदं देवायतनादिगमनं मनुना स्नातकव्रतमध्ये गणितम्।

ततोऽन्यतमया वृत्त्या वर्त्तयन् स्नातको द्विजः।
स्वर्गायुष्ययशस्यानि व्रताणीमानि धारयेत्॥

इत्युपक्रम्य वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादित्यादिना स्नातकधर्म्माण्युक्त्वा अन्ते च पुत्रे सर्व्वं समासज्य ब्रह्मध्याननिष्ठो भवेदित्युक्त्वा—

एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ।
स्नातकव्रतकल्पश्च सर्व्ववृद्धिकरः शुभः ॥

इत्युपसंहृत्य—

एतेन विप्रो वृत्तेन वर्त्तयन् वेदशास्त्रवित् ।
व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते ॥

इति फलमुक्तम् । तच्चोपक्रमोपसंहारेण सर्व्वेषां फलोद्देशेन विधानप्रतीतेः । नेहेतार्थान् प्रसङ्गेन इत्यादीनामपि निषेधरूपाणां पर्य्युदासरूपेण प्रसङ्गपदवाच्यगीतवाद्यकरणकधनार्थचेष्टाप्रसङ्गे तदभावसङ्कल्पः कार्य्यं इत्येवं व्रतविधानरूपेण गम्यते । यद्यपि पर्य्युदासत्वेन नोपलक्षणादोषस्तथापि व्रतानीमानि धारयेदिति प्रथमं व्रतस्य विधेयत्वप्रतीतेः । तस्य स्वरूपज्ञयैव उत्तरवाक्यानि त्वन्तरावाक्येभ्यो गृह्यन्ते । यथोच्चै ऋचा क्रियत इत्यादौ प्रथमं त्रयोवेदा अजायन्त इत्येवं वेदानां विधिसम्बन्धप्रतीत्या पश्चात् प्रतीत्य ऋगादिपदं लक्षणावृत्तं कल्पते । विधिमात्रन्तु वाक्याद् गृह्यते । तथेह व्रतसविधेयत्वनिषेधवाक्यानामपि व्रतविधिरूपत्वम् ।

ननु चैवं ब्राह्मणताड़नादौ—

शोणितं यावतः पांशून् संगृह्णाति द्विजन्मनः ।
तावन्त्यब्दसहस्राणि तत्कर्त्ता नरके वसेत् ॥

तथा—

यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्त्तिनः ।
स पर्य्यायेण यातीमान् नरकानेकविंशतिः ॥

इत्यादिरूपेण निषेधापेक्षितनरकादिफलवर्णनमसङ्गतम् । निवृत्तिसङ्कल्परूपव्रतस्य फलार्थाभिधेयत्वेन निषेधाभावे तदतिक्रमे नरकपाताभावात् । तथाच संख्याधिकरणे,—यो ब्राह्मणायावगुरेत् तं शतेन घातयेत् । यः शोणितं कुर्य्यात् यावतः पांशून् गृह्णीयात् तावतः परिसंवत्सरान् स्वर्गान् लोकान् न प्रजानीयात् तस्मान्न ब्राह्मणायावगुरेन्न शोणितं कुर्य्यात् इत्युदाहृत्य निषेधरूपत्वेन निवर्त्तनापेक्षितानिष्टफलत्वेन नरकसाधनत्वं ब्राह्मणावगोरणादिरूपनिषिद्धकर्म्मणो यदुक्तं तदविरुद्ध्यते । यच्च प्रजापतिव्रते नेक्षेतोद्यन्तमादित्यमित्याद्युदाहृत्य स्वरूपेणानीक्षणसङ्कल्पे विधेय उक्तः तत्र विपर्य्यये नरकपाताश्रवणादेव ता हैनसा युक्तो भवतीति फलश्रवणादेव तथोक्तम् । एवमिहापि यत्र निषेध अनिष्टफलश्रवणं नास्ति तत्रास्तु नानोपक्रमोपसंहारयोर्व्रतरूपप्रतीतेः ।

स्नातकव्रतकल्पश्च सह वृद्धिकरः परः ।
अनेन विप्रो वृत्तेन वर्त्तयन् वेदशास्त्रवित् ॥
व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते ।

इति फलश्रवणाच्च पर्य्युदासरूपेण निवृत्तिसङ्कल्परूपस्य व्रतस्य विधानम् । नरकपातावनिष्टपातश्रवणस्थले कथं पर्य्युदास इति चेत् उच्यते यथाग्निहोत्रदर्शपौर्णमासपशुसोमादेः श्रुतौ तत् तत् फलावनिहितस्य यजनादेश्च धनप्राप्तिरूपेष्टफलार्थस्य यावज्जीवमग्निहोत्रं जुहुयादित्यादिविधानात् पृथगेव फलार्थित्वं याजनादौ तु नियमस्यैव स्नातकव्रतत्वम् । किम्बहुना मेहनादौ

देशकालदिङ्मुखादिनियमस्यापि स्नातकव्रतत्वम्। एवं निषेधत्वेनान्यत्र नरकपातादिफलत्वेऽपि ब्राह्मणावगोरणराजप्रतिग्रहादीनां संयोगान्तरे चेह स्नातकव्रतरूपत्वमपि। यथा सत्यवदनस्यानृतवदननिषेधसङ्कल्पस्यापि स्नातकव्रतत्वम्। दर्शपौर्णमासादिप्रकरणपाताच्च असत्यवदनप्रतिषेधस्य धर्म्माङ्गत्वम्। तदुक्तं विधिर्वा संयोगान्तरादिति। अनृतवदने दोषश्रवणाच्च पृथगनृतवदनस्य निषिद्धत्वं विधिसंयोगभेदादेव तत्र प्रायश्चित्तभेदवत्। इहापि ब्राह्मणावगोरणाभावसङ्कल्पातिक्रमेण नरकपातफलनिषेधातिक्रम प्रायश्चित्तम्। गुरुः स्नातकव्रतलोपप्रायश्चित्ती च लघुद्रव्यकम्

स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्।

इति विधानात्। अतएव

यत्कर्म्म कुर्व्वतोऽस्य स्यात् परितोषोऽन्तरात्मनः।
तत्प्रयत्नेन कुर्व्वीत विपरीतं विवर्जयेत्॥

इत्यन्तमनुवचने आत्मतुष्टेः पुनर्वचनं स्नातकव्रतत्वज्ञापनार्थमिति लक्ष्मीधरः। अत्र स्नातकव्रतलोपे प्रायश्चित्ताम्नानादेवावश्यकर्त्तव्यतालाभात् अवश्यकर्त्तव्यस्य काम्यफलार्थत्वे विरोधात्। स्वर्गायुर्यशो ब्रह्मलोकादीनामर्थवादोपस्थितत्वे ह्यपि न फलत्वं किन्तु स्तुतिमात्रोपयुक्तं नित्यकर्म्मान्तरवत् पापक्षय एव फलं सत्त्ववृद्धिपदेनात्मपापक्षयस्य विवक्षितत्वादपेतकल्मष इति च व्यक्तमभिधानात्। तत्तद्विधिभेदाच्च प्रत्येकमेव व्रतत्वम्। व्रतानीति बहुवचनाच्च न राजसूयवदेकप्रयोगत्वम्। अतएव क्रमादरः। यथाकालमेव विध्यन्तरानुसारादनुष्ठेयः।

अथवा येषां बलवता प्रमाणेन निषेधरूपत्वं गम्यते स्नातकव्रतकाण्डान्तःपातित्वेऽपि तासां पृथगेव निषेध्यत्वं यथा दर्शपौर्णमासप्रकरणपठितानामपि पूपानुमन्त्रणादीनामुत्कर्ष इति।

अतएव—

वारिदः कृषिमाप्नोति सुखमक्षयमन्नदः।

इत्यादेः पृथक् फलार्थं विहितस्य दानस्य स्नातकव्रतत्वम्। तथासति सर्व्वदा दानानां प्रत्यहमकरणे दोषापत्तेः। किन्तु धनत्वेन किञ्चिदेव दानं स्नातकधर्म्मः। एकस्मिन्नेव दत्ते स्नातकव्रतमनुष्ठितं भवति। तत्र मानसकायिकदशेन्द्रियद्वारकप्रवृत्तीनां तद्द्वारकद्वादशविधप्रसङ्गनिवृत्तानां भेदाच्च मानससङ्कल्परूपं व्रतं द्वादशविधं भवति। तत्र मानसं यज्ञदानपूर्त्ततपोध्यानभेदात् पञ्चविधम्। निवासभोगस्नानसङ्करवर्जनभेदेन चतुर्व्विधम्। कायिकं प्रतिग्रहगुरुशुश्रूषादिपाणिजं गमनागमनादिचेष्टादिकं पादिकं मेहनसम्बन्धि पायुजं मूत्रोत्सर्गब्रह्मचर्य्यादिसम्बद्धमौपस्थकं घ्राणमाघ्रेयात् घ्राणं भक्ष्याभक्ष्यं पेयापेयं रासनिकं अवलोकनीयावलोकनं चाक्षुषं स्पृश्यस्पर्शस्त्वाचिकः श्रव्यश्रवणं श्रौतिकमिति। तथाच—

एकादशेन्द्रियैः पापं यत्कृतं वैश्यमानवैः।

इति पद्मपुराणे। गीतायाम्—

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
ये जनाः कर्म्म कुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥

मनुः—तच्च मानसे यज्ञादि।

व्यासः,—

प्रधानं वैदिकं कर्म्म गुणभूतमथेतरत्।
गुणनिष्ठोऽतिप्रमाणं बाधयन् यात्यधोगतिम्॥

गुणनिष्ठः सत्याचारनिष्ठः। अतिप्रमाणं वेदः। मनुः,—

अग्निहोत्रञ्च जुहुयादाद्यन्ते द्युनिशोः सदा।
दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि॥
सस्यान्ते नवसस्येष्ट्या तथर्त्त्वन्ते द्विजोऽध्वरैः।
पशुना ह्ययनस्यादौ समान्ते सौमिकैर्मखैः॥

ऋत्वन्तेऽध्वरैश्चातुर्मास्यैः।

याज्ञवल्क्यः—

कर्त्तव्याऽग्रयणेष्टिश्च चातुर्मास्यानि चैव हि।
एषामसम्भवे कुर्य्यादिष्टिं वैश्वानरीं द्विजः॥
त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः।
प्राक् सौमिकीः क्रियाः कार्य्या यस्यान्नं वार्षिकं भवेत्।

वैश्वानरीं प्रकृत्य मनुः,—

क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे।

वशिष्ठः,—अवश्यं ब्राह्मणोऽग्नीनादधीत दर्शपौर्णमासाग्रयणेष्टिचातुर्मास्यपशुसोमैश्च यजेत्। नैयमिकं ह्येतादृशं संस्तुतञ्च नित्यमेकं नित्यं ऋणसंस्तुतं जायमानो वै ब्राह्मण इति सोमाकरणे ऋणस्तुतिः। देवलः,—हुतः अहुतः प्राहुतः शूलगवः वलिहरणं प्रत्यवरोहणमष्टकाहोमश्चेति प्राक् संस्थाः सप्त अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासावाग्रयणमयनयज्ञश्चातुर्मास्यानि सौत्रामणिरिमा हविर्यज्ञसंस्थाः सप्त अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोड़शी वाजपेयोऽतिरात्रो आप्तोर्याम इति इमाः सोमसंस्थाः सप्त। एकविंशतिविधो यज्ञाध्वरो वेदोक्ता वाजिमेधराजसूयपौण्डरीकगोसवादयो महायज्ञाः। एतावदिति कालमुद्दिश्य यज्ञानुष्ठानं सत्रम्। पक्कापक्कान्नेन पञ्चयज्ञप्रवृत्तिर्हुतम्। देवेभ्यो होमः स्मार्त्तेऽग्नौ प्रहुतो ब्राह्मणाय पक्कान्नदानमहुतो बलिहरणं शूलगवः स्मार्त्त एव। पुंगवः पशुयागः। बलिहरणं सर्पबलिहरणम्। प्रत्यवरोहणं मार्गशीर्षप्रत्यवरोहणमित्याद्युक्तम्। एतावदिति द्वादशरात्रादिसहस्रदिनपर्य्यन्तं कालमपेक्ष्य विहितं सत्रमित्यर्थः। एवं प्रकारेण यज्ञस्य वृत्तिः पञ्चपदा पञ्चप्रकारा प्राक्संस्था हविर्यज्ञसंस्थाः सोमसंस्था महायज्ञाः सौत्रामणी चेति। हारीतेन यज्ञप्रकारान्तरेण यज्ञसंस्था दशहोमः अष्टकानुष्ठानं पञ्चादिकरणं अमावास्यादिश्राद्धं श्रवणाकर्म्म आग्रयणक्रिया आश्वयुजीकर्म्म। अथैमान्यजस्राणि भवन्तीत्युपक्रम्य बौधायनेन प्रतिवसन्तसोमपर्य्यन्तं दर्शिताः। तथा जावालेनाग्निहोत्रदर्शपौर्णमासाग्रयणचातुर्मास्यपशुबन्धसोमानुक्त्वा इष्ट्या युक्तो न संशय इत्युक्तम्। विष्णुः,—

नास्त्ययज्ञस्य लोको वै नायज्ञो विन्दते सुखम्।
अनिष्टयज्ञोऽपूतात्मा त्रस्यति चलपर्णवत्॥
यजमानस्य ये निन्दां प्रवदन्त्यबुधा जनाः।
यज्ञाषोढ़न्तु ते तस्य पापं गृह्णन्त्यचेतसः॥

यज्ञाषोढ़ं पापं यज्ञवैराग्यरूपम्। तथा प्रायश्चित्तविषये

गौतमः,—पुनस्तोमेनेष्ट्वा चरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां येऽश्वमेधेन यजन्तेऽग्निष्टुताऽभिशस्यमानं याजयेदिति च। वशिष्ठः,—

वैश्वानरीं व्रतपतिं पवित्रेष्टिं तथैव च।
रुद्रावृत्तौ प्रयुञ्जानः पुनाति दश पूरुषम्॥

मनुः,—

पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः।
न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कदाचन॥
प्राजापत्यमदत्त्वाश्वमग्न्याधेयस्य दक्षिणाम्।
तत्राहिताग्निर्भवति ब्राह्मणो विभवे सति॥

तथा—

रथं हरेदथाध्वर्युर्ब्रह्माधाने च वाजिनम्।

इति। अत्राग्न्याधाने—

अश्वस्य ब्रह्मणे दानं केषाञ्चिच्छाखिनामिति।

व्याख्यातेनान्यशाखिनामश्वस्य विभाज्य नयनमेवच। हारीतः,—असद्द्रव्यप्रणीतो यज्ञः स्रवति अनार्त्विक्प्रणीतो व्यथते अविद्यप्रणीतो नावकः सङ्कीर्णप्रणीतोऽसिद्धार्थोऽकृतज्ञोऽतेजस्कः विधिविहीनो यातयामः अध्रुवः सोपधोऽल्पफलोऽन्नद उपदस्यत्यदक्षिणोऽनृतः एते यज्ञस्योपसर्गाः। यैरुपसृष्टो यज्ञोऽनावुको भवति असद्द्रव्यं असद्वृत्त्यर्जितं द्रव्यं तद्द्रव्यकृतः स्रवति न फलति अनर्त्विजः यज्ञानुष्ठानज्ञानरहित – ऋत्विक् कृतः अविद्ययजमानप्रणीतो नावकः। नास्ति अवको रक्षको यस्य।

सङ्कीर्णः पापकृत् तत्प्रणीतो निष्फलः। अकृतज्ञोऽङ्गहीन अतेजस्कः फलातिशयासमर्थः। विधिहीनः इतिकर्त्तव्यताहीनः। अध्रुवः अल्पकालफलदः। सोपधः दृष्टकीर्त्त्यर्थमनुष्ठितः। अन्नदः चेत्वान्नं दीयते स उपदस्यति क्षीणो भवति। अदक्षिणः अनृतः मिथ्या भवति। मनुः,—

ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते।
ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः॥

छागलेयः,—

ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते।
दाता तत्फलमाप्नोति कर्त्ता च नरके वसेत्॥

इदं च यज्ञानुष्ठानार्थमेव शूद्रात् प्रार्थनात् पूर्व्वग्रहणे।

न यज्ञार्थं धनं शूद्राद् विप्रो भिक्षेत—

इति भिक्षानिषेधात्। अयाचितस्य तु देवपित्रर्थे अन्यदित्यप्रत्याख्येयत्वोक्तेः। एवं प्रतिग्रहादिरूपेण वृत्त्यर्थं शूद्रार्थं शूद्राद् ग्रहणे ततो यज्ञकरणेऽपि नायं दोष इति भाव्यम्। अतएव—

यज्ञार्थं लब्धमददद्भासः काकोऽपि वा भवेत्।

इति यज्ञार्थमेव गृहीतस्य धनस्यानुपयोगे दोषः। हारीतः,—योऽन्वय इत्युक्त्वा यजति महान्तं वाक्रान्तं संवीक्ष्य स्वल्पेन कृतेध्या न सर्वमुपयुनक्ति तत्र त्रैधातवीया प्रायश्चित्तिः। तथा उत्सृज्याग्निं प्रवसन् प्रवत्स्यन् वा वैश्वानर्य्या यजेत। अयाज्यं याजयिष्यन् अप्रतिग्राह्यस्य प्रतिग्रहीष्यन् वैश्वानर्य्या यजेत। तथा अभिशस्तोऽभिद्रोह अग्नावारुण्या यजेत। अभिद्रोहो गुरुमित्राद्यपकारी

आरण्ययज्ञस्य तु दैवाद् दक्षिणार्थद्रव्यासम्भवे दक्षिणाद्रव्यं यथानिर्व्वाहम्। तत्र प्रकारमाह।

मनुः,—

यज्ञश्चेत् प्रतिरुद्धः स्यादेकांशेनैव यज्वनः।
ब्राह्मणस्य विशेषेण धार्मिके सति राजनि॥
यो वा वैश्यो बहुपशुर्हीनक्रतुरसोमपः।
कुटुम्बात् तस्य तद् द्रव्यमाहरेद् यज्ञसिद्धये॥
आहरेत् त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः।
नहि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः॥
योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः।
तयोरपि कुटुम्बाभ्यामाहरेदविचारयन्॥
आदाननित्याच्चादातुराहरेदप्रयच्छतः।
तथा यशोऽस्य प्रथते धर्म्मश्चैव विवर्द्धते॥

प्रतिरुद्धः विलम्बितः। आहरेत् तेन दीयमानमपि तदङ्गभूतं द्रव्यं तस्माद् गृह्णीयात्। वैश्यादलाभे शूद्रादपि बलादाहरेत। तदीयधनस्य सर्व्वथा यज्ञानुपयुक्तत्वेनोक्तविधिना यज्ञार्थं हरणेऽप्यदोष इत्यर्थः। शूद्रादलाभेऽन्योपि यः शतगुः सन्नाहिताग्निः सहस्रगुर्वा नासोमपस्तयोर्गृहाद्धर्त्तव्यम्। तयोरप्यलाभे यः प्रत्यहमर्जनेन धनं सञ्चिनोति न किञ्चिद्दानादिना व्ययं करोति तद्गृहादिकं साङ्गं कुर्य्यात्। धार्म्मिके सति राजनीति सर्व्वत्र सम्बद्ध्यते। अधार्म्मिको राजा कदाचिदेवम्विधं शास्त्रमज्ञात्वा कदाचिद् दण्डयेन्निवारयेद्वा। गौतमः,—द्रव्यादानं विवाहसिद्ध्यर्थं धर्म्मान्ते प्रसङ्गे च। विवाहकालातिक्रमशङ्कया धर्म्मान्तस्याग्निहोत्रादेर्लोपप्रसङ्गे द्रव्यादानम्। शूद्रादिभ्यो बलेन द्रव्यमादेयमित्यर्थः। अङ्गिराः,—

खलक्षेत्रगतं धान्यं वापीकूपगतं पयः।
अभोज्यादपि तद्ग्राह्यं यच्च गोष्ठगतं पयः॥
विहितान्नेषु यज्ञेषु हविष्याग्रयणेषु च।
इष्टिं तत्र मर्तीं (?) कुर्य्यात् सुनृतं न तु लोपयेत्॥

अभोज्यशूद्रादेर्यज्ञविच्छेदशङ्कया प्रतिग्रहः कर्त्तव्य इत्यर्थः। एवं च यज्ञानुष्ठानं ऋषियज्ञ इत्यादिना मनूक्तम्। तथा इन्द्रियवृत्तिरोधरूपेण वाचि प्राणहोमेन ज्ञानेन वा पञ्चयज्ञानुष्ठानं एतानेव महायज्ञानित्यादिना मनूक्तं कर्त्तव्यम्।

इति यज्ञरूपस्नातकप्रकरणम्।

अथ दानम्।

मनुः,—

शक्तितो यतमानेभ्यो दातव्यं गृहमेधिना।
संविभागश्च भूतेभ्यः कर्त्तव्योऽनुपरोधतः॥

तथा—दानधर्म्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम्।

इति दानं स्नातकव्रतम्।

तथा—वारिदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्॥

भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः।

गृहदोऽग्राणि वेश्मानि रूपदो रूपमुत्तमम्॥

वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः।

अनडुहः श्रियं पुष्टां गोदो व्रध्नस्य पिष्टपम्॥

यानशय्याप्रदो भार्य्यामैश्वर्य्यमभयप्रदः।

धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म शाश्वतम्॥

सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते।

याज्ञवल्क्यः,—

हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता।

सकांस्यदोहा दातव्या क्षीरिणी गौः सदक्षिणाः॥

दशसौवर्णिके शृङ्गे खुराः पञ्चपलानि तु।

इति स्मृत्यन्तरोक्तं ग्राह्यं साकाङ्क्षत्वात्।

स्मृतिशास्त्रविकल्पः स्यादाकाङ्क्षापूरणे सति।

इति न्यायात् कांस्यपात्रमुधःसमानं तत्स्थाने धार्य्यम्। कांस्यदोहमिति स्मृत्यन्तरात्। ताम्रपृष्ठादिकं विकल्पेन।

तथा—

दातास्याः स्वर्गमाप्नोति वत्सरान् रोमसम्मितान्।

कपिला चेत् तारयति भूयश्चासप्तमं कुलम्॥

तथा—

सवत्सारोमतुल्यानि युगान्युभयतोमुखी।

---

(१) सुद्रितयाज्ञवल्क्ये,—सकांस्यपात्रा ० Anandāçrama series आचाराध्यायः दानप्रकरणम्।

दातास्याः स्वर्गमाप्नोति पूर्व्वेण विधिना ददत्।

पूर्व्वविधिः सुवर्णशृङ्गादिः। वत्सरोमसहितगोरोमसमानयुगमितस्वर्गः फलम्। गोदानानुवृत्तौ विष्णुः—शतप्रदो ब्रह्मलोकम्। महाभारते—

गवां सहस्रदः प्रेत्य नरकं न प्रपद्यते।

वृद्धवशिष्ठः,—

यत्किञ्चित् कुरुते पापं जन्मप्रभृति मानवः।

अपि गोचर्म्ममात्रेण भूमिदानेन शुद्ध्यति॥

गवां शतं वृषश्चैको यत्र तिष्ठत्ययन्त्रितः।

एतद्गोचर्म्ममात्रं हि प्राहुर्व्वेदविदो जनाः॥

तथा—

दशहस्तेन दण्डेन दशवंशान् समन्ततः।

पञ्च वाभ्यधिकं दद्यादेतद्गोचर्म्ममुच्यते॥

पञ्च वाभ्यधिकमेकस्मिन् पार्श्वे। वृहस्पतिः,—

अपि गोचर्म्ममात्रेण सम्यग्दत्तेन मानवः।

धौतपापो विशुद्धात्मा स्वर्गलोके महीयते॥

दशहस्तेन दण्डेन त्रिंशद्दण्डा निवर्त्तनम्।

दश तान्येव गोचर्म्म ब्राह्मणेभ्यो ददाति यः॥

राजाधिराजो भवति तद्धि दानमनुत्तमम्।

नगरञ्च तथा दत्वा राजा भवति भूतले।

कर्पटं खेटकं वापि ग्रामं वा शस्यशालिनम्॥

निवर्त्तनशतं वापि तदर्द्धार्द्धमथापि वा॥

अपि गोचर्ममात्रं वा दत्वोर्वीं सर्वभाग् भवेत्।
योजनार्द्धार्द्धविष्कुम्भमष्टभागायतं पुरम्॥

तथा—

वाञ्छन्ति पितरोऽप्येवं सर्वलोकव्यवस्थिताः।
यदस्मत्कुलजः कश्चिद्द भवेदवनिदः क्वचित्॥

इति वचनात् पितृतारणार्थं भूमिदानम्। नामास्याः प्रियदत्तेति वचनात् प्रियदत्तामितिदानवाक्यम्। यमः,—रुक्मदः सर्वमाप्नोति। सर्वफलं पर्य्यायेण।

नन्दिपुराणे,—

कुञ्चलाः पञ्च मासास्तु मासैः षोड़शभिः स्मृतम्।
सुवर्णमेकं तद्दानाद्द दाता स्वर्गमवाप्नुयात्॥

विष्णुधर्मोत्तरे,—

दत्वा कुञ्चलमात्रन्तु नरः पापात् प्रमुच्यते।
दत्वा तु माषकं तस्य फलं पुण्यमवाप्नुयात्॥

तथा त्रिसन्ध्यं सुवर्णदानात् सर्वपापक्षयः। आग्नेयपुराणे,—

पुष्ये वा जन्मनक्षत्रे विषुवे अयनेषु च।
ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये॥
यानमश्वमनड्वाहं हेम रूपमणी तिलान्।
ये प्रयच्छन्ति पापेषु नियताः सर्वदा मुने॥
न तेषां भैरवः पुण्याहर्त्तैषां दानमुत्तमम्।

सम्बर्त्तः—रूप्यदो रूप्यमुत्तमम्।

रत्नानाञ्च प्रदानेन राजेवेह प्रजायते।

तथा,—तिलपूर्णन्तु यो दद्यात् ताम्रपात्रं द्विजातये।
गुरौ प्रदक्षिणं शक्त्या सर्वपापैः प्रमुच्यते॥
ताम्रपात्रं तिलैः पूर्णं प्रस्थमात्रं द्विजातये।
सहिरण्यन्तु यो दद्यात् श्रद्धावित्तानुसारतः॥
सर्व्वपापविशुद्धात्मा लभतेऽत्र गतिं पराम्।
ताम्रपात्रं दशगुणं जघन्यं परिकीर्त्तितम्॥
द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतम्।
स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत्॥
त्रिगुणं चोत्तमे तद्वत् सुवर्णं दक्षिणेष्यते।

माहात्म्ये,—वैशाखी-पौर्णमासी-चन्द्रसूर्य्यग्रहो माघ्याषाढ़ी-कार्त्तिकी-उत्तरायणं द्वादशी च कृष्णाजिनदानकालः। आहिताग्निः पात्रम्। गोमयोपलिप्ते कम्बलास्तरणम्। तत्र सशृङ्गं सखुरकृष्णाजिनास्तरणम्। दशसौवर्णिकं शृङ्गद्वयं सुवर्णेन दन्तपंक्तिद्वयं मुक्तानेत्रं विद्रुमो लाङ्गूलं कृष्णाजिने तिलद्रोणेनाच्छादनं सुवर्णं नाभौ। पूर्व्वस्यां दिशि घृतपूर्णं कांस्यपात्रं मृन्मयपात्रञ्च। दक्षिणस्यां दिशि क्षीरपूर्णं तत्पात्रद्वयं पश्चिमे दधिपूर्णं तत्पात्रद्वयम्।

यानि चान्यानि पापानि मया लोभात् कृतानि तु।
लोहपात्रप्रदानेन प्रणश्यन्तु ममाशु वै॥

इति मन्त्रेण तिलपूर्णलोहपात्रस्य वामपदे स्थापनम्।

यानि कानीह पापानि कर्म्मोत्थानि कृतानि वै।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा॥

अनेन मन्त्रेण मधुपूर्णकांस्यपात्रं दक्षिणपादे।

परापवादपैशुन्यात् पृष्ठमांसस्य भक्षणात्।
तत्त्वोत्थितञ्च पापं मे ताम्रपात्रात् प्रणश्यतु॥

अनेनोत्कृष्टसुवर्णयुतं ताम्रपात्रं अग्रवामपादे।

कन्यानृतं गवां चैव परदारप्रधर्षणम्।
रौप्यपात्रप्रदानाद् वै क्षिप्रं नाशं प्रयान्तु मे॥

अनेनोत्कृष्टमुक्तायुक्तं रूप्यपात्रं अग्रदक्षिणपादे।

यद्दयजन्मसहस्रेषु कृतं पापं कुबुद्धिना।
सुवर्णपात्रदानात् तन्नाशमीयात् जनार्द्दन॥

अनेन विद्रुमयुतस्वर्णपात्रं मध्ये। वामकर्णे दाड़िमफलं दक्षिणे बीजपूरं खुरचतुष्टयं शृङ्गाटकसर्व्वशाकसर्व्वफलयुतं नवरत्नाद्युत्तमरत्नत्रयेण गन्धैश्चालङ्करणम्। एवं कृष्णाजिनं प्रकल्प्य दातृस्थानाद्बहिश्चम्पकशाखया सहितजलकुम्भं गात्रसम्मार्जनार्थं जीर्णपीतवस्त्रञ्च स्थाप्यम्। ब्राह्मणमग्निमन्तं वस्त्रद्वयेनाच्छाद्य गन्धाद्यैरभ्यर्च्य दद्यात् प्रीयतां वृषध्वज इति पुच्छदेशे प्रतिग्रहः। दक्षिणां दत्वा ब्राह्मणं प्रेष्य मण्डलं कृत्वा तन्मध्ये पूर्व्वस्थापितजलकुम्भेन चम्पकशाखान्तरितेन स्नानं जीर्णपीतवस्त्रेण गात्रसम्मार्जनं अहतवस्त्रद्वयधारणम्। वस्त्रकुम्भयोश्चतुष्पथे प्रक्षेपः। समग्रभूमिदानफलम्। सर्व्वलोकजयकामचारिविमानेनाकाशगामित्वं पितृपुत्रमरणभार्य्यावियोगदुःखानननुभूय कल्पान्तस्वर्गलाभः। स्कन्दपुराणे,—

शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम्।

भूचक्रं तेन दत्तं स्यात् सशैलवनकाननम्॥

महाभारते,—

न तं त्यजन्ति पशवः संग्रामे विजयत्यपि।
पुत्रं श्रियञ्च लभते यच्छत्रं सम्प्रयच्छति॥

बृहस्पत्युक्तम्,—छत्रोपानद्दानमसिपत्रनरकसन्तरणफलम्। विषमसन्तरणफलमुपानद्दानम्। भारते नन्दिपुराणेऽपि गजदानं शक्रलोकभोगपूर्व्वकराज्यदम्। एवमश्वदानं रथदानञ्च। विष्णुधर्म्मोत्तरे महिषदानं यमलोकसुखदम्। महिषीदानं वारुणलोकदम्। सम्बर्त्तः,—

भूताभयप्रदानेन सर्व्वकामानवाप्नुयात्।

रामायणे,—शरणागतरक्षणमश्वमेधतुल्यं तत्त्यागे सर्व्वपुण्यक्षयः। विष्णुधर्म्मोत्तरे,—चक्षुरुत्पाटनभयत्राणे ब्रह्मलोकावाप्तिः। अङ्गच्छेदभयत्राणे रुद्रलोकावाप्तिः। बधबन्धनभयत्राणे भृगुलोकावाप्तिः।

पशूनाञ्च मृगाणाञ्च पक्षिणाञ्च तथा द्विजाः।
तृणद्रुमलतानाञ्च त्राणाद् भवति नाकभाक्॥

तथा,—सर्व्वोपकरणयुक्तगृहदानं कल्पान्तस्वर्गभोगपूर्व्वकराज्यदम्। विष्णुः,—शय्यादाने भार्य्यां प्राप्नोति। विष्णुधर्म्मोत्तरे,—चन्दनदानं सर्व्वपापक्षयदं कुङ्कुमदानं सौभाग्यदं कर्पूरदानं यशःप्रदं अगुरुदानं यशःप्रदम्। ब्राह्मे,—कर्पूरदानं धर्म्मपुरप्राप्तये। विष्णुः,—पुष्पदाने श्रीमान् भवति। मधुघृततैलदानेनारोग्यं प्राप्नोति। तैलामलकपादाभ्यङ्गदानं सम्बर्त्तोक्तं तेजस्वित्व-

सुखित्वाय। स्कान्दे,—पीठासनकाष्ठपादुकादानं यममार्ग-सुखदम्। तैजसपात्रदानं विष्णूक्तं सर्व्वकामदम्। जलपात्रदानं सुखदम्। आग्नेये,—

ब्रह्महत्याकृतं पापमन्नदस्य प्रणश्यति।
पुण्यं यशस्यमायुष्यं तथा पुष्टिविवर्द्धनम्॥

कौर्म्मे,—

आममन्नं गृहस्थाय दत्वाप्नोति परां गतिम्।

नन्दिपुराणे,—

अपि कीटपतङ्गानां शूनां चाण्डालयोनिनाम्।
दत्वान्नं लोकमाप्नोति प्राजापत्यसमां गतिम्॥

अत्रान्नदानं सङ्कल्प्य तन्मूल्यकपर्द्दकदानेऽपि तद्द्वारा तस्यान्न-स्वीकारात् दानसिद्धिर्भवत्येव। केवलं प्रतिग्रहीत्रा जयकाले तदादाय कपर्द्दकेन तण्डुलं गृह्णामीति बुद्धिः कार्य्या। अतएव रामायणे,—श्वेतेन राज्ञाऽन्नदानरूपेणागस्त्याय कङ्कणं समर्पितं तच्च तेन रामचन्द्राय समर्पितमिति प्रवादः।

तथाच यज्ञपार्श्वे,—

द्वात्रिंशत्पणिका गावश्चतुः कार्षापणो वरः। (?)
वृषे षट्कार्षापणिक अष्टावनडुहः स्मृताः॥
दशकार्षापणा धेनुरश्वे पञ्चदशैव तु।
हिरण्ये कार्षापणकाः पणा नव तथाऽधिकाः॥
वस्त्रे कार्षापणश्छागेऽष्टौ पणा द्वादशाविके।
दृष्टमूल्यमथमूल्यं कार्षापणाः स्मृताः॥ (?)

निष्के पञ्चाशदेव स्याद् ध्वजे पञ्चशतानि तु।
पञ्च कार्षापणाः प्रोक्ता दोलायां षड़्रथे रथाः॥ (?)
गृहेऽष्टौ कार्षापणिकास्ताम्रकर्षे पणः स्मृतः।
कांस्यकर्षेण च पण इति मूल्यप्रकल्पना॥
अधिकं कल्पयेन्मूल्यं नोनं वित्तानुसारतः।

इत्युक्तम्। यत्र यज्ञादौ मूल्यकल्पना इति आदिशब्दाद् यद्यपि दक्षिणायामावश्यकप्रायश्चित्तादिदानान्तरप्रारब्धेनानेन मूल्यकल्पना।

ताम्बूलदानं मेधावित्वाय सम्वर्त्तोक्तम्। विष्णुधर्म्मोत्तरे,—प्राणदः सर्व्वमाप्नोति परमान्नेन शश्वत् तृप्तिः। वाराहे,—दधिक्षीरघृतदानं परलोके गोरसपूर्णसत्पात्रप्राप्तये। विष्णु-धर्म्मोत्तरे,—प्रपाणकदाने सर्व्वकामसमृद्धिः। बालक्रीड़णक-दानेऽग्निष्टोमफलम्। शिविकादानेऽग्निष्टोमफलम्। दन्त-काष्ठदाने सौभाग्यम्। मृत्तिकादाने शुचिः। शक्तुदाने तृप्तिः। आरण्यपशुदाने वायुलोकप्राप्तिः। शिल्पिकभाण्डदाने विद्यादान-फलम्। विष्णुः,—तालवृन्तदानेनादुःखित्वम्। वितानकदाने सर्व्वपापक्षयः।

विष्णुधर्म्मोत्तरे,—

वेददानादवाप्नोति सर्व्वयज्ञफलं नरः।
उपवेदप्रदानेन गन्धर्व्वैः सह मोदते॥
वेदाङ्गानां प्रदानेन धर्म्मेण सह मोदते।
सिद्धान्तानां प्रदानेन मोक्षमाप्नोत्यसंशयम्॥

सिद्धान्ताः पञ्चरात्रकापिल-सनत्कुमार-पाशुपतादयः। मीमांसादानं चन्द्रपूरदम्। वैद्यशास्त्रदानमग्निलोकदम्। भक्तिशास्त्रदानं वारुणलोकदम्। नन्दिपुराणे,—विद्यादानमध्यापनं पुस्तकदानञ्च। ग्रन्थनिर्म्माणन्तु न विद्यादानम्। किन्तु एकः शब्दः सुप्रयुक्तः सम्यक्ज्ञातः स्वर्गलोके महीयते कामधुग् भवेदित्यादिफलकम्। परोपकारभूयस्त्वेन फलभूयस्त्वम्। नन्दिपुराणे,—दीपदानादक्षयफलम्।

तथा दीपप्रदो नित्यं सन्तारयति वै पितॄन्।

कार्त्तिके दीपदानं शाश्वतफलम्। विष्णुधर्म्मोत्तरे,—सम्वत्सरतिलदानम्। सम्वत्सरसंज्ञके वर्षे तिलदानम्। दारुदानञ्च महाफलम्। परिसम्वत्सरे यवदानम्। अनुसम्वत्सरे धान्यदानम्। उदावत्सरे रजतदानम्। उत्तरायणे वस्त्रदानम्। तिलदानं दक्षिणायने। वस्त्रदानं शिशिरे इन्धनदानञ्च महाफलम्। वसन्ते स्नानाय विलेपनदानम्। ग्रीष्मे प्रपाणकदानम्। वर्षासु कटुद्रव्यदानम्। शरद्यन्नदानम्।

मेषसंक्रमणे भानोर्मेषदानं महाफलम्।

वृषसंक्रमणे वृषाणाम्। मिथुनसंक्रमणे शयनासनानाम्। कर्कटसंक्रमणे शर्करासक्तुगुड़फाणितखण्डदानम्। उदकुम्भदानम्। सिंहप्रवेशे तैजसपात्रदानम्। कन्याप्रवेशे धूपितवस्त्राणाम्। तुलप्रवेशे धान्यानां मुद्गानाञ्च। वृश्चिकप्रवेशे खड्गादिशस्त्रदानम्। गृहदानञ्च। धनुःसंक्रमणे वस्त्रत्रयदानम्। नौकादियानदानञ्च। मकरसंक्रमणे इन्धनदानम्। वह्निदानञ्च।

कुम्भसंक्रमणे गोग्रासदानम्। मीनसंक्रमणे स्नानीयदानम्। वामनपुराणे,—माघे माधवप्रीत्यै तिलधेनुहोमसाधनकाष्ठेन्धनकम्बलतुलघटीदानम्। फाल्गुने गोविन्दप्रीत्यै व्रीहिमुद्गवस्त्रकृष्णाजिनदानम्। चैत्रे विष्णुप्रीत्यै चित्रवस्त्रशयनासनदानम्। वैशाखे मधुसूदनप्रीत्यै सुरभिगन्धमाल्यदानम्। ज्यैष्ठे त्रिविक्रमप्रीत्यै उदकुम्भचन्दनतालवृन्तव्यजनदानम्। आषाढ़े वामनप्रीत्यै छत्रोपानत्कम्बलदानम्। श्रावणे श्रीधरप्रीत्यै घृतकुम्भक्षीरघृतधेनुफलानाम्। भाद्रपदे हृषीकेशप्रीत्यै पायसमधुसर्पिर्लवणगुड़ोदनदानम्। आश्विने पद्मनाभप्रीत्यै तिलहेमवृषदधिशस्त्रायसदानम्। कार्त्तिके दामोदरप्रीत्यै रजतकनकदीपमणिमुक्ताप्रवालदानम्। मार्गशीर्षे केशवप्रीत्यै खरोष्ट्राश्वतरशकटरथाजीविकदानम्। पौषे नारायणप्रीत्यै प्रासादनगरग्रामखर्व्वटगृहप्राङ्गणोत्तरीयदानम्।

तिथिदानानि। विष्णुधर्म्मोत्तरे,—

प्रतिपद्यथ पुष्पाणां द्वितीयायां घृतस्य च।
तृतीयायान्तु वस्त्राणां चतुर्थ्यां कनकस्य च॥
पञ्चम्यान्तु फलानां वै षष्ठ्यां स्वन्नस्य मानवाः।
सप्तम्याञ्चाप्यपूपानामष्टम्यान्तु गुड़स्य च॥
कुल्माषस्य नवम्यान्तु दशम्यां रजतस्य च।

कुल्माषो राजमाषः।

एकादश्यां सुवर्णस्य द्वादश्यां वसनस्य च।
त्रयोदश्यां सुगन्धानां शितायास्तदनन्तरम्॥

दानन्तु परमान्नस्य पञ्चदश्यां महाफलम् ।
यस्तु कृष्णचतुर्द्दश्यां स्नात्वा देवं पिणाकिनम् ॥
आराधयेद् विप्रमुख्यो न तस्य पुनरुद्भवः ।

शिवमुद्दिश्य ब्राह्मणाय गन्धपुष्पभक्ष्यादिदानम् । स्कान्दे,—अमावास्यायां तिलपात्रत्रयदानं पितृलोके सुखप्रदम् ।

नक्षत्रदानानि । विष्णुधर्म्मोत्तरे,—

कृत्तिकासु सुवर्णस्य दानं बहुफलं स्मृतम् ।
रक्तवस्त्रस्य रोहिण्यां सौम्ये च लवणस्य च ॥
कृशरस्य तथार्द्रायामादित्ये लवणस्य च ।
घृतस्य च तथा पुष्ये चन्दनानां च सर्पभे ॥
गन्धानाञ्च मघायोगे प्रियङ्गोर्भगदैवते ।
आर्य्यम्णे चाप्यपूपानां सावित्रे पायसस्य तु ॥
चित्रायां चित्रवस्त्राणां शक्तूनां वायुदैवते ।
ऐन्द्राग्ने चैव लोहानां मैत्रे माल्यफलस्य च ॥
पुत्रस्य च तथा शाक्रे मूले मूलफलस्य च ।
हिमस्य मधुयुक्तस्य दानमाप्ये महाफलम् ॥
विश्वेश्वरेऽन्नदानस्य श्रवणे वसनस्य च ।
धान्यस्य वासवे विप्रा वारुणे चौषधस्य च ॥
आजे पुराणबीजानां शय्यानां तदनन्तरे ।
गोरसानां तथा पौष्णे आह्वलानां तथाश्विने ।
तिलानाञ्च तथा दानं भरणीषु महाफलम् ॥

वारदानानि । विष्णुधर्म्मोत्तरे,—गुड़ाज्यलवणोपेतसहिरण्या-

पूपदानं सूर्य्यप्रीत्यारोग्यफलम्। सोमवारे पूर्व्वोक्तापूपदानं सौभाग्यदम् । अभ्यङ्गस्नानीयदानं रोगघ्नम् । भौमवारे काष्ठदानाच्छत्रुनाशः । बुधवारे बालेभ्यः क्रीड़णकदानं जीववारे वस्त्रदानं परमपुष्टिदम्। शुक्रवारे रत्युपयोगिगन्धमाल्यवस्त्रादिदानम् ।

अभ्यङ्गं सौरदिवसे दत्वा जीवितमाप्नुयात् ।

विष्णुधर्म्मे,—श्रावणशुक्लपक्षे गोविन्दं स्नापयित्वा सम्पूज्य ब्राह्मणाय गां दद्यात् । गोविन्दप्रीत्यर्थं पौषशुक्लद्वादश्यां गोदानं गोलोकप्राप्तये । आश्विनशुक्लद्वादश्यां जलधेनुदानं जलशायिप्रीत्यै । विष्णुधर्म्मोत्तरे,—चैत्रशुक्लद्वादश्यां तुलघटीदानं धनप्राप्त्यै । मार्गशीर्षद्वादश्यां लवणदानं महाफलम् । माघशुक्लद्वादश्यां दारुदानं फाल्गुने सर्व्वगन्धदानं महाफलम् । एतासु द्वादशीषु क्रमेण पूर्व्वफल्गुनीहस्तास्वातीज्येष्ठामूलाश्रवणापूर्व्वभाद्रपदरेवतीकृत्तिकामृगशिरःपुनर्वसुपुष्याणां यथासंख्ययोगे एतान्येव दानानि महाफलानि । विष्णुधर्म्मोत्तरे,—माघ्यां कृष्णतिलप्राधान्येन श्राद्धकरणे सर्व्वपापक्षयः । फाल्गुन्यां स्वास्तीर्णशयनदाने रूपधनयुतकुटुम्बिनीभार्य्यालाभः । चैत्र्यां पूर्व्वमुपोष्य चित्रवस्त्रद्वयं दत्वा ब्राह्मणान् सन्तर्प्य सौभाग्यं लभते । वैशाख्यां कृष्णाजिनदानं महाफलम् । यमः,—वैशाख्यां सप्तभ्यः पञ्चभ्यो वा विप्रेभ्यो मधुसहितपायसदानं यावज्जीवकृतपापक्षयदम् । दानान्ते प्रीयतां धर्म्मराज इति वदेत्युक्ते प्रीयतां धर्म्मराज इति ब्राह्मणा ब्रूयुः । कौर्म्मे,—घृतान्नमुदकुम्भञ्च ब्राह्मणेभ्यो देयं धर्म्मराज प्रीयतामिति वाचनं भयं न भवति । आदित्यपुराणे,—ज्यैष्ठ्यां

जलदानमश्वमेधफलम् । आषाढ्यामन्नदानेन बहुधनलाभः । श्रावण्यां जलधेनुदानं स्वर्गदम् । प्रौष्ठपद्यां गोदानं महाफलम् । आश्वयुज्यां घृतपूर्णसहिरण्यकांस्यपात्रदानं दीप्ताग्नित्वदम् । तथा प्रदोषसमये लक्ष्मीं पूजयित्वा देवगृहे दीपवृक्षदानम् । नदीपर्व्वत-चतुष्पथश्मशानवेश्मसु विलद्वारेषु च दीपदानं महापुण्यफलदम् । कार्त्तिक्यां चन्द्रवर्णं वृत्तं चतुर्दिगवस्थितदीपचतुष्टयं नवरत्नसप्त-धान्यकर्पूरागुरुचन्दनकस्तुरीयुक्तं च चन्द्रोदयं दत्त्वा यममार्गे सर्व्वभोगसुखलाभः । नदीषु दीपदानं महाफलम् । पौष्यां पूर्व्व-मुपोष्यापरदिने प्रातः श्वेतसर्षपकल्केन उद्वर्त्त्य गव्यघृतकुम्भेन स्नातस्तण्डुलचूर्णादिभिर्विभूषणं कृत्वा सर्व्वधान्यमिश्ररत्नगन्धफल-युतजलेन स्नातः ससुवर्णघृते मुखे वीक्ष्य तं घृतं ब्राह्मणाय दत्वा विष्णुं घृतेन संस्नाप्य पूजयित्वा ब्राह्मणद्वारा होमं कारयित्वा होमकर्त्रे वस्त्रयुगं दक्षिणां दत्वा घृतमर्चितमर्चिताय विप्राय दद्यात् । एवं कृते महती पुष्टिः ।

तथा,—

पौर्णमासीषु चैतासु मासर्क्षसहितासु च ।
एतेषामेव दानानां फलं दशगुणं भवेत् ॥
महत्पूर्व्वासु चैतासु फलमक्षय्यमश्नुते ।

मासर्क्षाणि च मार्गशीर्षमृगशिरःप्रभृतीनि ।

मासर्क्षगतौ यस्यां चन्द्रबृहस्पती सा महती ।

महामाघ्यादिशब्दवाच्या । तस्यां दत्तानि दानानि अक्षय्य-फलानि ।

दृश्येते सहितौ यस्यां दिवि चन्द्रबृहस्पती ।
पौर्णमासी तु महती प्रोक्ता संवत्सरस्य तु ॥

विष्णुधर्म्मोत्तरे,—माघकृष्णद्वादश्यां तिलदानं महाफलम् । श्रवणायोगे विशेषतः ।

विष्णुधर्म्मोत्तरे,—

वैशाखे शुक्लपक्षे तु तृतीयायां द्विजोत्तमाः ।
यद्ददाति नरश्रेष्ठ तत्तदक्षयमश्नुते ॥

रामायणे,—

आषाढ़ी कार्त्तिकी माघी तिथयः पुण्यसंज्ञिताः ।
अप्रदानवतो यान्तु यस्यर्क्षोऽनुमते गतः ॥

मनुः,—

यद् यदिष्टतमं लोके यच्चास्य वर्द्धितं गृहे ।
तत्तद् गुणवते देयं तद्देवायाज्यमिच्छता ॥

तथा,—

यत्किञ्चिदपि दातव्यं याचितेनानसूयता ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥
सान्तानिकं यक्ष्यमाणमध्वगं सर्व्ववेदसम् ।
गुर्व्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनौ ॥
नवैतान् स्नातकान् विद्याद् ब्राह्मणान् धर्म्मभिक्षुकान् ।
निःस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः ॥
एतेभ्योऽपि द्विजाग्रेभ्यो देयमन्नं सदक्षिणम् ।
इतरेभ्यो बहिर्वेदिकृतान्नं देयमुच्यते ॥

सान्तानिकं विवाहर्थिनम् । अध्वगमध्वनीतं तीर्थयात्राद्यर्थम् । सर्व्ववेदसं विश्वजिदादौ दत्तसर्व्वस्वम् । स्वाध्यायार्थी अध्ययनकालनिमित्तम् । उपतापी रोगी । एतेभ्योऽदाने दोषः । तथाच श्रीकृष्णदेहत्यागेन निःश्रीकमर्ज्जुनं प्रति व्यासवाक्यम्—

सान्तानिकादयो वा ते याचमाना निराकृताः ।

इति । एतेभ्योऽत्यन्ताशक्तौ न देयम् ।

बृहस्पतिः,—

कुटुम्बभक्तवसनाद् देयं यदतिरिच्यते ।

मनुः,—

शक्तः परजने दाता स्वजने दुःखजीविनि ।
मध्वापातो विषास्वादः स धर्म्मप्रतिरूपकः ॥

इति । शिवधर्म्मे,—

तस्माद् विभागं वित्तस्य जीवनाय प्रकल्पयेत् ।
भागद्वयन्तु धर्म्मार्थमनित्यं जीवितं यतः ॥

एतेभ्यो याचमानेभ्यः शक्तिसत्त्वेऽदाने दोषः । स्नातकव्रतलोपात् । यत्तु व्यासवचनं—

कुटुम्बं पीड़यित्वापि ब्राह्मणाय महात्मने ।

इति । तदावश्यकातिथ्यादिविषयमिति हेमाद्रिः ।

तत्र दानविधिः । याज्ञवल्क्यः,—

[१]देशे काले च पात्रे च दानं श्रद्धासमन्वितम् ।
पात्रे प्रदीयते यत् तत् सकलं धर्म्मलक्षणम् ॥

(१) मुद्रितयाज्ञवल्क्ये श्लोका एते न दृश्यन्ते ।

शूद्रे समगुणं दानं वैश्ये तु द्विगुणं स्मृतम् ।
क्षत्त्रिये त्रिगुणं प्रोक्तं ब्राह्मणे षड्गुणं स्मृतम् ॥
श्रोत्रिये चैव साहस्रमाचार्य्ये द्विगुणं ततः ।
आत्मज्ञे शतसाहस्रमानन्त्यं चाग्निहोत्रिणि ॥

अत्रिः,—

आचार्य्ये पञ्चरात्राणां सहस्रगुणितं भवेत् ।

पञ्चरात्रं हयशीर्षादि । मनुः,—

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
सहस्रगुणमाचार्य्ये अनन्तं वेदपारगे ॥
अमनुष्ये सर्व्वदानं येषु देयं महाफलम् । (?)

द्विगुणं वर्णशङ्करे ।

श्रीभ्रष्टे चातिरोगार्त्ते दत्तमक्षयमुच्यते ।

इति पठन्ति । शातातपः,—अब्राह्मणाः षट् राजवेतनभृतः निषिद्धवाणिज्यजीवी बहूनां वर्णानां याजकः ग्रामस्य वेतनपूर्व्वकं याजकः ग्रामनगरयोर्भृतिजीवी सन्ध्योपासनहीनश्च । व्यासः,—उपनीतोऽपि यो नाध्यापयति नाधीते स ब्राह्मणब्रुवः । अत्र मनुः,—

न वार्य्यपि प्रयच्छेत्तु वैड़ालव्रतिके द्विजे ।
न वकव्रतिके पापे नाविदविद्धर्म्मवित् ॥

एवं सति पूर्व्वोक्तवचनेषु शूद्रवैश्यक्षत्त्रियब्राह्मणब्रुवादीनां पात्रत्ववचनं प्रीतिदानापेक्षं प्रीतिदायस्य सर्व्वेषां शुद्धधनभाजित्वात् ।

तथाच वशिष्ठः,—

मन्त्रपूर्व्वन्तु यद्दानममन्त्राय प्रदीयते ।

दातुर्निकृत्य हस्तं तु भोक्तुर्जिह्वां निकृन्तति ॥

उपरुध्यति कान्तारं गौरश्वः काञ्चनं चितिः ।

अश्रोत्रियस्य विप्रस्य हस्तं दृष्ट्वा निराकृतः ॥

इति । विष्णुधर्म्मोत्तरे,—

उपाध्यायर्त्विजश्चैव गुरावपि च मानवैः ।

वर्णापेक्षा न कर्त्तव्या मातरं पितरं प्रति ॥

व्यासः,—

मातापितृषु यद्दत्तं भ्रातृस्वसृसुतेषु वा ।

जायापत्येषु यद्दत्तं सोऽनन्त्यः स्वर्गसंक्रमः ॥

पितुः शतगुणं दानं सहस्रं मातुरुच्यते ।

अनन्तं दुहितॄणान्तु सोदर्य्ये दानमक्षयम् ॥

विष्णुधर्म्मोत्तरे,—

मातृस्वसा स्वसा चैव तथैव च पितृस्वसा ।

मातामही भागिनेयी भागिनेयस्तथैव च ॥

दौहित्रो विट्पतिश्चैव तेषु दत्तमथाक्षयम् ।

स्कान्दे,—

प्रथमन्तु गुरोर्दानं दद्यात् ज्येष्ठाननुक्रमात् ।

ततोऽन्येषान्तु विप्राणां दद्यात् पात्रानुरूपतः ॥

तथा,—पञ्चयोजनमध्ये तु श्रूयते च गुरुर्यदि ।

तदा नातिक्रमेद्दानं दद्यात् पात्रान्तरेऽन्यथा ॥

गुरोरभावे तत्पुत्रं तद्भार्य्यां तत्सुतं तथा ।

पौत्रदौहित्रमेवास्य यदि वा तत्कुलोद्भवम् ॥

पात्रं कुर्य्यात्तु तदभावेऽन्यपात्रान्वेषणाश्रयः । भविष्यपुराणे,—

तस्मान्नातिक्रमेत् प्राज्ञो ब्राह्मणान् प्रतिवेशकान् ।

सम्बन्धिनस्तथा सर्व्वान् दौहित्रं विट्पतिं तथा ॥

भागिनेयं गृहपतिं सुमुखानपि गोपते ।

एवञ्च सति यज्ञपार्श्ववचनम्,—

यस्य चैव गृहे मूर्खो दूरे चैव बहुश्रुतः ।

बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ॥

इति । एतदुक्तव्यतिरिक्तमूर्खविषयम् । तथाच विष्णुः,—

पुरोहितस्त्वात्मन एव पात्रम् । स्वसृदुहितृपुत्रजामातरश्च ।

गुणहीनापेक्षया । शातातपः,—

सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् ।

भोजने चैव दाने च दहत्यासप्तमं कुलम् ॥

स्कान्दे,—

त्यक्त्वा क्रमागतं विप्रं पूजितं प्रपितामहैः ।

न दद्यादित्यर्थः । ब्रह्मवैवर्त्ते,—

ये पूर्व्वपूजिता ये च पुरस्तात् सुनमस्कृताः ।

तान्निराकृत्य चान्येषु यद्दत्तं तत्पतत्यधः ॥

शातातपः,—

अन्नदाने न कर्त्तव्यं पात्रान्वेषणमण्वपि ।

अपात्राणि । विष्णुधर्म्मोत्तरे,—आरूढ़पतितः पतिततस्करः

गुरुद्वेषी कृतघ्नः ग्रामयाजकः वेदविक्रयी सोपपतिभार्य्यः स्त्रीजितः व्यालग्राहः ब्रह्मबन्धुः वृषलीपतिः परिचारकब्राह्मणश्च । एतेभ्यो दत्तं निष्फलम् । विष्णुः,—अनृतगीनशालेभ्यः । (?) यमेन तु,—अणिमन्तुस्त्यजाग्निहोत्रिणः ।(?) शूद्राध्यापकाय न देयमित्युक्तम् । शौचहीनसन्ध्याहीनयज्ञोपवीतहीनेभ्यो न देयमिति व्यासः । मनुः,—वैड़ालव्रतिकवकवृत्तिचमव्ययशीलत्यागदानेन (?) सञ्चयकारिणः अपात्रभूताः । यमेन च कपटलेखित्रिपुरुषोत्सन्नवेदविद्याभ्यो न देयमित्युक्तम् । दक्षः,—

धूर्त्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे ।
चाटुचारणचौरेभ्यो दत्तं भवति निष्फलम् ॥

महाभारते,—

पङ्ग्वन्धबधिरा मूका व्याधिनोपहिताश्च ये ।
भर्त्तव्यास्ते महाराज न तु देयः प्रतिग्रहः ।

यमः,—

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् ।
नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलाम् ॥

तथा,—

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्तु किमौषधैः ॥

तथा,—

किञ्चिद् वेदमयं पात्रं किञ्चित्पात्रन्तु गोमयम् ।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे ॥

शूद्रान्नं शूद्रेण भोजनार्थं दीयमानं यत् तण्डुलादि । भोजनकाले च शूद्रस्वामिकत्वात् । न तु प्रतिग्रहलब्धं भोजनकाले शूद्रस्वामिकत्वाभावात् । अङ्गिराः,—

बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः ।

विष्णुधर्म्मोत्तरे,—

ताञ्च विक्रीणीते राजन् वचसा कल्मषीकृताम् ।
तस्याधर्म्मप्रवृत्तस्य लुब्धस्यानृतवादिनः ॥
हव्यकव्यव्यपेतस्य न देया गौः कथञ्चन ।

विक्रेष्यत्ययमिति सम्भावनायां गौस्तस्मै न देयेत्यर्थः । अग्निपुराणे,—

मनसा पात्रमुद्दिश्य तोयं भूमौ समुत्सृजेत् ।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥

दानस्य प्रतिग्रहावसानत्वात् पश्चात् प्रतिग्रहेऽपि दानसाद्गुण्यम् । दातुः सर्व्वातिशायिफलोत्कर्ष इत्यर्थः । अतएव तीर्थे प्रतिग्रहाकरणेऽपि दातुस्तीर्थफलं स्यादेव । धौम्यः,—

परोक्षेण च यद्दत्तं तीर्थदानेन सोदकम् ।
तद्दानं सोदकं प्राहुरनन्तफलदायकम् ॥

परोक्षे पात्राभावे ।

स्वगोत्रेभ्यस्तथा दद्यादभावे गन्धिबन्धुषु ।

नारदः,—

यदा च न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः ।
तदा दद्याद्द्विजेभ्यस्तु अभावे चाप्सु निक्षिपेत् ॥

वृद्धपराशरः,—

पात्रं मनसि संस्मृत्य क्रियावन्तं गुणान्वितम् ।
अप्सु ब्राह्मणहस्ते वा भूमौ वापि जलं क्षिपेत् ॥
अन्यविप्रकरे कृत्वा दानं पात्राय दीयते ।

अत्र स्नातकव्रतत्वेन नित्यदानस्य कथनाद् दानदेशकालाः । नारदः,—देशकालविशेषात् फलविशेषः स्यादेव । मलमासादिवर्जनस्याप्यत्रासम्भवः तस्य महादानविषयत्वात् । वृहद्दाने तस्मादेव देशकालापेक्षा । गीतायाम्,—

ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ॥
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ।

अत्र समाचारात् सङ्कल्पः ।

केचित्तु तस्माद् यः पुरुषो मनसाभिगच्छति तद्वाचावदति कर्म्मणा करोतीति स्मृतिः । क्रियमाणस्य कर्म्मणः पूर्व्वं वाचाभिलापे प्रमाणमिति तदसत् अनुवादकत्वेन लोकसाधारणकर्म्ममात्रे कदाचिदभिलापः कदाचिन्नेत्येवं रूपस्यानुवादात् । एकान्तेनाभिलापे मानाभावात् । यत्तु यज्ञो प्रजापतिर्वाचि व्याकृतायामिति प्रायश्चित्ताम्नानं तदपि लौकिकजनसमक्षवचनपरमेव । तथाच कल्पतरौ,—यो यक्ष्य इत्युक्त्वा न यजते तस्य त्रैधातवीया प्रायश्चित्तिरित्यत्र ऋत्विक्सन्दापनसम्भारादि कृत्वा यक्ष्य इत्यभिप्रायेति व्याख्यातम् । यत्तु वार्त्तिके रूपात्प्रायादिति सूत्रे इह खलु सर्व्वं क्रियमाणं मनसा सङ्कल्प्य वाचाभिलप्य क्रियत इति

लौकिकसाधारणकर्म्ममात्रे वाङ्मनसोर्यथाप्राप्तमेव व्यापारमनुवदति । तस्मात् समाचारादेव सङ्कल्पः । एवञ्च सति यत्र काम्यकर्म्मणि समाचारो नास्ति तत्राकरणेऽप्यदोषः ।

योऽर्च्चितं प्रतिगृह्णाति ददात्यर्च्चितमेव वा ।

इति मनुः । अर्च्चितं प्रतिगृह्णाति इत्यनेन द्रव्यार्च्चनं दातृकर्त्तृकमित्युक्त्वा ददात्यर्च्चितं पात्रमुद्दिश्य ददातीति पात्रस्यार्च्चनमुक्तम् । तेन सम्प्रदेयार्च्चनं कृत्वा सम्प्रदानमर्च्चयित्वा दद्यादित्यर्थः ।

वृद्धवशिष्ठः,—

नामगोत्रे समुच्चार्य्य सम्प्रदानस्य चात्मनः ।
सम्प्रदेयं प्रयच्छन्ति कन्यादाने तु पुंत्रयम् ॥

स्मृत्यन्तरे,—

सङ्कीर्त्त्य देशकालादि तुभ्यं सम्प्रददेति च ।
न ममेति स्वसत्ताया निवृत्तिमपि कारयेत् ॥
अर्द्धसोमार्कग्रहणसंक्रान्त्यादौ च कालके ।
गङ्गागयाप्रयागादितीर्थे देशे महागुणे ॥
तथाचामुकगोत्राय तथाचामुकशर्म्मणे ।
वेदवेदाङ्गयुक्ताय विशिष्टाय महात्मने ॥
द्रव्यनाम ग्रहीतव्यं विष्णुरुद्रादिदैवतम् ।
सर्व्वपापोपशान्त्यर्थं स्वर्गार्थं मुक्तिसिद्धये ॥
एतत् तुभ्यं सम्प्रददे प्रीयतां मे हरिः शिवः ।

अत्र कालपदेन मासपक्षतिथिवारनक्षत्रादीनामपि ग्रहणम् ।

देशविशेषणत्वेन तीर्थं भारतवर्षादेरप्युपलक्षणम्। हरिः शिवः प्रीयतामिति सूर्य्यादेरप्युपलक्षणम्। विष्णुधर्म्मोत्तरे,—

द्रव्यस्य नाम गृह्णीयाद्ददानीति तथा वदेत्।
तोयं दद्यात् तथा दाता दाने विधिरयं स्मृतः॥

एवञ्च दानवाक्ये ददानीति पदं प्रयोज्यं सम्प्रददे पदं वा प्रयोज्यमिति द्वयोर्विकल्पः। स्मृतिः,—

अन्तर्जानु करं कृत्वा पुष्पं कुशतिलं तथा।
फलञ्च प्रतिसन्धाय प्रदद्यात् श्रद्धयान्वितः॥

अमुकोक्तिमिति धर्म्मशास्त्रनामग्रहणं विश्वासार्थं श्रद्धारूपदानाङ्गसम्पादनायावश्यकं द्रव्यम्। श्रद्धासमन्वितमिति याज्ञवल्क्यस्मरणात्। एवं दत्ते उक्तप्रतिग्रहविधिना प्रतिग्रहे कृते पश्चाद् दक्षिणादानम्। दक्षिणादानस्य दृष्टसम्भवेऽदृष्टकल्पनानवकाशादधिकद्रव्यलाभे सम्प्रदानावधिरेव प्रयोजनमिति नान्यस्मै दक्षिणादानप्रसङ्गसम्भावनापि। तथा—

देवद्रव्यदृतीयांशं दक्षिणात्वेन कल्पयेत्।
अनुक्तदक्षिणे दाने दशांशं वापि शक्तितः॥
सर्व्वेषामेव दानानां सुवर्णं दक्षिणेष्यते।
सुवर्णे हीयमाने तु रजतं दक्षिणेष्यते॥

अत्र सर्व्वेषामिति सर्व्वनामपदस्य विशेषरूपेणैव सुवर्णदानस्याप्युपस्थानात् सुवर्णदाने रजतसुवर्णयोर्विकल्पः। द्वयोर्विशेषत्वेन सामान्यविशेषबाधाभावादिति न सुवर्णदाने दक्षिणात्वेन रजतनियम इति। दक्षिणाभावे फलानां मूलानां भक्ष्याणां वा

दद्यादिति वचनादशक्तौ साङ्गत्वाय फलादि ज्ञेयम्। अत्र स्नातकव्रतमध्ये विष्णुसम्प्रदानकदानस्याग्रहणेऽपि

श्रुतिस्मृत्युदितं सम्यङ्निबद्धं स्वेषु कर्म्मसु।
धर्म्ममूलं निषेवेत सदाचारमतन्द्रितः॥

इति सामान्यतो मनुना स्वकीयवर्णाश्रमानुगतसम्यक्सदाचारस्य स्नातकव्रतत्वेनाम्नानात् सदाचारमध्ये च विष्णुभक्तेर्मूर्द्धाभिषिक्तत्वाविशेषतश्च

यत्कर्म्म कुर्व्वतोऽस्य स्यात् परितोषोऽन्तरात्मनः।
तत् प्रयत्नेन कुर्व्वीत विपरीतन्तु वर्ज्जयेत्।

इति स्वमनोविश्वासविषयकर्म्मणः स्नातकव्रतत्वाभिधानात् सर्व्वविवेकिनाञ्च विष्णुभक्तेरेव मनोविश्वासविषयत्वाद् विष्णुभक्तिरूपत्वेन विष्णुसम्प्रदानकदानस्यापि स्नातकव्रतत्वम्।

किञ्च—

दानं धर्म्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम्।

इत्यैष्टिकपदेन देवताप्रतिष्ठादिकर्म्मण एव विवक्षितत्वम्। यज्ञानां पूर्व्वमुक्तेन पुनरुक्तिप्रसङ्गात्। तेन प्रतिमाप्रतिष्ठा प्रतिष्ठितप्रासादस्य प्रतिमायै दानं तदुपकरणद्रव्यदानञ्च देवतायै सर्व्वमैष्टिकपदेन लक्ष्यते। तत्र प्रासादविषये ददात्यर्थश्रवणेऽपि विष्णुधर्म्मोत्तरे—

यत्किञ्चिदेव देवाय दद्याद् भक्तिसमन्वितः।
तदेवाक्षयमाप्नोति स्वर्गलोकञ्च गच्छति॥

इति सर्व्वद्रव्याणां दानम्। तदेव द्रव्यं परत्रानन्तं भोक्तुः

स्वर्गश्च विधीयते। प्रतिष्ठितप्रासादस्यापि दानं तेन प्रकारेण विहितमेव।

ननु च प्रासादादिकरणस्य फलं श्रूयते न तु देवतायै प्रासाददानस्य।

हयशीर्षे,—

अष्टेष्टकासमायुक्तं यः कुर्य्याद् वैष्णवं गृहम्।
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित्॥

वामनपुराणे,—

पितामहस्य पुरतः कुलान्यष्टौ तु यानि तु।
तारयेद् वामनः सार्द्धं विष्णोर्मन्दिरकल्पकः॥

नरसिंहपुराणे,—

यः कुर्य्याच्छोभनं वेश्म नरसिंहस्य भक्तिमान्।
सर्व्वपापविनिर्मुक्तो विष्णुलोकमवाप्नुयात्॥
प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत्॥
सर्व्वपापानि सन्त्यज्य स तु विष्णुपुरे वसेत्॥
प्रतिष्ठां नरसिंहस्य यः करोति यथाविधि।
निष्कामो नरशार्दूल देहबन्धात् प्रमुच्यते॥

हयशीर्षे,—

यो विष्णुं स्थापयेद् देवं सर्व्वदेवनमस्कृतम्।
स्थापितं तेन सर्व्वस्माज्जगत्स्थावरजङ्गमम्॥
अतीतान् दश पूर्व्वांस्तु तथैवानागतान् दश।
आत्मानं सपरीवारं विष्णुलोकं नयेन्नरः॥

कोटिजन्मकृतं पापं स्वल्पं वा यदि वा बहु।
तत्सर्व्वं भस्मसात् [भूतं] स्थापनान्मधुघातिनः॥

तथा,—

प्रासादबिम्बद्रव्याणां यावन्तः परमाणवः।
तावद्वर्षसहस्राणि तत्कर्त्ता विष्णुलोकभाक्॥
एतत् पुण्यं कोटिगुणं भवेदारोपिते ध्वजे।
कुम्भाण्डवेदिबिम्बानां धारणाद् वायुनानघ॥
कपेऽस्य (?) वेष्टनात् ज्ञेयं फलं कोटिगुणं ध्वजात्।

विष्णुः,—यस्य देवस्यालयं करोति तस्यैव लोकमाप्नोति। सुधासितं कृत्वा यशसा विराजते। विचित्रं कृत्वा ब्रह्मलोकमाप्नोति। यमः,—

कृत्वा देवकुलं शुभ्रं प्रतिष्ठाप्य च देवताम्।
विधाय विविधं चित्रं तल्लोकं विन्दति ध्रुवम्॥

भविष्यपुराणे,—

प्रशस्तदेवभूभागे प्रशस्तभवनं रवेः।
कारयित्वाक्षयान् लोकान् स नरः प्रतिपद्यते॥

तथा,—

मार्दैष्टकशैलं वा यः कुर्य्याद् ब्रह्मणो गृहम्।
त्रिःसप्तकुलसंयुक्तो ब्रह्मलोके महीयते॥

तथा—

अष्टेष्टकासमायुक्तं यः कुर्य्याच्छङ्करालयम्।
विधूय पापं सकलं स गच्छेच्छङ्करालयम्॥

देवीपुराणे,—

देव्या गृहन्तु यः शक्र संस्कारयति शोभनम्।
उद्घाटयति स्वर्गस्य कबाटमर्गलान्वितम्॥
तस्मिन् घण्टां ध्वजं छत्रं वितानं दर्पणानि च।
दत्वा मुरजवंशादिनृत्यगीतादिकानि च॥
देवीशास्त्रार्थवेत्तारं पूजकन्तु नियोजयेत्।
दशपूर्व्वान् परांस्तात आत्मानं चैकविंशकम्॥
उद्धृत्य स कुलं पापाद् ब्रह्मलोके महीयते।

भविष्यपुराणे,—

मृन्मयात् कोटिगुणितं फलं स्याद् दारुभिः कृते।
कोटिकोटिगुणं पुण्यं फलं स्यादिष्टकामये॥
द्विपरार्द्धगुणं पुण्यं शैलजेतु विदुर्बुधाः।

विष्णुधर्म्मोत्तरे,—

ततो दशगुणं पुण्यं ताम्रेण त्रिगुणं ततः।
सहस्रगुणितं रौप्ये तस्मात् फलमुपाश्नुते॥
ततः शतसहस्रं वै सौवर्णे द्विजसत्तमाः।
अनन्तफलमाप्नोति रत्नचित्रे कृते नरः॥

एवं सर्व्वत्र प्रतिष्ठारूपं शिल्पादिपरद्वारा प्रासादप्रतिमाघटनापूर्त्तकमाचार्य्यद्वारा स्थापनमेव फलार्थं विधीयते न तु प्रासाददानम्। सत्यं यथावचनमेव फलावगतेः प्रतिष्ठाकर्म्मण एव फलम्। घटनादिकन्तु होमादिवत् तदङ्गम्। तथापि घटितस्य प्रासादादेर्निवृत्तौ यथेष्टद्रव्यव्यवहारप्रसङ्गात् पूर्व्वोदाहृतसामान्य-

द्रव्यदानवाक्याच्च यज्ञावभृथो यागद्रव्यार्थमण्डपमित्यादियागसमाख्यानाच्च देवतोद्देशेन सोपकरणप्रतिष्ठितप्रतिमासहितप्रासादोत्सर्गः शास्त्रीय उत्सर्गस्यापि च पृथगेव फलं विधिसंयोगभेदादेव। तथा,—

स्वर्गार्थस्यापि होमस्य दधिरे साधनं तदा।

इन्द्रियफलकं विधिप्रामाण्यादवगम्यते। श्रुत्याद्यभावाच्च। प्रासादयागतत्प्रतिष्ठयोर्नाङ्गाङ्गीभावः द्वयोरपि फलसाधनाङ्गत्वेन निराकाङ्क्षत्वात्। तथाच लिङ्गं दृश्यते। हयशीर्षे ध्वजप्रतिष्ठानन्तरम्—

ध्वजदानेन चाप्नोति स्वर्लोकं शक्रदुर्लभम्।

इति। तथा देवीपुराणे,—देवीगृहं त्यक्त्वा—

तस्मिन् घण्टां ध्वजं छत्रं वितानं दर्पणानि च।
दत्वा मुरजवंशादिनृत्यगीतादिकानि च॥

इत्युपकरणेषु दानमनुवदन् गृहस्यापि दानं सूचयति। विष्णुधर्म्मोत्तरे स्पष्टं वचनम्—

कूटागारं तथा दत्वा नगराय पतिर्भवेत्।
दत्वा तु देवकर्म्मार्थं नवां देवीं त्वणं शुभाम्॥ (?)
पार्थिवत्वमवाप्नोति देवो हि पृथिवीपतिः।

वासः कूटो द्वयोः शालेति कोषाद् विष्णुप्रतिमानिवासयोग्यं गृहं दत्वा नगराधिपतिरित्युक्ते प्रासादमण्डपगृहेषु सर्व्वप्रकारं प्रतिमास्थितियोग्यगृहदानं विहितम्। पूर्व्वोक्तवाक्याच्च—

मृन्मयाद्दारुघटिते फलं कोटिगुणं भवेत्।

इति। एवं रत्नपर्य्यस्तगृहे फलविशेष ऊहनीयः। एवं प्रतिमाद्रव्यविशेषात् फलविशेषः। तथा प्रतिमापरिमाणविशेषेण फलविशेषः। योगशिवीये,—प्रासादवाह्यप्रतिमा प्रासादप्रतिमा गृहप्रतिमेति त्रिधा प्रतिमामाह।

महार्चान्तःस्थिता वाह्ये हस्तमानात् सपिण्डिका।

तथा,—

सर्व्वोत्तमेषुकोणैः स्यात् त्रिरामैर्मध्यमोत्तमा।
कन्यसाग्रा क्षमायुग्मैः करैर्वाह्ये समुच्छ्रिताः॥
द्वयं द्वयमधोऽधोऽपि चतुष्करपरिच्युतैः।
सान्तरा हस्तदानेन रसरामैर्दशान्तिकम्॥

प्रासादं विनैव वाह्ये प्रशस्तस्थाने या प्रतिमा स्थाप्यते सा महाप्रतिमा सा हस्तमानेन पञ्चचत्वारिंशद्धस्तमिता श्रेष्ठोत्तमा पिण्डिका तस्या तावद्धस्ता। एवं मध्यमोत्तमा त्रयस्त्रिंशद्धस्ता। एवं कनिष्ठोत्तमा एकविंशतिहस्ता। चतुर्हस्तहान्या द्वयं द्वयं त्रयोदशहस्तेन कनिष्ठकनिष्ठिका। सप्तदशहस्तेन मध्यमकनिष्ठा। एवमूनत्रिंशद्धस्तेन मध्यममध्यमा। पञ्चविंशहस्तेन कनिष्ठमध्या। सप्तत्रिंशद्धस्तेन कनिष्ठोत्तमा। एकचत्वारिंशद्धस्तेन मध्यमोत्तमा। एवं नवविधा। दशहस्तावधि एकैकहस्तवृद्ध्या पञ्चचत्वारिंशद्धस्तपर्य्यन्तं वा षट्त्रिंशद्। वाह्यप्रतिमा। लिङ्गमप्येवं रूपेण। एतासां प्रतिष्ठादिविधिना प्रतिष्ठामात्रं नात्र तदूर्द्धं पूजादिनियमः। प्रतिष्ठामात्रादेव देवताङ्गपरमाणुसंख्यककल्पसहस्रपर्य्यन्तं तद्देवलोकावाप्तिः फलम्।

तदुक्तं तत्रैव—

दारुमृद्ग्रावताम्रादि तथा हेमादिरूपिणाम्।
देवीप्रासादलिङ्गानां यावन्तः परमाणवः॥
तावत् कल्पसहस्राणि निजदेवालये वसेत्।
दार्व्वादिभिः क्रमेणैव द्विगुणं द्विगुणं भवेत्।
मणिरत्नविशेषे स्यात् फलमूर्द्धं पृथक् पृथक्॥

लिङ्गपदमत्र लिङ्गप्रतिमासाधारणम्। तथा प्रासादप्रतिमा। तत्रैव,—

कर्त्तव्या गर्भरूपेण प्रतिमेष्टा सुरालये।
नवहस्तात्रिहस्तान्ता ज्येष्ठमध्यकनीयसी॥
हस्तद्विनवहस्तान्ता पादवृद्ध्येव सान्तरा।

अस्यार्थः—प्रासादे प्रतिमाहस्तमानेन दारुमानेन गर्भमानेन वा त्रिहस्ता कनिष्ठोत्तमा। षड्ढस्ता मध्यमोत्तमा। नवहस्तोत्तमोत्तमा। तथा कनिष्ठकनिष्ठा हस्तमिता। कनिष्ठमध्यमा द्विहस्ता। कनिष्ठोत्तमा त्रिहस्ता। मध्यमकनिष्ठा चतुर्हस्ता। मध्यममध्या पञ्चहस्ता। मध्यमोत्तमा षड्ढस्था। सप्तहस्ता कनिष्ठोत्तमा। अष्टहस्ता मध्यमोत्तमा। नवहस्ता उत्तमोत्तमा। एवं नव भवंति। एकहस्तादिषट्षड़ङ्गुलवृद्ध्या सान्तरा प्रतिमाः सप्तविंशतिः। सम्भूय षट्त्रिंशद्भेदाः। एवं द्वारदैर्घ्यं त्रिधा विभज्य तद्भागद्वयेन प्रतिमा द्वाराणां दैर्घ्यानुरूपेण भिद्यते। प्रासादगर्भस्य कोणात् कोणं विभज्य तत्तृतीयांशेन प्रतिमा गर्भभेदाद् भिद्यन्ते। एवमासां प्रतिमानां तद्भेदेन फलभेदः।

शिलामृद्दारुलोहोत्था त्रिधैकैका पुनर्मता।

लोहा अयःप्रभृतिसुवर्णान्तास्तेषां सारविशेषात् फलविशेषः।

हयशीर्षे तु—

लेपजा * * * चान्या चित्रजा पुष्पजा तथा।

शैलजा वृक्षजा चैव शस्त्रोत्कीर्णा तथैव च॥

स्फाटिकी प्रतिमा शस्ता राजपट्टप्रवालजा।

मणिजा रत्नजा गन्धा सर्व्वकामफलप्रदा॥

सौरकाण्डे,—

एकहस्तादिहारभ्य यावद्धस्ता नव द्विज।

कन्यसा मध्यमा ज्येष्ठा प्रतिमा स्यात् त्रिभिस्त्रिभिः॥

एतासां प्रतिमानां प्रासादे प्रतिष्ठा विशिष्टफलदा।

प्रतिष्ठानन्तरं तत्र पूजादिनियमः।

पूजोपयोगिद्रव्यस्य यावत्कालं दानम्। तथाच नरसिंह पुराणे,—

नारसिंहं प्रतिष्ठाप्य यः पूजामारभेद् द्विजः।

तस्य कामाः प्रसिद्ध्यन्ति पुत्रपौत्रादयो भुवि॥

हयशीर्षे,—

एकाङ्गुलात् समारभ्य यावद्धस्तं गृहे शुभम्।

मत्स्यपुराणे,—

अङ्गुष्ठमात्रादारभ्य वितस्तिर्यावदेव तु।

गृहेषु प्रतिमा कार्य्या नाधिका शस्यते बुधैः॥

योगशिर्वीये,—

अङ्गुलादिवितस्त्यन्ता क्वचित् तिथ्याङ्गुलान्तिका।

क्वचिच्च जिनपर्य्यन्ता क्वचिद्विन्दुयुगाङ्गुला॥

तिथ्याङ्गुला पञ्चदशाङ्गुला। चतुर्विंशतिपर्य्यन्ताङ्गुला जिनपर्य्यन्ता। विन्द्वङ्गुला त्रिंशदङ्गुलपर्य्यन्ता वेत्यर्थः। एतासां प्रतिमानां गृहे स्थापयित्वा पूजनम्। तदुक्तं हयशीर्षे,—

प्रतिष्ठितापि न त्याज्या यावज्जीवं समर्चयेत्।

अथ प्रासादविशेषाः।

हयशीर्षे,—

वैराजपुष्पकैलासा मणिकोऽथ त्रिपिष्टकः।

पञ्चैते मेरुशिखरे क्रमेणैव व्यवस्थिताः॥

आद्यो वेदास्रकस्तत्र चित्रे वस्रायतोऽपरः।

वृत्तवृत्तायतौ चाद्यावष्टास्रः पञ्चमो मतः॥

भिद्यते नवधा भेदे स्वैस्वैकैको न संशयः।

एवं भवन्ति प्रासादाश्चत्वारिंशच्च पञ्च व॥

तत्राद्यः कथितो मेरुर्मन्दरस्तु द्वितीयकः।

विमानो भद्रकश्चैव सर्व्वतोभद्रकस्तथा॥

रुचिको नन्दकश्चैव नन्दिवर्द्धन एव च।

श्रीवत्सश्च नवैते ये वैराजे तु समुत्थिताः॥

अयमर्थः,—चतुरस्राः प्रासादा वैराजसंज्ञका भवन्ति। तत्र चोत्तमादिक्रमेण मेरुप्रभृतयो नव।

तथा,—

वड़भीगृहराजौ तु तथा शालागृहोऽपरः।
मन्दरश्च विशालश्च ब्रह्ममन्दिर एव च॥
भवनः प्रभवश्चैव शिविका वेश्म एव च।
नवैते सुरशार्दूल कीर्त्तितः पुष्पकोद्भवाः॥

अयमर्थः—चतुरस्रायताः प्रासादाः पुष्पसंज्ञकाः। तत्र चोत्तमादिक्रमेण वड़भीप्रभृतयो नव।

वलयः प्रथमो नाम द्वितीयो दुन्दुभिः स्मृतः।
तथा पद्ममहापद्मे मुष्टिकस्वस्तिकौ तथा॥
शङ्खश्च कलशश्चैव श्रीवृक्षश्च तथा परः।
वृत्ता नवैते कैलाससम्भवाः परिकीर्त्तिताः॥

एतेषां वृत्तानां नवानां कैलाससंज्ञा।

गजो वृषो हंसनामा गरुड़ो सिंह एव च।
भूषणो भूधरश्चैव श्रीजयः पृथिवीधरः॥
वृत्तायता नवैतेऽपि कीर्त्तिता मणिकोद्भवाः।

नवानां मणिकसंज्ञाविशेषसंज्ञा चोत्तमादिक्रमेण गजादयः।

तथा,—

वक्रचक्रौ स्वस्तिकश्च वज्रस्वस्तिक एव च।
चक्रस्वस्तिकनामा च गरुड़ो गद एव च॥

श्रीकण्ठो विजयश्चैव त्रिपिष्टपसमुद्भवाः।

अयमर्थः,—अष्टास्रप्रासादा न च तेषां त्रिपिष्टपसंज्ञा विशेषसंज्ञा चोत्तमादिक्रमेण गजादयः। पञ्चविधेषु उत्तमा मेर्व्वादयः। पञ्चाशद्धस्तविस्तृताः शतहस्तोच्छ्रिताः। अन्ये पञ्च पञ्च ह्रासक्रमेण।

लिङ्गकाण्डे,—

त्रयस्त्रिंशत् समारभ्य यावत् पञ्चाशसंख्यया।
ज्येष्ठमेतत् तत्प्रासादं ज्येष्ठं लिङ्गं निवेशयेत्॥
करषोड़शमारभ्य यावद् द्वात्रिंशद्धस्तकम्॥
मध्यमं कथितं धाम तत्र लिङ्गन्तु मध्यमम्।
चतुर्हस्तात् समारभ्य यावत् पञ्चदश द्विज॥
प्रासादं कन्यसस्तत्र कन्यसं स्थापयेच्छुदम्।
मध्यमेषु भवेद् ज्येष्ठं कन्यसं मध्यमेषु च।

एवं विस्तारमुक्त्वा उच्चतामाह,—

सुरधाम्नान्तु सर्व्वेषां विस्ताराद् द्विगुणोच्छ्रयः।
अर्द्धार्द्धद्विगुणो वापि सपाददिगुणोऽपि वा॥

एवं मेरुप्रासादः पञ्चाशद्धस्तविस्तृतः। शतहस्तोच्छ्रित इत्युक्तं भवति।

शतशृङ्गः स्मृतो मेरुश्चतुर्द्वारो मनोहरः।
भूमिको षोड़शैर्युक्तो विचित्रशिखरोज्ज्वलः॥
द्विषट्कभौमो बहुभिः शिरोभिर्मन्दरः स्मृतः।
चतुर्मुखत्रिभौमस्तु अनेकशिखरोज्ज्वलः॥

नन्दिवर्द्धनसंज्ञोऽयं विशालच्छन्दकं शृणु ।
चतुर्द्वारोऽष्टभौमश्च शिखरानेकसंयुतः ॥

एवमादिलक्षणानि विस्तरभयान्नेह लिख्यन्ते ।

तथा प्रासादविशेषे देवताविशेषाः ।

चतुष्कोणात्मकश्चैव चतुः प्राक् शिवमण्डपः ।
चतुर्म्मुखस्य लिङ्गस्य तथा पद्मासनस्य च ॥
त्रिमुखस्य तु लिङ्गस्य तथा त्रिशिरसो हरेः ।
एकद्वारः समाख्यातस्तथान्येषां दिवौकसाम् ॥
वृत्तो रुद्रप्रियो नित्यमात्मनश्च मधुद्विषः ।
विष्णोर्भवति चेष्टा सा दृष्टास्तेलमुखस्तु यः ॥ (?)
वृत्तायतास्तथा ये च चतुरस्राकृतास्तु ये ।
शयितस्य हरे स्ते तु भैरवस्य वृषाकपेः ॥
एकद्वारास्तु ते सर्व्वे चण्डिकायास्तु ये प्रियाः ।
हंसे प्रजापतिः स्थाप्यो वृषे देवो महेश्वरः ॥
गरुत्मति तथा कृष्णः सर्व्वकल्याणमिच्छता ।
गजे सुरेश्वरः स्थाप्यो घटे नित्यं जलेश्वरः ॥
वराहश्चापि कलशे वड़भ्याञ्च नृकेशरी ।
मन्दरे धनदस्तद्वन्मन्दरे कुसुमायुधः ॥
श्रीभवान्यौ सदा विप्र वड़भ्यां स्थापिते शुभ ।
सर्व्वत्र स्थापयेल्लिङ्गमव्यक्तं लिङ्गमेव च ॥

सर्व्वत्र स्थापयेद् विष्णुं स्थितं चक्रगदाधरम् ।
सर्व्वे सर्व्वत्र वा देवा स्थापनीया यथाविधि ॥
प्रासादेषु च सर्व्वेषु बाणलिङ्गं निवेशयेत् ।

हयशीर्षे,—

यो लिङ्गं स्थापयेदेकं सम्यक् श्रद्धासमन्वितः ।
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित् ॥
यदि वक्तसहस्राणां सहस्राणि भवन्ति हि ।
आयुश्च ब्रह्मणस्तुल्यं वक्तुं शक्ये न विस्तरम् ॥
किं तत्रोद्देशतो वत्स यद्वक्ष्यामि च तत् शृणु ।
सर्वयज्ञफलं प्राप्य सर्व्वतीर्थतपःफलम् ॥
शिवलोके वसेद्धीमान् यावदाभूतसंप्लवम् ।
भिन्ने देहे स तत्रैव लीयते परमात्मनि ॥

इति सामान्यलिङ्गस्थापनफलम् ।

तस्य च महत्वेन द्रव्यविशेषे फलविशेष उक्तः। बाणलिङ्गे विशेषः। हयशीर्षे,—

वैदिकेन विधानेन यथावत् स्थापयेत्तु यः ।
सहस्रमेकं लिङ्गानां प्रासादे चोत्तमोत्तमे ॥
तत्फलं कोटिगुणितं बाणलिङ्गे निवेशिते ।

मयसङ्ग्रहे,—लिङ्गप्रतिष्ठानन्तरम्—

एवमुक्तक्रियायोगं साधको लिङ्गमाश्रयन् ।
प्राप्नोत्यभिमतान् लोकान् मोक्षार्थी मोक्षमाप्नुयात् ॥

भवत्सागरसंहितायां प्रतिष्ठानन्तरम्,—

या या प्रतिष्ठिता मूर्त्तिस्त्रिकालञ्च तदर्च्चनम्।
कर्त्तव्यमिति यत्नेन प्राहुरागमराशयः।

प्रतिष्ठाङ्गत्वेन पूजायामवधिः—

अवधिर्वाधकः प्रोक्तस्तथा षान्मासिकोऽवधिः।
मासिकः पाक्षिकश्चेति नित्यपूजाविधिक्रमः॥

तथा,—

अथातः सम्प्रवक्ष्यामि प्रतिष्ठापितमूर्त्तिषु।
यथायथा प्रकर्त्तव्या पूजा साधकसत्तमैः॥
देवस्याग्नेयदिग्भागे नैवेद्यं स्थापयेच्छुभम्।
भक्ष्यं भोज्यं तथा लेह्यं पेयञ्चैव चतुर्विधम्॥
तत्र प्रस्थानां सहस्रं नैवेद्यमुत्तमार्चासु।
त्रिंशतं मध्यमोत्तमे कनिष्ठोत्तमे शतप्रस्थम्॥

मध्यमप्रतिमात्रये उत्तमे शतन्यूनं मध्यमे चतुःषष्टिः कनिष्टे द्वात्रिंशत् प्रस्थं कनिष्ठप्रतिमात्रये षोड़शप्रस्थं द्वादशप्रस्थं चतुःप्रस्थं एवं यथा भवति तथा पाकं देवालये कारयित्वा तत्र वैश्वदेवं तदुक्तविधिना कृत्वा नैवेद्यबलिदानादिकं कार्य्यमित्युक्तम्। प्रस्थः षोड़शपलम्।

एवं देवालयं कृत्वा तत्फलार्थं विष्णुसम्प्रदानकदानमिति। नरसिंहपुराणे,—गरुड़सहितध्वजदानेन विष्णुलोकप्राप्तिः। कपिलागोदाने गोसहस्रदानफलम्। वामनपुराणे,—बहुविधभोगार्थं फलान्विताश्रमदानम्। विष्णुधर्म्मोत्तरे,—विष्णुलोकप्राप्तये विष्णुकथापुस्तकदानम्। ब्रह्मलोकमहित्वकामनया पुराणवाचकवृत्तिदानपूर्व्वकं पुराणपुस्तकदानम्। पार्थिवत्वकामनया पूजाद्रव्यस्थापनार्थं वेदिकादानम्। स्वर्गद्वाराधिकरणाय तोरणदानम्। गणेशत्वकामनया नानाविधशिल्पभाण्डदानम्। वारुणलोकाय कुम्भदानम्। चतुःकलशसागरदानम्। चतुःसागरान्तः पृथ्वीदानफलम्। वारिधानीदानं वारुणलोकदम्। कमण्डलुदानं गोदानफलदम्। पूजोपयोगिनानाविधपानादिदानं यज्ञफलाय। माल्याधारपुष्पाधारधूपाधारगन्धाधारपात्रदानं कामपात्रतायै। शुक्तिशङ्खतैजसपात्रदानं पूर्व्ववत्। पापक्षयार्थं पतद्ग्रहदानम्। पतद्ग्रहः परिचा इति प्रसिद्धः। सर्षपदानं रूपलाभार्थम्। देवाङ्गमार्ज्जनाय चित्रकूर्चदानं सन्तापशान्तये। श्रीकामस्य चामरकूर्चदानम्। आसनपादपीठदानम्। सर्व्वत्र स्थानलाभः फलम्। खट्वादानं शाश्वतस्थितिफलम। उत्तरच्छदादिदानं सर्व्वकामावाप्तये। सर्व्वपापक्षयार्थं वितानदानम्। सूत्रसमसंख्यवर्षसहस्रमितस्वर्गाय कार्पासवस्त्रयुग्मदानम्। महारजनरक्तवस्त्रदानं सौभाग्यफलम्। कुसुम्भरक्तवस्त्रदानं श्रीभवत्वाय। नीलीव्यतिरिक्तवस्त्रदानं व्याधिनाशाय। दूकूलदानमग्निष्टोमफलदम्। अश्वमेधफलाय कौषेयमृदुवस्त्रदानम्। तूलघटीदानं पूर्व्वफलाय। नानाविधविचित्रदानं राजसूयफलदम्। आभरणदानमग्निष्टोमफलदम्। मुकुटदानं श्रेष्ठत्वफलम्। किरीटदानं राजसूयफलम्। सर्व्वत्र स्मृतिलाभाय कर्णपूरदानम्। कर्णाभरणदानं श्रीधरत्वफलम्। ग्रैवेयकदानं सर्व्वशास्त्रज्ञानाय। केयूरदानं शत्रुक्षयाय। सौभाग्यायाङ्गुलीयकदानम्। अङ्गददानं

राज्यदम्। नूपुरदानं सर्व्वत्र स्थानदम्। पादाङ्गुलीयकदाने गुह्यकाधिपत्यम्। छत्रचामराद्यसाधारणराजलिङ्गदानं राज्यदम्। पादुकादानमुत्तमगतये। उपानद्दानं विमानाधिरोहणदम्। पाद्यदानं गोदानफलम्। आचमनीयदानान्निर्म्मलत्वम्। मधुपर्कदानं मधुक्षीरघृताप्तये। गोदानं विशिष्टस्वर्गदम्। गन्धतैलादिस्नानीयदानं गन्धर्व्वलोकलाभाय। वस्त्रदानं पूर्व्वमुक्तम्। यज्ञोपवीतदानं ब्रह्मदानफलदम्। कुङ्कुमचन्दनादिलेपनदानं रूपलाभाय। विष्णुधर्म्मे,—सुगन्धिमनोज्ञपुष्पदानं उत्तमभागवतत्वाय। विष्णुधर्म्मोत्तरे,—ग्रामप्राप्तये पुष्पवृक्षदानम। नगरप्राप्तये फलवृक्षदानम्। सगुग्गुलशर्करधूपदानं सर्व्वपापक्षयफलं नरसिंहपुराणीयम्। विष्णुधर्म्मोत्तरे,--कर्पूरदीपदानं कुलोद्धरणमश्वमेधफलदम्। पट्टसूत्रगन्धतैलदीपदानं नीरोगत्वसुभगत्वदम्। विष्ण्वालये दीपमालादानं चन्द्रास्पददम्। दीपवृक्षदानं स्वर्गे लक्ष्म्यवाप्तिदम्। दीपागारदानं शक्रास्पददम्। एकादशद्वादशरात्रमभिव्याप्य दीपदानं सुवर्णमणिमुक्ताढ्यदीपान्वितविमानदम्। तथा,—महावर्त्तिदानं कृष्णपक्षे कार्त्तिके विशेषतः। तथाप्यमावास्यायां द्वादश्यां वा पूर्व्वदिने शेषेऽपि महावर्त्तिदानं वासुदेवस्य पार्श्वयोर्दक्षिणपार्श्वेऽष्टोत्तरशततैलपलपूर्णपात्रे समग्रं महारजनरक्तं वस्त्रं प्रवेश्य ज्वालयेत्। वामपार्श्वे तावद्घृतपात्रे तादृशं वस्त्रं प्रक्षिप्य ज्वालयेत्। स्वर्गरुचिरस्वर्गभोगोत्तरदम्। एकवर्त्तिदाने तदर्द्धफलम्। स्मृत्यन्तरे,—भक्ष्यभोज्यलेह्यपेयचतुर्व्विधनैवेद्यदानं विशिष्टस्वर्गदम्। स्कन्दपुराणीयं ताम्बूलदानं परि-

तुष्टिफलम्। पुनर्विष्णुधर्म्मोत्तरे, छत्रदानं राज्यदम्। तालवृन्तदानं सुखदम्। चामरदानं श्रीप्रदम्। पताकादानं वायुलोकप्रदम्। नीलपताकायुततालध्वजदानं राज्यदम्। मकरध्वजयुतश्वेतपताकादानं वरुणलोकदम्। रक्तपताकायुतहरिणध्वजदानं पापक्षयदम्। शिविकादानममरावतीप्रदम्। अश्वदानं स्वर्गलोकदम्। हस्तिदानं स्वर्गभोगपूर्व्वकभूराज्यदम्। अनडुद्दानं दशधेनुदानफलाय। अजाविमहिषीखरोष्ट्राश्वतरदानं वरुणलोकप्राप्तिसहस्रगुणितफलम्। आरण्यमृगपक्षिदानमग्निष्टोमफलदम्। दासीदानं स्वर्गभोगफलपूर्व्वकसुखस्नानदम्। नृत्यगीतविशारदगणिकादानममरावतीप्रदम्। नृत्यसङ्कल्पं देवायतने कारयित्वा रुद्रलोकप्राप्तिः। स्त्रीनृत्यकरणं शक्रलोकमहित्वदम्। गीतकरणाय द्रव्यं दत्वा कारयित्वा वा गन्धर्व्वलोकावाप्तिः। वाद्यदानं स्वर्गलोकावाप्तये। दुन्दुभिदानं कीर्त्तये। धान्यशस्यबीजदानं तस्य तस्यायुषः प्राप्तये। रम्यशाकान्नदानं विशोकत्वाय। तथा व्यञ्जनोपकरणमुद्गादिदानं फलवृक्षदानञ्च गणाधिपत्यदम्। प्रतिमाचित्राद्याश्चर्य्यकरणप्रेक्षणीयवस्त्रदानं सुखलाभाय। रूप्यदानं रूपदम्। सुवर्णदानं सर्व्वकामाप्तये। अत्र च दानमात्रफलाय देवतोद्देशेन विधीयते। ददातिश्च यद्यपि स्वीकारान्तस्तथापि देवतायाः प्रतिग्रहीतृत्वाभावेऽपि तदुद्देशत्यागमात्रे गौणत्वं ददातेः कल्प्यते। विधिवाक्यशेषबलाच्च दीयमानद्रव्यस्य प्रतिमायां विनियोगः क्रियते।

गन्धस्य लेपनं पुष्पस्य शिरसि दानं अलङ्करणस्याङ्गेषु धारणमेवं-

क्रमेण तेनात्र दानक्रिया । विष्णुलोकावाप्तये नरसिंहपुराणीय ध्वजदानमहं करिष्य इति सङ्कल्पः । ध्वजपूजनं विष्णुमुद्दिश्य पूजनं विष्णवे ददानीति त्यागः । कृतैतद्दानप्रतिष्ठार्थं हिरण्यं दक्षिणां विष्णवे ददानीति सुवर्णदानम् । एवं दानं कृत्वा ध्वजस्य देवालयोपरि धारणम् । दक्षिणा सुवर्णस्य । देवागारे कोणदेशे स्थापनम् । देवद्रव्यं त्वया रक्ष्यमिति विष्वक्सेनस्य प्रतिष्ठाकाले प्रार्थनात् । एवं भूषणदानादौ । दानोत्तरं भूषणस्य प्रतिमाङ्गे धारणम् । एवमन्यदूह्यम् । पूजोपयोगिनाञ्च पूजाकाले विनियोगः । नैवेद्यपाकस्य देवालये विहितत्वात्तदुपयोगि धान्यादि दत्वा तत्पाकादौ विनियोज्यम् ।

यत्तु नरसिंहपुराणे—

चन्दनागुरुश्रीखण्डचन्दनैरच्युताकृतिम् ।
विलिप्य भक्त्या राजेन्द्र कल्पकोटि वसेद् दिवि ॥

यच्च—

ईदृशेनापि चैकेन पद्मेन मधुसूदनम् ।
यदा कदाचिदभ्यर्च्य नरो विष्णुपुरं व्रजेत् ॥

इति तत् पूजाप्रकरणाद् वहिर्यद्यपि श्रूयते तथापि वाक्येन पूजा सम्बन्धे जुहू पर्णमयी न्यायेन फलश्रुतेरर्थवादत्वम् । यद्वा पूजाप्रकरणे पूजाङ्गत्वेन विहितानां पद्मादीनां पुनरनारभ्यवादे फलश्रवणपूर्व्वकं विधानम् । न दानरूपमर्चयति श्रवणात् । नचाप्रकरणतो गुणफलसम्बन्धे वाक्येनैव पूजासम्बन्धे वाक्यभेदापत्तेः । किञ्च फलञ्च कर्म्मसन्निधाविति न्यायेन पद्मार्च्चनं गन्धानुलेपनं वा

क्रियारूपमेव फलाय विधीयते । तत्र च दानत्वाभावान्न दक्षिणादानादिरूपा दानेतिकर्त्तव्यता । न च पूजायां पञ्चोपचारत्वनियमः । केवलगन्धादिसमर्पणस्य पूजात्वात् प्रीतिहेतुक्रियामात्रे पूजाशब्दप्रयोगात् ।

तदुक्तं--

स्तुतेरपिहि पूजात्वाज्ज्ञायेत यदि वाच्यता ।

इति । यस्य प्रकरणात् स्नानं नास्ति तस्यारभ्य विधानादपि पूजासम्बन्धे फलश्रुतेरर्थवादत्वम् । फलाश्रवणे स्पष्टपूजाङ्गत्वम् । यत्र तु पूजाप्रकरणाद् वहिरेव केतकीपुष्पं यो ददातीत्यादिरूपेण पुष्पदानं तत्र दानेतिकर्त्तव्यतया दानम् ।

प्रतिष्ठा च देवानां संक्षेपान्नरसिंहपुराणोक्ता । तत्रादौ मत्स्यपुराणोक्तविधिनाऽर्घ्यः । प्रथमं भूमिसमकरणम् । मातेव पुत्रमिति बलीवर्द्दपूजा । युञ्जान इति बलीवर्द्दयोजनम् । फालसाम्ना फालयोजनम् । शुनंसु फाला इति लाङ्गलपूजा । युनक्ति सीरेति हलवाहनम् । इने दावेति पीड़नम् । इदं भूमिं यां विद्या महीस्याम भूरसि या ओषधीः एतैर्बीजावापः । धान्ये प्ररूढ़े गोभिः खादनम् । तत्र शुभदिने वास्तुपूजा । एकाशीतिपदवास्तुलिखनम् । मध्ये नव पदम् । प्रान्तपंक्तिचतुष्टयमध्यमपञ्चकोष्ठानां स्वस्वान्तरालकोष्ठेन एकीकरणम् । ईशानादिवहिर्द्वात्रिंशत्कोष्ठेषु द्वात्रिंशद्देवता ।

शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यसत्यभृगाकाशा दिशि प्राच्यां व्यवस्थिताः ॥

अग्निः पूषाथ वितथो गृहक्षेत्रयमावपि ।
गन्धर्व्वभृङ्गराजौ च मृग एते तु दक्षिणे ॥
प्रतीच्यां प्रथमं पितृगणा दौवारिकस्ततः ।
सुग्रीवः पुष्पदन्तश्च पञ्चमस्तु जलाधिपः ॥
असुरश्च तथा शेषो वायुरेते प्रकीर्त्तिताः ।
रोगाहिमुखभल्लाटाः सोमसूर्य्योऽदितिस्तथा ॥
दितिश्चैतास्तु विज्ञेया दिश्युदीच्यां व्यवस्थिताः ।

अन्तःकोष्ठस्तु ईशानो द्वितीयकोणकोष्ठे आपः । अन्तराग्नेयकोणकोष्ठे सावित्रिः । नैर्ऋतकोणकोष्ठे जयः । वायव्यकोणकोष्ठे रुद्रः । मध्यनवपदस्य पूर्व्वत्रिपदे अर्य्यमा । आग्नेयतृतीयकोणकोष्ठे सावित्रिः । नवपददक्षिणत्रिपदे विवस्वान् । नैर्ऋततृतीयकोणकोष्ठे विबुधाधिपः । नवपदपश्चिमत्रिपदे मित्रः । वायव्यतृतीयकोणकोष्ठे राजयक्ष्मा । नवपदोत्तरत्रिपदे पृथ्वीधरः । ईशानतृतीयकोणकोष्ठे आपवत्सः । मध्ये नवपदे ब्रह्मा । एषां गन्धादिभिः पदार्थानुसमयेन पूजा । ततः पायसबलिः । एष पायसबलिः शिखिने नम इति मन्त्रेण गृह्योक्तविधिनाग्निमुपसमाधाय शिख्यादिभ्यो दश दश ब्रह्मणे शतं होमः । तत आग्नेये उक्तरीत्या ब्रह्मस्थाने विष्णुपूजनम् । श्रीपूजनम् । गणेशपूजा । वास्तुपुरुषपूजा । मध्ये वस्त्रयुग्मच्छन्नपञ्चरत्नपञ्चपल्लवशोभिततीर्थजलपूर्णार्घ्यकुम्भस्थापनम् । तदुत्तरे तादृशकर्करी । तत्र ब्रह्मपूजा । दिक्ष्विन्द्रादिपूजा । कर्करीं गृहीत्वा प्रासादसीमाप्रादक्षिण्येन जलधाराभ्रामणम् । जलधारायां सप्तबीज-

BIBLIOTHECA INDICA
A COLLECTION OF ORIENTAL WORKS.

नित्याचारप्रदीपः ।

NITYĀCĀRAPRADĪPAḤ

BY
NARASIṂHA VĀJAPEYĪ

EDITED BY
MAHĀMAHOPĀDHYĀYA SADĀŚIVA MIŚRA.

Work Number
160.
Vol. II.
Fasc. V.



Issue Number
1490
New Series.

(Concluding Fasc., Vol. II.)

CALCUTTA:
Printed at the Baptist Mission Press.
Published by the Asiatic Society of Bengal, 1, Park Street.
1928.

Printed by P. Knight, Baptist Mission Press, Calcutta.

NOTICE.

BIBLIOTHECA INDICA

PUBLISHED BY

THE ASIATIC SOCIETY OF BENGAL.

THE Bibliotheca Indica is a collection of works belonging to or treating of Oriental literatures and contains original text editions as well as translations into English, and also bibliographies, dictionaries, grammars, and studies.

The publication was started in 1849, and consists of an Old and a New Series. The New Series was begun in 1860, and is still running.

As a rule the issues in the series consist of fascicles of 96 or 100 pages print, though occasionally numbers are issued of double, triple or larger bulk, and in a few cases even entire works have been published under a single issue number. Several different works are always simultaneously in progress. Each issue bears a consecutive issue number. The Old Series consists of 265 issues; in the New Series, till January 1st, 1928, inclusive, 1492 issues have been published. These 1757 issues represent 243 different works; these works again represent the following literatures :—

Sanskrit, Prakrit.
Rājasthānī, Kāshmīrī, Hindī.
Tibetan.
Arabic, Persian.

Several works published are partly or wholly sold out, others are still incomplete and in progress. A few works, though incomplete, have been discontinued.

Two price lists concerning the Bibliotheca Indica are available and may be had on application. One describes the Sanskritic and the other the Islamic works published in the series. These lists are revised annually.

The standard sizes of the Bibliotheca Indica are three :—

Demy (or small) octavo.
Royal (or large) octavo.
Quarto.

The prices of the Bibliotheca Indica as revised in 1923 are based (with some exceptions) on the following scale per unit of 96 or 100 pages in a fascicle as the case may be :—

Size.	Contents.	Per unit of 96 or 100 pages.
Demy octavo ..	Oriental text only	Rs. 0-12-0
	Text and translation, English notes, etc., mixed; or translation only	,, 1-0-0
Royal octavo ..	Oriental text only	,, 1-0-0
	Text and translation, English notes, etc., mixed; or translation only	,, 1-4-0
Quarto ..	Oriental text only	,, 2-0-0
	Text and translation, English notes, etc., mixed; or translation only	,, 2-8-0

There are some exceptions to this scale, which in each case will be indicated in the price lists. For the calculation of prices each part of a unit in excess of the 96 or 100 pages counts again as a full unit.

Single issues may be bought separately, but three years after the completion of a work no complete sets are broken for the sale of loose component parts.

Each issue bears, besides its issue number, a fascicle number indicating its place in the work and volume to which it belongs.

With the issue of this Notice all previous prices and price lists are cancelled.

CALCUTTA,
1st January, 1928.

The publications or information about them are obtainable from the Asiatic Society of Bengal, No. 1, Park Street, Calcutta, or from the Society's Agents :—

MESSRS. LUZAC & Co., 46, Great Russell Street, London, W.C.

M. PAUL GEUTHNER, 13, Rue Jacob, Paris, VIe.

BUCHHANDLUNG OTTO HARRASSOWITZ, 14, Querstrasse, Leipzig.

MESSRS. THACKER, SPINK & Co., 3, Esplanade, East, Calcutta.

Residents of Europe should order from the Agents.

When ordering direct from the Society the following rules should be observed :—

Orders should be addressed to the Asiatic Society of Bengal and not to any Official by name or title.

All Cheques, Money Orders, etc., should be made payable to the "Treasurer, Asiatic Society of Bengal."

Orders for books should be accompanied by a full name and address, legibly written, and should be sent on a separate sheet of paper containing no other communication.

In India books are supplied by V.-P.P.

वपनम्। वास्तुमध्ये हस्तमात्रखाते चतुरङ्गुलगर्त्ते चन्दनाद्यैर्लिप्ते विष्णुं ध्यात्वार्घदानम्।

भूतानि राक्षसाश्चैव येऽत्र तिष्ठन्ति केचन।
सर्व्वे ते व्यपगच्छन्तु (१)वास्त्वं गृह्णाम्यहं हरेः॥

इति मन्त्रे कर्करीजलेन गर्त्तपूरणम्। तत्र(२) रक्तपुष्पाक्षतन्यासः। दक्षिणावर्त्ते शुभम्। वीजैर्मृद्भिर्गर्त्तपूरणम्। ततः पादसंस्कारः स्मार्त्तेन विधिना। शिलाचतुष्टयस्येष्टकाचतुष्टयस्य वास्तेण चालनम्। पुनर्वक्ष्यमाणनन्दादिमन्त्रैः चालनम्। शिततण्डुलेषु स्थापनम्। नन्दायै नमः। भद्रायै नमः। जयायै नमः। पूर्णायै नमः। इत्येतैर्मन्त्रैर्गन्धाद्यैः पूजा। कोणेषु खातचतुष्टयम्। तत्र स्थाने मन्त्रः।

नन्दे नन्दिनि पुष्यं रक्ष स्थापयाम्यहम्।
अस्मिन् सन्तिष्ठ यावदाचन्द्रतारकम्॥
आयुष्कामं श्रियं मन्ये ददासि सर्व्वदा नृणाम्।
अस्मिन् रक्षा सदा कार्य्या (३)प्रस्तावे रक्ष सर्व्वदा॥

इतीशाने।

भद्रे त्वं सर्व्वदा भद्रं पुंसां कुरु शुभावहाः।
आयुष्कामप्रदे देवि श्रीप्रदा सर्व्वदा भव॥

इत्याग्नेय्याम्।

---

(१) वास्तुपूजामहं। (२) शुक्ल।
(३) प्रासादे।

जये त्वं सर्व्वदा भद्रे! सन्तिष्ठ स्थापिता मया ।
[१]नित्यं जया-त्वहा देवि स्थास्यामि शीघ्रतो भव ॥
इति नैर्ऋत्याम् ।

पूर्णे त्वं हि महावीर्य्ये सर्व्व[२]सम्मोहलक्षणे ।
सर्व्वं सम्पूर्णमेवात्र प्रासादे कुरु सर्व्वदा ॥
इति वायव्ये ।

एवं पाद्यं संस्कृत्य तदुपरि प्रासादघटनामत्स्यपुराणाद्येयाद्यनुसारेण । ततो यथोक्तदिने नरसिंहपुराणोक्तविधिना प्रतिष्ठा । स्वस्तिवाचनसङ्कल्पः ।

पुत्रपौत्रादिकामो मोक्षकामो वा नरसिंहप्रासादप्रतिष्ठामहं करिष्य आचार्य्यकर्म इति। आचार्य्यब्रह्मावरणम्। पुरुषसूक्तपूजाजापककरणं, प्रासादाग्रे चतुर्द्वारमण्डपकरणं, मध्ये अष्टदलपद्मलिखनम्। घटोदकैः प्रतिमास्नापनम् । मण्डपे प्रवेशनं तत्रोत्तरभागे पञ्चगव्येन स्नाप्य उष्णोदकेन स्नपनं। ततः शीतोदकेन हरिद्राकुङ्कुमादियुक्तचन्दनैरुपलेपनम् । वस्त्रमाल्यैरलङ्कृत्य वैष्णवक्षृग्भिः प्रार्थनम् । नद्यां ह्रदे वा नीत्वा प्रवेश्य त्रिरात्रमधिवासनम् । सद्योऽधिवासो वा । तत्र उत्थाप्य पूर्व्ववत् स्नापयित्वा मण्डपे नयनम् । विष्णुमन्त्रैः स्नपनम् । वस्त्रमाल्यरत्नाद्यैरलङ्करणम् । ब्राह्मणभोजनम् । पुष्पाक्षतमिश्रान्नेन दशदिक्षु बलिरिन्द्रः प्रीयतामित्यादिमन्त्रैः । एवं मध्यरात्रे तथोषसि । उदिते वा । मातृभ्यो नमः । विघ्नेशाय

(१) नित्यं जया जयादेवी । (२) सन्दोह ।

नमः । इति उदिते बलिः । प्रभाते पुरुषसूक्तजापकस्य पुरुषसूक्तजपः । आचार्य्यकर्म्म । ततः पुष्पोदकेन प्रासादप्रोक्षणम् । पञ्चगव्यकषायोदकाभ्यां श्रीमन्त्रेण पिण्डिकाक्षालनम् । प्रासादे प्रवेश्य देवमानुषभागयोः किञ्चिदीशानिमाश्रित्य पिण्डिकास्थापनम् । उपोषितो यजमानो द्विजैः सह "उत्तिष्ठ ब्राह्मणस्य त" इति प्रतिमामुत्थाप्य प्रासादद्वारेण प्रवेशपात्रे स्थापयित्वार्घ-पाद्य-मधुपर्कादिभिरभ्यर्च्य मन्त्रेणाच्छादयेत् । आचार्य्यः पिण्डिकागर्त्ते सुवर्णं किञ्चित् दत्त्वा वस्त्रेण गर्त्तमाच्छाद्य पञ्चघोषवाद्यब्रह्मघोषादिषु क्रियमाणेषु ध्रुवसूक्तेन पिण्डिकागर्त्ते देवं स्थापयेत् । "ध्रुवाद्यौ ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत्" । इति मन्त्रः । विष्णुसूक्तेन कुशवारिणा प्रतिमाप्रोक्षणम् । तदग्रेऽग्निमुपसमाधाय परिस्तीर्य्य देवस्य जातकर्म्माद्यर्थं चतस्रः चतस्र आहुतीर्विष्णुगायत्र्या हुत्वा ऐन्द्र्यां त्रातारमिन्द्रमिति याम्यां परेऽपि वासमिति वायव्यामिमं मे वरुण इति यत्ते सोमेति सौम्यां आज्यं चरुं च हुत्वा परो माता तत्त्वेति सूक्ताभ्यां सर्व्वत्राहुतीर्हुत्वा जपं च कुर्य्यात् । यदस्य कर्म्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् अग्निः स्विष्टकृत् दिव्याम् । अर्चं स्तिष्ठन् सुहुतं करोतु । इति स्विष्टकृत् । वस्त्रे द्वे कुण्डले द्वे अङ्गुरीयकं गां काञ्चनं दक्षिणां दद्यात् । तूर्य्यवाद्यवेदध्वनिदीपपताकाछत्रचामरादिषु सत्सु कलशाष्टसहस्रेणाष्टशतेनैकविंशेन वा देवस्य स्नपनम् । ब्राह्मणभोजनं ब्रह्मजापकदक्षिणा च मत्स्यपुराणोक्तविधिना प्रतिष्ठा । प्रासादस्य प्राच्यामुदीच्यां वा दशहस्तचतुर्हस्तावरवेदिकमण्डप-

करणम् । पूर्व्वादिद्वारेषु प्लक्षोदुम्बराश्वत्थवटकृतानि भूपत्रैकहस्तानि चतुर्हस्तोच्छ्रितानि द्वाराणि । उपरि पताकादिपुष्पमालाशोभा । द्वारेष्वष्टौ कलशा वस्त्रयुग्माच्छन्नाश्चन्दनोदकपूर्णाः काञ्चनचूतपल्लवादिगर्भाः अष्टदिक्षु अष्टौ ध्वजाः । त्रातारमिन्द्रं । त्वन्नोऽग्ने । सुयावोदेवाः । असुन्वन्तं तत्त्वया[1] । आनोनियुभिः । वयं सोम । तमीशानम् । आब्रह्मन् नमोऽस्तु सर्पेभ्य इति मन्त्रैस्तत्र लोकपालपूजा । तेभ्यो मासभक्तबलिं च दद्यात् । मण्डपोत्तरे चतुर्भागेन स्नानमण्डपः तत्र कुशास्तरणे प्रतिमास्थापनम् । स्वामिनः शिल्पिपूजा । क्षमध्वमिति वचनम् । आचार्य्याय गोदक्षिणादानम् ।

"नमो भगवते तुभ्यं शिवाय हरये नमः ।
हिरण्यरेतसोविष्णोर्विश्वरूपाय ते नमः" ॥

इत्यामन्त्र्य काञ्चनेन नेत्रज्योतिःप्रकल्पनम् ।

समुद्रज्येष्ठेति पञ्चगव्येन स्नानम् । या आपो देव्या इति कषायेण [2]या सा त्वज्येति मृत्तिकोदकेन । आपो हिष्ठेति भस्मोदकेन एवं शुद्धिं कृत्वा संस्थाप्य गन्धादिभिः पूजा । वस्त्रयुग्मदानम् तेषु ब्राह्मणस्य त इत्युपस्थाप्य रथे तिष्ठेति शिल्पिभिः सह रथे करणम् । आकृष्णेनेति मण्डपे प्रवेशः । शय्यायां कुशपुष्पाण्यास्तीर्य्य प्राङ्मुखे स्थापनम् । आपो देवा आपो अस्मानिति मन्त्राभ्यां वस्त्रकाञ्चनादियुते निद्राकलशस्य शिरःप्रदेशे स्थापनम् । दुकूलपट्टाच्छन्ननेत्रोपधानस्य शिरसि दानम् । मधुसर्पिभ्यामञ्जनम् । सिद्धार्थं प्रयुज्य

(१) असुन्वन्तं तत्वायामि । (२) यासां राजे ।

याते आप्यायस्व याते रुद्रेति मन्त्राभ्यामालम्भः । गन्धपुष्पैः पूजा । वार्हस्पत्येन प्रतिसरबन्धनम् । चित्रवस्त्रैराच्छादनम् । छत्रचामरदर्पणपुष्परत्नौषधिविचित्रशयनास[1]नादिभाजनानि अभित्त्वा शूर इति पार्श्वतः कार्य्याणि । क्षारक्षौद्रघृतपायसभक्ष्यभोज्यषड्विधरसानां समन्ततः स्थापनम् । त्र्यम्बकमिति सर्व्वतो बलिदानम् । मूर्त्तिपानां दिक्षु निविशनम् । गृह्योक्तविधिना आज्यभागान्ते पालाशोदुम्बराश्वत्थापामार्गशमीनां प्रत्येकं शतद्वयेन सह होमः । इन्द्रादित्यादिशान्तिकैः त्र्यम्बकमित्यादिपौष्टिकैर्हुत्वा देवस्य पादस्पर्शनम् । पुनर्हुत्वा नाभिस्पर्शनं पुनर्हुत्वा वक्षस्पर्शनम् । पुनर्हुत्वा शिरःस्पर्शनम् । होमकाले च श्रीसूक्तं यावमानीं च सोमसूक्तं सुमङ्गलम् । शान्तिकया न सूक्तं च रक्षोघ्नं च प्राच्यां व्याहृतिः । रौद्रं पुरुषसूक्तं च श्लोकाध्यायं[2] च सुक्रियम् । [3]मण्डलाध्यायं च दक्षिणे अध्वर्युः ।

वामदेव्यं बृहत्साम ज्येष्ठसामरथान्तरम् । पुरुषसूक्तं शान्तिकं भारुण्डानि च सामानि छन्दोगः पश्चिमे ॥

अथर्वणं अङ्गिरसं नीलरुद्रमपराजिताम् । मधुसूक्तं शान्तिकाध्यायं चोत्तरे आथर्वणो जपेत् । लोकपालेभ्यः ।

"वसुधा वसुरेतांश्च यजमानो दिवाकरः ।
जलं वायुस्तथा सोम आकाशं चेति मूर्त्तयः" ॥

(१) विचित्रभोजनानि । (२) श्लोकाध्ययनं ।
(३) मण्डना ।

शर्वः पशुपति-उग्र रुद्रभव-ईशानमहादेव इति मूर्त्तिभ्यो वैदिकैर्मन्त्रैर्यथाखं होममाचरेत्। हस्तमात्रेषु कुण्डेषु मूर्त्तिगाः सर्व्वतो दिशः। तथा शान्तिघटान् कुर्य्यात्। सर्व्वकुण्डेषु तेषु होमसंपातानयनम्। शतान्ते वा सहस्रान्ते स्रुचा पूर्णाहुतिर्भवेत्।

"समपादस्तथो न्यस्तः समार्द्धमभिनिक्षिपेत्।
मूलमध्योत्तमाङ्गेषु देवस्य च शिरःस्थिते" ॥

पूजा च सम्यक् कार्य्या। सर्व्वेभ्यो वस्त्रादिदानम्। हेमांगुरीयकदानं ब्राह्मणभोजनं नृत्यगीतादि। एवं प्रतिमायाः त्रिरात्रमेकरात्रं वाधिवासं क्वचित् सद्योऽधिवासनम्। पुष्पोदकेन प्रासादप्रोक्षणम्। मन्त्रेण तेन प्रासादमध्ये किञ्चिदीशा[१]नमाश्रित्य कूर्म्मशिला। तदुपरि तदुपमाना[२] ब्रह्मशिला स्थाप्या। ततो देवता-भार्य्याश्रयमन्त्रेण पञ्चगव्येन पिण्डिकाक्षालनम्। ततः कषायोदकेन प्रासादस्य मध्ये ब्रह्मभागः। तत्परितः देवभागः तत्परितो मनुष्यभागः। तत्परितः ईशानभागः। एवं ज्ञात्वा ब्रह्मभागात् किञ्चिदाश्रित्य देवमानुषभागयोः पिण्डिका स्थाप्या। मध्यात् किञ्चिदैशानीं दिशमाश्रित्य। उत्तिष्ठ ब्राह्मणस्पत इति देवोत्थापनं प्रासादमध्ये नयनम्। पीठे स्थापयित्वा पाद्यमधुपर्कादिदानं सर्व्वबीजानि सर्व्वधातूनि सर्व्वरत्नानि सर्वौषधीः स्वलोकपालानामोंकारपूर्व्वं न्यासः। सर्व्वबीजाभावे

(१) किञ्चिदिशानीं। (२) तदुनमाना।

यवाः सर्व्वरत्नाभावे मुक्ताः हरितालम्। सर्व्वधात्वभावे सुवर्णं। सर्व्वौषध्यभावे सहदेवाः एषामष्टदिक्षु प्रत्यावरणे न्यासः ततः स्वस्वदिशि तल्लोकपालमन्त्रः।

"इन्द्रस्तु सर्वदा दीप्तः सर्वदेवाधिपो महान्।
वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः॥
अरुणः पुरुषो दीप्तः सर्वदेवमयोऽव्ययः।
धूमकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः॥
यमश्चोत्पलवर्णाभः किरीटी दण्डधृक् सदा।
सर्वसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः॥
नैर्ऋतस्तु महान् कृष्णः सर्वरक्षोऽधिपो महान्।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः॥
वरुणः पुरुषो दीप्तः सर्वदेवमयोऽव्ययः।
शवलो विष्णुपुरुषो वरुणो निम्नगाधिपः।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः॥
धृतयष्टिसमायुक्तः पवनो मृगवाहनः।
दाध्यक्ष[१] चतुर्वक्त्रस्तस्मै नित्यं नमो नमः॥
गौरी यस्तु पुमान् सौम्यः सर्वौषधिसमन्वितः।
कुवेरोऽथ महाबाहुस्तस्मै नित्यं नमो नमः॥
ईशानः पुरुषः शुक्लः सर्वविद्याधरो महान्।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः॥

(१) होमाध्यक्ष।

पद्मयोनिस्तु मूर्त्तिर्देवानाञ्च पितामहः।
यज्ञाध्यक्षस्तु वक्त्रस्तस्मै नित्यं नमो नमः॥
योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम्।
पुष्पवत् धारयेत् मूर्ध्नि तस्मै नित्यं नमो नमः"॥

रत्नन्यासानन्तरं शुक्लवस्त्रेण गर्त्ताच्छादनं तत्र शुभक्षणे ध्रुवा द्यौरिति मन्त्रेण गर्त्तोपरि स्थापनम्। स्थिरीकरणं देवस्य मस्तके हस्तं दत्त्वा निरञ्जनानन्यब्रह्मत्वेन देवस्य मूर्त्त्यभिन्नत्वेन ध्यात्वा स्वस्य देवेनैक्यचिन्तनम्। देवव्रतसामरुद्रसूक्तपठनम्।

"अतसीपुष्पसङ्काशं शङ्खचक्रगदाधरम्।
संस्थापयामि देवेशं देवो भूत्वा जनार्द्दनम्"॥

इत्युक्त्वा वैष्णववेदमततान्त्रिकस्मार्त्तमन्त्राणां च जपः। स्थापितस्य देवस्य पार्श्वस्थितानां परिचराणां स्मरणम्[१]। ततः पूजा।

आगच्छ भवन्ननुग्रहाय शिवो भव शाश्वतो भव पूजां [२]गृहाण।

ॐ नम इत्यावाहनं। स्वागतं भगवतः सोमाय [३]सशीलाय सपरिवाराय प्रतिगृह्णातु भगवन् मन्त्रपूर्वमिममर्घं पाद्यमाचमनीयमासनं ब्रह्मणा[४]विहितं नमो नमः। स्वाहा यज्ञोपवीतादीनामुपलक्षणात् गन्धादिताम्बूलान्तसमर्पणं च। शुणा हि ब्रह्मदोषैर्दधिक्षीरमधु[५]शर्करापुष्पगन्धोदकैः। यत् जाग्रतः। ततो विराट् सहस्रशीर्षा अभित्वा शूरपुरुष एवेदम्। त्रिपादूर्द्ध्वं येनेदं

(१) स्वीकरणं। (२) प्रतिगृह्णाण। (३) सगणाय।
(४) ब्रह्मणाभिहितं। (५) घृत।

भूतम् इत्येतैः स्नपनं। ततः कृत्वा स्पृशेद्दर्भमूले मध्ये शिरस्यपि। प्रासादोपरि ध्वजारोपणम्। यथोक्तफलकामनया प्रासादोत्सर्गः। विष्णवे [१]इदं शैलमयमिष्टकामयं वा मेरुनामानं मन्दरनामानं प्रासादं ददानीति। ततो यजमानस्य सर्व्वालङ्काराद्यैराचार्य्यब्रह्ममूर्त्तिपानां पूजनम्। अन्येषां च ततस्तु मधुना प्रथमेऽहनि लेपयेत्। हरिद्रासिद्धार्थेन द्वितीये। चन्दनयवैस्तृतीये। मनःशिलाप्रियङ्गुभ्यां चतुर्थे। कृष्ण[२]तिलैः पञ्चमे। "घृतचन्दनकेशरै रोचनानागपुष्पैः। यत्र सद्योऽधिवासः स्यात् तत्र सर्व्वं निवेदयेत्"। सिकतासर्ज्जर-सतैलादिभिः स्वर्णसन्धाने देवस्य निश्चलीकरणम्। चलने महान् दोषः। [३]पुण्याहजयमङ्गलकरणं, त्रिपञ्चसप्त वा दिनानि स्यात् महोत्सवः। चतुर्थे हि महास्नानम्।

"दध्यक्षतकुशाग्राणि क्षीरं दूर्वास्तथा मधु।
यवाः सिद्धार्थकास्तद्वेदष्टांशे योषितैः सह"॥

इत्यर्घदानं कुम्भत्रये। गजाश्वरथवल्मीकवराहोद्धृतवेश्यागारतीर्थह्रदमृदां उद्धृतासीति मन्त्रेण प्रक्षेपः। शन्नोदेवीः आपो हिष्ठेति मन्त्रेण जलपूरणं। तैः स्नपनम्। गायत्र्या[४] गोमूत्रं, गन्धद्वारेति गोमयम्, आप्यायस्वेति पयः। तेजोऽसि इति घृतम्। देवस्य त्वेति कुशोदकं गृहीत्वा सर्व्वेषां पात्रे करणं। तेन

(१) इमं। (२) कृष्णाजिनतिलैः।
(३) अन्नसत्रदानं। (४) सावित्र्या।

स्नपनं। दधिक्राव्णो इति दध्ना[१]। आप्यायस्वेति क्षीरेण, तेजोऽसि इति घृतेन। मधुवातेति मधुना। सरस्वत्यै भेषज्येति पुष्पोदकेन। हिरण्यगर्भ[२]इति रत्नोदकेन। देवस्य त्वेति कुशोदकेन। [३]अङ्गुष्ठाया त्रिफलोदकेन। सावित्र्या गन्धोदकेन स्नापयित्वा सहदेवा व्याघ्रबला अतिबला शङ्खपुष्पा वचासिंहसुवर्चला इति महौषध्यष्टकम्। यवगोधूमनीवारतिलश्यामाकशालिप्रियङ्गुव्रीहीत्यष्टकम् दत्त्वा सुवर्णरूप्यकांस्यानाम् अभावे मूर्त्तिकैः कुम्भैः सहस्रैः [४]पञ्चशतैर्वा षष्टिभिः पञ्चाशद्भिः[५] पञ्चदशभिर्वा स्नपनम्। क्वचित्पात्रे गोमयेन मृदा वा स्वस्तिकशङ्खोत्पलश्रीवत्सदर्पणनन्दावर्त्तानि कृत्वा पञ्चवर्णोदकपञ्चवर्णरजतदूर्व्वाक्षततिलैः कृत्वा तेन नीराजनम्[६]।

"देव[७]सूत्रसमायुक्ते यवदानसमन्विते।
सर्ववर्णप्रभेदे च वाससौ तव निर्मिते" ॥

वस्त्रयुग्ममिदम्।

"शरीरं तेन जानामि चेष्टां नैव च नैव च।
मया निवेदितान् गन्धान् प्रतिगृह्य विलिप्यताम्" ॥

इति कर्पूरकुङ्कुमगन्धदानम्।

"त्वं चन्द्रसूर्य्यज्योतिश्च विद्युदग्निस्तथैव च।
त्वं सर्वज्योतिषां ज्योतिर्दीपोऽयं प्रतिगृह्यताम्" ॥

(१) केवल दध्ना। (२) हिरण्येति।
(३) अग्रब्राह्मी। (४) अष्टशतैर्वा।
(५) त्रिंशद्भिर्वा। (६) शङ्खोदकेनाचमनदानं।
(७) वेद—

इति दीपदानम्। महाभूषाय ते नम इति आभरणदानं। सपञ्चरत्नकरकवस्त्रैश्चतुर्भिः कलशैरष्टभिर्वा देवस्य त्वेति स्नपनं[१] नवग्रहाभिषेकमन्त्रै[२]र्यजमानाभिषेचनम्। यजमानस्य महोपचारेण देवपूजनम्। वस्त्रालङ्कारयज्ञभाण्डमण्डपादीनि आचार्य्याय दानम्। सर्व्वोपायेन आचार्य्यस्य प्रसादनं गृहस्थविप्र एव आचार्य्यः।

पाषण्डिनि कृते कुलक्षयम्। स्मार्त्तमते प्रासादध्वजप्रतिष्ठादेरभावाद्ध्वजारोपणं कृत्वा प्रासादोत्सर्ग एव तत् फलार्थः। प्रासादप्रासादगुणाधिक्यादुत्सर्ग एव विशेषः। इति स्मार्त्तदेवप्रतिष्ठा, पंचरात्रानुसारेण प्रतिष्ठा प्रतिष्ठादीपेऽस्मत्कृते विस्तरेणोक्ता। देवगृहप्रसङ्गात् मनुष्यगृहकरणविधिरुच्यते। पुण्याहे मातृकापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा पूर्णाहुतिवदाज्यं संस्कृत्य स्तम्भस्थापनावटेषु चतुर्षु प्रत्येकमाग्नेयकोणादारभ्यमच्युताय भौमाय स्वाहेत्येका[३]हुतिर्होमः। होमक्रमेण प्रत्यवटं शिलास्थापनम्। तदुपरि स्तम्भोच्छ्रयणमाग्नेयादिक्रमेण। तत्र मन्त्रः।

"इमामुच्छ्रयामि भुवनस्य नाभिं,
वसोर्द्धारां प्रतरणां वसूनाम्।
इहैव ध्रुवां निमिनोमिशालां,
क्षेमे तिष्ठतु घृतमुक्षमाणाः ॥
अश्वावतीगोमतीसूनृताव,
त्युच्छ्रयस्व महते सौभगाय" ॥

(१) आथर्वणैर्नवग्रहैर्होमः।
(२) अभिषेकमन्त्रैर्यजमानाभिषेचनं। (३) एकैकाहुति।

आत्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः ।

आत्वा कुमारस्तरुण [1]आच्छोजपदैः सह । [2]आत्माप्रस्तुतः कुम्भ आदध्नः कलशैरुपचेमस्य पत्नी वृहतीसु वासारयिनो धेहि सुभगेसुवीर्य्यं अश्वावत्गोमद्यजस्वराणं इव । अभिन्नः पूजितारं यिरिदमनश्रेयोऽवसानः । इति चतुर्षु [3]हस्तेषु मन्त्रावृत्तिर्धवल-गृहेष्वनेनैव मन्त्रेण शिलाचतुष्टयस्थापनम् । अथार्द्धनिष्पन्न-शालाकर्म । गृहमध्ये आवसथ्याग्निस्थापनम् । [4]ब्रह्मवरम् । ब्रह्मोप-वेशनम् । अग्नेरुत्तरे जलपूर्णताम्रपात्रस्थापनम् । [5]परिस्तरणम् । पात्रासादनम् । [6]प्रोक्षणासंस्कारपात्रप्रोक्षणाज्यनिर्वज्याधिश्रयणं च ह्यधिश्रयणं श्रुवसम्मार्जनाज्योद्वासनप्रोक्षण्युत्पवनान्ते गृहात् [7]वहिर्गमनम् । ब्रह्मन् प्रवेशामीति प्रश्नः । प्रविशेति ब्रह्मानु-ज्ञातस्य प्रवेशः । ऋतं प्रपद्ये शिवं प्रपद्ये । इति मन्त्रेण प्रवेशः, उपविश्य औपयमनकुशादानसमिधादानं पर्य्युक्षणानि ।

अथ होमः । आज्येन षड़ाहुतयः । इह रति विहरमध्यमिह धृतिरिह स्वधृतिः स्वाहा । इदं अग्नये । उपसृजं धरुणमात्रे धरुणो मान्तरं धयताराय स्फोषमस्मासु दधरत् स्वाहा । इदमग्नये ।

वास्तोष्पते प्रतिजानाम्यस्मांत्स्वां वेशो अनमीवो भवानः । मत्ते मह्रे प्रतितन्नो जुषस्व शन्नोभव द्विपदेसं चतुष्पदे स्वाहा ।

---

(१) आवत्सोजपदैः सह । (२) आत्वा । (३) स्तम्भेषु ।
(४) निरग्नेलौकिकाग्निस्थापनं । (५) ततः प्रणीताप्रणायनं ।
(६) प्रोक्षणाज्यचरुर्वाज्याधिश्रयणं । (७) गृहाभिमुखस्य प्रश्नः ।

इदं वास्तोष्पतये । वास्तोष्पते प्रतिरण्येन एधि चायस्फा नोगोभि-रश्वेभिरेधि[1] । अजरास्ते राचेम पितेव पुत्रान् जुषस्व शन्नो भव द्विपदेसं चतुष्पदे स्वाहा । इदं वास्तोष्पतये वास्तोष्पतेशश्वयट् संसजाते महामह्विरण्मथाशातु मया ।

पाहि चेड़पयोगे च रन्नो यूयं पातस्वस्तिभिः । सदा नः स्वाहा । इदं वास्तोष्पतये । अमीवहा वास्तोष्पते विशरूपाण्या विशत् सखासुच्चेव एधिनः स्वाहा । इदं वास्तोष्पतये । तत्र आघारावाज्यभागौ तत्र स्थालीपाकाहुतयः । अग्निमिन्द्रं वृहस्पतिं विश्वेदेवापनुत्तये । सरस्वतीं वाच वाजिनं च वास्तुदत्तवाजिनः स्वाहा । इदमग्नये इन्द्राय वृहस्पतये विश्वेभ्यो देवेभ्यः सरस्वत्यै वाजिने ।

"सर्पदेवजनाः सर्व्वान् हिमवन्तं सुदर्शनम् ।
वसुंश्च रुद्रानादित्यानीशानं जगवै[2] सह ॥
एतान् सर्व्वान् प्रपद्येऽहं वास्तु मे दत्तवाजिनः स्वाहा"[3] ॥
इदं कर्त्रे विकर्त्रे विश्वकर्मणे ओषधीभ्यः वनस्पतिभ्यः ।
"धातारं च विधातारं निधीनां च पतिं सह ।
एतान् सर्व्वान् प्रपद्येऽहं वास्तु मे दत्तवाजिनः स्वाहा ॥
इदं धात्रे विधात्रे च निधीनां पतये नमः ।
श्योनं[4] शुभमापदं वास्तुदत्तं ब्रह्मप्रजापतिम्" ॥

---

(१) रिन्दो । (२) जगदै ।
(३) इदं सर्वदेवजनेभ्यो हिमवते सुदर्शनाय । (४) स्योनं ।

सर्वाश्च देवताः स्वाहा । इदं ब्रह्मप्रजापतिभ्यां सर्वाश्च देवताभ्यः । स्थालीपाकेन स्विष्टकृत् । भूरादिप्राजापत्यान्तम् । प्राशनम् । मार्जनं, ब्रह्मणे दक्षिणादानम् । कांशपात्रे सम्भारः । सक्षीराण्यौदुम्बराणि । दूर्वा-गोमय-दधि-घृत-कुश-यवानां चतुः-सम्भारैः वा सदन्त[१]स्थानेषु प्रोक्षणम् । अथ गृहस्य पूर्व्वे सन्धौ स्पर्शनम् । पूर्व्वकोणे मन्त्रपाठः । श्रीश्च ताशश्च पूर्व्वे सन्धौ गोपात्रयताम्[२] । इति यश्चत्वा सन्धौ गोपायेन[३] तामिति । दक्षिणांश-सन्धावभिन्नाशतियज्ञस्त्वादक्षिणा च दक्षिणसन्धौ गोपायेतामिति । अन्नं च त्वा ब्राह्मणश्च पश्चिमे सन्धौ गोपायेतामिति पश्चिमे सन्धौ । उज्झित्वा सुनृता च मा उत्तरे सन्धौ गोपायेतामिति [४]उत्तरसन्ध्य-मदर्शनम् । केता च मासुकेता च पुरस्तात् गोपायेतामित्यग्नि-र्वैके तातौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पुरस्तात् गोपायेता-मित्यनेन प्रत्युपस्थापनम् । गोपायमाना च वक्ष्यमाणा च दक्षिणतो गोपायेतामिह वै गोपायनम् । रात्रिं च रक्षणाते[५] प्रपद्ये ताभ्यां नमोऽस्तु ते नो दक्षिणतो गोपायेतामित्यनेन मन्त्रेण वा व्युपस्थापनम् । इति श्रृजागृविशपश्चात् गोपायेता-मित्यन्नं वै दितिः प्राणोजाश्च विस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पश्चात् गोपायेतामित्यनेन प्रत्युपस्थापनम् ।

---

(१) गर्त्तस्थानेषु । (२) गोपायनिति ।
(३) गोपायतामिति । (४) उत्तरसन्धावभिमर्शनं ।
(५) रक्षमाणाते प्रपदेय ।

अस्वप्नश्चानवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमादाय स्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मोत्तरतो गोपायेता-मित्यनेन उदीच्युपस्थापनम् । ततः[१] पवित्रप्रतिपत्तिः प्रणीता-विमोकः । इत्यनिष्ठितकर्म । प्रवेशविधिः । सम्पूर्णे गृहकर्मणि ज्योतिःशास्त्रोक्तेऽहनि नववेश्मन इति वचनात् मत्पूजापूर्व्वक-माभ्युदयिकम् । उदकपात्रस्य धान्यस्य गृहे स्थापनं मङ्गलवाद्य-ब्रह्मघोषादिषु क्रियमाणेषु गृहं मङ्गल्यशोभितम् कृत्वा पूर्ण-कुम्भं द्विजानग्रतः कृत्वा सुवेशपुत्रदारसहितः शालाद्वारेण प्रविशति गोष्ठदत्तकरः प्रवेशमन्त्रः । "धर्मस्थूणा राज श्रीस्तूय-महोरात्रे द्वारफलके इन्द्रस्य गृहावसुमतो वरुणस्य नस्तानहं प्रपद्ये सहप्रजया सह पशुभिर्यन्मे किञ्चिदस्त्युपहृता सर्पगणाः सखायः साधुसंवृतः । तां त्वा शाले वीरा गृहा नः सन्तु सर्व्वतः" । इति प्रविश्य देवब्राह्मणपूजनम् । ब्राह्मणभोजनम् । यथोक्तरूपेण वास्तुपूजा च होमान्ता । प्रविशेऽपि विधानात् । तत्र गृहप्रवेश-काले च सर्व्वसम्पत्समृद्धये इति वचनात् त्र्यम्बकेन पायसचरु-होमपुष्ट्यर्थः । इति गृहप्रवेशविधिः ।

अथ पूर्त्तं हयशीर्षे । अश्वमेधसहस्रं यः समाचरेत् । एकाहं स्थापयेत् तोयं तत्पुण्यमधिकं विदुः । सर्व्वकर्मसुसम्पूर्णं वैदूर्य्य-मणितोरणम् ।

"विमानं कामगं दिव्यं दिव्यस्त्रीगणशोभितम् ।
सौवर्णं शक्रलोके तु प्राप्नुयात् कूपकृन्नरः ॥

---

(१) अथ—

एवं वाप्यादिकर्त्तॄणां फलं स्यादुत्तरोत्तरम् ।
वर्षाकाले जलं यस्य तडागे तिष्ठति द्विजाः ॥
स स्वर्गलोकं संप्राप्य वर्षकोट्ययुतं वसेत् ।
शरत्काले जलं यस्य जलाधारे तु तिष्ठति ॥
न दुर्गतिमवाप्नोति पापकर्मापि यो नरः ।
हेमन्ते यस्य पानीयं तडागे तिष्ठति द्विज ! ॥
शतमन्वन्तरं सोऽपि स्वर्गलोके महीयते ॥
शिशिरे यस्य पानीयं तडागे स प्रतिष्ठति ।
सप्तमन्वन्तरं यावत् चन्द्रलोके महीयते ॥
वसन्ते यस्य सलिलं तडागे भुवि तिष्ठति ।
ब्रह्मलोके स वसति यावदिन्द्राश्चतुर्द्दश ॥
निदाघे यस्य सलिलं तडागे तिष्ठतेऽमलम् ।
स ब्रह्मलोकमाप्नोति यावदाभूतसंप्लवम् ॥
तृषितं गोकुलं ग्रीष्मे तडागे यस्य तृप्यति ।
न तस्य दुष्कृतं किञ्चित् इह पश्यामि सर्व्वदा ॥
ब्राह्मणास्तृषितास्तोयं पिबन्ति यस्य निर्मलम् ।
तडागे घर्मसमये स याति परमां गतिम्" ॥ श्रुतिः ।
स्थालायोदकं गृह्णाति । स्थल एकजलकरणं स्थातेनेत्यर्थः ।

महाभारते,

"कुलं सन्तारयेत् सर्व्वं यस्तु पाने जलाशयः ।
तडागे यस्य यावन्तः पिबन्ति [१]तृषितं जलम् ॥

(१) ह्र ।

मृगपक्षिमनुष्याश्च सोऽश्वमेधफलं लभेत ।
यत् पिबन्ति जले तत्र स्नान्ति वा विश्रमन्ति च ।
तडागकर्त्तुस्तत्सर्व्वं प्रेत्यानन्ताय कल्पते" ॥

तत्रैव,

"वर्षाकाले तडागे तु पानीयं यस्य तिष्ठति" ॥

तस्याग्निहोत्रफलं निदाघकाले जलसत्रे वा जलपेयफलं

विष्णुधर्मोत्तरे,—

"शस्यानां रोचनार्थाय नदीबन्धे तथा दृढे ।
अन्नदः प्राणदश्चैव पानदश्च सदा भवेत् ॥
भगीरथस्य लोकांस्तु समवाप्य न संशयः ।
पानीयशोधनं कृत्वा ह्रदे देवविनिर्मिते ।
पुरुषः फलमाप्नोति दशगोदानजं द्विजः" ॥
दारुपाषाणरचितं सुखसेव्यं जलाशयं ।
पुराणं मानवः कृत्वा [१]नाकलोके महीयते ।
प्रणालकरणात्तत्र तृप्तिमाप्नोत्यनुत्तमाम् ।
स्ववाङ्खातं यः कुर्य्याद्राजसूयाश्वमेधभाक् ।

यमः,—

यस्य वप्रेऽथ गौरेका पिबते सलिलं क्वचित् ।
तडागं [२]प्रथमं कृत्वा स्वर्गे [३]दशसुखान् वसेत् ।

(१) नागलोके । (२) तादृशं ।
(३) दशयुगान् ।

विष्णुः,—

कूपकर्त्तुस्तत्क्षते पानीये दुष्कृतं नश्यति ।

विष्णुपुराणे,—

सेतुबन्धकरा ये च तीर्थशौचकराश्च ये ।
तडागकूपकर्त्तारो [१]मुच्यन्तेऽ[२]तिभयाकूले ॥
चतुर्विंशाङ्गुलो हस्तश्चतुर्भिश्च करैर्द्धनुः ।
एकधन्वादित्रय्यान्तं कूपमानमुदाहृतम् ॥
शतधन्वन्तरा वापी पुष्करिण्यश्चतुर्गुणाः ।
सहस्रेण तडागः स्यादयुतेन तु सागरः ॥
त्रिगुणा दीर्घिका प्रोक्ता महत्पूर्वंचतुर्गुणा ।

तथा,—

[३]खातत्रिराशिका जंघा कर्त्तव्या सुपरिचिता ।
तद्बाह्ये भित्तयः कार्य्या वर्त्तुलाः पर्व्वतोपमाः ॥

देवीपुराणे,—

वाजिमेधक्रतुर्यद्वत् सोपायं पुण्यदो भवेत् ।
वारिबन्धस्तथा तत्र पुण्यदो जायते नृणां ॥
[४]कुर्य्यात्तानि तडागानि अष्टौ पापहराणि च ।
तेषु [५]वारिभये श्रेष्ठो देवश्रमसमन्वितः ॥

---

(१) पच्यते। (२) अतिभयादृते।
(३) खातत्र्यांयांशका। (४) उपान्तानि।
(५) द्वारिभवे।

तथा,—

[१]वारिबन्धः शिवोपेतः शक्तिर्वैनायकैर्युतः ।

तथा,—

[२]कूले चारामभूषितं सर्वकामफलप्रदम् ।

बन्धने [३]वारिरचेण वारिबन्धः। पर्व्वतादिसमीपे [४]बन्धनं कृत्वा जलस्थापनम् । तच्च दीर्घिकापेक्षाया अधिकपरिमाणपर्य्यन्तम् । तस्य समन्तादारामदेवतायतनकरणमित्येवं रूपं एवं जलाशयं कृत्वा प्रतिष्ठायां कृतायां यथोक्तफलम् । अन्यथा जलपात्रकरणे जलदानोपकारफलम् ।

यद्वा,— तडागे यस्य पानीयं तिष्ठतीत्यादिफलमपि स्यादेवानुत्सर्गेऽपीति वदन्ति। जलाशयं चिकीर्षोः शुभदिने जलाशयार्थं [५]भूपरिग्रहः ।

"अत्र ये जन्तवः स्थूला ये च सूक्ष्मा जलाशये ।
मया संप्रार्थिताः सर्वे [६]इन्द्रोऽन्यत्र विराजते ॥
नमाम्यष्टकुलादिभ्यो वीराणां पतये नमः ।
भूशया येऽत्र तिष्ठन्ति ये तिष्ठन्ति जलाशयाः ॥
जलाशयात् जलाधारादतोऽन्यत्र व्रजन्तु ते ।
नो यावत् साध्यते खातः पुण्यप्रस्रवबिन्दुभिः ॥
तावदन्यत्र तिष्ठन्ति प्रार्थितास्ते सुखासिनः[७]" ।

---

(१) द्वारि। (२) तथा कूपजलाराम।
(३) बन्धेन वारिरक्षणं वारिबन्धः। (४) सर्व्वत्र।
(५) भूमिप्रतिग्रहः। (६) इतोऽन्यत्र व्रजन्तु ते। (७) सुखार्थिनः।

इह भूपरिग्रहः तत्र स्वस्तिवाच्य संकल्प्य[१] आचार्य्यब्रह्मणोर्वरणं। आचार्य्यकर्म। अष्टदिक्षु [२]मासरक्तेन क्रूरभूतवलिः।

वास्तुपूजा।

द्वादशकोष्ठे मण्डले कृतकोणसूत्रे ईशकोणादिषु।

शिखिपर्ज्जन्यजयन्तशक्रभारसत्यभृशान्तरीक्षाः।

आग्नेयादिषु पूषवितथ [३]गृहक्षतयमगन्धर्व [४]भृंगराजमृगाः। नैर्ऋतकोणादिषु पितृदौवारिकसुग्रीवपुष्पदन्तवरुणासुरशोषरोगाः। वायुकोणादिषु [५]रोगाहि-मुख्यभल्लाटकसोम[६]सूर्य्यादितिदितयः इति वाह्ये द्वात्रिंशत्। अथ मध्ये। मध्यकोष्ठात् पूर्व्वपंक्तिद्वये [७]दशकोष्ठे अर्य्यमा। आग्नेये कोष्ठद्वये सविता। सावित्री। दक्षिणपंक्तिद्वये दशकोष्ठे विवस्वान्। नैर्ऋते कोणद्वये कोष्ठे इन्द्र इन्द्रजयः। पश्चिमदशकोष्ठे मित्रः। वायव्यकोणकोष्ठद्वये रुद्ररुद्रजयौ। उत्तरदशकोष्ठे धराधरः। ईशानकोणकोष्ठद्वये आप आपवत्सौ। मध्ये ब्रह्मा। ऐशाने चरकी। आग्नेये [८]विदारी। नैर्ऋते पूतना। वायव्ये पापराक्षसी। पूर्व्वे स्कन्दः। दक्षिणे अर्य्यमा। पश्चात् जृम्भकः। उत्तरे पिलिपिच्छः। कुशदध्यक्षतगन्धादिभिरेषां पूजा। दुग्धान्नेन वलिः। ऐशान्यां कुण्डे स्थण्डिले वाग्निसंस्कारः। ऋतुमन्त्वशक्तिं विचिन्त्य योनौ

(१) संकल्पः। (२) मासभक्तेन।
(३) गृहक्षेत्र। (४) भृशामृगाः।
(५) नाग। (६) गिरिश्रीअदितिदितयः।
(७) द्वादश। (८) विदां।

वरुणवीजमग्निं संस्थाप्य गृह्योक्तविधिना वारुणाग्नेर्गर्भाधानादि [१]विहातुं प्रत्येकं मूलेनाष्टाहुतिहोमं कृत्वा [२]आघारावाद्यभागे होमः। [३]शिखादिभ्य एकैकाहुतिः। ब्रह्मणे दश। मण्डलवाह्ये हैमन्तकं त्रिपुरघ्नं विरूपाक्षं द्विजिह्वं [४]कालकरालिनं [५]एकाग्रभीमं इत्यष्टक्षेत्रपालार्चनं।

ग्रहमण्डले ग्रहपूजनम्।

पृथक्पद्मे अनन्तवासुकितक्षककर्कोटकशंखकुलिकपद्ममहापद्म इति नागानां पद्मा[६]चपला-सुपथ्या-सुमध्या-श्रिया दधिश्रिया दधिप्रिया श्वेतमुखी सुनेत्रा सुगन्धिनीति नागपत्नीनां च पूजनं। मण्डलमध्ये वेद्यां पञ्चधान्योपरि वस्त्रपुष्पकुशतिलयवफलशरावपंचरत्नयुक्ततोयपूर्णतण्डुलफलसमवपिहितं कुम्भं संस्थाप्य तत्र हंसपृष्ठस्थमभयनागपाशहस्तं वरुणं संस्थाप्य संपूज्य [७]दिक्पालपत्नीभ्य एकैकं, वरुणाय शतं हुत्वान्यं पीठवरुणेभ्यश्च हुत्वा [८]गृहशेषं संस्थाप्य पूर्णाहुतिं हुत्वा प्रागाद्यैशानान्तजलं सिंचन् कलशं जलाशयसीमान्तं भ्रामयेत्। स्वं तु [९]कुद्दालेन त्रिः खात्वा[१०] रूप्यपात्रे मृदं शिरसादाय यजमान ऐशान्यां क्षिपेत्। मधुघृतक्षीरैः खातमापूर्य्य गङ्गा-यमुना-सरस्वती-मूर्त्तीर्ध्यात्वा

(१) विवाहान्तं। (२) आघारावाज्यहोमः।
(३) ईशानादिभ्यः। (४) कालीकराली।
(५) एकांघ्रिभीमे। (६) उत्पन्ना।
(७) दिक्पालनागनागिनीभ्यः। (८) शेषं समाप्य।
(९) स्वर्णकुद्दालेन। (१०) खनित्वा।

पुंवत्सां धेनुमाचार्य्याय दद्यात्। अष्टमीं चतुर्द्दशीं हित्वा प्रत्यहं स्नानयेत्। जीर्णसंस्कारे पूर्व्वं यष्टिं न चालयेत्। इति जलाशयार्धविधिः।

[१]निष्पन्ने ते यूपयष्टिः कर्त्तव्या। मथादिकां [२]काष्टां त्यक्त्वा ऐशान्ये वास्तुपूजाहोमौ। [३]युपो प्रायः च तुल्यांशं खात्वा हस्त-मिताष्टाङ्गुलोच्छ्रितां शिलां [४]ऐष्टिके। इष्टकां प्रक्षाल्य गन्धपुष्पैरभ्यर्च्य पञ्चरत्नौषधियुतं कुम्भं संस्थाप्य तदुपरि शिला-न्यासः। तत्र मन्त्रः।

[५]आद्यंशे चाक्षते पूर्णे [६]मूले [७]लङ्गीरसः सुते।

अभ्यर्च्चिते प्रयक्तेष्टं प्रतिष्ठां कारयाम्यहमिति भूमौ प्रणामः।

स्तम्भकुले स्थिराहुतिर्होमः। स्थिराय स्वाहा। अप्रणाशाय स्वाहा। आदिबोधाय स्वाहा। नित्याय स्वाहा। पर्व्वताय स्वाहा। अविनाशिने स्वाहा। दृशाय स्वाहेति मन्त्र। आचार्य्याय धेनुं दद्यात्। तत्र यूपयष्टिघटनं। खातसमं द्विहस्तादिकं वा चतुस्त्रिद्व्येक[८]पटकं कृत्वा तत्र वरुणस्थापनं। काष्ठयूपो वा मधु-खदिरविल्वादिसारदारुकाष्ठं कलशमस्तकं घटयित्वा गर्त्तं कृत्वा गर्त्ते रत्नौषधिदूर्व्वाव्रीहीणां प्रक्षेपं कृत्वा तस्मिन् यूपारोपणम्। निश्चलीकृत्य स्थिराहुतयः। कूपे तु न यूपादरः।

(१) निष्पन्ने खाते। (२) काषिकां।
(३) यूपोच्छ्रायंतेवांशं। (४) ऐशाने।
(५) अव्यङ्गे। (६) मुने।
(७) रङ्गरसः। (८) पटलं।

अथ प्रतिष्ठा, नारदीयोक्तसंक्षेपविधिः। पश्चिमे दशहस्त-मण्डपः मध्ये अर्द्धभागेन वेदी। यजमानस्य स्वस्तिवाचनं, संकल्पः, आचार्य्यब्रह्मणोर्वरणं। आचार्य्यकर्म। हैमं रौप्यं वा वरुणं कृत्वा पीठे स्थापनं। तत्पश्चिमे [१]कुशे गृह्योक्तवेदविधिना आज्यभागान्तं कृत्वा आज्येन गायत्र्या [२]शतहोमः। उत्तरे [३]वरुणपीठे वरुणस्थापनं। आपो हिष्ठेति तिसृभिः जलकुम्भैः स्नपनं। गन्धद्वारेति गन्धोदकेन। पावकानः सरस्वतीति तीर्थ-वारिणा। वेद्यां स्थापयित्वा वस्त्रेण सपवित्रेण आच्छाद्य रात्रौ जागरणं। प्रभाते गायत्र्या गोत्रयदोहनं तत्पयसा चरुश्रपणं। अग्नये सूर्य्याय प्रजापतये दिवेऽन्तरीक्षाय पृथिव्यै हराय अन्तरीक्षाय। [४]दिविसते उग्राय भीमाय [५]भौमाय रौद्राय वैष्णवे इन्द्रायाग्नये यमाय नैर्ऋताय वरुणाय वायवे कुवेराय ईशानाय ब्रह्मणे अनन्ताय [६]महाराजाय वरुणाय च हुत्वा दधिसर्पिषा इदं विष्णुरिति होमः। दशदिक्षु दिक्पालेभ्यो-माषभक्तबलिदानम्।

"मन्त्राय सदारापत्यभृत्याय कोटिसंघवृताय च।
बलिं ददाति शक्राय शक्रो गृह्णाति मे बलिं"॥

"बलिं ददाम्यग्नये अग्निर्गृह्णातु मे बलिं"। दशदिक्षु इन्द्राय नमः इति बलिहरणं इति माषभक्तबलिदानं।

शान्तिवारिणा वरुणप्रतिमासेचनम्।

(१) कुम्भे। (२) अष्टोत्तरशत। (३) भद्र।
(४) द्विषते। (५) भौमाय। (६) महीराजाय।

उत्थाप्य रथे कृत्वा जलाशयं त्रिः सप्त वा भ्रामयित्वा आपोहिष्ठेति जलमध्ये क्षिपेत् । ब्रह्मघोषादौ क्रियमाणे यूपं कृत्वा वरुणं ध्यात्वा सर्वमापोमयं ध्यात्वा यज्ञाय किंचित् वृक्षजं यूपं गन्धादिभिः पूजयित्वा प्रणिपत्य शान्तिमवधार्य्य दक्षिणादानं । ब्राह्मणभोजनं । आब्रह्मस्तम्बपर्य्यन्तं सर्व्वभूतेभ्योऽमुं जलाशयमुत्सृजेत् ।

"आब्रह्मस्तम्बपर्य्यन्तं ये केचित् सलिलार्थिनः ।
ते तृप्तिमनुगच्छन्तु मद्दत्तेनैव वारिणा" ॥

इति प्रार्थनं । आपो हिष्ठेति तिसृभि[१]र्गव्यप्रक्षेपः । तीर्थतोयस्य शान्तितोयेन ध्वजं प्रोक्ष्य ध्वजदण्डं यूपे दत्त्वा ध्वजशीर्षसलाजतण्डुलं कांस्यपात्रे कृत्वा कांस्यपात्रं शिरसि कृत्वा जलाशयं प्रदक्षिणीकृत्य ध्वजमुत्सृजेदिति ।

"हैमाक्तं रूप्यजं वापि वरुणं हंसपृष्ठकम् ।
नागपाशधरं वामे दक्षिणेनाभयप्रदम् ॥
कूपे तु द्व्यङ्गुलं वाप्यां त्र्यङ्गुलं चतुरङ्गुलम् ।
पुष्करिण्यां तडागे च पंचाङ्गुलमथेच्छया" ॥

अत्र वह्वृचोक्तसंक्षेपविधिः । वापीकूपतडागयज्ञविधिं व्याख्यास्यामः । [२]पुण्ये तीर्थकरणेषु शुभनक्षत्रे प्राचीं दिशमास्थाय प्राक्प्रवण उदक्प्रवण उदक्प्रवणेनाग्निमुपसमाधाय वारुणं चरुं श्रपयित्वा आज्यभागान्तं कृत्वा आज्याहुतीर्जुहुयात् । "समुद्रज्येष्ठ" इति प्रत्यृचं ।

(१) पंचगव्य । (२) पुण्यतिथिकरणेषु ।

"समुद्रज्येष्ठाः सलिलस्य मध्यात्,
पुनाना[१]यन्त्यनिविशमानाः ।
[२]इन्द्रो या वज्री वृषभो[३]रराद ता,
आपोदेवीरिह मामवन्तु स्वाहा" ॥
"यासां राजा वरुणो याति मध्ये,
सत्यानृते अवपश्यन्जनानां ।
मधुश्चुतः शुचयो याः पावकास्ता,
आपोदेवीरिह मामवन्तु स्वाहा ॥
यासु राजा वरुणो यासु सोमो,
विश्वेदेवा यासूर्जं मदन्ति ।
वैश्वानरोयास्वग्निः प्रविष्टस्ता
आपोदेवीरिह मामवन्तु स्वाहा ॥

ततो वरुणाया[४]ष्टार्चेण चरुहोमः ।

तत्त्वायामि ब्रह्मणा वन्दमानः तदाशास्ते यजमानोहविर्भिः"। "अहेलमानो वरुणेह बोध्युरुशं समान आयुः प्रमोषीः स्वाहा । तदिन्नक्तं तद्दिवामह्यमाहु स्तदयं[५] केतो हृद आविचष्टे"। "शुनः शेफोयमह्वद्गृभीतः सोऽस्मान्राजा वरुणो मुमोक्तु स्वाहा"।

"शुनः शेफोह्यह्वद् गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः"।

"अवैनं राजा वरुणो ससृज्याद्विद्वाँ अदब्धोविमुमोक्तु पाशान् स्वाहा ।

(१) यञ्जलि । (२) इन्द्रावज्री । (३) रराणः ।
(४) असुर्चेण । (५) स्तदयं ।

अवते हेलो वरुण नमोभिरवयज्ञेभिरीमहे हविर्भिः। चयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि: स्वाहा। उदुत्तमं, त्वंनो अग्ने, इमं मे वरुण। ततश्चरारेव स्विष्टकृत्। भूरादिप्राजापत्यान्ते पूर्णाहुतिं मूर्द्धानं दिवमिति। मार्ज-नान्तेन्द्रारणं। नैर्ऋत्या धेनोः प्रविशताचया अनुमन्त्रणं। नैर्ऋत्यादीशानान्तं धेनुतारणं जले। कूपे जलपार्श्वे अनुमन्त्रणे मन्त्रः। इदं सलिलं पवित्रं कुरुष्व शुद्धः पूतोऽमृतस्वर्णं नित्यं। चारयन्ति सर्व्वतीर्थाभिषिक्ता लोकालोकं चरन्ति नावेति। पुच्छाग्रे स्वयं लग्न आरुह्य तारयेत् ततः मन्त्रः। आगो अस्मा इत्यादि एमा[१]त्यन्तं। "स्वयं शुद्धा व्यजमानस्य तारणं सुयवसा भगवती भूया अथो वयं भगवतः साम[२]। अद्धि तृणमग्न्ये विश्वदानीं पिब," शुद्धमुदकमाचरन्तीत्यनेन। ऐशान्यां धेनुस्थापनं हिंकृन्वती वसूपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् दुहामि स्विभ्यां पयोऽघ्नेयं सा वर्द्धतां महते सौभ-गायेति। गोर्हिंकारे सति। सचेलाकरटीकांचनशृङ्गारौप्य-खुराकांस्यदोहागोर्द्दिचणा[३]। शक्त्या वा कांचनादिकं किंचित्। तत उत्सर्गः। देशकालवाक्यानन्तरं देवपितृमनुष्याः प्रीयन्तां आब्रह्मस्तम्बपर्य्यन्तं सर्वभूतेभ्य इदं सलिलाश्रयाय समुत्सृजेत्। ब्राह्मणभोजनं स्वस्तिवाचनं इति जलाशयप्रतिष्ठा।

---

(१) एमा—। (२) स्याम। (३) दक्षिणा।

अथ वृक्षारोपणं।

तद्विधया आरामकरणं। पथि वृक्षारोपणं च।

"यः कूपारामकारी च तथा वृक्षप्ररोपकः।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम्" ॥

शावभाष्ये,—

आरामकृत् देवदत्तो नियतो स स्वर्गे इति। लोकप्रसिद्धि-प्रमाणमात्रं।

महाभारते,—

"किन्नरोरगरक्षांसि देवगन्धर्वमानवाः।
तथा महर्षयश्चैव संश्रयन्ति महीरुहान्।
पुष्पिताः फलवन्तश्च तर्पयन्तीह मानवान्।
वृक्षदं पुत्रवत् वृक्षा तारयन्ति परत्र च॥
तस्मात्तडागे रोप्या वै रक्षाश्रयोऽर्थिभिः सदा।
पुत्रवत्परिपाल्याश्च पुत्रास्ते धर्मतः स्मृताः" ॥

विष्णुः,— "वृक्षारोपयितुर्वृक्षाः परलोके पुत्रा भवन्ति"।

पद्मपुराणे,—

"अपुत्रस्य च पुत्रत्वं पादपा इह कुर्वते।
यच्छन्ति रोपकेभ्यश्च सुतीर्थे तर्पणादिकम्" ॥

तर्पणजन्यतृप्तिं कुर्वन्तीत्यर्थः।

"यत्नेनापि च राजेन्द्र! पिप्पलारोपणं कुरु।
स ते पुत्रसहस्राणामेक एव करिष्यति" ॥

पुत्रं सहस्रं कर्त्तव्यं करिष्यतीत्यर्थः।

तथा,—

“ धनी चाश्वत्थवृक्षेण अशोकः शोकनाशनः ।
प्लक्षो यज्ञप्रदः प्रोक्तः शिरस्त्वायुःप्रदः स्मृतः ॥
जम्बुकी कन्यका:[1] प्रोक्ता भार्य्यादा दाडिमी तथा ।
रोगनाशाय पालाशो चिरं ब्रह्मप्रदः सदा ॥
प्रेतत्वं जायते पुंसो [2]रोपितेन विभीतके ।
निम्बप्ररोपको यस्तु तस्य तुष्टो दिवाकरः ॥
श्रीवृक्षे शंकरो देवः पाटलायान्तु पार्वती ।
पुत्त्रप्रदायकश्चैव चन्दनः पनशस्तथा ॥
सौभाग्यदश्चम्पकश्च करीरे पारदारिकः ।
अपत्यनाशकस्तालो वकूलो दस्युदस्तथा ॥
बहुभार्य्या नारिकेली द्राक्षा सर्व्वाङ्गसुन्दरी ।
रतिप्रदा तथा केलिर्मोचकी शत्रुनाशिनी ” ॥

केलिः कदली, मोचकी शाल्मली ।

भविष्यपुराणे,—

“ बहुभिः किन्नु संजातैः पुत्त्रैर्द्धर्मार्थवर्जितैः ।
वरमेकः पथि तरुर्यत्र विश्रमते जनः ” ॥

तथा,—

पत्त्रैर्देवान् फलैः पितॄन् तत्करोत्यग्निहोत्रं न स्वाध्यायान्वितः सुतः ।

(१) कन्यदा । (२) रोपणेन ।

“ यत्करोति घनच्छायां पादपः पथि रोपितः ।
स छाया च सपुष्पा च सफला वृक्षवाटिका ॥
कुलयोषेव भवति भर्त्तुर्लोके दयानुगा ।
अशोकपल्लवकरा [1]तिलकालङ्कृतानना ॥
सर्वोपभोग्या वेश्येव वाटिका रतिदा सदा ।”

“ अश्वत्थमेकं पिचुमर्दमेकं न्यग्रोधमेकं दशतिन्तिड़ीकं ।
कपित्थविल्वामलकत्रयं च पंचाम्ररोपी नरकं न पश्येत् ।” इति [2]पूर्त्तं मानसं खातकं इदं चेष्टं [3]प्रसादादि[4]पूर्त्तं । च तडागवृक्षरोपणादि । [5]नित्यमैष्टिकमिति मनुवचनान्नित्यं । शक्तस्याकरणे दोषः ।

भविष्यपुराणे,—

“ न खाताः पुष्करिण्योऽपि रोपिताश्च महीरुहान् ।
मातुर्यौवनचौरेण तस्य जातेन किं कृतं ” ॥

स्कन्दपुराणे,—

“ केशवायतने यस्तु कारयेत्तुलसीवनं ।
लभते चाक्षयं स्थानं पितृभिः सह वैष्णवः ॥
शिवालये फलं तद्-यत् तुलसीरोपणे भवेत् ।
तावद्वर्षसहस्राणि याव[6]द्बीजदलानि तु ।
वसन्ति वैष्णवे लोके तुलसीरोपका नराः ।

(१) तिलकारं । (२) पूर्सं । (३) प्रासाद्यादि ।
(४) पूर्णं । (५) नित्यपौष्टिक । (६) वीजवनानि ।

"रोपणात् पालनात् सेकात् दर्शनात् स्पर्शनात् नृणां ।
तुलसी हरते पापं वाङ्मनःकायसंचितम्" ॥

अथ तपः गीतायां,—

"शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्" ॥

तथा,—

"मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानस उच्यते" ॥

अथ यमनियमाः ।

"यमान् सेवेत सततं न नित्यं नियमान् बुधः ।
यमान् पतत्यकुर्वाणो नियमान् केवलान् भजन्" ॥

इदं च यमनियमविरोधे समविकल्पः ।

प्रसङ्गे यमस्य तद्बाध्यत्वं दर्शयितुं विरोधाभावे द्वयोः कर्त्तव्यत्वं । व्यासो मनुश्च ।

"अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्पता ।
अस्तेयमिति पंचैते यमाश्चैते व्रतानि च ॥
अक्रोधो गुरुशुश्रूषा शौचमाहार[१]मानवं ।
अप्रमादश्च नियमाः पंचैवोपव्रतानि च" ॥

ब्रह्मचर्य्यमत्र प्रसिद्धं परदारादिवर्जनं दारे पर्वादिवर्जनं च। अकल्पता दम्भराहित्यं ।

(१) लाघवं ।

तथा,—

"शौचमिज्यातपोदानं स्वाध्यायोपस्थनिग्रहः ।
व्रतोपवासमौनं च स्नानं च नियमाः स्मृताः" ॥

याज्ञवल्क्यः ।

"ब्रह्मचर्य्यं दया क्षान्तिर्ध्यानं सत्यमकल्पता ।
अहिंसास्तेयमाधुर्यदमश्चेति यमाः स्मृताः ॥
स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहः ।
नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादताः" ॥

ध्यानं निराकारस्य ब्रह्मणः। साकारस्य विष्णोः। दमः वाह्येन्द्रियनिग्रहः। उपवासा एकादश्यादौ। व्रतं अनन्तव्रतानि च। ब्रह्मचर्य्यं निषिद्धमैथुनवर्जनं। यममध्ये गणितं। नियममध्ये तूपस्थनिग्रहः। ऊर्द्धरेतस्त्वं। इदं पुत्राद्युत्पादनानन्तरं बोध्यं।

हारीतः,—"अहिंसा सत्यमस्तेयं शौचं [१]ब्रह्मचर्य्यनियमाः"। तत्र मनुः। क्रोधनियमाश्चार्जवं। अकल्पता सन्तोषो गुरु-शुश्रूषा चेति नियमाः। शौचस्य यम मध्ये च गणनं प्रकार-भेदेन। तत्र कर्माधिकारसंपादकं लेपमूत्रकाद्यपनोदनरूपं यमः। [२]सालसादिरूपं नियमान्तर्गतं। एवमकल्पता अपि मानस-दम्भराहित्यं यमः। वाह्यदम्भराहित्यं च नियम इति। [३]विवेकवक्तव्यं। अत्र यमानां निषेधान्तरवर्जितहिंसामिथ्याप्रति-षिद्धमैथुनदम्भचेष्टानां रागात् द्वेषात् लोभात् वाकरणप्रसङ्गे [४]तं

(१) ब्रह्मचर्य्यमितियमाः। (२) मनसा।
(३) विवेक्तव्यं। (४) तस्मिन्निवृत्ते।

निवृत्ते संकल्पः कर्त्तृव्यापाररूपव्रतत्वेन विधेयत्वात्। स्नातकव्रतत्वेन गणनं तल्लोपे प्रायश्चित्तविशेषार्थं। तत्र एवोक्तं यमाश्चैते व्रतानि चेति। तेन हिंसाकरणेन हिंसादिनिषेधातिक्रमादेकं पापं। व्रतलोपाच्चापरमिति। तत्द्वये प्रायश्चित्तद्वयं। नियमेषु व्रतमात्ररूपत्वादतिक्रमे एकमेव प्रायश्चित्तं। तत्रायं विशेषः। गृहस्थस्याप्यात्मज्ञानाभ्यासस्य वक्ष्यमाणत्वात्। स्नातकं व्रतत्वेनात्मज्ञानस्य नित्यत्वाच्च। निषिद्धकर्मानुष्ठानस्य कदाचित्-(१)भयादशक्त्या वा प्रसङ्गे अप्रसङ्गोदासीनाकर्त्तुः पुष्करपर्णसदृश-(२)निर्भेदात्मस्वरूपप्रतिसन्धाने नाहं कर्त्ता भूतान्येव भूतेष्विन्द्रियाण्येव इन्द्रियार्थेषु व्यवहरन्तीति। दृढनियमकरणेन पापोत्पत्तिः। तदुक्तं भगवता।

"न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिः स (३)न लिप्यते॥
त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यतिप्रवृत्तोऽपि नैव किञ्चित् करोति सः"॥

रागेण निषिद्धकर्मकरणे पापमवश्यं।

त्यक्त्वा कर्मफलासंगमिति वचनात्। (४)निषिद्धकर्मणैव फलं आशंसात्।

तथा,—

"नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्।

(१) पादशक्त्या। (२) निर्लेपात्मस्वरूप।
(३) निवध्यते। (४) निषिद्धकर्मण्यैहिकफले आसंगात्।

"पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन्॥
प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्त इति धारयन्॥
ब्रह्मण्याधायकर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा"॥

(१)इदं तद्रुचितरां निश्चयेनात्मनो कर्त्तृकज्ञानोत्तरं करणे। अहिंसा च सामान्यतो हिंसावर्जनरूपा। देवलः,— दशविधा हिंसा। उद्वेगजननं। सन्तापजननं। रुजाकरणं। शोणितोत्पादनं। पैशून्यकरणं। सुखापहरणं। अतिक्रमः। संरोधो। हितविप्रतिषेधोवध इति। उद्वेगो मनोदुःखं। सन्तापस्तदेवाधिकतरं। रुजा शरीरदुःखं। अतिक्रमः अवज्ञा। संरोधोऽतिस्वेच्छाचारनिषेधः। हितविप्रतिषेधो भेषजादिनिषेधः। वधो मारणं। एते यद्यपि सर्वे मानसाः प्रयाणवाचिककायिकास्तथापि मनोव्यापारमूलकत्वेनास्माभिर्मानसमध्ये सौकर्य्याय कथ्यते। "यस्मान्नोद्विजते लोक" इति गीतायां। विष्णुपुराणे,—

"कर्मणा मनसा वाचा परपीड़ां करोति यः।
तद्वीजं जन्म फलति प्रभूतिस्तस्य चाशुभम्"॥

पुनर्देवलः,—वेश्मक्षेत्रस्य दहनं। (२)सेतुरेव न मार्गोढाधातनकृतप्रणाशनं द्रव्यापध्वंसनं। गन्धदूषणमिति। एतच्च संताप-

(१) इदं च दृढ़निश्चयेनाकर्त्तृत्वमात्मनोज्ञात्वाकरणे।
(२) सेतुभेदमनार्जवोपघातनं।

जनकत्वेन प्राणिमात्रविषये ब्राह्मणविषये अधिकं गुर्व्वादि-विषये ततोऽप्यधिकं ।

उशनाः,—

"न ब्राह्मणस्यापदं कुर्य्यात्" ।

मनुः,—

"आचार्य्यं च प्रवक्तारं मातरं पितरं गुरुं ।
न हिंस्यात् ब्राह्मणं गां च सर्व्वांश्चैव तपस्विनः" ॥

तथा,—

"अवगूर्य्य त्वब्दशतं सहस्रमभिहन्य च,
जिघांसायां ब्राह्मणस्य नरकं प्रतिपद्यते ॥
शोणितं यावतः पांशून् संगृह्णाति द्विजन्मनः ।
तावन्त्येव सहस्राणि तत्कर्त्ता नरके वसेत्" ॥

मनुः,—

"हीनाङ्गानतिरिक्ताङ्गान् विद्याहीनान् वयोधिकान् ।
रूपद्रविणहीनांश्च जातिहीनांश्च नाक्षिपेत्" ॥

तथा,—

"क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतं ।
नावमन्येत [1]वैकृताङ्गान् कृशानपि [2]विशेषतः ॥
एतत्त्रयं हि पुरुषं निर्दह[3]त्यवमानितं ।
[4]आत्मानमवमन्येत [5]तत्पूर्व्वोत्तरसम्पद्भिः ॥

(१) वैभुष्णुः । (२) कदाचन । (३) त्यपि ।
(४) नात्मान । (५) पूर्वातुर ।

आमृत्योःश्रिय[1]माकांक्षेन्नैनां मन्येत दुर्लभां ।
पूयशोणितसंपूर्णे अन्धे तमसि दारुणे ॥
षष्टिवर्षसहस्राणि हत्वात्मानं विशेन्नरः" ।

शङ्खलिखितौ, न शिष्टानसत्कुर्य्यात् ॥

यमः,—

"विवादे ब्राह्मणं जित्वा यो हर्षमधिगच्छति ।
श्मशाने जायते वृक्षः कंकगृध्रनिषेवितः" ॥

हारीतः,—

"समीपस्थो दहत्यग्निस्तेजस्वेन्द्रियं तनुम् ।
[2]मन्यूनां तद्दहेद्विप्रः कुलमायुर्गतिं यशः" ॥

हारीतः,—"[3]सवर्णेषु [4]शुचनं । वर्जयेदित्यनुषङ्गः । [5]शूचनं पैशून्यं । सत्यवचनरूपं यमं वाच्यावाच्यप्रसङ्गे वक्ष्यामः । तथा स्तेयं"।

देवलः,— "स्थूलमध्यक्षुद्राणां पदार्थानां प्रसह्य तूष्णीं वा प्रच्छन्नं वा हरणं स्तेयं । रत्नक्षेत्रवेश्महेमरूप्याभरणादीनि स्थूलानि । चतुष्पदद्विपदधान्यवस्त्रलोहकार्पास[6]स्योपकरणादीनि मध्यानि । [7]दन्तनखदारुचर्मपाषाणमृण्मयादीनि क्षुद्राणि । प्रसह्य बलेन तूष्णीं [8]वलिं विनापि दृश्यमानस्यापि स्वामिना । हारीतः,— "द्विविधं च द्रव्यं, सचेतनमचेतनं स्थावरजङ्गमं । सचेतनमपि जङ्गमस्थावरभेदेन द्विविधमित्यर्थः । इत्यभिधाय दशधा स्तेय-

(१) मन्विच्छे । (२) मन्युना तु । (३) सवर्णो ।
(४) सूचनं । (५) सूचनं । (६) सर्वोपकरणादीनि ।
(७) मृदङ्ग । (८) वलं ।

माह। स्वामिना अदत्तस्य ग्रहणं यावद्दत्तं ततोधिकपरिमाणग्रहणं। देवपितृमनुष्याद्यर्थमिति यद्द्रव्यं रचितं तस्य स्वयं च भोगः। भृत्यान् मूल्ये[१] कारयित्वा कर्ममूल्यदानं। पुनरानीय[२] दास्यामीति प्रार्थनया नीत्वा पुनरादानं। विश्वासेन स्थापितस्य धनस्याप्रत्यर्पणं। कूटमानतुलादिना अधिकनयनं। ब्रह्मचारिणो यतेर्वा सुवर्णादिग्रहणं। क्षत्रियादेः प्रतिग्रहादि। प्रतिश्रुत्यादानं। दत्तस्याच्छेदनं चेति तथा स्तेयिनो हि प्रमिताः पूर्व्वधनिनामुपकाराय जायते। तस्मात् स्तेयं न कुर्य्यात्। उपकाराय जायन्ते पशुदासादिजन्म लभन्ते"।

यमः,—

"सुवर्णमेकं गामेकां भूमेरप्यर्द्धमङ्गुलम्।
हरन् नरकमाप्नोति यावदाभूतसंप्लवम्॥
हिरण्यपशुयानानि स्त्रियो वासांसि यो हरेत्।
स पर्य्यायेण यायेत नरकानेकविंशतिं"॥

विष्णुः,—

"यद्यत्परेभ्य स्वावद्यात्पुरुषस्तु निरंकुशः।
तेन तेनापि हीनः स्यात् यत्र यत्राभिजायते॥
तस्मात्सर्व्वप्रयत्नेन धनहिंसां विवर्जयेत्।
यस्तु लब्धं पुनर्दद्यात् देवद्रव्यं यतस्ततः॥
गुरुद्रव्यं द्विजद्रव्यं सोऽश्वमेधफलं लभेत्।
अपहृत्य परस्वार्थं यस्तु दानं प्रयच्छति॥

(१) मूल्येन। (२) पुनरादाय।

स दाता नरकं याति यस्यार्थस्तस्य तत्फलम्।
परस्वपरितुष्टा ये जीविता तुरगाश्च ये"॥
तेषां रजः पतेद्यत्र तदमेध्यतरं भवेत्।

वृहस्पतिः,—

"स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥
तडागानां सहस्रेण अश्वमेधशतेन च।
गवां कोटिप्रदानेन भूमिहर्त्ता न शुद्ध्यति॥
अन्यायेन हृता भूमिरन्यायेन च हारिता॥
हरतो[१] हारयन्तश्च दहत्यासप्तमं कुलं।
ब्रह्मस्वं प्रणयाद्भुक्तं दहत्यासप्तमं कुलं॥
विक्रमेण च भुञ्जन्ते शतपूर्व्वान् दशावरान्।
ब्रह्मस्वे न मतिं कुर्य्यात् प्राणैः कण्ठगतैरपि॥
अग्निदग्धा निरोहन्ति ब्रह्मदग्धो न रोहति।
न विषं विषमित्याहु र्ब्रह्मस्वं विषमुच्यते॥
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रिकं।
लोहचूर्णाश्मचूर्णं च विषं च जरयेन्नरः।
ब्रह्मस्वं त्रिषु लोकेषु कः पुमान् जरयिष्यति"॥

ब्रह्मपुराणे,—

"सामान्यां दक्षिणां लब्ध्वा गृह्णात्येको विमोहितः।
नास्तिक्यभावनिरतः स वै प्रेतोऽभिजायते"॥

(१) हारयितुश्चैव।

अथास्तेयापवादः,—

आपस्तम्बः,— "यथा कथा च परपरिग्रहमभिमन्यते स्तेनो भवतीति । कौत्सहारीतौ, तथा, काण्वपुष्करसादी । सापदा[1] परिग्रहेष्विति वार्षायणिः । [2]शम्यपशुव्धघातेन स्वामिनः प्रतिषेधयति । अव्यवहारो विरुद्धो भवति । सर्वत्रानुमतिपूर्व्वं शमीचणकादीनां बीजकोषः । शुषः यवादिकालका । युग्यानां वहानां घासः । एवंविधं वस्तु [3]परादत्तं गृह्णन् न निषेधन्ति स्वामिनः । अव्यहारः अधिकग्रहणं । विरुद्धो निषिद्धः" ।

यमः,—

"अस्तेयमग्नये काष्ठमस्तेयं च गवे तृणम् ।
कन्याहरणमस्तेयं यो हरत्यनलंकृताम् ॥
पुष्पे शाकोदके काष्ठे तथा मूलफले तृणे ।
अदत्तदान[4]मस्त्वेषामस्तेयं च यमोऽब्रवीत् ॥
तृणं काष्ठं फलं पुष्पं प्रकाशं वै हरेद्द्विजः ।
गोब्राह्मणार्थं गृह्णन् वै न स पापेन लिप्यते" ॥

मनुर्यमः,—

"पथिकः क्षीणवृत्तिस्तु द्वाविक्षू देवमूलकौ ।
आददानः परक्षेत्रात् न दोषं मनुरब्रवीत्" ॥

(१) सत्यं-पवादा ।
(२) शम्योपयुश्यघातेन ।
(३) परैर्दत्तं गृह्णन्तं ।
(४) अदात्तदानानीत्येषां ।

बृहस्पतिकात्यायनौ,—

"त्रपुषोर्वारुकं द्वे तु पञ्चाम्रं पञ्च दाडिमम् ।
खर्जूरबदरादीनां षष्टिं गृह्णन् न दोषभाक्" ॥

उर्वारुकं कर्कटी ।

नारदः,—

"शालिव्रीहिप्रसूनानां मुष्टिग्राह्यो विधीयते ।
यवगोधूमयोर्वापि यदि वा माषमुद्गयोः ॥
[1]शाकपरिमाणे सुमनसां चानननन्दने ।

पाणिद्वयेन यावद्ग्रहणं तावच्छाका ग्राह्याः । अर्चायामपि न निन्हवे आच्छादने यावन्ति पुष्पाण्यपेक्ष्यन्ते[2] तावत् पुष्पं परस्मादाहर्त्तव्यमित्यर्थः ।

[3]शौचं हारीतः,—

शौचं वाह्यमान्तरं च । कुलशौचं, अर्थशौचं, शारीरं च । सूतकाद्यशौचराहित्यं । अर्थशौचममेध्यलेपचण्डालादिस्पर्शादिशुद्धिः । आभ्यन्तरं शौचं पञ्चविधं । तद्यथा ।

मानसं चाक्षुषं घ्राणं गव्यं स्वाद्यं चेति । तत्र मानसम् ।

अथ पुण्यानुध्यानदोषविरहः । चाक्षुषाशौचं चाण्डालादिस्पर्शनकाले जपहोमजलादिनिषेधात्, तन्निमित्ताशौचापगमरूपतत्तत्कर्मणि ।

(१) हारीतः । पाण्योःशाकपारीमाणे सुमनसां चार्चायामपि न निन्हवे ।
(२) यावत्पुष्पापेक्षा— ।
(३) अथ शौचं ।

तथा,—

सूतिगन्धे नित्यानध्यायस्मरणात्तत्कर्म्मणि तदशौचविरहः, तस्मात्तस्याशौचं ध्वनिरिति सामकीर्त्तनावेदनान्तराध्ययनं शौचरूपत्वात् तदशुद्धिः[१]। एवं सूतकादौ भोजनराहित्यं खाद्यशौचमिति। एतेषां[२] पंच आतुराशौचविरहरूपत्वात् नियमे अन्तर्भावः। वाह्याशौचस्य यमे अन्तर्भावः। इत्युक्तं प्राक्।

अथ ब्रह्मचर्य्यं।

हारीतः,—

ब्रह्मचर्य्यं नाम दिव्यमानुषाणां तथा चित्रकाष्ठपात्रस्थमृण्मयादीनामपि [३]आर्थमसंकल्पनमनभिप्रेक्षणमसंकीर्त्तनमन[४]भिगमनमन्दर्शनमसंगमश्चासां। तत् चतुर्विधं, कृष्णं रक्तं शुक्लं विमलमिति। परदारवर्जनं नित्यं, नित्यं स्वदारसेवनं कृष्णं। पर्ववर्जननियमं रक्तं। ऋतुकालाभिगमनं शुक्लं। ऊर्द्ध्वरेतस्त्वं विमलं एवं ह्याह।

"कृष्णेनेमं जयेल्लोकं मध्यं रक्तेन वै जयेत्।
शुक्लेन तु जयेत्स्वर्गं[५] विमले मोक्षमाप्नुयात्"॥

दिव्या तु विश्वान्याः[६] पुराणस्मृताः। पीतं प्रतिमायोग्यं रजतादि तस्यास्तेन घटिताः। अर्था [७]अर्थनमिच्छाविरहः। असंकल्पनं करिष्यामीति [८]अभिलाषाभावः। अनभिप्रेक्षणं आभि-

(१) तस्मात् तस्मात् शुचिध्वनिरिति सामकीर्त्तनादेव वेदान्तराध्ययनाशौचरूपत्वात् तदशुद्धिरिह वाक्यशुद्धिः।
(२) एतेषां च।
(३) अप्रार्थन—।
(४) मनभिभाषण—।
(५) स्वर्गं।
(६) ऊर्द्ध्वस्यादयाः।
(७) अप्रार्थनमि—।
(८) अभिसन्धानभावः।

मुख्येनावलोकनं। असन्दर्शनं सकलावयवानवलोकनं। असमागमः। असन्निधानं। पर्वणि अमावास्यादौ नियमे व्रतादौ वर्जनं। अत्र च कृष्णरक्तब्रह्मचर्य्यस्यैव यममध्ये प्रवेशः। तथाच लक्ष्मीधरः,—"ब्रह्मचर्य्यमत्र [१]प्रसिद्धमैथुनवर्जनमिति"। शुक्लविमलयोस्तु नियमान्तर्भावे उपस्थग्रहपदेन वक्ष्यते। अथा-कल्पिता-दम्भराहित्यं।

मनुः,—

"न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत्।
व्रतेन पापं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदम्भनम्॥
प्रेत्येह चेदृशा विप्रा विगर्हन्ते द्विजातिभिः।
[२]अलिङ्गलिङ्गदे देवे यो वृत्तिमुपजीवति॥
सलिङ्गानां [३]हरत्येनस्तीर्य्यक्‌योनौ च जायते"।

तथा,—

"धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः।
वैडालव्रतिको ज्ञेयो हिंस्रः सर्व्वाभिसन्धिकः॥
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः।
शठो मिथ्या विनीतश्च वकवृत्तिरुदाहृतः"॥

अथ दया, महाभारते,—

"[४]दया भद्रेष्वलोलुप्तमार्जवं ह्रीरचापलं।
भवन्ति सम्पदं दैवीमभिजातस्य भारत"॥

(१) प्रतिषिद्ध।
(२) अलिङ्गलिङ्गवेशेन ये चरन्त्युपजीवति
(३) हरत्येनं।
(४) दयाभूतेष्व।

यमः,—

"दयया धर्मदानाभ्यां तपसा ब्रह्मचर्य्यया।
शमयित्वेन्द्रियग्रामं ब्रह्मलोके महीयते"॥

तथा,—

"विभागशालिता यस्य क्षमायुक्तो दयालुकः।
गृहस्थस्तु समाख्यातो न गृहेण गृहाश्रमी"॥

हारीतः,—

दमो दयादानं धृतव्रतत्वं चेति ब्राह्मणस्य। सर्वभूतानुकंपनं दया। क्षमा।

देवलः,—

"यूकामशकदंशादीन् खादतश्चात्मनस्तनुं।
पुत्रवत्परिरक्षन्ति ते नराः स्वर्गगामिनः"॥

हारीतः,—

"क्रोधनिन्दानन्तरं क्रोधो हि तमोरूपं तस्य क्षमा नियमनं व्याख्यातेति। विवादं न समाचरेदित्युक्त्वा मनुः,—

"एतैर्जितस्तु जयति सर्वान् लोकान् इमान् गृही"।

हारीतो यमश्च,—

"आक्रुष्टस्ताडितः क्षिप्तः क्षमते [१]योऽनुलिम्पति।
स तस्य दुष्कृतं दत्त्वा सुकृतं सर्वमश्नुते"॥

(१) योऽनुकुप्यति।

ध्यानं मनुः,—

"ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थावपि चिन्तयेत्।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च"॥

वेदतत्त्वार्थः। परमात्मा।

विष्णुपुराणे,—

"प्रायश्चित्तान्यनेकानि तपःकर्मात्मकानि च।
यानि तेषामशेषाणां कृष्णानुस्मरणं परं॥
कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते।
प्रायश्चित्तं तदस्यैकं हरिसंस्मरणं परं॥
हरिसंस्मरणक्षीणसमस्तक्लेशसंचयः।
मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते॥
तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने!।
न याति नरकं सद्यः [१]संक्षीणाखिलपातकः॥
[२]आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनं।
पापक्षयश्च भवति स्मरतां तमहर्निशं"॥

तथा,—

"स्मृतेः सकलकल्याणभाजनं यत्र जायते।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिं॥
[३]तदस्मत्प्रीयते विष्णुः स्मर्य्यतां बन्धमुक्तिदः"।

(१) प्रक्षीणाशेषकल्मषः। (२) आयसः।
(३) तदस्मत्प्रीतये।

तथा प्रह्लादवाक्यं गीतायां,—

"ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ! मय्यावेशितचेतसां ॥
मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्द्धं न संशयः" ॥

विष्णुरहस्ये, प्रह्लादं प्रति शुक्रवाक्यं ।

"जन्मभिर्बहुभिर्वत्स! नरास्तद्गतचेतसः ।
भवन्ति वै भागवतास्ते विष्णुं प्रविशन्ति च ॥
अनेकजन्मसंसाररचिते पापसंचये ।
नाक्षीणे जायते पुंसां गोविन्दाभिमुखी मतिः" ॥

इति विस्तरभयात् न लिख्यते। निराकारं ब्रह्मध्यानं विस्तरेण वक्ष्यामः । माधुर्य्यं प्रियवादित्वादि । वाचिके वक्ष्यते । यमः,— "यमेन यत्नमातिष्ठेत् वशस्येत् इन्द्रियाणामप्रकीर्णता । दान्तस्यायं लोकः। [1]विशेषतस्तु तत्तदिन्द्रियसंयमे वक्ष्यते"। इति [2]माधुर्य्यं। अथ नियमेषु अक्रोधः सक्रोधवर्जन-संकल्पः । क्षमा तु क्रोध-विरोधा मनोवृत्तिविशेषः । ततो भिन्ना क्षमा यममध्ये गणिता। हारीतः,— "मानसी तु क्रोधातीतपरितापात् पीड्यमानस्य काय-वैवर्ण्यवैरूप्यव्याधयः संभवन्ति । अहंकारेर्ष्यासूयाद्वेषपरोपघाता-

(१) तत्र वाह्येन्द्रियसंयमरूपं यमः । (२) यमाः ।

दीनि क्रोधरूपाणि । यत्क्रोधनो जपति, यज्जुहोति यदातपति, यद्ददाति वैरोचनो हरते तस्य सर्व्वं । वैरोचनो बलिः" । पुन-र्हारीतः,— [1]क्रोधाग्निनाहूतं स्वेषामप्यबहुमतो न गमनीयो ऽविश्वमनीयस्य भवति । कार्य्याकार्य्यवाच्यावाच्यानि न तर्कयति । हितवादिनो गुरूनप्यतिक्रामत्याविष्टः । प्रेतलोकानात्मानं गमयति तत्र घोरां नरकयातनामनुभूय क्रूरक्रव्यादतीर्य्यक्‌योनिषु जायते । [2]क्रमशो मनुष्यतां प्राप्य सर्वजनविद्वेषितां प्राप्नोति । आर्जवं हारीतः,— निकृतिनियमो जैह्म्यनियमस्यार्जवं । छद्ममाया-[3]कुलयुक्ता निकृतिः । काठिन्यशाठ्यवैषम्य[4]दोषसद्भावयुतं जैह्म्यं । छद्मं छन्नं, मायाकौटिल्यं व्याजः । अर्थान्तरोपन्यासः। एतेषां [5]निकृतिरूपाणां नियमो वर्जनं आर्जवं, एवं काठिन्यं निष्ठुरता । दयाविरोधिपदार्थः । शाठ्यं अयत्नता । वैषम्यं निगूढपरद्रोहप्रतिसन्धानम्[6] ।

"जैह्म्यं पंचविधं । तस्य निवृत्तिरार्जवम्" ।

पुनर्हारीतः,—

"सर्वभूतात्मभूतत्वादार्जवं ब्रह्मणः पदम् ।
अजिह्मामशठां शुद्धां वर्त्तं ब्राह्मणजीविकाम्" ॥

[7]नियमोपकल्पता। हारीतः,— [8]स्वनियमो दम्भनियमश्चेद-कल्पता । [9]स्वनियमो दर्पवर्जनम् । दम्भनियमो दम्भवर्जनम् ।

(१) क्रोधाविर्भूतःस्नेहा । (२) तत्र सर्वासां भयो भवति ।
(३) व्याजयुक्ता निष्कृतिः । (४) दौष्ट्य । (५) निष्कृति ।
(६) दौष्ट्यं परसुखासहिष्णुत्वं । (७) नियमेष्वकल्पता ।
(८) स्मय । (९) स्मय ।

ज्ञानदानतपऐश्वर्य्यविशेषास्त्रयं वर्जयेत्। स्मयावपन्नास्तेजसोपपन्ना भवन्ति। स्मयावपन्नाः स्मयहीनाः। मनुः,—"तपःचरति (१)विस्मयात्"। गीतायां,—

"ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया॥
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ"॥

हारीतः,—

विद्वानविद्वत्तां ख्यापयति। अदत्तादानं। अयाज्ययाजनं (२)आतपास्तपः। अनाश्रयत्वं लिप्यते। एवं वृत्तानां दुष्कृतं भवति, एवं दम्भरूपं तद्वर्जनम् दम्भवर्जनं। अकल्पता नियम इत्यर्थः। सन्तोषः।

मनुः,—

"सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्"।

निषिद्धकर्मणा सुखं नेच्छेत्। अनिषिद्धेनाल्पेनापि साधनेन मनो रमयेदित्यर्थः। एतदेव हारीतेन विस्तरेणोक्तं। "निषिद्धस्थान-निषिद्धद्रव्य-विक्रयायाज्ययाजनासत्परिग्रहेण, शूद्रश्रवणे वेदपाठेन, मूल्यग्रहणाध्यापनवेदप्रश्नपूर्व्वं प्रतिग्रहादिना सुखं नेच्छेत्। अनिषिद्धेन साधनेन सन्तुष्टः भवेदिति"।

सन्तोषः परमो धर्म इत्युक्तं। गुरुशुश्रूषा वेदाध्ययनप्रस्तावे निरूपिता। नियमेषु स्नानं नित्यं नैमित्तिकं काम्यं च।

(१) स्मयात्। (२) अतपस्वीतपो।

"नदीषु देवखातेषु" इत्यादि मनूक्तं नित्यं नैमित्तिकं संक्रान्तिग्रहोपरागादौ। तीर्थप्राप्त्यादौ चेत् माध्याह्निकप्रकरणे वक्ष्यते। अथ मौनं।

यमः,—

"सुभाषितसहस्राणि सुभाषितशतानि च।
सर्वाणि व्याहृतस्यैव कलां नार्हन्ति षोड़शीम्॥
दुष्टवाक्यं न वक्तव्यं ब्राह्मणानां कथंचन।
तूष्णीमासीत निद्रायां न ब्रूयात् किंचिदुत्तरम्"॥

शातातपः,—

स्नातस्य वारिणस्तेजो जुह्वतोऽग्निः समाहरेत्।
भुञ्जानस्यागमत्स्यायुस्तस्मान्न व्याहरेत्त्रिषु।

(१)अथ स्नातकव्रतानि। पूर्व्वे ग्रामा इत्युपक्रम्य सन्ध्ययोश्च वहिर्ग्रामस्यासनं वाग्दत्तस्य।

अङ्गिराः,—

"सन्ध्ययोरुभयोर्जप्ये भोजने दन्तधावने।
पितृकार्य्ये दैवते च तथा मूत्रपुरीषयोः॥
गुरूणां सन्निधौ दाने (२)यागे चैव विशेषतः।
एषु मौनं समातिष्ठन् स्वर्गमाप्नोति मानवः"॥

एषु मौननियमः स्वर्गफलाय। व्यस्तेषु समस्तेषु च।

"मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः"। इति गीतायां।

(१) अथ स्नातकव्रतानि। पूर्व्वेद्यु ग्रामा इत्युपक्रम्य सन्ध्ययोश्च वहिर्ग्रामादासनं वाग्यतस्य। (२) योगे।

तथा,—

"उभे सन्ध्ये च यो विप्रो मौनमास्ते समाहितः।
दिव्यं वर्षसहस्रं स ब्रह्मलोके महीयते" ॥

अथोपवासः,— एकादश्युपवासो नित्यः।

कूर्मपुराणे,—

[१]एकादशी नित्यमिति एकादशी सदोपोष्येति च।

तथा,—

"एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि।
वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही" ॥

तथा,—

"शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन" ॥

अत्र कृष्णानिषेधो व्रतविषयः।

"यानि कानि च पापानि ब्रह्महत्यादिकानि च।
अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे ॥
न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे।
भोजनस्य निषिद्धत्वात् कृष्णायामपि न कार्य्यं ॥
इति भोजननिषिद्धत्वात् कृष्णायामपि न कार्य्यं"।

कात्यायनः,—

"एकादशीषु कृष्णासु रविसंक्रमणे तथा।
चन्द्रसूर्य्योपरागे च न कुर्य्यात्पुत्रवान् गृही" ॥

(१) उपोष्यैकादशीनित्यं।

कौर्म्मे,—

"संक्रान्त्यां कृष्णपक्षे च रवि[१]शुक्रदिने तथा"।

संक्रान्त्यादिविषये जैमिनिः,—

"तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः।
[२]नानुसंगच्छते ग्राह्यो यतो नित्यमुपोषणं" ॥

तेन शुक्लैकादश्यां संक्रान्तिरविवारादौ नैकादशी निषेधः किन्तु संक्रान्तिनिमित्तकोपवासस्य गृहस्थं प्रति निषेधः।

कात्यायनः,—

"उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्।
उपवासं प्रकुर्वीत आघ्राय पितृसेवितम्" ॥

वराहे,—

"सूतकेऽपि नरः स्नात्वा प्रणम्य मनसा हरिं।
एकादश्यां न भुञ्जीत व्रतमेतत् न लुप्यते।
मृतकेऽपि न भुञ्जीत नारीदृष्टे रजस्यपि" ॥

अशक्तस्य मार्कण्डेयः,—

"एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन दानेन न निर्द्वादशीको भवेत्" ॥

प्रकारान्तरमाह, स्कान्दे,—

"असामर्थ्ये शरीरस्य व्रते च समुपस्थिते।
कारयेद्-धर्मपत्नीं वा पुत्रं वा विनयान्वितं।
भ्रातरं पितरं शिष्यं ब्राह्मणं दक्षिणादिभिः" ॥

(१) शुक्र। (२) नानुषङ्गकृतो।

अन्यार्थमुपवासे कृते कर्त्तुरपि फलमाह,—

"कर्त्ता दशगुणं पुण्यं प्राप्नुयात् नात्र संशयः"

तत्रैकादश्यां द्वैधे निर्णयः।

"यत्रोदये कलाकाष्ठा मुहूर्त्तमपि दृश्यते।
तत्र सैकादश्युपोष्या न तु पूर्व्वा कथंचन"॥

दिनद्वयेऽप्युदयसम्बन्धे द्वादशीवृद्धौ सर्वेषां उत्तरैव।

द्वादशीक्षये—

"संपूर्णैकादशी यत्र प्रभाते पुनरेव सा।
द्वादशी च त्रयोदश्यां नास्ति चेत्तत्कथं भवेत्।
उत्तरां तु यतिः कुर्य्यात् पूर्व्वामुपवसेद्गृही"॥

इति व्यवस्था। "निष्कामस्तूत्तरां वसेत्" इति वाक्यान्तरात् विधवाया अपि द्वितीयायामुपवासः। यदा तूदये दशमी क्षीणा च एकादशी परदिने द्वादशी तदा दशमीविद्धायामेकादश्यामुपवासः।

एकादश्युपवासस्य नित्यत्वात् दशमीविद्धव्यतिरिक्तायाश्चाभावात् दशमीविद्धनिषेधवाक्याना[१]मपरदिने एकादशीसद्भावपरत्वात्। उक्तं च[२] विष्णुधर्मे,—

"एकादशी दशाविद्धा सकलाद्वादशी परे।
उपोष्या[२] द्वादशी विद्धा ऋषिरुद्दालकोऽब्रवीत्"॥ इति॥

(१) परदिने। (२) विष्णुधर्मोत्तरे।
(३) दशमी।

एवं च,—

"कलार्द्धेनापि विद्धा स्याद् दशम्यैकादशी यदि।
तावदेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्"॥ इति

तत्काम्यद्वादशीव्रतनिमित्तेन दशमीविद्धनिषेधपरम्।

न तु एकादशीव्रतनिषेधपरं।

[१]काम्यं शस्तं द्वादशीव्रतं।

"द्वादश्यामुपवासं तु ये वै कुर्वन्ति मानवाः।
वत्स! मामेव ते यान्ति मम व्रतपरायणाः"॥

अन्यथा दशाविद्धोपवासविधायक वाक्यानामनवकाशप्रसङ्गात्।

"एकादशी दशाविद्धा परतोऽपि न[२] विद्यते।
गृहिभिर्यतिभिश्चैव सैवोपोष्या सदा तिथिः"॥

यदा तु दशाविद्धा पूर्व्वदिने परदिने चोदय-एकादशी द्वादशी क्षीणा तदापि दशमीविद्धायां गृहीणामुपवासः। उत्तरदिने यतीनां इति कालादर्शादिव्यवस्था।

अन्येतु यद्यपि।

"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी।
त्र्यहस्पृक् तदहोरात्रं नो पोष्यं तत्सुतार्थिभिः"॥

इति यद्यपि गृहस्थस्य निषिद्धं। तथापि,—

"दशमीशेषसंयुक्ता गान्धार्य्या समुपोषिता।
तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्"॥

(१) काम्यं चास्ति। (२) वर्द्धते।

दशाविद्धाया निषेधात् एकादशीक्षयवदिह विशिष्टादशमी-
विद्ध-परवचनाभावात् ।

"उपवासनिषेधे तु भक्ष्यं किञ्चित्प्रकल्पयेत्" ॥

इत्यस्याशक्तविषयत्वे मानाभावात् ।

"एकादशीदशाविद्धा द्वादशी च क्षयं गता ।
दानं वाप्येकभक्तं वा तदा कुर्य्यादयाचितमिति" ॥

वाक्याच्च,—

एकादश्या-उदयसत्त्वेऽपि द्वादशीक्षये गृहस्थस्य उपवास-
निषेधवाक्यानां नक्तादिरूपे नैकादशीव्रतविधिपरत्वमिति ।

अथ [१]व्रतकर्म,—

दशम्यां प्रातर्नित्यकृत्यानन्तरं—

"दशमीदिनमारभ्य करिष्येऽहं व्रतं तव ।
त्रिदिनं देवदेवस्य निर्विघ्नं कुरु केशव" ! ॥

इति प्रार्थनं,—

मध्याह्ने सविशेषं विष्णोः पूजनं तदहरेकवारं हविष्य-
भोजनम् ।

मात्स्ये,—

"कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणम् ।
व्यायामं च व्यवायं च दिवास्वप्नं च मैथुनं ॥
तिलपिष्टं मसूरं दशम्यादिषु वर्जयेत् ।

(१) व्रतधर्म्माः ।

द्युतमत्यम्बुपानं च पुनर्भोजनमेव च ।
चणकं कोरदूषांश्च परान्नं शाकमेव च" ॥

सायं दन्तधावनं, रात्रौ नियमेन विष्णुं स्मृत्वा शयनं । प्रात-
र्नित्यकृत्यानन्तरं स्वस्तिवाचनं संकल्पः । भगवन्-सूर्य्यभगवत्यः
सोमादयो देवता भगवत्प्रीतये एकादशीव्रतमहं कुर्वीयेति ।
[१]अष्टाक्षरमन्त्रजपेन संकल्पपात्रगतजलपानं । आचमनं । प्रार्थना,—

"एकादश्यां निराहारो भूत्वा चैवापरेऽहनि ।
भोक्ष्येऽहं पुण्डरीकाक्ष! शरणं मे भवाच्युत! ॥

ततो बाह्याभ्यन्तरशुद्धिः ।

"शारीरमन्तःकरणोपघातं वाचश्च विष्णुर्भगवानशेषम् ।
शमं [२]नयत्वाशु ममेह शर्म पापादनन्तो हृदि सन्निविष्टः" ॥
"अन्तःशुद्धिं बहिःशुद्धिं शुद्धोऽन्तर्मम योऽच्युतः ।
स करोतु त्वमले तस्मिन् शरीरे चास्मि सर्वदा ॥
[३]बाह्योपघाताननयोर्येषां च भगवानजः ।
शमं [४]नयत्वमेवात्मा विष्णुश्चेतसि संस्थितः" ॥

इति देवस्योपरि नानापुष्पैर्मण्डपकरणम् । मध्याह्ने स्नानं
पंचोपचारेण पूजा । पायसप्रधानं नैवेद्यं । व्याहृतिभिरष्टोत्तर-
शतमिति घृतहोमः ।

(१) अष्टाक्षरमंत्रेण त्रिर्जप्तेन ।
(२) नयत्वाशु ।
(३) बाह्योपघाताननघोघौघां ।
(४) नयत्वमेयात्मा ।

भविष्ये,—

“ क्षमासत्यं दया दानं शौचमिन्द्रियनिग्रहः ।
देवपूजाग्निहोत्रञ्च सन्तोषास्तेय(१)भाजनम् ” ॥

(२)सर्वव्रतेष्वयं कर्म । विष्णुधर्मोत्तरे,—

“ तज्जाप्ययजनध्यानं तत्कथाश्रवणादिकं ।
तदर्चनं च तन्नामकीर्त्तनश्रवणादयः ।
उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः ” ॥

वर्जनीयानि,—

“ पाषण्डिभिरसंस्पर्शमसंभाषणमेव च ।
रात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बूलं च विवर्जयेत् ॥
वहिर्ग्रामान्त्यजान् सूतिं पतितं च रजस्वलां ।
न स्पृशेत् नाभिभाषेत नेक्षेत व्रतवासरे ॥
दन्तानां धावनं हिंसामनृतं स्तेयमैथुने ।
असकृत् जलपानं च दिवास्वापं विवर्जयेत् ॥
गन्धालंकारमाल्यानि वर्ज्यान्यञ्जनमेव च ।
नृत्यालोकनगन्धादिस्वादनं परिकीर्त्तितम् ॥
अन्नस्य वर्जयेन्नित्यं (३)प्राशनस्याभिकांक्षिणम् ” ॥

प्रमादादेषां करणे प्रायश्चित्तम् ।

पाषण्डपतितादि स्पर्शे स्नात्वा सूर्य्यावलोकनम् । सम्भाषणे विष्णुस्मरणमाचमनं च । अवलोकने सूर्य्येक्षणं सम्भाषणे पारणे

(१) भावनं । (२) सर्वव्रतेष्वयं धर्मः ।
(३) ग्रासानामभि ।

तुलसीदलामलकीदलप्राशनं वा । स्तेयप्राणिहिंसयोर्मन्वाद्युक्तप्रायश्चित्तानन्तरं व्रताङ्गत्वेन नामत्रयाष्टशतजपः ।

“ मिथ्यावादे दिवास्वापे बहुशोऽम्बुनिषेवणे ।
अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः ” ॥

ताम्बूलचर्वणे मांसस्य भक्षणे व्रतलोपो भवेत् कुर्य्यात् कृष्णावह्निवर्जनमिति पैठीनसिवचनात् । “ भिद्यते तु ब्रह्मचर्य्यं स्वदारेषु न संगमादित्येकादशीव्यतिरिक्तविषयं ” । केवलं ।

“ रेतःसेकात्मकं भोगमृतेऽन्यच्च तपः स्मृतः ” ।

इतिवचनाद्रेतःसेके व्रतभङ्गः ।

“ स्मरणं प्रेक्षणं केलिः स्पर्शनं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्चाकार्य्यनिर्वृत्तिरेव च ” ॥

इति सर्व्वेषां मैथुनत्वास्मरणादौ नामत्रयजपः अष्टाक्षरजपो वा न व्रतभङ्गः । दन्तधावने गायत्रीजपदशवारपूर्व्विकाभिमन्त्रित जलपानम् । अन्यवर्जनीय सेवनेऽपि नामत्रयजपोऽष्टाक्षरजपो वा उक्तप्रायश्चित्तानन्तरं वाह्यान्तरशुद्धिः ।

विष्णुधर्मोत्तरे,—

“ शारीरमन्तःकरणोपघातं वाचश्च विष्णुर्भगवानशेषः ।
शमं नयत्याशु ममेहशर्म पापादनन्तो हृदि सन्निविष्टः ॥
अन्तःशुद्धिं वहिःशुद्धिं शुद्धोऽन्तर्मम योऽच्युतः ।
सकरोत्वमले तस्मिन् शरीरे चास्मि सर्वदा ॥
वाह्योपघातानघो बौद्धांश्च भगवानजः ।
शमं नयत्वमेयात्मा विष्णुश्चेतसि संस्थितः ॥

एतत् संभाव्य जप्तव्यं पाषण्डादीनुपोषितैः।
नमः [१]शचीपते इत्युक्ता सूर्य्यं पश्येत वीचितैः॥

रात्रौ तु स विशेषं विष्णुपूजा। जागरस्वरूपं च।

स्कन्दपुराणे,—

"गीतं वाद्यं च नृत्यं च पुराणपठनं तथा।
धूपं दीपं च नैवेद्यं पुष्पगन्धानुलेपनम्॥
फलमन्नं च श्रद्धा च शौचमिन्द्रियनिग्रहः।
सत्यान्वितं विनिद्रं च मुदायुक्तं क्रियान्वितम्॥
साश्चर्य्यं चैव सोल्लासं पापालस्य-विवर्जनम्।
प्रदक्षिणाभिसंयुक्तं नमस्कारपुरःसरम्॥
नीराजनसमायुक्तमनिर्विण्णेन चेतसा।
यामे यामे [२]महाराज! कुर्य्यादारात्रिकं हरेः॥
षड्विंशगुणसंयुक्तमेकादश्यां तु जागरम्"।

तथा,—

"रात्रौ जागरणं कृत्वा समुपोष्य हरेर्दिने॥
दश वै पितृके पक्षे मातृके दशपूर्व्वतः।
[३]श्वश्रूणां दशपक्षे तु पुरुषानुद्धरेन्नरः॥

इति जागरणं [४]संयोगपृथक्न्यायेनाङ्गं फलार्थं च।

"शालग्रामशिलाग्रे तु ये कुर्वन्तीह जागरम्।
यामे यामे फलं प्रोक्तं कोटिग्रहणसम्भवम्"॥

---

(१) शुचिपदेत्युक्ता। (२) महाभाग।
(३) स्वसायां। (४) संयोगपृथक्त्वेनाङ्गं।

जागरणं[१] विष्णवायतने कार्य्यं, तदभावे शिवायतने, शिवायतनाभावे सूर्य्यायतने, सर्वाभावेष्वाकाशे विष्णुपदं दृष्ट्वा, तदभावे गृहे विष्णुप्रतिमासन्निधौ, तस्याप्यभावेऽश्वत्थमूले, तदभावे धात्रीमूले तुलसीवने वा। तीर्थे वा, नदीतीरे वा। सर्वाभावे वैष्णवसन्निधौ। प्रातर्द्वादश्यां नित्यकर्मानन्तरं षोडशोपचारेण विष्णोः पूजा। यथाशक्ति वैष्णवब्रह्मब्राह्मणभोजनम्। पारणं मन्त्रेण—

"अज्ञानतिमिरान्धस्य कृतेनानेन केशव!।
प्रसीद सुमुखो नाथ! ज्ञानदृष्टिप्रदो भव॥
कृष्ण! कृष्ण! दयालुस्त्वमगतीनां गतिर्भव।
संसारार्णवमग्नानां प्रसीद मधुसूदन!"॥

इत्युपवासं समर्प्य पारणम्।

"नैवेद्यं तुलसीमिश्रं पापकोटिविनाशनम्"॥

पारणमिति तेन सह पारणम्। दशम्युक्तमत्रापि वर्जनं।

"दिवानिद्रां च तैलं च पुनर्भुक्तं च वर्जयेत्"।

द्वादश्यल्पत्वे[२] मध्याह्निकापकर्षः।

"यदा भवेदतीवाल्पा द्वादशीपारणादिने।
उषाकाले द्वयं कुर्य्यात् प्रातर्मध्याह्निकं तदा"॥

---

(१) जागरणं च। (२) तथा।

अथ जन्माष्टमीव्रतं।

तच्च नित्यं काम्यं च। अकरणे प्रत्यवायश्रवणान्नित्यम्।

भविष्योत्तरे,—

"श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम्।
न करोति नरो यस्तु भवति ब्रह्मराक्षसः" ॥

तथा,—

"वर्षे वर्षे भागवतो मद्भक्तो धर्मनन्दन!"।

इति वीप्साश्रवणाच्च।

"पुत्रसन्तानमारोग्यं धनधान्यर्द्धिमद्गृहम्।
शालीक्षुयवसंपूर्णं मण्डलं सुमनोहरम् ॥
तस्मिन्राष्ट्रे प्रभुर्भुङ्क्ते दीर्घायुर्मनसेप्सितान्।
परचक्रभयं नास्ति तस्मिन्राष्ट्रेऽपि पाण्डव! ॥
पर्जन्यः कामवर्षी स्यादितिभ्यो न भयं भवेत्"।

तथा,—

(१)"गुणानवाप्य समुपैति पदं स विष्णो"रिति फलश्रवणात् काम्यं च। सैव जन्माष्टमी रोहिणीयोगगुणसंयोगेन जयन्तीसंज्ञां लभते, न संज्ञायाः कर्मभेदः। एकान्तिकोत्पत्तिवाक्यगतत्वनिर्णयाभावेन भेदवीजाभावात्। दाक्षयणादिवत् गुणसंज्ञो(२)पबन्धन इति नीत्या भेदेनोपपत्तौ भेदस्यापूर्व्वभेदापादकस्याकल्पनात्।

(१) पुत्त्रानवाप्य।
(२) गुणात्मकोपबन्धन—इति।

भेदेन पूर्व्वदिने अष्टमीनिशीथव्याप्तावपि,—

"उदये चाष्टमी किंचित् नवमी सकला यदि।
सा भवेद् बुधसंयुक्ता प्राजापत्यर्क्षसंयुता" ॥

"अपि वर्षशतेनापि लभ्यते वा न वा विभोः"। इति स्कन्दपुराणे।

तथा,—

"मुहूर्त्तमप्यहोरात्रं यस्मिन् युक्तं हि लभ्यते।
अष्टम्यां रोहिणीऋक्षं तां पुण्यां समुपावसेत्" ॥

इत्युक्तनीत्या उत्तरदिने जयन्तीव्रतकरणे पूर्व्वदिने जन्माष्टमीव्रतं पृथक् कर्त्तव्यं स्यात्। न चेष्टापत्तिः। समाचारविरोधात्। द्वयोर्नित्यत्वे त्यागे मानाभावात्। भेदपक्षे चोत्तरदिने जन्माष्टमीव्रतस्य कालाभावात्। तस्मात्,

"प्रेतयोनिगतानां च प्रेतत्वं नाशितं नरैः"।

"यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता।
किं पुनर्बुधवारेण सोमवारे विशेषतः" ॥

इति पद्मपुराणात् ब्रह्मपुराणे च केवलाष्टम्यां फलकथनात्।

"मासि भाद्रपदे कृष्णपक्षेऽष्टम्यां कलौ युगे।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः" ॥

तस्मात् स तत्र संपूज्य इति रोहिणीयोगबुधवारादियोगयोर्गुणयोरेव फलसंबन्धः। यथा सूर्य्यग्रहणस्य सूर्य्यवारे चूडामणिसंज्ञकत्वेऽपि तद्विहितकर्मणो गुणादेव फलं। तेन जन्माष्टमीव्रतमेव केवलाष्टम्यां क्रियमाणं यावत्-फलं रोहिणीयोगे तदधिकफलं।

बुधवारे, सोमवारे, ततोऽप्यधिकतरफलं इत्यध्यवसेयं। तत्र,

"अर्द्धरात्रादधश्चोर्द्ध्वं कलयापि यदा भवेदि"त्यादित्यपुराणात्।

"मुहूर्त्ते विजयो नाम यत्र जातो जनार्दनः"।

इति वचनाच्च पूर्व्वापरदण्डद्वयोपेतमर्द्धरात्रमत्र मुख्यः कर्मकालः। तत्र यत्र[1] सम्वत्सरे रोहिणीयोगो नास्ति तत्र शुद्धाष्टम्यामसन्देहः। विद्धा चतुर्द्धा। पुर्वद्युरेव निशीथव्यापिनी, उत्तरेद्यु[2]रेव निशीथव्यापिनी, उभयत्र निशीथव्यापिनी च। प्रथमायां पूर्व्वदिने व्रतम्। द्वितीयायां द्वितीयदिने। तृतीयचतुर्थयोरुत्तरदिने एव व्रतं, संकल्पकालमारभ्य सर्वकर्म्मकालस्याष्टमीसम्बन्धात्। रोहिणीसहिताष्टम्यां विशेषः, अष्टमी षष्टीदण्डमिता तत्र संपूर्णरोहिणीयोगः, अथवा अहोरात्रमध्ये यत् किंचित् मुहूर्त्ते योगः। त्रिधा शुद्धाष्टमी तत्र न सन्देहः। रोहिणीयुक्ता[3]ष्टम्यन्तराभावात्। एवं सप्तमीविद्धाष्टमी त्रिधा भवति। रोहिणीयोगत्रैविध्येन तत्राप्युत्तरदिने रोहिणीयोगाभावे पूर्व्वैवोपोष्या।

"मुहूर्त्तमप्यहोरात्रे यस्मिन् युक्तं हि [4]लभ्यते।

अष्टम्यां रोहिणीऋक्षं तां पुण्यां समुपावसेत्"॥ इति विष्णुरहस्यवचनात् शुद्धाष्टमी[5]दिनद्वयेऽपि वर्द्धते चेत् तदा, शुद्धाधिका, सा त्रिधा, पूर्व्वेद्युरेव रोहिणीयुक्ता, परेद्युरेव रोहिणी-

---

(१) यस्मिन्। (२) परेद्युरेव।
(३) अष्टम्युत्तराभावात्। (४) कल्प्यते।
(५) द्वितीयदिनेऽपि।

युक्ता, उभयत्र रोहिणीयुक्ता चेति। प्रथमे पूर्व्वेद्युः, द्वितीये परेद्युः, तृतीयेऽपि पुर्व्वेद्युरेव, उत्तरदिनार्द्धरात्रे अष्टम्यभावात्। तिथेर्मुख्यत्वात्, "उदये चाष्टमी किंचिदि"ति स्कान्दवाक्येन द्वितीयदिने कर्त्तव्या स्यादिति चेत् न तस्य पूर्व्वदिने रोहिणीयोगाभावपरत्वेऽप्युपपत्तेः। निशीथादर्वाक् सप्तम्या युता परेद्युरपि विद्यमाना विद्धाधिका। अत्रापि पक्षत्रयं। पूर्व्वेद्युरेव रोहिणीयुता, परेद्युरेव तथा, उभयत्र तथेति च। प्रथमे पूर्व्वविद्धाग्राहकवचनात् [1]पूर्व्वविद्धैव, परेद्युरेव रोहिणीयोगे परत्रोपवासः। "मुहूर्त्तमप्यहोरात्र" इत्यादिवाक्यात् उभयत्र रोहिणीयुक्ता [2]विद्धा चतुर्द्धा भिद्यते। पूर्व्वेद्युरेव निशीथे तिथिनक्षत्रयोगवती। परेद्युरेव निशीथे तिथिनक्षत्रयोगवती। उभयत्र तद्योगवती। उभयत्र तद्योगरहिता च। प्रथमायां पूर्व्वैवोपोष्या। "सप्तमीसहिताष्टम्यां निशीथे रोहिणी यदि। तत्रोपवासं कुर्वीत" इति वह्निपुराणात्। अवशिष्टपक्षत्रये परत्रैवोपवासः। दिनद्वये निशीथयोगवत्यां संकल्पावधिसर्वकर्मकाले रोहिण्यष्टमीयोगस्य विद्यमानत्वात्।

"सासर्वापि न कर्त्तव्या सप्तमी संयुताष्टमी"। इति ब्रह्मवैवर्त्तवचनात्। परेद्युरेव निशीथयोगवत्यां परत्रैवोपवासः। दिनद्वये निशीथयोगराहित्यं त्रिधा भवति। पूर्व्वेद्युरेव निशीथादूर्द्ध्वं तिथिनक्षत्रद्वयं प्रवृत्तं परदिने निशीथादर्वाक् समाप्तं इत्येकः प्रकारः। तत्र परत्रैवोपवासः। निशीथयोगाभावेऽपि संकल्पकाल-

---

(१) पूर्व्वैव। (२) विद्धाधिक्या।

मारभ्य योगस्य सत्त्वात्। पूर्वदिने रोहिणी महती परेद्युः स्वल्पा। अष्टमी निशीथादूर्द्धं प्रवृत्ता पूर्व्वदिने स्वल्पा परेद्युर्महती। दिनद्वये च निशीथे योगोऽस्ति एवं द्वितीयः प्रकारः, तत्रापि परत्रैवोपवासः।

"सप्तमीसहिताष्टम्यां भूत्वा ऋचं द्विजोत्तम!।
प्राजापत्यं द्वितीयेऽह्नि मुहूर्त्तार्द्धं भवेद्यदि॥

सा भवेद् बुधसंयुक्ता प्राजापत्यर्क्षसंयुतेति स्कान्दवचनात्"। यदा पूर्वदिने अष्टमी भूयसी परेद्युः स्वल्पा। रोहिणी तु निशीथादूर्द्धं प्रवृत्तत्वात् पूर्वदिने स्वल्पा। परदिने भूयसी तदापि परत्रैवोपवासः।

"पूर्व्वदिनेऽष्टमी या च उदये नवमी दिने।
मुहूर्त्तमपि संयुक्ता संपूर्णा चाष्टमी भवेत्"॥

इति पद्मपुराणे।

"उदये चाष्टमी किंचित् नवमी सकला यदि।
सा भवेत् बुधसंयुक्ता प्राजापत्यर्क्षसंयुता"॥

इति स्कान्दवचनात्। बुधवारयोगनिमित्त एव अष्टम्या-अल्पत्वेऽपि परविद्धास्वीकारःप्रतिभातीति चेत्, अस्य(१) यथाप्राप्त-जन्माष्टम्यनुवादेन बुधवासरयोगप्राशस्त्यकथनपरत्वात्। उदये किंचिदित्यस्यानुवाद्यविशेषणत्वेनाविवक्षितत्वात्। तथाच प्रेत-योनिगतानामित्यादिवाक्यसमानार्थत्वमेव। अतएवास्य बुधवार-योगपरत्वात्। शुद्धाधिकायां पूर्व्वदिने अर्द्धरात्रेऽष्टमीयोगसत्त्वेन

(१) यस्य।

पूर्व्वदिने प्राप्ते न बाधकत्वं अन्यपरत्वात्। विद्धाधिकायां पूर्व्वदिने-ऽर्द्धरात्रे अष्टमीयोगाभावेन "पूर्वविद्धाष्टमी या त्वि"ति स्कान्द-वचनेनोत्तरदिनस्यार्द्धरात्रयोगा(१)भावेऽपि ग्राह्यत्वमिति विशेषः। तेन माधवाचार्य्यानुसारेण उक्तेषु जयन्तीभेदेषु वारयोगेन प्राशस्त्यं, न तु वारयोगानुसारेण व्यवस्था(२)।

अथ पारणं। स्कन्दपुराणे,—

"तिथिनक्षत्रनियमे तिथीभान्ते च पारणं"।

ब्रह्मवैवर्त्ते च,—

"सर्व्वेष्वेवोपवासेषु दिवा पारणमिष्यते।
अन्यथा पुण्यहानिः स्याद्दृतेधारणपारणादिति"।

एवं च सति विद्धभेदेषु दिवा तिथ्यन्तो भान्तो वा, तदा-न्यतरान्ते पारणम्।

यदाह नारदीये,—

"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्।
पारणं तु न कर्त्तव्यं यावन्नैकस्य संक्षयः"॥

यदा त्वन्यतरान्तोऽपि दिवा न लभ्यते; पूर्व्वदिनेऽर्द्धरात्र-मारभ्य प्रवृत्तयोस्तिथ्यर्क्षयोरुत्तरदिने रात्रिप्रहरव्यापित्वात्तदा रात्रावपि पारणं प्रतिप्रसववचनात्।

"तिथ्यर्क्षयोर्यदा च्छेदो नक्षत्रान्तमथापि वा।
अर्द्धरात्रेऽपि वा कुर्य्यात् पारणं त्वपरेऽहनीति"॥

(१) योगभावेऽपि। (२) व्यवस्थेति।

रात्रावपीत्यपि शब्दार्थः। एवं गारुड़पुराणे,—

"जयन्त्यां पूर्व्वविद्धायां उपवासं समाचरेत्।
[१]व्रतान्ते चोत्सवान्ते [२]च व्रती कुर्य्यात्-तु पारण"मिति॥

एतदशक्तस्य, प्रातरेव पूजापूर्व्वकं व्रतं समाप्य व्रतरूपोत्सवान्ते प्रातः पारणं कुर्य्यादित्यर्थः।

अत्र च ब्रह्मपुराणे,— "तस्मात् सतत संपूज्या यशोदा देवकी तथा"। इत्येतावत् [३]मन्त्रोक्तावपि [४]पूजाप्रकारानुक्तेः साकांक्षत्वेन स्मृतिशास्त्रविकल्पः स्यादाकांक्षापूरणे सतीतिन्यायेन भविष्योत्तरोक्तो विधिरवगन्तव्यः। ब्रह्मपुराणे च,—

"अरुणोदयवेलायां रक्तवस्त्रावृताः स्त्रियः।
नयन्ति प्रतिमां ह्येतां नानाविभव[५]संभवाम्"॥

"नदीकूलं शुभं रम्य"मिति। प्रतिमानयनादिकम् स्त्रीकर्त्तृकं व्रताङ्गं न तु [६]तद्वशेन स्त्रीमात्रस्याधिकारः। तथाहि चातुर्मास्येऽष्टौ-कुमार्य्यस्त्रिः परियन्तीति कुमारीणामग्निपरिगमनमष्टाङ्गमिति। नैतावता चातुर्मास्येष्टौ कुमारीणामेव कर्त्तृत्वं। भविष्योत्तरे,—

"ततः स्नात्वा तु मध्याह्ने देवक्याः सूतिकागृहम्"।

कुर्य्यादित्युक्त्वा,—

"रम्यामेवंविधां कृत्वा देवकीनवसूतिकाम्।

(१) तिथ्यन्ते। (२) वा।
(३) मात्रोक्तावपि। (४) पूजाप्रकाराद्युक्तेः
(५) संपदा। (६) वेशे।

तां प्रार्थ्य पूजयेद्-भक्त्या," इति पूजाकथनेऽपि न पूजायाम् मध्याह्नसम्बन्धः, स्मृत्यन्तरानुसारेण पूजाया रात्रिकालत्वात्।

तथा,—

"ध्यात्वावतारं पूर्व्वोक्तं मन्त्रेणानेन पूजयेत्"।

इति पठित्वा गायद्भिः किंनराद्यैरित्यादिवाक्यं लिखित्वा ततः किंमन्त्रोऽयं ध्याने पूजायां वा, तत्र पूजायां स्वनामचतुर्थ्यन्तेन तत्रैव मन्त्रान्तरवक्ष्यमाणत्वात्। ध्यानमात्रेयमिति माधवमानसोल्लासादिभिः प्रायो लक्ष्यते। तत् तु न युक्तम्। ध्यात्वावतारं पूर्व्वोक्तं मन्त्रेणेत्यसङ्गतेः, न हि मन्त्रस्यास्य पूर्वावतारध्यानसाधनत्वं तल्लिङ्गाभावात्।

पूर्व्वोक्तमवतारं ध्यात्वा मन्त्रेणानेन ध्यात्वेत्येवमनुषङ्गे माना-भावात् स्वनामचतुर्थ्यन्तैरित्यस्य देवतान्तरे सावकाशत्वात् स्त्रीशूद्रा-मन्त्रवर्जिता इत्यत्र मन्त्रपदं प्रणवपरमिति केचित्। विध्यन्तर-मपि इच्छतीत्यस्यायमर्थः। "अर्द्धरात्रे वसोर्द्धारा"मित्यादि वक्ष्यमाणार्द्धरात्रकालीनकृष्णजन्मकर्ममात्र [१]मुख्यविधिः। "तस्या-मभ्यर्चनं शौरेरि"त्युक्त्वा पूजापि जन्मादिकरणमेव। तदपेक्षया चेदं चन्द्रार्घदानादिस्थण्डिले पूजापर्य्यन्तं विध्यन्तरं केचिदिति वचनाच्च वैकल्पिकं। यद्यपि चन्द्रोदयः कदाचिदर्द्धरात्रादूर्द्धमपि तथाप्युत्सर्गत-एवं रोहिणीचन्द्रस्य सिंहार्केऽर्द्धरात्रात्पूर्व्वं रोहिण्युदयत्वात्[२]। चन्द्रोदयस्यार्द्धरात्रात् पूर्वकालीनत्वेनायं क्रमः। अर्द्धरात्रादूर्द्ध

(१) पुण्यो विधिः। (२) रोहिण्युदयात्।

चन्द्रोदये[१]ऽर्घमात्रस्योत्कर्षः न कृष्णपूजादेः। "पूर्व्वेद्युरमावास्यायां वेदिं करोतीति वेदिकरणापकर्षेऽपि तत्पूर्वपदार्थानपकर्षवत्"। अङ्गप्रक्रमदशायां उत्कर्षस्य तन्मात्रग्राहित्वात् तेन पूर्व्वचन्द्रोदये चन्द्रार्घं दत्त्वा कृष्णपूजां कृत्वा स्थण्डिले देवादिपूजनं कृत्वार्द्धरात्रे कृष्णजन्मकरणम्। पश्चात् चन्द्रोदये तु कृष्णपूजां स्थण्डिलपूजादिकं च समाप्यार्द्धरात्रे जन्म कारयित्वा चन्द्रोदये चन्द्रार्घ इति विवेकः। अथ प्रयोगः। "देवपित्र्यर्थे श्वोभूते औपवस्त्रामश्नातीति" हारीतः। औपवस्त्राङ्गमाषमांसबक्रमपिष्टमिति कल्पतरुव्याख्यानात् दर्श-पौर्णमासाभ्यामन्यत्रापि श्वोभूते। दैवपित्र्ये वा कर्त्तव्यं हविष्य-भोजनं[२] सायं दन्तधावनं, नियमेन रात्रिक्षेपणं, प्रातर्नित्यकृत्या-नन्तरं स्वस्तिवाचनं।

संकल्पः। ताम्रपात्रं जलपूर्णं गृहीत्वा उदङ्मुखः। भगवान् सूर्य्य! भगवत्यः सोमादयो देवतादशनकलत्रसुतनिष्क्रान्तिगर्भ-पतनव्याधिपरचक्रेति वैधव्यदौर्भाग्यभयाभावे पूर्व्वकालैकस्थित-सुतसन्तानारोग्यधनधान्यसद्गृहसकलयापि राज्यपर्जन्यकाम-वर्षित्वशान्तीचुयवपूर्णक्षेत्रसकलसम्पदधिभवननिवासाधिकरणक-प्रचुरभोगभोगोत्तरकालिक भगवदच्युततपःप्राप्तिकामो भगवत्प्रीति-कामो इत्येव वा जन्माष्टमीव्रतमहं कुर्वीय। जयन्तीवर्षे, प्रेतयोनिगतपूर्वपुरुषोद्धरणपूर्व्वकं पूर्व्वोक्तफलं, बुधवारादियोगे कुलकोटिमुक्तिकाम इति चाधिकं। ततः प्रार्थना।

---

(१) चन्द्रार्घमात्रस्य। (२) इति पूर्व्वदिने हविष्यभोजनं।

"अद्य कृष्णाष्टमी देव! नभश्चन्द्रं सरोहिणीं।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि॥
एनोविमोक्षकामोऽस्मि यद्गोविन्देति जन्मजं।
तन्मे मुंचतु मां [१]त्राहि पतितं शोकसागरे"॥

मध्याह्ने नद्यादौ स्नात्वा देवकीसूतिकागृहकरणं पद्मराग-ताम्रपट्टीवस्त्रबन्धनरज्ज्वाम्रपल्लवमालागारुड़मणिघण्टामर्द्दलमाङ्गल्य-कलशदूर्वाचतुष्कशृंखलालोहखड्गभस्मकागदधिमन्थकाष्ठयूपाकार-काष्ठजलवह्निमूषलवह्निसर्षपषष्ठीदेवीपूजार्थगन्धपुष्पमाल्यनैवेद्य-धूपदीपगो[२]गोपीप्रतिमायुक्तं कार्य्यं। तन्मध्ये देवक्यादिप्रतिमा-स्थापनं। प्रतिमा च यथासम्भवं सुवर्णरजतताम्रपित्तलमृण्मय-काष्ठमणिदर्पणे[३]कालिखितान्यतमा। आमाषात् फलपर्य्यन्तं।

देवकीलक्षणं।

"प्रतप्तकांचनाभासा पर्य्यंकांकेऽर्द्धसुप्तिकां"॥

प्रसवयुक्ता प्रस्नुतस्तनी देवकीक्रोड़े शंखचक्रगदाशार्ङ्गहस्त-वनमालाविभूषितबालकृष्णप्रतिमास्थापनं। देवकीचरणसंवाहिका श्रीप्रतिमा यशोदाप्रसूतवरकन्यकासहिता स्थाप्या। खड्गचर्मधरा वसुदेवप्रतिमा। श्वेतनीलवसना-हलमूषलहस्ता-बलदेवप्रतिमा। लगुड़हस्ता नन्दप्रतिमा। दण्डकमण्डलुहस्ता गर्गप्रतिमा। तथा सरोहिणीका चन्द्रप्रतिमा। निद्राविमोहितर्षिजनलिखनं। अरिष्टधेनुककेशिकालीयनागानां लिखनं। नृत्यदप्सरोगन्धर्व-

---

(१) पाहि। (२) गोपाल—।
(३) वह्निकान्वितान्यतमा।

सिद्धविद्याधरकिन्नरलिखनं च । ततः सायंसंध्यानन्तरं पूजारम्भः । पूजासामग्रीं संपूर्णां संपादय नमोदेव्यै श्रियै(१) इति मन्त्रेण पंचोपचारेण श्रीपूजा । शक्त्यै षोड़शोपचारेण दशोपचारेण वा । अदितिरूपेण देवकीं ध्यात्वा,

"गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादै,
भृंङ्गारादर्शकुम्भप्रवरवरकरैः सेव्यमाना सुरोघैः ।
पर्य्यंके स्वास्तृते या मुदिततरमनाः पुत्रिणा सम्यगास्ते,
देवी सा देवमाता जयति सुवदना देवकी कान्तरूपा" ॥

देवक्यै नम इति मन्त्रेण षोड़शोपचारेण पंचोपचारेण वा पूजा । कुष्माण्डनारिकेलखर्जूरदाड़िमबीजपूरपूगलकुचाम्रपनसकदलीफलानां यथासम्भवं देवकीनैवेद्ये ग्रहणं । ततो यथोक्तं कश्यपं ध्यात्वा वसुदेवाय इति मन्त्रेण वसुदेवपूजनं । शेषं नागरूपं ध्यात्वा ॐ बलदेवाय नम इति मन्त्रेण बलदेवपूजनं । दक्षरूपेण नन्दपूजा । ॐ यशोदायै नमः इति अदितिरूपेण यशोदापूजनं । गर्गाय नम इति गर्गपूजनं ब्रह्मरूपेण ।

अथ वैकल्पिकः विध्यन्तरविधिः । अर्द्धरात्रात् पूर्व्वं चन्द्रोदये प्रथमं चन्द्रार्घः । तदङ्गत्वेन वक्ष्यमाणनामभिः प्रथमं हरिस्मरणं ।

तथा,—

"अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥

(१) श्रियै— ।

दामोदरं पद्मनाभं केशवं गरुड़ध्वजम् ।
गोविन्दमच्युतं कृष्णमनन्तमपराजितम् ॥
अधोक्षजं जगद्बीजं सृष्टिस्थित्यन्तकारिणम् ।
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ॥
नारायणं चतुर्बाहुं शंखचक्रगदाधरम् ।
पीताम्बरधरं नित्यं वनमालाविभूषितम् ॥
श्रीवत्सांकं जगत्सेतुं श्रीधरं श्रीपतिं हरिं" ॥ इति ध्यायन्

"क्षीरोदार्णवसम्भूत! अत्रिनेत्रसमुद्भव! ।
गृहाणार्घं शशांक! त्वं रोहिण्या सहितो मम" ॥

एषोऽर्घः सरोहिणीकचन्द्राय नम इत्यर्थः ॥

ततः स्थण्डिले बालकृष्णप्रतिमास्थापनं । सरोहिणीकचन्द्रस्थापनं । देवकीयशोदानन्दनबलदेवानां च स्थापनं । ततो महाविभवोपचारैः श्रीकृष्णपूजा । योगेश्वराय योगसम्भवाय योगपतये गोविन्दाय नमो नमः । स्नानमन्त्रः । यज्ञेश्वराय यज्ञसम्भवाय यज्ञपतये गोविन्दाय नमो नमः(१) । इति पाद्यार्घाचमनीयमधुपर्काचमनीयवस्त्राचमनीयगन्धपुष्पधूपदीपमन्त्रः । विश्वेश्वराय विश्वसम्भवाय विश्वपतये गोविन्दाय नमो नमः इति नैवेद्यमन्त्रः । धर्माय धर्मेश्वराय धर्मपतये गोविन्दाय नमो नमः इति शयनमन्त्रः । ततः सरोहिणीकाय चन्द्राय नमो नमः इति पूजनं, एवं देवकीयशोदावसुदेवनन्दबलदेवानां च पुनः पूजनं । इति विध्यन्तर विधिः । अर्द्धरात्रे प्रदीपाच्छादनं(२) । नःशब्दतासंपादनं ।

(१) इति पूजनं । (२) दीपप्रच्छादनं ।

जलमध्ये कृष्णप्रतिमास्थापनं। एजति दशमास्यो गर्भो जरायुणा सह। यथायं वायुरेजति। यथा समुद्र एजत्येवायं दशमास्योऽस्त्र जरायुणा सह इति जलाद्गर्भस्थानीयात् कृष्णप्रतिमाबहिःकरणं। देवक्या उदरात् कृष्णो जात इति ध्यात्वा।

"स्तुतोऽसि देव! देवेश! शंखचक्रगदाधर!।
दिव्यरूपमिदं देव! प्रसादेनोपसंहर"। इति प्रार्थनं,

क्षणं स्थित्वा शंखवादित्र[१]जयस्वनादपुरःसरमालोक्याद्योतनं। 'वसोःपवित्रमसि शतधारं वसोःपवित्रमसि सहस्रधारं"। इति मन्त्रेण भित्तौ गुड़सर्पिर्भ्यां वसोर्द्धारारेखापंचकरणं"। वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमः कालाय नमः कलविकरणाय नमः बलविकरणाय नमः बलप्रमथनाय नमः सर्वभूतदमनाय नमो-मनोन्मथनाय नमः इति सुवर्णक्षुरेण नाड़ीच्छेदनचिन्तनं। षष्ठीं पंचोपचारेण संपूज्य प्रार्थनं।

"गौर्य्याः [२]स्कन्दो यथा स्कन्दः शिशुः संरक्षितस्त्वया।
तथा ममाप्ययं बालो रक्षतां षष्ठिके नमः"॥

ततः कृष्ण इति नामकरणं। "तच्चक्षुर्देवेति मन्त्रेण वह्निर्नीत्वा चन्द्रदर्शनं"। "अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिवत्-क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विशालं च शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु"। इत्यन्नप्राशनम्। शिवो नामासि स्वधिति स्तेऽपि जानमस्तेऽस्तु मामहिंसिरिति

(१) जयशब्दं कृत्वा आलोकद्योतनं। (२) पुत्रो।

चूड़ाकर्म। "भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं [१]यदायु"-रिति कर्णवेधः। उपनयनं चिन्तयित्वा वस्त्रं परिधाप्य "यज्ञोपवीतं परम"मिति मन्त्रेण यज्ञोपवीतदानं। समाचारादेतावत् संस्कारं कृत्वा [२]बालोपहारनानाद्रव्यप्रधानमहोपचारेण पूर्वमन्त्रैरेव कृष्ण-पूजनं। पश्चाच्चेच्चन्द्रोदयस्तथा यथोक्तं हरिं ध्यात्वा चन्द्रार्घः। दत्तं चेत् [३]पुनर्न कार्य्यं, व्याहृतिभिस्तिलहोमः। नृत्यगीतवाद्यपुराण-श्रवणादिभिरात्रिशेषनयनं। परे अरुणोदये तयो-रक्तवस्त्रं महा-शोभया देवक्यादिप्रतिमां नीत्वा नदीकूले संस्थाप्य स्नापयित्वा पुनर्गृहमानयेयुः। प्रभाते स्नात्वा दुर्गापूजामहोपचारेण श्रीकृष्ण-देवक्यादीन् पूजयित्वा व्रताङ्गदानानि। हिरण्यं, रजतं, गोत्रयं, वस्त्रत्रयं, कुसुमानि, कर्पूरचन्दनादिकं, यद् यदिष्टतमं।

एतज्जन्माष्टमीव्रताङ्गत्वेन [४]हिरण्यं ददानि। कृष्णो मे प्रीयतां एवं सर्वं दत्त्वा।

"यं देवं देवकी देवी वसुदेवादजीजनत्।
भौमस्य ब्रह्मणो [५]गुप्त्यै तस्मै ब्रह्मात्मने नमः॥
[६]सुजन्मवासुदेवाय गोब्राह्मणहिताय च।
शान्तिरस्तु शिवं चास्तु इत्युक्त्वा तान् विसर्जयेत्"॥

(१) यदायुग। (२) वाद्योपहार।
(३) पुनः कार्य्यं। (४) हिरण्यदानानि।
(५) गोष्ठ्यै। (६) सुजन्मने वासुदेवाय।

देवक्यादिदेवाः स्वस्थानं गच्छत इति । पत्ते स्त्रीभ्यो मध्वाज्य-दुग्धविकारयुक्तं यवान्नदानं । ब्राह्मणभोजनं ततः पारणं । व्रत-सामान्यधर्मेण हविष्यभोजनं द्वादशीपारणधर्मेण ।

इति जन्माष्टमीव्रतम् ।

अथ शिवरात्रिव्रतम् ।

तदपि नित्यं काम्यं च । अकरणे प्रत्यवायः स्मर्य्यते । स्कान्दे शिवरात्रिमधिकृत्य—

" न पूजयति भक्तेशं रुद्रं त्रिभुवनेश्वरं ।
चतुर्जन्मसहस्रेषु भ्रमते नात्रसंशयः " ॥

तथा । वर्षे वर्षे इति वीप्सा । तत्रैव । तथा नित्यं नित्य-शब्दादपि नित्यत्वे ।

" माघकृष्णचतुर्द्दश्यां यः शिवं संश्रितव्रतः ।
मुमुक्षुः पूजयेन्नित्यं स लभेदीप्सितं फलम् " ॥

इति स्कान्दवचनात् ।

काम्यरूपतेशानसंहितायां,—

" एवमेतद्व्रतं कुर्य्यात् प्रतिसंवत्सरं व्रती ।
द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकं तथा ॥
सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः ।
शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
आचण्डालमनुष्याणां भुक्तिमुक्तिप्रदायक"मिति ॥

द्वादशाब्दिकावृत्तियुक्तं च चतुर्विंशात्मिकावृत्तियुक्तं वा । काम्यं फलसाधनं नरमात्राधिकारिकं । अत्र चोपवासः, पूजा, जागरणं चेति त्रयं प्रधानं ।

" उपवासप्रभावेन तथा चैवात्र जागरात् ।
शिवरात्रेस्तथा शम्भोर्लिङ्गस्यापि प्रपूजया ।
अक्षयान् लभते कामान् शिवसायुज्यमाप्नुयात् " ॥ इति

स्कन्दपुराणात् ।

एवं च, " अथवा शिवरात्रं तु पूजाजागरणैर्नयेत् " इति वचनमशक्तस्य तावन्मात्रेण प्रत्यवायपरिहार इत्येवं परं ।

अथ कालनिर्णयः । तत्र प्रदोषव्याप्तिरर्द्धरात्रव्याप्तिश्च द्वयं ग्राह्यं । स्मृत्यन्तरे,—

" प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी " ।

ईशानसंहितायां,—

" माघकृष्णचतुर्द्दश्यां महादेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः " ॥
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः " ॥

एवं च सति द्वैधे पूर्वेद्युरेव प्रदोषनिशीथोभयव्याप्तौ पूर्वेद्यु-रेव व्रतं । स्कान्दे,—

" त्रयोदशी यदा देवि! दिनभुक्तिप्रमाणतः ।
(१)आचारे शिवरात्रिः स्यात् निशिपूर्णा चतुर्द्दशी " ॥

---

(१) जागरे ।

सा शिवरात्रिस्तस्यामेव व्रतमित्यर्थः। परेद्युरेव प्रदोषनिशीथोभयव्याप्तौ तत्रैव व्रतं। कामिके,—

"निशिद्वये चतुर्द्दश्यां पूर्वा पापा परा शुभा"।

(१)पूर्वदिननिशीथमारभ्य चतुर्दशी परदिननिशीथपर्य्यन्तं चेत् व्याप्नोति तदा परत्र व्रतमित्यर्थः। पूर्वेद्युर्निशीथव्याप्तिः, परेद्युः प्रदोषव्याप्तिश्चेत् पूर्वत्र व्रतं।

"अर्द्धरात्रात्-पुरस्ताच्चेत् जयायोगोऽवगम्यते।
पूर्व्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैः॥
जयन्तौ शिवरात्रिश्च कार्य्ये भद्रा जयान्विते"॥ इत्यादि

वचनात् पुर्व्वेद्युः प्रदोषव्याप्तिर्नास्ति निशीथव्याप्तिरपि नास्ति उत्तरत्र प्रदोषमात्रव्याप्तिश्चेत्(२) तदा सैव ग्राह्या।

"माघे सिते भूतदिनं कदाचित्,
उपैति योगं यदि पंचदश्या।
जयाप्रयुक्तां न तु जातु कुर्य्या-
च्छिवस्य रात्रिं प्रियकृच्छिवस्य"॥ इति वचनात्।

पूर्वेद्युः प्रदोषादूर्द्धं प्रवृत्ता परेद्युः त्रयवशात् प्रदोषादर्वागेव समाप्ता चेत्, परेद्युर्व्याप्तिद्वयाभावात् पूर्व्वेद्युर्निशीथव्याप्तेस्तद्भावात् जयायोगाच्च पुर्वैवोपोष्या।

त्रिस्पृशायां फलाधिक्यं,—

"त्रयोदशी कलाप्येका मध्ये चैव चतुर्द्दशी।

(१) पूर्वदिननिशामारभ्य चतुर्दशी परदिननिशापर्य्यन्तं—।
(२) प्रदोषमात्रव्याप्तित्वे सैव ग्राह्या।

अन्ते चैव शिनीवाली त्रिस्पृशां शिवमर्च्चयेत्"॥

तथा वारविशेषे फलाधिक्यं,—

"माघकृष्णचतुर्द्दश्यां रविवारो यदा भवेत्।
भौमो वाथ भवेद्देवि! कर्त्तव्यं व्रतमुत्तमम्॥
शिवयोगस्य योगो वै यद्भवेदुत्तमोत्तमम्"।

यत्र च पूर्व्वविद्धायामुपवासे परेद्युस्तिथिद्वैधे(१) वा पारणं, तिथ्यन्ते वा। "तिथिनक्षत्रनियमे तिथिभान्ते च पारण"मिति सुमन्तुवचनात् तिथ्यन्ते पारणं प्राप्तं। यच्च देवलवचनं,—

"उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेदि"ति—

"तिथ्यन्ते चैव भान्ते च पारणं यत्र चोद्यते।
यामत्रयोर्द्ध्ववर्द्धिन्यां प्रातरेव हि पारणम्"॥

इति वचनात्।

यामत्रयोर्द्ध्वव्याप्तितिथ्यन्तपरं। तेनात्रापि—

"तिथीनामेव सर्वासामुपवासव्रतादिषु।
तिथ्यन्ते पारणं कुर्य्यात् (२)दिवा शिवचतुर्द्दशीम्"॥

इति चतुर्द्दशीमध्येऽपि पारणं। तथापि (३)यामयोरूर्द्धं चतुर्दश्यन्ते मति द्रष्टव्यं। एतदेव स्कन्दपुराणे।

"उपोषणं चतुर्दश्यां चतुर्द्दश्यां तु पारणं।
कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा॥

(१) मध्ये। (२) विना।
(३) यामत्रयादूर्द्धं।

ब्रह्मा स्वयं चतुर्वक्त्रः पंचवक्त्रस्तथाप्यहं ।
सिक्थे सिक्थे फलं तस्य शक्ता वक्तुं न पार्वती" ॥

यामत्रयात् पूर्वं तु तिथ्यन्ते तिथ्यन्त एवमिति माधवाचार्य्य-व्यवस्था । वस्तुतोऽत्र तिथ्यन्ते पारणं कुर्य्यात् विना शिवचतुर्दशीमिति तिथ्यन्तपारणविधौ शिवरात्रिपर्य्युदासात् । यामत्रयात् पूर्वमपि तिथ्यन्ते चतुर्द्दश्यामेव पारणं । उपोषणं चतुर्द्दश्यां तु पारणमिति वचनस्य [१]गुणसम्बन्धपरस्य निरवकाशत्वेन बलवत्त्वाच्च । तिथ्यन्तपारणवचनस्य व्रतान्तरे सावकाशत्वात् नित्यत्वात् काम्या-दुर्बलत्वात् च । केवलं श्राद्धाधिकारिणा दर्शश्राद्धस्य नित्यस्या-करणे गुणफलकामना न कर्त्तव्या । तस्य यामत्रयोर्द्धं तत्पूर्व्वं वा तिथ्यन्ते दर्शे श्राद्धं कृत्वा पारणकरणमेव शास्त्रार्थ इति ।

अथ शिवरात्रिव्रतानुष्ठानक्रमः । पूर्वविद्धापत्ते द्वादश्या उत्तर विद्धापत्ते त्रयोदश्यामहनि हविष्यमेकवारं कृत्वा सन्ध्याकाले नियम-स्वीकारः ।

"रात्रिं प्रपद्ये जननीं सर्वभूतनिवासिनीम् ।
भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम् ॥
संवेशिनीं प्रपद्येऽहं ग्रहनक्षत्रमालिनीम् ।
[२]प्रपद्येऽहं शिवां रात्रिं भद्रे पारमशीमहि" ॥

ततो व्रतदिने प्रत्यूषे नद्यादि जलाशये स्नानं । स्नानकाले जलप्रार्थना—

(१) फल । (२) प्रपन्नो ।

"आपस्त्वमसि देवेश ज्योतिषां [१]गतिरेव च ।
पापं नाशय देवेश! वाङ्मनःकर्मभिः कृतम् ॥
त्वमापोज्योतिः सर्वेषां दैत्यदानवरक्षसाम् ।
सान्निध्यं सर्वतीर्थानां स्नानकाले भवेन्मम ॥
स्नातोऽहं सर्वतीर्थेषु गर्त्तप्रस्रवणेषु च ।
नदीषु देवखातेषु स्नानमेतेषु मे भवेत् ॥
नियतं च करिष्यामि देवदेव! तवाज्ञया" ।

गृहमागत्य लिङ्गसमीपं गत्वा लिङ्गपूजा । स्वस्तिवाच्य संकल्पः । भगवन्-सूर्य्य भगवत्यः सोमादयो देवताः श्रीपुत्र राज्यादिप्राप्तिपूर्वकशैवपुरप्राप्तिकामो द्वादशवर्षपर्य्यन्तं प्रतिफाल्गुन-कृष्णचतुर्द्दश्यां शिवरात्रिव्रतमहं करिष्ये इति । प्रथमवर्षे संकल्पः द्वादशवर्षान्ते दक्षिणादि । अन्यथा प्रतिवर्षं संकल्पः । शिव-प्रीतिकामः सर्वपापक्षयपूर्व्वकसर्वयज्ञफलप्राप्तिकामो वा शिवरात्रि-व्रतमहं करिष्ये इति । प्रार्थना ।

"प्रातर्देवचतुर्द्दश्यां जागरिष्याम्यहं निशि ।
पूजां दानं जपं होमं करिष्याम्यात्मशक्तितः ॥
चतुर्द्दश्यां निराहारो भूत्वा चैवापरेऽहनि ।
भोक्ष्येऽहं वै विरूपाक्ष! शरणं मे भवाव्यय!" ॥

तत्र ब्रह्मावरणं । अस्तमिते सन्ध्यानन्तरं स्नानं लिङ्गायतनगमनं ।

"हर! शंकर! सर्वेश! व्रतानां फलदायक! ।
शिवरात्रि व्रतं चैव करोमि त्वत् प्रसादतः" ॥

(१) पति ।

ततो द्वारपालपूजा। गणेशपूजा। दिगीशपूजा। लिङ्गसमीपं गत्वा निर्माल्यमपकृष्य तोयेन स्नपनं। पञ्चामृतेन स्नपनं शैवपंचाचरमन्त्रेण पूजा। सूक्ष्मवस्त्रनानाविधगन्धपुष्पधूपदीपशर्कराचीरदध्यन्नखण्डलड्डुकमण्डकनानाविधफलमूलप्रधाननैवेद्यैः पुष्पफलकुशविल्वचतुःसमदूर्वाकराचतपूतमर्घं संस्कृत्य ग्रहणं। ततो अर्घार्थं प्रार्थना—

"पुरा कृतं तु यत्कर्म इहलोके तु यत्कृतं।
करिष्यामि च यत्किंचित् घोरं कर्म सुदारुणं॥
हर! संहर तत्पापं कालकूटविषं यथा।
त्रिपुरं च यथा कालं दग्धं कामस्त्वया हतः॥
तथा मे दुष्कृतं सर्वं शंभो! नेत्राग्निना दह।
जितोऽहं भवदोषेण कालक्लोभग्रहेण च"॥
"[१]स्वभक्तिरचना मेऽस्तु शिव! जन्मनि जन्मनि॥
इहलोके परां भक्तिं परलोके परं पदं।
देहि मे देवदेवेश! त्रैलोक्यव्यात्मदेवतां"॥

एवं संप्रार्थ्य वक्ष्यमाणमन्त्रेणार्घदानं।

"नमः शिवाय शान्ताय सर्वपापहराय च।
शिवरात्रौ ददाम्यर्घं भक्त्या[२]व्यात्मरहं प्रभो!"॥

ॐ नमः शिवाय अर्घं स्वाहा। मूलमन्त्रशतजपः। ततः कुण्डे अग्निमुपसमाधाय तिलतण्डुलव्रीहिभिश्चरुं कृत्वा आज्यभागान्ते शिवपंचाचरमन्त्रेण चरोरष्टशतहोमः। ततस्तिलैरष्टशतहोम इत्यपि कश्चित्। शिवध्यानस्तुति-शिवरात्रिमाहात्म्यश्रवण-ध्रुवतारादर्शन-पुराणपठन गीतनृत्यवाद्यानि। इति प्रथमप्रहरकृत्यम्।

द्वितीयप्रहरे स्नात्वा द्वारपालादिपूजापूर्व्वकं लिङ्गे निर्माल्यमपकृष्य तोयेन स्नपनानन्तरं पंचामृतस्नानपूर्व्वकं पूर्व्ववत् पूजा। पूर्व्ववदर्घं संस्कृत्य "पुराकृतं च यत् कर्मेत्यादि त्रैलोक्यव्यात्मयोग्यता"मित्यन्तवाक्येन प्रार्थनम्।

"नमः शिवाय शान्ताय भुक्तिमुक्तिप्रदाय च।
शिवरात्रौ ददाम्यर्घं सर्वाभिमतसाधनम्"॥

ॐ नमः शिवाय अर्घं स्वाहा। एवमर्घं दत्त्वा मूलमन्त्रेण शतजपः। पूर्व्ववत् चरुहोमस्तिलहोमश्च। शिवध्यान-शिवमाहात्म्यश्रवण-ध्रुवतारादर्शन-पुराणपठन-नृत्यगीतवाद्यानि। इति द्वितीयप्रहरे।

एवं तृतीयप्रहरे स्नात्वा द्वारपालादिपूजा निर्माल्यवहिष्करणपंचामृतस्नानपूजां कृत्वा अर्घं संस्कृत्य "पुराकृतं च यत्कर्म" इत्यादिमन्त्रेण प्रार्थ्य।

"ज्ञानादज्ञानतो वापि मया दत्तं च शंकर!।
गृहाणार्घं महादेव! शिवरात्रौ प्रसीद मे"॥

ॐ नमः शिवायार्घं स्वाहेत्यर्घं दत्त्वा ततो मूलमन्त्रजपः। चरुहोमस्तिलहोमश्च। शिवध्यान-शिवरात्रिमाहात्म्यश्रवण-ध्रुवतारादर्शन पुराणपठन-नृत्यगीतवाद्यानि।

(१) त्वदभक्तिरचला। (२) तुभ्यमहं विभो।

एवं चतुर्थप्रहरे स्नात्वा द्वारपालपूजा निर्माल्यवहिष्करण पंचामृतस्नानपूजां कृत्वा अर्घं संस्कृत्य "पुराकृतं च यत्कर्म" इत्यादिमन्त्रेण संप्रार्थ्य ।

"शिव! शंकर! सर्वज्ञ! पशुपते! प्रभो! हर! ।
गृहाणार्घमुमाकान्त! शिवरात्रौ प्रसीद मे" ॥

ॐ नमः शिवायार्घं स्वाहेति दत्त्वा मूलमन्त्रजपं कृत्वा पूर्ववत् चरुहोमं तिलहोमं च कृत्वा भूरादिप्राजापत्यान्ता नवाहुतयः । पूर्णाहुतिं कृत्वा संस्रवप्राशनं मार्जनं च कृत्वा ब्रह्मणे दक्षिणां दद्यात् ।

ततः शिवध्यान-शिवरात्रिमाहात्म्यश्रवण-ध्रुवतारादर्शन-पुराण-श्रवण-नृत्यगीतवाद्यादिभिरात्रिशेषनयनं । ततः स्नानासामर्थ्ये देहादिशक्तिवशेनाथ मन्त्रस्नानादिकं चरेदिति वचनात् मन्त्र-स्नानमशक्तः प्रतियामं कुर्य्यात् । तथा "होमकर्मण्यशक्तानां जपस्तु द्विगुणो मत" इतिवचनात् होमाशक्तस्य द्विगुणं पंचाक्षर जपः । इति रात्रिकृत्यं । ततः प्रातःस्नानानन्तरं निर्माल्यमपकृष्य लिङ्गपूजा । व्रतोपदेशगुरोश्च सूक्ष्मवस्त्रादिभिः पूजा । गुरवे जलकुम्भदानं । दक्षिणात्वेन सुवर्णदानं च । मूलमन्त्रं जप्त्वा (१)देवक्षमापनं । तद्यथा,

"अविघ्नेन व्रतं देव! त्वत्प्रसादात् समन्वितम् ।
क्षमस्व मे जगन्नाथ! त्रैलोक्याधिपते! हर! ॥
व्रतोपवासयागाद्यैः सुकृतं यन्मयाकृतम् ।

(१) देवस्य क्षमायाचनं ।

त्वत्करस्थं महादेव! ममास्तु फलसाधनम् ॥
ज्ञानादग्निरिहैवास्तु त्वत्प्रसादात् (१)महाप्रभो!" ।

इति देवस्य दक्षिणहस्ते फलपुष्पं दत्त्वा व्रतं समर्पयेत् । एवमस्त्विति गुरुर्ब्रूयात् । ततो यतीन्, शिवबुद्ध्या संपूज्य प्रार्थनम् ।

"त्वत्प्रसादात् (२)महादेव! व्रतमद्यसमर्पितम् ।
प्रसन्नो भव मे श्रीमन् मद्गृहं प्रतिगम्यताम् ॥
त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः । इति ।

गृहं यतीन् नीत्वा सत्कृत्य वस्त्रकौपीनछत्रोपानहादिदानं मन्त्रेण ।

"देवाधिदेवदेवेश! लोकानुग्रहकारक! ।
यन्मया श्रद्धया दत्तं प्रीयतां तेन मे प्रभो" ॥

इति दत्त्वा भोजयेत् । अन्यानपि ब्राह्मणान् भोजयित्वा अच्छिद्रावधारणं कृत्वा पारणं कुर्य्यात् । चतुर्द्दशीपारणे, पैशून्य-कृतघ्नतामित्रद्रोहपारदार्य्याभक्ष्यभक्षणादिजन्यपापक्षयो गुणफलं । तत्कामनया कर्त्तव्यं । अमावास्यायां तु प्रातरेव व्रतसमाप्तिं यथोक्तरूपेण कृत्वा श्राद्धानन्तरं पारणं कुर्य्यादिति इति शिव-रात्रिप्रयोगः ।

ईज्या अग्निहोत्रादिका पंचयज्ञादिरूपा तथा श्राद्धस्यापि तत् संग्रहः । तदुक्तं मनुना, –

"पितॄंश्चैवाष्टका(३)सूत्रे (४)नित्यमन्नफलासु च ।

(१) मया ।
(२) मया ।
(३) सूत्रे ।
(४) नित्यमन्वष्टकासु च ।

च शब्दात् स्मृत्यन्तरोक्त-नित्यकर्त्तव्य-श्राद्धानामप्युपसंग्रहः। तथाच विष्णुः, अमावास्यास्तिस्रो अष्टकास्तिस्रोऽन्वष्टका माघी-प्रौष्ठपद्यूर्द्ध्वं कृष्णत्रयोदशी व्रीहियवपाकौ चेति। माघीपौर्ण-मासौ युगादिः। प्रौष्ठपद्यूर्द्ध्वं युगादिः। तत्प्रायपाठात्। व्रीहि-यवपाकपदेन युगादिद्वयमुक्तं। कार्त्तिकशुक्लानवमी। वैशाख-शुक्लातृतीया च। तेन युगादिश्राद्धमिति नित्यं। स्मृत्यन्तरान्न-वान्नश्राद्धं च। तथा ग्रहणश्राद्धं स्मृत्यन्तरात्।

तथाच मनुः—

"सावित्रीं शान्तिहोमांश्च कुर्य्यात् पर्वसु नित्यशः।
शान्तिकामस्तु जुहुयात् सावित्रीमक्षतैः शुचिः"॥

इति शंखवचनात्,

शान्तिश्च ऐहिकानिष्टहेतुदुरितनिवृत्तिः। तेनानिष्टहेतुसूचकोत्-पातरोगादिदर्शने तन्निमित्तमेव गायत्र्या होमः। अथ स्वाध्यायः मनुः—

"वेदमेव जपेन्नित्यं यथाकालमतन्द्रितः।
तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्य उच्यते॥
वेदाभ्यासेन सततं शौचेन तपसैव च।
अद्रोहेणैव भूतानां जातिं स्मरति पौर्विकीं"॥

दाननियमरूपं पूर्व्वं प्रपञ्चितं। शौचं मानसरूपं पूर्व्वमेवोक्तं। वाह्यं च यमे अन्तर्गतं। उपस्थनिग्रहः।

हारीतः—

"वाचोवेगं मनोवेगं क्रोधवेगं तूदरोपस्थवेगं।

एतान् वेगान् पारयेद् यस्तु विप्रस्तं वै ब्रूयुर्ब्रह्मनिष्ठं मुनिं वा"॥

तथा, पौंस्त्वात् साहसं हरेतः। तस्य वीजं तदनृतावुत्सर्गे दोषः। ऋतावुत्सर्गे ब्रह्मचर्य्यं व्याख्यातं। तदेवादिप्रवृत्तत्वात् जगतः प्रथमं। यज्ञनियमार्थं द्वितीयं। तपःसिद्ध्यर्थं तृतीयं। मोक्षसिद्ध्यर्थं चतुर्थं। पुंसो वलवत्त्वेन रेतःसंपादने तत्पुरुषस्य वीजं ब्रह्मचर्य्यं व्याख्यातं। कृष्णरक्तविमलशुक्लरूपेण। तत्पर्व्वापर्वसाधारणं जगतः सर्वस्य भवति। देव तिर्य्यक् पर्य्यन्तं स्वभावप्रवृत्तत्वात्, द्वितीयं पर्वण्युपवसथे वर्जनं। यज्ञसिद्धौ तृतीयं ऋतावेव गमनं पुत्रोत्पादनेन ऋणापा-करणद्वारा स्वर्गार्थं। चतुर्थमूर्द्ध्वरेतस्त्वं। तत्र पूर्व्वयोर्यमेऽन्त-र्भावः। उत्तरयोर्नियम इत्यर्थः। आहारलाघवानां च नियमः। आपस्तम्बः। उदरात्सर्वकामेन्द्रियदोषाः संभवन्ति। यैरुपसृष्टो विविधा आपद उपैति। तस्मात् शुचिर्यथावत् परिमिताहारः स्यात्। आहारशुद्धौ सत्त्वशुद्धिरित्याचार्य्याः इति नियमाः। एवं यम-नियमानुक्त्वा तत्र करणे फलं अकरणे च दोषं हारीतः। "यमेषु नियमेषु च प्रमत्तः तिष्ठन् याति लोकान् परिभ्रष्टान्। भ्रष्टस्तेभ्यो विविधां याति योनिं यास्वत्यन्तं सज्जते यातनासु। तस्माद् [1]धीरः शुश्रुवान्न्यायवृत्तौ यस्मिन् यशो न व्यथते न धर्मः। धर्मो ह्येकः ससहायो जनानां [2]योऽस्मात् घोरात् त्रायते मृत्युदुर्गात्" इति स्नातकव्रतेषु यमनियमाः। इह मानसतपःप्रसङ्गेन यम-नियमा उक्ताः। अथान्ये मनोदोषनिग्रहास्तपोरूपा उच्यन्ते।

(१) वीरः। (२) य एतान्।

हारीतः । परोपतापःपराभिद्रोहः क्रोधो मोहो लोभोऽहंकारश्चेति मानसः ।

देवलः—अथातः पापदोषान् मनोवाक्कर्मजान् व्याख्यास्यामः । मोहो रागद्वेषमानलोभमदशोकममत्वाहंकारभयहर्षमोघचिन्ताश्चेति द्वादश मानसाः ।

तेषां स्वरूपनिरूपणं निरोधापायश्च तेनैवोक्तः । शास्त्रार्थस्य ज्ञानम् । शास्त्रार्थे संशयः । अधर्मे धर्मबुद्धिरिति मोहलक्षणं, तस्य शास्त्रार्थज्ञानं निवर्त्तकं । तदुपायः शास्त्रावेक्षणं ।

मनुः,—

"बुद्धिवृद्धिकराण्याशुधान्यानि च हितानि च ।
नित्यं शास्त्रानवेक्ष्येत निगमांश्चैव वैदिकान् ॥
यथा यथाहि पुरुषः शास्त्रं समधिगच्छति ।
तथा तथा विजानाति विज्ञानं चास्य रोचते" ॥

विषयसन्निकर्षे विषयदोषाज्ञानं (१)विकल्पाभिमानमुख्येभ्यः । विषयेषु रागः ।

"ज्ञानाद्वेषादसामर्थ्यात् क्लेशादन्यत् प्रसङ्गतः,
नियोगात् कालतः शोकात् धर्माच्च विनिवर्त्तते ॥
रोषोऽमर्षः तथासूयाद्रोहोमिथ्याभितर्कितं
(२)दुःखात् किं चेति तत्त्वज्ञैर्द्वेषः षोढा निगद्यते" ॥

परानिष्टचिकीर्षा । उग्रारोषः (३)परभावकर्त्तारमालोक्य द्वेषोऽमर्षः । परगुणेष्वात्मगुणाधिक्येऽनभिरुचिरसूया । सुहृदामर्थनाशेच्छा द्रोहः । निर्दोषेषु (१)साधुस्वहानिकरबुद्धिर्मिथ्याभितर्कितम् । द्वेशलोभमूलं पापकर्मचिन्तनं दुःखार्हं । अस्य द्वेषस्य निवृत्तिः (२)कालात्ययाद्धर्मात् प्रीतेश्च निवर्त्तते । द्वेशस्योपद्रवाः । अतत्त्वग्रहणं तापो । वेपथुर्ज्ञानसंप्लवः । खेदो अचिरोगः । पारुष्यं श्वासश्च द्वेषदोषजाः । सर्वेभ्यो आत्मन उत्कृष्टज्ञानं मानम् । तच्च विवेकेन निवर्त्तते । तथा तृष्णा लोभः ।

"दुःखादित्वाद्दुरंतत्वादनित्यत्वादतृप्तितः ।
पश्चाद्दोषबहुत्वाच्च न क्वचित् श्रेयसी तृषा" ॥

तस्य सन्तोषो निर्वर्त्तकः । यदुक्तं—

"या दुस्त्यजादुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यज्यतः सुखं ॥
सन्तोषमूलं हि सुखं दुःखमूलं विपर्य्ययः ।
कुलविद्यावित्तादिभिरन्यं वा धनं मदः" ॥

तद्विशेषा (३)अविमर्षावलेपदम्भदर्पगर्वाः । तेषां परोत्कर्षदर्शनं विधाय अनिष्टसंयोगेष्टवियोगाभ्यां दुखं शोकः । तस्य भावनामनित्यत्वदर्शनं वर्जनोपायः ।

तथा,—

"नैवं हि शोचेत्सत्त्वस्थस्तामसो वापि केवलं ।
शोकदुःखमवाप्नोति समासेनेह राजसः" ॥

पुत्रदारधनादिषु स्वाम्यबुद्धिर्ममत्वम् । तेषामनित्यत्वचिन्तनं तद्वर्जनोपायः । अहमित्यभिमानेन क्रियासु प्रवर्त्तनमहंकारः ।

(१) संकल्प । (२) दुःखार्हं । (३) परीभाव ।

(१) साधुस्वहानिकर्त्तृत्वबुद्धिः । (२) ज्ञानात् । (३) हर्षा ।

तस्यात्मनो निर्लेपस्य शुद्धस्याकर्त्तृत्वबुद्धिवर्जनोपायः। तथा आत्म-बाधकं दृष्ट्वा श्रुत्वा वा मनसि यो विकारस्तद् भयं। तस्य भवितव्यं भवत्येव तस्य का चिन्तेति विचारो बाधकः आत्मनः संपदं परस्य विपदं दृष्ट्वा य आनन्दः स हर्ष उच्यते। तस्य संपद् विपदो [1]विनाशित्वम्। सर्वगामित्वबाधकम्।

तथा,—

"भोगैश्वर्य्यमदादीनि यो लुब्धः संस्मरेत् सदा।
स मोघचित्त आत्मानं हन्ति बुद्धिं च कर्म च"॥

तस्य भवितव्यं भवत्येव, किं चिन्तयेति विमर्षो बाधकः।

देवलः,—

"एते मनोभवा दोषा द्वादश शिवहेतवः।
मोहादयो समाख्याता देवासुरनृमोहनाः"॥

विष्णुः,—

त्रिविधं नरकस्येदं द्वारनाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत्॥

गीतायां,—

"एतैर्विमुक्तः कौन्तेय! तमोद्वारैस्त्रिभिर्नरः।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्"॥

बौधायनः,—"दैन्यं शाठ्यं जैह्म्यं च वर्जयेत्"। इति मानसं तपः। समाप्तानि मानसानि स्नातकव्रतानि।

अथ शारीराणि। निवासः।

(१) आशुनाशित्वं।

बृहस्पतिः,—

"निवास[1]सौख्यो वर्णानामाचारः समुदाहृतः।
गुणदोषसमुत्पत्तिर्लोके संस्पर्शजा स्मृता॥
भूरिमाल्यः कुशो धान्यं शस्याम्भसि[2] च नैगमे।
[3]निष्कण्टके धार्मिके च वसेत् स्थाने निरामये"॥

शस्यं घासः। नैगमो, वाणिजकः। कण्टकोऽत्र गौरवादिः। धार्मिके धर्मबहुले। निरामये [4]देशस्वभावजडिमरोगशून्ये।

आपस्तम्बः। यत्राधनं प्रयमणं, तत्र वासो धर्म्यो ब्राह्मणस्य। प्रयमणं पवित्रीकरणं, जलगोमयकुशादि।

बौधायनः,—प्रभूतयत्र सोदक कुशमाल्योपनिष्क्रमणशा[5]द्वल-मनाकुलं। अनलस सुखसमृद्धजलाधिकृतं। अदस्युप्रतिवेश-ग्राममावसितं यतेत धार्मिकः। उपनिष्क्रमणं निर्गमनमार्गः। अदस्युप्रतिवेशितं असन्निहितचौरं। तथा भस्मकण्ठितशरीरः तत्परिपूर्णनेत्रवदनस्तु नगर एवमनियतात्मा सिद्धिं न अवाप्स्यतीति।

रथाश्वगजधान्यानां गवां चैव रजःशुभम्।
अप्रशस्तं समुझित्वाश्वाजाविगरवासभाम्॥

नगरे पुरे। तल्लक्षणं—

मार्कण्डेयपुराणे,—

"सोच्छ्रेधमुच्चप्राकारं सर्वतः परिखावृतम्।
योजनार्द्धार्द्धविष्कम्भमष्टभागायतं पुरम्॥

(१) सुखो। (२) द्विज। (३) निर्गुणके।
(४) वर्ण। (५) शाक।

एवंविधे वस्तव्यमित्यर्थः।

मार्कण्डेयपुराणे,—

"जितामित्रो नृपो यत्र बलवान् धर्मतत्परः" तत्र नित्यं वसेदित्यर्थः।

"यस्मिन् कृषीवलो राष्ट्रे प्रायशो नातिलोभिनः।
यत्रौषधान्यशेषाणि वसेत्तत्र विचक्षणः"॥

महाभारते,—

"यत्र कामयमानानामसंकोचेन पृच्छतां।
प्रब्रूयाद्ब्राह्मणो धर्मं वसेत्तं देशमात्मवान्॥
शिष्योपाध्यायिकावृत्तिर्यत्रस्यात्सुसमाहिता।
यथावत् शास्त्रसंपन्ना कस्तं देशं परित्यजेत्"॥

तथा,—

"श्रोत्रियास्त्वग्र्यभोक्तारो धर्मनित्यास्तपोधनाः।
याजनाध्यापने युक्ता यत्र विप्रस्तमाविशेत्॥"

यमः,—

"एककूपोदके ग्रामे ब्राह्मणो वृषलीपतिः।
अब्देन शूद्रो भवति कृष्णबन्धुमुपाश्रितः"॥

कृष्णबन्धुं शूद्रम्।

बौधायनः,—

"उदपानोदके ग्रामे ब्राह्मणो वृषलीपतिः।
उषित्वा द्वादशसमाः सशौद्रं धर्मम्हच्छति"॥

आपस्तम्बः,—"क्षुद्रान् क्षुद्रचरितांश्च देशान् विवर्जयेत"। सभां समाजं च। सभां चेद्गच्छेत्प्रदक्षिणीकृत्योपेयात्। नगरप्रवेशनानि वर्जयेत्। क्षुद्राः प्रसाररहिताः, क्षुद्राचरिता निषादादिभिरभ्युषिताः, नगरं प्रविश्यते यैः प्रदेशैस्तत्र न वसेत्।

मनुः,—

"न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते।
न पाषण्डजनाक्रान्ते नोपसृष्टेऽन्त्यजैर्जनैः"॥

विष्णुः,— न साम्वत्सरिक वैद्यहीने नोपसृष्टमरके न चिरं पर्वते न पतिताभिशस्तलोकनिन्दिताचारैः संवसेत्।

व्यासः,—

"तत्र तत्र न वस्तव्यं यत्र नास्ति चतुष्टयं।
ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी॥
तत्र तत्र न वस्तव्यं यत्रैतत्त्रितयं सदा।
जिगीषुः कृतवैरश्च जनश्च सततोत्सवः॥

मार्कण्डेयपुराणे,—

"कर्मणा [१]येन पापेन वर्त्तन्ते जीवितेप्सवः।
व्यवधावेत्वतस्त्वृषिं सपर्य्या[२]स्तरणादि च"॥

मनुः,—

"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं।
तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते॥
कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः सुरसेनकाः।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः"॥

---

(१) यत्र जातेन। (२) सपर्व्वा।

तथा,—

"हिमवद्विन्ध्ययोर्मध्ये यः प्राग्विन[1]शनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥
आसमुद्राच्च वै पूर्वादासमुद्राच्च पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं प्रचक्षते" ॥

भविष्ये,—

"ब्रह्मावर्त्तपरो देशो ऋषिदेशस्त्वनन्तरं ।
मध्यदेशस्ततो नूनमार्य्यावर्त्तस्त्व[2]नन्तरं" ॥

ततोऽपि न्यून इत्यर्थः ।

"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः" ॥

विष्णुः,—

"चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न दृश्यते ।
स म्लेच्छदेशो विज्ञेय आर्य्यावर्त्तस्ततः परः" ॥

इदं चापरिगणित-देशवर्जित-देशव्यतिरिक्ताविहिताप्रतिषिद्धादेशविषयं । न म्लेच्छदेशविषयं विरोधात् । नापि ब्रह्मावर्त्तादिविषयं वैयर्थ्यात् ।

भविष्यपुराणे,—

"कृष्णसारैर्यवैर्दर्भैश्चातुर्वर्ण्याश्रमैस्तथा ।
समृद्धो धर्मदेशस्तमाश्रयेरन् विपश्चितः" ॥

पितामहः,—

"भास्करायतनाभ्यासे सूर्य्यक्षेत्रं समंततः" ।

(१) शिवलप्रनादपि । (२) प्रचक्षते ।

विष्णुः,—

"क्रोशार्द्धं कल्पयेद्राजन् तदर्द्धार्द्धमथापि वा ।
मनुजैः स्थापिते सूर्य्ये क्षेत्र[1]मानमिदं स्मृतं" ॥

तस्मादावसथ्यान् कुर्य्यात्सूर्य्यालयसमीपतः ।

तथा,—

"क्रोशमानं परं क्षेत्रं शिवलिङ्गसमीपतः ।
मनुजैः स्थापिते लिङ्गे क्षेत्रमानमिदं स्मृतं ॥
स्वायम्भुवे सहस्रं स्यादार्षे चैव तदर्द्धकं,
तस्मादावसथ्यान् कुर्य्यात् शिवालयसमीपतः ।
शूद्रराज्येऽपि निवसेद्यत्र [2]देवी तु जाह्नवी ॥
कुरुक्षेत्रनिवासेन वाराणस्यां च मानवः ।
अहिंसकः स्नानरतः पापं हित्वा दिवं व्रजेत् ॥
न गङ्गाया विना वासः सर्वक्षेत्र क्षयादृते ।
काश्यां हि मरणं श्रेष्ठं विना क्षेत्रं प्रजापतेः ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
निवासो न विना पुण्यैर्नराणामिह जायते" ॥

व्यासः,—

"मुख्यं हि सरयूतीरं पुष्करं नैमिषं तथा" ।

मत्स्यपुराणे,—

"ज्ञात्वा कलियुगं घोरं हाहाभूतमचेतनं ।
अविमुक्तं न मुञ्चन्ति कृतार्था[3]स्ते न संशयः" ॥

(१) पाल । (२) मध्ये । (३) स्ते नरा भुवि ।

एवं कलावविमुक्तवासस्य विहितत्वात्।

हरिवंशे,—

"अन्तर्द्धानं कलौ याति तत्पुरं शूलशासिनः"। इतिवचनं गृहसमुदायान्तर्द्धानपरं।

तथा च पुनर्वदति पुरि तु वसते पुनरिति। एवं च न क्षेत्रस्य कलावन्तर्द्धानं।

देवलः,—

"अरण्यं देवतास्थानं तीर्थान्यायतनानि च।

तस्मात्तत्रमृतालोका [१]ल्लोकान् यान्ति दिवौकसां"॥

ब्रह्मपुराणे।

"तपस्तप्त्वान्यतीर्थेषु वर्षायुत[२]शतं नरः।

यदाप्नोति तदाप्नोति मासेन पुरुषोत्तमे॥

वार्षिकांश्चतुरो मासान् यस्तिष्ठेत् पुरुषोत्तमे।

विहाय सर्वपापानि विष्णुलोकं स गच्छति॥

हरेः सन्निहिते स्थाने उत्तमे पुरुषोत्तमे।

सम्वत्सरमुषित्वा तु मासमात्रमथापि वा॥

प्रयाति परमं स्थानं यत्र योगेश्वरो हरिः"।

विष्णुपुराणे,—

"ततः स भगवान् कण्वः चीर्णे तपसि सत्तमाः।

पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ॥

(१) तेन। (२) वर्षाणामयुतं।

तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः।

ब्रह्मपारमयं कुर्वन् स्तोत्रं परमपावनं"॥

नरसिंहपुराणे,—

ततः,—

"पुरुषोत्तमाख्यं स गत्वा देवदेवं महामतिः।

तत्र स्नात्वा यथा योगं मार्कण्डेयो महातपाः॥

तपस्तेपे निराहारो [१]द्रष्टुं नारायणं हरिं।

बहुवर्ष [२]शतं तत्र गृणन् ब्रह्मसनातनं॥

पुरुषोत्तमं समभ्यर्च्य गन्धपुष्पादिभिः क्रमात्।

तुष्टाव वाग्भिरिष्टाभिर्विष्णुं तत्रोर्द्धबाहुकः"॥

महाभारते,—

"एतेऽत्र लिङ्गाः कौन्तेय यत्र वैतरणीनदी।

यत्रायजत धर्मोऽपि देवान् शरणमेत्य वै॥

ऋषिभिः समुपायुक्तं यज्ञीयं परिशोभितं।

उत्तरं तीरमेतद्धि सततं द्विजशोभितं॥

शुभेन देवयानेन यथा स्वर्गमुपेयुषः।

तत्र देवर्षयोऽन्येऽपि पुरा क्रतुभिरेजिरे॥

तत्रैव रुद्रो राजेन्द्रः पशुमादत्तवान्मखे।

अदात्पशुं न चेन्द्राय भागोऽयमिति चाब्रवीत्॥

हृते पशौ तदा देवास्तमूचुर्भरतर्षभ!।

मापरस्वमभिद्रोग्धो माधर्माधि[३]कलान् वृथा॥

(१) स्तवन्नारायणं हरिं। (२) शतां।

(३) माधर्मान् सकलान्यगाः।

ततः कल्याणरूपाभिर्वाग्भिस्तेरुद्रमस्तुवन्।
दृष्ट्वा चैनं तर्पयित्वा समयं चक्रिरे तदा॥
ततः स पशुमुत्सृज्य देवयानेन [१]यज्ञवान्।
तत्रानुवंश्या रुद्रस्य तान्निवोध युधिष्ठिर!॥
अयातयामं सर्वेभ्यो भागेभ्यो भागमुत्तमं।
देवाः संकल्पयामासुर्भयाद्रुद्रस्य शाश्वतं"॥

तथा,—

"एतत्स्वायम्भुवो राजन्! वनं रम्यं प्रकाशते॥
यत्रायजत कौन्तेय विश्वकर्मा प्रतापवान्॥
तस्मिन् यज्ञे हि भूर्दत्ता कश्यपाय महात्मने।
स पर्वतवनोद्देशाद्दक्षिणा वै स्वयम्भुवा॥
अवासीत्तत्र कौन्तेय दत्तमात्रामही तदा।
उवाच वापि कुपिता लोकेश्वरमिदं प्रभुं॥
न मां मर्त्याय भगवन् कस्मैचिद्दातुमर्हसि।
प्रदानं योग[२]मेतत्ते यास्याशेषा रसातलं॥
विषीदन्तीं तु तां दृष्ट्वा काश्यपो भगवान् ऋषिः।
प्रसादयांवभूवाथ ततो भूमिं विशांपते॥
ततः प्रसन्ना पृथिवी तपसा तस्य भूपतेः।
पुनरुन्मज्य सलिलावेद[३]रूपा स्थितावुभौ॥

(१) जग्मिवान्।
(२) प्रदानं मेवमेतत्ते यास्याम्येश रसातलं।
(३) देवीरूपा।

सैषा प्रकाशते राजन्! वेदी[१]संस्थानलक्षणा।
आरुह्यात्तमहाराज! वीर्य्यवान् वै भविष्यति॥
सैषा सागरमासाद्य वेदी राजन् प्रकाशते।
एतामारुह्य भद्रं ते त्वमेकस्तरसागरं"॥

अहं च ते स्वस्त्ययनं प्रयोक्ष्ये यथात्वमेता[२]मधराक्षसेन। स्पृष्टाहि मर्त्येन ततः समुद्रमेषा वेदी प्रविशत्या[३]जमीढ़ अग्निर्मित्रायोनिरपां देव्यो विष्णोरेतस्तममृतस्य नाभिः। एतद्ब्रुवन् पाण्डवः सत्यवाक्यं ततो वेदीं[४] त्वं तरसाधि[५]रोह। अत्र उत्तरं तीरमित्युपक्रम्य सैषा सागरमासाद्य देवी राजन् प्रकाशत इत्युप[६]संहृत्य वैतरणीप्रभृति समुद्रपर्य्यन्तं पुरुषोत्तमक्षेत्रमुक्तं भवति। यद्यपि पुरुषोत्तम क्षेत्रशब्देन कीर्त्तनं पुरुषोत्तमाख्य-कृष्णमूर्त्तिदर्शनं च नोपनिवद्धं तथापि क्षेत्रस्वरूपं क्षेत्रमेतावदेवेति मत्स्यपुराणे काश्यां केशवदर्शनं यथा नोक्तं तथेह प्रत्येकं। एकं चास्य देवस्य कलिं मध्यगतत्वेऽपि क्षेत्रत्वेन प्राशस्त्यान्निवासयोग्यं। निषिद्धदेशाः।

आदित्यपुराणे,—

"अङ्गवङ्गकलिङ्गांश्च सौराष्ट्रगुर्ज्जरांस्तथा।
आभीरं कोङ्कणं चैव द्रविड़ं दक्षिणापथं।
अवन्तीं मागधं चैव देशान्येतानि वर्जयेत्"।

(१) देवी। (२) मधीत राजन्।
(३) त्वाजगाद। (४) देवी।
(५) तिरोह। (६) इत्युपसंहाराच्च।

चन्द्रिकायां—

"सिन्धुसौवीरसौराष्ट्रान् तथा पर्य्य[१]न्तवासिनः।

अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति" ॥

स्कन्दपुराणे,—

"अङ्गवङ्गकलिङ्गोड्रान् [२]पार्वतीयान् मयांस्तथा।

सिन्धुसौराष्ट्रसौवीरान् पारदानाश्रमालवान् ॥

निवासाय द्विजो नित्यमनापदि [३]विवर्जयेत्।

एतान्यपि यदि गृही संश्रयेत् वृत्तिकर्षितः" ॥

विष्णुः,—

"म्लेच्छ[४]विषये श्राद्धं न कुर्वीत"।

आदित्यपुराणे,—

"अधर्मदेशमध्ये तु कृत्वा क्रतुशतान्यपि।

न पश्यन्ति द्विजाः स्वर्गं जातु श्रेयो महामनाः" ॥

एतच्च अनापदिकाम्यकर्मविषयं।

हारीतः,— नारक्तागन्धावास्रज आवद्ध्नीयात्। अन्यत्र काञ्चनकमलकुवलयेभ्यः।

आपस्तम्बः,—

नित्यं शुचिः सुगन्धिः स्यात् शुक्लाम्बरधरः पुमान्।

गौतमः,— अनुच्चश्मश्रुर्नाकस्मात्। अकस्मात् शास्त्रीयनिमित्तत्वं विना दीर्घश्मश्रुर्न स्यात्।

(१) प्रत्यन्त। (२) पार्व्वत्यानुगमां स्तथा।
(३) विपर्ययेत्। (४) देशे।

आपदि तु काम्यकर्मापि तात्कालिकरोगादिशान्तिफलकं तत्रापि कर्त्तव्यमेव सुतरां नित्यं। एवं अनापदि नित्यकर्म अत्रापि कर्त्तव्यमेव, जातु श्रेय इति फलस्यैव निरा[१]-करणात्।

अथ भोगः आपस्तम्बः,—"संग्रहीता मनुष्यान् भोक्ता च धर्माविरुद्धान् भोगान्, एवमुभौ लोकावभिजायते। मनुष्यसंग्रहः स्वसुखाय।

सम्वर्त्तः,—

"ऋतुकालाभिगामी स्यात्प्राप्नोति परमं[२] पदं"।

विष्णुः,— लक्ष्मीवाक्यं। वसामीत्यनु[३]वृत्तौ।

"आचारसेविन्यथ शास्त्रशिष्टे विनीतवेशेन तथा सुवेशे।

सुशुद्धदन्ते ऋतु[४]वर्जिते च मृगाशनेनातिथिपूजनेन ॥

स्वदारनिष्ठे नियते स्वधर्मे सत्योत्कटे गत्यशनाविमुक्ते।

सदा, सुशुभ्रे च सुगन्धिगात्रे नित्यानुलिप्ते च विभूषिते च" ॥

वशिष्ठः,—

"न वहिर्मालां धारयेदन्यत्र रुक्ममय्याः" वहिर्गृहात्

हारीतः,—

"गुरुणाऽनुज्ञातोऽलंकारान् गृह्णीयात्। यथार्थं तान् बिभृयात्"। यथार्थं यथाप्रयोजनं।

(१) नित्यकरणात्। (२) परमां गतिं।
(३) सोमात्यनुवृत्तौ। (४) मृतवर्जिते।

विष्णुपुराणे,—

"सदानुपहते वस्त्रे प्रशस्ताश्च तथौषधीः।

गारुड़ानि च रत्नानि बिभृयात् प्रयतो नरः॥

सुशुक्लामलकेशश्च सुगन्धिश्चारुवेशधृक्।

सिताः सुमनसो हृद्या बिभृयाच्च नरः सदा"॥

महाभारते,—

"अन्यदेव भवेद्वासः शयनीये सदैव हि।

अन्यद्रथ्यासु देवानामर्चयाम्यन्यदेव हि"॥

न सुवर्णमनघ्यं धारयेत्। अनामिकाधारणे कुण्डलधारणे सामान्येन प्राप्तस्य स्नातकव्रतत्वेन पर्य्युदासः।

कालिकापुराणे,—

"कायस्थेनैव हेम्ना तु यत् पापं कुरुते नरः।

आचरेत्तदघं तस्य वज्रलेपो भविष्यति॥

अनामिकायां तद्धार्य्यं दक्षिणस्य करस्य च"।

दक्षिणानामिकाधिकरणं सुवर्णधारणं पुरुषार्थं विधीयते। तस्यैव वाक्यान्तरेण कर्माङ्गता विधीयते। जपहोमेत्यादिना। एवं च दक्षिणानामिकाङ्गस्थेन हेम्ना निषिद्धानुष्ठाने पापं गुरु स्यादित्यर्थः।

मनुः,—

"वहिर्माल्यं न धारयेत्, गृहादवहिः, नात्मना(१)चाहरेत् स्रजं"।

(१) पहरेत्।

यमः,—

"नैकवस्त्रेण भोक्तव्यं न नग्नः स्नानमाच(१)रेत्।

स्वप्तव्यं नैव नग्नेन उच्छिष्टश्चो न संविशेत्"॥

मनुः,—

"न जीर्णमलवासाः स्यात् भवे च विभवे सति।

नीचकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः"॥

तथा—

"नोत्सङ्गे भक्षयेद्भक्ष्यान्न जातु स्यात् कुतूहली।

न नृत्येनापि गायेत न वादित्राणि वादयेत्॥

न च स्फोटेन्न च क्ष्वेड़ेन्नाचैः क्रीड़ेत्कदाचन।"

स्फोटमङ्गुलीनां। क्ष्वेड़नं सिंहनादः।

यत्तु—

"वीणावादनतत्त्वज्ञः श्रुतिशास्त्रविशारदः।

तालज्ञश्चाप्रयासेन प्राप्नोति परमं पद"मिति याज्ञवल्क्यवचनं। तच्चित्तैकाग्रताकामनया क्रियमाणपरं। तस्य विहितत्वादस्य नैतद्विषयत्वं।

एवं,—

"गीतज्ञो यदि गीतेन नाप्नोति परमं पदं।

रुद्रस्यानुचरोभूत्वा तेनैव सहमोदते" इति रुद्रप्रीतये क्रियमाणपरं, तस्यापि निषेधः।

विष्णुः। "न सर्पशास्त्रैः क्रीड़ेत"।

(१) मर्हति।

वशिष्ठः,—

"नाङ्गनखवादनं कुर्य्यात् ।

न पादेन पाणिना वा जलमभिहन्यात् । नेष्टकाभिः फलानि निपातयेत् न फलैः फलानि ।

न पाणिपादचपलो न नेत्रचपलो भवेत् । न वाचा चपल- इति शिष्टस्य गोचरे" । स्नानविधिनिषेधकालाः प्रातःस्नान- प्रकरणे दर्शिताः ।

अथ संकरवर्जितं । वृहस्पतिः,—

"विप्रजातिं समासाद्य संकरं परिवर्जयेत् ।

मानुष्यं दुर्लभं लोके ब्राह्मण्यमधिकं ततः ॥

एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणं ।

याजनाध्यापने योनिस्तथा च सहभोजनं ॥

नवधा सङ्करः प्रोक्तो न कर्त्तव्योऽधमैः सह ।

उत्तमैरुत्तमैः सार्द्धं कर्त्तव्यं तु समेन वा ॥

योनिर्योनिसम्बन्धः सहभोजनमेकपात्रभोजनम् ।

यमस्मृतावधिकं हीनयोनिगमनं । दुष्टैः सह ब्रूया[१]दिति व्यवहारः । तद्द्रव्यपरिभोग[२]स्तदासनशयनोपभोगः तद्गात्रस्पर्शनम् । तत्संलापः । तद्गृहभोजनम् ।

तथा,— शौर्य्यादियोगस्य पापसंक्रमहेतुः ।

हारीतः,—

"हन्यादशुद्धः शुद्धं तु शोधयेत् । तयोर्यदत्र भूयिष्ठं शुद्धिः

(१) क्रियादि । (२) ग्रह ।

शुद्धतः स्मृतेः । योऽत्यन्ततपस्वी तत्संसर्गेण पापिनः पापक्षयो- भवति,तथा विश्वामित्रस्य त्रिशङ्कुयाजने, यस्त्वत्यन्तं पापिसम्पर्केण सामान्यतः साधोः पापसंक्रमो भवति, तथा स्नानशय्यासनान्यपि परिहार्य्याणि एके मन्यन्ते स्नानुपपत्तौ एवं ह्याहुः ॥

"आसनं शयनं स्नानमन्तर्द्धाय समाचरेत्" ।

स्नानुपपत्तौ स्नासनाद्यसम्भवे । शुद्धिं वस्त्रादिकमासनादि- ष्वन्तर्द्धाय परिग्रहः कार्य्य इत्यर्थः ।

मनुः,—

"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।

उपवीतमलंकारं स्रजं करकमेव च" ॥

अत्र ब्रह्मसूत्रमन्योपभुक्तं सर्वथैव न धार्य्यं । वासःप्रभृतीनां निर्णीया[१]मलामिति गौतमस्मृतेः प्रक्षाल्य धारणं ।

विष्णुस्मृतौ,—

परोपभुक्तमाल्यवर्जनं । याज्ञवल्क्यीये,— परकूपोद्यानगृहाणां वर्जनमधिकं । पङ्क्तिभोजने विशेषः ।

"अग्निना भस्मना चैव सलिलेन विशेषतः ।

द्वारेण स्तम्बमार्गेण षड्भिः पङ्क्तिर्विभज्यते ॥

देवादि निश्वाससहतं शरीरं यस्य वेश्म च ।

न तेन सङ्करं कुर्य्याद्गृहासनपरिच्छदैः" ॥

निश्वाससहतं पूजादिविरहात् ।

(१) प्रक्षाविति ।

विष्णुपुराणे,—

"दिश्वीचुपतितोन्मत्तवङ्कविराजिकौटकैः ।
बन्धकीबन्धकीभर्त्तृचुद्रान्वितकथैः सह ॥
तथातिव्ययशीलैश्च परिवादपरैः शठैः ।
बुधो मैत्रीं विकुर्वीत नैकः पन्थानमाव्रजेत्" ॥

मार्कण्डेयपुराणे,—

"न सर्वशंकिभिर्नित्यं न तु दैवपरैर्नरैः" ।

मैत्रीं कुर्य्यादित्यनुषङ्गः ।

मनुः,—

"पाषण्डिनोविकर्मस्थान् वैड़ालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तिंश्च वाङ्मात्रेणापि नार्चयेत्" ॥

मनुः,—

"न शूद्राय मतिं दद्यान्नोच्छिष्टं न वहिष्कृतं ।
न चास्योपदिशेद्धर्मं न चास्य प्रतिमादिशेत्" ॥

उच्छिष्टं भोजनपात्रशिष्टं, हविः पुरोडाशादि, दैवनैवेद्यश्राद्ध-दत्तानि । तत्रापि हविःशब्दप्रयोगात् । उच्छिष्टनिषेधो नाश्रित-शूद्रविषयः ।

"उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि वा" ।

इति केचित् ।

मनुना आश्रितशूद्रे दानविधानात्, शङ्खलिखितौ,— "कृषरं पायसापूपमांसदधिमधुघृतं कृष्णाजिनानि शूद्रेभ्यो न दद्यात्" । क्वचिदन्यत्र प्रकृताविति । प्रकृतमुत्सवः । उत्सवादिषु विवाहादिषु

देयमित्यर्थः। विष्णुस्मृतौ,— तिलदानमपि निषिद्धं। कुलनाशनादि । मनुर्बौधायनश्चतुर्थे ।

"कुविवाहैः क्रियालोपैर्न वेदाध्ययनेन च ।
कुलान्य(१)कुलतां यान्ति ब्राह्मणातिक्रमेण च ।
शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः ॥
गोभिरश्वैश्च यानैश्च कृषीराजोपसेवया ।
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणा ॥
कुलान्यकुलतां यान्ति यान्ति हीनानि मन्त्रतः ।
मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि ॥
कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः" ।

शिल्पं चित्रादिजीविकात्वेन, व्यवहारेण ऋणादानादिना, यानैः शकटादिभिः । यमशातातपव्यासाः,—

देवद्रव्यविनाशेन ब्रह्मणातिक्रमेण च ।
कुलान्यकुलतां यान्ति गवां (२)चातिक्रमेण च ॥ देवद्रव्यं देवोद्देशेन यद्द्रव्यं ।

अथ त्याज्यात्याज्याः ।

विष्णुर्मनुश्च,—

"एनस्विभिरनिर्णिक्तैर्नार्थं किंचित्समाचरेत् ।
कृतनिर्णेजनांश्चैतान् जुगुप्सेत्तु कदाचन" ॥

एनस्विनः महापातकिनः ।

---

(१) कुलान्याशु विनश्यन्ति ।
(२) ब्राह्मणातिक्रमेण च ।

वशिष्ठः,—

"पतितः पिता परित्याज्यो माता पुत्रं प्रति न पतति"

वौधायनः,—

"न पतितैः सह्यवहारो विद्यते, पतितामपि मातरं विभृयादनुभाषमाणः"।

गौतमः,—

"त्यजेत् पितरं सद्यः शूद्रयाजकं, शूद्रान्नपाचकं, शूद्रार्थयाजकं, वेदविप्लावकं भ्रूणहननं, यश्चान्त्यावसायिभिः सह संवसेदन्त्यावसायिन्याञ्च।" शूद्रार्थयाजकं शूद्रधनेन यज्ञकर्त्तारं, वेदविप्लावकं अनध्याये वेदाध्यापकं। यत्तु शङ्खलिखितौ,— "अयाज्याः, माता पिता सपिण्डा गुणवन्तः सर्व एवात्याज्याः, गुणवन्तो विद्यावन्तः। श्रौतस्मार्त्तानुष्ठानरतश्च"।

देवलः,—

"पितरं भ्रातरं पुत्रं पुत्रिकां भगिनीं स्नुषां।
न त्यजेद्द्वेष[1]भोगार्थं दारानपि कदाचन ॥
मातृत्यागो हि शास्त्रेषु नोपदिष्टः कदाचन।
पतिता चाभिशस्ता च न माता त्यागमर्हति ॥
कुलवृद्धा वयोवृद्धा ज्ञानवृद्धाश्च मानवाः।
शीलवृद्धाश्च संपूज्या यथा स्वगुणगौरवात्" ॥

तदेतेषां मातृपितृव्यतिरिक्तानां पञ्चमहापातकित्वेऽपि न त्याज्यत्वमित्येवं परं। मातुस्तु महापातकित्वेऽपि अत्याज्यत्वम्।

(१) द्वेषलोभाभ्यां।

हारीतेन,— तु आचार्य्यर्त्विक्पितॄणामत्याज्यत्वमुक्ता,—

"अशुद्धौ च परित्यागः पातकेऽयाज्ययाजके।
उपाध्याये च याज्ये च न पितृत्याग उच्यते" ॥

पातके महापातकव्यतिरिक्ते, अयाज्ययाजने च उपाध्यायर्त्विग्याज्यानां त्यागोऽपि न पितुः, महापातकेषु पितरमपीत्यर्थः, एतच्च पतितत्यागविधिं विनापि पातित्ये सर्व्वव्यवहारवर्जनं। पापसंसर्गस्यैव दोषावहत्वात्। न तु त्यक्तसंसर्गत्वेन दोषनिमित्तत्वं। त्यागविधिस्तत्र ज्ञातीनां पुरुषार्थः। तदतिक्रममेतेषामेव दुरितं; न तु त्यागविध्यभावेन पातकिनो व्यवहार्य्यत्वं। यत्तु वशिष्ठेन त्यागविध्यन्तरं अत ऊर्द्ध्वं तेन सधर्मयेयुः, तद्धर्मिणो वा स्युः, सधर्मयतिइति, तत्सूतका[1]तुरविषयं, त्यागे कृते तु सूतकमृतकयोः सूतकमृतकं न कर्त्तव्यं, करणे तत्साम्यापत्तेः, रिक्थ पिण्डोदकानि व्यवर्त्तत इति शङ्खलिखितवचनात् श्राद्धदायभागादिकमपि त्यागे सति न भवति। न पतितमात्रे वचनाभावात्, एवं चाशौचव्यतिरिक्तव्यवहारः त्यागं विनापि पतितैः सह न कर्त्तव्यः। पतिताभिशस्तदुष्टात्मकुलक्षयकरस्य तस्य पुरो वान्धवानां राज्ञश्च समक्षं दोषानभिख्याथाः, पुनः पुनरवस्थां लभस्वेति स यद्येवमपि अनवस्थितमतिः स्यात्ततो भिन्नपात्रमादाय पूर्वमपापमपसव्यं कृत्वा वामपादेन दक्षिणां दिशं न्युब्जयेत्। पात्रमपसव्यं कृत्वापविद्धादिकं कृत्वा शौचमुपासीरन्। अपापादिकस्य रिक्थपिण्डोदकानि निव-

(१) तत्सूचककारणादिविषयं।

र्त्तते, अवस्थां लभस्वेति प्रायश्चित्तं कुर्वीत। सभायां पुनः पुनर्वक्तव्यं। यदि प्रायश्चित्तं न करोति तदोक्तविधिना त्यागः कार्य्यः, मनुवचनान्निन्दितेऽहनि सायाह्ने सर्वे ज्ञातयः कुर्य्युः। वशिष्ठस्मृतेः संमार्ज्जनाद्यसंस्कृतस्थामस्थघटेन दासी दासीसवर्णपुत्रान्यतमद्वारा जलानयनं, जलानेता जलकुम्भमपसव्यो वामपादेन दक्षिणाभिमुखो घटमन्युब्जमधोमुखं कुर्य्यात्। अमुकशर्मणे पतितायेदं जलमुपतिष्ठतामिति गैरिकरिक्तेषु कूपेषु, ज्ञातयः प्रकीर्णकेशा अपसव्यास्तमन्वालभेरन्। ततः स्नात्वाचम्य मनुवचनादहोरात्रं अशौचमासीरन्। गौतमवचनाच्च सर्वाणि प्रेतकार्य्याणि जीवत एव अस्य कुर्य्युः पुत्रादयः। पूरकपिण्डषोडशश्राद्धादिकं।

मनुः—

"एवं तस्य विधिं कुर्य्याद्योपि सुपतितास्वपि।
वस्त्रान्नयानदेयं तु वसेत् पुण्यगृहान्तिके"॥

त्यागे कृते यदि प्रायश्चित्तं करोति तदा पयः पानीयं घृतं वरणं मधूपलभ्य नद्यां पुण्यजलायां स्नायात्। ब्राह्मणा ब्रूयुश्चरितं त्वयेति। चरितमिति प्रतिवचनं। वशिष्ठवचनाद्धिरण्मयं मृण्मयं वा कुम्भं नदीजलपूर्णं तस्मै च दद्युः।

"तदापः प्रतिगृह्णाति; शान्ता द्यौः; शान्ता पृथिवी; शान्तं शिवमन्तरीक्षं यो रोचनस्तमिह गृह्णामीति" यजुर्भिः। पावमानीभिरितरसम्बन्धिभिश्च कुशाण्डिभिर्होमः। ततस्तेनोदकेनैवमापोहिष्ठेति तिसृभिरभिषिञ्चेयुः। ततः सर्वेषां ज्ञातीनां तेनैव सह नद्यां स्नानं। जलकुम्भापवर्जनं। गोभ्यो घासदानं। गोभिर्घासे

भक्षिते ततो गृहं प्रविश्य जातकर्मादि तस्य कर्त्तव्यम्। गां हिरण्यं ब्राह्मणेभ्यो दद्यात्। आचार्य्याय चैवं। ततोऽनेन सह सर्वे अयं च पुनरुद्धारविधिस्त्यागविध्यभावेन भवति। प्रायश्चित्तमात्र व्यवहाराः। व्यवहार्य्यत्वात्।

मनुः,—

"बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः।
शरणागतहन्तॄंश्च न तैः सम्भूय सम्विशेत्"॥

एतैः सह कृते च प्रायश्चित्ते व्यवहारो वर्ज्यः। उदकपानपदं व्यवहारमात्रोपलक्षकम्। स्मृत्यन्तरात् स्त्रीघ्नानपि इति शारीराणि स्नातकव्रतानि। अथ वाचिकं तच्च वाच्यावाच्यभेदेन द्विविधं। तत्र वाच्यं सर्वश्रेष्ठं विष्णोर्नाम।

विष्णुपुराणे,—

"यन्नामकीर्त्तनं पुंसां विलायनमनुत्तमं।
मैत्रेयाशेषपानानां धातूनामिव पावकः"॥

गीतायां,—

"सततं कीर्त्तयन्तो मां यजन्तश्च दृढ़व्रताः।

महाभारते,—

"एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्च्चेन्नरः सदा"॥

विष्णुधर्मे,—

"चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत्।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः॥

अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ।
संकीर्त्तितमघं पुंसो दहत्येधो यथानलः" ॥

विष्णुधर्मोत्तरे,—

"आर्त्ता विषण्णा विषयाभिभूताः,
घोरेषु च व्याधिषु पच्यमानाः
संकीर्त्त्य नारायणशब्दमात्रं
विमुक्तदुःखाः सुखिनो भवन्ति" ।

विष्णुरहस्ये,—

"सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः
यन्मुहूर्त्तं क्षणं वापि वासुदेवं न कीर्त्तयेत्" ॥

महाभारते,—

"प्राणप्रयाणपाथेयं संसारव्याधिभेषजं ।
दुःखशोका(१)पविद्राणं हरिरित्यक्षरद्वयं" ॥

रामायणे,—

"न तत्र दानवाः सन्ति न पिशाचा न राक्षसाः ।
यत्र देवो गृहे विष्णुः कीर्त्त्यते हि सदा सता" ॥

विष्णुधर्मोत्तरे,—

"नामसंकीर्त्तनं नित्यं क्षुतिप्रस्खलितादिषु ।
यः करोति महाभाग! तस्य तुष्यति केशवः" ॥

(१) परित्राणं ।

पुनर्विष्णुपुराणे,—

"अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैर्यथा" ॥

तथा अर्थविशेषे नामविशेषमुक्त्वा

"सर्वार्थपदशक्तस्य वासुदेवस्य चक्रिणः ।
यथाभिरोचते नाम तत्सर्वार्थेषु कीर्त्तयेत्" ॥

महाभारते,—

"एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्च्चेन्नरः सदा" ॥

एवं सहस्रनामगजेन्द्रमोक्षणादिकीर्त्तनमपि तत्तत्फलार्थं ।

तथा मनुः,—

"वेदाभ्यासरतं क्षान्तं पञ्चयज्ञक्रियारतं ।
न स्पृशन्तीह पापानि महापातकजान्यपि" ॥

तथा,—

"परिनिष्ठितकार्यस्तु स्वाध्यायेनैव हि द्विजः" ।

तत्र ब्रह्मभागः साक्षाद्विष्णुपरः । कर्मभागोऽपि यज्ञरूपविष्णु-नामकीर्त्तनपरः । इत्यादिसर्वस्मृतिपुराणेषु कोटिशो वाक्यानि विस्तरभयान्न लिख्यन्ते ।

तथा भविष्यपुराणे,—

"महादेव! महादेव! महादेवेति चैव हि ।
पठेदेतन्नियमवान् शृणुयाद्वापि यः सदा" ॥

यद्देवभेदमासाद्य,—

"मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।
इतीरयन्ति ये नित्यं न हि तान् बाधते कलिः ॥
कीर्त्तयन्ति च ये रुद्रं सकृदप्यत्र मानवाः ।
सर्वपापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि ॥
अश्वमेधसहस्रस्य सहस्रगुणितस्य च ।
फलं प्राप्नोति यो भक्त्या महादेवेति कीर्त्तयेत् ॥
प्रसङ्गात् कौतुकाल्लाभाद्भयादज्ञानतोऽपि वा ।
हरइत्युच्चरन्मर्त्यः सर्वपापैः प्रमुच्यते ॥
त्रिपुरहर! हराऽऽदिदेव! शम्भो!
त्रिनयन! शंकर! रुद्र! शूलपाणे! ।
भव! शरणमितीरयन्ति ये वै,
भवजलधौ न विशन्ति ते मनुष्याः" ॥

एवमन्यान्यपि शिवकीर्त्तनपराणि वाक्यानि विस्तरभयान्न लिख्यन्ते ।

शाम्बपुराणे—

"विकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः ।
लोकप्रकाशकः श्रीमान् लोकचक्षुर्ग्रहेश्वरः ॥
लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥
गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः ।
यत्र तेन महाबाहो! द्वे सन्ध्येऽस्तमनोदये ॥
स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते" ।

भविष्यपुराणे,—

"उपवासी रविं यस्तु भक्त्या ध्यायति मानवः ।
तन्नामजापी तत्कर्मरतस्तद्गतमानसः ॥
निष्कामं पूजयेद्देवं परं ब्रह्माधिगच्छति" ।

विष्णुपुराणे—

"ये त्वामार्य्येऽतिदुर्गेति वेदगर्भेऽम्बिकेति च ।
भद्रेति भद्रकालीति क्षेमाक्षेमंकरीति च ॥
प्रातश्चैवापराह्ले च कीर्त्तयि[1]ष्यन्ति मानवाः ।
तेषां हि प्रार्थितं सर्वं त्वत्प्रसादाद्भविष्यति" ॥

मार्कण्डेयपुराणे,—

सावर्णिः सूर्य्यतनय इत्यारभ्य सावर्णिर्भविता मनुरित्यन्तं देवीमाहात्म्यं प्रकृत्य—

"मधुकैटभनाशं च महिषासुरसूदनं ।
कीर्त्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः ॥
न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनं" ॥ इत्यादि ।

विष्णुपुराणे—

"गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि ।
स्थितैरुच्चारितं हन्ति पापं जन्मत्रयार्जितं" ॥

गङ्गामधिकृत्य—

या पावयति भूतानि कीर्त्तिता च दिने दिने ।

---

(१) स्तोष्यन्त्या नम्रमूर्त्तयः ।

महाभारते,—

"कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहं।
य एवं सततं ब्रूयात्सोऽपि पापात् प्रमुच्यते"॥

तथा—

"अहं काशीं गमिष्यामि तत्रैव निवसाम्यहं।
इति ब्रुवाणः सततं काशीवासफलं लभेत्"॥

स्कन्दपुराणे नन्दिनं प्रतीश्वरवाक्यं।

"अनामयस्तेतनो वा नाम कीर्त्तयता तव।
सोऽश्वमेधफलं चैव लप्स्यते नात्र संशयः"॥

मत्स्यपुराणे,—

"कार्त्तवीर्य्यार्जुनो नाम राजा बाहुसहस्रधृक्।
योऽस्य कीर्त्तयते नाम कल्यमुत्थाय मानवः॥
न तस्य वित्तनाशः स्यादिष्टं च लभते ध्रुवं"।

विष्णुधर्मे,—

"नमोऽस्तु ते कार्त्तवीर्य्येत्यभिध्यायति चैव यः।
तिलप्रस्थप्रदानस्य नरः पुण्यमवाप्स्यति"॥

स्कन्दपुराणे,—

"सोमनन्दिनीति यः प्रोक्का कर्त्तारं प्रतिपद्यते।
न तस्य द्विपिशार्दूलभयं कुर्वन्ति कुत्रचित्"॥

तथा—

"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनं"॥

अथ सत्यवचनं।

मनुयमौ,—

"सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियं।
प्रियं च नानृतं ब्रूयादेष धर्म्मः सनातनः"॥

एतेन प्रियं सत्यं च मिलितं द्वयं वक्तव्यमित्युक्तं भवति।

हारीतः—

अनृतमधिकृत्य, चतुर्विधं भवति, पणितानृतं, प्रत्ययानृतं, सुकृतानृतं, साधारणमिति, विक्रेतुरसद्गुणकीर्त्तनं, क्रेतुर्गुणापह्नवः, दोषकीर्त्तनं च पणितानृतं, एतच्च कितववृत्तिरूपं निषिद्धं। प्रत्ययानृतं त्रिविधं, उपादाने परस्मै दापने यन्मिथ्यावचनं। तद्वि प्रलम्भानृतं।

साक्षिणः कूटसाक्षिके लभ्रान्त्या मिथ्यावादित्वे साक्षित्वापलापे यदनृतं। यो द्वयोरर्थिप्रत्यर्थिनोर्जयपराजयनिर्णयकर्त्ता मैत्र्यात्-द्वेषाल्लोभाद्वा पक्षपातेन मिथ्या वदति तद्व्यवहारानृतं, एवं त्रिविधं, प्रत्ययानृतं, एतस्मिंश्चतुर्विधप्रत्ययानृते द्रव्यविशेषे पापविशेषः।

यमः,—

"पञ्च पश्वनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥
हन्ति तानसंख्यातान् हिरण्यार्थेऽनृतं वदन्।
सर्वं भूम्यनृतं हन्ति मास्म भूम्यनृतं वदेत्॥
अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने।
पशुवत् क्षौद्रघृतयोर्यच्चापि तासु सम्भवं॥

गोवधस्तेषु सर्वेषु शयनेष्वासनेषु च ।

अश्ववत् सर्वपापेषु खरोष्ट्राश्वतरीषु च" ॥

अयमर्थः, [१]पशुलोभेनानृतं वदन्, पञ्चसंख्यकान् स्वबन्धून्निहन्ति नरके पातयति, गोऽर्थे ऽनृते दश, एवमन्येषु ।

पुनर्हारीतः,—

"[२]विश्रम्भं त्रियुगं हन्ति पञ्च मिथ्यावसायतः ।

चणात् सप्तगुणं हन्ति त्वनृतं व्यवहारतः" ॥

विश्रम्भसंज्ञके [३]ऋजानृते [४]त्रियुग्म जन्मत्रयं [५]नरके पातयति । मिथ्यावसायतः साचादनृते पञ्चगुणं पञ्चजन्मपर्य्यन्तं नरकपातः । व्यवहारो जयपराजयानृते सप्तजन्मनरकपात इत्यर्थः ।

पुनर्हारीतः,—

दानानृतमिज्यानृतं तपोऽनृतमिति त्रिविधं सुकृतानृतं । दत्वा द्रव्यमदत्तमिति मिथ्यावचनं दानानृतं । यो यच्यतिइत्युक्का न यजते महान्तं । क्रतुं कर्त्तुमुद्यतः स्वल्पं करोति तदिज्यानृतं । तत्र त्रेधा भवति प्रायश्चित्तं । यस्तु उपक्रम्यायथार्थं तप्यति तत्तपोऽनृतं ।

तत्र चान्द्रायणं ।

"तत्र दानानृते देयद्रव्यविशेषेण दोषः ।

(१) पशुलाभे । (२) विश्रम्भात् त्रियुगं ।
(३) ऋणग्रहणान्हते । (४) त्रियुगं ।
(५) नरकपातः ।

अन्नानृते जन्म हन्ति द्वे तु वासोऽनृते तथा ।

त्रीणिरत्नानृते हन्ति चतुरं काञ्चनानृते ॥

पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।

शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥

एतत्तु द्विगुणं हन्ति कृत्वा भूम्यनृतं नरः ।

ततस्तु द्विगुणं भूयो[१] भुवं दत्वा हिनस्ति यः" ॥

हारीतः,—

साधारणं नाम गोब्राह्मणहितं, आपत्कल्पः, स्वैराभिधानं इति त्रिविधं, तत्र त्रिविधमपि न दोषाय ।

एवं ह्याह स एव,—

"न नर्मयुक्तं वचनं हिनस्ति न स्वैरवाक्यं च न मैथुनार्थे ।

प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि" ॥

देवलः,—

"[२]विवाहे ब्रह्म-हासार्थं प्राणिनां जीविताय वा ।

आत्मनः प्राणहेतोर्वा न स्याद्देवानृतं वदन्" ॥

विहारे मैथुने ब्रह्महासार्थं, ब्रह्मार्थं ब्राह्मणनिमित्तं, हासार्थं गोष्ठ्यां ।

गौतमः,—

"सप्त पुरुषान् दहति मनसापि गुरोरनृतं वदन्नकृतेऽल्पेष्वर्थेषु," अनृतं द्विविधं, असत्यं विसम्वादश्च । दृष्टश्रुतकृतानामन्यथावचनमसत्यं । प्रागल्भ्यापगतानां असंप्रवर्त्तनं विसम्वादः, इति ।

(१) अभयं । (२) विहारे ।

तथा,—

"परप्राणोपघातार्थे परद्रव्यापहारतः।

विशिष्टोऽनृतवादस्तु न वृथाकथनादिषु" ॥

अत्र विशेषमाह मनुः,—

"[१]वह्नूनां हि वधो यत्र तत्र साच्च्यनृतं वदेत्"।

यत्र साक्षिणः [२]सत्यवदनेन द्विजानां वधः शंक्यते। तत्र साक्षी मिथ्या ब्रूयात्। इदं च न्यायमूलं, [३]सत्यवदनस्य मरणानुकूलव्यापाररूपत्वेन हिंसात्वात्, तस्यां च [४]दोषभूयस्त्वात्, साच्यनृते दोषाल्पत्वादेव कर्त्तव्यं। [५]न साक्ष्यवदनस्य विधेयत्वेन निषेधाविषयत्वं, मिथ्या हि निषिध्यते सत्यं त्वर्थप्राप्त्यर्थं न विधेयम्।

सत्य[६]वदनस्य प्रियरूपस्य च स्नातकव्रतत्वेन विधेयत्वं नाप्रियस्य, तेन ब्राह्मणादिवधानुकूलसाक्षिसत्यवाक्यस्य निषिद्धत्वात्, न [७]सत्यानृतवदनस्य निषिद्धत्वेऽपि दोषान[८]ल्पत्वात् कर्त्तव्यत्वं, तथा च प्रायश्चित्तं सारस्वतीष्टिः स्मर्य्यते, एवं साक्षिव्यतिरेकेणापि वर्णवधानुकूलसत्यवचनं निषिद्धं। "पञ्चानृतान्यपातकानीति" वचनं, तत्र प्रतिप्रसवादेव निषेधाभावात् पातकाभावः, तथा च, तत्र प्रायश्चित्तं स्मर्य्यते, चरुमिति, उत्कर्षार्थवचोऽनृतं महापातकसमत्वेन गणनादित्यतिगर्हितं वर्जनीयं।

(१) वर्णिनां। (२) सत्यकथने।
(३) सत्यमूलस्य। (४) दोषभयत्वात्।
(५) नयसाच्यसत्यवचनस्य। (६) सत्यवचनस्य।
(७) तत्र। (८) दोषान्त्यत्वात्।

मनुः,—

"भूतं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत्"।

प्रथमभद्रपदं अभद्रवस्तुपरं, अभद्रं वस्तु भद्रमित्येवं ब्रूयात् नत्वभद्रमिति, पुण्यं प्रशस्तमिति ब्रूयात् इत्यापस्तम्बवचनाद्भद्रपदं पुण्यप्रशस्तादिपदोपलक्षणं, भद्रमित्येवेत्यनेन पक्षान्तरं पुण्यप्रशस्तादिपदं न वाच्यं भद्रमित्येव वाच्यमित्यन्वयः, आपस्तम्बः,— "अधेनुं धेनुं भद्रमित्येव ब्रूयात्"। धेनुभव्याशब्दो धेनुभविष्यत्यर्थे, धेनुभवायामुपगमः। पारस्करः, "गर्भिणीं विजयेति ब्रूयात्, सकुलमिति न कुलं, कपालमिति कपालं, मणिधेनुरितीन्द्रधेनुः"।

महाभारते,—

"पुष्पाणां शोभनं पुण्यं वृक्षाणामुद्धता कृषिः।

बङ्कारं च वासानां वाह्ये वाह्यां तथा गवां ॥

सम्पन्नं भोजनं ब्रूयात् पानीये तर्पणं तथा।

सुशृतं पायसे ब्रूयादवाच्यं कृशरे तथा ॥

श्मश्रुकर्मणि संप्राप्ते क्षुते स्नाते तु भोजने।

व्याधितानां च सर्वेषामायुष्यमभिनन्दितं" ॥

पण्यद्रव्ये शोभनं पण्यमिति वाच्यं।

वङ्कवारं वङ्कशब्दं गवां मध्ये वाक्यं दातुमिति ब्रूयात्। भोजने-भोज्येऽन्नादौ पानीये पेयद्रव्ये दुग्धादौ। आयुष्यमभिनन्दितं ब्रूयादित्यर्थः।

यमः,—

"जीवेति क्षुवतो ब्रूयाज्जीवेत्युक्तः सहेति च"।

क्षुवतः क्षुतं कुर्वतो जीवेति वक्तव्यं। क्षुत्कर्त्ता च त्वया सहेति वदेत्। इति वाच्यानि। गच्छन् यदि सभां पश्यति तदा सभां पश्यन्निमं मन्त्रं पठित्वा सभामभ्येति, "सभा सिरसिनामा त्वं ऋषिर्नामासि तस्यै तेनः"। सभाप्रवेशे मन्त्रः। सभावभाषमिति शुभे प्रजापते दुहितरौ सचेतसौषोनविषादुपमास तिष्ठेत् सचेतनो भवति संसवो वाजन इति, प्रविश्य।

जपः,— अभिभूर्हेमागमविराट् प्रतिवासाः कविपादुपमास तिष्ठेत् सचेतनो भवति, संसवो जनः। सपवैं सभापतिं बुद्धिं मन्येते, दास्यक्रोधशान्त्यै अभिमन्त्रणं, जात एषारभय्यातनुर्मन्ये, क्रोधस्य नाशिनीः।

"तां देवीं ब्रह्मचारिणो विनयन्तु सुमेधसः।
द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि"॥

गर्भमश्वतर्य्या सह सहसा वा पाठसहयज्ञैः।

यदि मन्येत सभापतिर्मम द्रोहं करिष्यतीति तमभिमन्त्रयेत्। गते वामोवास्या आदते हृदयमादधते यत्र निहिता वाधकतां ततस्ततआददे यदहं ब्रवीमि तत् समिधरौँ। एतदेव सभापतिवशीकरणमन्त्रः। सर्वदा गमनकाले मार्गाभिमन्त्रणं।

नमो रुद्राय पथि[१]सदे स्वस्तिमांसं पारय, एवं नमो रुद्राय चतुष्पथसदे स्वस्तिमांसं पारयेति चतुष्पथा[२]भिमन्त्रणं, नमो रुद्रायाप्सुसदे स्वस्तिमांसं पारय, नौकारोहणे मन्त्रः। सुनावमारु-

(१) पदे। (२) चतुष्पदाभिमन्त्रणं।

हेयमिति उत्तरेण मन्त्रः। सूत्रामा ऋणं[१] काननं प्रवेष्टुं काननाभिमन्त्रणं, नमो रुद्राय वनसदे स्वस्तिमांसं पारयेति, पर्वतारोहणे मन्त्रः। नमो रुद्राय गिरिसदे स्वस्तिमांसं पारयेति। श्मशानाक्रमणे मन्त्रः। नमो रुद्राय [२]श्मशानसदे स्वस्तिमांसं पारय, गोष्ठप्रवेशे, नमो रुद्राय सकृत्पिण्डसदे स्वस्तिमांसं पारय, वस्त्रस्वात[३] वाताहतोवस्त्रमभिमन्त्रयते, शिवा चासिन वज्रोऽसि नमस्तेऽस्तु मा मा हिंसीः, गर्जितमेघमभिमन्त्रयते, शिवा नो वर्षाः सन्तु शिवा नः सन्तु विद्युतः, शिवा नस्त्वासन्तु यास्त्वं [४]हर्नासि वृत्रहन्, शब्दं कुर्वाणां शृगालीमभिमन्त्रयते, शिवा नो नामासि स्वधितिस्तेतिजानः नमस्तेऽस्तु मा मा हिंसीः। शब्दायमानं पक्षिणमभिमन्त्रयते।

"हिरण्यवर्ण! शकुने देवानां प्रहितं शिव!।
यमदूत! नमस्तेऽस्तु किंत्वाकार्करिकोऽब्रवीत्"॥

लक्षण्यस्य [५]वृक्षस्याभिमन्त्रणं। मा त्वाशनिर्मापरशूर्मादण्डोराजप्रेषितः।

"अङ्कुरास्ते प्ररोहन्तु निवाते त्वाभिवर्षतु।
अग्निष्टिसुस्त मा हिंसीत् स्वस्ति तेऽस्तु वनस्पते"॥

स्वस्ति मेऽस्तु वनस्पते" स यदि किंचिद्व[६]तवाहि लभते तत् प्रतिग्रहे मन्त्रः। द्यौस्त्वाददातु पृथिवी ददातु प्रतिगृह्णा-

(१) सूत्रामाणं। (२) पितृसदे।
(३) वस्त्रप्रान्तवाताहतो। (४) हनसि।
(५) देवस्य। (६) द्रोभूतिलादिन् न लभ्यते।

मौति। ओदनप्रतिग्रहे एतन्मन्त्र[१]पाठानन्तरं वक्ष्यमाणमन्त्राभ्यां प्राशनं, ब्रह्म प्राश्नात्विति प्रथमं, ब्रह्मत्वाप्राश्नात्विति द्वितीयं, अन्नप्रतिग्रहे प्रतिग्रहानन्तरं प्राशनं, ब्रह्म प्राश्नात्विति प्रथमं, ब्रह्मत्वाप्राश्नात्विति द्वितीयं, ब्रह्म त्वापि वत्विति तृतीयं। इतिवाच्यं,

अथावाच्यानि; मनुः—

"अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्"।

एतच्चाग्निषोमीयपर्यन्तं तदूर्द्धं कात्यायनः, नामग्रहणभोजने स्यातः कुर्वीतेति।

"शुष्कं बैरं विवादं च न कुर्य्यात्केनचित् सह"।

वशिष्ठः,— "[२]न मिश्रभाषणमिच्छेत"।

मनुः,—

"ऋत्विक्पुरोहिताचार्यैः शालकातिथिसंश्रितैः।
वृद्धबालातुरैर्वैद्यैर्ज्ञातिसम्बन्धिबान्धवैः॥
मातापितृभ्यां नारीभिर्भ्रात्रा पुत्रेण भार्यया।
दुहित्रा वा सवर्गेण विवादं न समाचरेत्॥
तस्मादेतैरधिक्षिप्तः स हेता संज्वरः सदा"।

देवीपुराणे,—

"न कुर्य्याज्जनसंवादं न वैद्यैर्न च वत्सलैः।
नृपबन्धुगुरुमानभिषक्ज्योतिःपुरोहितैः।
विरोधेन महद्दुःखं प्रीत्या सुखमवाप्नुयात्"॥

(१) प्राशना। (२) म्लेच्छभाषणां शिक्षेत

बन्ध्वादयो नृपस्य, ज्योतिः [१]ज्योतिष्कः, विष्णुपुराणे,— नारभेत कलिं प्राज्ञः, प्राग्दोषानुवृत्तौ, देवलः, परुषवचनं, अपवादः, पैशून्यं, अनृतं, वृथालापः, निष्ठुरं, इति वाङ्मयाष्ट, कुलविद्याचारदोषकथनात्मकं तत्कालक्रोधसन्तापजनकं वचः परुषं, परुषवचनानामेव परोक्षे भाषणमपवादः, गुरुनृपतिबन्धुभृत्याग्रे कार्य्यनाशार्थं गुप्तं[२] पैशुन्यं, अनृतं प्रसिद्धं। देशराज्यपराश्रितहासक्रीड़ादिविषयं निष्प्रयोजनभाषणं, वृथालापः, गुह्याचार[४]मैथुनसम्बन्धकीर्त्तनं, अमेध्यनामग्रहणं, अमाङ्गल्यशब्दोच्चारणं निष्ठुरं।

विष्णुः,— "न कस्यचिन्मर्मणि स्पृशेत्"।

गोप्यशब्दकीर्त्तनं मर्मशब्दः।

हारीतः,—

"न वेदगुरुब्राह्मणगोपरिवादं कुर्य्यात्"।

आपस्तम्बः,—

"गोदक्षिणानां कुमार्य्याः परिवादांश्च वर्जयेत्"

गोरदक्षिणार्थेऽपि, दक्षिणानां वस्त्रहिरण्यादीनां आप इत्यधिकृत्य।

वायुपुराणे,— "नचैताः परिक्षीत।
न परिवदेत् तथा नचायुः परिवदेत्"॥

(१) ज्योतिषिकः। (२) जनपादं तु।
(३) गुप्तदोषकथनं। (४) गुह्याङ्गमैथुन

तथा,—

तावत्कालं दीक्षितो [1]भुवस्तनं परिवदेत्। तथा।

योगं परिवदेद्यस्तु ध्यानिनं मोक्षकामिनं।

"स गच्छेन्नरकं घोरं श्रोतारश्च न संशयः"।

महाभारते,—

"सदा नारायणं देवं सर्वपापहरं [2]शुभं।

निन्द्यमानो नरः शीघ्रं नरकं प्रतिपद्यते"॥

वराहपुराणे,—

"विष्णुरुद्रान्तरं ब्रूया, लक्ष्मीगौर्य्यान्तरं तथा।

मर्त्यानां नास्तिकानां च काव्यं शास्त्रं विगर्हितं"॥

अन्तरं भेदं, काव्यं कविकल्पितं न प्रमाणं।

यमपैठीनसी,—

"न निन्द्या ब्राह्मणा गावः काञ्चनं सलिलं स्त्रियः।

पृथिवी च षड़ेतानि यो निन्दति स निन्दितः"॥

यमः,—

"यस्तु निन्द्यात् परं जीवन् प्रशंसत्यात्मनो गुणान्।

स वै वार्द्धुषिको नाम ब्रह्मवादिषु गर्हितं"॥

वराहपुराणे,— अधिकं, पूर्वभुक्तस्त्रीनिन्दनं च निषिद्धं।

गौतमः,— न म्लेच्छाशुच्यधार्म्मिकैः सह संभाषेत, संभाष्य [3]पुण्यकृतो मनसा ध्यायेत्, ब्राह्मणेन सह संभाषेत।

(१) रुद्र। (२) प्रभुं।

(३) गुणकृतो।

पैठीनसिः— "मत्तोन्मत्तप्रमत्तैः सह न संभाषेत, परस्त्रियं रहसि न संभाषेत"।

सांख्यायनगृह्ये,— "सूतकुदकीभ्यां न संवदेत्"।

मनुः,—

"नापृष्टं कस्यचिद्ब्रूयान्नचान्यायेन पृच्छतः"।

देवलः,—

"न नदीषु नदीं ब्रूयात् पर्वतेन च पर्वतं।

नान्यं प्रशंसेत्तत्रस्थस्तीर्थेष्वायतनेषु च"॥

मनुः,—

"पाषण्डिनो विकर्मस्थान् वैड़ालव्रतिकान् शठान्।

हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत्"॥

आपस्तम्बः,—

"न सौम्ये सपत्न इति ब्रूयात्," पुनरापस्तम्बः,— "वर्जयेद्गुरोः स्तुतिं समक्षे, सुस्नातमिति च, स्नानप्रशंसां विवर्जयेदित्यर्थः"।

मनुः,— "न विगृह्य कथां [1]कुर्य्यात्"। विगृह्य आक्षिप्य।

पुनरापस्तम्बः,— वाक्येन वाक्यप्रतिघातमाचार्य्यस्य वर्जयेत्। विद्यया विद्यानां प्रतिघातं वर्ज्जयेत्"।

सांख्यायनगृह्ये,— "न समेत्याक्रोशनोपिशुनोकुलं कुले चेतिहेतिहः स्यात्;" आक्रोशनो आक्रोशनवार्त्ता कुलं कुलः, वृथागृहाद्गृहगमनशीलः। इति हेतिहः पुरावृत्तिकथनपरश्च न स्यात्।

(१) ब्रूयात्।

महाभारते,—

"महात्मनां हि गुह्यानि न वक्तव्यानि कर्हिचित् ।
त्वंकारं नामधेयं च ज्येष्ठानां परिवर्जयेत् ॥
अधराणां समानानां उभयेषां न दुष्यति" ।

देवलः,—

"चक्षुष्मानिति लुब्धाचं चाण्डालं ब्राह्मणेति च ।
जुगुप्सा निन्दनं द्वेषात् परुषित्वं विशिष्यते ॥
वृषलं वृषलेत्युक्त्वा पतितं पतितेति च ।
सत्येनापि सदोषः स्यान्मिथ्या द्विगुण[१]वान् भवेत्" ॥

यमः,—

"प्रत्यक्षं वा परोक्षं वा पतितं यदि पश्यति ।
प्रत्यादेशो न कर्त्तव्यो रक्षेदात्मानमात्मना ॥
यानि मिथ्याभिशस्तानां गच्छन्त्यश्रूणि लोचनात् ।
पतिपुत्रान् पशून् हन्ति तेषां मिथ्याभिशंसिनां" ॥

ब्रह्माण्डे,—

"मास्मि देहीति चैवं यः प्रब्रवीति दुरात्मवान् ।
अपि जातिशतं गत्वा न विमुच्येत किल्बिषात्" ॥

शङ्खलिखितौ,— "देवेन्द्रधनुश्चन्द्रसूर्य्यपरिवेशोल्काः परस्मै न कथयेत्, नात्मनः प्रतिकूलं महाजनविरोधं कुर्य्यात् । गोष्ठीभिः संवध्येत, महाजना वेदार्थज्ञास्तैर्विरोधः, गोष्ठी वृथाकथाः" ।

(१) भाग

पैठीनसिः,—

"सुहृन्मरणमार्त्तिं वा न स्वयं श्रावयेत्परान्" ।

यमः,—

"तिथिं पक्षस्य न ब्रूयात् नक्षत्राणि न निर्दिशेत्" ।

अद्य द्वितीया, अद्य श्रवणेत्येवं न काम[१]येत् । शङ्खलिखितौ,— नगच्छेत्रागारे चरन्तीं गां धयन्तीं[२] न चक्षीतान्यस्मै, न वाह्यानवाह्य[३]तामिति ब्रूयात्, अवाह्यं[४] सदि ।

हारीते विशेषः,—

"परखलावतीर्णां नाचक्षीत, पिबन्तं च परवत्सं" ।

तथा, आपस्तम्बः,—

"वर्जयेद्देवताभिधानं नचाप्रयतः वर्जयेच्च सुवर्णेषु सूचनं ।
परिभोगं यथोक्तेषु मत्सरः पुत्रशिष्ययोः"

सूचनं पैशून्यं, परिभोगं पराभवं कृत्वा धनग्रहणं ।

वशिष्ठः,—

न म्लेच्छभाषां शिक्षेत, अष्टादशनरकहेतुकर्म्माधिकारे ।

हारीतः,—

"पारुष्यमनृतं वादश्रुतिविक्रयश्चेति वाग्जानि" ।

एवं विस्पष्टम[५]धीयात्, न शूद्रजनसन्निधावध्ययनं अनध्यायाध्ययनं च मनूक्तं वर्ज्यं, इत्यवाच्यानि, समाप्तं वाचिकं स्नातकव्रतं ॥

(१) ज्ञापयेत् । (२) पायन्तीं ।
(३) न वाह्ययाने वाह्यतामिति ब्रूयात् । (४) अवाह्यं नरादि
(५) सभिधेयात् ।

अथ पाणिजं, नरसिंहपुराणे,—

"नरसिंहगृहे नित्यं यः सम्मार्ज्जनमाचरेत्।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते"॥

वराहपुराणे,—

"यावत्कानि प्रहाराणि भूमिसंमार्ज्जने ददुः।
तावद्वर्षसहस्राणि विष्णुलोके महीयते"॥ इत्यादि।

तथोपलेपने,—

तत्रैव,—

"गोमयं गृह्य वै भूमिं मम वेश्मोपलेपयेत्।
यावन्ति तु पदान्यत्र समन्तादुपलेपनात्॥
तावद्वर्षसहस्राणि मद्भक्तो जायते तथा।
यदि द्वादशवर्षाणि लिप्यते मम वेश्मनि॥
जायते विष्णु(१)जे वंशे धनधान्यसमाकुले"। इत्यादि।

तथा,—

"स्नानोपलेपने कार्य्ये सलिलं यो ददाति मे।
यावन्ति जलविन्दूनि लिप्यमानस्य सुन्दरि!।
तावद्वर्षसहस्राणि विष्णुलोके महीयते"॥

विष्णु(२)पुराणे,—

"अभ्युक्षणं च यः कुर्य्यात् पानीयेन सुरालये।
स शान्तपापो भवति— नात्र कार्य्या विचारणा"॥

(१) विपुले वंशे। (२) विष्णुधर्म्मोत्तरे।

स्कन्दपुराणे,—

"अगम्यागमने पापमभक्ष्यस्य च भक्षणे।
सर्वं तन्नाशमाप्नोति मण्डयित्वा हरेर्गृहं"॥

तथा,—

"मा(१)ङ्गणं वर्त्तिकोपेतं स्वस्तिकैश्च विभूषितं।
देवदेवस्य कुरुते(२) जयते भुवनत्रयं"॥

नरसिंहपुराणे,—

"निर्माल्यमप(३)क्षाल्याथ तोयेन स्नाप्य केशवं।
नरसिंहाकृतिं राजन् सर्वपापैः प्रमुच्यते"॥

तथा,—

"यवगोधूमजैश्चूर्णैरुद्वर्त्त्योष्णेन वारिणा।
प्रक्षाल्य देवदेवेशं वारुणं लोकमश्नुते"॥

भविष्यपुराणे,—

"यावन्त्यः पांशुकणिका मार्जन्ते भास्करालये।
दिनानि दिवि तावन्ति तिष्ठत्यस्तमलो नरः"॥

तथा,—

"शिवमाल्यापनयनं पूजान्ते तत्र मार्जयेत्।
एकैकं तत्र तुल्यं स्याच्चान्द्रायणफलेन तु"॥

एवमन्येषामपि देवानां स्नानमार्जनादीनि तत्तत्शास्त्रोक्तानि।

(१) प्राङ्गणं वर्णकोपेतं। (२) क्रीड़ते भुवनत्रये। (३) मपनीय।

मनुः,—

"धारयेद्वैणवीं यष्टिं सोदकं च कमण्डलुं"।

तथा,—

सुवर्णरजतमुद्रिकाधारणं पूर्वमुक्तं, दर्भवटुकधारणं च।

मनुः,—

"न कुर्वीत वृथाचेष्टां नवार्यञ्जलिना पिवेत्"।

तथा,—

"न मृल्लोष्टं च मृद्नीयान्न च्छिन्द्यात् करजैस्तृणं"।

तथा स्वयं नोपानहौ हरेत् हस्तेनेति शेषः॥

तथा,— न पाणिस्थं भुञ्जीत।

तथा,—

"न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः।
न स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विनाततः॥
केशग्रहान् प्रहारांश्च शिरस्येतान् विवर्जयेत्।
न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः॥
न स्पृशेत् पाणिनोच्छिष्टो-विप्रगोब्राह्मणानलान्।
स्पृशेत तान् शुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्॥
गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु"।

कण्डूयेदात्मनः शिरः।

"अनातुरः स्वानिखानि न स्पृशेदनिमित्ततः।
रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत्"॥

न पाणिपादचपलः

देवीपुराणे,—

"नेत्राञ्जनं निषेवेत्तु दन्तधावनपूर्वकं"।

विष्णुपुराणे,—

"न कुर्य्यात् वस्त्रसंघर्षं न गृह्णीयाच्च नासिकां"।

महाभारते नन्द्याधिकारे,—

"ब्राह्मणैः कारयिष्यन्ति वृषलाद्दन्तधावनं"।

नाङ्गनखवादनं कुर्यात्, न पाणिना जलमभिहन्यात्, नेष्टकाभिः फलानि पातयेत्, न फलैः फलानि, तथा छेदन भेदन लेखन विमर्दन विदलनास्फोटनादिनाकस्मात् कुर्यात्। अवस्फोटनं हस्ताद्यङ्गस्य विस्फोटनं॥

आपस्तम्बः,— "पृष्ठतस्त्वात्मनः पाणिं न संश्लेषयेत्। गोब्राह्मणस्पर्शनवर्ज्जानुवृत्तौ स एवाह— "हस्तेन[1] शरणात्"।

वृद्धशातातपः,—

"उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः।
सुरापानेन तत्तुल्यं मनुराह प्रजापतिः"॥

वशिष्ठः,— "अग्निमापश्च न च युगपद्धारयेत्,। नानाग्नं[2] सन्निवापं वर्जयेत्," सन्निवापः संसर्गः, अयं[3] लौकिकाग्नि विषयः, वैदिकाग्नौ तु संसर्गविशेषात् प्रायश्चित्त विशेषः।

पैठीनसिः,—

"प्राणिनो हिंसितव्याश्च क्लिष्टपातं तु वर्जयेत् क्लिष्टपातं बहुक्लेशपूर्वकं।

(१) हस्तेन वाकारणात्। (२) नानाग्निनां। (३) च।

"नावपुरे कृथा[१]शस्त्रं गोकुलस्त्रीकुमारके ।
पुण्यस्नानोदकस्थाने मा[२]स्नावाक्रमेण तु ॥

निजनिधि[३]प्राप्तौ तथैव पुनरर्पयेत् । परस्परे पशून् वोल्वान-दर्भत्तणोवाच योजयेत् ॥

"मरवाधां न कुर्वीत जलवातायनादिभिः ।
सायं प्रातर्गृहद्वारं भिक्षार्थं नावघट्टयेत्" ॥

जलायनं प्रणालीं, वातायनं गवाक्षं, भिक्षार्थं भिक्षावृत्त्यर्थं, तथासमिद्धमग्निं हस्ताभ्यां न स्पृशेत् ।

उशनाः,—

"न वस्त्रेण वीजयेत्, यं कंचिदपि" ।

महाभारते,—

"देवमाल्यापनयनं द्विजोच्छिष्टापमार्ज्जनं
आकल्पपरिचर्या च गात्रसंवाहनानि च ।
अत्रैकैकं नृपश्रेष्ठ! यो गतो व्यतिरिच्यते" ॥

तथा,—

"कपिलायां च दत्तायां यत्फलं ज्येष्ठपुष्करे ।
तत्फलं भरतश्रेष्ठ! विप्राणां पादधावने ॥
द्विजपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ।
तावत् पुष्करपर्णेन पिवन्ति पितरो जलं" ॥

इति "पाणिजानि स्नातकव्रतानि" ॥

---

(१) वृथाशास्त्रं गोगुरु। (२) सीमानं वाक्रमेन्नतु।
(३) निक्षेपो।

अथ पादजानि ।

नरसिंहपुराणे,—

"प्रदक्षिणेन चैकेन देवदेवस्य मन्दिरे ।
पृथ्वीप्रदक्षिणफलं प्राप्य पश्चाद्धरिं व्रजेत्" ॥

वराहपुराणे,—

"यस्तु प्रदक्षिणं कुर्य्यात् साष्टाङ्गं च प्रणामकं ।
दशाश्वमेधस्य फलं प्राप्नुयान्नात्र संशयः" ॥

भविष्यपुराणे,—

"कृत्वा प्रदक्षिणं भक्त्या शिवस्यायतने नरः ।
अश्वमेधसहस्रस्य सुष्टीष्टस्य फलं लभेत्" ॥

सूर्यमधिकृत्य तत्रैव,—

"कृत्वा प्रदक्षिणं यस्तु नमस्कारं प्रयोजयेत् ।
राजसूयाश्वमेधाभ्यां स परं लभते फलं ॥
त्रिवृत्प्रदक्षिणं कृत्वा यो नमस्कुरुते रविं ।
भूमौ गतेन शिरसा स याति परमां गतिं" ॥
एवमन्यदेवानां प्रदक्षिणं ।

स्कन्दपुराणे,—

"प्रदक्षिणं यः कुरुते पठेन्नाम सहस्रकं ।
तुलसीपार्श्वतो नित्यं यज्ञायुतफलं लभेत्" ॥

तथाऽश्वत्थप्रदक्षिणं सर्वपापक्षयार्थं । तत्र मन्त्रः,—

"अग्निगर्भ! शमीगर्भ! यज्ञगर्भ! सनातन! ।
हिरण्यगर्भ! श्रीगर्भ! वेदगर्भ! नमोऽस्तु ते ॥

चक्षुःस्पन्दं भुजस्पन्दं दुःस्वप्नं दुर्विचिन्तनं ।
शत्रूणां च समुत्थानं अश्वत्थ! शमयस्व मे ॥
एकादशोऽस्मि रुद्राणां वसूनामपि चाष्टमः ।
नारायणोऽस्मि देवानां वृक्षराजोऽस्मि पिप्पलः ॥
त्वां दृष्ट्वा नश्यते पापं स्पृष्ट्वा लक्ष्मीर्विवर्द्धते ।
प्रदक्षिणाद्भवेदायुः सदाश्वत्थ! नमोऽस्तु ते" ॥

नारदः,—
"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः" ॥

इत्युपक्रम्य,—
"प्रदक्षिणं तु कुर्वीत तथास्यायुर्न हीयते" ।

मनुः,—
"मृदङ्गं दैवतं विप्रं घृतं मधु चतुष्पथं ।
प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्" ॥

आपस्तम्बः,— "प्रदक्षिणमग्निमाह्रियमाणं नाप्रतिष्ठितं भूमौ । प्रदक्षिणीकृत्योपेयात् । भूमौ स्थापयित्वा प्रदक्षिणीकृत्य गच्छेदित्यर्थः" ।

मार्कण्डेयपुराणे,—
"विद्याधिकगुरुं चैव द्विजः कुर्य्यात् प्रदक्षिणं" ।

शङ्खलिखितौ, प्रदक्षिणं कुर्य्यादित्यनुवृत्तौ विष्णुः,— "अग्नि-ब्राह्मणगणिका-पूर्णकुम्भादर्शच्छत्रध्वजपताकाः श्रीवृक्षवर्द्धमाननन्दावर्त्तादींश्च तालवृन्तचामराश्वगजान् दधीक्षीरमधुसिद्धार्थकांश्च" ।

वीणाचन्दनायुधादिगोमयफलपुष्पाक्षशाकगोरोचनादूर्वाप्ररोहांश्च उष्णीषालंकारमपि कनकरजतवस्त्रासनयानानि । भृंगारपशु-कुमारीमालाश्च श्रीवृक्षवर्द्धमाननन्दावर्त्ताः सन्निवेशनिषेधाः । स्वर्णादिरचिता ज्योतिःशास्त्रप्रसिद्धाः, उष्णीषालंकारो मुकुटं" ।

गौतमः,- योगक्षेमार्थमीश्वरमधिकृत्य गच्छेन्नार्थं, अन्यत्र देवगुरु-धार्मिकेभ्यः, अलब्धलाभो योगः । लब्धपरिपालनं क्षेमः, नान्य-मित्यनेनापीश्वरातिरिक्तस्य योगक्षेमसमर्थत्वादेव तत्र गमन-प्रसङ्गाभावेऽप्यनी[१]श्वरस्येश्वरपरा योगक्षेमसम्पादकत्वेऽपि न गन्त-व्येति दर्शयति, एवं देवगुरुधार्मिकाणामगन्तव्यत्वप्राप्तौ योगक्षेमा-समर्थत्वेऽपि तेषां धर्मार्थं गन्तव्यत्वमाह अन्यत्रेति ।

"रक्षितारं च राजानं ब्राह्मणं च बहुश्रुतं ।
अभिगम्याथ[२]संपूज्य सद्यः पापात् प्रमुच्यते" ॥

अथ गमनविधिः, याज्ञवल्क्यः,— "अयं मे वज्र इत्येवं[३]सर्वं मंत्रमुदीरयन्" । "वर्षत्यप्रावृतो गच्छेत्" ।

विष्णुपुराणे,—
"वर्षातपादिके छत्री दण्डी राज्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत्" ॥

एवं च अयं मे वज्रः, पाप्मानमपहनदिति मंत्रसमाप्तिपर्य्यन्तम-प्रावृतस्य गमनं । तदनन्तरं छत्रधारणं ।

---

(१) अन्यस्य द्वारा । (२) पूज्याय ।
(३) कृत्स्नं ।

"नोर्द्ध्वं तिर्यग्विदूरं वा निरीक्ष्य पर्यटेद्बुधः ।
सुगमाञ्च [१]महीपृष्ठं नरो गच्छेद्वि[२]लोमयन्" ॥

रथारोहणप्रसङ्गे, सारथिना युक्तो रथ इत्युक्ते[३]सर्वमित्यनेन रथ-समीपागमनं। [४]रथान्तरं साम[५]सीति [६]दक्षिणचक्रालम्भः, वृहद्सीत्युत्तरस्य वामदेव्यामसीति ईषादण्डाग्रं, रथोपवेशनस्थानाभिमन्त्रणं, अङ्गाऽन्यङ्गा[७]वरतो रथं स्थातुं स्वातमग्निमद्भिः सम्वत्सरं तं, दूरेहेतिरिन्द्रियावाध्वतस्तिस्रो[८]अग्नयः पथः पारयन्तु नमो माणिचलाय, उपविश्य दक्षिणं धूर्यं प्रतोदेन प्रेरयति, देवालयं दृष्ट्वा दूरादवरोहणं, विप्रनिकटेऽवरोहणं, गवां मध्येऽवरोहणं, [८]मुहूर्त्तमारुह्य जपः, इह रतिरिह मध्यमा मास्त्विह रति, रथभङ्गशङ्कायां जपः, अयं वामश्विना रथो मा दुर्गमाशुचोभिषत्, तदाभयं न भवति, वत्सादन्यत्र गमने रथं ध्वजं स्पृष्ट्वा[९] जपः। रथादवरुह्य यवसोदके दीयतामिति भृत्यान् प्रतिप्रैष्यः । हस्त्यारोहणप्रसङ्गे [१०]हस्ती यशसमसिहस्ती वर्चसमसि इन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मासं पारय। अश्वारोहणे मन्त्रः, अश्वयशसमसि; अश्ववर्चसमसि। इन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्तिमासं पारय, निषेधातिक्रमेणाशक्त्या गर्दभारोहणे त्वाष्ट्रोऽसि विष्णुदेवत्यः स्वस्ति-

(१) गृहीन्तृष्टं। (२) विलोकयन्।
(३) सविह। (४) रथन्तरं।
(५) मामीति। (६) रथ।
(७) वभितो। (८) पित्राद्यभिमुखे च दूरात्।
(९) स्पृष्ट्वा मन्त्रजपः। (१०) हस्तिपसममसि।

मासं पारय, एवम[१]शक्त्या ओष्ट्रारोहणे मन्त्रः। शूद्रोऽसि शूद्रजन्मा आग्नेयो वै हिरण्यरेताः, उत्तरेण स्वस्ति मासं पारय, मार्गाभिमन्त्रणं, नमो रुद्राय पथि[२]स्वदे स्वस्ति मासं पारय, चतुष्पथदर्शनेऽभिमन्त्रणं, नमो रुद्राय चतुष्पथसदे स्वस्ति मासं पारय ।

"न दुष्टं यानमारोहेत् कुलकायां न संश्रये ।
जनैकशून्यामटवीं गच्छेन्नैव शून्यगृहे वसेत्" ॥

मनुः,—

"नाविनीतैर्व्रजेत्धूर्त्तैर्न चक्षुर्व्याधिपीड़ितैः ।
न भिन्नशृङ्गाक्षिशुरैर्नवालधिविरूपितैः ॥
विनीतैस्तु व्रजेद्धूर्य्यैराशुचौर्लक्षणान्वितैः ।
[३]न रूवर्णोपसंपन्नैः प्रतोदे[४]नातुदन्भृशं" ॥

"अविनीतैर्दुष्टैः वालधिरिवरूपितैःच्छिन्ना[५]ङ्गुलैः" ।

तथा, "गवां याने च पृष्ठेन सर्वथैव विगर्हितं" एतेन रथशकटादिषु गोयानं[६] न निषिद्धं, स्कन्धस्य निषेधात् । अतएव विष्णुः, "गोभिर्नादान्तैः" अदान्तैरशिक्षितैरिति ।

स्कन्दपुराणे,—

"प्रदक्षिणं यः कुरुते पठेन्नथ सहस्रकं" ।
मलवासोनिषेधादिशिक्षितानां निषेधः ।

(१) एवमशक्तौ। (२) पत्तसदे।
(३) वर्णवपो। (४) नार्त्तदृन्।
(५) पुच्छैः। (६) निषिद्धं।

रात्रौ वर्षासु नालसो गच्छेद्धारीतवचनात् ।

दिवासु च पञ्च[१]सु नरोक्तेरशक्तावविसदिवागमने दोषः,

तथा, "नातिकल्यं नातिसायं नातिमध्यं दिने स्थिते" ।

विष्णुः—

"नैको ध्वानं प्रपद्येत नाधार्मिकैः सार्द्धं न वृषलैर्न द्विषद्भिः ।
नासंनिहितपानीयं नातिचूर्णं न संततं" ।

असंनिहितपानीयमिति क्रियादिविशेषणं । संततं, निरन्तरं प्रतिदिनमित्यर्थः ।

मनुः,— "नाज्ञातेन समं गच्छेत्" ।

हारीतः,—

पूर्ववृत्तिवृत्त्यर्थं "नासूर्य्यमध्वानं गच्छेत्, न नियमवेलायां, नानुदको अयज्ञोपवीतः, पूर्ववृत्तिसु वृत्तिमानास्तसूर्यं रात्रौ न गच्छत् । वृत्तिक्षीणस्तु गच्छेदित्यर्थ", नियमवेला नित्यकर्मकालः ।

वौधायनः,—

"विना कमण्डलुं नाध्वानं व्रजेत्, न सामन्तं गृहाद्गृहं । पदमपि गच्छेदिषुमात्रमित्येके, विना कमण्डलुमिति सर्वत्र सम्बन्धः । कमण्डलुग्रहणमुदकोपलक्षणं इषुमात्रादिषु प्रक्षेपमिति देशादधिकः पदमित्यर्थः ।

तथा, "न स्त्रिया सह व्रजेत्" ।

(१) दिवा च पञ्चसु नत्वोक्तेरशक्तावनसिदिवागमने न दोषः ।

देवीपुराणे,—

"नासहायो व्रजेद्रात्रौ नोत्पथे न चतुष्पथे" ।

याज्ञवल्क्यः, "वाहुभ्यां न नदीं तरेत्, न महावृक्षमारोहेत्" ।

आपस्तम्बः,—

"गर्भभयानारोहणरोहणावरोहणानि वर्जयेत् ।
न विनालं शासयिकीं जले मज्जनक्रियां" ।

विष्णुः,—

न "प्रवर्षति धावेत्, न नदीं तरेत् देवताभ्यः पितृभ्यश्चोदकमप्रदाय नदीतरणप्रसङ्गे तर्पणं कृत्वैव नदीं तरेदित्यर्थः । न चैतन्नदीतर्पणनिमित्तं तर्पणं, तथा सत्येकस्मिन् दिने बहुनदीतरणे बहुतर्पणं स्यात् । किं तु नित्यतर्पणस्यैव निमित्तस्य न कालनियमः । तेन प्रथमनदीतरणकाले कृततर्पणो न नद्यन्तरे कुर्य्यादित्यर्थः । यद्वा, यदि नदीतरणे तर्पयेदिति तर्पणस्य निमित्तत्वं श्रूयेत, तदा प्रकरणान्तरे प्रयोजनान्यत्वमिति निमित्तमुद्दिश्य विधानात् कर्मभेदः स्यात्, इह च गमनप्रकरणे न नियमोविज्ञेय इति तत्तर्पणात् पूर्वं नदीतरणं निषिध्यते, तेन नियमकालेन तर्पणवेलायामित्यनेन नदीतरणप्रसङ्गो नास्तीति तर्पणकालात् पूर्वमिवावगन्तव्यं वचनसामर्थ्यवत्, तथा न भिन्नयानेन तरेत् । नौकया भिन्नया ।

मनुः,—

"अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हिचित् ।
अदृष्टपूर्वमरण्यं न गच्छेद्दुष्टसत्त्वादिशङ्कया" ॥

वशिष्ठः,—

"नाग्निं ब्राह्मणं चान्तरेण व्यपेयात्,"

नाग्न्योर्ब्राह्मणयोः, अनुज्ञाप्य वा व्यपेयात्"।

पैठीनसिः,—

"न गोब्राह्मणान्तरे व्यपेयात्"।

यमस्मृतौ,।

"सन्निकृष्टाधानयोरन्तरा गतिनिषेधः"।

शङ्खलिखितौ,— "दम्पत्योः"।

बौधायनः,—

"पुरद्वारेन्द्रकीलपरिघावन्तरेण नातीयात्।

प्रेङ्खयोरन्तरेण न गच्छेत्, इन्द्रकीलं कीलयष्टिः, परिघमर्गलं, प्रेङ्खा हान्दोलिका।

मनुः,— "न लंघयेद्वत्सतन्त्रीं," वत्सरज्जुः, य संगच्छेन-गच्छतः,

"नमस्कर्त्तुं व्रजेत् कामं दिदृक्षुर्यज्ञकर्म वा।

कुलात्-कुलरहस्यार्थं संचरेन्नानिमित्ततः"॥

कुलात्कुलं, गृहाद्गृहं, रहस्यं गोप्यं, अनिमित्ततः प्रयोजनं विना, अद्वारेण नोपेयात् ग्रामं वा वेश्म वावृतं आवृतमन्यदपि चैत्यारामावद्वारेण न गच्छेत्।

आपस्तम्बः,— न कुसृत्या ग्रामं प्रविशेत्, नमो रुद्राय वास्तोष्पतय इति मान्त्रं जपेत्, अन्यां वा रौद्रीं. कुसृत्या कुमार्गेण"।

शङ्खलिखितौ,— "न वधबन्धनसमयं गच्छेत्, न दावं, न ऋषीणां प्रभवः, न महात्मनां, वधबन्धनसमयं, वधबन्धनार्थं मिलितजनसमुदायं, दावो वनाग्निः। ऋषीणामुपरिस्थानं कलहाय ग्रामादिकमिति माधवस्वामी। शङ्खलिखितौ,— "न वाहै-रपातपानीयैः पयः पिबेत्"।

मार्कण्डेयपुराणे,—

"एकस्यार्थं प्रयोक्ता ये निःस्वमन्नादिक नरं।

अदत्वा स्वादुमश्नन्ति त इमे श्लेष्मभोजनाः"॥

विष्णुपुराणे,—

"ततः प्रभृति वै भ्राता भ्रातुरन्वेषणं गतः।

प्रयातो नतति तथा तं न कार्य्यं विजानता"॥

देवलः,—

"आर्वायैर्भोजने चापि न त्यजेत् सहयायिनः।

देवानृषीनृषींश्चैव अनुसन्नपदं व्रजेत्"॥

गौतमः,—

"न प्रावृत्य शिरोऽह्नि पर्य्यटेत्, अप्रावृत्य रात्रौ";

देवलः,— "अशुद्धयानवाहनं वहिर्निष्क्रमणं च न कुर्वीत, तथा प्रदीपं— गृहमासन्नमभियायात् त्वरान्वितः"।

वशिष्ठः,—

स्थविरकालान्तरस्त्रीचक्रगणः पन्थाः समाचा म परस्मै देयः, सर्वैरेव वध्वा ऊह्यमानायाः, चक्रान् शकटादि, ऊह्य-मानाया विवाहकाले"।

मार्कण्डेयपुराणे,—

"मूकान्धवधिराणां च मत्तोन्मत्तकस्य च।
पुंश्चल्याः कृतवैरस्य वालस्य पतितस्य च"॥

शङ्खलिखितौ,— "पापरोगीगर्भिणीस्नातकप्रव्रजित-विद्यावित् गुणवृद्धेभ्यः पन्था देयः"। देवलः,— "पन्था देयो गवे राज्ञे दुर्बलाय"। आपस्तम्बः,— वर्णानां चेतरैः पन्था देयः, याज्ञवल्क्यः,— पन्था देय इत्यनुवृत्तौ नृपस्तेषामाद्यः स्नातकस्तु महीपते"! अत्र गमनसमये शुभाशुभशकुनानि,—

मत्स्यपुराणे,—

"श्वेताः सुमनसः श्रेष्ठाः पूर्णकुम्भस्तथैव च।
जलजानि च पुष्पाणि मांसमत्स्यास्तथैव[१]च॥
गावस्तुरङ्गमा नागा वात्स्यद्य[२]एकपशुस्त्वजः।
त्रिदशाः सुहृदोविप्रा ज्वलितोज्ज्वलनस्तथा॥
गणिका च महाराज! दुर्वा चार्द्रं च गोमयं।
रुक्मं रुप्यं तथा वस्त्रं सर्वरत्नानि चाप्यथ॥
औषधानि च सर्वज्ञ! यवाः सिद्धार्थकास्तथा।
नृवाह्य[३]मानं च भद्रपीठं तथैव च॥
शङ्खं चक्रं पताकांश्च मुदमायुधमेव च।
राजलिङ्गानि सर्वाणि शवं रुदितवर्जितं॥

(१) पार्थिवः। (२) दन्य-एकपशुस्तथा।
(३) न्टवर्द्धमानं यानं च।

घृतं मधु पयश्चैव फलानि विविधानि च।
स्वस्तिकं वर्द्धमानं च नन्दावर्त्तं स कौस्तुभं॥
नद्यश्च तत्र विन्यस्ता मङ्गलान्यपराणि च।
अक्षताः श्वेतमुख्याश्च तथा दर्पण एव च॥
अञ्जनं रोचना चैव भृङ्गारो माक्षिकं तथा।
वादित्राणां सुखशब्दो गम्भीरश्च मनोहरः॥
गान्धारः षड्जऋषभौ ये च शस्तास्तथा स्वराः।
मेघः[१] शस्ता घनाः स्निग्धा गजबृंहितनिस्वनः॥
नानुलोमतड़ित्शस्ता शक्रचापस्तथैव च।
अनुलोमा ग्रहाः शस्ता दिक्पतिस्तु विशेषतः॥
आस्तिक्यं श्रद्धधानत्वं तथा पूज्याभिपूजनं"।

तथा,—

"यानोत्सुकत्वं मनसः प्रहर्षः शुभस्य लाभो विजयस्य वादः।
माङ्गल्यलब्धश्रवणं च राजन् ज्ञेयानि नित्यं विजयप्रदानि"॥

नृवाह्यमानं यानं पुरुषयुक्तदोलादि, भद्रपीठस्वस्तिककौस्तुभाः सुवर्णादिघटितसन्निवेशाः। लोमाः,[२] दिक्पतिर्यथा पूर्वस्यां रविः।

स्मृतिः,—

"यः स्मृत्वा तुलसीं गच्छेत् कार्य्यसिद्धिस्तु तस्य वै।

(१) मेघाः।
(२) अनुलोमाः पृष्ठस्थाः।

तथा,—

"प्रयाणे चारुगरुड़ारूढं पारिजातहरं हरिं ।
सत्यया सहितं वन्दे सर्वकामार्थसिद्धये" ॥

अशकुनानि, विष्णुः,— "मत्तोन्मत्तव्यङ्गान् दृष्ट्वा निवर्त्तेत, वान्तविरक्तमुण्डजटिलवामनांश्च काषायप्रव्रजित(१)मलिनांश्च। तैल-गुड़शुष्कगोमयेन्धनतृणपलालभस्माङ्गारकवन्धांश्च, लवणक्लीवासव-नपुंसककार्पासरज्जुकेशांश्च। क्लीवो निरेतस्कः, आसवः सन्धानकं । नपुंसकस्त्रीपुंसलक्षणरहितः ।

मत्स्यपुराणे,—

"औषधानि च युक्तानि धान्यं कृष्णं च या(२)द्व ।
दन्धनं च तथाङ्गारं लगुड़श्च तथा शुभः ॥
अभ्यक्तं मलिनं मुण्डं(३) तथा नग्नं च मानवं ।
मुक्तकेशं ज्वरार्त्तं च काषायाम्बरधारिणं ॥
अन्धः पङ्गुस्तथा चर्म केशं वपनमेव च ।
तथैवोद्धृतसाराणि पिन्याकादीनि यानि च ॥
चाण्डालश्वपचादीनां वधबन्धनपालकाः ।
कुब्जकः पापकर्माणो गर्भिणी स्त्री तथैव च ॥
कुशभस्मकपालास्थिभिन्नभाण्डानि यानि च ।
रक्तानि चैव भाण्डानि मृतं साक्रन्दमेव च ॥

(१) काषायप्रवर्त्तितमलिनांश्च ।
(२) पावकं । (३) कुण्डं ।

एवमादीनि चान्यानि न शस्तान्यभिदर्शने ।
न शस्तो वाद्यशब्दश्च भिन्नत्वेन च जर्जरः ॥
एहीति पुरतः शब्दः शस्यते नैव पृष्ठतः ।
गच्छे(१)त्पश्चाद्धर्मज्ञः पुरस्तात्तद्विगर्हितं ॥
क्व यासि तिष्ठ मा गच्छ किं ते तत्र गतस्य तु ।
एते शब्दा(२)गता निष्ठास्ते विपत्तिकरा अपि ॥
ध्वजादिषु तथा स्नानं(३) क्रव्यादानां विगर्हितं ।
स्फालनं वाहनं चैव वास्तुभङ्गस्तथैव च ॥
शस्त्रध्वजानां शस्त्राणां पतनं च तथाशुभं ।
वायुः सशर्करो रू(४)क्षः सर्वदिग्भ्यः समुत्थितः ॥
प्रतिलोमस्तथा नीचो विज्ञेयो भयकृद्द्विजः ।
अनुकूलो मृदुस्पर्शः सुखस्पर्शः सुखावहः ॥
रुक्षारुक्षखराश्चण्डाः क्रव्यादाश्च विगर्हिताः ।
अप्रशस्तस्तथा ज्ञेयः परिवेशप्रदक्षिणे ॥
दृष्टे निमित्ते प्रथमं माङ्गल्यादिविनाशनं ।
शङ्करं पूजयेद्विद्वान् तथैव मधुसूदनं ॥
द्वितीये तु तथा दृष्टे प्रतापं प्रविशेद्गृहं" ।

कृष्णधान्यं तिलमाषादिः क्रव्यादा गृध्राः, अत्र च देवतादि-गमनस्य स्नातकव्रतत्वेन नित्यत्वेऽपि, अशकुनिदर्शनेऽगमनेऽप्यदोषः ।

(१) गच्छेति । (२) स्तथा निष्ठा ।
(३) स्थानं । (४) ऋक्षः ।

शकुनदर्शनत्वगमने दोषः, उभयदर्शनेऽपि गमनमेवा[१]विशकुनभूयस्त्वे गमने न दोष इति तात्पर्यं ।

अथ तीर्थगमनं, महाभारते,—

"अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ।
न तत् फलमवाप्नोति तीर्थाभिगमनेन यत्" ॥

तथा,—

"तान्युपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्त्वा कांचनं गां च दरिद्रो नाम जायते ॥
यथा शरीरस्योद्देशाः केचिन्मेध्यतमाः स्मृताः ।
तथा पृथिव्या उद्देशाः केचित् पुण्यतमाः स्मृताः ॥
प्रभावादद्भुता भूमेः सलिलस्य च तेजसा ।
परिग्रहान्मुनीनां च तीर्थानां पुण्यता स्मृता" ॥

अत्र तीर्थानां पुण्यप्रदत्वेन श्रवणा[२]सिद्धस्य च क्षेत्रस्य क्रियाविशेषप्रवेशमन्तरेण फलजनकत्व-उपदेशवैयर्थ्यात् क्रियाविशेषापेक्षाया तद्गमन-तन्निवासतत्स्नानतद्दानश्राद्धतपस्यादीनां क्रियाणां फलसाधकत्वं[३]। तथाचाविशेषाद्गमनमपि फलार्थं, न चान्यानर्थक्यादिति न्यायेनाश्वमेधाज्ञानस्येव गमनस्य निवासस्नानादिकमङ्गित्वेन तत्र फलश्रुतिरर्थवादः; तौ[४]र्थोत्पन्नस्य विनापि तीर्थस्नानादिसम्भवे गमनस्य क्रतुज्ञानवत् कर्माङ्ग[५]त्वासिद्धेः ।

(१) विशकुन भूयस्त्वे । (२) श्रवणाभाव ।
(३) फलसाधनत्वं । (४) अर्थोत्पन्नस्य गमनं विनापि ।
(५) कर्म्माङ्गत्वात् सिद्धेः ।

तथा च शङ्खः,—

"तीर्थं प्राप्यानुषङ्गेन स्नानं तीर्थे समाचरे[१]त् ।
स्नानजं फलमाप्नोति तीर्थयात्राश्रितं न तु" ॥

इति तीर्थयात्राफलं पृथक् दर्शयति । न च तीर्थयात्राश्रितं तीर्थयात्रापूर्वकं स्नानादिफलमित्येवं परमिति वाच्यं । तीर्थगमनस्य स्नानाद्यङ्गत्वे मानाभावात्,[२] अनैकान्तिकत्वे लिङ्गाभावस्य स्फुटत्वात्, तथा च तावत् फलश्रवणस्य वैयर्थ्यापत्तेः, अत एव लक्ष्मीधरेण स्नानफलं गमनफलं च पृथक् दर्शितं ।

महाभारते तीर्थयात्राप्रसङ्गे,—

"यस्य हस्तौ च पादौ च मनश्चैव सुसंयतं ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते" ॥

हस्तसंयमो अदत्तदानादिनिवृत्तिः, पादसंयमो म्लेच्छदेशगमनादिनिवृत्तिः, मनोविशुद्धिः कुसंकल्पनिवृत्तिः, विद्या तीर्थविधिज्ञानं, तपः उपवासादि, कीर्त्तिः, सच्चरितत्वेन प्रसिद्धिः । तेनाभिशस्तस्य तीर्थफलानधिकारः, अभिशस्त अदोषनिवृत्तिः स्यादेव ।

"प्रतिग्रहादुपावृत्तः, सन्तुष्टो येन केनचित् ।
अहंकारनिवृत्तश्च स तीर्थफलमश्नुते ॥
अकल्पको निरालम्बो लघ्वाहारो जितेन्द्रियः ।
विमुक्तः सर्वसङ्गैर्यः स तीर्थफलमश्नुते ॥

(१) स्नानं समाचरन् । (२) श्रुत्याद्यभावात् ।

अक्रोपनश्च राजेन्द्र! सत्यवादी दृढ़व्रतः ।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ” ॥

एतच्च तीर्थयात्रामुपक्रम्य महाभारते ऽभिधानात् तीर्थयात्राङ्गं।

शङ्खः,—

“ यस्य हस्तौ च पादौ च मनश्चैव सुसंयतं ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥ ”

इदं तीर्थस्नानाद्यङ्गं यात्राश्रवणाभावेऽपि तीर्थफलप्रतिबन्धवचनात् ।

वायुपुराणे,—

“ तीर्थान्यनुसरद्धीरः श्रद्दधानो जितेन्द्रियः ।
कृतपापो विशुध्येत किं पुनः शुद्धकर्मकृत् ॥
तीर्थयोनिं[१] न गच्छेच्च कुदेशे नैव जायते ।
स्वर्गे भवति वै विप्रो मोक्षोपायं च विन्दति ॥
अश्रद्दधानः पापात्मा नास्तिको च्छिन्नसंशयः ।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥
कामं क्रोधं च लोभं च यो जित्वा तीर्थमाविशेत्
तेन किंचिन्न वा प्राप्तं तीर्थाभिगमनाद्भवेदिति ” ॥

ब्रह्मपुराणे,—

“ या या काचित्तीर्थयात्रा मुनीन्द्रैः
कृता प्रयुक्ताप्यनुमोदिता वा ।
तां ब्रह्मचारी विधिवत् करोति
सुसंयतो गुरुणा चानुयुक्तः ॥

(१) तीर्थग्योनिं ।

सर्वस्वनाशे त्वथवा नृपस्तु स ब्राह्मणानग्रत एव कृत्वा ।
यज्ञाधिकारेऽप्यथवा निवृत्ते विप्रस्तु तीर्थानि परिभ्रमेत ॥
तीर्थे फलं यज्ञफलं तु यस्मात् प्रोक्तं मुनीन्द्रैरमरप्रभावैः ।
यद्यस्ति यज्ञेऽप्यधिकारितातः तस्य वरं गृहं गृहधर्माश्च सर्वे ॥
एवं गृहस्थाश्रमसंस्थितस्य तीर्थे गतिः पूर्वतरैर्निषिद्धा ।
सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानि नै[१]वेति वयं वदामः ॥ ”

अत्र च नैव सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानीतिवचनात्तीर्थफलं तीर्थयात्राफलं च श्रौताग्निमतो निषिद्धमिति प्रतिभाति, तत्तु नैव ।

“ महाग्निमान् सपत्नीको गच्छेत्तीर्थानि यत्नतः ।
सर्वपापविनिर्मुक्तो यथेष्टं गतिमाप्नुयात् ” ॥

इति वचनेन साग्नेरपि तीर्थयात्राफलकल्पनात् ।

किंतु,— “ प्रधानं वैदिकं कर्म गुणभूतमथेतरत् ।
गुणनि[२]ष्ठोऽतिप्रमाणं बाधयन् यात्यधोगतिं ” ॥

इति साक्षाद्वेदोक्तकर्मविरोधस्मृत्युक्तकर्मवर्जनस्य स्नातकव्रतत्वेन गणनात् । दर्शाग्निहोत्रादिकर्मलोपनिमित्तभूतं त्रेताग्निमुत्सृज्य तीर्थगमनं निषिध्यते ।

तथा च शिष्टाः,—

“ अर्थार्थी प्रवसेद्विद्वान् धर्मार्थी न कदाचन ” ।

इति धर्मार्थप्रवासस्य निषेधं स्मरन्ति, तीर्थस्नानादिफलमपि यज्ञादिविरोधि निषिध्यते । अत्राग्निहोत्रसमयेऽग्निहोत्र-

(१) दैवेति । (२) गुणद्विष्ठो ।

होममकृत्वा तीर्थस्नानादि[१]कार्य्यमित्याशयः, एवं तत् श्रौतविरोधिरूपेण तीर्थगमनस्नानादेर्निषिद्धत्वात् यात्रानिषेधातिक्रमेण तीर्थस्नानादिकरणे यात्रानिषेधातिक्रमदोषः स्वल्पः । तीर्थस्नानादिफलं च भूयः संपद्यत इति [२]तेषां विकल्पनमसत्कल्पनमेव, [३]यथा यात्रावत् स्नानादेरपि श्रौतयज्ञ[४]विरोधिरूपेण निषेधः । न च विहितस्य निषेधासम्भवः, विहितेऽपि कर्मणि कर्त्तृविशेषस्य निषेधात् । यथा विहिते सान्नाय्येनासोमयाजी सन्नयेदित्यत्र [५]सोमयाजीकर्त्तृकनिषेधः । एवमिह तीर्थस्नानादौ यज्ञाधिकारिकर्त्तुर्निषेधः ।

तदुक्तं भट्टैः,—

त्रिधैव [६]जायते कर्त्ता विशेषेण प्रतिक्रियां ।
योग्यत्वाप्रतिषिद्धत्वविशेषोपपदान्वयैः ॥

न च तीर्थगतिर्निषिद्धेत्युपक्रमात्, यात्राया एव निषेधः । यज्ञाविरोधिसाग्नियात्रानिषेधाभावेन यज्ञविरोधितीर्थगमनत्वेन निषिध्यत्वप्रतीत्या यात्रात्वेन विशिष्य विशेषणे वाक्यभेदात् । स्नानाद्युद्दिश्य यात्राया एवं च [७]तीर्थस्नानादेरपि यज्ञविरोधोऽस्त्येव, तथा च, तीर्थे फलं यज्ञफलं । सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानि [८]नैवेति तीर्थाश्रितकर्ममात्रपरामर्शो दृश्यते ।

---

(१) न कार्य्यं । (२) केषांचित् कल्पनमेव ।
(३) यतो । (४) विधि ।
(५) असोमयागकर्त्तनिषेधः । (६) ज्ञायते ।
(७) तीर्थयात्रायां च । (८) चैव ।

न च परिकल्प्यर्त्विजं तथेत्येवं, प्रवासविधाने यज्ञानुष्ठानविरोधाभावः । अग्न्युपस्थानाज्यावेक्षणांगहीनावश्यकत्वात्, न च स्नानादिप्रधानं । प्रमेयबलेन बलीयः, निषेधनान्यविषयत्वादाचमनादौ निषेधाभावेन वैषम्यात् । न च श्रुतिविरोधे स्मृत्यर्थबाधकस्य न्यायसिद्धत्वेनास्य विधेयत्वं, न्यायप्राप्तस्यापि स्नातकव्रतमध्यपाठेन विधानोपपत्तेः, तस्मात् तीर्थस्नानादिफलमुद्दिश्य श्रौताग्निमतः प्रवासे तीर्थयात्राफलं [१]तीर्थस्नानादिफलं न च भवत्यधिकाराभावात् । ब्राह्मणस्य वैश्यस्तोमवत् ।

यदा तु,—

"निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा ।
प्रवासे कार्य्यवान् विप्रो तथैव न चिरं क्वचित्" ॥

इति छन्दोगपरिशिष्टात्, आपत्सु प्रोषितोग्निवेलायां वाग्यतः प्रतिदिनमग्नीन् मनसा ध्यात्वा मन्त्रेणाहुतं ज्ञात्वा व्रतयेदित्यादि हारीतवचनात् ।

"क्षुत्कौलीकृतवर्गस्य परिभूतस्य शत्रुभिः ।
मासद्वयं प्रवासोऽस्तु[२] शरणेनाहिताग्निवत्" ॥

इति प्रामाणिकलिखनाच्च प्रवास आपत्काले क्रियते तदा दैवात्तीर्थप्राप्तौ तीर्थस्नानादिफलं स्यादेव, प्रवासस्य तीर्थस्नानाद्यर्थत्वेन यज्ञविरोधाभावात्, यज्ञविरोधि[३] दैवतीर्थस्नानादावधिकारो

---

(१) तीर्थयात्रा । (२) परतो ।
(३) न्येव ।

[१]वैकल्प्यते, यथा तीर्थ एवोत्पन्नस्य तीर्थवासपरस्य चाहिताग्नेरपि तीर्थस्नानादिफलं यज्ञविरोधाभावादेव।

तथा, मत्स्यपुराणे,— [२]काश्यामधिकृत्य,—

" तत्र चेष्टं हुतं दत्तं तपस्तप्तं कृतं च यत्।
सर्वमक्षयमेवास्मिन् [३]विमुक्ते न संशयः" ॥ इति।

क्षेत्रे यज्ञादिकर्म दर्शयति, इदं त्रेताग्निमत्परं, केवलं स्मार्त्ताग्नेस्तु तीर्थयात्रा तत्पूर्वकं स्नानादिकं [४]दाननिषिद्धं, धर्मार्थ-प्रवासोऽपि तस्यास्त्येव यज्ञाधिकारवत एव तीर्थयात्रादिनिषेधो न च केवलस्मार्त्ताग्नेर्यज्ञाधिकारोऽस्ति, यज्ञपदस्य त्रेताग्निसाध्ययज्ञ-परत्वात्, अन्यथा पञ्चयज्ञाधिकारस्यार्थ[५] यज्ञादिसाधारणेना-[६]व्यापकत्वापत्तेः। अतएव समाचारोऽप्येवं। सदाचारस्मृत्यो-र्विध्यर्थनिर्णायकत्वेन प्रामाण्यमिति [७]शाङ्करभाष्यप्रदीपे प्रपञ्चित-मस्माभिः, अत्र भारते तीर्थयात्रापदेनोपक्रम्य क्षेत्रपुण्यायतन-यात्रायामपि कथनात्तीर्थपदं सृष्टिन्यायेन पुण्यस्थानोपलक्षणं। तेन पुरुषोत्तमगयाकुरुक्षेत्रादावपि तीर्थयात्राविधिर्ज्ञातव्यः।

ब्रह्मपुराणे,—

" यो यः कश्चित्तीर्थयात्रां तु गच्छेत्, सुसंयतः स च पूर्वं स्वगेहे।
कृतोपवासः शुचिरप्रमत्तः, संपूजयेद्भक्तिनम्रो गणेशं" ॥

(१). वैकल्प्यस्मृतेः। (२) काशी। (३) वियुक्ते। (४) वा निषिद्धं। (५) पंचाग्न्यादि। (६) व्यावर्त्तक। (७) शावर।

देवान् पितॄन् ब्राह्मणांश्चैव साधून्,
धीमान् पितॄन् वित्तशक्त्या प्रयत्नात्।
प्रत्यागतश्चाथ पुनस्तथास्तु;
देवान् पितॄन् ब्राह्मणान् पूजयेत्तु" ॥

अत्र [१]उक्तफलकामनया तीर्थयात्रां संकल्प्य स्वगृहे कृतोप-वासो गणेशं पूजयेत्, ततोऽभीष्टदेवं पूजयित्वा श्राद्धं ब्राह्मणानां पूजनं, पितॄन् वित्तशक्त्येत्यनेन धनवता बहुव्ययेन श्राद्धं कार्य्य-मित्युक्तं, प्रत्यागत्य पुनर्देवब्राह्मणं श्राद्धं च, एतावत्तीर्थयात्राङ्गं नित्यं, यस्य तु प्रत्यागमनं नास्ति ततः प्रभृति तीर्थ एव वासः, तस्य प्रत्यागतदेवपूजाद्यभावः।

यत्तु,—

" विधाय कर्पटीवेशं कृत्वा ग्रामं प्रदक्षिणं।
ततः प्रतिदिनं गच्छेत् प्रतिग्रहविवर्जितः" ॥

इत्यादि[२]गयाश्राद्धाङ्गं, नान्यत्र तत्प्रसङ्गः, प्रयागाद्यतिरिक्त-तीर्थगमने याननिषेधदर्शनात्तीर्थान्तरे यानेन गमनेऽप्यविरोध-इति लक्ष्मीधरः।

" [३]गयायां भास्करक्षेत्रे मातापित्रोर्मृतेऽहनि।
मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥
वर्जयित्वा कुरुक्षेत्रं विशालां विरजं तथेति"।

तत्र उपवासः, मुण्डनं शिखावर्जनकेशवपनात्मकं कर्त्तृसंस्कार-रूपं। तीर्थस्नानदानश्राद्धादिरूपकर्म्मांगं, यत्तु देवलवचनं.

(१) क्रतु। (२) तद्गयायात्राङ्गं। (३) गङ्गायां।

"तीर्थादनुगम्य तदर्थमनभिगम्य व्रतोपवासनियमयुक्तस्त्र्यहमवगाह्य मानस्त्रीरात्रमुषित्वा सर्वपापैर्विमुच्यते । स्वस्तिमांश्च भवति तत्तीर्थयात्राप्रकरणानामाम्नायपृथगेव फलार्थं ।

यत्तु महाभारते,—

"अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अकृत्वा कांचनं गां च दरिद्रो नाम जायते" ॥

तदपि त्रिरात्रोपवासतीर्थाभिगमनकाञ्चनगोदानादीनि दारिद्र्याभावफलानीति ज्ञापयति । तीर्थश्राद्धे विशेषः ;—

देवीपुराणे,—

"अकालेऽप्यथवा काले तीर्थे श्राद्धं तथा नरैः ।
प्राप्तैरेव सदा कार्य्यं कर्त्तव्यं पितृतर्पणं ॥
पिण्डदानं च तत् शस्तं पितॄणामपि दुर्लभं" ।

तथा,—

तीर्थेषु ब्राह्मणं नैव परीक्षेत कथंचन ।
सक्तुभिः पिण्डदानं च [१]यावकैः पायसेन वा ॥
कर्त्तव्यमृषिभिर्दृष्टं पिण्याकेन गुडेन च ।
श्राद्धं तत्र प्रकुर्वीत अर्घावाहनवर्जितं ॥
श्वध्वांक्षगृध्रकाकानां नैव दृष्टिहतं च यत्" ।

एवं तत्तद्दानानां तीर्थविशेषात् फलविशेषः । तपःपूजा-यज्ञादीनां च तीर्थ एव कृतानां फलविशेषः, तर्पणं च पृथक्

(१) संयावैः ।

तीर्थप्राप्तिनिमित्तकं, तन्त्रेण स्नानाङ्गतर्पणसिद्धिश्च तीर्थप्राप्तिदिने स्नानाशक्तस्यापि [१]तन्त्रस्नानादिपूर्वकं तीर्थप्राप्तिनिमित्तकं तर्पणमावश्यकं ।

एवं तस्मिन् दिनेऽनेकतीर्थप्राप्तौ श्राद्धं [२]तर्पणाङ्गं वर्त्तते ।

पैठीनसिः,—

"षोड़शांशं स लभते यः परार्थेन गच्छति ।
अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥
प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत् ।
मज्जयेत्तु यमुद्दिश्य अष्टभागं [३]लभेत्तु सः" ॥

तत्र मन्त्रः ।

"कुशोऽसि [४]संप्रवृत्तोऽसि ब्रह्मणा निर्मितः पुरा ।
त्वयि स्नाते स च स्नायाद्यस्यार्थे ग्रन्थिबन्धनं" ॥

इतिशिष्टाः ।

शङ्खः,—

"नृणां पापकृतां तीर्थे पापस्य शमनं भवेत् ।
यथोक्तफलदं तीर्थं भवेत् शुद्धात्मनां पुनः" ॥

अथ पादचापल्यं ।

मनुः,— "न पाणिपादचपलः," चापल्यं वृथा चेष्टा ।

देवलः,— "वह्निं नातिव्रजेत्पदा," गौतमः,— "न पदा स मानमाकर्षेत्" ।

(१) मन्त्र ।
(२) तर्पणां च ।
(३) लभेत सः ।
(४) संपविस्त्रोऽसि

शङ्खलिखितौ,— "न पदा भूमिमभिहन्यात्," आपस्तम्बः,— "पदा [१]पादसंचालनमधिष्ठानं च वर्जयेत्, [२]प्रेंखोलनं पादयोः जानुनि [३]"गत्यध्वानं जंघायाः"। [४]प्रेंखोलनमितस्ततश्चालनं, शङ्खलिखितौ,— "न पादं पादेन चालयेत्, न दर्भैः परिमृज्यात्," विष्णुः,— "न पादौ प्रतापयेत्, न कांस्यभाजने पादौ धावयेत्"।

आपस्तम्बः—

"अग्निमापोब्राह्मणं गां देवताद्वारं प्रतिवातं।
शक्तिविषयेणाभिसारयेत् पादावितिशेषः" ॥

याज्ञवल्क्यः,—

"गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्।
नाग्निं गां ब्राह्मणांश्चैव पादेनाधितिष्ठेत्" ॥

आपस्तम्बः,—

"देवतानां राज्ञश्च ब्राह्मणस्य पादस्पर्शनं वर्ज्जयेत्"।

आपस्तम्बः,—

"व्यतिक्रामेत्तु [५]अवर्तौं ज्वलन्तं ज्वलनं तथा,
चुद्रप्रवाहं न लंघयेदित्यर्थः"।

तथा,—

"नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्।
अधस्तान्नोपदध्याच्च न चैनं पादतः कुर्य्यात्" ॥

(१) पदस्य चालनं। (२) प्रेंखोननं।
(३) गत्याधीनं। (४) प्रंखोननं। (५) स्मरन्तीं।

अग्निना प्रयत आसीत्, इषुमात्रादित्येके। न चैनमुपधमेत्। खट्वायां नोपदध्यात्, इषुमात्रदेशादशुचिर्नाग्निसमीपं गच्छेदित्यर्थः।

पैठीनसिः,— "नापुष्पितं वृक्षमारोहेत्"।

विष्णुपुराणे,—

"प्रदीप्तं वेश्म न विशेन्नारोहेत् शेखरं तरोः"।

याज्ञवल्क्यः,—

"गोब्राह्मणानलान्नानि नोच्छिष्टोऽपि पदा स्पृशेत्"।

विष्णुपुराणे,—

उपतिष्ठेन्नवव्यालांश्चिरं तिष्ठेन्नरोऽस्मितः[१]।
अतीव जागरस्वापौ तद्वत् [२]सोतामिके वुधः ॥
न सेवेत तथा शय्यां व्यायामं च नरेश्वरः।
दंष्ट्रिणः शृङ्गिणश्चैव प्राज्ञो दूरेण वर्ज्जयेत् ॥
अवश्यायं च राजेन्द्र! पुरो वातातपौ तथा"।

देवलः,— "घर्षयेन्नपदं पदा, अग्नौ न प्रक्षिपेदग्निं नाग्निं प्रशमयेत्तथा अथानाक्रमणानधिष्ठेयानि"।

मनुः,—

"देवतानां गुरो राज्ञः स्नातकाचार्य्ययोस्तथा।
नाक्रमेत् कामतश्छायां वभ्रुगोर्दीक्षितस्य च" ॥

वभ्रुः कपिलः।

(१) न चोत्थितः। (२) स्थानासने

तथा,—

"मध्यंदिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च मामिकं ।
सन्ध्ययोरुभयोश्चैव न सेवेत चतुष्पथं ॥
उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च ।
श्लेष्मनिष्ठुतवातानि नाधितिष्ठेत कामतः ॥
वैरिणं नोपसेवेत सहायं चैव वैरिणः ।
अधार्मिकं तस्करं च परस्यैव च योषितं" ॥

उद्वर्त्तनं कृतमलापकर्षणपिष्टादि, अपस्नानं स्नानोपयुक्तजलं, निष्ठुतमुद्गीर्णं ताम्बुलादि, यमस्मृतौ,— प्राज्ञः सति कपिलगवां छायां नाक्रमणायेत्यधिकं, प्राज्ञः प्रशस्तवुद्धिः, चत्रियादिरपि, याज्ञवल्कीये[१], ऋत्विक् परस्त्रीछायां नाक्रमेदित्युक्तं ।

यमः,—

"स्वकीयां नाक्रमेत् छायां क्लीवेन पतितेन च ।
चाण्डालेन द्विषद्भिश्च नित्यं रोगान्वितेन च" ॥

शङ्खलिखितौ,— "नोद्धत कुहकैः सहैकतस्तिष्ठेत्," उद्धतोऽविनीतः, कुहको वशीकरणादिपरः, विष्णुः,— "चतुष्पथमधितिष्ठेन्न च रात्रौ वृक्षमूलं, न शून्यालयं, शूलावन्धनागारं," हारीतः, आवपनापमार्जना च, स्नाने तु स भस्मास्थिकपालकेशसंचयान्नाधितिष्ठेत्, आवपनं द्रव्यस्थानयोग्यं गोष्यादि, अपमार्जनां मार्जनानन्तरं तत्साधनकुशादि, कपालं खर्परः,

(१) याज्ञवल्क्यः,—।

शङ्खलिखितौ,— नारेः[१] पदमधितिष्ठेत्, न केशकपालभस्मास्थितृणसंस्कारकूटेषु तिष्ठेत्, संस्कारो मार्जित[२]धूल्यादिसमूहः, मनुः,— नाधितिष्ठेत् कार्पासास्थिकार्पासवीजं, नाधितिष्ठेदित्यनुवृत्तौ ।

मार्कण्डेयपुराणे,— शीर्णानि[३] रज्जुवस्त्रादिकानि च ।

विष्णुपुराणे,—

"चतुष्पथचैत्यतरुश्मशानोपवनानि च ।
दुष्टस्त्रीसन्निकर्षश्च वर्ज्यानि त्रीणि सर्वदा" ॥

तथा,

"स्नानार्द्रां धरणीं चैव दूरतः परिवर्जयेत् ।
श्लेष्मविण्मूत्ररक्तानि सर्वदैव न लंघयेत्" ॥

देवीपुराणे,—

"शून्यागारे न तिष्ठेत न च पर्वतमस्तके ।
न श्मशानेषु देवानां प्रासादेषु कदाचन" ॥

प्रासादेऽपि मनुष्यान्तरशून्ये ।

तथा,—

"न चैव गोः प्रसूताया विश्वसेत् स्त्रीजनस्य च
न मुखेन धमेदग्निं न च खड्गं विलंघयेत् ॥
तथा चैवायुधान् सर्वान् न चोपस्करमार्जनौ
न प्रमत्तजनाकीर्णे न च स्त्रीवालसेविते ॥
गृहे वासागमं कुर्याद्विश्वासक्रीड़नं च न" ।

(१) नाहेः । (२) तृणधूल्यादिसमूहः । (३) जीर्णानि ।

मार्कण्डेयपुराणे,—

"नोत्कृष्टशय्या(१)शयनो न निकृष्टस्य चारोहेत्।
नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत्कदाचन" ॥

इत्यनाक्रमणीयानधिष्ठेयानि, समाप्तानि पादजानि स्नातकव्रतानि, पायुजानि पुरीषोत्सर्गे व्याख्यातानि, अथोपस्थजानि, तत्र ऋणापाकरणे प्रजोत्पादनं। बौधायनः, प्रजाकामस्योपदेशाः(२), प्रजननिमित्ता समाख्येत्यश्विनावूचतुः।

"आयुषा तपसा युक्तः स्वाध्यायेज्यापरायणः।
प्रजामुत्पादयेद्युक्तः स्वे स्वे वर्णे जितेन्द्रियः" ॥

प्रजननं प्रजोत्पादनं, तन्निमित्ता समाख्या कुलख्यातिः आयुषा आयुष्येण दीर्घसन्ध्योपासनविप्र(३)शब्दादि— वर्जनादिकर्मणां, तपसा नियमेन पुत्रकामव्रतादिना, अनन्तव्रत-कृष्णाष्टमीव्रत-दूर्वाष्टमीव्रतादिना, स्वाध्यायः पुत्रकामस्य महारुद्रजपादिरूपः, सौभरि मन्त्रसन्तानगोपालमन्त्राभ्यासादिर्वा, इज्या द्वादशाहादित्रिरात्रादि प्रजाकामयागाः, चातुर्मास्यं वैश्वदेवपूर्व(४)रूपं प्रतिकाममाग्नेयं च, एतच्च पुत्रोत्पादनविलम्बो(५)युक्तः, यत्नवान् तेन वैद्यशास्त्रोक्त औषधादियोगोऽपि, हरिवंशश्रवणादिश्च, पुनर्बौधायनः,— विज्ञायते-जायमानो ब्राह्मणस्त्रीभिऋणवान् जायते, ब्रह्मचर्य्येण ऋषिभ्यो यज्ञेन-देवेभ्यः प्रजया पितृभ्य एवमृणसंयोगं वेदो दर्शयति, तथा स पुत्रमुत्पाद्य तारयति।

(१) सनयोर्न—। (२) उपदेशः। (३) विप्रापवाद—।
(४) पर्व्व—। (५) विलम्बे युक्तः।

"सप्तावरान् सप्तपूर्वान् षड़न्यानात्मसप्तवान्"।

विष्णुवशिष्ठौ,—

"ऋणमस्मिन् सन्नयति अमृतत्वं च गच्छति।
पिता पुत्रस्य तातस्य पश्येच्चेज्जीवतो मुखं" ॥

पुत्रस्य जातस्य ऋणापाकरणयोग्यस्य इति भर्तृयज्ञः, ऋणं संनयति संक्रामयति, शङ्खलिखितपैठीनसयः,—

"यत्र क्वचन जातेन पिता पुत्रेण निन्दति।
तेन चानृण्यतां याति पितॄणां पिण्डदेन वै" ॥

यत्र क्वचन वीजित्रित्रिणोरन्योन्यसमयपूर्वकं पारत्रेत्रेणेति लक्ष्मीधरः।

बृहस्पतिः,—

"पुंनाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः।
मुख(१)संदर्शनेनापि तदुत्पत्तौ यतेत सः" ॥

एतत्पुत्रोत्पत्तिमात्रफलं, हारीतः,—

"यस्य पुत्रः शुचिर्दक्षः पूर्वे वयसि धार्मिकः।
नियन्ता चात्मदोषाणां सन्तारयति पूर्वजान्" ॥

शङ्खलिखितौ,—

"अग्निहोत्रं त्रयोवेदा यज्ञाश्च बहुदक्षिणाः।
ज्येष्ठपुत्रप्रसूतस्य कलां नार्हन्ति षोड़शीं ॥
पुत्रपौत्रप्रतिष्ठस्य बहुपत्यस्य जीवतः।
अस्कन्दन् देवयज्ञस्य हस्तप्राप्तं त्रिपिष्टपं ॥"

(१) सुखसंस्पर्शनेनापि।

ज्येष्ठपुत्रप्रसूतस्य प्रथमं पुत्रजन्मतः, पिण्डोदकक्रियाहेतोः ।

मनुशङ्खलिखितविष्णुवशिष्ठहारीताः,—

"पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपं" ॥

शङ्खलिखितौ,—

"सन्तानवर्द्धनं पुत्रमुद्युक्तं पुत्रकर्म्मणि(१) ।
देवब्राह्मणसंपन्नः देवब्राह्मणपूजकः" ॥

वशिष्ठः,—

"पुत्रिणो लोकानपुत्रस्य लोकोऽस्ति श्रूयते ।
अग्रज(२)सहितः सन् शीला राक्षसाः" ॥
"अपुत्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः ।
पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनस्य च" ॥

यादृक्तादृक् मुख्यः । पुत्रिकापुत्रादिः, शतपथश्रुतिः,— "अथ त्रयो वा लोका मनुष्यलोकः पितृलोको देवलोक इति"।

"पुत्रेणैव जयो नान्येन न कर्मणा कर्मणा पितृलोको ।
विद्यया देवलोकः, तथा अयं वा आत्मा ।

सर्वेषां लोकानां लोकः, यज्जुहोति, यद्यजते स तेन देवानां लोकोऽथ यदनु प्रब्रूते तेन ऋषीणामथ यत्पितृभ्यो निम्नणाति यत्प्रजामिच्छते तेन पितृणामपि"। मनुः, तस्मात् पुत्रमनुशिष्टं-

(१) देवब्राह्मणसम्पन्नमभिनन्दन्ति पूर्वजाः ।
सन्तानवर्द्धनः पुत्रः प्रजोत्पादनविहितः ॥

(२) अप्रजाः अपुत्रिणः सन् शीला राक्षसाः ।

लोक्यमाहुः, तस्मादेनमनुशासति, लोक्यं देवलोकादिप्रापकं, तदेवाह, स यद्यनेन किंचिद(१)क्ष्णया कृतं भवति तस्मादेनं सर्वस्मात् पुत्रो मुञ्चति तस्मात् पुत्रो नाम, यदारब्धदीर्घव्रताचूर्णप्रासादादि, तदक्ष्णया असंपूर्णं कृतं यजमानः (२)प्रसितः, तत्समापनेन पुत्र एनं यजमानं मुञ्चति, प्रारब्धासमापनव्रताद्रक्षन्ति, एतच्चाग्निसाध्यकर्मव्यतिरिक्तपरं, अग्निना स्वार्थपरत्वादिति मन्तव्यं, यद्यप्येतत् संप्रति कर्मशेषभूतं तथा पितृलोकं प्राप्य भावेनास्यार्थस्य सत्यं हि मनुष्याः प्रथमसाञ्जलीत्यादिकविधिकल्पनं; पित्रादिकृतं पुत्रेण समापनीयमिति कल्प्यते ।

बृहस्पतिः,—

"यथा जलं कुप्लवेन तरन्मज्जति मानवः ।
तद्वत् पित्रा कुपुत्रैश्च तमस्यन्धे निमज्जति" ॥

एतावदेकपुत्रोत्पादनं नित्यं, बहुपुत्रोत्पादनमपि स्वस्य संगतिकामनायां द्रष्टव्यं ।

तदुक्तं,

"एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः ।
तेषां वै समवेतानां यद्येकोऽपि गयां व्रजेत् ।
यजेत्तदाश्वमेधेन नीलं वा वृषमुत्सृजेत्" ॥

तस्मात् पुत्रसमानुशास(३)नमवश्यकर्त्तव्यमित्यर्थः, ब्रह्मचर्य्यं च

(१) किञ्चिदन्यया — । (२) प्रशितः ।
(३) पुत्रस्यानुपासनं अवश्यं कार्य्यमित्यर्थः ।

व्याख्यातं, यमेषु, एवं पुत्रोत्सर्गदेशकालदिङ्नियमादयोऽप्युप-सृज्य स्नातकव्रतेऽवगन्तव्याः ।

अथ घ्राणजानि, तत्र श्रीकृष्णोपभुक्तगन्धमाल्यादिघ्राणं सर्व-पापक्षयार्थं तदुक्तं,—

"विष्णुनाघ्रातं जिघ्रत तेन शस्तं प्रशंसति च" ।

स्कन्दपुराणे,— "निर्माल्यशेषं व्रतदानतुल्यं" ।

विष्णुपुराणे,—

"न संवृतमुखोजिघ्रेत्[१] श्वासकासैश्च वर्जयेत् ।
नोच्चैर्हसेत् सशब्दं च न शूचेत् पवनं बुधः ।
न हि कुर्य्यात् शवं जिघ्रन् शवगन्धो हि सोमजः" ॥

तथा,—

"श्लेष्मसिंहाणिकोत्सर्गो नान्यकाले प्रशस्यते ।
वलिमङ्गल्यजप्यादौ न होमेन महाजने" ॥

महाजने जनसमूहमध्ये ।

भविष्यपुराणे,—

"गवामस्थि न लंघेत मृदो गन्धं च वर्जयेत् ।
यावदाघ्राति तं गन्धं तावत् पुण्येन युज्यते" ॥

मेहनाधिकारे हारीतः,— घ्राणास्ये समावेष्टयित्वा, अमेध्यगन्ध-घ्राणशङ्कया ।

शातातपः,—

"अनृतं मद्गन्धश्च दिवामैथुनमेव च ।
पुनाति वृषलान्नं च सन्ध्या वहिरु[२]पासिता" ॥

(१) जृम्भेत् । (२) वहिःसन्ध्याप्युपासिता ।

लक्ष्मीवाक्यं, धृतपुष्पं न जिघ्रति योषितं ।
[१]सोऽयमनुसरमो रोचते नरः ।

आपस्तम्बः,—

"औषधीवनस्पतीनाछिद्य नोपजिघ्रेत्" ।

तथा,— "जातिभ्रंशकारे घ्रातिरघ्रेयमद्योः" ॥

[२]अथाशनानि, शिष्टाः,—

"जन्मजन्मान्तराभ्यस्तं पापराशिं विनाशयेत् ।
कृष्णोपभुक्तशेषान्नप्राशनं भक्तिचेतसा ॥
चान्द्रायणं-सहस्रं च मासोपोषणमेव च ।
कृष्णशेषाशनं प्राप्य कलां नार्हन्ति षोड़शीं" ॥

तथा,—

"विष्णुनाशितमश्नन्ति तेन पीतं पिवन्ति च ।
पादोदकसमायुक्तं तुलसीदलमिश्रितं ॥
भक्त्या भुक्तं हरेर्भुक्त्वा हत्याकोटिविनाशनं" ।

स्कन्दपुराणे, "नैवेद्यशेषं क्रतुकोटितुल्यं, विष्णुपुराणे, गङ्गा-मधिकृत्य ।

"स्मृताभिलषिता दृष्टा स्पृष्टा पीतावगाहिता ।
या पावयति भूतानि कीर्त्तिता च दिने दिने" ॥

तथा —

"चान्द्रायण-सहस्रैस्तु यः कुर्य्यात् कायशोधनं ।
पिवेद्यश्चापि गङ्गाम्भः समौ स्यातां न चासमौ" ॥

(१) स च मे रोचते हरः । (२) अथ रासनिकानि ।

तथा,—

"भिक्षान्नं श्रोत्रियान्नं च हुतशेषं च यद्धविः ।

आनखाग्रा(१)द्धरेत् पापं" ।

तथा,—

"सर्वपापविशुद्ध्यर्थं वैष्णवस्य च मन्दिरे ।

(२)अश्नीयाद् वैष्णवस्यान्नं तदभावे जलं पिबेत्" ॥

"स्नातकव्रताधिकारे मनुः,— "नान्नमद्यादेकवासाः" ।

"नाश्नीयाद्भार्यया सार्द्धं, न भुञ्जीतोद्धृतस्नेहं ।

नाश्नीयात् (३)सर्ववेलायां, नातिसौहित्यमाचरेत् ॥

नातिप्रगे नातिसायं, न सायं प्रातराशितः ।

नोत्सङ्गे भक्षयेद् भक्ष्यान्, न वार्य्यञ्जलिना पिबेत् ॥

भिन्नभाण्डे न भुञ्जीत, न भावप्रतिदूषिते ।

शयनस्थो न भुञ्जीत, न पाणिस्थं न चासने ॥

सर्वं च तिलसम्बद्धं नाद्यादस्तमिते रवौ ।

आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ॥

न श्रोत्रियतते यज्ञे ग्रामयाजिहुते तथा ।

स्त्रिया क्लीवेन च हुते भुञ्जीत ब्राह्मणः क्वचित्" ॥

अग्निषोमीयादूर्द्ध्वमपि ।

तथा,—

"(४)मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन ।

(१) दहेत् । (२) नाश्नीयाद् ।
(३) सन्धिवेलायां । (४) मत्तकुब्जातुराणां च ।

केशकीटावपन्नं च पदा स्पृष्टं च कामतः ॥

भ्रूणघ्नावेक्षितं चैव संस्पृष्टं चाप्युदक्यया ।

पतत्रिणावलीढं च शुना संस्पृष्टमेव च ॥

गवा चान्नमवघ्रातं घुष्टान्नं च विशेषतः ।

गणान्नं गणिकान्नं च विदुषा च जुगुप्सितं ॥

स्तेनगायनयोश्चान्नं तक्ष्णोवार्द्धुषिकस्य च ।

दीक्षितस्य कदर्य्यस्य बद्धस्य निगड़स्य च ॥

अभिशस्तस्य षण्डस्य पुंश्चल्या दाम्भिकस्य च ।

शुक्तं पर्य्युषितं चैव शूद्रस्योच्छिष्टमेव च ॥

चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः ।

उग्रान्नं सूतिकान्नं च पर्य्याचान्तमनिर्दशं ॥

अनर्च्चितं यथा मांसमवीरायाश्च योषितः ।

द्विषदन्नं नगर्य्यन्न(१)मवधूतमवक्षुतं" ॥

पर्य्याचान्तमाचमनस्थानस्थं, अवधूतं मार्जननिकटस्थं, अवक्षुतं क्षुतसन्निहितं ।

पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा ।

शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च ॥

कर्मारस्य निषादस्य रङ्गावतरकस्य च ।

सुवर्णकर्त्तुर्वैणस्य शस्त्रविक्रयिणस्तथा ॥

श्ववतां शौण्डिकानां च चैलनिर्णेजकस्य च ।

रञ्जकस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥

(१) पतितान्न ।

स्पृशन्ति ये चोपपतिं स्त्रीजितानां च सर्वशः।
अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च॥
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसं।
कारुकान्नं प्रजां हन्ति यशश्चर्मावकर्त्तिनः॥
भुक्त्वातोऽन्यतमस्यान्नममत्याक्षपणं त्र्यहं।
मत्या (१)जग्ध्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च"॥

तथावलोक्यानवलोकनीयानि, तत्र दैवतान्यधिगच्छेत् (२)पदेन देवतादर्शनस्पर्शनप्रदक्षिणतद्गृहमार्जनादीनामप्युपलक्षणादधिगमनस्य दृष्टे सत्यदृष्ट(३)कल्पमवकाशाच्च भगवद्दर्शनादि लिख्यते। तत्र-सामान्यतस्तावत्॥

"ये त्रिकालं प्रपश्यन्ति मुखं कृष्णस्य नित्यशः।
न तेषां पुनरावृत्तिर्विष्णुलोकात् कथंचन॥
अर्चितं केशवं दृष्ट्वा सर्वपापैः प्रमुच्यते।
पूजितं पूज्यमानं च यः पश्येद्भक्तितो हरिं॥
श्रद्धया मोदयेद्यस्तु सोऽपि योगफलं लभेत्।
ये पश्यन्ति नरा विष्णुं हेमभूषणभूषितं॥
सकृद्भक्त्या कलौ विप्र (४)पुनात्यासप्तमं कुलं।
ये पश्यन्ति सकृद्भक्त्या पद्मपत्रोपरिस्थितं॥
भक्त्या पद्मालयाकान्तं तैराप्तं दुर्लभं पदं।
चित्रस्थं पुण्डरीकाक्षं सविलासं सविभ्रमं॥

(१) भुक्त्वा। (२) चेत्यनेन।
(३) कल्पनानवकाशाच्च। (४) पुनन्त्या।

दृष्ट्वा विमुच्यते पापैर्जन्मकोटिषु (१)संस्थितैः"।

तथा,—

"देवार्चादर्शनादेव प्रणमेन्मधुसूदनं॥
स्नानापेक्षा न कर्त्तव्या दृष्ट्वार्चां द्विजसत्तमः।
देवतार्चादृष्टिपूतः शूचिर्यज्ञस्तु कीर्त्तितः"॥

अनेनार्चादर्शनाव्यवहितकालीनदण्डप्रणामविधिप्ररोचनार्थेनापि स्वार्थ(२)प्रसिद्ध्यर्थं सव्यं हि मनुष्याः प्रथममञ्जलीत्यादौ विधिकल्पनवत्, प्रतिमादृष्टिगोचराणामशौचापवादो विधीयते, तेनाशौचशङ्कया प्रणामविलम्बो न कर्त्तव्य इत्युक्तं भवति, स्पृष्टामेध्यादिदर्शने तु तत्परिहारः कर्त्तव्य एव, लेपस्यापगममन्तरेण शुद्ध्यभावात् न च स्पृष्टलेपाशौचत्वापवादः, यावदर्थिनानुवादासम्भवस्तावद्गोचरविधिकल्पनेनोपपत्तौ नानाविधिबाधाकल्पनात्।

शङ्किताशौचापवादमात्रेणोपपत्तेश्च नातिस्पृष्टाशौचापवादकल्पनमर्हन्ति, अत्र पुरुषोत्तमक्षेत्रे वसता देवतागमन(३) कर्त्तव्यं, तद्दर्शनादिविधिरुच्यते।

ब्रह्माण्डपुराणे,—

"पुरुषाख्यं सकृद् दृष्ट्वा सकृत् स्नात्वा महोदधौ।
ब्रह्मविद्यां सकृज्ज्ञात्वा न भूयः पुरुषो भवेत्॥

अत्र पुरुषाख्यं पुरुषोत्तमक्षेत्रं इति केचित्।

(१) सुसंचितैः।
(२) स्वार्थप्रसिद्धभावादर्थसिद्ध्यर्थं।
(३) कृष्णबलदेवाद्यायतनगमनं।

वामनपुराणे, प्रह्लादतीर्थयात्रायां,—

"स्नात्वा विरजसे तीर्थे दत्त्वा पिण्डं पितृंस्तथा ।
दर्शनार्थं ययौ श्रीमान् पूजितं पुरुषोत्तमं ॥
तं दृष्ट्वा पुण्डरीकाक्षमक्षरं परमं शुचिः ।
उपोष्य षड्दिनान्येष माहेन्द्रं दक्षिणं ययौ" ॥

तथा. विष्णुपुराणे,—

"ब्रह्माक्षरमजं नित्यं यथासौ पुरुषोत्तमः" ।

इति कृष्णमूर्त्तेरेवाभिधानं ।

ब्रह्मपुराणे,—

"दृष्ट्वा (१)च तं वैनतेयं यः पश्येत् पुरुषोत्तमं ।
दशानामश्वमेधानां फलं प्राप्य हरिं व्रजेत्" ॥

वटदर्शनं,—

"ॐ नमो व्यक्तरूपाय महाप्रलयपरिणते ।
महद्रसोपविष्टाय न्यग्रोधाय नमो नमः ॥
अमरस्त्वं सदा (२)कल्प ! विष्णोरायतनं वट ! ।
न्यग्रोध ! हर मे पापं कल्पवृक्ष ! नमो ऽस्तु ते ॥
भक्त्या प्रदक्षिणं कृत्वा नत्वा (३)कल्पवटं नरः ।
सहसा मुच्यते पापैर्जीर्णत्वचमिवोरगः ॥
छायां तस्य समाक्रम्य कल्पवृक्षस्य भो द्विजाः ।
ब्रह्महत्यां नरो जह्यात् पापेष्वन्येषु का कथा" ॥

(१) वटं । (२) वृक्ष ! । (३) कल्पद्रुमं ।

तथा,—

"वैनतेयं नमस्कृत्य कृष्णस्य पुरतः स्थितं ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति" ॥

तथा,—

"प्रविश्यायतनं विष्णोः कृत्वा तत्र प्रदक्षिणं ।
संकर्षणं स्वमन्त्रेण भक्त्या पुष्पैः प्रपूजयेत् ॥

स्वमन्त्रः शिवपञ्चाक्षरमन्त्रः ।

नमस्ते हलधृक् ! राम ! नमस्ते (१)लाङ्गलायुध ! ।
नमस्ते रेवतीकान्त ! नमस्ते भक्तवत्सल ! ॥
नमस्ते बलिनां श्रेष्ठ ! नमस्ते धरणीधर ! ।
प्रलम्बारे ! नमस्तेऽस्तु त्राहि मां कृष्णपूर्वज ! ॥

इति स्तुतिः, प्रणामश्च, लभेदभिमतं फलं ।
द्वादशाक्षरमन्त्रेण कृष्णं संपूजयेत्ततः" ।

पूजनानन्तरं स्तुतिः,—

"जय कृष्ण ! जगन्नाथ ! जय सर्वाघनाशन ! ।
जय चाणूरकेशिघ्न ! जय कंसनिसूदन ! ॥
जय पद्मपलाशाक्ष ! जय चक्रगदाधर ! ।
जय (२)नीलाम्बरश्याम ! जय सर्वसुखप्रद ! ॥
जय लोकपते ! नाथ ! जय वाञ्छाफलप्रद ! ।
जय देव ! जगत्पूज्य ! जय संसारनाशन ! ॥
संसारसागरे घोरे निःसारे दुःखफेनिले ।

(१) मुषलायुधः । (२) नीलाम्बुदश्याम ।

क्रोधग्राहाकुले रौद्रे विषयोदकसंभवे ॥

नानारोगोर्मिसलिले मोहावर्त्ते सुदुस्तरे ।

निमग्नोऽहं सुरश्रेष्ठ! त्राहि मां पुरुषोत्तम! ॥

एवं स्तुत्वाञ्जलिं वद्धा दण्डवत् प्रणिपत्य च ।

अश्वमेध-सहस्रस्य फलमाप्नोत्यनुत्तमं ॥

दृष्ट्वा कृष्णं प्रणम्याथ मोक्षमाप्नोत्यनुत्तमं ।

ततः संपूज्य मन्त्रेण सुभद्रां भक्तवत्सलां ॥

देवीसूक्तेन विधिवत् प्रणिपत्य कृताञ्जलिः ।

नमस्ते सुभगे! देवि! नमस्ते सुखसौख्यदे! ॥

त्राहि मां पद्मपत्राक्षि! कात्यायनि! नमोऽस्तु ते ।

नमः प्रकृतिरूपिण्यै त्रैलोक्योत्पत्तिकारिणि! ॥

विष्णुमाये! नमस्तुभ्यं चिच्छक्तिरूपधारिणि!।

योगनिद्रासि विष्णोस्त्वं मोहयन्ती जगत्त्रयं ॥

मोहनार्थाय जगतः स्थापिता विष्णुना स्वयं ।

एवं संप्रार्थ्य भद्रां च विष्णुलोकं स गच्छति"॥

अत्र,—

न स्प्रष्टव्यः कदाचित्तु [१]नियुक्तादन्यमानुषैः ।

"स्पृशन् पापमवाप्नोति दरिद्रो दुःखितो भवेत्" ॥

इति वचनात् संकर्षणादीनां स्पर्शनं निषिद्धं ।

"निःक्रम्य देवतागारात् प्रणम्यायतनं व्रजेत् ।

इन्द्रनीलमयो विष्णुर्यत्रास्ते वालुकावृतः ॥

(१) नियोगा।

अन्तर्द्धानेऽपि तं [१]नत्वा नरो विष्णुपुरं व्रजेत् ।

तस्य दक्षिणतः कोणे नरसिंहाकृतिर्हरिः ॥

तं दृष्ट्वा नृहरिं देवं पूजयित्वा प्रणम्य च ।

मुच्यते पातकैर्मर्त्यः समस्तैर्नात्र संशयः ।

न स्प्रष्टव्यः स चान्येन स्पृष्टो हन्ति नराधमं ॥

तस्मात् सर्वप्रयत्नेन नियमस्थः सदा स्पृशेत्" ।

तथा,—

"अनन्ताख्यं वासुदेवं दृष्ट्वा भक्त्या प्रणम्य च ।

सर्वपापविनिर्मुक्तो नरो याति परं पदं ॥

तथा,—

श्वेतगङ्गां नरः स्नात्वा दृष्ट्वा च श्वेतमाधवं ।

मत्स्याख्यं माधवं चैव श्वेतद्वीपं [२]च गच्छति" ॥

गयायां गदाधरदर्शनं ।

वराहपुराणे,—

"[३]कामतः प्रोच्यते दैत्य! तव पुण्यमिह प्रभो! ।

येन शार्ङ्गी गदापाणिर्दृष्टो नारायणः स्वयं ॥

यतो गदाधरः साक्षादस्मिन् [४]पूर्वं व्यवस्थितः" ।

मत्स्यपुराणे,—

"कृतशौचं महातीर्थं सर्वपापनिसूदनं ।

यत्रास्ते नरसिंहस्तु स्वयमेव जनार्दनः" ॥

(१) दृष्ट्वा। (२) स।
(३) किमतः। (४) तीर्थे।

नरसिंहपुराणे,—

केषु [१]दृष्टव्योऽसौति ब्रह्मप्रश्ने विष्णुवाक्यं,—

"[२]काकामुखे च वाराहं, द्वारकायां च गोपतिं।

गङ्गाद्वारे पयोधरं गोविन्दं नागसाङ्कये॥

वृन्दावने तु गोपालं मथुरायां स्वयंभुवं।

केदारे माधवं विद्याद्वाराणस्यां च केशवं॥

नरसिंहं महावने पुरुषोत्तमं दशवने।

प्रयागे योगमूर्त्तिं च कावेर्य्यां नागशायिनं"॥

इत्यादीन्युक्ता,—

"सर्वत्र परमात्मानं यः पश्यति स मुच्यते"।

आत्मानं सर्वगतं दृष्ट्वा यथा मुक्तो भवति तथा,

एतेषु स्थानेषु मन्मूर्त्तिं दृष्ट्वा मुक्तो भवतीति विष्णुवाक्यं।

लिङ्गपुराणे, काशीमधिकृत्य,—

"देवेश्वरस्योत्तरतः स्वयं तिष्ठति केशवः।

क्षेत्रस्य कारणं चास्य क्षेत्रज्ञ इति चोच्यते॥

तेन दृष्टेन सुश्रोणि! दृष्टं सर्वं चराचरं।

वामनपुराणे, प्रयागमधिकृत्य,—

"दृष्ट्वा वटेश्वरं रुद्रं माधवं योगशायिनं"।

तथा,—

"गङ्गायां गोपतिं द्रष्टुं स जगाम महासुरः"॥

(१) तिष्ठव्योऽसौ। (२) कोकमुखे।

विरजक्षेत्रमधिकृत्य, ब्रह्मपुराणे,—

"आस्ते स्वयंभुस्तत्रैव क्रोड़रूपी हरिः स्वयं।

[१]तस्मात् प्रणम्य तं भक्त्या नरो विष्णुपुरं व्रजेत्॥

अथ शिवदर्शनं, विद्याकरपद्धतौ, ईश्वरवाक्यं,—

"भ्रमित्वा दूरमध्वानं यो मां पश्यति शूलिनं।

स मे देवि! प्रियो नित्यं शरजन्मा यथा [२]सुतः॥

सुदूरमपि गच्छेत्तु यत्र देवो महेश्वरः।

दृष्ट्वा लिङ्गं महेशस्य सर्वपापैः प्रमुच्यते॥

सप्तजन्मकृतैर्दृष्टो मनोवाक्कायकर्मभिः।

पूजितं वा महेशानं पूज्यमानमथापि वा॥

दृष्ट्वा प्रयाति वै मर्त्यो ब्रह्मलोकं न संशयः"।

तथा,—

"यः प्रातर्देवदेवेशं शिवलिङ्गस्वरूपिणं।

पश्येत् स याति सर्वस्मादधिकां गतिमेव च॥

मध्याह्ने च महादेवं दृष्ट्वा [३]विष्णुपुरे व्रजेत्।

सायाह्ने सर्वयज्ञानां फलं प्राप्य विमुच्यते॥

प्रदोषे शङ्करं दृष्ट्वा सर्वपापैः प्रमुच्यते"।

तथा,—

"प्रातः संदर्शनं शम्भोर्नैशमेव व्यपोहति।

आजन्मनस्तु मध्याह्ने सप्तजन्मकृतं निशि॥

(१) दृष्ट्वा। (२) सुतः।
(३) यज्ञफलं लभेत्।

अर्द्धमासकृतं पापं दृष्ट्वा पर्वणि संत्यजेत्"।

ब्रह्मपुराणे. एकाम्रमधिकृत्य—

"ततः शम्भोर्गृहं गच्छेत् वाग्यतः संयतेन्द्रियः।
प्रविश्य पूजयेत् सर्वान् क्रमशस्तत्र दैवतान्॥
गणेश्वरं प्रथमतो देवीं स्कन्दं वृषं तथा।
गणं चण्डं कल्पवृक्षं सावित्रीं देवमेव च॥
तान् त्रिःप्रदक्षिणं कृत्वा उपचारैर्यथाक्रमं।
कृत्तिवासं ततः पश्येत् कृत्वा तं त्रिःप्रदक्षिणं॥
आगमोक्तेन मन्त्रेण वेदोक्तेन च शङ्करं।
अष्टोत्तरस्य नाम्ना च मूलमन्त्रेण चार्चयेत्॥
सर्वपापहरं देवं गन्धपुष्पाम्बरादिभिः।
एवं संपूज्य विधिवत् सर्वपापविवर्जितः॥
कुलैकविंशमुद्धृत्य शिवलोकं स गच्छति।
भुक्त्वा तत्र सुखं विप्रा यावदाभूतसंप्लवं॥
पुण्यक्षयादिहायातो जायते योगिनां कुले।
योगं पाशुपतं प्राप्य ततो मोक्षमवाप्नुयात्॥
तस्मिन् क्षेत्रवरे लिङ्गं भास्करेश्वरसंज्ञितं।
ये पश्यन्ति च तं देवं शिवलोकं व्रजन्ति ते॥
मुक्तेश्वरं च सिद्धेशं स्वर्णजालेश्वरं तथा।
रामेश्वरं च विख्यातं सूक्ष्मं (१)चाम्रातकेश्वरं॥

(१) ताम्रजकेश्वरं।

ब्रह्मेश्वरं च मेघेशं केदारेश्वरसंज्ञितं।
चक्रेश्वरं च विश्वेशं तथा च कपिलेश्वरं॥
ये च पश्यन्तीह नराः स्नात्वा विन्दुसरोऽम्भसि।
सर्वपापविनिर्मुक्ताः शिवलोकं व्रजन्ति ते॥
पुण्यक्षयादिहायातो योगिनां प्रवरे कुले।
योगे शम्भोर्वरं प्राप्य ततो मोक्षं व्रजन्ति ते"॥

काशीलिङ्गानां दर्शनं, मत्स्यपुराणे,—

"प्राप्य विश्वेश्वरं देवं न स भूयोऽभिजायते"।

तथा,—

"जात्यन्तरसहस्रेषु विमुक्तो म्रियते तु यः।
भक्तो विश्वेश्वरं देवं न स भूयोऽभिजायते"॥

स्कन्दपुराणे,—

"गोप्रेक्ष्येश्वरमागत्य दृष्ट्वाभ्यर्च्य च मानवः।
न दुर्गतिमवाप्नोति किल्बिषैश्च विमुच्यते॥

तत्रैव,—

"संगमे देवनद्योश्च यः स्नात्वा मनुजः शुचिः।
अर्चयेत् सङ्गमेशानं तस्य जन्मभयं कुतः"॥

देवनद्योर्वरणागङ्गयोः।

तथा,—

"आराध्य कपिलेशं तु त्रैलोक्यपालनक्षमं।
भवन्ति पुरुषा देव मम नित्यं च वर्णशः"॥

तथा, कपिलेश्वरश्रीकण्ठेश्वरजावालेश्वरगर्गेश्वरानधिकृत्य,—

"अन्तराश्मिणं पुण्यं यत्फलं परिपठ्यते ।
तत्फलं सकलं प्रोक्तं पञ्चायतनदर्शनात्" ॥

तथा,—

"वालुकेश्वरनामानं तं दृष्ट्वा च न शोचति" ।

तथा,—

"कृत्तिवासेश्वरो देवो द्रष्टव्यश्च पुनः पुनः ।
यदीच्छेत्तारकं ज्ञानं शाश्वतं चामृतप्रदं ॥
दर्शनादेव देवस्य ब्रह्महा विप्रमुच्यते" ।

स्कन्दपुराणे,—

"केदारं मध्यमं स्थानं स्थानं चैव महालयं ।
मम पुण्यानि भूर्लोके [१]ततः श्रेष्ठतमं त्विदं ॥
अविमुक्तेश्वरं नाम मम दृष्ट्वा तु मानवः ।
सद्यः पापविनिर्मुक्तः पशुपाशैर्विमुच्यते ॥
शैलेशं सङ्गमेशं च स्वर्लीनं मध्यमेश्वरं ।
हिरण्यगर्भमीशानं गोप्रेक्ष्यं वृषभध्वजं ॥
तपःशान्तं शिवं चैव ज्येष्ठस्थाननिवासिनं ।
शुक्रेश्वरं च विख्यातं व्याघ्रेशं जम्बुकेश्वरं ॥
दृष्ट्वा न जायते मर्त्यः संसारे दुःखसागरे" ।

ब्रह्माण्डपुराणे, पुरुषोत्तममधिकृत्य,

"मार्कण्डेयह्रदेऽप्येवं स्नात्वा दृष्ट्वा च शङ्करं ।
दशानामश्वमेधानां फलं प्राप्नोति मानवः" ॥

(१) तेभ्यः ।

दर्शने मन्त्रः,—

"संसारसागरे मग्नं पापग्रस्तमचेतनं ।
त्राहि मां भगनेत्रघ्न! त्रिपुरारे! नमोऽस्तु ते" ॥

वामनपुराणे, गयामधिकृत्य,[१]—

"दृष्ट्वा वटेश्वरं रुद्रं माधवं योगशायिनं" ।

सूर्य्यदर्शनं । भविष्यपुराणे,—

"मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणः ।
आसाद्य भास्करं मर्त्यः तन्नाशयति तत्क्षणात्" ॥

आसाद्य दृष्ट्वेत्यर्थः । तथा,

"यः कुर्य्याद्दर्शनं मासमेकाहारो जितेन्द्रियः ।
स यत्फलमवाप्नोति न तत्सर्वैर्महामखैः" ॥

ब्रह्मपुराणे,—

"पृथिव्यास्तत्र कोणे वै कोणार्कः संप्रतिष्ठितः ।
यं दृष्ट्वा भास्करं मर्त्यः सर्वपापैः प्रमुच्यते" ॥

काशीमधिकृत्य लिङ्गपुराणे, कालेश्वरमुक्त्वा—

"तस्यैव दक्षिणे भागे लोलार्को नाम वै रविः ।
तस्य दर्शनमात्रेण सूर्य्यलोकमवाप्नुयात्" ॥

दुर्गादर्शनं,—

"सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ।
दुर्गां दृष्ट्वा नरः सोऽपि प्रयाति परमां गतिं" ॥

(१) प्रयागमधिकृत्य ।

ब्रह्मपुराणे,—

"विरजे विरजा माता ब्रह्मणा सा [१]प्रतिष्ठिता ।
यस्याः संदर्शनान्मर्त्यः पुनात्यासप्तमं कुलं" ॥

लिङ्गपुराणे, काशीमधिकृत्य,—

"दक्षिणे रक्षते दुर्गा उत्तरे नैर्ऋते मता ।
अङ्गारीशा पश्चिमे च वायव्ये भद्रकालिका ॥
उत्तरे भीषचण्डी[२] च महामुण्डा च सोमतः ।
ऊर्द्ध्वकेशा समायुक्ता शाङ्करी पूर्वतः स्मृता ॥
ऊर्द्ध्वकेशी तथाग्नेय्यां चित्रघण्टा च मध्यतः ।
एतास्तु चण्डिका देवी योऽत्र द्रक्ष्यति मानवः ॥
तस्य तुष्टाः स्तुताः सर्वाः सर्वं रक्षन्ति सर्वदा" ।

तथा,—

"आद्या[३]वपि परा प्रोक्ता संवर्त्ता ललिता तथा ।
द्रष्टव्या चैव सा देवी सर्वकामफलप्रदा ॥
तत्र गौरी सदा देवी पूजितव्या च भक्तितः" ।

आदिमत्पुरुषोत्तमेन्द्रद्युम्नादिकृतप्रतिमात्वेन पुण्यहेतुत्वं कथं वेदेन बाध्यत[४] इत्याशङ्कया च स्थानविशेषोपलक्षितप्रतिमात्वेनैव पुण्यहेतुत्वं। स्थापकेन्द्रद्युम्नादिकीर्त्तनं प्रसङ्गार्थमेव[५]। तेन तत्स्थाने येन केनापि कृतप्रतिमादर्शनादि पुण्यजनकमिति केचित् । स्यादेवं

(१) संप्रतिष्ठिता । (२) भीष्मचण्डी च ।
(३) अन्याचापि । (४) बोध्यत— इत्याशङ्कायां— ।
(५) प्रशंसार्थमेव ।

यदि स्थानविशेषविशिष्टप्रतिमात्वेन पुण्यहेतुत्वे प्रमाणं स्यात् । स्थानविशेषानुल्लेखेनाधुनिकपुरुषकृतानां प्रतिमादीनां पुण्यहेतुत्वदर्शनात् ।

तथा च भविष्यपुराणे,—

"भास्करायतनाभ्यासे सूर्य्यक्षेत्रं समन्ततः ।
देहिनां तत्र पञ्चत्वं सूर्य्यसायुज्यकारणं ॥
मनुजैः स्थापिते सूर्य्ये क्षेत्रमानमिदं स्मृतं" । इति ।

तथा,—

"क्रोशमात्रं परं क्षेत्रं शिवस्य परमात्मनः ।
मनुजैः स्थापिते लिङ्गे क्षेत्रमानमिदं स्मृतं ॥
स्वायम्भुवे सहस्रं स्यादार्षे चैव तदर्द्धकं" । इति ।

तेन पुण्यविशेषवत्पुरुषप्रतिष्ठितत्वेनैव प्रतिमानां पुण्यहेतुत्वं । न चैव सर्वेषामेकरूपफलत्वप्रसङ्गः । स्थापकस्य पुण्यविशेषण स्थापितत्वपुण्यहेतुत्वसंभवात् । एवं च नित्यानित्यसंयोगविरोधोऽपि । तपोविशेषवत्पुरुषस्य सर्वदा विद्यमानत्वात् । स्वर्गमोक्षप्रदत्वादिविशेषस्य प्रतिमानां स्थापकतपोविशेषादेव । यो हि यत्फलप्रदप्रतिमाकामनया यादृशं तपः करोति, तस्य तत्प्रतिमा तत्फलप्रदा, भवतीत्येवं वेदेन बोध्यत इति स्मृतिप्रामाण्यं कल्प्यते ।

तथा च स्मरन्ति,—

"स्थापकस्य तपोयोगात्पूजायाश्च विशेषतः ।
अभिरूप्यात्तु विम्बस्य देवः सान्निध्यमिच्छति" ॥

विम्बं प्रतिमा, इन्द्रद्युम्नस्य च वेदेऽपि श्रुतत्वेन प्रवाह-

नित्यत्वमन्यवेऽपि तपोविशेषोपलक्षणेनैव तत्कृतप्रतिमानां पुण्यहेतुत्वं [1]तत्प्रतिमानाशे तथा। प्रतिमान्तरे तथाफलप्रदत्वे मानाभावः।

केवलं ब्रह्मपुराणे,—

"ये केचित्कारयिष्यन्ति प्रासादं प्रतिमामथ।

तथापि तेऽक्षया कीर्त्तिर्भविष्यति न संशयः"॥

इन्द्रद्युम्नं प्रति वरदानस्मृतेः। "प्रासादप्रतिमाभङ्गे न त्यजामि कदाचन" इति वचनाच्च पुरुषोत्तमक्षेत्रे तत्स्थाने प्रतिमान्तरस्य वचनविशेषादेव पुण्यहेतुत्वं। अन्यत्र क्षेत्र ईदृशं वचनं लिङ्गं वापि नास्ति ऋषिकृतप्रतिमालिङ्गादिनाशे तत्स्थाने प्रतिमान्तरं लिङ्गान्तरं वा तथा न फलजनकं। किं त्वाधुनिकपुरुषकृत-प्रतिमान्तरतुल्यमेवेति मन्तव्यं। क्षेत्रविशेषाणां तु नित्यत्वादेव न कश्चित्तत्र विचारः। गङ्गायास्तु गङ्गात्वेनैव पुण्यहेतुत्वं। भगीरथानयनात्तु देशविशेषसम्बन्धः। न चैतावता नित्यानित्य-संयोगः। तत्रापि तपोविशेषवत् पुरुषप्रवृत्तितुल्यमुपलक्षणं।

तदुक्तं महाभारते,—

"परिग्रहान्मुनीनां च तीर्थानां पुण्यता स्मृता"। इति।

तथा गवां निवासेन भूमेः पवित्रत्वं। गोष्ठस्य जपादिविशेषत्वेन विधानात्। तदुक्तं वार्त्तिके,—

यथा च, "यां यां भुवं नरः कांचिदध्यवसति पुण्यकृत्।

तत्सङ्गतिविशेषत्वात्सेव्यते धर्म्मकारणं[2]"॥ इति।

(१) तत्प्रतिमांशे। (२) कर्म्मकारणं।

तथा च,—

"चक्रं दृष्ट्वा हरेर्दूरात्प्रासादोपरि संस्थितं।

सहसा मुच्यते पापैर्जन्मकोटिसमुद्भवैः"॥

विष्णुपुराणे गङ्गामधिकृत्य,—

"स्मृताभिलषिता दृष्टा स्पृष्टा पीतावगाहिता।

या पावयति भूतानि कीर्त्तिता च दिने दिने"॥

तथा,—

ब्राह्मणगोकृताश्नहिरण्यघृतादितीर्थनृपाणां दर्शनं नारदोक्त-मायुर्वृद्धिकरं। ब्रह्मपुराणोक्तं घृते प्रतिबिम्बदर्शने चिरजीवित्वफलं। च्छागलेयोयमस्य द्वितीये,—

"यतीनां दर्शनं चैव स्पर्शनं भाषणं तथा।

कुर्वाणं पूजिते[1] नित्यं तस्मात्पश्येत्तु नित्यशः॥

अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः।

दृष्टमात्रात् पुनन्त्येते तस्मात्पश्येच्च नित्यशः"॥

अग्निचित् कृताग्निचयनः। कपिला गौः। सत्री कृतबहुयज-मानकयागः।

वराहपुराणे,—

"वामनं ब्राह्मणं दृष्ट्वा वराहं च जलोत्थितं।

नमस्येच्चैव यो भक्त्या स पापेभ्यः प्रमुच्यते॥

यज्वा स्पष्टाब्दः सत्री शतायुर्धार्म्मिकः शुचिः।

ज्ञाननिष्ठा तपःसिद्धा दृष्ट्वा पापाद्विमुच्यते"॥

(१) पूयते।

शुचिस्तीर्थादिपूतः। शतायुः शूद्रादिरपि। ज्ञाननिष्ठोऽध्यात्मरतः। विद्याकरपद्धतौ,—

"दृष्ट्वा तु कपिलां दूरात् नमस्कारेण योऽर्चयेत्।
दूरादेव प्रणश्यन्ति सर्वपापानि तस्य तु" ॥

कपिलायां मन्त्रः,—

"विदितासि वशिष्ठेन विश्वामित्रेण धीमता।
कपिले! हर मे पापं यन्मया दुष्कृतं कृतं ॥
कपिले! त्वं हि देवानां वन्दनीयासि रोहिणी।
तीर्थवेदमया यस्मादतः शान्तिं प्रयच्छ मे" ॥

स्कन्दपुराणे,—

"कपिलायाश्च गोश्च स्यादनग्नेर्ब्राह्मणस्य तु।
स याति नरकं घोरं नरकं च तमोमयं" ॥

भविष्यपुराणे,—

"गामालभ्य नमस्कृत्य कृत्वा चैव प्रदक्षिणं।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा" ॥

पद्मपुराणे,—

"सदा गावः प्रणम्यास्तु मन्त्रेणानेन पार्थिव!।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
[१]नमो ब्रह्मसुताभ्यश्च पवित्रेभ्यो नमो नमः" ॥

विष्णुः,—

"गोमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना।
षडङ्गमेतदेवं स्यात्पवित्रं सर्वदा गवां" ॥

(१) ब्रह्ममन्त्रप्रसूताभ्यः।

तथा,—"गवां कण्डूयनं चैव [१]सर्वापत्सु निसूदनं।
गवां घासप्रदानेन स्वर्गलोके महीयते" ॥

"गवां हि तीर्थे वसतीह पद्मा पुष्टिस्तथास्यां रजसि प्रसिद्धा लक्ष्मीः [२]पुरीषे प्रणतौ च धर्मस्तासां प्रणामं सततं च कुर्यात्। तृणोदकाद्येषु वनेषु मत्ताः [३]क्रीड़न्ति गावः सवृषाः सवत्साः क्षीरं [४]प्रयच्छन्ति सुखं [५]स्वपन्ति शीतातपव्याधिभयैर्विमुक्ताः" ॥

"इमं मन्त्रं विशुद्धात्मा जपेन्नित्यं समाहितः।
गच्छन् तिष्ठन् स्वपन् जिघ्रन् भुञ्जन् क्रीड़न् समुत्सृजन् ॥
महाभयेषु सर्वेषु समेषु विषमेषु च।
प्रयाणकाले च तथा श्रोतव्यमभयप्रद" ॥

तथा,—

"एवं विधौ महामन्त्रः पठितस्तु सुरासुरैः।
श्रुतोऽनुमोदितो ध्यातः कीर्त्तितश्च पुनः पुनः ॥
सदा[६] व्युत्पादनाद्गावः पञ्च पूण्याः समुत्थिताः।
नन्दा सुनन्दा सुरभिः सुशीला सुमनास्तथा ॥
रत्नान्यनेकान्यादाय कौस्तुभप्रभृतीनि च।
प्रदक्षिणीकृतास्ताश्च सर्वैर्देवासुरैः क्रमात् ॥
संस्कृताः पूजिताः सम्यक् दृष्टा स्पृष्टाश्च वन्दिताः।
कस्यचित्त्वथ कालस्य दिव्यास्ताः कामधेनवः ॥

(१) सर्वाघविनिसूदनं। (२) करीषे।
(३) क्रीड़न्तु। (४) प्रयच्छन्तु।
(५) स्वपन्तु। (६) तदाद्याः पवनाद्गावः।

ब्राह्मणेनार्चितास्तास्तु वव्रिरे वरमुत्तमं।
दक्षप्रजापतेर्जन्म मारीचं कश्यपं प्रति॥
शिवलोके च गमनं न भूयो जन्म कुत्रचित्।
वने वासस्तृणं तोयं भोजनं निःपरिग्रहं॥
दृढेन मृदुना बन्धः पाशेनाहणवेश्मनि।
घासग्रासादिकं भूरि निशि दीपस्य भास्वरः॥
इतिहासपुराणानां श्रवणं सोपवीतिनं।
अन्नमुष्टिर्यथाशक्त्या परिचर्य्या यथाक्रमं॥
ताड़नाक्रोशखेदानि स्वप्नेऽपि न कदाचन।
स्थानमूत्रपुरीषेण नोद्वेगः क्रियते क्वचित्॥
शोधनीयस्य गोवाटः शुष्कैः चौरादिभिस्तथा।
ग्रीष्मे वृक्षाकुले वेश्म शीततोये विकर्दमे॥
वर्षासु चाथ शिशिरे सुखोष्णे वातवर्जिते।
गोकुले रुद्रमुख्यास्य प्रतिष्ठाप्या गणाः सदा॥
जापकैः सर्वमन्त्रास्तु जप्तव्यास्य [१]सम्वृद्धये।
उच्छिष्टमूत्रविट्श्लेष्ममलं जह्यान्न तत्र च॥
रजस्वला न प्रवेश्या नान्त्यजातिर्न पुंश्चली।
न ताः परिभवेत्तोये कोकिलेषु विशेषतः॥
न लङ्घयेद्वत्सतन्त्रीं न क्रीडेत् गोष्ठसन्निधौ।
न गन्तव्यं गवां मध्ये सोपानत्कैः सपादुकैः॥
हस्त्यश्वरथयानैश्च सवितानैः कदाचन।

(१) स्वात्मशुद्धये।

दक्षिणोत्तरगैः प्राज्ञैर्गन्तव्यं च पदातिभिः॥
गावस्तृषातुराः पाल्याः श्रद्धया पितृमातृवत्।
गिरिप्रपातात् सिंहर्क्षशीतातपभयात्तथा॥
महाकोलाहले घोरे दुर्दिने दोषविप्लवे।
गवां तृणानि देयानि शीतलं[१] च जलं तथा"॥
एवं गवां वरदानार्थवादकल्पविधिना एवं कर्त्तव्यं।
"गावः सम्वत्सरं रक्ष्याः श्रद्धया च समाहिताः।
ब्राह्मणैः क्षत्रियैः वैश्यैः शूद्रैः सर्वाघशान्तये"॥
हारीतः,—
"द्वौ मासौ [२]पातयेद्वत्सं तृतीये द्विस्तनं हरेत्।
चतुर्थे त्रिस्तनं चैव यथान्यायं यथाकुलं[३]"॥
ब्रह्मपुराणे,—
"आषाढ्यामश्वयुज्यां च चैत्र्यां पौष्यां च सर्वदा।
न गृह्णीयाद्गवां क्षीरं सर्वं वत्साय निक्षिपेत्॥
न षण्डं वाहयेद्धेनुं न गां भारेण पीड़येत्।
युगाद्येषु युगान्तेषु षड़शीतिमुखेषु च॥
दक्षिणोत्तरतः सूर्ये तथा विषुवतोर्द्वयोः।
संक्रान्तिषु च सर्वासु ग्रहणे चन्द्रसूर्ययोः॥
पञ्चदश्यां चतुर्दश्यां द्वादश्यामष्टमीषु च।
उपचारो गवां कार्य्यो मासि मासि यथाक्रमं"॥

(१) शीतमन्नस्तथा जलं। (२) पालयेत्। (३) यथाबलं।

अथ गवाह्निकम् ।

ब्रह्मपुराणे,—

"लवणस्य च चत्वारि पलान्यष्टौ घृतस्य च ।
परकीयस्य दुग्धस्य तथा देयानि षोड़श ॥
द्वात्रिंशत् शीतलस्यापि जलस्य च पलानि च ।
आदौ विचार्य्य पथ्यः परिमाणं वलं रुचिं ॥
आकस्मिकं प्रदातव्यं पुण्यार्थं तु गवाह्निकं ।
प्रभाते लवणं पच्यं दीयते च ततो जलं ॥
ततस्तृणानि भुंज्यन्ते शोषणं मांसवर्जितं ।
निशि दीपः समन्त्रज्ञो[१] दिव्याः पौराणिकास्तथा ॥
एवं कृते रत्नपूर्णां महीं दत्त्वा फलं लभेत् ।
गोप्रदानाच्च यत्पुण्यं गवां संरक्षणात् लभेत्" ॥

आदित्यपुराणे,—

"योऽग्रभक्तं किंचिदप्राश्य दद्याद्-
गोभ्यो नित्यं गोव्रती-सत्यवादी ।
शान्तो दान्तो गोसहस्रस्य पुण्य,
सम्वत्सरेण प्राप्नुयाद्धर्मशीलः" ॥

देवीपुराणे,—

"गवां स्वामी गवां गोष्ठे यस्तु धूपं न कारयेत् ।
मक्षिकालीननरके मक्षिकाभिः स भक्ष्यते ॥

(१) सतन्त्रीकः ।

मृतवत्सां तु गां यस्तु दमित्वा पिवते नरः ।
[१]गर्भितास्ये चिरं तिष्ठेत्क्षुधार्त्तो वै नराधमः" ॥

गर्भितास्ये नरके ।

महाभारते,—

"गोकुलस्य तृषार्त्तस्य [२]जलार्थं [३]प्रतिधावतः ।
उत्पादयति यो विघ्नं तमाहुर्ब्रह्मघातकं ॥
कृत्वा गवार्थं शरणं शीतवातसहं महत् ।
आसप्तमं तारयति कुलं भरतसत्तम!" ॥

शरणं गृहं । ब्रह्मपुराणे,—

"सदोषा गोगृहे जाता परिपाल्या [४]स्वयं तथा ।
अनाथानां गवां दत्त्वा कार्य्यस्तु शिशिरे महः ॥
पुण्यार्थं यत्र दीयन्ते तृणतोयेन्धनानि च" ।

तत्र मनुः,—

"सौरभेयि! जगन्मातः! देवानाममृतप्रदे! ।
गृहाण वरदे ग्रासमीप्सितार्थं च देहि मे" ॥

इति गोदर्शनप्रसङ्गेन गोपरिचर्य्या लिखिता ।

अथाश्वत्थप्रदर्शनं । विद्याकरपद्धतौ,—

"दुरितानि प्रणश्यन्ति नृणामश्वत्थसेविनां ।
दृष्टः स्पृष्टस्तथा ध्यातः कीर्त्तितः स हि [५]तारयेत्" ॥

अश्वत्थं दृष्ट्वा प्रार्थना ।

(१) ताड़ितास्ये । (२) जलान्ते । (३) वसुधाधिपः ।
(४) सदा स्वयं । (५) पावयेत् ।

"अश्वत्थ! यस्मात् त्वयि वृक्षराज! ;
नारायणस्तिष्ठति सर्वकालं।
तस्मात् शुचित्वं सततं तरूणां,
धन्योऽसि [१]दुःस्वप्नविनाशनोऽसि॥
क्षीरदस्त्वं फलदस्त्वं येन श्रीस्त्वां निषेवते।
तेन सत्येन वृक्षेन्द्र! मामपि श्रीर्निषेव्यतां॥
यस्तु प्रदक्षिणं कुर्य्याद् भक्त्याश्वत्थं दिने दिने।
तं सर्वदुरितान्याशु त्यजन्ति वपुरक्षितं॥
दुःप्रतिग्रहदुर्भोज्यदुःसङ्गदुरधीतकैः।
मुच्यतेऽहरहर्दोषैरश्वत्थद्रुमसेवनात्"॥

ततः प्रदक्षिणमन्त्रः,—

"अग्निगर्भ! शमीगर्भ! यज्ञगर्भ! सनातन!।
हिरण्यगर्भ! श्रीगर्भ! वेदगर्भ! नमोऽस्तु ते॥
चक्षुष्पन्दं भुजस्पन्दं दुःस्वप्नं दुर्विचिन्तितं।
शत्रूणां च समुत्थानमश्वत्थ! शमयस्व मे॥
एकादशोऽसि रुद्राणां वसूनामपि चाष्टमः।
नारायणोऽसि देवानां वृक्षराजोऽसि पिप्पल!॥
त्वां दृष्ट्वा नश्यते पापं स्पृष्ट्वा लक्ष्मीर्विवर्द्धते।
प्रदक्षिणाद्भवेदायुः सदाश्वत्थ! नमोऽस्तु ते"॥

तथा,—

"मन्दवारे द्विजो मौनी प्रातरुत्थाय भक्तिमान्।

(१) चारिष्ठ।

पुण्यतीर्थे शुचिः स्नात्वा प्राप्य श्वत्थं हरिद्रुमं॥
पौरुषेण विधानेन संपूज्य प्रणवेन वा।
कृतसर्वोपचारोऽथ शतकृत्वः समाहितः॥
जपन् प्रदक्षिणं [१]कुर्य्यात् प्रणवं संस्मरन् हरिं।
आलिङ्ग्य प्राङ्मुखः पश्चाद्ध्यायंस्तेजोमयं हरिं॥
अश्वत्थरूपिणं विष्णुमिमं मन्त्रमुदीरयेत्।
त्वं धाम सर्वधाम्नां च [२]बोधात्मा [३]बोधरुच्यते॥
मयाश्लिष्टो [४]मया भक्त्या वृक्षश्रेष्ठ! जगत्पितः!।
आरात्ते अग्निरत्वास्तु आरात् परशुरस्तु ते॥
निवाते त्वाभिवर्षन्तु स्वस्ति तेऽस्तु वनस्पते!"।

इत्यालिङ्गनमन्त्रः।

तथा,— "आरात्त इति चैवैनं प्रणमेद्दण्डवत्ततः।

प्रणामे आरात्त इति स्वस्ति मेऽस्तु वनस्पत;—इत्यतो मन्त्रः।

एकस्मिन् शनिवारे कृतस्य फलमाह,—

"प्रायश्चित्तमिदं गुह्यं पातकेषु महत्स्वपि।
धन्यं पुत्रार्थमायुष्यं महारोगैकभेषजं॥
किं चान्यत्सर्वभावेन कृतमेतद्धरिप्रियं"।

प्रतिशनिवारं वर्षपर्य्यन्तकरणे फलमाह,—

"यस्तु संवत्सरं कुर्य्यादेवं शनिदिने शुचिः।
तस्योपदिशति स्वप्ने मोक्षमार्गं हरिः स्वयं"॥

(१) कृत्वा। (२) बोधासी।
(३) बोधि। (४) यदा।

बिल्ववृक्षदर्शनं,—

"दर्शनात् बिल्ववृक्षस्य वन्दनात् स्पर्शनादपि ।
अहोरात्रकृतं पापं नश्यत्येव हि नारद ! ॥
बिल्ववृक्षं समाश्रित्य त्रिरात्रोपोषितः शुचिः ।
हरिनाम जप(१)न्नित्यं ब्रह्महत्यां व्यपोहति ॥
ये तु पापा दुराचाराः श्रीतरोश्छेदकारिणः ।
तेऽपि चाद्यापि नरके पच्यन्ते ब्रह्मणो दिनं ॥
मृतास्ते जीवमानाश्च ब्रह्मघ्नाः कीर्त्तिता भुवि ।
तस्मिन् देशे भयं नित्यं यत्र श्रीवृक्षच्छेदकः" ॥

तथा तुलसीदर्शने,—

"दृष्टा स्पृष्टा तथा ध्याता कीर्त्तिता नमिता स्मृता ।
रोपिता चिन्तिता नित्यं पूजिता तुलसी गृहे ॥
नवधा तुलसीभक्तिं ये कुर्वन्ति दिने दिने ।
युगकोटिसहस्राणि ते वसन्ति हरेः पुरे ॥
दर्शनात् स्पर्शनात्सेकाद्रोपणात् पालनान्नृणां ।
तुलसी हरते पापं वाङ्मनः(२)कायसंचितं ॥
स्नाने दाने तथा ध्याने प्राशने केशवार्चने ।
तुलसी (३)हरते पापं कीर्त्तने रोपणे कलौ ॥
यः (४)स्पृश्य तुलसीं गच्छेत् कार्य्यसिद्धिस्तु तस्य वै" ॥

(१) लक्षं । (२) कर्मचिन्तितं ।
(३) दहते । (४) स्मृत्वा ।

तथा,—

"केशवायतने यस्तु कारयेत्तुलसीवनं ।
लभते चाक्षयं स्थानं पितृभिः सह वैष्णवः ॥
तावद्वर्षसहस्राणि यावद्बीजदलानि तु ।
वसन्ति वैष्णवे लोके तुलसीरोपका नराः ॥
शिवालये फलं (१)तत्तु तुलसीरोपणे (२)भवेत्" ॥

तुलसीस्तुतिः ;—

"महाप्रसादजननी सर्वसौभाग्यवर्द्धिनी ।
आधिव्याधिं हरे(३)न्नृणां तुलसी त्वं नमोऽस्तु ते ॥
नमिता त्वं पुरा विप्रैरर्च्चिता त्वं सुरासुरैः ।
तुलसी हर (४)मे पापं (५)पूर्वजन्मशतार्जितं ॥
(६)जयं देहि यशो देहि कीर्त्तिमायुर्यथासुखं ।
बलं पुष्टिं तथा धर्मं तुलसी त्वं नमोऽस्तु ते ॥
अनन्यमनसा नित्यं तुलसीं स्तौति यो जनः ।
देवपितृमनुष्याणां प्रियो भवति सर्वदा ॥
श्रियः श्रिया वहे नित्यं नित्यं श्रीधरसत्कृते ।
भक्त्या दत्तं मया तुभ्यमर्घ्यं गृहाणनमोऽस्तु ते ॥
तुलसीकानने यस्तु मुहूर्त्तमपि विश्रमेत् ।
जन्मकोटिकृतात्पापान्मुच्यते नात्र संशयः ॥
प्रदक्षिणं यः कुरुते पठन्नामसहस्रकं ।

(१) तद्वत् । (२) लभेत् । (३) नित्यं ।
(४) ते । (५) सर्वं । (६) श्रियं ।

तुलसीपत्रमादाय सङ्गतो यत्र [१]तिष्ठति ॥
अहं तत्रैव गच्छामि गौरिव सुतवत्सला ।
शरीरे यस्य विप्रर्षे! तुलसीदलविन्दवः ॥
नश्यन्ति तस्य पापानि महापातकजानि च ।
[२]तन्मूलमृत्तिकालेपं कृत्वा स्नात्वा दिने दिने ॥
दशाश्वमेधावभृथस्नानजं लभते फलं ।
मन्दिरे यस्य राजेन्द्र! तुलसीमूलमृत्तिका ॥
न संचरन्ति [३]दूतास्तु यमस्याज्ञा[४]भिधायिनः"।

यमदूतवाक्यं,—

"दर्शनमाशु कृष्णाहे त[५]द्दोषोऽयं द्विजो मतः ।
न स्पृशेत्तुलसीं यावद्[६]शाहं च ततः परं" ॥

तथा,—

"तुलसीदलवातोत्थरजसा शुद्धदेहिनः ।
किं करिष्यत्यसन्तुष्टो यमो दण्डधरोऽपि सन्" ॥

अत्र गुरूणां गृहं गत्वा तद्दर्शनादिकं कार्य्यं, गुरुणैव हि पर्वसु, पर्वसु गच्छेदित्यर्थः, अन्यत्रानियम इति, प्रत्यहं गुरुदर्शनस्य स्नातकव्रतत्वेन नित्यत्वेऽपि पर्वस्वगमनं दोषातिशयमित्यर्थः ।

यमः,—

"देवकार्य्यं ततः कृत्वा गुरुमज्जनवीचतामिति" ।

(१) गच्छति । (२) तुलसी ।
(३) भूता । (४) अभिधानतः ।
(५) तद्दयोग्योऽयं । (६) दशाख्याहि ।

गुरवश्च शंखलिखितौ, अथ मान्याः,—

पिता माता पितृभार्य्या ज्येष्ठभ्राता ज्येष्ठभगिनी, ज्येष्ठशालः पितुः सखा, पितुराचार्य्यपितृव्यमातुलश्वश्रूश्वशुरवृद्धाः ।

वशिष्ठः,—

गुर्वधिकारे, उपाध्यायपत्नी दीक्षितः प्रव्रजितोराजावृद्धो-ज्ञानवृद्धस्तपोवृद्धश्चेति ।

मनुः,—मातापितरावुक्त्वा ।

"तयोर्नित्यं प्रियं कुर्य्यादाचार्य्यस्य च सर्वदा ।
तेषु च त्रिषु तुष्टेषु तपः सर्वं समाप्यते" ॥

भविष्यपुराणे,—

"उपाध्यायाद्दशाचार्यः आचार्य्याणां शतं पिता ।
सहस्रं तु पितुर्माता गौरवेणातिरिच्यते" ॥
"कृत्वोपाध्यायमादौ तु ये पूज्याः कथितास्तव ।
महागुरुर्महाबाहो! सर्वेषामधिकः स्मृतः" ॥

महागुरुश्च,—

"यस्त्वेतानि पुराणानि समस्तानीह जानते ।
भारतं च महाबाहो स सर्वज्ञो मतो नृणां ॥
तस्मात्स पूज्यो राजेन्द्र! वर्णैर्विप्रादिभिस्तथा" ।

मनुः,—

"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान् ।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ॥
विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां च वीर्य्यतः" ।

यमः,—

"यो वै युवाप्यधीयानस्तं देवा स्थविरं विदुः।

एवं च गुरूणामेवमादीनां गृहं गत्वा अभिवादनादीनि पूर्वोक्तक्रमेण कर्त्तव्यानि. गुरुवीचणं तदभिवादनं प्रत्युत्थानं प्रत्युद्गमः।

विष्णुः,—नादित्यमुद्यन्तमीचेत नास्तं यातं नोपरक्तं, नभसितिरोहितं नादर्शजलाद्युपगतं, न मध्याह्ने. उपरक्तो राहुग्रस्तः।

हारीतः,— "नोदयास्तमये चन्द्रार्कौ"।

देवलः,—

"सूर्य्याचन्द्रमसौ चोभौ नक्षत्राणि च सर्वशः।

नोवीचेताशुचिर्नित्यं ग्रहानन्यांश्च मानवः"॥

हारीतस्मृतौ देवलस्मृतौ,— "दर्शनमप्यशुचेर्निषिद्धं", "पतितान् चाण्डालोच्छिष्टान्नावलोकयेत्"।

(१)"अन्यदृष्टिगतैरेतैः संभाषेण नृणां वरं"।

नृणां वरं ब्राह्मणं।

मार्कण्डेयपुराणे,—

"देवतापितृशास्त्रज्ञधर्म(२)मत्यादिनिन्दकैः।

कृत्वा तु स्पर्शमालापं शुद्ध्येतार्कविलोकनात्॥

अवलोक्य तथोदक्यामन्त्यजं पतितं शवं।

विधर्मसूतिकाषण्ढविवस्त्रान्त्यावसायिनः॥

मृतनिर्यातकांश्चैव परदाररताश्च ये"।

अर्कं पश्येदित्यर्थः॥

(१) अनुदृष्टैरेतैः सम्भाषेत। (२) सत्यानिन्दितैः।

स्कन्दपुराणे,—

"कृतघ्नं मानवं दृष्ट्वा नरकेष्वपि कुत्सितं।

शुद्ध्यर्थं देवि! द्रष्टव्याः सोमानलदिवाकराः"॥

सोमादीनां यथासम्भवं विकल्पः।

विष्णुपुराणे,—

"संवत्सरं क्रियाहानिर्यस्य विप्रस्य जायते।

तस्यावलोकनात् सूर्य्यो निरीक्ष्यः साधुभिः (१)सदा"॥

हारीतः,—

"अवगुण्ठित उच्छिष्टो, अमेध्यातुरयोनोर्द्धज्योतींषि वीचेत न देववनस्पतीन्, प्रत्येकं निषेधः, अवगुण्ठितशिराः। नेचेत, उच्छिष्टहस्तो नेचेत अमेध्यातुरोऽमेध्यमध्यवर्त्ती। स्वयं शुद्धोऽपि, ऊर्द्धज्योतिर्ग्रहणाद्भूमिगतवह्न्यातपादिदर्शने न दोषः"।

शंखलिखितौ,—

"न स्त्रियं विवसनां। न पुरुषमन्यतः स्वाभाव्यात्"।

स्वाभाव्यं वात्स्यायनमतं, सांख्यायनगृह्ये,— "नग्नां परस्त्रियं न वीचेत, अन्यत्र मैथुनात्, अनाप्तमकार्य्यकारिणं, अनाप्तं शत्रुं, अकार्य्यकारिणं पातकिनं, नेचेतेत्यनुषङ्गः"।

विष्णुः,—

"न क्रुद्धस्य गुरोर्मुखं, न तैलोदकयोः स्वां छायां न मलवदादर्शं, (२)न किंच मेहमानं, न चपलं, न भ्रष्टकुञ्जरं, न विषमस्थो वृषादियुद्धं, नोन्मत्तं मत्तं।

(१) सह। (२) नाकचन।

मनुः,—

(१)"न स्नायाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीं ।
नाक्ष्णयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृतां ॥
युवतीं जृम्भमाणां वा न चासीनां यथासुखं ।
न पश्येत् प्रस्रवन्तीं च तेजस्कामो (२)जितेन्द्रियः" ॥

विष्णुः,— "न कूपमवलोकयेत्" ।

याज्ञवल्क्यः,— "न च संसृष्टमैथुनां" । स्त्रियमीक्षेतेत्यर्थः ।

मनुः,—

"न विण्मूत्रमुदीक्षेत, न पश्येदात्मनः शकृत् ।

(३)अत्रात्मग्रहणमुद्दिश्य विशेषणत्वादविवक्षितं ।

अथ लग्जानि स्पृश्यास्पृश्यानि । नीलाद्रिनाथव्यतिरिक्तविष्णु-मूर्त्तिस्पर्शनं सर्वपापहरं ।

तथा,—

"लिङ्गस्य दर्शनं पुण्यं दर्शनात् स्पर्शनं (४)वरं" ।

तत्र पठति,—

"अङ्गुष्ठमुच्छ्रितं कृत्वा मुष्टिं बद्ध्वा तु दक्षिणे ।
पिण्डिकायां न्यसेल्लिङ्गमङ्गुष्ठेन स्पृशेत्ततः ॥
उमामहेशमन्त्राभ्यां स्पर्शनं मोक्षकाङ्क्षिणां ।
शिवोमामन्त्रयोगेन स्पर्शनं भूतिमिच्छतां" ॥

(१) नाश्नीया । (२) द्विजोत्तमः ।
(३) अनात्म । (४) परं ।

तथा,—

"गामालभ्य नमस्कृत्य कृत्वा चैव प्रदक्षिणं ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा" ॥

विष्णुपुराणे,—

"स्मृताभिलषिता दृष्टा स्पृष्टा पीतावगाहिता" ।

महाभारतमत्स्यपुराणयोः,—

"स्मरणादेव प्रयागस्य नामसंकीर्त्तनादपि ।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते" ॥

स्कन्दपुराणे,—

"रोपणात्पालनात्सेकात् स्पर्शनाद्दर्शनान्नृणां ।
तुलसी (१)दहते पापं वाङ्मनःकायसंचितं" ॥

प्रातर्मङ्गला(२)रम्भं ।

वामनपुराणे,—

"दूर्वां दधिसर्पिरथोदकुम्भं धेनुं सवत्सां वृषभं सुवर्णं ।
मृद्गोमयस्वस्तिकमक्षतानि लाजामधुब्राह्मणकन्यकाश्च ॥
श्वेतानि पुष्पाणि तथा शमीं च हुताशनं चन्दनमर्कबिम्बं ।
अश्वत्थवृक्षं च समालभेत ततश्च कुर्यान्निजजातिधर्मं" ॥

तथा,—

"अश्वत्थं तीर्थराजं च सेवते न तु संस्पृशेत् ।
अश्वत्थं पङ्गुवारेण तीर्थराजं च पर्वणि" ॥

(१) हरते । (२) लम्भने ।

अत्राश्वत्थवृक्षस्पर्शनं यत्प्रातर्मङ्गलत्वेन विहितं तदतिरिक्तं निषिद्धं। मन्दवारे चान्यदैवस्पर्शनं फलार्थं विधीयते। समुद्रस्य स्पर्शनमपि विहितेतरं निषिध्यते। पर्वणि च तृतीयभागे स्पर्शनविधिः।

तत्र

"सिन्धोः सेतोः सरस्वत्याः सङ्गमात् पुरुषोत्तमात्।
विना पर्व सरित्नाथं स्पृशेदन्यत्र न क्वचित्"॥

तेन पुरुषोत्तमादिव्यतिरिक्तस्थले पर्वव्यतिरेकेण समुद्रस्पर्शनं निषिद्धं। स्नानाङ्गत्वेन समुद्रस्य विधानात् स्नानकालीनस्पर्शनत्वं न निषिध्यते न च स्पर्शननिषेधपरः। अविहितस्पर्शननिषेधपरत्वोपपत्तेः। अहनि हि स्नाननिषेधः स्यात्।

"स्पर्शनाद्बिल्ववृक्षस्य दर्शनाद्वन्दनादपि।
अहोरात्रकृतं पापं नश्यत्येव न संशयः"॥

अस्पृश्यानि। चाण्डालस्पर्शनविण्मूत्रादीनि स्नानाचमनप्रकरणे व्याख्यातानि।

मनुः—

"अनातुरः स्वानि खानि संस्पृशेदनिमित्ततः।
रोमाणि च रहस्यानि सर्वाण्येतानि वर्जयेत्"॥

याज्ञवल्क्यः,—

"गोब्राह्मणानलान्नानि (१)नोच्छिष्टो न पदा स्पृशेत्"।

उच्छिष्टः केनाप्यङ्गेन स्पृशेत्। पदा च शुद्धो न स्पृशेत्।

(१) नोच्छिष्टो न पदा स्पृशेत्।

महाभारते,— असुरविषये लक्ष्मीवाक्यं।

"अपवृत्तं पयोऽश्नन् (१)उच्छिष्टस्य स्पृशन् घृतं"।

तेन दानवेषु नाहं वसामीति सम्बन्धः। उच्छिष्ट इत्यनुवृत्तौ सम्बन्धः।

"न स्पृशेच्च तथा शिरः"।

देवलः,—

"शिरोऽभ्यङ्गा(२)विशेषेण तैलेनाङ्गं विलेपयेत्"। नेतिसम्बन्धः।

महाभारते,—

"शिरःस्नातस्तु तैलेनाङ्गं किंचिदपि स्पृशेत्"। एतच्च स्नानाङ्गत्वेनोक्तं। पुनः स्नातकव्रतमध्ये गणनं प्रायश्चित्तविशेषार्थं। इति लब्धानि स्नातकव्रतानि। अत्र श्रोत्रजानि। श्रव्याश्रव्यभेदेन द्विविधानि। तत्र भगवन्नामश्रवणं सर्वत्र प्रसिद्धं। सामान्यतो विशेषतश्च। महाभारतीयविष्णुनामस्मरणं य इदं शृणुयान्नित्यमित्यादिरूपेण विहितं तत्फलार्थं।

अथ भगवद्गीतामधिकृत्य महाभारते,—

"श्रद्धावाननसूयश्च शृणुयादपि यो नरः।
सोऽपि मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्मणां"॥

एवं,—

"श्रद्धयापि कुरुश्रेष्ठ! श्रुतेन कथितेन च।
गजेन्द्रमोक्षणे नेदं दीर्घमायुरवाप्नुयात्"॥

(१) उच्छिष्टस्य। (२) अवशिष्टेन।

इति विष्णुधर्मे,—

एवं तत्र स्तोत्रश्रवणं। शिवनामग्रहणं शिवस्तोत्रश्रवणं। सूर्यनामश्रवणं। दुर्गानामग्रहणं। मार्कण्डेयपुराणीयदेवीमाहात्म्यश्रवणं।

"श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमं"।

इत्यभिधानात्फलार्थं गणेशस्तोत्रनामश्रवणं च।

अथाश्रव्याणि,—

मार्कण्डेयपुराणे,—

"वेददेवद्विजातीनां साधुसत्यमहात्मनां।
गुरोः पतिव्रतानां च तथार्थं च[१] तपस्विनीं॥
परिवादं न कुर्वीत परिहासेऽपि पुत्रक!।
कुर्वतामविनीतानां न श्रोतव्यं कथंचन"॥

देवलः,—

"गृहे पररहस्यानि नैवोपशृणुयान्नरः"।

यमः,—

"नैव ब्रूयान्नशृणुयाद्दुष्टवाक्यं कथंचन"।

दुष्टवाक्यं, परदोषाभिधायिवाक्यं॥

तथा,—

"ब्राह्मणानां परीवादो [२]निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः"॥

(१) तथा यत्नं तपस्विनां। (२) निन्दार्थाभि।

वायुपुराणे,—

"योगं परिवदेद्यस्तु ध्यानिनं मोक्षकांक्षिणं।
स गच्छेन्नरकं घोरं श्रोतारश्च न संशयः"॥

चाण्डालशपथेषु वराहपुराणे,—

"श्रुत्वा परस्य वाक्यानि यद्भवेन्मर्मभेदना।
तेन पापेन लिप्येऽहं यद्यहं नागमेत्पुनः"॥

इति [१]श्रव्याश्रव्याणि। समाप्तानि श्रोत्रकव्रतानि।

इति श्रीमन्महामहोपाध्यायाग्निचिद्वाजपेयिनरसिंहविरचिते
नित्याचारप्रदीपे तृतीयभागकृत्यं समाप्तम्।

---

(१) श्रोतव्याश्रोतव्यानि।

अथ चतुर्थभागकृत्यम् ।

अत्र च ब्रह्मचारिणो"ऽभ्यङ्गमञ्जनं चाक्ष्णो"रिति मनुना चाभ्यङ्गनिषेधादुक्तरेषां चैतद्विरोधाच्च गृहस्थस्यापि ब्रह्मचारि-धर्मातिदेशादभ्यङ्गनिषेधः प्रतिभाति ।

तन्तु नास्ति,—

"नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्" ।

इति [1]चाङ्गे मलापकर्षणस्नानाभ्यनुज्ञानात् । मलापकर्षणं नाम स्नानमभ्यङ्गपूर्वकमिति व्याख्यानात् ।

दक्षस्मृतौ च,—

"नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा ॥
मलापकर्षणं वाह्यो मन्त्रवत्तु जले स्मृतं ।
सन्ध्यास्नानमुभाभ्यां तु स्नानदेशाः प्रकीर्त्तिताः" ॥

इति नित्यस्नानमध्ये मलापकर्षणस्नानस्य गणनादस्य निरव-काशत्वेन गृहस्थैकधर्मत्वात्तद्विरुद्धब्रह्मचारिधर्मस्याभ्यङ्गनिषेधस्या-नतिदेशः । किं च अष्टम्यादौ तैलाभ्यङ्गनिषेधस्य तद्विहिते तदित-रताभ्यनुज्ञापरत्वे पर्य्युदासत्वेन लक्षणाप्रसङ्गादष्टम्यादावेव दोषा-पत्तेस्तत्प्रायश्चित्तविरोधान्नरकपातस्मृतिविरोधाच्च यद्यपि नान्य-तिथिष्वनुज्ञापरत्वं । तथापि सर्वदा निषेध्यत्वे तिथिविशेषनिषेध-वैयर्थ्यप्रसङ्ग एवान्यथानुपपत्त्या तिथ्यन्तरेऽनुज्ञां सूचयति । न च दोषातिशयार्थत्वेन विशेषनिषेधः सार्थकः ।

(१) शंखेन ।

दोषातिशयकल्पनापेक्षया [1]तर्हि तत्रानुज्ञाकल्पनस्य पूर्वोक्त-युक्तिसाहित्येन लघुत्वादिति गृहस्थस्य नाभ्यङ्गनिषेधः ।

तत्र विष्णुपुराणे,—

"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्वाण्येतानि राजेन्द्र! [2]रविसंक्रमणे न च" ॥
"तैलस्त्रीमांससम्भोगी च सर्वेष्वेतेषु पर्वसु ।
विण्मूत्रभोजनं नाम नरकं प्रतिपद्यते" ॥

अत्र तैलपदस्य तिलप्रभवस्नेहे मुख्यता । सर्षपादौ च । कात्यायनः । तैलप्रत्ययानुशासनस्य महाभाष्यकृता च गौण-प्रयोगेण प्रत्याख्यानात्सर्षपैरण्डस्नेहे मुख्यतैलत्वभावान्यतैलनिषेधे तन्निषेधः । यत्तु पठन्ति,—

"पक्वतैलं गन्धतैलं सार्षपं पुष्पवासितं" ।
वर्ज्यास्वप्यदुष्टं स्यात् द्रव्यान्तरयुतं तथा ॥

तथा,— सार्षपस्य प्रतिप्रसवोऽनुवाद एव । पक्वतैलाभ्यनुज्ञायां दृष्टान्तार्थः । एवं चित्राहस्ताश्रवणर्क्षेषु तैलमित्यपि वामनपुराणीयं तिलप्रभवस्नेहविषयं । तत्तु वृद्धशातातपवचनं,—

"आसप्तमकुलं हन्ति तैलग्रहणमष्टमी" ।

तदष्टम्यां तिलस्नेहस्य दोषातिशयार्थं ।

चतुर्दश्यां तु "आसप्तमं कुलं हन्ति शिरोऽभ्यङ्गे चतुर्दशी"ति वचनात् शिरोऽभ्यङ्गे घृतसर्षपादेरपि निषेधः । न गात्राभ्यङ्गे । वामनपुराणे— "नन्दासु नाभ्यङ्गमुपचरेच्च"। अत्र सर्वस्नेहनिषेधः।

(१) तदितरता । (२) रविसंक्रान्तिरेव च ।

पक्वतैलादेरशक्तावभ्यनुज्ञा। नन्दा प्रतिपत्षष्ठ्येकादश्यः। एवं च षष्ठीषु तैलमिति तैलपदं स्नेहमात्रपरं। दोषातिशयार्थं वा तैलस्य पुनर्निषेधः।

तथा,— सप्तम्यां तैलसंस्पर्शादिषु भार्य्या विनश्यतीति तत्र व्याख्येयं। तत्र तैलभक्षणमपि निषिद्धं।

तथा,—यत्र तैलोपभोगनिषेधस्तत्र भक्षणस्यापि निषेधः।

तथा,—

"मोहात्प्रतिपदं षष्ठीं कुहूरिक्तां तिथिं तथा।
तैलेनाभ्यञ्जयेद्यस्तु चतुर्भिः परिहीयते" ॥

चतुर्भिः, आयुःप्रज्ञायशोवलैः। तेन चतुर्थीनवम्योरपि तैलनिषेधः।

शिष्टाः,—

"पितृश्राद्धे प्रगे स्नाने द्वादश्येकादशीषु च।
सुरास्नानसमं तैलं तस्मात्तैलं विवर्जयेत्" ॥

गारुडे,—

'उपोषितस्य व्रतिनः कृत्तकेशस्य नापितैः।
तावत्श्रीस्तिष्ठति प्रीता यावत्तैलं न संस्पृशेत्" ॥

तथा,—

"[1]हृत्तापकीर्त्तिर्मरणं सुताश्च वित्तस्य नाशो निधनत्वमायुः।
सूर्य्यादिसौरान्तदिनेश्वराणां तैलोपभोगे क्रमशः फलानि" ॥

रविकुजगुरुशुक्रवारेष्वपि निषेधः।

(१) हृता ता।

सदाचारस्तु स्त्रीणामेव वारवर्जनविचारो न पुंसामिति।

यत्तु चिन्तामणौ,—

"पञ्चमी दशमी चैव पूर्णिमा च त्रयोदशी।
एकादशी द्वितीया च द्वयोरपि च पक्षयोः ॥
अभ्यङ्गस्नानपानाद्यै[1]र्योऽत्र तैलं न संस्पृशेत्।
चतुर्णां तस्य वृद्धिः स्याद्धनापत्यवलायुषां" ॥

अत्र पूर्णिमायामपि धनादिकामस्य [2]विधिनिषेधाभावः। निषेधस्तु निष्कामस्य। तत्र चित्रादिनक्षत्रयोगेऽपि विहितत्वादेव न दोषः। पर्वणि हविःशेषमांसभक्षणवत्।

तथा च शिष्टाः पठन्ति,—

"दशम्यां तैलमस्पृष्ट्वा यः स्नायादविचक्षणः।
चत्वारि तस्य नश्यन्ति आयुःप्रज्ञायशोबलं" ॥

तदुपवाससमात्रे नित्यव्रतसिद्धा काम्यव्रतानुष्ठानाभावे [3]बोध्यं।

देवलः,—"शिरोऽभ्यङ्गावशेषेण तैलेनाङ्गं विलेपयेत्"।

नेतिसम्बन्धः। शिरःकार्य्यार्थं पृथगेव तैलमित्यर्थः।

"सर्वदा तु तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः"।

इति वचनान्निषेधाभावाच्च तिलपिष्टेन सर्वदिने स्नाने न दोषः

यत्तु चिन्तामणौ,—

"सप्तमीं चाप्यमावास्यासंक्रान्तिग्रहणेषु च।
धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशेत्" ॥

(१) येऽत्र तैलं न सेवते। (२) विधिवद्वलान्निषेधाभावः।
(३) बोद्धव्यं।

तथा,—सर्वदा स्नानविधिपुण्यतावाक्यबलाद्धनपुत्रकलत्रकामस्य काम्यो निषेधः ।

यत्तु,—

"प्रतिपद्यनपत्यः स्यात् द्वितीयायामपत्नीकः ।
दशम्यामधनं स्नानं सर्वं हन्ति त्रयोदशी" ॥

तदारोग्यस्नानविषये राजमार्त्तण्डोपसंहारात्परमेव ।

शिष्टाः पठन्ति,—

"श्रीकामः सर्वदा स्नानं कुर्य्यादामलकै(१)र्नरः ।
तुष्ट्यामलकैर्विष्णुरेकादश्यां विशेषतः ॥
गङ्गास्नानाधिका धात्री प्रोक्ता माधववासरे ।
विघ्नानि नैव जायन्ते धात्रीस्नाने न वै नृणां" ॥

अत्र विशेषः,—

"नवम्यां दर्शसप्तम्यां संक्रान्तौ रविवासरे ।
चन्द्रसूर्य्योपरागे च स्नानमामलकैस्त्यजेत्" ॥

एतच्च श्रीकामनाभावेऽवगन्तव्यं । इदं च मलापकर्षणस्नान-स्यावश्यकर्त्तव्यत्वात्तैलनिषेधदिने तिलपिष्टेनामलकपिष्टेन वा बहि-रुद्धृतोदकेन मलापकर्षणस्नानं कृत्वा माध्याह्निकस्नानारम्भः कार्य्यः ।

दक्षः,—

"चतुर्थे च यथा भागे स्नानार्थं मृदमाहरेत् ।
तिलपुष्पकुशादीनि स्नानं चाकृत्रिमे जले" ॥

(१) द्विजः ।

तत्र स्नानदेशाः प्रातःस्नानप्रकरणेनोक्ताः । नदीषु देवखाते-ष्वित्यादिना । तदुपलक्षणमकृत्रिमे जल इति ।

कात्यायनः,— अतो नित्यं स्नानं नद्यादौ मृद्गोमययवकुश-तिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे प्रतिष्ठाप्य प्रक्षाल्य पाणिपादं कुशाग्रग्रहैः बद्धशिखायज्ञोपवीती चाचम्यो(१)रुगृह्णाति तोयमामन्त्युवर्ज“येते शतमिति” “सुमित्र्या न” इत्यपामञ्जलि-मादाय “दुर्मित्र्या” इति द्वेष्यं प्रतिषिञ्चेदनभिसहितस्तूत्तरस्यां दिशि कटिवस्तूरुजंघे चरणौ करौ मृदा तिस्रः (२)प्रक्षाल्या-चमनमस्योदकमालभतेऽङ्गानि मृदेदं विष्णुरिति सूर्य्याभिमुखो मज्जेदापो अस्मानिति स्नात्वा (३)दिवाभ्य इत्युन्मज्य निमज्ज्योन्म-ज्ज्याचम्य गोमयेन विलिम्प्य “मानस्तोक” इति ततोऽभिषिञ्चेदिमं “मेवरुण” इति “तिसृभिर्मापउदुत्तमं मुञ्चन्ति” मावमृथेत्यन्ते चैतन्निमज्ज्योन्मज्ज्याचम्य दर्भैः पावयेत्“आपोहिष्ठेति” तिसृभि-रिदमापोहविष्यति “देवीरापो” इति द्वाभ्यां । “अपोदेवा-द्रुपदा” “दिव” “शन्नोदेवी” अपागुं समपोदेवि पुनन्तु मे नवभि-स्त्वित्पतिर्मेत्योंकारेण व्याहृतिभिर्गायत्र्यादावन्ते चान्तर्जलेऽघमर्षणं त्रिरावर्त्तयेद्द्रुपदां वायं गौरीत्यृच(४) वा प्राणायामं वा सशिर-स्कमोमिति विष्णोर्वा स्मरणं ।

योगी याज्ञवल्क्यः,—

"मृद्गोमयतिलान् दर्भान् पुष्पाणि सुरभीणि च ।

(१) गृह्णाति । (२) प्रक्षाल्याचम्य नमस्योदकं ।
(३) उदिदाभ्य । (४) गौरिति वा ऋचं वा ।

आहरेत् स्नानकाले तु स्नानार्थं प्रयतः शुचिः ॥
गत्वोदकान्तं विक्त[1]तुमास्थाप्यैतत् पृथक् चितौ ।
त्रिधा कुर्य्यान्मृदन्तां तु गोमयं च विचक्षणः ॥
अधमोत्तममध्यानामङ्गानां क्षालनं तु तैः ।
भागैः पृथक् पृथक् कुर्य्यात् क्षालनं मृदसङ्करः ॥
अद्भिर्मृद्भिश्च चरणौ प्रक्षाल्याचम्य वै शुचिः ।
उरुं हीतिरुपस्तोयमुपस्थाय प्रदक्षिणं ॥
आवर्त्तयेत्तदुदकं ये ते शतमिति ह्यृचा ।
सुमित्र्या न इत्यञ्जलिमुद्धरेद्दैवतं स्मरेत् ॥
सुमित्र्या न इति द्वेष्यां ध्यायं चापः प्रसेचयेत् ।
अद्भिर्मृद्भिश्च गात्राणि क्रमशः स्ववनेजयेत् ॥
एकया तु शिरः क्षाल्य द्वाभ्यां नाभेरधो[2]ऽपि च ।
कटिवस्त्युरुजंघे च चरणौ च त्रिभिस्त्रिभिः ॥
प्रक्षाल्य हस्तावाचम्य नमस्कृत्य जलं ततः ।
यत्किंचिदिति मन्त्रेण नमस्येत्प्रयताञ्जलिः ॥
यत्र स्नाने[3] तु यत्तीर्थं नदी पुण्यतमा तु या ।
तां ध्यायेत् मनसा वाह्यादन्यत्रेष्टं विचिन्तयेत् ॥
गङ्गादिपुण्यतीर्थानि कृत्रिमादिषु संस्मरेत् ।
उदुत्तममितिविशेषात्तज्जलं प्राङ्मुखः शुचिः ॥
येन देवाः पवित्रेति कुर्य्यादालभनं त्रिभिः ।

(१) विविक्त- । (२) रथोपरि ।
(३) स्थाने ।

महाव्याहृतिभिः पश्चादाचामेत् प्रयतोऽपि सन् ॥
आलभेत मृदङ्गानि इदं विष्णुरिति त्वृचा ।
भास्कराभिमुखो मज्जेदापो ह्यस्मानिति त्वृचा ॥
ततोऽवघृष्य गात्राणि निमज्योन्मज्ज्य वै पुनः ।
आचम्य गोमयेनापि मानस्तोक्या समालभेत् ॥
ततोऽभिषिंचेन्मन्त्रैस्तु वारुणैश्च यथाक्रमं ।
इमं मे वरुण इत्यृग्भ्यां त्वन्नः सत्वन्न इत्यपि ॥
आप उदुत्तममिति सुञ्चलावभृथेषु च ।
अभिषिच्य तदात्मानं निमज्ज्योन्मज्ज्य वै पुनः ॥
दर्भैस्तु पावयेन्मन्त्रैरलिङ्गैः पावनैः शुभैः ।
आपोहिष्ठेति तिसृभिरिदमापोहविश्वतौ ॥
देवीराप इति द्वाभ्यामापोदेवा स इत्यृचा ।
द्रुपदादिव इत्यृचा शन्नोदेवीरपां रसं ॥
आपोदेवी पावमान्यः पुनं [1]वादात्वतेन च ।
चित्पतिर्मेति च शनैः पात्यात्मानं समाहितः ॥
जलमध्य स्थितो विप्रः शुद्धभावे हरिं स्मरन् ।
ॐकारेण व्याहृतिभिर्गायत्र्या च समाहितः ॥
आदावन्ते च कुर्वीत अभिषेकं यथाक्रमं ।
अपां मध्ये स्थितस्यैवं मार्जनं च विधीयते ॥
अन्तर्जले जपन्मग्नस्त्रिकृत्वमघमर्षणं ।
द्रुपदां वा त्रिरावृत्य अयं गौरितिवत्त्यृचं ॥

(१) पुनन्त्वाद्यात्वृचो न वा ।

हंसः शुचिषदित्यृचं चिरावृत्य जपेदथ ।
अन्यानि चैव सूक्तानि स्मृतिदृष्टान्यनुस्मरेत् ॥
सव्याहृतिं सप्रणवां गायत्रीं त्रिर्जपेदथ ।
आवर्त्तयेद्वा प्रणवं स्मरेद्वा विष्णुमव्ययं ॥
विष्णुरायतनं ह्यापः स ह्यपां पतिरुच्यते ।
तस्यैव सूनवस्त्वेतास्तस्मात्त्वं ह्यप्सु संस्मरेत् ॥
नरादपः प्रसूता वै तेन नारा इति स्मृतः ।
ता एवास्यायनं यस्मात्तेन नारयणः स्मृतः ॥
यो हि व्रतीनां देवानां यमस्य नियमस्य च ।
भोक्ता च यज्ञतपसां योगिनां ध्येय एव च ॥
ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ।
प्रायश्चित्तेषु सर्वेषु दुष्कृतान्मुच्यते पुमान् ॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति स्मृतिः ॥
तद्विष्णोरिति मन्त्रेण मज्जेदप्सु पुनः पुनः ।
मृद्भिरद्भिश्च कर्त्तव्यं शौचमादौ यथाविधि" ॥

इति शङ्खवचनात् स्नानस्य प्रागेवाधमोत्तममध्यमाङ्गक्षालनं मृदा कृत्वा गोमयेनापि कर्त्तव्यं एतदनन्तरमेव [१]प्रभाते विद्यमानेत्येवं स्नानोपक्रमविधानादिति वदन्ति । तेन एकया तु शिरःक्षालनं इत्यादिक्षालनानन्तरं स्नानमध्यगतमत्यवगन्तव्यं । "ततोभिषिञ्चेन्मन्त्रैस्तु वारुणैश्च यथाक्रम"मित्यत्र त्वं नः सत्वं न

(१) प्रभूते ।

इत्यनयोरग्निवरुणत्वाच्छत्रिन्यायेन वारुणावारुणसमुदाये वारुणशब्दः, क्रमकथनादेव मन्त्रक्रमप्राप्तेर्यथाक्रममिति प्रतिवचनं । अभिषेकस्य प्रति मन्त्रं भेदकथ[१]नाय, अन्यथा हि मन्त्रवक्तृत्वस्य विवक्षितत्वादृष्टमन्त्रकरणक एवाभिषेकः स्यात् ।

यथाक्रमं इत्यस्य लिङ्गस्यानन्यगतत्वात्तु तद्भेदः । सूर्यस्याभिमुखो मज्जेदिति तड़ागादिपरं ।

स्रवत्स्रोतः स्थित इति नरसिंहपुराणवचनादिति लक्ष्मीधरः ।

शङ्खः,—

"क्रियास्नानं प्रवक्ष्यामि यथावदनुपूर्वशः ।
मृद्भिरद्भिश्च कर्त्तव्यं शौचमादौ यथाविधि ॥
जले निमग्नस्तून्मज्ज्य उपस्पृश्य यथाविधि ।
तीर्थस्यावाहनं कुर्य्यात्तत्प्रवक्ष्याम्यतः परं ॥
प्रपद्ये वरुणं देवमम्भसां पतिमुर्ज्जितं ।
याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥
तीर्थमावाहयिष्यामि सर्वाप[२]द्विनिसूदनं ।
सान्निध्यमस्मिन् वै तोये भजतां मदनुग्रहात्" ॥

अयं चावाहनमन्त्रः । याज्ञवल्कीये स्नानेऽन्तरानुक्ते[३]रवगन्तव्यं साकांक्षत्वात् । बौधायनः,— "हस्तौ प्रक्षाल्य कमण्डलुं मृत्पिण्डं च परिगृह्य तीर्थं गत्वा त्रिः पादौ प्रक्षालयेत्त्रिरात्मानमथ हैति

(१) भेदज्ञापनाय । (२) सर्वाघविनिसूदनं ।
(३) याज्ञवल्क्यस्नानेष्वावाहने मन्त्रान्तराण्युक्तेरवगन्तव्यमाकांक्षितत्वात् ।

ब्रुवते श्मशानमपोदेव गृहं गोष्ठं चैत्रं च ब्राह्मणाः [१]प्रक्षाल्य तु पादौ नान्तः प्रवेष्टव्यं।

यथाऽम्भोभिरभिपद्यते,

"हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचत।
यन्मयाभुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः॥
यस्मान्मे मनसा वाचा कर्मणा दुष्कृतं कृतं।
तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनः पुनः"॥

तत्र पादप्रक्षालनार्थं जलप्रवेशमन्त्रस्य। साकांक्षत्वादेव याज्ञवल्क्यस्नानविधिना गृह्यते।

पद्मपुराणे,—

"नैर्मल्यं भावशुद्धिश्च विना स्नानं न विद्यते।
तस्मान्मनोविशुद्ध्यर्थं स्नानमादौ विधीयते॥
अनुवृत्तैरवृत्तैर्वा जलैः स्नानं समाचरेत्।
[२]इदं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित्॥
ॐ नमो नारायणायेति मूलमन्त्र उदाहृतः।
दर्भपाणिस्तु विधिना ह्याचान्तः प्रयतः शुचिः॥
चतुर्हस्तसमायुक्तं चतुरस्रं समन्ततः।
प्रकल्प्यावाहयेद्गङ्गामेभिर्मन्त्रैर्विचक्षणः॥
विष्णोः पदप्रसूतासि वैष्णवी विष्णुपूजिता।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात्॥
तिस्रःकोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत्।

(१) मुखं। (२) तीर्थं।

दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवि!॥
नन्दिनीत्येव ते नाम देवेषु नन्दिनीति च।
नन्दा पृथ्वी च शुभगा विश्वकाया शिवाशिता॥
विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी।
क्षेमा च जाह्नवी चैव शान्ता शान्तिप्रदायिनी॥
भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी।
गङ्गे देवि नमस्तुभ्यं प्रसीद परमेश्वरि!।
एतानि पुण्यनामानि स्नानकाले प्रकीर्त्तयेत्॥
भवेत् सन्निहिता तत्र गङ्गा त्रिपथगामिनी।
सप्तवाराभिजप्तेन करसंपुटयोजितः॥
मूर्द्ध्नि कुर्य्याज्जलं भूयः त्रिश्चतुः पञ्च सप्त वा।
स्नानं कुर्य्यान्मृदा [१]तेन आमन्त्र्य तु विधानतः॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना।
नमस्ते सर्वलोकानां प्रभवारिणि सुव्रते"॥

अयं स्नानविधिर्वेदमन्त्रशून्यत्वात् सर्ववर्णसाधारणः। शूद्रस्यापि पुराणमन्त्रेण ग्रहणाधिकारादित्याहुः। वस्तुतस्तु "तूष्णीमेव हि शूद्रस्य स नमस्कारकं स्मृत"मिति वचनान्नम इत्युक्त्वा मज्जनमात्रं शूद्रस्येत[२]लक्ष्मीधरः। अत्र तीर्थकल्पनसाकांक्षत्वाद् याज्ञवल्कीय-

(१) तत्र। (२) शूद्रस्येति।

स्नानेऽपि ग्राह्यं। गङ्गाश्रवण[१]मन्त्रोऽपि तीर्थश्रवणे प्रवर्त्तते। सप्तवारं जलाभिषेकस्त्वभिषेकान्तरादिरस्त्वलाच्च प्रवर्त्तते अनुक्तमन्त्रके मृद्ग्रहणे अश्वक्रान्ते इत्ययमपि मन्त्रः प्रवर्त्तत इति वदन्ति।

वशिष्ठः,—

"अरुग्मिर्वाचयेत् स्नानं मध्याह्नात् प्राग्विशेषतः।
प्रयतो मृदमादाय दुर्गमाचं[२] च गोमयं॥
स्थापयित्वा तथाचम्य ततः स्नानं समाचरेत्।
मृदैकया शिरः चाल्य द्वाभ्यां नाभेरथोपरि॥
अधश्च तिसृभिः कायमधः पादौ तथैव च।
प्रचाल्य सर्वकायं च द्विराचम्य यथाविधि॥
ततः संमार्जनं कुर्य्यान्मृदा पूर्वं तु मन्त्रवित्।
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे॥
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं।
उद्धृतासि वराहेण कृष्णेन शतबाहुना॥
मृत्तिके त्वां प्रगृह्णामि प्रजया च धनेन च।
मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमन्त्रिता॥
मृत्तिके जहि नः सर्वं यन्मया दुष्कृतं कृतं।
मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं॥
पुनश्च गोमयेनैवमग्रमग्रमिति ब्रुवन्।
अग्रमग्रं चरन्तीनामौषधीनां रसं वने॥

(१) गङ्गास्मरणमन्त्रोऽपि। (२) दूर्वामार्द्रं।

[१]आसामृषभपत्नीनां [२]पतितं कायशोधनं।
[३]तस्मै रोगांश्च शोकांश्च पापं मे नुद गोमय!॥
काण्डात्काण्डादिति द्वाभ्यां दूर्वयार्द्रमुपस्पृशेत्।
कृत्वैवं मार्जनं मन्त्रैरश्वक्रान्तादिभिस्ततः॥
"ये ते शत"मिति द्वाभ्यां तीर्थान्यावाहये[४]त्पुनः।
कुरुक्षेत्रगयागङ्गाप्रभासपुष्कराणि च"॥

अत्र मध्याह्नात् प्रागिति चतुर्थभागोपलक्षणं, अतएव क्रमविधानमात्रं स्नानादीनां न कालविधानमिति भ्रमो न कर्त्तव्यः। गोमयालम्भनकाले क्रियमाणानुवादिमन्त्रो अग्रमग्रमिति याज्ञवल्कीये गोमयालम्भे साकांक्षत्वात्प्रवर्त्तते मानस्तोक इति मन्त्रस्य मन्त्रकरणमन्त्रत्वेन विरोधाभावात्। काण्डादिति द्वाभ्यां दूर्वामार्जनमधिकत्वात् याज्ञवल्कीये वैकल्पिकं।

याज्ञवल्क्यः,—

"सन्ध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदा"।

तथा,—

"पूर्वा सन्ध्या तु गायत्री सावित्री मध्यमा स्मृता"।

मध्यमां सन्ध्यामभिधाय शङ्खः,—

"एष एव विधिः प्रोक्तः सन्ध्ययोश्च द्विजातिषु।
तस्यां मध्यमसन्ध्यायां सावित्री द्विजसत्तम!॥
युवतीं शुक्लवर्णां च चारुरूपां चतुर्भुजां।

(१) तासां। (२) पवित्रं।
(३) त्वं मे। (४) ततः।

शुक्लवासद्वयोपेतां तार्च्यस्कन्धगतां शुभां ॥
शङ्खचक्रगदापद्मधारिणीं विष्णुदैवतां।
विष्णुलोकनिवासां तामायान्तीं सूर्य्यमण्डलात् ॥
रक्षा भवति गायत्री सावित्री शुक्लवर्णिका।
इति अत्र सूर्य्यमण्डलादिति सप्तम्यर्थे पञ्चमी"।

योगीयाज्ञवल्क्यः,—

"आचम्य पश्चादात्मानं चिराचम्य शनैरमून्[1]।
अथो[2]पतिष्ठेदादित्य[3]मर्द्धं पुष्पान्वितं जलं ॥
प्रक्षिप्योदयमुदुत्यं चित्रं तच्चक्षुरित्यपि।
हंसः शुचिषदेतानि पावनानि शुभानि च ॥
एतज्जपेदूर्द्ध्वबाहुः सूर्य्यं वीक्ष्य समाहितः।
गायत्र्या च यथाशक्ति चोपस्थाय दिवाकरं ॥
विभ्राडित्यनुवाकेन सूक्तेन पुरुषस्य च।
शिवसंकल्पेन तथा मण्डलब्राह्मणेन च ॥
दिवाकीर्त्त्यैश्च सौरैश्च मन्त्रैरन्यैश्च शक्तितः।
जपयज्ञो हि कर्त्तव्यः सर्व[4]यज्ञप्रणीतकैः ॥
पवित्रैर्विविधैश्चान्यैर्गुह्योपनिषदा तदा।
अध्यात्मविद्या विविधा जप्तव्या जपसिद्धये।
प्रदक्षिणं समासाद्य नमस्कृत्योपवेश्य च ॥

(१) रसून्। (२) अथोपदिष्टे।
(३) मूर्द्धं। (४) वेद।

दर्भेषु दर्भपाणिः स्यात् प्राङ्मुखस्तु कृताञ्जलिः।
स्वाध्यायन्तु यथाशक्ति ब्रह्मयज्ञार्थमाचरेत् ॥
आकेशादानखाग्रे च परमं तप्यते जपः।
यः श्रद्धया द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहं ॥
आदावारभ्य वेदे तु स्नात्वोपर्य्युपरिक्रमात्।
यदधीतेऽन्वहं शक्त्या स स्वाध्याय इति स्मृतः" ॥

तत्र मध्याह्नसन्ध्यायां जलाञ्जलि[1]प्रक्षेपपुष्पान्वितत्वनियमः। यत्प्रदक्षिणं [2]प्रक्रामति तेन पाप्मानमवधुन्वन्तीति तैत्तिरीयश्रुतौ वाक्यशेषे उद्यन्तमस्तं यातुमितिश्रवणान्मध्याह्नसन्ध्यायां प्रदक्षिणं समन्त्रकं नासीदित्याहुः। तत्राप्यतिदेशात्प्रवर्त्तते इत्यन्ये शिव-संकल्पश्च मध्यान्वितप्रसिद्धऋक्षट्कं। मण्डलब्राह्मणं यद्येतन्मण्डलं तपतीत्यादिकाण्वप्रसिद्धं। दिवाकीर्त्त्यः। रुद्राध्यायादिमन्त्रा-अध्येतृप्रसिद्धाः।

सौराः। कदाचनस्तरीरसि। कदाचनः प्रयच्छसि। यज्ञो देवानामिति त्रयो ग्राह्याः। अन्ये पवित्रमन्त्राः। अघमर्षणप्रभृतयः। गुह्योपनिषदाः। साक्षाद्ब्रह्मप्रतिपादकवेदभागेन। अध्यात्मविद्या [3]द्विविधाः। सगुणब्रह्मवरापि। अत्र जपयज्ञपदं स्तुतिपरं। आदावुपस्थानाभिधानात्। दर्भपाणिः पवित्रोपग्रहव्यतिरिक्त-दर्भत्रयहस्तः।

प्रदक्षिणनमस्कारोपवेशनादिब्रह्मयज्ञाङ्गं। तेन कालान्तरे

(१) प्रक्षिपेत्। (२) प्रक्रमन्ति।
(३) विविधाः।

ब्रह्मयज्ञे । अत्र न भवति । यत्र कर्त्तव्यस्तत्र भवति । पैठीनसिः:— सावित्र्या मानसेन स्वाध्यायेन जपो व्याख्यायते । जपयज्ञस्य । जपः । इतरमन्त्रजपः । जपयज्ञो ब्रह्मयज्ञः । यथा स्वाध्याये मानसो सावित्र्या इति कर्त्तव्यता फलं च । तथा ब्रह्मयज्ञेऽपीति । कात्यायनः । प्रदक्षिणीकृत्य नमस्कृत्योपविशेद्दर्भेषु दर्भपाणिः स्वाध्यायं च यथाशक्त्या वारभ्य वेदं । आपस्तम्बः । तस्य विधि(१)रकृतप्रातराश उदकान्तं गत्वा प्रातः शुचौ देशे अधीयीत । यथा । स्वाध्यायमुत्सृजन् वाचा मनसा वाऽनध्याये । यदनधीतं तत्र जानन् वाचाधीयात् । मनसाऽनध्याये तैत्तिरीयश्रुतौ ब्रह्मयज्ञेन यक्ष्यमाणः । प्राच्यां दिशि ग्रामाद्गच्छति । दर्श उदीच्यां प्रागुदीच्यां वोदितस्त्वादित्ये दक्षिणत उपनीयोपविश्य हस्ताववनेनिज्य त्रिराचामेत् द्विः परिमृज्य सकृदुपस्पृश्य शिरश्चक्षुषा नासिके श्रोत्रे हृदयमालभ्य यत्त्रिराचामति तेन ऋचः प्रीणाति यद्द्विः परिमृजति । तेन यजुंषि यत्सकृदुपविशति यत्सकृदुपस्पृशति । तेन सामानि । यत्सव्यं पाणिपादौ प्रोक्षति । यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभते । ते अथर्वाङ्गिरसो ब्राह्मणानितिहासानि पुराणानि कल्पनगाथान् नारायणं सा प्रीणाति ।

दर्भाणां बहूपास्तीर्योपस्थं कृत्वा प्रागासीनः स्वाध्यायमधीयीत । तथा तत्रैव, दक्षिणोत्तरौ पाणिपादौ कृत्वा स पवित्रावोमिति प्रतिपद्यते । तद्वै यजुस्त्रयीं विद्यां प्रत्येषा वाक् तत्

(१) रभुत् ।

परमक्षरं । यथा भूर्भुवः स्वरित्यादिह्यै तद्वै वाचः सत्यं यदेव वाचः सत्यं तत्संयुक्ताथ सावित्रीं त्रिरन्वहगच्छोर्द्धशोनवानं । सविताश्रियः प्रसविताश्रियमवाप्नोत्यथो प्रमातदेव प्रतिपदाच्छन्दाꣳसि प्रतिपद्यते । ग्रामे मनसा स्वाध्यायमधीयीत । दिवा नक्तं वाद्स्माशौचाह्नेय उतारण्ये उत वाचोतिष्ठन्नुतासीन उत शयानोऽधीयीतैव स्वाध्यायं तपस्वी पुण्यो भवति य एवं विद्वान् स्वाध्यायमधीते । नमो ब्रह्मणे, नमोऽग्नये, नमः पृथिव्यै, नम ओषधीभ्यो, नमो वाचे, नमो वाचस्पतये, नमो विष्णवे, नमो बृहते, करोमि मध्यन्दिने प्रबलमधीयीत । नमो ब्रह्मणे इति परिधायतिरन्वाह उपस्पृश्य गृहाणेति ततो यत्किंचिद्ददाति सा दक्षिणा । तत्र ग्रामे मनसाऽधीयीतेति विशेषः । अरण्ये उच्चैरित्यनुवादः ; रात्रौ मनसा वाचा वेति विकल्पः । रात्रिरपि ब्रह्मयज्ञस्य एकः कालः ; शेषं प्रयोगकाले व्याख्यास्यामः । स चार्वाक् तर्पणात्कार्य्यः । पश्चाद्वा प्रातराहुतेः । वैश्वदेवावसाने वा, नान्यत्रोक्तनिमित्तत्वादिति छन्दोगपरिशिष्टात्कालत्रयं स्मृत्युक्तं, रात्रौ देव्याः कालः स्मृत्युक्तः, शतपथश्रुतिः,— अथ ब्रह्मयज्ञः । स्वाध्यायो वै ब्रह्मयज्ञः । यावन्तꣳ वात्वा इमां पृथिवीं वित्तेन पूर्णां ददत् लोकं जयतीति तावन्तं । जयति भूयाꣳस चाक्षय्यं य एवं विद्वानहरहः । स्वाध्यायमधीते तस्मात् स्वाध्यायोऽध्येतव्यः ।

पय-आहुतयो हवा(१) एता देवानां यदृचः स य एवं विद्वानृचोऽहरहः स्वाध्यायमधीते पय-आहुतिभिरेव तद्देवाꣳस्तर्प-

(१) हवा ।

यति[१] योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः संपद्भिर्घृतकुल्यामधुकुल्यापितृस्वधामभिवहन्ति ।

आज्याहुतयो ह वा एता देवानां यद्यजूंषि स य एवं विद्वान् यजूंष्यहरहः स्वाध्यायमधीते आज्याहुतिभिरेव तद्देवांस्तर्पयति त एनं तृप्ता-इत्यादित्यमानं[२]। एवं सोमाहुतयो ह वा एष देवानां य सामानि, स य एवं विद्वान् सामान्यहरहः स्वाध्यायमधीते सोमाहुतिभिरेव तद्देवांस्तर्पयति ; त एनं तृप्तास्तर्पयन्ति इत्यादिमानं । मेद-आहुतयो ह वा एता देवानां यदथर्वाङ्गिरसः स य एवं विद्वानथर्वाऽङ्गिरसोऽहरहः स्वाध्यायमधीते मेद आहुतिभिरेव तद्देवांस्तर्पयति ; त एनं तृप्तास्तर्पयन्तीत्यादि समानं । मध्वाहुतयो ह वा एता देवानां यदनुशासनानि विद्यावाक्ये वाक्यमितिहासपुराणं गाथाम[३]राशंस इत्यादि । तथा, स चेदपि प्रबलमिव न शक्नुयादप्येकं वेदपदमधीयीतैतत्तथाभूतेभ्यो न हीयते, तथा, यदि ह वा अप्यभ्यक्तोऽलंकृतः सुहितः सुखे शयने शयानः स्वाध्यायमधीत आहैव[४] स नखाग्रेभ्यस्तप्यते [५]यदथवा अयं छन्दसः स्वाध्यायमधीते न तेन हैवास्य यज्ञक्रतुनेष्टं भवति, तथा, तस्मादप्यृचं वा यजुर्वा साम वा गाथां वा कुम्भ्यां[६] वाभिव्याहरेद्व्रतस्य व्यवच्छेदाय, अतः पय-आहुतिभिरेव तद्देवांस्तर्पय इत्यादेरथवा[७]हत्वं, न च रात्रिसत्रवत्फलमात्रे यो निर्देशादि-

(१) त-एनं तृप्तास्तर्पयन्ति । (२) इत्यादिमानं ।
(३) न— । (४) आं हव । (५) यद्यदाहं ।
(६) पुण्यां वा । (७) रर्थवाहत्वं ।

त्यर्थ[१]वादमेव फलं स्यादिति वाच्यं, पुरोडाशनिष्पत्तिद्वारा क्रतुफलनिराकांक्षप्रथनादेर्यज्ञपतिमेव प्रजया पशुभिश्च प्रथयति इत्याद्यर्थवादोक्तफलानाकांक्षवत् दृष्टरूपक्रतुज्ञानाभ्यासद्वारा क्रतुफलसिद्धिर्निराकांक्षत्वेन क्रतुपरभागाध्ययनस्यार्थवादोक्तं तु फलाकांक्षाभावात् । तदुक्तं भट्टाचार्य्यैः,—

"कर्माभ्यासानुसन्धानं विध्यर्थश्चात्र गम्यते," इति ।

यत्त्वश्वमेधादिभागस्य ब्राह्मणेनाध्ययनं तस्यादृष्टकल्पनावश्यकत्वेन तेन तेनेहैवास्य यज्ञक्रतुनेष्टं भवतीति क्रतुफलमेव स्वल्पतरं कल्प्यत इति न घृतकुल्यादि फलं । यद्वा का ते च वाचनं न ह्यविद्वान् विहितो भवतीत्युक्तदिशा ऋत्विग्विद्वत्ताया अपि कर्माङ्गत्वात् कर्मविधिभिस्तस्याप्यपेक्षितत्वेनार्त्विज्यार्थं ब्राह्मणस्याश्वमेधादितुल्यब्रह्मयज्ञाभ्यासः । अथ पश्वादीनां कथंचिदपि दृष्टार्थासम्भवेन तदध्ययनब्रह्मयज्ञस्यापि क्रतुफलमेव किंचिदर्थफलं कल्प्यते, तत्र फलमात्रे यो निर्देशादिति न्यायात्, न चैकस्य विधेः पुरुषभेदबोधकत्वमदृष्टतरं । प्रारब्धकाम्यस्य वैगुण्ये समापनविधेः तत्फलकामं प्रति तत्फलबोधकत्वमन्यपापक्षयफलं प्रति बोधकत्वमिति भट्टाचार्य्यैरेवोक्तत्वात् नानाशाखीयनानाविधानात् कस्यचित् प्रतिफलभेदबोधकत्वाच्चेति ।

याज्ञवल्क्यः,—

"वेदाथर्वपुराणानि सेतिहासानि शक्तितः ।

(१) इश्रुते — ह्यनुमानं— स्यादित्युक्तं । निशार्थवादिकमेकफलं स्यादिति वाच्यं ।

जपयज्ञार्थसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्" ।

एवं क्रमेण वेदाध्ययनशक्तो "ब्रह्मयज्ञे जपन् सूक्तं पौरुषं चिन्तयन् हरिं" इति तावन्मात्रस्य जपः ।

अन्यत्र,—

"अनुष्टुप् त्रिष्टुप् गायत्री विज्ञेया सा शताक्षरा ।
शताक्षरां समावर्त्त्य चतुर्वेदफलं लभेत्" ॥

अनुष्टुप् त्र्यम्बकः, त्रिष्टुप् जातवेदाः ।

याज्ञवल्क्यः,—

"गायत्रीमि(१)त्यधिकृत्य विज्ञेया सा शताक्षरा ।
शताक्षरां समावर्त्त्य चतुर्वेदफलं लभेत्" ॥

बौधायनः,—

"प्रणवो व्याहृतयः सावित्री(२)त्येते पञ्च ब्रह्मयज्ञा अहरहर्ब्राह्मणं किल(३) पावयन्ति," आपस्तम्बः,—"भूर्भुवः, स्वः, सत्यं तपः श्रद्धायां जुहोमीत्येते नैवास्य तदहः स्वाध्यायः समाप्तो भवति," आथर्वणीयतापनीयश्रुतौ,—"यः प्रणवमधीते स सर्वमधीते एते सर्वे अशक्तस्य कल्पाः । तर्पणं, शातातपः,—

"तर्पणं तु शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः ।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमं" ॥

शुचिर्मन्त्रस्नानादिनापीति लक्ष्मीधरः । एवं प्रधानतया तर्पणमुक्तं प्रत्यहमिति वचनान्नित्यं ।

(१) गायत्रीमधिकृत्य ;—"सोंकारा चतुरावृत्ता— ।
(२) सावित्रीत्येषां च— । (३) किल्विषात् ।

मनुशातातपयाज्ञवल्क्याः,—

"यदेव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः ।
तेनैव सर्वमाप्नोति पितृयज्ञक्रियाफलं" ॥

तर्पणाधिकारे छन्दोगपरिशिष्टे,—

"छायां यथेच्छेच्छरदातपार्त्तः,
पयःपिपासुः क्षुधितो यथान्नं ।
बालो जनित्रीं जननी च बालं,
योषित् पुमांसं पुरुषश्च योषां ॥
तथा सर्वाणि भूतानि स्थावराणि चराणि च ।
विप्रादुदकमिच्छन्ति सर्वे ह्युदककाङ्क्षिणः ॥
तस्मात् सदैव कर्त्तव्यमकुर्वन् महतैनसा ।
युज्यते ब्राह्मणः कुर्वन् सर्वमेतद्भवन्ति हि" ॥

विष्णुः,—

"स्नातस्त्वार्द्रवासा देवर्षिपितृतर्पणमम्भस्स्थ एव कुर्य्यात् परिवर्त्तितवासास्तीर्थतीरमुत्तीर्य्य" ।

पद्मपुराणे,—

"देवान् ब्रह्म ऋषीन् सर्वान् तर्पयेदक्षतोदकैः" ।

अक्षता यवाः,—

यदाभि(१)तर्पयेद्देवानिति छन्दोगपरिशिष्टात् ।

शंखलिखितौ,—"नेष्टकाचिते पितॄंस्तर्पयेत् ।

(१) अद्भिः ।

स्नायी तड़ागोदकपानकूपेषु पंच त्रीन् पिण्डानुद्धृत्य देवपितॄंस्तर्पयेत्" ।

उशनाः,—

"न वेष्टितशिराः कृष्णकाषायवाससा वा पितृतर्पणं कुर्य्यात्"।

शंखः,— "स्नातः कृतजपोऽन्तर्जानुरुदङ्मुखस्य दिव्येन तीर्थेन देवानुदकेन तर्पयेत्" ।

तथा,—

"विना रूप्यसुवर्णेन विना ताम्रमयेन वा ।
विना दर्भैश्च मन्त्रैश्च पितॄणां नोपतिष्ठते ॥
सुवर्णरजताभ्यां तु खड्गेनोदुम्बरेण वा ।
दत्तमक्षयतां याति पितॄणां तु तिलोदकं ॥
हैमेन सह यद्दत्तं क्षीरेण मधुनाथवा ।
तदप्यक्षयतां याति पितॄणां तु तिलोदकं" ॥

अत्र सौवर्णेन पात्रेण रजतौदुम्बरखड्गेन पात्रेण शङ्खेनाप्युदकं पितृतीर्थं स्पृशन् दद्यादिति शङ्खेनैवापीत्यभिधानात्। सुवर्ण-रजत-ताम्रखड्गानां प्रत्येकं समस्तेन वा यथासम्भवमङ्गत्वं मधुक्षीरचन्दनानां गुणफलार्थेन तर्पणसम्बन्धः पितृतीर्थं स्पृशन्निति पात्रेणापि दाने यथा पितृतीर्थे जलसंसर्गो भवति तथा कर्त्तव्यमित्यर्थः ।

योगियाज्ञवल्क्यः,—

"सौवर्णं रजतं ताम्रं मुख्यं पात्रं प्रकीर्त्तितं ।
तदभावे स्मृतं पात्रं स्रवते यन्न धारितं" ॥

नारिकेलकाष्ठादिपात्रमित्यर्थः ।

शंखः,—

"स्नातः स तर्पणं कुर्य्यात्पितॄणां तु तिलाम्भसा ।
पितृलोकमवाप्नोति प्रीणाति च यथा पितॄन्" ॥

मरीचिः,—

"मुक्तहस्तं तु दातव्यं न मुद्रां तत्र धार[1]येत् ।
वामहस्ते तिलान् ग्राह्यान् मुक्त्वा हस्तं तु दक्षिणं" ॥

मुद्रा तर्जन्यङ्गुष्ठसंयोग इति लक्ष्मीधरः, एवं मुक्तहस्त इत्यनेन मुद्रानिरासस्तस्यैव विवरणं न मुद्रां दर्शयेदिति मध्यमाङ्गुष्ठादिसंयोगस्य प्राप्तेरेव निषेधः । पितृतीर्थलाभाय तर्जन्या एव दानौचित्यात् ।

योगियाज्ञवल्क्यः,—

"यदुद्धृतं प्रसिञ्चेद्वै तिलान् संमिश्रयेज्जलैः ।
अतोऽन्यथा तु शब्देन[2] तिला ग्राह्या विचक्षणैः" ॥

नानेन वामहस्तस्य तिलप्रक्षेपकत्वमुच्यते, किन्तु वामहस्ते तिला ग्राह्या इति मरीचिवचनादधिकरणत्वं तदयमित्यर्थः यदुद्धृतं कूपादितः पात्रान्तरे स्थापितं नद्यादेर्वा पात्रेण हस्ते गृहीतं सिंचेत्तदा जले कूपोद्धृत-जलपूर्ण-भूयिष्ठपात्रगते जले नद्याद्युद्धृततर्पणपात्रस्थे वा जले तिलान् मिश्रयेदुद्धृतपदस्याविशेषात् ।

अतोऽन्यथा । यदा पात्राभेदेन भूमिष्ठपात्रगते जले अञ्जलिस्थ-पात्रगतजले वा मिश्रणं न संभवति तदा जलग्रहणात्पूर्वं

(१) दर्शयेत् । (२) सव्येन ।

वामहस्तभागे तिलान् दक्षिणहस्तेनैव स्थापयित्वा जलाञ्जलिं गृहीत्वा तर्पणं कार्य्यं, एवं सर्वं दृष्टार्थत्वे नियममात्रविधानालघुत्वं। कूपोद्धृतभूमिष्ठपात्रगते अनेकाञ्जलिं तर्पणार्थं सकृदेव जलेन मिश्रणस्य तत्र न्यायसिद्धत्वात्, तेन कूपोदकभूमिष्ठपात्रात्याचं विनाञ्जलि[1]ग्रहणेऽपि न वामहस्ताधारकतिलग्रहणपूर्वकं जलग्रहणं, भूस्थपात्रतिलेनैव सतिलत्वशुद्धौ प्रयोगविधे[2]र्व्यापारान्तरप्रवेशासहनात् "अङ्गस्थैर्न तिलैः कुर्य्याद्देवता-पितृतर्पणं," इति स्मरणाद्दूर्वादौ स्थापनीयं। तिलसंख्यानियमे मानाभावात् कपिञ्जलाधिकरणन्यायेन बहुवचनस्य त्रिष्वेव चरितार्थत्वं, अधिकप्रवेशे तस्यानङ्गत्वादेव न दोषः।

"तिलैः सप्तेषुभिर्वापि समवेताम्भसाञ्जलीन्।
भक्तिनम्रः समुद्दिश्य भुव्यस्माकं प्रदास्यती"ति विष्णुपुराणीयं। श्रद्धासम्भवे प्रत्याम्नाततर्पणविषयं, न तस्येह प्रसङ्गः।

मरीचिः,—

"तिलानामप्यलाभे तु सुवर्णरजतान्वितं।
तदभावे निषिञ्चेत दर्भैर्मन्त्रेण वाप्यथ" ॥

अङ्गा[3]सम्भवे प्रधानानुष्ठानात् प्रत्यवायपरिहारात्।

अङ्गवैगुण्येऽपि यदपि न दोषस्तथापि विशेषाभ्यनुज्ञानादभिमन्त्रमात्रयुक्ततर्पणेऽपि पापक्षयरूपफलमपि भवतीत्यवगम्यते।

(१) अञ्जलिना। (२) प्रयोगविधिना। (३) तत्रासम्भवे।

अत्र पठन्ति,—

"पितृश्राद्धे रवौ शुक्रे सप्तम्यां निशि सन्ध्ययोः।
संक्रान्त्यां जन्मदिवसे न कुर्य्यात्तिलतर्पणं ॥
अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः।
उपाकर्मणि चोत्सर्गे युगादौ पितृवासरे ॥
रविशुक्रदिने वापि न दुष्येत्तिलतर्पणं।
तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ॥
निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितं"।

अत्र पितृश्राद्धे निषेधो युगाद्ययनविषुवमृताहप्रेतपक्षव्यतिरिक्तविषयः, रविशुक्रदिने निषेधः सर्वापवादविषयः, सप्तमीनिषेधः तीर्थव्यतिरिक्ते तिथिविशेषे चेत्यभिधानात्।

सन्ध्यारात्रिनिषेधोऽपवादाऽभावः, संक्रान्तिनिषेधोऽयनविषुवगङ्गाप्रेतपक्षव्यतिरिक्तविषयः, जन्मदिवसनिषेधोऽपि गङ्गाप्रेतपक्षव्यतिरिक्तविषय-इति देवलः।

बौधायनः,—

"स्नातः[1] पञ्चभिर्ब्रह्मयज्ञैरद्भिरेवाप्सु देवतास्तर्पयति," पञ्च ब्रह्मयज्ञा बौधायनोक्तप्रणवव्याहृतित्रयगायत्र्यः, ब्रह्मयज्ञोत्तरमित्युक्तं भवति, तथा च स्थलतर्पणेऽपि तर्पणजलप्रक्षेपो जले कर्त्तव्य इत्युक्तं भवति। पुनर्बौधायनः,—

"नार्द्रवासा नैकवस्त्रो दैवानि कर्माण्युपसंचरेत्पितृकर्माणि चेत्येकेषां," अत एव स्थलतर्पणमेव बौधायनेनोपक्रान्तं।

(१) पुत्त्रः।

एकेषामिति वचनाज्जलतर्पणे पुनरार्द्रवाससेत्युक्तं भवति ।

शंखः,—

"नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना ।
नोपतिष्ठति तत्तोयं यन्न भूमौ प्रदीयते" ।

तेन शंखमते स्थलस्थेन स्थल एव कर्त्तव्यमिति एवं च स्थलस्थ स्थले प्रक्षेपो जले वा प्रक्षेपः कर्त्तव्यः, एवं च "उदकेनोदकं दद्यात्पितृभ्यश्च कदाचन," जले जलप्रक्षेपनिन्दावचनं शंखस्य स्थलप्रक्षेपस्तुत्यर्थं, उदितहोमनिन्दायां अनुदितप्रशंसापरत्ववत् । केवलं व्यवस्थासम्भवे अव्यवस्थानौचित्यात् । नद्यादितीरस्थेन स्थले गृहादास्थित्वा नद्यादौ तर्पणे क्रियमाणे जले प्रक्षेपः कर्त्तव्यः । उद्धृतोदकेन तर्पणे शङ्खमतेन स्थल—एवेति व्यवस्थापक्षः साधीयान्। जल एव तर्पणे जल—एव प्रक्षेपः। यदाह सुमन्तुः,—"आकाशे तु क्षिपेद्वारि जलस्थो दक्षिणामुखः," आकाशे जलोपर्य्याकाशे ।

अत एवाह बृहस्पतिः,—

"भूमौ यदापो दीयेत दाता चैव जले स्थितः ।
वृथा तद्दीयते तोयं नोपतिष्ठति कस्यचित्" ॥

तथा,—

"असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलिं" ।

इत्यविशेषजलस्थेन स्थलस्थेन वा असंस्कृतप्रमीतानां स्थल एव वस्त्रनिःपीडितानि(१) तोयानि देयानीत्यर्थः ।

तथा,— "प्रादेशमात्रमुद्धृत्य सलिलं सलिले क्षिपेत्" ।

(१) वस्त्रनिष्पीडिततोयं देयमित्यर्थः ।

कात्यायनः,—

"यदाद्भिस्तर्पयेद्देवान् सलिलैश्च पितॄनपि ।
नमोऽन्ते तर्पयामीति आदावोमिति च ब्रुवन्" ॥

ब्रह्माणं विष्णुं रुद्रं प्रजापतिं देवान् छन्दांसि, देवान् ऋषीन् पुराणाचार्य्यान् गन्धर्वाचार्य्यानितराचार्य्यान् सम्वत्सरं सावयवं देवीरप्सरसोदेवानुगान् नागान् सागरान् पर्वतान् सरितो दिव्यान् मनुष्यान् यक्षान् रक्षांसि पिशाचान् सुपर्णान् पृथिवीमोषधीः पशून् वनस्पतीन् भूतग्रामचतुर्विधमित्युक्तं भवति ।

ततो निवीति मनुष्यांश्च

"सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा" ॥

ततोऽपसव्यं तिलमिश्रं कव्यवालनलं सोमं च यममर्यमणं च, अग्निष्वात्तान् सोमपा पितॄन् बर्हिषदः पितॄन् यमांश्चैके ।

"यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकस्य तिलैर्मिश्रां(१)-प्रदद्यात् सलिलाञ्जलीन् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति" ॥

जीवत्पितृकोऽप्यनन्यांश्चेतरः, उदीरतामङ्गिरसोन आयान्तुनोर्जं वहन्ति पितृभ्यो ये चेह मधुवाता इत्युक्तं, जपन् सिञ्चेत्। तृप्यध्व-

(१) स्तां स्तान् दद्याज्जलाञ्जलीन् ।

मिति चिः, नमो व इत्युक्त्वा मातामहाचार्य्यगुरुशिष्यर्त्विक्-ज्ञातिबान्धवाः, अतपिता देहाद्रुधिरं पिबन्ति।

ब्रह्मयज्ञानन्तरं, योगियाज्ञवल्क्यः,—

"ततः सन्तर्पयेद्देवानृषीन् पितृगणांस्तथा।
ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं॥
देवान् छन्दांसि वेदांश्च ऋषींश्चैव सनातनान्।
आचार्य्यांश्चैव गन्धर्वानाचार्य्यानितरांस्तथा॥
सम्वत्सरं सावयवं देवीरप्सरसस्तथा।
तथा देवानुगान्नागान् सागरान् पर्वतानपि॥
सरितोऽथ मनुष्यांश्च यक्षान् रक्षांसि चैव हि।
पिशाचांश्च सुपर्णांश्च भूतानि च पशूंस्तथा॥
वनस्पतींश्चौषधींश्च भूतग्रामचतुर्विधं।
अन्वारब्धेन सव्येन पाणिना दक्षिणेन च॥
तृप्यतामिति शक्तव्यं नाम्ना तु प्रणवादिना।
आवाह्य पूर्ववन्मन्त्रैरास्तीर्य्य च कुशान् शुभान्॥
प्रागग्रेषु शुभान् सम्यक् दक्षिणाग्रेषु वै पितॄन्।
सव्यं पाणिं ततो न्युब्जपाणिभ्यां दक्षिणामुखः॥
तल्लिङ्गैस्तर्पयेन्मन्त्रैः पितॄन् पितृगणांस्तथा।
मातामहांश्च सततं श्रद्धया तर्पयेद्बुधः॥
प्राचीनावीत्युदकं च प्रसिञ्चेद्वै तिलान्वितं।
यदुद्धृतं प्रसिञ्चेद्वै तिलान् संमिश्रयेज्जले॥
अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः।

दक्षिणे पितृतीर्थेन जलं सिंचेत् यथाविधि॥
दक्षिणेनैव गृह्णीयात् पितृतीर्थसमागतः।
तिलानामप्यलाभे तु सुवर्णरजतान्वितं॥
तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण वाप्यथ।
कव्यवालनलं सोमं यममर्यमणं तथा॥
अग्निष्वात्तांसोमपांश्च तथा वर्हिषदः पितॄन्।
यदि स्याज्जीवपितृक एतान् दिव्यपितॄंस्तथा॥
येभ्यो वापि पिता दद्यात्तेभ्यः पुत्रः प्रदापयेत्।
एतांश्च वक्ष्यमाणांश्च प्रमीतपितृको द्विजः॥
वसून् रुद्रान् तथादित्यान् नमस्कारस्वधान्वितान्।
एते सर्वस्य पितर एष्वायत्ताश्च मानुषाः॥
आचार्य्यांश्च पितॄन् स्वांश्च पितृप्रभृतिनामतः।
मन्त्रैश्च देयमुदकं पितॄणां प्रीतिवर्द्धनम्॥
उदीरतामङ्गिरसो न आयान्तुनोर्यमित्यपि।
पितृभ्य इति ये चेह मधुवाता च इत्यृचम्॥
पितॄन् ध्यायन् प्रसिंचेद्वै जपन् मन्त्रान् यथाविधि।
तृप्यध्वमिति च त्रिर्वै ततः प्राञ्जलिरानतः॥
नमो व इति जप्त्वा च ततो मातामहान् सखीन्।
संतर्पयेदातृप्त्यर्थं धर्मं परममास्थितः॥
माता मातृष्वसा चैव मातुलानी पितृष्वसा।
दुहिता च स्वसा चैव शिष्यर्त्विक्ज्ञातिबान्धवाः॥
नामतस्तु स्वधाकारैस्तर्प्यास्तुरनुपूर्वशः॥

सवर्णेभ्यो जलं दद्यान्नासवर्णे कदाचन ।
पूर्वं स्वपितरस्तर्प्याः पश्चादन्यांश्च तर्पयेत् ॥
नास्तिक्यभावाद्यश्चैतान्न तर्पयति वै सुतः ।
पिबन्ति देहिनस्तीर्थं पितरश्च जलार्थिनः ॥
ततः स तर्पयेद्देवान् ऋषीन् पितृगणांस्तथा" ।

इत्यत्र ऋषितर्पणं मनुष्यतर्पणं च पद्मपुराणीयं सूचितं । तथा पद्मपुराणे, देवतर्पणानन्तरं ।

"कृतोपवीती देवेभ्यो निवीति च भवेत्ततः ।
मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्तथा ॥
सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढूः पञ्चशिखस्तथा ॥
सर्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ।
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥
प्रचेतसं वशिष्ठं च भृगुनारदमेव च" ।

एतेन सनकादि-मरीच्यादितर्पणं याज्ञवल्क्यानुक्तत्वाद्वैकल्पिकमिति निरस्तम् । ब्रह्माणं तर्पयेत् पूर्वमितिनिर्देशादेव पूर्वत्वे ज्ञाते पूर्वपदं प्रत्येकं तर्पणप्राप्त्यर्थमित्यर्थः । पुराणानित्याचार्य्यविशेषणं कात्यायन-सम्वादात् । गन्धर्वानित्याचार्य्या[१]निति सम्बन्धः । सावयवमिति सम्वत्सरविशेषणं । अन्वारब्धेनेति अन्वारम्भः, कुशैरेवेति श्रौत-परिभाषायां इह प्रवेशे मानाभावात् । पलाशशाखया पशु-मन्वारभते । भूत्वा समन्वारभेरन्नित्यादौ परस्परसंस्पर्शोऽन्वारम्भ-

(१) गन्धर्वानि तथाचार्यमितिसम्बन्धः ।

शब्ददर्शनाद्दामहस्ते च वाक्स्पर्शना[१]चारः । तृप्यतामिति तृपि-धातोः परस्मैपदित्वेऽपि छान्दस आत्मनेपदप्रयोगः । ब्रह्मणेति कर्त्तृवाचितृतीयान्तपदाध्याहारेण भावे प्रत्ययादात्मनेपदसाधुत्वो-पपत्तेश्छान्दसत्वं कथं कल्प्यमिति चेत्; इत्थं नाम्ना सेक्तव्यमिति नाम्नः सेकं प्रति करणत्वं निरपेक्षस्य तृतीयाश्रुत्योच्यते । समर्थः पदविधिरिति नैरपेक्षलक्षणसामर्थ्ये विभक्तिविधानात् । पद-विधि[२]रिति सार्वविभक्तिविधावपि नैरपेक्ष्यस्य महाभाष्ये लिख-नात् । नाम्नश्च करणत्वमर्थज्ञानद्वारकं दृष्टे सत्यदृष्टाकल्पनात् । तथा च प्रयोगकाले कारकविभक्त्यन्तनामोच्चारणे विधिवाक्यश्रुतं नैरपेक्ष्यं नाम्ना बाध्यते । कारकज्ञानसहितनामार्थज्ञानस्य तर्पण-क्रियाङ्गत्वापत्तेः । तेनानधिकारार्थप्रथमान्तनामोच्चारणं शब्दसाधु-त्वाय कार्य्यमिति तृप्यतामिति कर्त्तर्यैव छान्दसमात्मनेपदमिति । अतएव तृप्यध्वमिति च त्रिर्वै इति कर्त्तृबहुत्वापेक्षं बहुवचनमग्रे दृश्यते ।

भावे प्रत्यये बहुत्वासंगतेः। अतएव कल्पतरुकारो ब्रह्मा तृप्यता-मिति देवतर्पणवाक्यमाह । कर्काचार्यैस्तु ब्रह्माणमिति तर्पण-क्रियाकर्मत्वेन ब्रह्मादीन[३]विधाय भूतग्रामचतुर्विधस्तृप्यतामिति प्रयोगमाचार्य्यो दर्शयति । ततश्च ब्रह्मा तृप्यतामित्येवं वाक्य-

(१) —समाचारः ।

(२) पदविधिरिति सर्व्वविभक्तिकसमाश्रयणेन पदाय विधिरिति-विभक्तिविधावपि नैरपेक्ष्यस्य महाभाष्ये लिखितत्वात् ।

(३) ब्राह्मादीन् विधाय— ।

मित्युक्तं। एवं देवा[१]स्तृप्यन्तामितीत्येवं बहुवचनान्तप्रयोगः कर्त्तव्यः। दिव्यान्मनुष्यानिति छन्दोगपरिशिष्टस्मरणात्। मनुष्ये दिव्यपदं विशेषणमित्येके। अत्र सेक्तव्यमित्युक्तेऽपि प्रथमं ततः सन्तर्पये-द्देवानिति अद्भिरेव देवताः पितॄंस्तर्पयतीत्यादिवाक्याच्च द्रव्य-देवतासंयोगप्रतीतेः। देवतामुद्दिश्य जलत्यागः प्रक्षेपसमकालं कर्त्तव्यः। सेक्तव्यमिति प्रक्षेपस्यापि विधानाद्देवतामुद्दिश्य त्यागः प्रक्षेपश्चेति त्रयं तर्पणशब्दार्थः। न तत्प्रक्षेपस्याङ्गं,[२] सेकानुवादेन मन्त्रविधानात्तस्य तर्पणानन्तर्भावे तर्पणाङ्गमन्त्रसम्बन्धायोगात्। उक्तं च तृप्यतामिति सेक्तव्यमिति। एवं पितृतर्पणेऽपि।

तत्र च।

"त्रिरपः प्रीणनार्थाय देवानामुप[३]वर्जयेत्।
पितॄणां च यथान्यायं सकृच्चापि प्रजापतेरिति"॥

विष्णुपुराणवचनाद्देवतातर्पणे त्रिरभ्यासः।

यत्तु; "एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः।
अर्हन्ति पितरस्तांस्तान् पितॄन् स्त्रियस्त्वेकैकमञ्जलिं"॥

इति। तेन देवतातर्पणे सकृत्त्रिर्वेति विकल्पः।

अत्र मन्त्रेण देवतोद्देशत्यागो मानस इति केचित्।

तद्युक्तं। चतुर्थ्यन्तपदेनैव देवतोद्देशात्। ब्रह्मा तृप्यतामिति मन्त्रे द्रव्यपदाभावेन देवतोद्देशत्यागस्मारकेनैवाङ्गत्वात्। प्रतिक्षेपं च सोमयागग्रहाभ्यासन्यायेन देवतोद्देश इतिमन्त्रस्य तत्करणत्वेन

(१) वेदास्तृप्यन्तामित्येवं बहुषु—।
(२) -तत्प्रक्षेपस्याङ्गत्वं। (३) मपवर्ज्जयेत्।

त्रिरावृत्तिः। यत्तु, मन्त्रे द्रव्यवाचकद्रव्यपदाभावात्। वेदिं त्रिः-प्रोक्ष इति वेदिप्रोक्षणमन्त्रवत् मन्त्रस्यानावृत्तिरिति तन्न। एक-द्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचनमित्येवं वेदिप्रोक्षणेन मन्त्रावृत्ति-[१]रभ्यासविशिष्टस्य सकृदेव कृत्वानुष्ठानात्। इह जलात् पृथक्करणं विना जलाञ्जलौ त्यागस्याशक्यत्वेन त्यागसमान[२]कालीनस्य देवतोद्देशत्यागस्यापि प्रत्यञ्जल्यावृत्तौ तत् स्मारकमन्त्रस्याप्यावृत्ते-र्न्याय्यत्वात्। न ह्येकदा भिन्नकालीनोद्धृतजलाञ्जलिषु त्यागसम-कालो देवतोद्देशः सम्भवति। न च तन्त्रेण सकृत् पूर्वं कृतो देवतोद्देशः त्यागत्रयसम्बन्धीति वाच्यं। इदमिति द्रव्यनिर्देशं विना देवतोद्देशाभावात्। द्रव्यसम्बन्धित्वेन हि देवतोद्देशो न स्वतन्त्रः। प्रथमाञ्जलिकाले द्वितीयतृतीयाञ्जल्योरभावेन तत्रेदमिति निर्देशा-सक्तेः[३]। यत्वयुतहोमादौ सकृदेव सर्वाहुतीर्बुद्धौ कृत्वा देवतो-द्देशेन [४]त्यागसमाचार[५]स्तत्रानेककर्त्तृहोमे प्रत्येकयजमानेन देवतोद्देशस्य समकालं कर्त्तुमशक्यत्वेन तुल्यकालताबाधे सकृदेव लाघवात्करणं युक्तं। तत्र च मन्त्रस्य दृष्टार्थत्वेऽपि यजमानकर्त्तृक-देवतोद्देशे स्मारकत्वेनाङ्गत्वं। किंत्वध्वर्युगतदैवतहविःपक्षे चास्मार-कत्वेनैव कर्माङ्गत्वं। अन्यथा तत्र मन्त्रवर्णिकदेवताकल्पनापत्तेः। व्याहृतिभिर्जुहुयादिति विधौ देवताविधानाभावेन मन्त्रवर्णा-देवाग्निवायुसूर्य्याणां देवतात्वकल्पनात्। तच्च मन्त्रस्याध्वर्य्युगता-ग्न्यादिसम्बन्धिहविःप्रकाशकत्वे सङ्गच्छते। नान्यथा। जुष्टं चाग्नये

(१) त्रिरभ्यास—। (२) -सम—।
(३) शक्तेः। (४) समाचारात्। (५) तत्रा-।

जुष्टं निर्वपामि इत्यादि मन्त्राणां देवतासम्बन्धिहविःस्मारकत्वेन दृष्टार्थत्वं। ऐन्द्रवायवं गृह्णातीत्यादीनां तथात्वेन देवताकल्पकत्वं च। अन्यथा, यजमानगतदेवतोद्देशार्थत्वे तत्र यजमानेन सकृदेव देवतोद्देशस्य कृतत्वात् पश्चाद्धोमेषु मन्त्रप्रयोगो न स्यात्। इह तु स्वयं क्रियमाणे प्रत्यञ्जलित्यागो नेमौ कर्त्तुं [1]शक्याविति वैषम्यं। आवाह्य पूर्ववन्मन्त्रैरिति याज्ञवल्क्यसंहितायां श्राद्धप्रकरणोक्तैर्मन्त्रैरित्यर्थः। तत्र विशेषः। श्राद्धे ब्राह्मणे देवपित्रावाहनं, दैवे प्रागग्रकुशत्रयास्तरणपूर्वकं तत्र देवतानामावाहनं। पित्र्ये तु [2]पितृब्राह्मणात् पूर्वं तदेव कुशत्रयं दक्षिणाग्रं कृत्वावाहनं। एतेनास्तृतकुशेष्वेव प्रागग्रदेवताङ्गत्वेन पित्र्याङ्गत्वेन च दक्षिणाग्रतासंस्कार उच्यते। न तु कुशास्तरणमिति भ्रमः कार्य्यः। अत्र च श्राद्धे ब्राह्मणे देवतावाहनं। तत्रैव हविःप्रक्षेपः। एवं दर्शादौ चाग्नौ देवतावाहनं, हविःप्रक्षेपश्च दृष्ट इति तर्पणजलप्रक्षेपेषु आवाहनाधारकुशेष्वेव कर्त्तव्य इति केचित्। तदयुक्तं सामान्यतो दृष्टस्य धर्मे प्रमाणत्वात्। जलस्थस्याजलस्थस्य वा प्रक्षेपाधारस्य विहितस्य कुशान्तर्द्धाने मानाभावाच्च। तेन कुशानास्तीर्य्य कुशेषु प्रागग्रेषु पितॄनावाह्य तृप्यतामिति सेक्तव्यमिति प्राचीनान्वयः कर्त्तव्यः। अन्यथा वाह्योक्तत्वात् प्रत्ययस्यासंगतिप्रसङ्गात्। एवमुत्तीर्य्य वाससा धौतेन परिधायेत्युप[3]क्रम्य स्थलतर्पणस्य प्रस्तुतत्वात्तत्र च भूमेः प्रक्षेपाधारत्वस्य शङ्खेनोक्त-

(१) शक्ताविति —। (२) पितृतर्पणात् —।
(३) परिधयेत्यपक्रमेण।

त्वात्तत्र स्थले कुशानास्तीर्य्य तत्रावाह्य तत्रैव जलसेकः कर्त्तव्य इति वाक्यार्थः। जले तर्पणे तु यदि जलाशये प्रक्षेपाधारे कुशास्तरणसम्भवस्तदा तत्र कुशेष्वेव जलप्रक्षेपः। प्रवाहादिनास्तरणसम्भवे गुणलोपे तु मुख्यस्येतिन्यायेन यथा कथंचित् कुशान् यत्र क्वापि कृत्वा तत्रावाह्य जले जलप्रक्षेपणं इति विवेकः। अत्रावाहनमन्त्रमात्रातिदेशेऽपि प्रश्नस्यानुज्ञानार्थत्वादनुज्ञालोपे प्रश्नस्यापि लोपः। कार्य्यकारकत्वादतिदेशस्य कार्य्याभावेऽप्रवृत्तेः। न च प्रश्नस्यावाहनस्मारकत्वेन इह सम्बन्धः स्यादिति वाच्यं। विकृतौ कार्य्यान्तराकल्पनात्। तथा सति कृष्णलेष्ववघातस्यादृष्टकल्पनयाङ्गत्वापत्तेरिति प्राचीनावीत्युदकमिति, निवीती च भवेत्तत्र- इति मध्ये मनुष्यतर्पणार्थं निवीतित्वं वोध्यं। मनुष्यत्वाविशेषाच्च सनकाद्यृषिपुत्रतर्पणे मरीच्याद्यृषिपुत्रतर्पणे च निवीतित्वं। [1]निवीतमनुमनुष्याणामिति श्रुतेरर्थवादत्वेऽपि संवीते[2] मानुषमिति श्रुतेरनन्यपरत्वाद्यज्ञोपवीतप्रकरणे पाठात्।

यच्च, योगियाज्ञवल्क्यीये;—

"ब्रह्मादीनुपवीती तु देवतीर्थेन तर्पयेत्।
निवीती कायतीर्थेन मनुष्यान् सनकादिकान्॥" इति-

सनकादितर्पणं[3] तदपि पद्मपुराणे सनकाद्यनन्तरं मरीच्याद्युपादानात् सनकादिग्रहणेन मरीच्यादीनामपि संग्रहः। अतएव पद्मपुराणे,— "निवीती च भवेत्तत्र" इत्युपक्रम्य सनकादि-

(१) निवीतिं। (२) संवीति।
(३) ग्रहणं।

मरीच्यादितर्पणमुक्ता पश्चादेवापसव्यं, ततः कृत्वेति अपसव्यता विहिता। किंच बौधायनेनापि निवीती ऋषींस्तर्पयामीति-वक्तव्यमेव मनुष्यतर्पणे निवीतित्वमुक्तं। तथा च तैत्तिरीयश्रुतौ यज्ञोपवीतप्रकरणे अजिनं वासो दक्षिणत उपवीत्यदक्षिणं बाहु-मुद्धरेत्। अविधत्ते सव्यमिति यज्ञोपवीतं विपरीतं प्राचीना-वीतं। अत्र विपरीतमिति दक्षिणेऽवधत्ते सव्यमुद्धरत एवमपसव्यं भवतीत्युक्तं। संवीतं कण्ठपार्श्वद्वयलग्नं; तच्च मानुषमित्यर्थः। निवीतित्वं प्राचीनावीतित्वं चोत्तरीयवस्त्रस्यापि कर्त्तव्यं। यज्ञ-सूत्रत्वाविशेषात्।

"यथा यज्ञोपवीतं तु धार्य्यते च द्विजोत्तमैः।
तत्र संधार्य्यते यत्नादुत्तरात् साधनं शुभम्"॥

इति वाक्यदर्शनाच्च। अतएव श्राद्धप्रकरणे अपसव्यं वासो यज्ञोपवीते कृत्वेत्युक्तं। दक्षिणेनैव गृह्णीयादिति जलाञ्जलिपूरणं दक्षिणहस्तपितृतीर्थद्वारा। पात्रे पाणिग्रहणे तेनैव मन्त्रैर्दर्भेणेति।

"ऋजुदर्भैश्च दैवं स्यात् कार्य्यं मानुषकं तथा।
मूलाग्रश्लिष्टदर्भैस्तु पितृणां तर्पणं स्मृतं"॥ इति

वाक्याद्दैवे मानुषे च ऋजवो दर्भाः। पित्र्ये द्विगुणीकृताः। तथा।

"अग्रे तु तर्पयेद्देवान् मनुष्यान् कुशमध्यतः।
पितॄंश्च कुशमूलाग्रैरिति व्यवस्था मन्तव्या"॥

अग्निष्वात्तानित्यादिषु त्रिषु पितॄनिति सम्बध्यते। एतदनन्तरं यमांश्चैक इति कात्यायनवचनाद्यमतर्पणं

वैकल्पिकं। यदि स्याज्जीवत्पितृक इति कात्यायनेन यमतर्पणा-नन्तरमेवमुक्तेर्वैकल्पिकं यमतर्पणमिव जीवत्पितृकस्य। यत्तु, मातृमरणे मातृतर्पणे समाचारः; स; "येभ्यो वापि पिता दद्यात्तेभ्यो वापि प्रदापयेदि"त्युक्तपक्षाश्रयणादेव; तस्य च पितृ-संस्कारत्वात्पितामहादीनां पितृतर्पणे [1]निषिद्धे पुत्रेण मातुः क्रियते। नमस्कारस्वधान्वितामिति वस्वादितर्पणमात्रविषयं। व्यवायेन भिन्नवाक्यत्वात्। तेन कव्यवालनलस्तृप्यतामित्येव प्रयोगः। तृप्यतामिति सेक्तव्यमित्यविशेषोपादानात्। यमतर्पणे तु यमाय नम इत्येवं वाक्यं। वस्वादितर्पणे वसवस्तृप्यन्तामिदं जलं तेभ्यः स्वधा नमः। इत्येवं वाक्यं। आचार्य्यांश्चेति चकारेण वस्वादिवन्नमस्कारं स्वधान्वितमतिदिश्यते। पितॄंस्त्वां स्वधेति नमःस्वधान्वितानिति दृश्यते चकारेण। पितृशब्दस्य सम्बन्धि-शब्दत्वे पितॄनित्युक्ता स्वस्यैव पित्रादयो लभ्यन्त एव। स्वानिति पुनर्वचनं प्रयोगवाक्ये स्वप्रकाशकपदोच्चारणार्थं। तेनास्मत्पिता इत्येवं प्रयोगः। एवं नामतइति नामोच्चारणे प्राप्ते पितृप्रभृतिपदं पित्रादिपदोच्चारणार्थं। एवं पितृप्रभृतीनि पदानि नामत इति द्वन्द्वः। तातस्तृतीयार्थे[2] पितृपितामहप्रपितामहादिपदनामाभ्यां देयमित्यर्थः।

अतएव पद्मपुराणे,—

"दर्भपाणिस्तु विधिना प्रेतान् स्वान् तर्पयेद्बुधः।
पित्रादिनामगोत्रेण तथा मातामहानपि"॥

(१) तर्पणेन सिद्धेः। (२) तृतीयार्थे तच्छीलः।

अत्रापि स्वानित्यस्मत्शब्दप्रयोगार्थं। गोत्रवाचकपदोच्चारणं अस्मादेव वचनात्।

"नामतस्तु स्वधाकारैरि"ति योगियाज्ञवल्क्यवचने नामगोत्र-स्वधाकारैरिति पाठान्तरपक्षे च व्यक्तमेव गोत्रपदोच्चारणं। नामपदस्य विशेष्यपरत्वेनाभ्यर्हितत्वात् पूर्वनिपातेऽपि नामगोत्रयोः प्रयोगे पौर्वापर्य्यनियमे मानाभावात् प्रयोगकाले विशेषणसमर्पक[१]-त्वेन गोत्रस्य पुर्वं निर्द्देशः, पितृप्रभृतिपदस्य नाम्नां समासेन नामपूर्वं निर्द्देशः। तत्र सन्ततिर्गोत्रचरणमिति पर्य्यायपाठात् पुत्रपौत्रगोत्रशब्दार्थः। पुत्रपौत्रपरम्परामात्रविशिष्टमिति विशेष-लाभाय तदादिभूतपुरुषेणावच्छिन्नं गोत्रशब्दार्थः। यद्यप्यनादि-संसारे सृष्ट्याद्यभावपक्षेऽनादिपुरुषसम्भवस्तथापि कौत्सस्य ये पित्रादयः पूर्वे ये च तत्पुत्रादयोऽर्वाचः सर्वे कौत्सत्वेन गोत्रान्तरेभ्यो व्यावृत्ताः कौत्सोपलक्षितपुत्रपौत्रपरंपरात्वेन गोत्रशब्दाभिधेयाः। एवं च गोत्रशब्दस्य परंपरारूपधर्मवाचित्वात्तद्धर्मविशिष्टव्यक्ति-लाभाय सगोत्र इति। तेनावच्छेदकपुरुषसमानपुत्रपौत्रपरंपराक इत्येवं विशेषणविशेष्यभावात्। कौत्ससगोत्र[२] निर्द्देशो भवति। अतएव "सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणी"ति। "असगोत्रा च या पितुरि"ति स्मृतिषु निर्द्देशः। यत्तु; अमुकामुकगोत्रैतत्तुभ्यमस्तु स्वधा नमः। तद्धर्मवाचिगोत्रपदस्य व्यक्तिलक्षणया न च स्वायत्ते प्रयोगे लक्षणा युक्ता। अत्र च

(१) सम्बन्धकत्वेन। (२) कौत्ससगोत्र-इति निर्द्देशः।

"शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य वै।
वैश्यस्य गुप्तसंयुक्तं दासान्तं शूद्रजन्मनः" ॥ इति शर्म-पदस्यान्ते प्रयोगः। यत्तु; देवकरधर इत्यादि, अमुकदेवामुक-करामुकधर इत्येवं प्रयुज्यते तत्समाचारात्। यदा कल्पतरुलिखित-यमस्मृतिवाक्यस्य।

"शर्मदेवश्च विप्रस्य वर्मत्राता च भूभृतः।
गुप्तोदासश्च वैश्यस्य दासः शूद्रस्य कारक" ॥ इति देवपदस्य नाग्निप्रवेशः, शर्मा तु वचनाच्च शर्मपदस्य चान्ते प्रयोगः, तदा वचनमपि, मन्त्रैश्च देयमुदकमिति, अत्र मन्त्राणां करणत्व-निर्द्देशात् तस्य चोपक्रमस्थत्वेन वलीयस्त्वात्। "पितॄन् ध्यायन् प्रसिञ्चेद्वै जपेन्मन्त्रान् यथाविधि"रित्यस्य वाक्यस्य स्वपितृप्रभृति-त्रयाणामञ्जलिनवकेन च मन्त्रव्यवस्थापरत्वेन जपन्निति समान-कालनिर्द्देशानुवादत्वादविवक्षित इति न क्रियमाणानुवादित्वादि-भ्रमः कार्य्यः। एवं च कात्यायननिर्द्देशोऽप्येतत्समानत्वान्नक्रिय-माणानुवादित्वपरमित्यवगन्तव्यं। ध्यायन्नितिपूर्वदृष्टत्वेन अदृष्टे सति पित्रादिसारूप्येण तृप्यध्वमिति च त्रिर्वै इति बहुवचन-प्रयोगात्। पितृपितामहप्रपितामहाः तृप्यध्वमिदं जलं तेभ्यः स्वधा नम इत्येवमञ्जलित्रयं दातव्यमितिशब्दाच्च पूर्वनवाञ्जलिभिः समुच्चयः। ततो मातामहानिति, तत्र इति श्रौत[१]कर्मलाभाय, तच्च स्मृत्यन्तरे मातृतर्पणस्य पितृतर्पणमातामहतर्पणमध्ये विधानाद्यु-दासार्थं। किंच, "मातामहांश्च सततं श्रद्धया तर्पयेद्बुधः"।

(१) क्रम—।

इति मातामहादितर्पणस्य पूर्व्वमेव विहितत्वादिवचनं क्रमार्थमेव ।

तथा च कात्यायनः, नमो व इत्युक्त्वा मातामहानां च ।

विष्णुपुराणे,—

"पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते! ।
पितापिता[१]महेभ्यश्च प्रीणयेत् प्रपितामहान्" ॥
मातामहाय तत्पित्रे तत्पित्रे च समाहितः ।
दद्यात् पैत्रेण तीर्थेन काम्यं चान्यच्छृणुष्व मे ॥
मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा नृप! ।
गुरवे मातुलादीनां स्निग्धपित्राय भूभुजे" ॥

प्रमाता पितामहभार्य्या, तन्माता पितामहस्य बुद्धिस्थत्वा[२]-त्पितामही, एवं याज्ञवल्क्यकात्यायनयोर्मातृतर्पणमन्यत्र पतिना सहेतिन्यायेन पितृतर्पणान्तर्गतत्वान्न पृथक्कर्त्तव्यं, मातातृप्तिविशेष-कामनया पृथक्कर्त्तव्यं चेन्मातामहादितर्पणानन्तरं कर्त्तव्यं । न कथंचिदपि पितृपितामहप्रपितामहतर्पणानन्तरं मातृपितामहीप्रपितामहीतर्पणं कार्य्यं, कल्पतरुकारेण तु मात्रादितर्पणमपि नित्यमेव स्मृत्यन्तरात् काम्यत्वं तु नित्यस्यैव सतः संयोगपृथक्त्वा-दितिवदता मातामहादितर्पणानन्तरं नित्यमेव मातृतर्पणमित्युक्तं, नित्यतोक्त्या याज्ञवल्कीयकात्यायनीययोर्मात्रादितर्पणं न पित्रादि-तर्पणान्तर्गतं । अत्र मातुः पृथक्श्राद्धमन्यत्र पतिना सहेत्यस्य श्राद्धपदस्य तर्पणविषयत्वे मानाभावे न याज्ञवल्कीयादौ मात्रादि-

(१) पितामहेभ्यश्च तथा—।
(२) बुद्धिस्थत्वात्-तत्प्रपितामहभार्य्या ।

तर्पणमनुक्तमेव विष्णुपुराणाद्ग्राह्यं, तथा च तन्मतेऽपि न माता-महादितर्पणात्पूर्वं मातृतर्पणं ।

यत्तु शङ्खः—

"पित्रे पितामहाभ्यां च मात्रे दद्यात्ततो जलं ।
पितामहस्ततो दद्यान्मातामहकुले ततः" ॥ इति ।

तथा च मरीचिः—

"पितॄणां तर्पणं पूर्वं मातॄणां तदनन्तरं" ।

इति, गोभिलः, त्रीन् पितृतः, त्रीन् मातृतः, तदपि याज्ञ-वल्कीयकात्यायनयोर्वाजसनेयिपरिगृहीतत्वेन, स्वशाखाश्रयत्वात्, विष्णुपुराणीयस्य प्रायेण वाजसनेयिनां परिगृहीतत्वेन ।

"येनास्य पितरो याता येन याताः पितामहाः ।
तेन गच्छेत्सतां मार्गं तेन गच्छंस्तरिष्यति" ॥

इति मनुवचनाद्वैकल्पिकविषये पूर्वपरिगृहीतमार्गाश्रयत्वस्य स्नातकधर्मत्वेन कथनात् तत्त्यागे स्नातकव्रतलोपापत्तेर्वाजसनेयिभिः पितृतर्पणानन्तरं मातामहादितर्पणं, तदनन्तरं च मातृपितामही-प्रपितामहीतर्पणं कर्त्तव्यमिति, तथा शाखान्तराधिकरणे,—

"स्वाध्यायग्रहणेनैकशाखाभिः परिगृह्यते ।
एकार्थानां विकल्पस्तु कर्मैकत्वे भविष्यति" ॥

इति शाखानां विकल्पेनाध्ययनमुक्त्वा तर्हि शाखाध्ययने न नियमः पित्रादिक्रमागतशाखां त्यक्त्वा शाखान्तरमपि कथं नाधीयत इति शङ्कायां वार्त्तिककारः संप्रदायगतमुक्त्वा स्वां समाख्यामनुवर्त्तिनीं ।

"शाखां शाखान्तरं युक्तं नाध्येतुं सदृशे समे" इति पूर्वपरिगृहीतस्य ग्रहणमावश्यकमित्याह, यत्तु होलाधिकरणे स्मृतीनां सर्वधर्मत्वमुक्तं तदपि स्वशाखाश्रयाविरुद्धपरशाखाश्रयस्मृतिबोधिताधिकर्मण्यधिकारसिद्धिपरं ।

स्वशाखाश्रयासम्भवे वानुकल्परूपेण परशाखागतस्यापि पक्षस्यानुष्ठानेऽपि नाधिकारहानिरित्येवं परं च ।

अन्यथा,

"स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः ।
कर्त्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितं" ॥

इत्यादिवचनानां निरालम्बनत्वापातात् । तथा बलाबलाधिकरणे स्वशाखाश्रयेण परशाखाश्रयं बाध्यत इत्युक्तं, यत्तु विकल्प(१)-स्याष्टदोषेषु, अङ्गीकृत्यापि तौ दोषौ पूर्वं केनापि हेतुना प्रयोगान्तरकाले तु पुनर्दोषद्वयं भवेदिति, एकस्यैव विकल्पे पक्षद्वयाश्रयणमुक्तं । तत्पक्षान्तरस्य पूर्वपरिगृहीतत्वेन व्यवस्थितप्रायविकल्पव्यतिरिक्तविकल्पविषयमेव । एवं च "कुरु वाजपेये सप्तदशैव वा गवास्तं कुरुवाजपेयमित्याचक्षत" इति परशाखागतहीनकल्पदक्षिणाश्रयणं वाजसनेयिनामनुकल्पमेव, यद्वा, वेदान्तर्गतशाखात्वात्सामशाखापि (२)स्वशाखा । त्रय्या विद्ययेति वेदत्रयात् शाखात्रयस्य सर्वेषां पूर्वपरिगृहीतत्वादिति । एवं च यत् पठन्ति;—

"मातामहानां यः कृत्वा मातृणां संप्रयच्छति ।
उदकं पिण्डदानं वा नरकं स तु गच्छती"ति तद्वाज-

(१) विकल्पस्याष्टदोषेषु —। (२) यच्छाखा ।

सनेयिव्यतिरिक्तविषयं । प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रमिति निन्दायथोदितहोमप्रसङ्गार्थं । नत्वनुदितहोमनिषेधार्थमिति सपत्न्यादिमातृविषयं चेति । न च याज्ञवल्क्ये, मातृतर्पणस्याप्यनुक्तस्य स्मृत्यन्तरात्समुच्चये स्मृत्यन्तरोक्तस्थानस्य समुच्चयाश्रयणात् शाखान्तरीयाङ्गप्रवेश इव क्रमहानेरदोषत्वान्न स्वशाखाश्रयविरोध इति वाच्यं । ततो मातामहानिति श्रुतिक्रमबाधप्रसङ्गात् । विष्णुपुराणोक्तस्थाने निवेशविरोधाभावात् । शाखान्तरीयाङ्गमपि श्रुतिक्रमादिविरोधेनाङ्गानां पाठक्रमबाध एव शाखान्तराधिकरणे उक्तः । मातामहतर्पणानन्तरं मातृतर्पणप्रवेशेन श्रुतिक्रमबाध इति सर्वमनवद्यं, अथवा, ततो मातामहान् सखीनितिमध्ये सखितर्पणमुक्त्वा माता(१)मातृष्वसेति याज्ञवल्क्य आह, ततो मातृतर्पणं स्मृत्यन्तरसम्वादात् पितामह्यादितर्पणोपलक्षणं । "पूर्वं स्वपितरस्तर्प्याः पश्चादन्यांश्च तर्पयेत्" । इति वचनाच्च । सखितर्पणस्य पश्चाद्भावः, स्वपितृपदस्य सपत्नीकस्वकीयप्रेतपरत्वात् सख्यादीनां स्वपितृत्वाभावात् । अत्र यदि स्याज्जीवत्पितृक एतानेवेति नियमवन्मातामहे जीवति तर्पणनिषेधाभावात् । प्रमातामहादिषु पुरुषत्रयतर्पणं । "पितरो यत्र पूज्यन्ते तत्र मातामहा अपी"तिनियमवचनात् बहूनां प्राप्ते तर्पणोत्पत्तिवाक्ये च "मातामहांश्च सन्ततमि"ति मातामहपदोपस्थापितपितृमात्रादिवर्गस्य बहुत्वं प्रापितमिति प्रमातामहवृद्धप्रमातामहयोरेव द्वयोस्तर्पणं न तृतीयस्येति मतमिति संबन्धः, मातृतर्पणे तु "न

(१) मातापितृस्वसा ।

जीवितु[१]मितिदद्यादि"तिनिषेधो जीवितु[२]मिति पुंस्त्वस्योद्देश्यविशेषणत्वेनाविवक्षितत्वान्मातामहवर्गवत्पितृपूजासाहित्यनियमस्य "मातामहांश्च सतत"मितिवत्तर्पणनियमवचनस्य च निषेधप्रतिप्रसवहेतोरभावात्। मातरि जीवन्त्यां न पितामह्यादितर्पणं। पितामह्यां जीवन्त्यां मातृमात्रतर्पणमिति।

"पिता यस्य तु वृत्तः स्याज्जीवेद्वापि पितामहः।

पितुः स्वनाम संकीर्त्त्य कीर्त्तयेत् प्रपितामह" ॥ इतिवत्प्रतिप्रसवाभावेन जीवितुमितिदद्यादितिनिषेधप्रवृत्तेः, पितुः स्वनाम कीर्त्तयेदित्यत्र पितृपदस्य मातुपलक्षणपरत्वे पितामहपदस्य पितामह्युपलक्षणपरत्वे मानाभावात् पितृपदेऽपि पितामात्रेत्येकशेषः कथंचित् स्यात्। न तु प्रपितामहपदस्य प्रमातामहपरत्वे किंचित् प्रमाणमस्ति, पितृप्रातिपदिकोत्पन्नप्रपितामहपदस्य मातृपरत्वे प्रमाणसत्त्वे तद्द्वारा प्रमातामहलक्षकः स्यान्नत्वत्र प्रमाणमिति, प्रमाणसत्त्वे भवतु तथा, मतामहादितर्पणे। केचिदन्ते नमः शब्दं नेच्छन्ति, पितॄन् स्वानितिवचने पितृशब्दस्य स्वकीयसपिण्डीकृतप्रेतपरत्वेन मातामहादिसंग्रहात्। तत्र स्वधानम इति संगतेः। सख्यादितर्पणे तु नामतस्तु स्वधाकारैरित्युक्ता नमः शब्दाभाव इति वदन्ति, नामशब्दस्य गोत्रसम्बन्धयोरुपलक्षकवत् स्वधाशब्दस्यापि पूर्वोक्तनमःशब्दोपलक्षणपरत्वं न्याय्यं प्रतिभाति; अन्यथा, तृप्यतामिति पदं नामादिप्रणवोच्चारणमपि परिशंसितं। तेनानुवादित्वात्तर्पणान्तरतुल्यं, तेनात्र यथासम्प्रदायं

(१) जीवन्तमिति। (२) जीवन्तमिति।

नमःशब्दप्रयोगः। अत्र सख्यादिऋत्विगन्तानां तर्पणं तर्पयेदानृशंसार्थमितिवचनात् काम्यमिति केचित्, तदसत्, कात्यायनेन ज्ञातिवान्धवान्तानामेषामेव तर्पणमुक्त्वा अतर्पिता देहाद्रुधिरं पिबन्तीति दोषोक्तेः, तेनानृशंसार्थं स्तुतिमात्रार्थं। अत्र मातामहीप्रमातामहीवृद्धप्रमातामहीनां आचार्य्याचार्य्यपत्नीगुरुगुरुपत्नीनां बौधायनोक्तं वैकल्पिकं, ज्येष्ठभ्रातृपितृव्यमातुलादीनां छन्दोगपरिशिष्टोक्तं वैकल्पिकं, स्मृतिशास्त्रविकल्पन्यायात्, अत्र क्रमवाक्यं पठन्ति;—

"दैवं पिता च माता च मातामहपितृव्यकौ।
भ्राता च पितृभगिनी मातुलः श्वशुरस्तथा ॥
मातुः स्वसा च भगिनी पत्नी पुत्रस्तथैव च।
गुरवः स्वामिनश्चैव भावुकशालवान्धवाः ॥
पितृतर्पणकाले च कारुण्यात् श्राद्धकर्मणि।
क्रमेणैते प्रयोक्तव्याः शौनकस्य वचो यथा" ॥ इति—

अस्य च क्रमस्य पूर्वं स्वपितरस्तर्प्या इति याज्ञवल्क्यविरोधात् तद्विरोधं विहायायं क्रम आदरणीयः, स च प्रयोगो लिख्यते। "यथा श्राद्धं यथा प्रकाशं" इति शङ्खवचनात्। यस्य नाम प्रकाशते तत् स्मर्य्यते, श्रद्धायां सत्यां तस्य तर्पणं कार्य्यं। नासवर्णे कदाचनेति निषेधात्। ब्राह्मणेभ्य एव देयं, विष्णुपुराणे, "स्निग्धमिच्छाय भूभुज" इत्यन्तं पितृतर्पणमुक्त्वा—

"इदं चापि जपेदम्बु दद्यादात्मेच्छया नृप!।
उपकाराय भूतानां कृतदेवादितर्पणः" ॥

"देवासुरास्तथा यक्षा-नागा-गन्धर्व-राक्षसाः ।
पिशाचाः गुह्यकाः सिद्धाः कुष्माण्डास्तरवः खगाः ॥
जलेचरा भूनिलया वाय्वाहाराश्च जन्तवः ।
तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुना ऽखिलाः ॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥
ये वान्धवा अवान्धवा अन्यजन्मनि वान्धवाः ।
ते तृप्तिमखिलां यान्तु ये चास्मत्तोयकांक्षिणः ॥
काम्योदकप्रदानं ते मयैतत्कथितं(१) नृप!" ।

इदं जपेदम्बु दद्यादिति लिङ्गवाक्याभ्यां मन्त्रस्याम्बुदाने सम्बन्धः । अग्निहोत्रं जुहोति, यवागूं पचतीतिवत्करणश्रुत्यभावेऽप्यदृष्टार्थत्वप्रसङ्गभयेन लिङ्गवाक्याभ्यां विनियोगात्, न तु मन्त्रपाठो नित्यः, अम्बुदानं मन्त्रेण वैकल्पिकं, समन्त्रकाम्बुदानमेव काम्यं, काम्योदकप्रदानमित्युपसंहारात्, अम्बुदानेन मन्त्रसम्बन्धस्य काम्यत्वे तदसंगतेः । पितृतर्पणानन्तरं पाठाच्च प्रायश्चित्तदर्शने न पैत्रेण तीर्थेन इति पूर्वोक्तानुषङ्गात् पित्र्यविधया तर्पणं पाठक्रमे वाधकाभावाच्च, यथापाठमिहैव कृतदेवादितर्पणमिति लिङ्गाच्च, इदं च सर्वं स्नानाङ्गतर्पणेऽपि । तथाच विष्णुः,— ततः सम्बन्धिवान्धवाः, ततः सुहृदः, एवं नित्यस्नायी भवतीति स्मृत्यन्तरोक्तानां सर्वेषां तर्पणं स्नानाङ्गमित्युक्तं भवति । कात्यायनः,— निष्पीड्य स्नानमाचम्य ब्राह्म्यवैष्णवरौद्रमाविचीमैत्रावरुणैस्तु लिङ्गैरर्चयेत् ।

(१) कथितं तव ।

स्नानवस्त्रमित्येकत्वमविवक्षितं, "स्नानशाट्यां प्रदातव्या मृदस्तिस्रो विशुद्धये," इति वचनान्मन्त्रत्रयेण शोधयित्वा निष्पीड़नं ।

याज्ञवल्क्यः,—

"वस्त्रनिष्पीड़नं तोयं स्नातस्योच्छिष्टभागिनां ।
भागधेयं श्रुतिः प्राह तस्मान्निष्पीड़येत् स्थले" ॥

अन्यप्रकरवत्तस्यापसव्येन पीड़नं, तथा,— "असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलिं," एतच्च प्रतिपत्तिकर्मापि, स्विष्टयावत् यागाङ्गांशेनादृष्टार्थं च, तेन भ्रान्त्या स्नानवस्त्रस्य निष्पीड़नेनांशे वा अकृतस्नानस्य वा तर्पणे तिलान्तरेणास्य असंस्कृतप्रमीतानुद्दिश्य जलत्यागः कार्य्यः । स्नातस्येति वाक्येन प्रकरणं वाधित्वास्य स्नानाङ्गत्वं । तेन तर्पणरहिते क्रियाङ्गस्नाने पादं प्रवर्त्तत इति केचित् । तन्न, स्नानपदस्य प्रकृतमाध्याह्निकस्नानपरत्वात्, अन्यथा, प्रयाजे कृष्णलं जुहोतीत्यत्र प्रकृतप्रयाजवाधेन सर्वयागाय प्रयाजशेषतापत्तेः, वै (१)मृधेऽपि न प्रकरणवाधो व्यवस्थामात्रं तु प्रकरणेन दर्शाङ्गतापि प्राप्ता, तत्र उच्छिद्य पौर्णमासमात्रे व्यवस्थापनात् । सान्नाय्यधर्माणां लिङ्गेन दर्शाङ्गत्वात् ।

याज्ञवल्क्यः,—

"पीड़यित्वा ततः पश्चाज्जपं कुर्य्यात् सुविस्तरं" ।

"अजपो पूयशोणित"मित्यादिना विष्णुपुराणे नित्यजपो य उक्तस्तस्यायं कालविधिः । ततो ब्रह्मयज्ञ एव जपयज्ञः ।

(१) वै मृधेऽपि ।

"ये पापयज्ञास्त्वारो विधियज्ञसमन्विताः ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीं" ॥

इति ब्राह्मयज्ञे जपयज्ञप्रयोगात् ।

तथा,—

"यस्य श्रुतिजपः प्रोक्तो जपयज्ञः स उच्यते"। इति वाच्यं।

याज्ञवल्क्ये,—

"तर्पणात् पूर्वमारभ्य वेद"मित्यादिना ब्रह्मयज्ञमुक्का तर्पणान्ते पुनर्जपं कुर्य्यादिति विधानात्, न च तस्यैव कालविधिः । अनुपादेयं कालं प्रति जपकरणे विधाने कर्मान्तरत्वात्। मासमग्निहोत्रं जुहोतीतिवत् । न च विविदिषन्ति यज्ञेन दानेनेत्यादिवत् रूपाज्ञानादकर्मान्तरत्वं । नाघमर्षणात्परमन्तर्जले जपो न व्याहृतिभ्यः परं होमेन सावित्र्याः परं जप्य इति शंखेन जपसामान्यमुद्दिश्य गायत्रीविधानात् । न च तथा सति तर्पणाङ्गत्वप्रसङ्गः, स्नानवस्त्रजलप्रतिपत्त्या तर्पणसमापनात् । "निष्पीड़यति यः पूर्वं स्नानवस्त्रं तु तर्पणा"दिति पूर्वं तर्पणसमाप्तेः पूर्वं वस्त्रनिष्पीड़ने दोषकथनं। अत्र[1] च वस्त्रनिष्पीड़नकथनं आचमनान्तं तर्पणसमाप्तिं द्योतयन्ति। न च समाप्तस्य पुनरङ्गसम्भवः। किंच मनुना स्नातकव्रतकरणे;— "ऋषियज्ञं देवयज्ञं भूतयज्ञमित्यत्र ऋषियज्ञपदेन ब्रह्मयज्ञमुक्का,—

"मङ्गलागारयुक्तानां नित्यं च प्रयतात्मनां ।
जपतां जुह्वतां चैव विनिपातो न विद्यते" ॥

(१) अन्ते च।

इति जपस्य फलार्थत्वमुक्का"वेदमेव जपेन्नित्य"मिति तस्यैव जपस्य वेदमन्त्रसाध्यस्य नित्यत्वमादर्शितं। सन्ध्याजपादिकं च पृथक् तत्रैव कथितं। तेन पुरुषार्थस्यैव जपस्यायंकालः। एतेनास्य स्नानाङ्गत्वं प्रत्युक्तं। अतएव ब्रह्मविष्णुप्रमुखानां देवानां पूजनमपि न स्नानाङ्गं। न वा तर्पणाङ्गं। वस्त्रनिष्पीड़नान्ते तर्पणस्नानयोः समाप्तत्वात् । तीर्थविसर्जनमात्रमेव हि स्नानाङ्गलिङ्गात् तदादायैव स्नान[1]विधेरेव इति कात्यायनस्यान्ते उपसंहारः। यथा शान्तपनीयां वहिर्गृहमेधीयस्य करणाद्वहिर्होममात्रस्योत्कृष्टस्य गृहमेधीय समाप्तौ शान्तपनीयाः सः स्थाप्येति वचनं वहिर्होममात्रमपेक्ष्य, अतएवैषां तर्पणोत्तरकर्म इति समाख्या, यत्तु याज्ञवल्क्ये,—

"उपस्थानादिर्यस्तावान् मन्त्रवान् कीर्त्तितो विधिः ।
निवेदनान्तं तत्स्नानमित्याहुर्ब्रह्मवादिनः" ॥

इति, उदुत्यं चित्रमित्यादि देवाः पान्तुत्विदं जप्य निवेदनमित्यन्तकर्मकलापस्य स्नानपरिभाषा, नानेन[2] तर्पणादीनां सन्ध्याब्रह्मयज्ञादीनामपि स्नानाङ्गता ।

तथा सति प्रातःस्नानादावतिदेशे बहुविरोधात्, किन्तु [3]स्नानप्रसङ्गेर्दियं। बहुप्रकरणत्वेन यथासम्भवं, तीर्थविसर्जनान्तरितकर्मसम्पत्त्या, अन्यथा उपस्थानप्राशनपादप्रक्षालनाचमनादे[4]रङ्गतापत्तेः, न च परिभाषायाः प्रयोजनान्तरं दृश्यते। तथा सति

(१) विधिरेष। (२) अन्तर्गतानां।
(३) स्नानप्रशंसैव। (४) रनङ्गतापत्तेः।

तदेव प्रयोजनं, न तु तन्मध्यगतानां सर्वेषां पुरुषार्थत्वेनावगतानां दर्शप्रकरणगतगोदोहादीनां स्नानाङ्गत्वं। अतएव यद्विष्णुस्मृतौ,—वस्त्रनिष्पीडनानन्तरं ततो यज्ञोपवीती भूत्वा सदाचम्य पुरुषसूक्तेन प्रत्यृचं पुरुषाय पुष्पाञ्जलिं दद्यात्, उदकाञ्जलिं वा एवं नित्यस्नायी स्यादिति तेनापि पुरुषसूक्तपूजायाः स्नानाङ्गत्वं, येन प्रातःस्नानेनेतिदेशः, एवं पदेन वस्त्रनिष्पीडिना तु पदार्थानामेव परामर्षात्। तत् सिद्धं नित्य(१)स्नायं कालः।

विष्णुपुराणे,—

"आचम्य च ततो दद्यात्सूर्य्याय सलिलाञ्जलिं।
नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे॥
आगच्छ(२) सवित्रे शुचये सवित्रे कर्मदायिने"।

नरसिंहपुराणे,—

"ततोऽपि(३) भाजने दद्यात्तिलपुष्पजलान्वितं।
उत्थाप्य मूर्ध्नि पर्य्यन्तं हंसः शुचिषदित्यृचा"॥

हंसः शुचिषदित्यर्घ्यं दद्याद्भानवे इत्यर्थः।

प्रधानक्रियान्वयस्याभ्यर्हितत्वात्। तथाच नमो विवस्वत-इति मन्त्रेण सह विकल्पः।

पद्मपुराणे,—

"आचम्य विधिवत्सम्यगालिख्योत्पद्ममग्रतः।
अक्षताभिः सपुष्पाभिः सतिलारुणचन्दनैः॥

(१) नित्यजपस्य —। (२) जगत्सवित्रे। (३) ततोऽर्घ्यं भानवे—।

(१)अर्घ्यं दद्यात्प्रयत्नेन सूर्य्यनामानुकीर्त्तनैः।
नमस्ते विष्णुरूपाय नमस्ते विष्णुरूपिणे॥
सहस्ररश्मये तुभ्यं नमस्ते सर्वतेजसे।
नमस्ते रुद्रवपुषे नमस्ते भक्तवत्सल!॥
जगत्स्वामिन्नमस्तेऽस्तु कुण्डलाङ्गदभूषित!।
पद्मनाभ! नमस्तेऽस्तु दिव्यचन्दनरूपधृक्॥
नमस्ते सर्वलोकेश! सुप्तानामपि बुध्यसे।
सुकृतं दुष्कृतं चापि सर्वं (२)पश्यति सर्वदा॥
सत्यदेव! नमस्तेऽस्तु प्रसीद मम भास्कर!।
दिवाकर नमस्तेऽस्तु प्रभाकर नमोऽस्तु ते॥
एवं सूर्य्यं नमस्कृत्य त्रिः कृत्वा च प्रदक्षिणं।
द्विजं गां काञ्चनं स्पृष्ट्वा ततो विष्णुगृहं व्रजेत्॥

अत्र अक्षताभिः अर्घ्यं दद्यादिति पूर्वेण सम्बन्धः।

सूर्य्यनामानुकीर्त्तनैः,—

नमस्कृत्येति परेण सम्बन्धः, तेनार्घदानानन्तरं नमस्ते विष्णुरूपायेत्यादिना सूर्य्यनमस्कारः प्रदक्षिणत्रयं चार्घदानाङ्गं।

याज्ञवल्क्यः,—

"निष्पीड्य स्नानवस्त्रं तु आचम्य प्रयतः शुचिः।
देवानामर्चनं कृत्वा ब्रह्मादीनाममत्सरः॥
ब्रह्मवैष्णवरौद्रैस्तु सावित्रैर्मन्त्रवारुणैः।
तल्लिङ्गैस्तर्पयेन्मन्त्रैः सर्वान् देवान् समाहितः॥

(१) अर्घं। (२) पश्यसि।

ध्यात्वा प्रणवपूर्वं तु दैवतं तु समाहितः ।
नमस्कारेण पुष्पाणि विन्यसेत्तु पृथक् पृथक् ॥
आवाहनादिकं कर्म यत्तु नोक्तं मया त्विह ।
तत्सर्वं प्रणवेनैव कर्त्तव्यं चक्रपाणिनः ॥
दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप-एव वा ।
अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् ॥
विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः ।
तस्मात् पूज्यतमं[१] नान्यमहं मन्ये जनार्दनात् ॥
सावित्र्या दद्याद्रूपादि यथाशक्ति समाहितः ।
एवं संपूज्य देवेशं क्षणं ध्यात्वा निरञ्जनम् ।
ततोऽवलोकयेदर्कं हंसः शुचिषदित्यृचा ॥
स याति ब्रह्मणः सद्म स्नात्वैवं कृतवान् तु यः ।
अदृश्रमस्येति मन्त्रैरुपस्थाय दिवाकरम् ॥
संवर्चस्येति पाणिभ्यां तोयेन विमृजेन्मुखम् ।
स्वयम्भुरित्युपस्थाय सूर्य्यस्येति प्रदक्षिणम् ॥
आवृत्य तु नमः कुर्याद्दिशोदिग्देवता अपि ।
ब्रह्मणेऽग्नये पृथिव्यै ओषधीभ्यस्तथैव च ॥
वाचे च वाचस्पतये विष्णवे महते तथा ।
एताभ्य देवताभ्यश्च नमस्कारादि वै जलं ॥
दत्त्वा नमस्ये क्रमशः स्वान्ते वै सर्वकर्मणां ।
नमोऽबभ्योऽपां पतये वरुणाय नमो नमः ॥

---

(१) पुण्यतमं ।

इत्युक्त्वापो नमस्कृत्यावनौ वेदांश्च नामवत् ।
इदमापः प्रवहत धाम्नो धाम्नस्तथैव च ॥
विमोचनं तु तीर्थस्य आप्यायस्वेति वै जपेत् ।
देवा गातु[१] विद इति कृत्वा जप्यनिवेदनं ॥
प्रक्षाल्य तीर्थदेशं तु गत्वा स्वं धर्ममाचरेत्" ।

ब्रह्माविष्णुमहेश्वरा एकैकेन मन्त्रेणार्चनीयाः, सविता मित्रो वरुणश्च त्रिभिरेव उपादेयगतबहुत्वस्य विवक्षितत्वात् तल्लिङ्गै-र्ब्रह्मादिदेवताप्रकाशनसमर्थैः । ध्यात्वेति पुराणोक्तरूपां देवता-मूर्त्तिं ध्यात्वा तल्लिङ्गमुच्चार्य्य तदन्ते प्रणवदेवतानां नमःपदा-न्युक्त्वा, ॐ ब्रह्मणे नम इत्येवं पृथक् पृथक् प्रतिदैवतं पुष्पं विन्यसेत्, जले क्षिपेदिति पूजाप्रकारः पुष्पदानमन्त्रेणेत्यर्थः, विष्णुपूजायां विशेषः, प्रणवेनावाहनादि पुरुषसूक्तेन समस्तेन पुष्पदानं, समस्तस्य करणत्वेन श्रुतेः, तेन तद्विरुद्धं, विष्णु-स्मृतिगतं प्रत्येकस्य पुष्पदानसाधनत्वमन्त्रं न ग्राह्यं, उदकदानं वा पुष्पाभावे, गायत्र्याद्युपवासनान्तं कर्म निरञ्जनं निष्प्रपञ्चं ब्रह्म, अत्र नियुक्तान् पुरुषान् ब्रह्मपुरुषेण नारायणेनाभिष्टौतीत्यत्र श्रुत्या मन्त्रगतपुरुषपदस्य नारायणपरत्वेन व्याख्यानान्मन्त्रलिङ्ग-स्यापि नारायणपरत्वाद्विरुद्धश्रुतिगतपुरुषोत्तमनरसिंहविष्णुचक्र-पाणिपदानां पूजावाक्यश्रुतानामप्यनादरः, नरसिंहपुराणे, ध्येयः सदेति नारायणमूर्त्तिध्यानमुक्तं एवं नारायणाय पुष्पं ददानीति प्रयोगः, अतएव प्राचीनपद्धतौ तथैव लिखनं समाचारोऽप्येवं, दिशः

---

(१) देवा गात्र-विद-इति ।

प्रतिच्यादिकाः, दिग्देवता इन्द्राद्या । दिग्भ्यो नमः, दिग्देवताभ्य इति केचित्, अवनौ भूमौ देवनमस्कारो नामवत्, ऋग्वेदाय नम इत्येवंक्रमेण, आप्यायस्वेति जपस्य देवाः गातु विद इति-वेदनं अनेन जपेन परमात्मा प्रीयतामित्येवं रूपेण ।

अथ स्नानपद्धतिः, चतुर्थभागे-उक्तलक्षणमृत्तिकास्त्रीगोसम्बन्धि-दिवसगृहीतगोमय-तिल-पुष्प-यव-कुश-दूर्वा-चन्दनादिकमादाय ग्रामात् पूर्वेणोत्तरेण वा वहिर्भूय जलाशयं गत्वा जलाशयसमीपे स्नानोपकरणस्थापनं द्विवासां पवित्रोपग्रहश्च(१) आचमेत्, नारायण-नमस्कारः, त्रिमात्रप्रणवोच्चारणं, नारायणमन्त्रेण समन्ताच्चतुर्हस्त-परिमिततीर्थकल्पनं ।

"विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता ।
पाहिनस्त्वेनसस्तस्मादाजन्ममरणान्तिकात् ॥
तिस्रः कोट्यर्द्धकोटी च तीर्थानां वायुरब्रवीत् ।
दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवी ॥
नन्दिनीत्येव ते नाम देवेषु नन्दिनीति च ।
नन्दा पृथ्वी च सुभगा विश्वकाया शिवा शिता ॥
विद्याधरी सुप्रसन्ना तथा लोक(२)प्रसाधिनी ।
क्षेमा च जाह्नवी चैवं शान्ता शान्तिप्रदायिनी ॥
भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी ।
गङ्गे! देवि! नमस्तुभ्यं प्रसीद परमेश्वरी ॥

(१) त्रोपग्रस्थः ।　　(२) प्रसादिनी ।

गङ्गेऽत्रागच्छेत्यावाहनं मृदः किंचित् पृथक् स्थापयित्वा अपरं च वक्ष्यमाणविनियोगानुरोधेन अधिकन्यूनमध्यपरिमितिं कृत्वा स्थापनं, गोमयं द्विधा विभज्यार्द्धस्य त्रिभागकरणम् ।

"अश्वक्रान्ते! रथक्रान्ते! विष्णुक्रान्ते! वसुन्धरे! ।
मृत्तिके! हर मे पापं यन्मया दुष्कृतं कृतं ॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
नमस्ते सर्वलोकानां प्रभवारणि सुव्रते!" ॥ इति—

मन्त्रेण मृद्भागानामभिमन्त्रणं । आद्यभागैकदेशेन नाभेरधः, द्वितीयभागांशेन शिरसस्तृतीयभागांशेन मध्यकायस्य क्षालनं, मृद्भागानां शिष्टानां रक्षणं ।

"अग्रमग्रं चरन्तीनामोषधीनां रसं वने ।
तासामृषभपत्नीनां पवित्रं कायशोधनं ॥
तन्मे(१) रोगांश्च शोकांश्च पापं च नुद गोमय!" ।

इति क्षालनकाले पठता गोमयाद्यभागेनाधःकायस्य, द्वितीय-भागेन शिरसः; तृतीयभागेन मध्यकायस्य क्षालनं । त्रिधा कृतगोमयस्य न रक्षणं कार्याभावात् । मृत्त्रयेण पादयोः क्षालनं, एतच्चाङ्गप्रक्षालनं पादक्षालनं च तीरे कृत्वा सकृदाचमनं ।

"हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ।
यन्मे वाचा च मनसा कर्मणा दुष्कृतं कृतं" ॥

"तन्न इन्द्रो वरुणो बृहस्पतिः सविता पुनातु पुन"रिति,

(१) त्वं मे ।

जले प्रवेशः। शुनःशेफऋषिः त्रिष्टुप्छन्दः, वरुणो देवता । जलोपस्थाने विनियोगः । "ॐ उरुं हि राजा वरुणश्चकार सूर्याय पन्था मन्वे तवाऽउ । अपदे पादाप्प्रतिधातवे करुतापवक्ता हृदयाविधश्चित्" । इति वद्धाञ्जलिं तोयाभिमुखं पाठः । शुनःशेफऋषिः [1]अनुष्टुप्छन्दः, वरुणसवितृविष्णुविश्वमरुत्स्वर्का देवताः, जलावर्त्तने विनियोगः । "ॐ ये ते-शतं वरुण-ये सहस्रं यज्ञियाः पाशावितता महान्तः, तेभिर्नो अद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः" । इति जलस्य हस्तेन प्रदक्षिणावर्त्तनं । परमेष्ठिऋषिः, यजुः, वरुणो देवता, "ॐ सुमित्रियानऽ आपऽ ओषधयःऽ सन्तु" इति वरुणं स्मृत्वा जलाञ्जलिग्रहणं, परमेष्ठी प्रजापतिऋषिः, यजुः, वरुणो देवता, ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति द्वेष्यं ध्यात्वा यस्यां दिशि [2]द्वेष्टास्ति तत्र जलाञ्जलिप्रक्षेपः, द्वेष्याभावे तूत्तरस्यां प्रक्षेपः ।

कटिनाभ्यधोदेशोरुद्वय-जंघाद्वयपादद्वयानां प्रत्येकं आद्यभागमृदा त्रिः क्षालनं, द्वितीयभागमृदा नाभ्यूर्द्ध्वकण्ठपर्यन्तं द्विःक्षालनं, ततो हस्तद्वयोर्मृदा त्रिः प्रक्षालनं, सर्वकायक्षालनं, द्विराचमनं, जलाय नम इति जलनमस्कारः, वशिष्ठऋषिः, त्रिष्टुप्छन्दः, वरुणो देवता, यत्किञ्चेदं दैव्ये जनेऽधिद्रोऽहं [3]मनुष्याश्चरामि, अचिन्तय [4]भव धर्मायुषोऽसि मिमानस्तस्मादेनसो देवरीरिषः । जलाय नम इति जलनमस्कारः ।

(१) त्रिष्टुप्छन्दः । (२) द्वेष्योऽस्ति ।
(३) मनुष्याश्चरामसि । (४) तव ।

"प्रपद्ये वरुणं देवमम्भसां पतिमूर्जितं ।
याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥
तीर्थमावाहयिष्यामि सर्वापद्विनिसूदनं ।
सान्निध्यमस्मिन् वै तोये भजतां मदनुग्रहात्" ॥

गङ्गेऽत्रागच्छेत्येवं तीर्थमामन्त्र्यावाहनं, उद्धृतस्थाने यस्मात्तीर्थाज्जलमाहृतं तस्यैव तीर्थस्यावाहनं, आवाहनकाले मनसा तीर्थदेवता-सान्निध्यचिन्तनं, क्वचिमेऽक्वचिमे प्रसिद्धनामके कुरुक्षेत्रगयागङ्गापुष्करान्यतमस्मरणं । शुनःशेफऋषिः, त्रिष्टुप्छन्दः, वरुणो देवता, "उदुत्तमं वरुणपाशमस्मदवाधमं विम ध्यमꣳ श्रथायꣳ, अथावयमादित्यव्रते तवानागसो ऽदितये स्याम" । इति मन्त्रेण प्राङ्मुखस्य नारायणस्मरणेन जलप्रवेशपरिकल्पिततीर्थस्थत्यन्तराज्जलावतरणनिमित्तकं सकृदाचमनमिति केचित् । नाभिमात्रे प्राङ्मुखस्य स्मरणं । येन देवात्रयस्य मधुछन्दऋषिः, द्वायोरनुष्टुप्छन्दः, तृतीयस्य त्रिष्टुप्छन्दः, [1]पवमानः सोमोदेवता, जलालम्भे विनियोगः । "येन देवाः पवित्रेण आत्मानं पुनते सदा, तेन सहस्रधारेण पावमान्यः पुनन्तु मां" । "प्राजापत्यं पवित्रं च ततोद्दामं हिरण्मयं, तेन ब्रह्मविदो वयं पुत्रं ब्रह्मपुनीमहे," "इन्द्रः सुनीती सहसा पुनातु सोमः [2]सव्यावरुणः समीच्या । यमोराजा[3]प्रसृणिभिः पुनातु मा जातवेदा मूर्जयन्त्या पुनातु," इति परिकल्पिततीर्थजलस्य हस्तेना[4]वमर्षः, ततस्तीरं

(१) तीर्थमान । (२) स्वत्य ।
(३) प्रसृत्याभिः । (४) स्पर्शः ।

गत्वा भूर्भुवः स्वरिति व्याहृतित्रयेण द्विराचमनं, सकृद्वा, मेधा-
तिथिर्ऋषिः, गायत्रीछन्दः, ॐविष्णुर्देवता, "इदं विष्णुर्विचक्रमे
त्रेधानिदधे पदं समूलमस्य पांसुरे" इति त्रिधाकृतव्यतिरिक्तमृदा
सर्वाङ्गलेपनं, नात्र चालनं, सकृदाचमनं, नारायणं स्मरतः शनैर्जले
प्रवेशः, प्रजापतिर्ऋषिः। यजुः, आपोदेवता। "ॐ आपोऽस्मा-
न्मातरः शुन्धयन्तु घृतेन नो घृतः पुनन्तु, विश्वंहिरिप्रं प्रवहन्ति
देवीः," इति मन्त्रेण प्रवाहाभिमुखस्य प्रवाहाभावे सूर्याभिमुखस्य
वा जलमज्जनं, हरिस्मरणं, प्रजापतिर्ऋषिः, यजुः, आपोदेवता,
"ॐ उदिदाभ्यः शुचिरा पूत एमिं उत्थानं," ततो गात्रमुद्घृष्य
पुनःपुनर्निमज्योन्मज्जनं। सकृदाचमनं पुनस्तीरगमनं। कुत्स-
ऋषिः, जगती छन्दः, रुद्रोदेवता, "मानस्तोके तनये मानगोषु
मानोऽश्वेषुरीरिषः, मानोवीरानुद्रभामिनो वधीर्हविष्मन्तः सद-
मिलाहवामहे" इति गोमयेन सर्वाङ्गलेपनं, लेपनकालेऽश्मग्र
चरन्तीनामित्यस्य क्रियमाणानुवादिनोऽपि जपः। वशिष्ठोक्त-
काण्डादितिदूर्वया अङ्गस्पर्शनं वैकल्पिकं। गोमयलिप्ते गात्रस्यैव
जलस्यस्याभिषेकः। स च यथाक्रममितिवचनात् प्रत्येकमन्त्रेण
शिरसि जलाञ्जलिदानरूपः, मन्त्रस्याष्टभेदादष्टभिन्नः, शुनःशेफ-
ऋषिः, गायत्रीछन्दः, वरुणोदेवता, "ॐ इमं मे वरुण श्रुधी हव
मद्या च मृडय त्वामवस्युराचके," प्रथमाभिषेकमन्त्रः, शुनःशेफऋषिः,
त्रिष्टुप्छन्दः, वरुणो देवता, "तत्वायामि ब्रह्मणा वन्दमानस्तदाशा-
स्तेयजमानोहविर्भिः, अहेलमानो वरुणेहवोध्युरुशंस मान
आयुः प्रमोषीः," द्वितीयः, प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः अग्नि-

वरुणौदेवता, "त्वन्नो अग्ने वरुणस्य विद्वान्, देवस्य हेलो अवयासि-
सीष्ठाः, यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांसि प्रमुमुग्ध्य-
स्मत्"। तृतीये च, प्रजापतिऋषिः, त्रिष्टुप्छन्दः, अग्नीवरुणौ
देवता, "सत्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ,
अवयक्ष्वनो वरुणं रराणो वीहिमृलीकं सुहवो न एधि"
चतुर्थः, (१)प्रजापतिऋषिः, गायत्रीछन्दः, वरुणोदेवता, "ॐ
मापो मौषधीर्हिंसीद्धाम्नो धाम्नोराजंस्ततो वरुण नो मुञ्च"।

"यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च"।
पञ्चमः, उदुत्तममिति। षष्ठः, अथर्वणऋषिः, अनुष्टुप्छन्दः, ओषधयो
देवता, "मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत। अथो यमस्य पड्वीशात्
सर्वस्माद्देवकिल्बिषात्। सप्तमः, प्रजापतिऋषिः, यजुः, अवभृथो
देवता, "अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः। अवदेवै-
र्देवकृत मेनोऽयासिषमवमर्त्यैर्मर्त्यकृतं पुरुराव्णोदेवरिषस्पाहि"।
अष्टमः, इदमाप इति स्थाने पञ्चम्याभिषेको मापो मौषधीरिति
यजुर्मुञ्चेत्यन्तं, कण्डिकात्मकं चेत् कुर्वन्ति पाठभेदमभ्युपगम्य प्राचं
त्विदमाप इति पाठः, ततः पूर्ववज्जले निमज्योन्मज्याचमनं, ततो
मार्जनारम्भः, कुशत्रयेणान्तर्गर्भं, साग्रेण शिरसि जलप्रक्षेपः, प्रणवेन
शिरस्यञ्जलिनाभिषेकः, ततो व्याहृतित्रयेणाभिषेकः गायत्र्या-
भिषेकः, पुनः प्रणवेन शिरसि कुशैर्मार्जनं, अथ व्याहृतित्रयेण,
अथ गायत्र्या मार्जनं, आपोहिष्ठेति त्र्यृचस्य इत्यन्तेनैकं मार्जनं,

---

(१) प्रभासऋषिः।

योवोमान्तर इत्यन्ते च द्वितीयं, तस्मा अरं च न इत्यन्तेन तृतीयं, इदमाप इति चतुर्थं, प्रजापतिऋषिः, अनुष्टुप्छन्दः, आपोदेवता, मार्जने विनियोगः, "ॐ हविष्मतीरिमां आपोहविष्माꣳ आविवासति हविष्मान्देवो अध्वरो हविष्माꣳ अस्तु सूर्य्यः," अनेन पञ्चमं मार्जनं, प्रजापतिऋषिः, अनुष्टुप्छन्दः, गायत्रीछन्दः, आपोदेवता, अग्नये नैकोमन्त्रः, कण्डिकाग्रहणात्, "ॐ देवीरापो अपान्नपाद्योव ऊर्म्मिर्हविष्य इन्द्रियावान्मदिन्तमः, तं देवेभ्यो देवत्रादत्त शुक्रपेभ्यो, येषां भागस्थ स्वाहा"। षष्ठं, प्रजापतिऋषिः, अनुष्टुप्छन्दः, आज्यं आपो देवता, "ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि, समापोऽद्भिरग्मत समोषधीभिरोषधीः"। सप्तमं, प्रजापतिऋषिः, त्रिष्टुप्छन्दः, आपो देवता।

"ॐ अपोदेवा मधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः। याभिर्मित्रावरुणा त्रिभ्यषिंचन्याभिरिन्द्रमनयन् नत्यरातीः"। अष्टमः, "द्रुपदादिव" इति नवमं, प्रजापतिऋषिः, अनुष्टुप्छन्दः, आपो देवता, "शन्नोदेवीरभिष्टय आपो भवन्तु पीतये, शंयोरभिस्रवन्तु नः"। दशमं, वृहस्पतिऋषिः, (१)त्रिष्टुप्छन्दः, आपो देवता, "ॐ अपाꣳ रसमुद्वय सꣳसूर्य्ये सन्तꣳ समाहितं। अपाꣳ रसस्य यो रसस्तम्वो गृह्णाम्युत्तमं"। एकादशं, सिन्धुद्वीपऋषिः, वृहतीछन्दः, आपो देवता, "ॐ अपो देवीऋपसृजमधुमतीरयक्ष्माय प्रजाभ्यः। तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः"। द्वादशं, प्रजापतिऋषिः, अनुष्टुप्छन्दः, पितरो देवता, "ॐ पुनन्तु मा पितरः

(१) अनुष्टुप्छन्दः।

सोम्यासः पुनन्तु मा पितामहाः, पुनन्तु प्रपितामहाः, पवित्रेण शतायुषा। विश्वमायुर्व्यश्न वै"। त्रयोदशं, प्रजापतिऋषिः, अनुष्टप्छन्दः, पितरोदेवता, "ॐ पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः, पवित्रेण शतायुषा विश्वमायुर्व्यश्न वै"। चतुर्दशं, वैखानसऋषिः, गायत्रीछन्दः, अग्निर्देवता, "ॐ अग्न आयुꣳषि पवस आसुवोर्जमिषं च नः। अरेवाधस्वदुच्छुनां," पञ्चदशं, प्रजापतिऋषिः अनुष्टुप्छन्दः, देवजानाधियो विश्वा भूतानि जातवेदाश्च देवताः, "ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः, पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा"। षोड़शं, प्रजापतिऋषिः, गायत्रीछन्दः, अग्निर्देवता, "ॐ पवित्रेण पुनीहि मा शुक्रेण देवदीद्यत्। अग्नेक्रत्वा क्रतूꣳ रनु"। सप्तदशं, प्रजापतिऋषिः, गायत्रीछन्दः, (१)अग्निर्देवता, "ॐ यत्ते पवित्रमर्च्चिष्यग्ने विततमन्तरा ब्रह्म तेन पुनातु मा। अष्टादशं, प्रजापतिऋषिः, गायत्रीछन्दः, सोमोवायुर्देवता, "ॐ पवमानः सो अद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु मा"।

ऊनविंशं, प्रजापतिऋषिः, गायत्रीछन्दः, सवितादेवता, "ॐ उभाभ्यां देव सवितः पवित्रेण सवेन च, मां पुनीहि विश्वतः। विंशतितमं, प्रजापतिऋषिः, त्रिष्टुप्छन्दः, (२)सुरुकुम्भीदेवता, "ॐ वैश्वदेवी पुनती देव्यागाद्यस्यामि मावह्वास्तन्वो वीतपृष्ठाः। तया मदन्तः सधमादेषु वयꣳ, स्याम पतयो रयीणाम्"। एकविंशं,

(१) अग्निर्ब्रह्मोदेवता। (२) सुराकुम्भादेवता।

प्रजापतिऋषिः, यजुः, चित्पतिर्देवता, "ॐ चित्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। तस्य ते पवित्र पते पवित्रपूतस्य यत्कामः पुनेतच्छकेयं"। द्वाविंशं प्रजापतिऋषिः, यजुः, "ॐ वाक्पतिर्देवता, वाक्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्र पते पवित्रपूतस्य यत्कामः पुनेतच्छकेयं"। त्रयोविंशं, प्रजापतिऋषिः, यजुः, देवः सविता देवता; "ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयं"। चतुर्विंशं, मार्जनं, एवं मार्जनं कृत्वा तद्विष्णोरिति मन्त्रेण हरिस्मरणं, पुनः प्रणवव्याहृतित्रयगायत्रीभिरभिषेकत्रयं पूर्ववत्, पूर्ववन्मार्जनत्रयं च, [1]पूर्ववदिमं मे वरुणेत्यष्टमन्त्रेण अभिषेकाष्टकं वैकल्पिकं, अन्ते चैतदिति कात्यायनवचनात्, अन्ते मार्ज्जनान्ते च-शब्दान्मार्जनपूर्वं च कथितमेव, पुनर्जले निमज्ज्य, अघमर्षणसूक्तस्य, अघमर्षणऋषिः, इत्यादिस्मरणपूर्वकं त्रिवारं जपः, द्रुपदामन्त्रस्य वा, "ॐ आयं गौः पृश्नीरक्रमीदेत्यृचस्य वा, वामदेव ऋषिः, अतिजगतिछन्दः, सूर्य्योदेवता। ॐ हंसः शुचिषद्वसुरन्तरीक्षसद्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजा अद्रिजा ऋतं बृहत्"। अनेन वारत्रयमन्तर्जलजपः अन्यादि[2]सूक्तानि "ॐ यद्देवा देवहेलन"मित्यादिऋक्त्रयं कुष्माण्डाख्यं पुरुषसूक्तं, शिवसंकल्पसूक्तं, एतेषामन्तर्जलजपः, कात्यायनानुक्तत्वाद्वैकल्पिकः, सशिरस्काद्यप्रणवयुक्तगायत्र्यान्तर्जलजपो वा प्राणायामो वा कात्यायनवचनात्, प्रणवव्याहृतित्रयसहितगायत्र्यन्तर्जले त्रिवारं जपः।

(१) पूर्वोक्त। (२) अत्र सूक्तानि।

प्रणवमात्रस्य वा त्रिवारं, "ॐ तद्विष्णो"रिति मन्त्रेण विष्णोः साकारस्य निराकारस्य वा प्रणव[1] अन्तर्जले स्मरणं, तत्रोत्तमाधिकारिणं प्रतीति कर्काचार्य्यः, एतच्च यद्यपि वैकल्पिकेनोक्तं, पश्चात् प्रायश्चित्तत्वेनोक्तेराशंकिततद्वैगुण्यसमाधानायावश्यमेव विष्णुध्यानं, प्रजापतिऋषिः। "ॐ गायत्रीछन्दः, विष्णुर्देवता। तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततं"। एतेन स्रोताभिमुखस्य वारत्रयं मार्जनं, संभवे—

"दक्षिणावर्त्तशंखेन तिलमिश्रोदकेन च।
उदके नाभिमात्रे तु यः कुर्य्यादभिषेचनं॥
प्राक् स्रोतसि वै नद्यां नरस्त्वेकाग्रमानसः।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति"॥

इति वराहपुराणोक्त प्राक् स्रोतसि नद्यां नाभिमात्रोदके स्थित्वा शङ्खस्थतिलमिश्रोदकेनाभिषेकः, सर्वजलाशयेषु तत्ताम्रपात्रोपरि दक्षिणावर्त्तशंखं कृत्वा तत्र जलं पूरयित्वा शिरसि ग्रहणे सप्तजन्मकृतपापक्षयः, तदुक्तं,—

"दक्षिणावर्त्तशंखेन पात्रं औदुम्बरे स्थितं।
उदकं यः प्रय[2]च्छेत्तु शिरसा हृष्टमानसः।

(१) ब्रह्म। (२) प्रतीच्छेत्तु।

तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति" ॥

इति वराहपुराणीयं कर्त्तव्यं।

विष्णुः,— "[१]शृङ्गोदकं गवां पुण्यं सर्व्वापद्विनिसूदनं"।

ब्रह्मपुराणे,—

"युद्धे भग्नं च यच्छृङ्गं दक्षिणं पतितं भुवि।
निर्मांसं प्राप्य विधिवत् पूरयित्वा[२] जलेन च ॥
स्नानं कृतं तु मुनिभिर्देवैः सिद्धैस्तु सर्वदा।
अलक्ष्मीनाशनं धन्यं सर्वसौभाग्यवर्द्धनं" ॥

एवं

"लाङ्गूलेनोद्धृतं तोयं मूर्द्ध्नि गृह्णाति यो नरः।
सरित्स्वपि प्रयातानां सर्वपापैः प्रमुच्यते ॥
अच्छिन्नपद्मपत्रेण सर्वरत्नोदकेन च।
स्रोतस्यपि नरः स्नात्वा सर्वपापैः प्रमुच्यते" ॥

इदं वराहपुराणोक्तं कार्य्यं।

वराहपुराणे,—

"[३]शृङ्गेण यो गवां स्नायाद्रोहिण्यां द्विजसत्तमः।
स सर्वपापजातानि दहत्याशु न संशयः" ॥

तथा,—

"धेनोस्तनातिनिष्क्रान्तं धारोष्णं वापि यः पयः।
शिरसि प्रतिगृह्णाति स पापेभ्यः प्रमुच्यते ॥

(१) शंखोदकं गवां मूत्रं।
(२) पूजयित्वा व्रजेन च।
(३) प्रवेशे।

अथ काम्यान्तर्जलजपाः, हारीतः, शंखः, "ॐ देवीरापः शुद्धाः," "ॐ हिरण्यवर्णाः शुचयः"। "ॐ आपोऽस्मान् मातर" इति शुद्धवतीरष्टजपे पूतो भवति, "ॐ त्वं सोमतनुकृद्भ्य" इति अप्सु जपेत्तनुकृतादन्यकृताच्च पूतो भवति। "ॐ अग्न आयुंषि पव स" इति सप्तवारमप्सु जपेत्, सर्वपापेभ्यः पूतो भवति, ॐ हंसः शुचिषदिति विमलं पतितं अप्सु जपेत् सर्वपापेभ्य इति पूतो भवति। "ॐ देवीराप" इत्यनुवाकमप्सु जपेत् पूतो भवति, अघमर्षणमन्तर्जलस्त्रिरावर्त्तयित्वा मुच्यते ब्रह्महत्यायाः, सर्वार्त्तिषु अप्सु वा आसमाप्तिकं जपेदापदो मुच्यते।

योगीयाज्ञवल्क्यः—

"द्रुपदा [१]मानसा देवी यजुर्वेदे [२]व्यवस्थिता।
अन्तर्जले त्रिरावृत्य मुच्यते ब्रह्महत्यया" ॥

विद्याकरपद्धतौ, "ॐ आयं गौ पृश्निरक्रमीदित्यृचं गायत्रीं यच्छोऽर्द्धशः, सर्वां वा अन्तर्जले जप्त्वा सर्वपापैः प्रमुच्यते, तथा व्याहृति प्रणवं वा, चत्वारिंशदृङ्केति जले जप्तं सर्वपापघ्नं, "ॐ आपो हि ष्ठेति" पापद्वयमोचनं, "ॐ देवकृतस्ये"त्यादि मन्त्रषट्कजपः पापापहः, [३]कुम्भकाय स्वाहा इति सकृदन्तर्जले जप्तं सम्वत्सर-कृतस्तैन्यं पापघ्नं, अयं पदद्वयात्मक एव मन्त्रो न तदुपलक्षिताष्टक्, [४]कुम्भकाय द्विपदेत्यनुक्रमणि वचनात्, "ॐ यत्किंचेदं वरुण"-मित्यन्तर्जले जप्त्वा सर्वपापक्षयः, "ॐ अग्नेवापिति" शतजपादुप-

(१) नामसा। (२) प्रतिष्ठिता।
(३) जम्भकाय। (४) जम्भकाय।

पातककोटिभ्रूणहत्या-शत-ब्रह्महत्यादिसर्वपापक्षयः, ॐ आपो हि ष्ठेत्यृचं कुष्माण्डत्रयमेव ।

"वृषभं [1]वीरजं, चैव गायत्रीमिति षोड़श: ।
अन्तर्जले जपेन्नित्यं सर्वपापैः प्रमुच्यते" ॥

कुष्माण्डत्रयं, "ॐ यद्देवा देवहेलनमिति" [2]द्वयं, "ॐ द्रुपदा" चतुष्टयं उद्वयमित्यनेन सह ।

वृषभश्चत्वारिशृङ्गेति, [3]वीरजं हंसः शुचिषदिति एतेषां समुदितानां जपेन फलं, उपादेयगत संख्या विवक्षागतः ।

"शतं स्नात्वा तु गायत्र्या शतमन्तर्जले जपेत् ।
अपः शतेन पीत्वा च सर्वपापैः प्रमुच्यते ॥
अयाज्यान् याजयित्वा च तथान्यद्वापि पातकं ।
न सीदेत् प्रतिगृह्णानः पृथिवीं च ससागरां" ॥

स्नायात् शतेन गायत्र्येति योगीयाज्ञवल्क्य पाठाद्विकल्प-भये गायत्र्या शतं जप्त्वा स्नात्वा इति साध्याहारं व्याख्या, तेन शतावृत्त गायत्रीं कृत्वा स्नानमेकमेवेति बोद्धव्यं, पुरुषसूक्तजपः, ऋग्वेद-जपसमफलः । तथा,

"अष्टाक्षरेणाभिषिंचेदभ्युक्षेदथवा पिबेत् ।
पञ्चविंशतिकृत्वो हि मुच्यते तेन चैनसः" ॥

तथा—

"नारसिंहे न च जलं प्रक्षिपेन्मूर्द्ध्नि मन्त्रवित् ।
सर्वपापविशुद्धात्मा याति ब्रह्मसनातनं" ॥

(१) वानरं । (२) त्रयं । (३) वीरगां ।

तथा, नाभिमात्रजले स्थितः, शतकृत्वः ॐकारमुक्त्वा जलं पिबेत्, सर्वपापनाशाय, बौधायनोक्तं, ॐ भूर्भुवः स्वरिति त्रिराचम्य द्विर्मुखं विमृज्य सव्यं पाणिं संयोज्य पादौ शिश्ने हृदयं नासिके चक्षुषी श्रोत्रे चोपस्पृशेत्, एतत् सर्वपातकनाशनं, तथा यदर्वाक् महापातकेभ्यः सर्वमनेन पूयत इति उपक्रम्य वशिष्ठेनोक्तं तथा-चामेत्, तथा "ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो [1]मुच्यन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यां उदरेण शिश्ना ऽहस्तदवलुम्पतु यत्किंचिद्दुरितं मयि, इदे-महमापोऽमृतयोनौ [2]सूर्य्ये ज्योतिषि परमात्मनि जुहोमि स्वाहा"। "ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु, यत् किंचित् दुरितं मयि। इदमहमापोऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा"।

"ॐ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां ॥
यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम ।
सर्वं पुनन्तु मामापो असतां च प्रतिग्रहꣳ स्वाहा" ॥

अन्तर्जलजपस्य, जलमग्नस्यैव जपक्रियाया उच्चारणरूपाया जलमध्याधारत्वस्यान्यथा सम्भवात्, इति काम्यानि, एवं स्नात्वा तैलस्पर्शन-शिरोवस्त्रा[3]वधूनन-म्लेच्छान्त्यपतितसम्भाषणपर-पात--

(१) रक्षन्तां । (२) सत्ये । (३) नव ।

जलताड़न-जलमध्यसंचलनप्रतरण-वस्त्रमल-निर्णेजनपात्रमलक्षालन-हस्तपादकरण-जलताड़न-जलक्षोभणानां वर्जनं, प्रमादात् करणे "ॐ नमोऽग्नयेऽप्सुमते, नम इन्द्राय, नमो वरुणाय, नमो वारुण्यै, नमोऽपस्य" इत्यपामुपस्थानं प्रायश्चित्तं, अन्यदपि प्रातःस्नानोक्तानि स्नानाङ्गानि तद्वैगुण्ये विष्णुस्मरणं प्रायश्चित्तं, ततः प्रातःस्नान-कथितमार्गेणाचमन-वस्त्रपरिधानतिलकग्रहणादिकरणम्।

भविष्यपुराणे—

"[1]स्नातस्य वर्णकं द्द्यं नित्यं कुर्याद्विशांपते।
प्रियङ्गुचन्दनाभ्यां वा विल्वेन तगरेण वेति"॥

नात्र मृत्तिकाग्रहणं, इति केचित्। समाचाराद्गङ्गामृत्तिका-ग्रहणमिति कर्काचार्याः, ततः सन्ध्या प्रातःसन्ध्यावत् अञ्जलि-दानान्तरं अञ्जलौ पुष्पमिश्रयणनियमः, गायत्रीध्यानं, मध्यसन्ध्या, वैष्णवी शङ्खचक्र-गदापद्महस्ता युवती शुक्लवर्णा शुक्लाम्बर-द्वयोपेता गरुडमारुह्य विष्णुलोकादागत्य सूर्य्यमण्डले प्रविष्टेति ध्यानं, तेजोऽसीत्यावाहनं, उपस्थाने विशेषः, प्रकण्व ऋषिः. अनुष्टुपछन्दः, सूर्य्योदेवता, उपस्थाने विनियोगः। "ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरं ज्योतिः देवं देवत्रा सूर्य्य-मगन्म ज्योतिरुत्तमं"। अनेन सूर्य्योपस्थानं, उपस्थाने चात्र [2]व्याहृत्यनियमः, एवं "ॐ उदुत्य"मित्यनेन। ॐ चित्रमित्यनेन ॐ तच्चक्षुरित्यनेन चोपस्थानम्।

(१) स्नातस्य। (२) ऊर्द्धबाहुत्वनियमः।

ॐ हंसः शुचिषदित्यनेन चोपस्थानं, ततो गायत्र्या ऋष्यादि-स्मरणं, [1]पञ्चाङ्गन्यासः, गायत्र्युपासनपूर्वकमुपस्थानं, यथोक्तार्थज्ञान-नियमेन, तिर्यक्पाणिना गायत्रीजपः, शतमष्टदशं वा, ततो गायत्र्युपस्थानपूर्वकं गायत्रीविसर्जनं, ऊर्द्धबाह्वोः सूर्य्याभिमुखस्योप-स्थानं, असंसक्तपार्ष्णिरित्यादि प्रातर्वत्, विभ्राड़ित्यनुवाकस्य, ब्रह्मा-स्वयम्भूऋषिः, विभ्राड़िति बृहस्पतिजगती, ॐ उदुत्यं ॐ येन पावकः, ॐ दैव्या अध्वर्युगायत्र्यस्तिस्रः, ॐ तं प्रत्नथा जगती, ॐ अयम्वेनः ॐ चित्रं देवानां, ॐ आनइलाभिस्तिस्रस्त्रिष्टुभिः, ॐ तरणिर्विश्वं, ॐ यदद्यकच्चद्वैव्यै गायत्र्यै, ॐ तत्सूर्यस्य। ॐ तन्मित्रस्य, द्वे त्रिष्टुभौ, ॐ वण्महाꣳ, ॐ वट्सूर्यश्रवसा, ॐ आयन्त इवेति बृहत्यः, ॐ अद्यादेवा, ॐ आकृष्णेनेति द्वे त्रिष्टुभौ, अत्र ॐ तं प्रत्नथा, ॐ अयस्वन चोदनाच्चित्रं देवानामिति ऋक्त्रयं, प्रतीकोक्तं, [2]पूर्वस्थापितं स्मारितं, ॐ लोकं पृण, ॐ अस्येन्द्रं विश्वा इतिवत्, अतएवं च सप्तदशर्चो भवति, प्रथमं विभ्राड़ित्यनुवाकः, "ॐ विभ्राड् बृहत् पिवतु सोम्यमध्वायुर्दधद्यज्ञ पतावविह्रुतं। वातजूतोयो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति। ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यं। ॐ येनापावक चक्षुषभ्युरण्यन्तं जनाꣳ अनु। ॐ त्वं वरुणꣳ पश्यसि। ॐ दैव्या वध्वर्यू आगतꣳ रथेन सूर्यत्वचा। मध्वायज्ञꣳ समञ्जथे, तं प्रत्नथा पूर्वथा विश्वथे मथाज्येष्ठ तातिं वर्हिषदꣳ स्वर्विदꣳ। ॐ प्रतिचीनं वृजिनं दोहसे धुनि माशुक्षयन्त मनुयासुवर्द्धसे।

(१) पञ्चाङ्गन्यासः। (२) पूर्वाम्नातं।

ॐ अयम्वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायुरजसा [१]विमाने। ॐ इममपाꣳ सङ्गमे सूर्य्यस्य शिशुन्नविप्रामतिभिरिहन्ति। ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः, आप्राद्यावा पृथिवी अन्तरीक्षं सूर्य आत्मा जगतस्तस्थुषश्च। ॐ आनदत्ताभिर्विदधेसु-शस्ति विश्वानरः सविता देव एतु, अपियथायुवानो मत्सथानो विश्वं जगदभिपीत्वे मनीषा। ॐ यदद्य कच्चवृत्रहन्नुदगा अभिसूर्य्य। सर्वं तदिन्द्रते वशे। ॐ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचनम्। ॐ तत् सूर्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्विततꣳ सं जभार। यदेदयुक्त हरितः सधस्था-दाद्रात्री वासस्तनुते सिमस्मै। ॐ तन्मित्रस्य वरुणस्याभिचक्षे सूर्य्यो रूपं कृणुते द्योरुपस्थे, अनन्तमन्यद्रुषदस्य पाजः कृष्णमन्यद्धरितः संभरन्ति ॐ वण्महाꣳ असि सूर्य्यबलादित्य महाꣳ असि। महस्ते सतो-महिमापनस्य तेऽद्धादेव महाꣳ असि। वट्सूर्य्य अवसा महाꣳ असि। सवितादेवमहाꣳ असि। गह्नादेवानामसूर्य्यः पुरोहितो विभुज्योतिरदाभ्यं। आयन्त इव सूर्य्यं, विश्वेदिन्द्रस्य भक्षत। वसूनि जाते जनमान ओजसा प्रतिभागं न दीधिम। ॐ अद्या देवा उदिता सूर्य्यस्य निरꣳहसः पिपृता निरवद्यात्। तन्नो मित्रो-वरुणो मामहन्ता-मदितिः सिन्धुः पृथिवी उत द्यौः। "ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्मयेन सविता रथेना देवो याति भुवनानि पश्यन्"। पुरुषसूक्तस्य नारायणऋषिः, पञ्चदशर्चानुष्टुप्छन्दः षोडशात्रिष्टुप्छन्दः जग-

(१) विमाने।

द्वीजं, पुरुषो नारायणो देवता, पुरुषमेधे विनियोगः, पुरुषो वै नारायणो कामयत इति ब्राह्मणं, सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्, सभूमिं सर्वतः स्पृत्वा अत्यतिष्ठद्दशाङ्गुलं। पुरुष-एवेदं सर्वं यद्भूतं यच्च भाव्यं, उतामृतत्वस्येशानो यदन्ने नातिरोहति, एतावानस्य महिमातो ज्यायाꣳश्च पुरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि, त्रिपादूर्द्ध्वं उदैतत्पुरुषः पादोऽस्येहाभवत्पुनः, ततो विश्वं व्यक्रामत्साशनानशने अभि, ततो विराड़जायत विराजो अधिपुरुषः, सजातोऽत्यरिच्यत पश्चाद्भूमिमथोपुरः तस्माद्यज्ञा सर्वहुतः संभूतं पृषदाज्यं, पशुꣳस्ताꣳश्चक्रे वायव्या नारण्या ग्राम्याश्च ये, तस्माद्यज्ञाः सर्वहुत ऋचःसामानि जज्ञिरे, छन्दाꣳसि जज्ञिरे तस्माद्-यजुस्तस्मादजायत तस्मादश्वा अजायन्त ये के चोभयादतः, गावोऽजज्ञिरे तस्मात्तस्माज्जाता अजावयः।

तं यज्ञं वर्हिषि प्रोक्षन्पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये॥

यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन्, मुखं किमस्यासीत्किं वाहू किमूरु पादा उच्यते।

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥
नाभ्यां आसीदन्तरीक्षं शीर्ष्णोः द्यौः समवर्त्तत।

पद्भ्यां भूमि र्दिशः श्रोत्रात्तथा लोकानकल्पयन् ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥
सप्तास्यासन् परिधय स्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञं तन्वाना अवध्नन् पुरुषं पशुं ॥

"यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्, तेऽनाक महिमानः सचयन्त यत्र पूर्वे साध्याः सन्ति देवाः," यज्जाग्रत इत्यस्य षड्कस्य प्रजापतिऋषिः, त्रिष्टुप्छन्दः, मनोदेवता, सूर्योपस्थाने विनियोगः, "यज्जाग्रतो दूरमुदैति दैवं, तदुसुप्तस्य तथैवैति, दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः, शिवसंकल्पमस्तु"। "येन कर्माण्यपसोमनीषिणो यज्ञे कृण्वन्ति। विदथेषु धीराः, यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु"। "यत्प्रज्ञानमुत चेतो धृतिश्च यत्ज्योतिरन्तरमृतं प्रजासु, यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु"। "येनेदं भूत भुवनं भविष्यत्परिगृहितममृतेन सर्वं, येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु"। "यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठितारथनाभाविवाराः, यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु"। "सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव। हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु"। मण्डलब्राह्मणं, विनियोज्यत्वेन मन्त्रकार्य्यकरत्वान्मन्त्रधर्मलाभेन ऋष्यादिस्मरणं, प्रजापतिर्ऋषिः, यजुः, सूर्योदेवता, सूर्योपस्थाने विनियोगः। "ॐ यदेतन्मण्डलं तपति तन्महदुक्थन्ता

ऋचः स ऋचां लोकोऽथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नाँल्लोकोथ य एष एतस्मिन् मण्डले पुरुषः सोऽग्निस्तानि यजूंषि स यजुषां लोकः।१। सैषात्रय्ये विद्या तपति तद्धैतदप्यविद्वांस आहुस्त्रयी वा एषा विद्या तपतीति वाग्घैव तत्पश्यन्ति वदति।२। स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषोऽथैतदमृतं यदेतदर्चिर्दीप्यते तस्मान्मृत्युर्नम्रियते मृतेर्ह्यन्तस्तस्माद् न दृश्यते मृतेर्ह्यन्तः।३। तदेष श्लोको भवति, अन्तरमृत्योरमृतमित्यवरं तन्मृत्योरमृतं मृत्यावमृतमाहितमित्येतर्ह्यस्मिन् हि पुरुष एतन्मण्डलं प्रतिष्ठितं तपति मृत्युर्व्विवस्वन्तं वस्त ऽइत्यसौवा ऽआदित्योव्विवस्वानेषह्यहोरात्रे व्विवस्ते तमेष वस्ते सर्व्वतो ह्यनेन परिवृतोमृत्त्योरात्मा व्विवस्वतीत्येतस्मिन् हि मण्डल ऽएतस्य पुरुषस्यात्मैतदेष श्लोको भवति।४। तयोर्व्वा ऽएतयोरुभयोरेतस्य चार्चिष ऽएतस्य च पुरुषस्यैतन्मण्डलं प्रतिष्ठा तस्मान् महदुक्थं परस्मैनशंसेन्नेदेतां प्रतिष्ठां छिनदा इत्येतांह स, प्रतिष्ठां छिन्तेऽजो महदुक्थं परस्मैशंसति तस्मादुक्थशसं भूयिष्ठं परिचक्षते प्रतिष्ठा छिन्नो हि भवतीत्यधिदैवतं।५। "अथाधियज्ञ"। यदेतन्मण्डलं तपत्ययं स रुक्मोऽथ यदेतदर्चिर्दीप्यत इदं तत्पुष्करपर्णमापोहेताऽआपः पुष्करपर्णमथ य ऽएष ऽएतस्मिन्मण्डले पुरुषोयमेव स योयं हिरण्मयः पुरुषस्तदेतदेवैतत्त्रयं संस्कृत्ये होपधत्ते तद्यज्ञस्यैवानुसंस्थामूर्द्धमुत्क्रामति तदेतमप्येति य ऽएष तपति तस्मादग्निनाद्रियेत परिहन्तुमकुत्र ह्येष तदा भवतीत्यु ऽएत्राधियज्ञं।६। "अथाध्यात्मं," यदे-

तन्मण्डलं तपति यश्चैषरुक्मं इदं तच्छुक्लमचक्षुरथ यदेतदर्चिर्दीप्यते यच्चैतत्पुष्करपर्णमिदं तत्कृष्णमचक्षुरथ य ऽएष ऽएतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन्पुरुषः। ७। स ऽएष ऽएत्र लोक पृणातामेव सर्वोऽग्निरभिसंपद्यते तस्यैतन्मिथुनं योऽयꣳ सव्येऽक्षन्पुरुषोऽर्द्धमु हैतदात्मनो यन्मिथुनं यदा वै सह-मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तद्यत्ते द्वे भवतो द्वन्द्वꣳ हि मिथुनं प्रजननं तस्माद् द्वे द्वे लोकं पृणे ऽउपधीयेते तस्माद् द्वाभ्यां द्वाभ्यां चितिं प्रणयन्ति। ८। स ऽएष ऽएवेन्द्रः। यो यं दक्षिणे-ऽक्षन्पुरुषो येयमिन्द्राणी ताभ्यां देवा ऽएतां विधृतिमकुर्वन्नासि-कान्तेऽस्माज्जायाया ऽअन्ते नाश्नीयाद्वीर्यवान् हास्माज्जायते वीर्य्य-वन्तमु ह सा जनयति यस्या ऽअन्ते नाश्नाति। ९। तदेतद्देवव्रतं राजन्यबन्धवो मनुष्याणामनुतमां गोपायन्ति तस्माद् तेषु वीर्य्य-वाञ्जायते मृतवाका वयसाꣳ साक्षिप्राश्नेनं जनयति। १०। तौ हृदयस्याकाशं प्रत्यवेत्य मिथुनीभवतस्तौ यदा मिथुनस्यान्तं गच्छतोऽथ है तत्पुरुषः स्वपिति तद्यथा हैवेदं मानुषस्य मिथुनस्यान्तं गत्वा संविद ऽइव भवत्येवꣳ हैवैतदसंविद ऽइव भवति दैवꣳ ह्येतन्मिथुनं परमो ह्येष ऽआनन्दः। ११। तस्मादेवं विसत्स्वप्यात्॥ लोक्यꣳ हैते ऽएव तद्देवते मिथुनेन प्रियेण धाम्ना समर्द्धयति तस्मादु ह स्वपन्तं धूरेव न बोधयेन्नेदेते देवते मिथुनीभव न्तीं हिनस्नीमानीति तस्माद् हैतत्सुखुपुषः श्लेष्मणमिव मुखं भवत्येते ऽएव तद्देवते रेतः सिञ्चतस्तस्माद्रेतस ऽइदꣳ सर्वꣳ संभवति यदिदं किञ्च। १२। स ऽएष ऽएव मृत्युः। य ऽएष ऽएतस्मिन्मण्डले

पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तस्य हैतस्य हृदये पादावतिहतौ तौ हैतदाच्छिद्योत्क्रामति स यदोत्क्रामत्यथ हैतत्पुरुषो म्रियते तस्माद् हैतत्प्रेतमाहुराच्छेद्यस्येति। १३। एष ऽउ एव प्राणः॥ एष हीमाः सर्वाः प्रजाः प्रणयति तस्यैते प्राणाः स्वाः स यदा स्वपित्यथैनमेते प्राणाः स्वा अपियन्ति तस्मात्स्वाप्ययः स्वाप्य-योहवैतꣳ स्वप्न ऽइत्याचक्षते परोक्षं परोक्षकामा हि देवाः। १४। स ऽएतैः सुप्तो न कस्यचन वेद न मनसा संकल्पयति न च वाचान्नस्य रसं विजानाति न [१]प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतꣳ ह्येते तदा पीता भवन्ति स ऽएष एकः सन्प्रजासु बहुधा व्याविष्टस्तस्मादेका सती लोकं पृणा सर्वमग्निमनुविवत्यथ यदेक ऽएव तस्मादेकः। १५। तदाहुः। एको मृत्युर्बहव ऽइत्येकश्च बहवश्चेतिह ब्रूयाद्यदहासावमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः। १६। तदाहुः, अन्तिके मृत्युर्दूरा ऽइत्यन्तिके च दूरे चेतिह ब्रूयाद्यद हायमिहाध्यात्मन्तेनान्तिकेऽथ यदासावमुत्र तेनोदूरे। १७। तदेष श्लोको भवति। अन्ये भात्यपश्रितो रसानाꣳ संचरेऽमृत इति यदेतन्मण्डलं तपति तदन्नमथ य ऽएष ऽएतस्मिन्मण्डले पुरुषः सोऽत्ताम ऽएतस्मिन्नन्नेऽपश्रितो भातीत्यधिदैवतं। १८। "अथाध्यात्मं" इदमेव शरीरमन्नमथ योऽयं दक्षिणेऽक्षन्पुरुषः सोऽत्ताम ऽएत-स्मिनन्नेऽपश्रितो भाति। १९। तमेतमग्निरित्यध्वर्यव ऽउपासते, यजुरित्येष हीदꣳ सर्वं युनक्ति सामेति छन्दोगा ऽएतस्मिन् हीदꣳ

(१) न सा घ्राणेन —।

सर्वꣳ समानमुक्थमिति वह्वृचा ऽएष हीदꣳ, सर्वमुत्थापयति यातुरिति यातुविद ऽएतेन हीदꣳ सर्वं यतं विषमिति सर्पाः सर्प इति सर्पविद ऽऊर्गिति देवा रयिरिति मनुष्या मायेत्यसुराः स्वधेति पितरो देवजन ऽइति देवजनविदो रूपमिति गन्धर्वा गन्ध ऽइत्यप्सरसस्तं यथायथोपासते तदेव भवति, तद्धैनान् भूत्वा ऽवति तस्मादेनमेवंवित्सर्वैरेवैतैरुपासीत सर्वꣳ हैतद्भवति सर्वꣳ हैनमेतद्भूत्वा ऽवति । २० । स ऽएष त्रीष्टकोऽग्निर्ऋगेका यजुरेका सामैका तद्यामत्रार्चोपदधाति रुक्म ऽएव तस्या ऽआयतनमथ-यां यजुषा पुरुष ऽएव तस्या ऽआयतनमथयाꣳ साम्ना पुष्करपर्णमेव तस्या ऽआयतनमेवं त्रीष्टकः । २१ । ते वा ऽएते उभे ऽएष च रुक्म ऽएतच्च पुष्करपर्णमेतं पुरुषमपीत ऽउभे ह्यृक्सामे यजुरपीत एवमेकेष्टकः । २२ । स ऽएष ऽएव मृत्युः, य ऽएष ऽएतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः, स ऽएष ऽएवंविद ऽआत्मा भवति स यदैवंविदस्माꣳल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति सो ऽमृतो भवति मृत्युर्ह्यस्यात्मा भवति । २३ । नैव वा इदमग्रे सदासीन्नैव सदासीत् । इति मण्डलब्राह्मणं दिवाकीर्त्यं शतरुद्रीय शतैरिति लक्ष्मीधरः ।

नमस्ते इति तिसृणां प्रजापतिर्ऋषिः, गायत्रीछन्दः, द्वयोरनुष्टुप्छन्दः, रुद्रोदेवता, सूर्योपस्थाने विनियोगः । "ॐ नमस्ते रुद्रमन्यव उतोऽतइषवे नमः बाहुभ्यामुत ते नमः, या ते रुद्रशिवा तनूरघोरा पापकाशिनी, तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि, यामिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे,

शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत्" । सौराः परमेष्ठिप्रजापतिर्ऋषिः, द्वयोरनुष्टुप्छन्दः, तृतीया विराट् आदित्योदेवता, सूर्योपस्थाने विनियोगः । "कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे, उपोपेन्नुमघवन् भूय इन्नु ते दानं देवस्य पृच्यते, आदित्येभ्यस्त्वा" । "कदाचन प्रयुच्छस्युभे निपासि जन्मनी, तुरीयादित्य सवनंत इन्द्रियमातस्थावमृतं दिव्यादित्येभ्यस्त्वा" ।

"यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः, आ वोऽर्वाचि सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवो वित्तरासदादि-त्येभ्यस्त्वा । अघमर्षणसूक्तेनोपस्थानं, गुह्योपनिषत्, पूर्णमदः पूर्णमिदं, पूर्णात् पूर्णमदुच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते, ॐखं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्याणां पुत्रो वेदोऽयं ब्राह्मणा-विदुर्वेदैनेन यद्वेदितव्यं, असम्भवे मण्डलब्राह्मणान्तः, अशक्तौ विभ्राड़ित्यनुवाकमात्रेण वोपस्थानं, ततः प्रदक्षिणमावृत्य नम-स्कृत्योपवेशनं, आसनस्थेषु प्रागग्रे दर्भेषु प्राङ्मुखत्वेन सव्यतयोपवीत परामर्शः, हस्तयोस्तोयेनाघमर्षणं, त्रिराचमनं, अङ्गुष्ठमूलेन ओष्ठयोर्द्विमार्जनं, ओष्ठयोरेवाङ्गुल्यग्रैः सकृदुपस्पर्शनं, उदकेन वामपाणिप्रोक्षणं, पादयोश्च प्रोक्षणं, शिरश्चक्षुर्द्वयनासिकाद्वय-श्रोत्रद्वयानां हस्तेन स्पर्शनं, पवित्रलक्षणोपेतकुशत्रयेण इन्द्रियस्पर्शनं, तदेव पावनं, पञ्चदशमात्राभिः प्रणवेन प्राणायामत्रयं, दक्षिण-जानूपरि पवित्रोपग्रहव्यतिरिक्तपवित्रलक्षणोपेत-कुशत्रययुक्ताञ्जलि-

धारणं, प्रणवमुच्चार्य्य व्याहृतित्रयोच्चारणं, गायत्र्या द्विपा[1]दादीनां व्यस्तानामुच्चारणं, पुनर्गायत्र्याः पादद्वयरूपमर्द्धर्चमुच्चार्य्य तृतीय-पादोच्चारणं, पुनराचामवान् सर्व गायत्र्या उच्चारणं, तत आदावारभ्य मन्त्रसंहितायाः, प्रथमाध्यायक्रमेण अनुवाकानुवाकक्रमेण वा प्रतिदिन यावत्समाप्ति पाठः, मन्त्रसमाप्तौ ब्राह्मणसंहिताया, अध्यायाध्यायक्रमेण, ब्राह्मणब्राह्मणक्रमेण वा यावत्समाप्ति पाठः, अशक्तौ कण्डिकाक्रमेण वा, एवमेकां शाखां समाप्य यस्यानेक वेदाध्ययनं तस्यापरस्य वेदस्य एवमेव क्रमेण समापनं, पश्चादाथर्वण प्रणवपुराणेतिहासाङ्गानामपि यथाक्रमेण समापनं ।

[2]एभिर्यावद्भिर्दिनैरेतेषां समाप्तिः, पुनरादावारभ्य वेद-भित्येवं क्रमेण यावज्जीवमभ्यासः, अशक्तौ गायत्रीमात्रं, व्याहृति-त्रयं वा प्रणवमात्रं वा फलाविशेषार्थं[3] पुरुषसूक्तस्य जपनियमः, भूर्भुवः स्वः सत्यं तपः श्रद्धायां जुहोमीत्येतावन्मात्रं वा, अशक्तौ सर्ववेदफलार्थिनः, सोंकारचतुरावृत्तिगायत्रीजपः, त्र्यम्बक-जातवेदा गायत्रीरूपशताक्षरे जपो वा काम्यः, एवं ब्रह्म-यज्ञं कृत्वा अन्ते प्लुतप्रणवोच्चारणं, ॐ नमो ब्रह्मणे, नमोऽग्नये, नमः पृथिव्यै, नमः ओषधीभ्यः, नमो वाचे, नमो वाचस्पतये, नमो विष्णवे, नमो महते, करोमीति त्रिर्जपः, भूमिं स्पृष्ट्वाचमनं, इति तैत्तिरीयश्रुत्यनुसारेण ब्रह्मयज्ञविधिः, अस्य प्रत्यक्षश्रुतिगतत्वात् प्रकारान्तरं न गृह्यते स्मृत्युक्तत्वात् ।

(१) गायत्र्याः — पादानां —। (२) एवं —।
(३) फलविशेषार्थिनः —।

अथ तर्पणविधिः, प्रागग्रकुशत्रयास्तरणं ततः, पृच्छमहा ऋषिः,[1] गायत्रीछन्दः, विश्वेदेवा देवताः, आवाहने विनियोगः, "ॐ विश्वेदेवाः स आगत शृणुता म इमं हवं, एदं बर्हिर्निषीदत," इत्यक्षतपुष्पाभ्यां ब्रह्मादयो विश्वेदेवा अत्रागच्छेत्यावाहनं, यवान् विकीर्य्य, सूत[2]होत्रऋषिः, त्रिष्टुप्छन्दः, विश्वेदेवा देवता, जपे विनियोगः, "ॐ विश्वेदेवाः शृणुतेमꣳ हवं ये मे अन्तरीक्षे य उपद्यविष्ठ, ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वं," इति जपः, दक्षिणजानुपातनं, उदङ्मुखत्वं ऋजुकुशत्रयस्य दक्षिणहस्तेन तर्पणार्थं ग्रहणं, वामहस्तेन दक्षिण-हस्तस्पर्शनं, ॐ ब्रह्मा तृप्यतामिति देवतीर्थेन [2]यवाभिः प्रादेश-मात्रं उद्धृतजले जलप्रक्षेपणं ब्रह्मतर्पणं, इदं ब्रह्मण इति त्यागः, एवं पुनर्वारद्वयं, यवाभावे प्रतिनिधित्वेन तण्डुलाः, चिन्तामणिकारस्तु यवानां वैकल्पिकमाह, एवं विष्णुस्तृप्यतामिति तर्पणत्रयं, ॐ रुद्रस्तृप्यतामिति वारद्वयं,[4] प्रजापतिस्तृप्यतामिति कनिष्ठाङ्गुष्ठमूलप्रजापतितीर्थेन सकृत् देवास्तृप्यन्तां, छन्दांसि तृप्यन्तां वेदास्तृप्यन्तां, ऋषयस्तृप्यन्तां, पुराणाचार्यास्तृप्यन्तां, इतराचार्यास्तृप्यन्तां, सम्वत्सराः सावयवास्तृप्यन्तां, देव्यस्तृप्यन्तां, अप्सरसस्तृप्यन्तां, देवानुगास्तृप्यन्तां, नागास्तृप्यन्तां सागरास्तृप्यन्तां, पर्वतास्तृप्यन्तां, सरितस्तृप्यन्तां, दिव्या-मानुषास्तृप्यन्तां, यक्षा-

(१) पृच्छमहर्षिः। (२) सुहोत्र — ऋषिः।
(३) यवैः। (४) त्रयं।

स्तृप्यन्तां, रक्षांसि तृप्यन्तां; पिशाचास्तृप्यन्तां; सुपर्णास्तृप्यन्तां, भूतानि तृप्यन्तां, पशवस्तृप्यन्तां, वनस्पतयस्तृप्यन्तां, पृथिवी तृप्यतामिति वा, ओषधयस्तृप्यन्तां, भूतग्रामचतुर्विधस्तृप्यतां, एतेभ्यो ॐकारनाम्ना देवतीर्थेनान्वारब्धेन वारत्रयं तर्पणं, प्रतितर्पणं इदं विष्णवे इत्यादिरूपेण त्यागः, जलप्रक्षेपस्य जलस्थस्य जले स्थलस्थस्य तीरसमीपे, चेज्जले स्थले चेदुद्धृतोदकेन स्थले सम्भवे चावाहनस्थानकुशेषु जलप्रक्षेपः, जले स्थले वापि, ततो यज्ञसूत्रोत्तरीययोः, कण्ठावसक्तकरणं, तर्पणार्थकुशत्रयमध्यस्य तोयाभिमुखं धारणं, उदङ्मुखत्वमस्येव सव्यान्वारब्धे दक्षिणहस्तेन प्राजापत्यतीर्थेन वारद्वयं द्वयं, मनुष्या अत्रागच्छतेत्यावाहनं; नात्र मन्त्रः, सनकस्तृप्यतां, इदं सनकाय, पुनरपरतर्पणत्यागौ, सनन्दस्तृप्यतां; सनातनस्तृप्यतां; कपिलस्तृप्यतां, वोढुस्तृप्यतां, आसुरिस्तृप्यतां, पञ्चशिखस्तृप्यतां सर्वेषां प्रणवादिनाम्ना वारद्वयं द्वयं, ऋषितर्पणमिति सनकादितर्पणवत् प्राजापत्येन तीर्थेन वारद्वयं द्वयं च, कुशमध्येन निवीतीत्वेन च कर्त्तव्यं; मरीचिस्तृप्यतां, इदं मरिचये, पुनरपि वा तर्पणत्यागौ, अत्रिस्तृप्यतां, अङ्गिरास्तृप्यतां, पौलस्त्यस्तृप्यतां, प्रचेतास्तृप्यतां, वशिष्ठस्तृप्यतां, भृगुस्तृप्यतां, नारदस्तृप्यतां, प्रणवादिनाम्ना वारद्वयं तर्पणत्यागौ, ततोऽपसव्यकरणं, यज्ञोपवीतवाससोः, दक्षिणाभिमुखत्वं, सव्यजानुपातनं, आवाहनस्थानात् कुशानां[१] ग्रहणं, तिलपुष्पमादाय। शंखऋषिः

(१) आवाहनस्थानकुशानां दक्षिणाग्रकरणं।

त्रिष्टुप्छन्दः पितरोदेवता, आवाहने विनियोगः "ॐ उशन्तस्त्वा-निधीमह्युशन्तः समिधीमहि; उशन्नुशत आवह पितॄन् हविषे अत्तवे"। ॐ कव्यवालनलादयो यमो[१] वैवस्वतादयो ऽस्मत्पितृ-पितामहप्रपितामहा अस्मिन्मातामह-प्रमातामह-वृद्धप्रमातामहा अस्मिन्मातृपितामही-प्रपितामह्यः अत्रागच्छत, पितरोऽत्रागच्छतेव वा, सर्वेषां, तिलविकिरणं, शंखऋषिः, त्रिष्टुप्छन्दः पितरोदेवता, जपे विनियोगः, "ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः, अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्" इतिजपः, राजतेन पात्रेण सौवर्णेन वा, तदभावे खड्गेन तदभावे ताम्रेण असम्भवे नारिकेलादिपात्रेण वा द्वादशाङ्गुल[२]वारणे वा; पात्राभावे रजतादि, तिलयुतेनाञ्जलिना वा तर्पणं। अत्यन्तासम्भवे गुणलोपे तु मुख्यस्येति केवलाञ्जलिना वा, तर्पणसाधनकुशत्रयस्य द्विगुणीकृत्य जलेन मोटककरणं, कुशमूलाग्रयोजले प्रवेशाय सव्यहस्तेन कुशमध्यधारणं; पितृतीर्थेन पात्रे जलपूरणं, दक्षिणहस्ते अङ्गुष्ठतर्जनीयोगरूपमुद्रां परिहृत्य पात्रस्थेषु जलेषु तिलमिश्रणं, शुद्धाञ्जलिना ग्रहणे जलग्रहणात्पूर्वमेव दक्षिणहस्तेन तिलमादाय वामहस्ते करणं, उद्धृतोदकतर्पणे च भूमिस्थजलपूर्णपात्रे तिलमिश्रणं, तस्मात्पात्रेण सतिलग्रहणं, जीवत्पितृकस्य तिलमिश्रणाभावः न जीवत्पितृकः कृष्णैस्तिलैरिति

(१) यमावस्वादयोऽ —।
(२) द्वादशाङ्गुल—काष्ठे शिलावरेण वा।

निषेधात् । कृष्णत्वस्य पितृकर्मणोचितं प्राप्तानुवादित्वेन मलवद्वासोनिषेधवद्विशेषणपरत्वाभावात् ।

ॐ कव्यवालनलस्तृप्यतां, इति पितृतीर्थेन गोमङ्गमात्रं उद्धृत्य क्षिपेत्, [१]इदं कव्यवालनलादयः पुनर्वारद्वयं, एवं सर्वत्र प्रणवपूर्वकनाम्ना वारत्रयतर्पणत्यागः, सोमस्तृप्यतां, यमस्तृप्यतां, अर्यमास्तृप्यतां, अग्निष्वात्तापितरस्तृप्यन्तां, सोमपाः पितरस्तृप्यन्तां, वर्हिषदः पितरस्तृप्यन्तां ; ततो यमतर्पणं वैकल्पिकं संयोगपृथक्त्वात् यावज्जीवं पापक्षयस्यास्य फलकरणपक्षे : तच्च देवतीर्थेनेत्येके, देवतीर्थपक्षे ऽप्यपसव्यदक्षिणामुखत्वादयः सन्त्येव, यमाय नम इति वाक्येनाञ्जलित्रयतर्पणं, इदं यमाय एवमन्येभ्योऽञ्जलीत्रयं त्रयं तर्पणं, धर्मराजाय नमः, मृत्यवे नमः, अन्तिकाय नमः, वैवस्वताय नमः, कालाय नमः, सर्वभूतक्षयाय नमः, ज्ञानाय नमः, औदुम्बराय नमः, दध्नाय नमः, नीलाय नमः, परमेष्ठिने नमः, वृकोदराय नमः, चित्राय नमः, चित्रगुप्ताय नमः, कृष्णचतुर्दश्यामुषसि नदीस्नानपूर्वकं यमतर्पणं सर्वपापक्षयार्थं, नदीस्नानसहितं कर्मान्तरमेव काम्यं, एतावज्जीवत्पितृकस्य मातरि मृते पितरि जीवति समाचारान्मातृपितामहीनां अत्रैव तर्पणं, ततो मृतपितृकस्य कथ्यतेऽधिकं, एवं ; ॐ वसवस्तृप्यन्तामिदं जलं तेभ्यः स्वधानम इति त्रिवारं इदं वसुभ्यः, ॐ रुद्रास्तृप्यन्तामिदं जलं तेभ्यः स्वधानमः, ॐ आदित्यास्तृप्यन्तामिदं जलं तेभ्यः स्वधानमः, ॐ आचार्यास्तृप्यन्तामिदं जलं

---

(१) एवं — ।

तेभ्यः । अथ पित्रादितर्पणं, प्रजापतिरृषिः ; त्रिष्टुप्छन्दः, पितरो देवता ; "ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः, "असुं यईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु" ॐ अमुकसगोत्रोऽस्मत्पिता अमुकदेवशर्मा तृप्यतामिदं जलं तस्मै स्वधा नमः, इदमस्मत्पित्रेऽमुकदेवशर्मणे, अत्र मन्त्रादौ प्रणवोच्चारणं, नामविशेषेण गोत्रादौ च एवं वक्ष्यमाणेषु सर्वत्र, अङ्गिरा ऋषिः, त्रिष्टुप्छन्दः, पितरो देवता, तर्पणे विनियोगः, "ॐ अङ्गिरसोनः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः, तेषां वयं सुमतौ यज्ञीयानामपि भद्रे सौमनसे स्याम" । ॐ अमुकसगोत्रोऽस्मत्पिताऽमुकदेवशर्मा तृप्यतामिदं जलं तेभ्यः स्वधानमः, इदमस्मत्पित्रे, शंखऋषिः, त्रिष्टुप्छन्दः, पितरोदेवता, तर्पणे विनियोगः, "ॐ आयन्तु नः पितरः सोम्यासो ऽग्निष्वात्ता पथिभिर्देवयानैः, अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु ते ऽवन्त्वस्मान्" । अमुकसगोत्रोऽस्मत्पिताऽमुकदेवशर्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत् पित्रे, प्रजापतिर्ऋषिः, यजुः, पितरो देवता, तर्पणे विनियोगः, "ॐ ऊर्जं वहन्तीरमृतं घृतं पयःकीलालं परिस्रुतं, स्वधास्थ तर्पयत मे पितॄन्" । अमुकसगोत्रोऽस्मत्पितामहोऽमुकदेवशर्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत्पितामहायाऽमुकदेवशर्मणे, प्रजापतिर्ऋषिः, यजुः, पितरोदेवता, तर्पणे विनियोगः, स्मार्त्तकर्मणि परादिना पूर्वान्त इति श्रौतवन्मन्त्रपरिच्छेदहेत्वदर्शनात्कण्डिकापरिच्छेदस्य स्मार्त्तविनियोगार्थत्वात्, यजुस्त्रयमन्त्रः एकः ; "ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः, ॐ पितामहेभ्यः

स्वधायिभ्यः स्वधानमः, ॐ प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः, "अत्रपितरो ऽनुमदन्त पितरोऽतितृप्यन्तु पितरः पितरः शुन्धध्वं" । अमुकसगोत्रोऽस्मत्पितामहोऽमुकदेवशर्म्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत्पितामहायामुकदेवशर्मणे । प्रजापति ऋषिः, त्रिष्टुप्छन्दः, पितरो देवता, तर्पणे विनियोगः ।

"ॐ ये चेह पितरो ये च नेहयांश्च विद्मयां उचन प्रविद्म, त्वं वेत्थ यति ते जातवेदः सुधाभिर्यज्ञं सुकृतं जुषस्व" । अमुकसगोत्रोऽस्मत्पितामहोऽमुकदेवशर्म्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत्पितामहायामुकदेवशर्मणे । गौतम ऋषिः, गायत्री छन्दः, विश्वेदेवा देवता, तर्पणे विनियोगः, "ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः, माध्वीर्नः सन्त्वोषधीः" । अमुकसगोत्रोऽस्मत्प्रपितामहोऽमुकदेवशर्म्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत्प्रपितामहायामुकदेवशर्मणे । गौतम ऋषिः, गायत्रीछन्दः, विश्वेदेवा देवता, तर्पणे विनियोगः, "ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः मधुद्यौरस्तु नः पिता" । अमुकसगोत्रोऽस्मत्प्रपितामहो ऽमुकदेवशर्म्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत्प्रपितामहायामुकदेवशर्मणे । गौतम ऋषिः, गायत्रीछन्दः, विश्वेदेवा देवता, तर्पणे विनियोगः ।

"ॐ मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः, माध्वीर्गावो भवन्तु नः" । अमुकसगोत्रो ऽस्मत्प्रपितामहो ऽमुकदेवशर्म्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत्प्रपितामहायामुकदेवशर्मणे । अमुकसगोत्रोऽस्मत्पितृपितामहप्रपितामहा अमुकदेव-अमुकदेव-

अमुकदेवशर्म्माणः, तृप्यध्वमिदं जलं तेभ्यः स्वधानमः, इदमस्मत्पितृपितामहप्रपितामहेभ्योऽमुक-अमुक-अमुक-देवशर्मभ्यः, एवं पुनर्वारद्वयं तर्पणत्यागौ, पितामहे जीवति प्रपितामहे पितामहसम्बन्धिमन्त्राः, वृद्धप्रपितामहे प्रपितामहमन्त्राः; एवं प्रपितामहे जीवत्यूह्यं, ततः कृताञ्जलिरिमं मन्त्रं पठेत् । प्रजापति ऋषिः, यजुः, पितरो देवता, जपे विनियोगः, "नमो वः पितरः शुष्मा(१)य, नमो वः पितरस्तपसे, नमो वः पितरो यज्जीवं तस्मै नमो वः पितरो रसाय, नमो वः पितरो घोराय मन्यवे स्वधायै वः पितरो नमः" । ततो मातामहादितर्पणं, अमुकसगोत्रोऽस्मन्मातामहोऽमुकदेवशर्म्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत्मातामहायामुकदेवशर्मणे, एवमपरवारद्वयं तर्पणत्यागौ, अमुकसगोत्रोऽस्मत्वृद्धप्रमातामहोऽमुकदेवशर्म्मा तृप्यतामिदं जलं तस्मै स्वधानमः, इदमस्मत्वृद्धप्रमातामहायामुकदेवशर्मणे, एवमपरवारद्वयं तर्पणत्यागौ ।

मात्रादितर्पणं, अमुकसगोत्रा-ऽस्मन्माताऽमुका(२)देवी तृप्यतामिदं जलं तस्यै स्वधानमः, इदमस्मन्मात्रे अमुका देव्यै एवमपरवारद्वयं तर्पणत्यागौ, अमुकसगोत्रास्मत्पितामही अमुका देवी तृप्यतामिदं जलं तस्यै स्वधानमः, इदमस्मत्पितामह्यै अमुकादेव्यै, एवमपरवारद्वयं तर्पणत्यागौ, अमुकसगोत्राऽस्मत्प्रपितामही अमुका देवी तृप्यतामिदं जलं तस्यै स्वधानमः, इदमस्मत्प्रपितामह्यै

---

(१) शोषाय । (२) अमुकी देवी ।

अमुकादेव्यै एवमपरवारद्वयं तर्पणत्यागौ, अमुकसगोत्रा अस्मत्ज्येष्ठमाता अमुकादेवी तृप्यतामिदं जलं तस्यै स्वधानमः, एकोऽञ्जलिः, इदमस्मत्ज्येष्ठमात्रे, ततः कनिष्ठमात्रे, ततो ज्येष्ठकनिष्ठरूपेण पितृतर्पणं, अनेनैव क्रमेण भ्रातृतर्पणं, एवं मातामही-प्रमातामही-वृद्धप्रमातामहीनां, भगिनीनां ज्येष्ठादिक्रमेण, एवं मातुलादीनां, श्वशुरमातृभगिनीनां ज्येष्ठादिक्रमेण, ततः स्वपत्नीनां ज्येष्ठादिक्रमेण, ततः स्वपुत्राणां ज्येष्ठादिक्रमेण, ततः स्वदुहितॄणां, ततो गुरूणां, शिष्याणां, मित्राणां यथास्मरणंसन्निकृष्टज्ञातीनां क्रमेण, भावुक-शाल-बान्धवानां च, स्वामिनामन्येषां च, कारुण्यात् स्मरणे तर्पणं, एतेभ्योऽरेकैकाञ्जलिः, यथानाम त्यागः, ततः,

"देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः ।
पिशाचाः गुह्यकाः सिद्धाः कुष्माण्डास्तरवः खगाः ॥
जलेचरा भूनिलया वाय्वाहाराश्च जन्तवः ।
तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः" ॥

इति जलाञ्जलिदानं ।

एते च प्रेतभावं गता इति बुद्ध्या तर्पणं । तथा,—

"नरकेषु समस्तेषु यातनासु च ये स्थिताः ।
तेषामाप्यायनायैतद्दीयते सलिलं मया" ॥

इत्येकोऽञ्जलिः ।

"ये बान्धवा अबान्धवा अन्यजन्मनि बान्धवाः ।
ते तृप्तिमखिलां यान्तु ये चास्मत्तोयकांक्षिणः" ॥

इत्येकोऽञ्जलिः, ततो मृत्तोयं दत्त्वा वस्त्रचालनं, समाचारादास्तरणकुशत्रयं तर्पणकुशांश्चैकीकृत्य भूमौ संस्थाप्य तत्र वस्त्रनिष्पीडनं ।

"ये चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीड़ितोदकं" ॥

निष्पीड़नकाले चासंस्कृतप्रमृतानां बुद्धौ करणं, तथात्यागिनां कुलयोषितां, दासवर्गतत्पितृवर्गस्य च, ततो यज्ञोपवीती भूत्वा पूर्वमुखस्थः सकृदाचमनं, प्रातःस्नानं काम्यतीर्थस्नानादौ तर्पणाङ्गत्वेन एतावत्पर्यन्तकरणं, मध्याह्ने तु स्नानवत्तर्पणमपि प्रधानं प्रधानभूतेनापि तर्पणेन स्नानाङ्गत्वनिर्वाहः, ततो जपयज्ञः, गायत्र्या ऋष्यादिस्मरणं, यथाशक्ति गायत्रीजपः, स च द्विविधः दशप्रणवसंयुक्तः सप्तव्याहृतिशिरःसहित एकः, प्रणवव्याहृतिसहितोऽपर इत्युक्तं प्राक्, एवं अघमर्षणद्रुपदा, इसपावमानि कुष्माण्डसंज्ञकप्रभृतीनां शक्तौ सत्यां जपः, जपधर्माश्चोक्ताः, अथ सूर्यार्घ्यः, अग्रतोऽष्टदलपद्मलिखनं, तिलयवरक्तचन्दनयुतजलपात्रं गृहीत्वा हंसः शुचिषदिति पठित्वा मूर्द्धपर्यन्तमुपस्थाप्य सूर्यायार्घं नम इति मण्डलेऽर्घजलप्रक्षेपः शिरस्यञ्जलिं निधाय जपः ।

"ॐ नमस्ते विष्णुरूपाय नमस्ते ब्रह्मरूपिणे ।
सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे ॥
नमस्ते रुद्रवपुषे नमस्ते भक्तवत्सल! ।
जगत्स्वामिन्नमस्तेऽस्तु दिव्यचन्दनरूपधृक्! ॥
पद्मनाभ! नमस्तेऽस्तु कुण्डलाङ्गदभूषित! ।

नमस्ते सर्वलोकेश! सुप्तानामपि बुध्यसे ॥
सुकृतं दुष्कृतं चैव सर्वं पश्यसि सर्वदा।
सत्यदेव! नमस्तेऽस्तु प्रसीद मम भास्कर! ॥
दिवाकर! नमस्तेऽस्तु प्रभाकर! नमोऽस्तु ते"।

एवं नमस्कृत्य त्रिःप्रदक्षिणकरणं, तर्पणोत्तरकर्म, ब्रह्माणं, चतुर्वक्त्रं (१)कनकवर्णं कमण्डलुस्रुक्स्रुवाक्षसूत्रकरं ध्यात्वा हिरण्यगर्भ इत्यस्य, प्रजापतिऋषिः, त्रिष्टुप्छन्दः, हिरण्यगर्भो देवता, पूजायां विनियोगः।

"हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम"॥

इति जलेषु पुष्पप्रक्षेपः, नात्रावाहनादि, पुष्पदानमात्र-पूजा एवं रुद्रादिषु, विष्णुपूजायां विशेषः, प्रणव ऋष्यादिस्मरणं अर्घसंस्कारः, ॐ नारायणमावाहयामि, नारायण अत्रागच्छ, इति पुष्पाक्षताभ्यां जले ध्येयः सदेत्युक्तरूपस्यावाहनं, ॐ नारायणायासनं ददानीत्यासनदानं, ॐ नारायणाय पाद्यं ददानीति पुष्पाक्षतसहितं पाद्यजलदानं, ॐ नारायणाय अर्घोदकं इत्यर्घदानं, ॐ नारायणायाचमनं ददानीत्याचमनीयदानं, ॐ नारायणाय स्नानीयं ददानीति स्नानीयदानं, पुनराचमनीयं, ॐ नारायणाय वस्त्रयुग्मं ददानीति वस्त्रयुग्मदानं, ॐ नारायणाय यज्ञोपवीतं ददानीति यज्ञोपवीतदानं, ॐ नारायणाय गन्धं ददानीति गन्धदानं, पुरुषसूक्तऋष्यादि स्मृत्वा ॐ सहस्रशीर्षेत्यादि साध्याः सन्ति देवा इत्यन्तं सूक्तमुच्चार्य्य नारायणाय पुष्पं ददानीति पुष्पदानं।

(१) रक्तवर्णं।

गायत्र्या ऋष्यादि स्मृत्वा गायत्रीमुच्चार्य्य नारायणाय धूपं स्वाहेति धूपः, एवं गायत्रीमुच्चार्य्य दीपं स्वाहेति दीपः, गायत्रीमुच्चार्य्य नैवेद्यं ददानीति नैवेद्यं, आचमनं, गायत्रीमुच्चार्य्य नारायणाय नम इति पुष्पाञ्जलिदानं, गायत्रीमुच्चार्य्य नारायण! स्वस्थानं गच्छेति हृदयकमले गतिचिन्तनं अशक्तौ गन्धादिपञ्चोपचारेण वा, पुष्पेणैव गन्धधूपदानं पुष्पस्यासम्भवे जलेनैव सर्वोपचाराः, तदन्ते निरञ्जनब्रह्मत्वेन सूर्य्यध्यानं, ततो रुद्रध्यानं, अघोरऋषिः, गायत्रीछन्दः, रुद्रोदेवता, पूजायां विनियोगः, "रुद्रं वृषारूढ़ं शूलहस्तं शुक्लवाससं, ॐ नमस्ते रुद्रमन्यव इति उच्चार्य्य रुद्राय नमः, इति पुष्पदानं, नारायण ऋषिः, यजुः, सूर्योदेवता, नारायण ऋषिः, गायत्रीछन्दः, सवितादेवता, विश्वामित्र ऋषिः, सवितादेवता, सूर्य्यपूजायां विनियोगः, "आदित्यं रक्तवर्णं द्विभुजं पद्महस्तं ध्यात्वा, देव सविता प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय, दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः सवितुः, विश्वानि देव सवित दुरितानि परासव, यद्भद्रं तन्न आसुर गायत्रीमुच्चार्य्य सवित्रे नम इति पुष्पदानं। प्रजापति ऋषिः, गायत्रीछन्दः, मित्रोदेवता, मित्रपूजायां विनियोगः, मित्रस्य तर्पणि धृतो वौ देवस्य सानसि, द्युम्नं चित्रश्रवस्तमं, मित्रो न एहि सुमित्र्या इन्द्रस्योरुमादिदक्षिणं क्षणं, उशन्नुशतं स्योनः स्योनं, धृते दृंहस्यामि मित्र समाचक्षुषा सर्वाणि भूतानि समीक्षतां, मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षामहे,(१) इति मन्त्रमुच्चार्य्य

(१) समीक्षे।

मित्राय नम इति जले पुष्पप्रक्षेपः, "इमं मे वरुण" "तत्त्वायामि" "उरुं हीति" मन्त्रत्रयस्य ऋष्यादिस्मरणं, शुक्लवर्णं पाशहस्तं मकरवाहनं वरुणं ध्यात्वा मन्त्रत्रयमुच्चार्य्य वरुणाय नम इति जले पुष्पप्रक्षेपः। पुष्पाभावे सर्वत्र जलं। "ॐ हंसः शुचिषदि"ति सूर्यावलोकनं। प्रजापति ऋषिः, गायत्रीछन्दः, सूर्योदेवता, उपस्थाने विनियोगः। अदृश्रमास्य केतवो-विरश्मयोजानां[1] अनु भ्राजतो अग्नयो यथा। इति सूर्याभिमुखस्योर्द्ध्वबाहोरवस्थानं, प्रजापति ऋषिः त्रिष्टुप्छन्दः, त्वष्टा देवता, मुखविमार्जने विनियोगः। "ॐ संवर्चसा पयसा संतनूभिरगन्महिमनसासं [2]शिवेन त्वष्टा सुदत्रोविदधातु रायोऽनुमार्ष्टितन्वोयविलिष्टं"। अनेन तोयेन पाणिभ्यां मुखमार्जनं। प्रजापति ऋषिः, यजुः, सूर्योदेवता, उपस्थाने विनियोगः। "ॐ स्वयंभुरसि श्रेष्ठोरश्मिर्वर्चोदा असि वर्चोमे धेहि सूर्य्यस्यावृतमन्वावर्त्ते"। अनेन सूर्योपस्थानं। सूर्यस्येत्यस्य, प्रजापति ऋषिः, यजुः, सूर्योदेवता, प्रदक्षिणे विनियोगः। "ॐ सूर्यस्यावृतमन्वावर्त्तैः"। अनेन प्रदक्षिणकरणं। उपविश्य दिग्देवतानां नमस्कारः। दिग्भ्यो नमः, दिग्देवताभ्यो नमः, इति कर्काचार्याः; दिशां च देवतानां च प्रत्येकं नमस्कार—इत्याहुः। प्राच्यै दिशे नमः; प्रागदक्षिणायै दिशे नमः; दक्षिणायै दिशे नमः; दक्षिणापरायै दिशे नमः; पश्चिमायै दिशे नमः; पश्चिमोदीच्यै दिशे नमः; उदीच्यै दिशे नमः; अर्वाच्यै दिशे नमः; इन्द्राय नमः; अग्नये नमः; यमाय नमः। नैर्ऋताय नमः, वरुणाय नमः,

(१) जनाँ२॥। (२) शिवेन।

वायवे नमः, कुवेराय नमः, ईशानाय नमः, ब्रह्मणे नमः, अनन्ताय नमः, ॐ ब्रह्मणे नम इति सूर्य्यं नमस्कृत्य जलाञ्जलिदानं। ॐ अग्नये नम इति जलाञ्जलिदानं। नमः पृथिव्यै, नमो वाचे, नमो वाचस्पतये, ॐ ओषधीभ्यो नमः, नमो विष्णवे, नमो महते, नमोऽद्भ्यो अपांपतये वरुणाय नमः। एतेभ्य नमस्कृत्य जलाञ्जलिदानं, तीर्थदेशप्रक्षालनं, नमोऽद्भ्यो अपांपतये वरुणाय नमो नमः इति नमस्कारः। अत्र भूमौ शिरः कृत्वा वेदनमस्कारः। ऋग्वेदाय नमः, यजुर्वेदाय नमः, सामवेदाय नमः, अथर्ववेदाय नमः, परमेष्ठी प्रजापति ऋषिः, अनुष्टुप्छन्दः, वरुणोदेवता, तीर्थविसर्जने विनियोगः, प्रजापति ऋषिः, धाम्नोधाम्न इति यजुः, यदाहुरघ्न्या इति गायत्रीछन्दः, वरुणोदेवता, तीर्थविसर्जने विनियोगः। "ॐ मापोमौषधीर्हिंसीर्द्धाम्नो धाम्नो [1]राजस्ततो वरुण नो मुञ्च, यदाहुरघ्न्या इति वरुणेति[2]शपामहे ततो वरुण नो मुञ्च"। गङ्गे स्वस्थानं गच्छ इति तीर्थविसर्जनं। प्रजापति ऋषिः, गायत्रीछन्दः, सोमोदेवता, जपे विनियोगः। "ॐ आप्यायस्व [3]समेतं ते विश्वतः सोमवृष्ण्यं। भवावाजस्य संगथ" इति शतं दश वा जपः। प्रजापति ऋषिः, यजुः, [4]शान्तविदो देवता, [5]जपनिवेदने विनियोगः। "ॐ देवाशान्तविदो शान्तमित्वाशान्तमिति मनसस्पत इमं देवायज्ञं

(१) राजस्ततो। (२) शयामहे।
(३) समेतु। (४) खातुविदो।
(५) जपसमर्पणे।

स्वाहा" वा त्रेधा। अनेन जप्येन परमात्मा विष्णुः प्रियतां। इति जपनिवेदनं। अनेनैव विधिना नैमित्तिकं काम्यं प्रातःस्नानं च कार्य्यं। नैमित्तिकं संक्रान्तिग्रहोपरागार्द्धोदयादिविशिष्टयोग-निमित्तकं। यत्तु चाण्डालादिस्पर्शननिमित्तकं तदमन्त्रक-मित्युक्तमेव, संक्रान्तिस्नानं नैमित्तिकं। संक्रान्तिस्वरूपं ज्योतिः-शास्त्रे।

"मृगकर्कटसंक्रान्ति यत्तु दिग्दक्षिणायने।
विषुवतीतुलामेषे विष्णुपद्यः स्थिरात्मके।
षड़शीति [१]द्विस्वभावे द्वादशैवं प्रकीर्त्तिताः" ॥

मृगो मकरः, स्थिरा वृष-सिंह-वृश्चिक-कुम्भराशयः। [२]द्विःस्वभावते, मिथुन-कन्या-धनु मीनाः, देवीपुराणे, "त्रुटेः सहस्र-भागो यः स कालो रविसंक्रमे"। देवलः,—

"संक्रान्तिसमयः सूक्ष्मो दुर्लक्ष्यः [३]पिशितेक्षणैः।
तद्योगादप्यधश्चोर्द्ध्वं [४]त्रिंशन्नाड्यः प्रकीर्त्तिताः ॥"

इदं संक्रान्तिपूर्वकालीनषष्टीदण्डात्मकतदुपलक्षिताहोरात्रपरं उपवासादिविषयं तैलस्त्रीमांसवर्जनविषयं चेति प्रांचः।

देवीपुराणे,—

"षड़शीतिमुखेऽतीते वृत्ते च विषुवद्वये।
भविष्यत्ययने पुण्यमतीते चोत्तरायणे ॥"

(१) द्विशरीरे। (२) द्विःशरीराः।
(३) पिशितोपमैः। (४) विंशनाड्यः।

विशेषमाह देवलः,—

"त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः परा।
वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश ॥"

उभयतः तुलामेषयोः—

"षड़शीत्यामतीतायां षष्टीरुक्ता तु नाड़िका।
पुण्यायां विष्णुपद्यां च प्राक्पश्चादपि षोड़श ॥
अह्नः संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितं।
रात्रौ संक्रमणे पुण्यं दिनार्द्धं स्नानदानयोः" ॥

इति रात्रिसंक्रमणेन पुण्यकालविधिपरत्वात्कृत्स्नाहः। पुण्यत्वं यथा प्राप्तानुवादः, एतेषां वचनानां दिवस-संक्रान्तिविषयत्वं. रात्रौ वचनान्तरेण व्यवस्थावगमात्।

देवीपुराणे,—

"मानार्द्धं भास्करे पुण्यमपूर्णे शर्वरीदले।
पूर्णे तूभयतो ज्ञेयमतिरेकेऽपरेऽहनि ॥"

मानार्द्धं भास्करे भास्करोपलक्षितदिवसेऽर्द्धमित्यर्थः, विशेष-माह वशिष्ठः,—

"अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरिक्रिया।
ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात्प्रहरद्वयं ॥"

मध्याह्नस्योपरि पूर्वदिवसस्य, दिनं पुण्यमनागतमिति-देवीपुराणात्।

"संपूर्णे चेदर्द्धरात्रे रविसंक्रमणं भवेत्।
प्राक्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ ॥

आदौ पुण्यं विजानीयाद्यदभिन्ना तिथिर्भवेत्"।

इति वचनात्संक्रान्तिकालीनतिथेः पूर्वदिनगामित्वे पूर्वदिने पुण्यकालः, यद्वा तिथिभेदे भेददिने पुण्यकालः। एवं च सपूर्णार्द्धरात्रे संक्रमणे संक्रान्तिकालीनतिथेः पूर्वदिनगामित्वे उभयदिनगामित्वेऽपि पूर्वदिनमध्याह्नादूर्द्ध्वं पुण्यकालः। संक्रान्तिकालीन तिथेरुत्तरदिनगामित्वे चोत्तरदिनार्द्धमेव पुण्यकाल इति व्यवस्था, आदौ पुण्यमिति वचनस्य दिनद्वयव्यापितिथिकेऽपि (१)प्रवृत्त्य विशेषात्। वृद्धगार्ग्यः—

"यद्यस्तमनवेलायां मकरं याति भास्करः।
प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेऽहनि॥
अर्द्धरात्रे तदूर्द्ध्वं वा संक्रान्तौ दक्षिणायने।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः॥"

भविष्योत्तरेऽपि—

"मिथुनात्कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः।
(२)प्रदोषे वा निशीथे वा कुर्यादहनि पूर्वतः॥"

एतच्च यद्यपि कल्पतरुकारेण न लिखितं तथापि प्रामाणिकबहुनिबन्धलिखितत्वेन सर्ववैदिकदेशपरिगृहीतत्वेन च निःसन्दिग्धत्वादेतद्विरुद्ध आचारो नादरणीयः।

एताः संक्रान्तयः प्रत्येकं सप्तधा,

"उत्तरात्रयरोहिण्यो मन्दा संक्रान्तिरुच्यते।
तत्र त्रिनाड़िकाकालस्तु प्रशस्ततम उच्यते॥

(१) प्रवृत्ति। (२) प्रभाते।

चित्रानुराधामृगशिरोरेवतीषु च संक्रमे।
मन्दाकिनीचतुर्नाड्यस्तत्र पुण्यतमाः स्मृताः॥
पुष्याश्विहस्तसंक्रान्तौ ध्वांक्षा पञ्चैव नाड़िकाः।
द्विजामघात्रिपूर्वासु घोरायां सप्त नाड़िकाः॥
श्रवणादित्रय-स्वाति-पुनर्वसुषु संक्रमे।
महोदरी पुण्यतमास्तत्र कालोऽष्टनाड़िकाः॥
मूलाश्लेषार्द्रासु शाक्रे राक्षस्यां नव नाड़िकाः।
विशाखाकृत्तिकास्वेवं मिश्रिता तत्र संक्रमे॥
शस्ता द्वादशनाड्यस्तु सर्वत्रैव च कल्पयेत्।
या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः॥
यस्य यः पुण्यकालस्तु तन्मध्ये नाड़िकास्त्विमाः।"

तथा—

"रविसंक्रमणे पुण्ये न स्नायात् यदि मानवः।
सप्त जन्मन्यसौ रोगी निर्द्धनश्चापि जायते॥
अयने कोटिगुणितं लक्षं विष्णुपदीफलं।
षड़शीति सहस्रं तु षड़शीत्यां स्मृतं बुधैः॥"

शातातपः,—

"संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः।
तानि तेषां ददात्यर्कः पुनर्जन्मनि जन्मनि॥"

आपस्तम्बः,—

"अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः।
अहोरात्रोषितः स्नातः सर्वपापैः प्रमुच्यते॥"

इत्यत्रोपवासो गृहस्थेतरेषां ।

स्मृतिमीमांसायां,—

“आदित्येऽहनि संक्रान्त्यां ग्रहणे चन्द्रसूर्य्ययोः ।
उपवासो न कर्त्तव्यो गृहिणा पुत्रिणा सदा ॥”

विष्णुपुराणे,—

“विशाखायां यदा सूर्य्यश्चरत्यंशं तृतीयकं ।
तदा चन्द्रं विजानीयात्कृत्तिकाशिरसि स्थितं ॥
कृत्तिकायां यदा सूर्यः प्रथमांशं तु गच्छति ।
विशाखायां तदा ज्ञेयस्तृतीयांशे दिवाकरः ॥
तदेव विषुवाख्योऽयं कालः पुण्यो विधीयते ।
तदा दानानि देयानि विप्रेभ्यः प्रयतात्मभिः ॥”

अत्र च स्नानदानादिकं यथोक्तदिने कर्त्तव्यं नत्वयं विषुवाख्यसंक्रान्तिकालः ।

किन्त्वन्यः पारिभाषिकः ।

देवीपुराणे,—

“द्वादशैते समाख्याताः स्नानाः पुनरवार्चिताः ।
अलक्ष्मीनाशनात् धन्या महापातकनाशनाः ॥”

द्वादशसंक्रान्तिषु द्वादशविधं स्नानमुक्तं ।

“कुंकुमं रोचना मांसी मुराचन्दनवालुकं ।
हरिद्रारस्य[१] संयुक्तं मेषे स्नानं महापहं ॥

(१) हरिद्रारससंयुक्तं ।

प्रियङ्गुपद्मकं कुष्ठं त्वचामांसी निशाकरं ।
रोचनागुरुसंयुक्तं वृषे स्नानं महाफलं ॥”

निशाकरः कर्पूरः ।

“उशीरं पद्मकं कुष्ठं रोचनाग्रन्थिपर्णकं ।
कुंकुमागुरुसंयुक्तं मिथुने राज्यदं मतं ॥
रोचना वालुकं मुस्तां मुराशैलेयचन्दनं ।
हरिद्रा-कुष्ठसंयुक्तं कर्किसंक्रमणे शुभं ॥
पत्रकं रोचनं मुक्ता मांसी गन्धं च चन्दनं ।
सिंहे स्नानं सुराध्यक्ष ! राज्यायुःपुत्रवर्द्धनं ॥
हरिद्रा-वालुकं कुष्ठं मांसी रोचन-चन्दनं ।
कन्ये स्नानं प्रकर्त्तव्यं भर्त्तानरतिवर्द्धनं ॥
रोचना-तगरं कुष्ठं पद्मकोशीर-पद्मकं ।
हरिद्रावालसंयुक्तं तुले दुष्कृतनाशनं ॥
प्रियङ्गुं स्फटिकं मांसी पद्मकं रोचनागुरुं ।
मुस्ता-कुष्ठ-समोपेतं वृश्चिके राज्यदं मतं ॥
प्रवाल-मौक्तिकं कुष्ठं रोचनागुरुपद्मकं ।
सुरामांसी-समोपेतं धनुः-संक्रमणे शुभं ॥
रोचना-वालुकं कुष्ठं चन्दनागुरुकुंकुमं ।
उशीरं समभागांशं मकरे सर्वसौख्यदं ॥
ग्रन्थिपर्णं त्वचावालं केशरं जाति-पत्रिका ।
रोचना-सह संयुक्तं कुम्भे पुत्रीयराज्यदं ॥”

जातिः जातिफलं । पत्रिका तेजपत्रम् ।

"कर्पूर-फलमूलैला-मांसी-चन्दनपङ्कजं।

कक्कोल-(१)सगन्धोशीरं त्वचं मौने सुखावहं॥"

अथ ग्रहणस्नानं। तत्र निमित्तनिर्णये जावालिः शातातपश्च।

"संक्रान्तेः पुण्यकालस्तु षोड़शोभयतः कलाः।

चन्द्रसूर्य्योपरागे तु यावद्दर्शनगोचरः"॥

अत्र चन्द्रसूर्य्यग्रहणे स्नायादित्यादौ स्नानान्ते (२)नैमित्तिके चन्द्रसूर्य्योपरागमात्रस्य निमित्तश्रवणेऽपि वाक्यान्तरेण "यावद्दर्शनगोचर" इति निमित्तस्य विशेषणान्तरमुपादीयते।

"यावज्जीवमग्निहोत्रं जुहुया"दिति (३)जीवनस्य निमित्तत्वश्रुतावपि सायंप्रातर्जुहोतीति वाक्यान्तरेण सायंप्रातःकालावच्छिन्नजीवस्य निमित्तवत् संक्रान्तिपुण्यकालसाहचर्य्याच्चैवमेव निर्णयः, दर्शनं चाक्षुषज्ञानं द्वित्रिक्षणस्थायित्वान्न स्वरूपेण निमित्तविशेषणं। दर्शनकाले स्नानश्राद्धादेरसंभवात्, तेन तद्योग्यता लक्ष्यते, यद्यपि स्नानादिकाले स्वदर्शनाभावे परदर्शनमस्ति, तथापि तद्ज्ञानं योग्यतावशादेव लभ्यत इति लाघवाद्योग्यतैव निमित्तविशेषणं, मेघाच्छन्ने च यद्यपि देशान्तरमनुष्यैर्दृश्यत्वायोग्यतास्ति, तथा यत्र मेघाच्छादनं तत्र योग्यतानिश्चयाभावान्निमित्तानिश्चयान्न श्राद्धाद्यनुष्ठानं, निमित्तनिश्चये स्यादेव, स्वदर्शनयोग्यता वा निमित्तविशेषणं, मेघाच्छन्ने तदानीं स्वदर्शनयोग्यतैव नास्ति. न च ग्रहणस्नानाङ्गत्वेन, चाक्षुषज्ञानविधिरेव

(१) त्वपनो। (२) नैमित्तिक।

(३) वचनस्य।

किं नस्यादिति वाच्यं तथा सत्यदृष्टान्तरकल्पनाप्रसंगात्, न च ग्रहणे निमित्ते विधानान्निमित्तनिश्चयोऽङ्गमिति तस्यैव चाक्षुषत्वविशेषविधाने लाघवमवशिष्टमिति वाच्यं, विषये प्रायदर्शनादितिन्यायेन संस्कारप्राये दर्शनार्थवत् समालभेतेति स्पर्शनविधिरिति न यागविधिरितिवत्।

संक्रान्तिपुण्यकालसाहचर्य्येण निमित्तविशेषण अनिश्चयात्,

"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन।

नोपरक्तं न वारिस्थं न मध्यं नभसोगतमि"ति यद्यप्येतत्पर्युदासरूपेणानीक्षणसंकल्परूपं विधीयते नतु निषेधः, तथापि स्नातकव्रतमध्यपाठादकरणे प्रत्यवायात् स्वस्य चाक्षुषदर्शनं विधातुं शक्यते। वाक्यार्थद्वैधे हि यस्मिन्नर्थे न विध्यन्तरविरोधः, स एव गृह्यते, (१)यथा दक्षिणावाक्ये गौश्चाश्वश्चाश्वतरश्चेत्यादौ द्वादशशतसंख्या नाश्वविषया विध्यन्तरविरोधादित्युक्तं, अश्वाश्चोपकारकतरा भवेयुर्यद्येषां दानप्रतिग्रहौ प्रतिषिद्धौ न स्यातामिति, तत्सिद्धं स्वदर्शनयोग्यतानिमित्तविशेषणं, तेन स्वयमदृष्टेऽपि स्नानादधिकार आप्तवाक्यादिना योग्यतानिश्चयात्। यद्वा मनुष्याधिकारशास्त्रमिति मनुष्ययोग्यता विशेषणं। तेनार्थादेरप्यधिकारसिद्धिः, चाक्षुषज्ञानविषयस्यैव निमित्ततेति लक्ष्मीधरव्याख्या स्फुटमेव दर्शयति, तेन दृष्टोरिष्टप्रदो राहुरित्यादिदोषेण यो न पश्यति तेनापि स्नानादिकं कार्य्यं।

(१) तथा।

ज्योतिःशास्त्रे,—

"जन्मर्क्षे जन्मनक्षत्रे सप्तमे चाष्टमे तथा।
चतुर्थे द्वादशे चन्द्रे न कुर्याद्राहुदर्शनं॥"

एतद्दोषभीत्या सूर्य्ये च स्नातकव्रतभङ्गभीत्या स्वयमदर्शनेऽपि स्नानादावधिकारः।

"सूर्य्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं।
इन्दुग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना॥"

पूर्वभोजननिषेधः पुरुषार्थः, [१]निमित्तग्रहणकालीनस्नानाद्यङ्गं मानाभावात्, तथा ग्रहणकाले तु [२]नाश्नीयात्।

"मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा।"

ग्रस्तास्तयोस्तु। स्नात्वा दृष्ट्वा परेऽहनि ग्रस्तास्तमितयोस्तयेति, [३]परेह्नीति सूर्ये [४]परेह्नि चन्द्रे परराचावित्यर्थः, परदिने तूदयकाले मेघाच्छादने।

"मेघकालादिदोषेण मुक्तयोरनवेक्षणे।
आकालाख्यस्ततः कालं भुञ्जीत स्नानपूर्वकं॥"

इति वाक्याद्दर्शनाभावेऽपि शास्त्रान्निश्चित्य भोजनमिति, ततः स्नानफलं स्मृतिसमुच्चये,—

"सर्वं भूमिसमं दानं सर्वे व्याससमा द्विजाः।
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे॥

(१) ननु। (२) स्नानीयात्।
(३) परेऽह्नी। (४) परेऽह्नी।

इन्दोर्लक्षगुणं प्रोक्तं रवेर्दशगुणं स्मृतं।
[१]गङ्गातीरे तु संप्राप्ते इन्दोः कोटि रवेर्दश॥"

अन्यस्नानं इन्दुग्रहे लक्षगुणं, सूर्यग्रहे तु दशगुणं, शिष्टाः पठन्ति।

"[२]कोटिजन्मकृतं पापं पुरुषोत्तमसन्निधौ।
कृत्वा सूर्य्यग्रहे स्नानं विमुञ्चति महोदधौ॥
दशजन्मकृतं पापं स्नानान्नश्यति पुष्करे।
शतजन्मकृतं पापं गङ्गासागरसंगमे॥
जन्मान्तरसहस्रेण यत्पापं समुपार्जितं।
तत्सर्वं सन्निहत्यायां राहुग्रस्ते दिवाकरे॥"

संहत्या कुरुक्षेत्रे तीर्थं।

देवीपुराणे—

"कार्त्तिके ग्रहणं पुण्यं गङ्गासागरसङ्गमे।
मार्गे तु ग्रहणं पुण्यं देवीकायां महामुने॥
पौषे वै नर्मदा पुण्या माघे सन्निहिता शुभा।
फाल्गुने श्रवणा पुण्या चैत्रे पुण्या सरस्वती॥
वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा।
ज्येष्ठे तु कौशिकी पुण्या आषाढ़े [३]अविकानदी॥
श्रावणे सिन्धुनाम्ना च तथा भाद्रे च गण्डकी।
आश्विने सरयू श्रेष्ठा भूयः पुण्या तु नर्मदा॥

(१) गङ्गाद्वारे। (२) कुर्य्यात्।
(३) तापकी।

गोदावरी महापुण्या चन्द्रे राहुसमन्विते ।
सूर्य्ये च राहुणा ग्रस्ते तमोभूते महामुने ॥
नर्मदातोयसंस्पर्शात् कृतकृत्या भवन्ति ते ।
एवं गङ्गापि द्रष्टव्या तद्वदेव सरस्वती ॥"

स्मृतिसमुच्चये—

"सूर्य्यग्रहः सूर्य्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातस्तत्रानन्तफलं स्मृतं ॥"

अत्र ग्रहणस्नानमन्त्रः—

"स्वस्थानं गम्यतां राहो त्यज्यतां [1]चन्द्रसंगमः ।
[2]कर्मचाण्डालयोने ! त्वं मम पाप क्षयं कुरु" ॥

सूर्यसंगम इति सूर्यग्रहे—

तीर्थस्नाने तीर्थस्नानमन्त्रं वाधित्वा अस्य निवेशः वैश्यादि-निमित्त-पांचदश्यवन्नैमित्तिकत्वान्निरवकाशत्वाच्च । इदं च स्नानं सुतकादावपि कर्त्तव्यमेव ।

तथाच लिङ्गपुराणे—

"चन्द्रसूर्य्यग्रहे स्नायात्सुतके मृतकेऽपि च ।
अस्नायात् मृत्युमाप्नोति स्नाया[3]त्पापं न विन्दति ॥"

तथा दानादिकमपि सुतकिनां कर्त्तव्यं ।

तत्रैव—

"सुतके मृतके चैव न दोषो राहुदर्शने ।
तावत्कालं भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥"

(१) सूर्य्यसङ्गमः । (२) परं । (३) मृत्यं ।

अत्र शुद्ध्यभिधानं, दानश्राद्धार्थमेव पूर्व्वेण स्नानस्य प्राप्तेः ।

तथा—

"सर्व्वेषामेव वर्णानां सुतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ॥"

ग्रहणनिमित्तमशौचं यत्तदपि स्नानापनोद्यमेव केवलं मुक्ति-पर्य्यन्तं पाकस्पर्शादिनिषेधपरं ।

शातातपः—

"सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने ।
अकुर्वाणस्तु तत् श्राद्धं पङ्के गौरिव मज्जति" ॥

इदं श्राद्धमामश्राद्धमेव, आमश्राद्धं सग्रहे चेति वचनात्, हेमश्राद्धमपि क्वचित् श्रूयते "हेम्ना वामेन सग्रह" इति द्वयो-र्विकल्पः, आमश्राद्धे च पिण्डनिषेधः ।

मार्कण्डेयः,—

"ग्रहणे च व्यतीपाते नवशस्यसमागमे ।
नित्यश्राद्धे च संक्रान्तावपिण्डं श्राद्धमिष्यते ॥"

दानं तु मुक्तिकाले, विमोक्षे चन्द्रसूर्य्ययोरिति शातातप-वचनात् ।

मत्स्यपुराणे,—

"यस्य राशिं समासाद्य भवेद्ग्रहणसंभवः ।
स्नानं तस्य प्रवक्ष्यामि मन्त्रौषधिविधानतः ॥"

उपरागात्पूर्वं कुम्भे वस्त्रौषधिरत्नाद्याहरणं, उपरागकाले स्वस्तिवाचनं ब्राह्मणचतुष्टयपूजनं, शुक्लमाल्यवस्त्रैः, कुम्भचतुष्टय-

स्थापनं सागरबुद्ध्या, गजाश्वरथ्या-वल्मीकसंगमात् ह्रदगोकुलात्, राजद्वाराच्च मृदमानीय प्रक्षेपः, पंचगव्य-शुद्धमुक्ताफल-गोरोचना-पद्म-शंख-आम्र-पत्र-जम्बु-वट-प्लव-पिप्पलपल्लवस्फटिक-श्वेतचन्दन-तीर्थवारि-श्वेतसर्षप-गजदन्त-कुमुदोशीर-गुग्गुलूनां कुम्भेषु प्रक्षेपः।

अत्र तीर्थाद्यावाहनं।

"सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥
योऽसौ [१]वज्रधरो देव आदित्यानां प्रभुर्मतः।
सहस्रनयन[२]श्चेन्द्रो ग्रहपीड़ां व्यपोहतु॥
मुखं यः सर्वदेवानां सत्यार्चिरसितद्युतिः।
चन्द्रोपरागसम्भूतामग्निः पीड़ां व्यपोहतु॥
यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः।
यमश्चन्द्रोपरागोत्थां पीड़ां वै स व्यपोहतु॥
रक्षोगणाधिपः साक्षात्प्रलयानलसप्रभः।
खड्गव्यग्रोऽतिभीमोऽसौ रक्षःपीड़ां व्यपोहतु॥
नागपाशधरो देवो महामकरवाहनः।
स जलाधिपतिश्चन्द्रो ग्रहपीड़ां व्यपोहतु॥
प्राणरूपेण यो लोकान् पाति कृष्णमृगाश्रयः।
वायुश्चन्द्रोपरागोत्थां ग्रहपीड़ां व्यपोहतु॥
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः।
चन्द्रोपरागकलुषं धनदोऽयं व्यपोहति॥

(१) चक्रधरो। (२) शक्रो।

योऽसौ विन्दुयुतो रुद्रः पिनाकी वृषवाहनः।
चन्द्रोपरागपापानि स नाशयतु शंकरः॥
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
ब्रह्मविष्णवर्कयुक्तानि तानि पापं हरन्तु वै॥"

प्रतिकुम्भमेभिर्मन्त्रैरभिमन्त्रणं। ते च पूजिताश्चत्वारो ब्राह्मणाः शुक्लमाल्यानुलेपनाः ऋग्यजुःसाममन्त्रैर्यजमानं [१]स्नवयेयुः। स्नातो यजमानो वस्त्र-गोदानैर्ब्राह्मणान् पूजयेत्, इष्टदेवताश्च। तत्र कस्मिंश्चित् पत्रे अनेन मन्त्रान्विलिख्य तत्पत्रकं कनकपत्ररत्नं पट्टे कृत्वा तत्पट्टं यजमानस्य शिरसि चत्वारो ब्राह्मणा बध्नीयुः. एवमुपरागमोक्षपर्य्यन्तं स्थित्वा स्नात्वा कृतस्वस्त्ययनः तत् पट्टं ब्राह्मणाय दद्यात्, इष्टदेवतां नमस्कृत्य।

"अनेन विधिना यस्तु ग्रहणस्नानमाचरेत्।
न तस्य ग्रहपीड़ा स्यान्न च [२]वन्धुजनक्षयः॥"

सूर्य्यग्रहे सूर्य्यनामग्रहे मन्त्रेषु [३]कीर्त्तयेत्, कुम्भेष्वधिकत्वेन पद्मपरागप्रक्षेपः, गोदाने कपिलागात्रः पराशरः, जन्मर्क्षोपरागे वृषभस्य शकृन्मूत्रे तद्वर्णायाश्च पयः कुशांश्चोदकुम्भे निधायाभिषेकः, इति ग्रहणस्नानं, शिष्टाः।

"आषाढ़ी-कार्त्तिकी-माघी-वैशाखीषु कृतं च यत्।
तदनन्तफलं प्रोक्तं स्नानदानजपादिकं॥

(१) स्नापयेयुः। (२) बन्धुविपर्य्ययः।
(३) कीर्त्तनात्।

अमावास्या द्वादशी च संक्रान्तिर्भानुवासरः ।
तत्र स्नानं जपो होमो देवतार्चनमेव च ॥
उपवासस्तथा दानमेकैकं पावनं स्मृतं ।"

तथा,—
"व्यहस्पृशि तिथौ स्नानं दानं च जप एव च ।
सहस्रगुणितं प्राहुरेवमेव दिनत्रये" ॥

तथा— "षष्ठ्यष्टम्यावमावास्या उभे पक्षे चतुर्दशी ।
अस्नातानां गतिं गच्छेद्यद्यहं नागमेत् पुनः ॥"

अत्र काम्यस्नानस्यैव फलाभावेन निन्दा, न तु पृथक् [१]स्नानानन्तरं नित्यं ।

एवं अलभ्ययोगेषु स्नानं काम्यं—
"अमार्कपातश्रवणैर्युक्ता चेत् पुष्यमाघयोः ।
अर्द्धोदयः स विज्ञेयः कोटिसूर्य्यग्रहैः समः ॥
तदेव कोटिगुणितं पुरुषोत्तमसन्निधौ ।"

आग्नेये—
"अनुमत्यामतीतायां प्रतिपद्रोहिणी शशी ।
यदा भवति संयोगः कार्त्तिकान्ते विशेषतः ॥
कोटिसन्निहितं पुण्यं स्नात्वा चैव महोदधौ ।"

कौर्मे,—
"मार्गे मासि शिनिवाल्यां सागरे यत्र कुत्रचित् ।
स्नात्वाश्वमेधावभृथस्नानस्य लभते फलं ॥

(१) स्नानान्तरं ।

विशाखायास्तुरीयेऽंशे शेषचन्द्रे गते रवौ ।
तथा मैत्रगते भानौ षड्गुणं फलमश्नुते ॥
तथैवेन्द्र[१]गते सूर्य्ये षड्गुणात् षड्गुणं फलं ।
सोमवारे विशेषेण साच्चदा फलदा कुहूः ॥"

ब्रह्माण्डे,—
"कुम्भस्थे भास्करे राजन् मकरे चाङ्गिरःशनौ ।
द्वादशी शुक्लपक्षस्य पुष्यर्क्षे यदि जायते ॥
गोविन्द-द्वादशीनाम महापातकनाशिनी ।
तस्यां क्षारोदधिस्नानं दृष्ट्वा च पुरुषोत्तमं ॥
त्रयोदश्यां महाज्यैष्ठ्याः फलं प्राप्नोति मानवः ।"

कौर्मे,— "ऐन्द्रे गुरुः शशी चैव प्राजापत्यगते रवौ ।
पौर्णमासी गुरौ ज्येष्ठी महाज्येष्ठीति सा स्मृता ॥
महाज्येष्ठ्यान्तु यो गच्छेत् क्षेत्रान्तपुरुषोत्तमं ।
त्रयोदश्यां महाज्यैष्ठ्याः फलं प्राप्नोति मानवः ।॥"

कौर्मे,—
"व्रजेत् पदानि यावन्ति क्रतुतुल्यानि तानि तु ।
तत्र गत्वा हरेर्द्धाम्नि दृष्ट्वा श्रीपुरुषोत्तमं ॥
विश्रम्य विधिवत्स्नायात् प्रतितीर्थेषु वै क्रमात् ।"

ब्रह्माण्डे,—
"पुनर्वसौ देवगुरौ निशाकरे निशेशवारेऽमरपूज्यकेऽथवा ।
कुम्भे रवौ मत्स्यगते वृहस्पतावेकादशी स्यात्किल पापनाशिनी ॥

(१) तथैव भृगते ।

क्षीरोदके वार्य्यवगाह्य यो नरः संपूज्य कृष्णं रजनीमुपोषितः।
एतेन पापं दशजन्मभिः कृतं जेष्नीयते तस्य समस्तमाशु तत्॥"

शिष्टाः—

"पुनर्वसु-बुधोपेता चैत्रे मासि शिताष्टमी।
तस्यां नदीषु स्नानेन वाजपेयफलं लभेत्॥
सप्तमी रविवारेण बुधवारेण चाष्टमी।
अङ्गारकदिने प्राप्ते चतुर्थी वा चतुर्दशी॥
सोमवारे त्वमावास्या सूर्य्यपर्वशताधिका।"

योगी याज्ञवल्क्यः—

"स्नानं दानं जपो ध्यानं पितृदेवार्चनं तथा।
पावनानि मनुष्याणां दुष्कृतस्येह कर्म्मणः॥
अगम्यागमनात् स्तेयात् पापेभ्यस्य प्रतिग्रहात्।
रहस्याचरितात् पापान्मुच्यते स्नानमाचरन्॥
प्रकर्त्तुमसमर्थश्चेज्जुहोति यजति क्रिया।
स्नानध्यानजपैर्होमैरात्मानं पावयेद्बुधः॥
यदेव स्नानं कुरुते विशुद्धेनान्तरात्मना।
तेनैव सर्व्वमाप्नोति विधियज्ञक्रियाफलं॥"

एवमादि-स्नानं काम्यं, यथोक्तविधिना कर्त्तव्यं, मुख्यासामर्थ्ये ऽनुकल्पेऽधिकारः।

एवं तीर्थस्नानेषु—

आदिब्रह्मपुराणे समुद्रस्नानविधिः।

"उग्रसेनं पुरा दृष्ट्वा स्वर्गद्वारेण सागरं।
गत्वाचम्य शुचिस्तत्र ध्यात्वा नारायणं परं॥"

इत्यभिधानादुग्रसेनदर्शनं स्वर्गद्वारगमनमपि समुद्रस्नानाङ्गं।

तथा—

"शतानामश्वमेधानां फलं प्राप्नोति मानवः।
सर्व्वपापविनिर्म्मुक्तो विमानेनार्कवर्चसा॥
कुलैकविंशमुद्धृत्य विष्णुलोकं च गच्छति॥
भुक्त्वा तत्र वरान् भोगान् मन्वन्तरशतं पुनः।
वेदशास्त्रार्थवित् विप्रो भवेद्यज्वा तु वैष्णवः॥
योगं च वैष्णवं प्राप्य ततो मोक्षमवाप्नुयात्।"

इति सामान्यतः पुरुषोत्तमक्षेत्रावच्छिन्नं समुद्रस्नानफलं। "पौर्णमास्यां विशेषेण हयमेधफलं लभेत्" इति वचनात् पौर्णमास्यामेतदेव फलमधिकं।

तथा—

"ग्रहोपरागे संक्रान्त्यामयने विषुवे तथा।
युगादिषु षड़शीत्यां व्यतिपाते दिनक्षये॥
आषाढ्यां चैव कार्त्तिक्यां माघ्यां चान्यशुभे दिने।
ये तत्र दानं विप्रेभ्यः प्रयच्छन्ति सुमेधसः॥
फलं सहस्रगुणितमन्यतीर्थाल्लभन्ति ते।"

अत्र यद्यपि ग्रहणादिषु दानस्य फलाधिक्यमुक्तं न स्नानस्य तथापि माघ्यां चेति चकारेण स्नानस्यापि ग्रहणादिषु फलातिशयजनकत्वं बोध्यं।

तथापि—

"पितॄणां ये प्रयच्छन्ति पिण्डं तत्र विधानतः।
अक्षयां पितरस्तेषां प्रीतिं संप्राप्नुवन्ति वै" ॥

अत्र च दानस्य पृथक् फलकथनान्न स्नानाङ्गत्वमसंयुक्तं, प्रकरणादितिकर्त्तव्यतार्थत्वादिति फलवतां प्रकरणेनाङ्गत्वबोधनात्, विष्णुपूजा [१]तु तदङ्गमेव, एवं स्नात्वा तीर्थे नारायणमन्त्रमभ्यर्च्चेत्यनुवाद्य विशिष्टस्योक्तं फलकथनात्। अत्र च उत्तीर्य्य वाससी धौते प्राणानायम्य, आचम्य गायत्रीं जपेदष्टोत्तरशतं, स्वाध्यायं प्राङ्मुखः कृत्वा इत्यादि कीर्त्तनं, मध्याह्नकालीन समुद्रस्नानस्य तत्कालीनसन्ध्यासाहचर्य्यात् यथाप्राप्तानुवादः, न तु समुद्रस्नानाङ्गत्वेन सन्ध्याब्रह्मयज्ञादेर्विधितर्पणस्यापि वाक्यान्तरप्राप्तस्यानुवादः, तर्पणाङ्गविधानं सन्ध्याङ्गविधानं च पुरुषार्थविषयं, न समुद्रस्नानाङ्गत्वेन, वरुणप्रपा सप्तकरणे सौमिक प्रणयनाङ्ग पैत्रवारवादि विधिवत् कातीयसूत्र इति, तत्र प्रथमं श्वेतमाधवाद्दक्षिणतः शतपादे स्थितस्योग्रसेनस्य दर्शनं, नमस्कारः, समुद्रस्नाने अनुज्ञाप्रार्थनं। समाचारात्—

"उग्रसेन! महाबाहो! बलवन्! सत्यविक्रम!।
[२]समुद्रे स्नातुकामोऽस्मि अनुज्ञां दातुमर्हसि" ॥

ततो धन्वन्तर-शतत्रये स्वर्गद्वारकाष्ठस्तम्भद्वयदर्शनं, तयोः पूजनं, परिष्वङ्गः।

(१) वत्। (२) तीर्थस्नानं करिष्यामि।

ततः प्रार्थना,—

"सागराम्भः समुत्पन्नौ काष्ठौ सर्वगुणान्वितौ।
मध्येन युवयोर्यामि प्रसन्नौ भवतः सदा" ॥

इति प्रार्थ्य तयोर्मध्यमार्गेण समुद्रतीरगमनं, तत्र भूमौ-मण्डलाकारं लिखित्वा तन्मध्ये उपवेशनं, आचमनं संकल्पः, सर्वपापविनिर्मुक्तिसहितशताश्वमेधफलप्राप्तिपूर्वकस्वकीयैकविंशकुलोद्धरणोत्तरार्कवर्णविमानद्वारकविष्णुलोकगमनपूर्वक-शतत्य-मन्वन्तरशतकालीन-वरभोगोपभोगोत्तरभूतलवेदविद्ब्राह्मणजन्मलाभपूर्वकवैष्णवयोगप्राप्तिपूर्वक मोक्षकामः समुद्रस्नानमहं करिष्ये; निष्काम एव वा, नारायणमन्त्रस्य ऋष्यादिस्मरणं, ॐ अष्टाक्षरनारायणमन्त्रस्य, साध्यनारायणऋषिः, दैवी गायत्रीछन्दः, अकारोबीजं, उकारः शक्तिः, मकारः कीलकं, परमात्मा देवता, समुद्रस्नाने विनियोगः, करन्यासः, अङ्गन्यासः, ध्येयः सदा इति ध्यानम्।

आब्रह्मस्तम्भपर्य्यन्तं जगदेतच्चराचरं सर्वं नारायणात्मकमिति ध्यानं, समुद्रमभिमुखीभूय ॐ नमो नारायणाय इति समुद्रोदकोपस्थानं, उपविश्याङ्गुलिष्वष्टाक्षरन्यासः, ॐ नम इति दक्षहस्ताङ्गुष्ठे, ॐ नम इति वामहस्ताङ्गुष्ठे, अक्षरषट्कमवशिष्टं, त्रयस्य दक्षतर्जन्यादित्रये। अपरत्रयस्य वामतर्जन्यादित्रये, नमो नम इति दक्षतर्जन्यां। ॐ नां नमस्तन्मध्यमायां, ॐ रां नमस्तदनामिकायां। ॐ यं नमः वामतर्जन्यां, ॐ णां नमस्तन्मध्यमायां, ॐ यं नम-स्तदनामिकायां,

"ॐकारं वामपादे तु नकारं दक्षिणे न्यसेत्।

मोकारं वामकच्यां तु नाकारं दक्षिणे कटौ ॥
राकारं नाभिदेशे तु यकारं वामबाहुके ।
णाकारं दक्षिणे बाहौ यकारं मूर्द्ध्नि विन्यसेत् " ॥

ॐ नम इति देहाधः । ॐ नं नमः देहोर्द्ध्वे, ॐ मों नमः हृदये, ॐ नां नमः दक्षिणपार्श्वे, ॐ रां नमः वामपार्श्वे, ॐ यं णांयं नम इति वर्णत्रयं पृष्ठे, अथवा अध-आदिस्थानषट्के सर्वस्य मन्त्रस्य न्यासः, नारायणध्यानं ।

कवचबन्धनं—

" पूर्वे मां पातु गोविन्दो दक्षिणे मधुसूदनः ।
पश्चिमे श्रीधरो देवः केशवस्तु तथोत्तरे ॥
पातु विष्णुस्तथाग्नेये नैर्ऋत्यां, माधवोऽव्ययः ।
वायव्ये च हृषीकेशस्तथेशाने च वामनः ॥
भूतले पातु वाराहस्तथोर्द्ध्वे च त्रिविक्रमः ।
अहं नारायणो देवः शंखचक्रगदाधरः " ॥

इतिध्यानं ।

वक्ष्यमाणमन्त्रेण लिङ्गात् समुद्रस्य दण्डवत् प्रणामः ।

" त्वमग्निर्धिषणं नाथ ! रेतोधानामदीपनः ।
प्रधानं सर्वभूतानां जीवानां प्रभुरव्ययः ॥
अमृतस्यारणिस्त्वंहि देवयोनिरपांपते ! ।
वृजिनं हर मे सर्वं तीर्थराज ! नमोऽस्तु ते " ॥

समाचारादनेन मन्त्रेण समुद्रे पाषाणप्रक्षेपः ।

" पिप्पलाद समुत्पन्ने कृत्ये लोकभयंकरि ।
पाषाणं ते मया दत्तमाहारं परिकल्पय " ॥

ततो वृहत् स्नानविधिना तदसम्भवे त्रिरावृत्याघमर्षणविधिना वा स्नानं, तत्र मज्जनाङ्गमन्त्रस्थाने, " अग्निश्च तेजोनिरुजा च देहे रेतोधा विष्णोरमृतस्य नाभिः ", इति भारतीयो मन्त्रः, न चात्र जलजपे कथं नारायणमन्त्रः, तत्र मन्त्रस्याकरणत्वात्, एतद्ब्रुवन्, ततोऽवगाह्येति, ततः शब्देन पूर्वकालीनत्वा-प्रतीत्यास्य मन्त्रस्य दृष्टार्थत्वायकरणत्व लाभेन करणमन्त्रस्थाने निवेशसम्भवे दृष्टान्तरपादकप्रकृतकार्य्यक्रियमाणानुवादेन विनि-योगात्, पश्चात्त्रिरावृत्याघमर्षणजपो जलमग्नस्य, इदं च प्राकृतं सर्वस्नानविधिषु समुद्रस्याधिकमङ्गं, साजलादवाक्येन विधिप्रतीतेः, पश्चादित्यप्राकृतपाठाच्च, ततो जलमध्ये वा, उत्तीर्य्य वाससी परिधाय स्थले तर्पणं, वस्त्रनिष्पीड़नान्तं, माध्याह्निकं तन्त्रेण चेत्, " देवागा तु विद " इति निवेदनान्तं । अथ नारायणपूजा, प्रथमं वालुकां समीपे कृत्य हस्तमात्रं चतुर्द्वार-चतुरस्रलिखनं, यथास्थानं पूजोपकरणस्थापनं, आसनमेकं पद्मादिना समा-श्रित्याग्रेण तालत्रयं, दिग्बन्धनं, वह्निप्राकारचिन्तनं, नाराच मुद्रया विघ्ननिवारणं, अथ भूतशुद्धिः । यमिति वायुवीजं, धूम्रवर्णं ध्यात्वा तदुत्थितवायुना देह[१]शोधनं, रमिति अग्निवीजं रक्तवर्णं ध्यात्वा तदुत्थितशिखवह्निना पापेन सह देहदहनं, पापपुरुषं वामकुक्षौ ध्यात्वा तथैव यथोक्त शोषणदहने, वमितिवीजं चन्द्र-

(१) शोषणं ।

मण्डलमध्यस्थं शुक्लं मूर्द्धि ध्यात्वा तदुत्थितामृतवृष्ट्या देहप्लावनं, ततः करशुद्धिः, अष्टाक्षरेण पञ्चविंशतिजप्ते प्राणायामत्रयं । मातृकान्यासः, ततो भावनाचतुष्टयं, अष्टाक्षरं देहे न्यासः, यथा, ॐ शुक्लं भूर्नम इति वामपादे, ॐ नं रक्तं भुवः नम इति दक्षिणपादे, ॐ मों श्यामं स्वर्नम इति वामकक्ष्यां, ॐ नां रक्तं महर्नम इति दक्षिणकक्ष्यां, ॐ रां कुंकुमाभं जनः नम इति नाभौ, ॐ यं पीतं तपः नम इति वामांशे, ॐ णां कज्जलाभं सत्यं नम इति दक्षांशे, ॐ यं बहुवर्णं सर्वलोकाधिष्ठानं नम इति शिरसि, ॐ नारायणाय नमः हृदयाय नमः, ॐ विष्णवे नमः, शिरसि स्वाहा, ॐ ज्वलनाय नम इति शिखायै वषट् । ॐ विष्णवे नमः कवचाय हूं, ॐ विष्णवे सुरद्विषे बन्धाय हूं फट् अस्त्राय फट्, इत्यङ्गन्यासः ।

ॐ शिरसि शुक्लो वासुदेवः, इति शिरसि न्यासः, ॐ अं ललाटे रक्तः संकर्षणो गरुत्मान् वह्निस्तेज आदित्य इति ललाटे न्यासः, ॐ आं ग्रीवायां, पीतः प्रद्युम्नो वारिमेघाभ इति कण्ठे, ॐ आं हृदये कृष्णो ऽनिरुद्धः सर्वशक्तिसमन्वित इति हृदये न्यासः ।

इति चतुर्व्यूहन्यासः । अथ कवचं—

"ममाग्रतस्थितो विष्णुः पृष्ठतश्चापि केशवः ।
गोविन्दो दक्षिणे पार्श्वे वामे तु मधुसूदनः ॥
उपरिष्टात्तु वैकुण्ठो वाराहः पृथिवीतले ।
अवान्तरदिशो यास्तु तासु सर्वासु माधवः ॥

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ।
नरसिंहकृता गुप्तिर्वासुदेवमयो ह्ययं" ॥

इति विष्णुमयत्वचिन्तनं, अष्टाक्षरविधिनार्घसंस्कारः, ॐ नम इति मन्त्रेण पूजोपयोगि-सर्वद्रव्यप्रोक्षणं, अथ हृदये पूजा, हृदये पद्मचिन्तनं, तदुपरि सूर्य्यविम्बं । तदुपरि चन्द्रविम्बं । तदुपरि वह्निविम्बं चिन्त्यं, तत्र पवनमण्डलं, तत्र आकाशमण्डलं च चिन्त्यं । तत्र ॐकारात्मकं [1]विद्युज्ज्योति तत्रस्थं चिन्तयित्वा तत्राष्टाक्षर-मन्त्रस्य मनसा न्यासः, अष्टाक्षर-प्रत्येकवर्णैः, ॐ नारायणाय नमः, नं नारायणाय नमः, इत्यादिना मनसा पूजनं, समस्तेन अष्टाक्षरमन्त्रेण गन्धपुष्पादिना पूजनं, पश्चाद्द्वादशाक्षरमन्त्रेण पूजनं, एवं मनसा पूजयित्वा पाद्यादिकं संस्कृत्य वहिः पीठपूजा, ततो लिखितपद्मस्य कर्णिकायां प्रतिमां संस्थाप्य शालग्रामं वा तथैव स्थण्डिले वा, चतुर्भुजं शंख, चक्र, गदा, पद्मधरं नारायणं सूर्य्य-कोटिप्रतीकाशं विचिन्त्यावाहनम् ।

तत्र मन्त्रः—

"मीनरूपो वराहश्च नरसिंहो ऽथ वामनः ।
आयान्तु देवो वरदो मम नारायणोऽग्रतः" ॥

ॐ नमो नारायणाय नम इति चिन्तयित्वा नारायण अत्रा-गच्छ, इह तिष्ठेत्यावाहनं ।

"सुमेरुः पदपीठं ते पद्मकल्पितमानसं !
सर्वसत्वहितार्थाय तिष्ठस्व मधुसूदन !" ॥

(१) विद्युज्ज्योतिस्थं ।

ॐ नमो नारायणाय इत्यासनं समर्प्य तत्र स्थापनं ।

ॐ त्रैलोक्यपतीनां पतये देवदेवाय हृषीकेशाय श्रीविष्णवे नमः, ॐ नमो नारायणाय नमः, अर्घं ददामीति अर्घदानं ।

"पाद्यं ते पादयोर्देव ! पद्मनाभ ! सनातन ! ।
विष्णो ! कमलपत्राक्ष ! गृहाण मधुसूदन" ! ॥

ॐ नमो नारायणाय नमः, पाद्यं ददामीति पाद्यं ।

"मधुपर्कं महादेव ! ब्रह्माद्यैः कल्पितं तव ।
मया निवेदितं भक्त्या गृहाण मधुसूदन" ! ॥

ॐ नमो नारायणाय नमः मधुपर्कं ददामीति मधुपर्कं ।

"मन्दाकिन्यास्तु ते वारि सर्वपापहरं शुभं ।
गृहाणाचमनीयं [१]त्वं मया भक्त्या निवेदितं" ॥

ॐ नमो नारायणाय नमः, आचमनीयं ददामीति ।

"त्वमापः पृथिवी चैव ज्योतिस्त्वं वायुरेव च ।
लोकसंवृतिमात्रेण वारिणा [२]स्नावयाम्यहं" ॥

ॐ नमो नारायणाय नमः स्नानं कारयामीति ।

"वेदतत्त्व समायुक्ते यज्ञ [३]क्रतुसमन्विते ।
स्वर्णवर्णप्रभे देव ! वाससी तव केशव !" ॥

ॐ नमो नारायणाय नमः वस्त्रं ददामि !

"शरीरं ते न जानामि चेष्टां चैव च केशव ! ।
मया निवेदितान् गन्धान् प्रतिगृह्य विलिप्यतां" ॥

(१) तु । (२) स्नापयाम्यहं ।
(३) तन्तु ।

ॐ नमो नारायणाय नमः, गन्धं ददामि ।

"ऋग्यजुःसाममन्त्रेण निर्वृत्तं पद्मयोनिना ।
सावित्रीग्रन्थिसंयुक्तमुपवीतं तवाच्युत" ! ॥

ॐ नमो नारायणाय नमः यज्ञोपवीतं ददामि ।

"दिव्यरत्नसमायुक्ता वह्निभानुसमन्विताः ।
गात्राणि शोभयन्ते ते अलंकाराश्च माधव" ! ॥

ॐ नमो नारायणाय नमः अलंकारं ददामि ।

अष्टाक्षरप्रत्येकवर्णैः ॐ नमः पुष्पं ददामि, ॐ नं नमः पुष्पं ददामि, इत्येवं रूपेणाष्टपुष्पाञ्जलिं दत्त्वा । ॐ नमो नारायणाय नमः पुष्पं ददामीति एवं मन्त्रव्यस्तसमस्ते पुष्पदानं, ततः ॐ पुरुषोत्तमाय नम इति पुष्पाञ्जलिदानम् ।

"वनस्पति रसो दिव्यो गन्धाढ्यः सुरभिश्च ते ।
मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यतां" ॥

ॐ नमो नारायणाय नमः धूपं ददामि स्वाहा,

"सूर्य्यचन्द्रमसोर्ज्योतिर्विद्युदग्न्योस्तथैव च ।
त्वमेव ज्योतिषां देव ! दीपोऽयं प्रतिगृह्यतां" ॥

ॐ नमो नारायणाय नमः दीपं स्वाहा ।

"अन्नं चतुर्विधं चैव रसैः षड्भिः समन्वितं ।
मया निवेदितं भक्त्या नैवेद्यं तव केशव" ! ॥

ॐ नमो नारायणाय नमः नैवेद्यं ददामि स्वाहा, पूर्वमन्त्रेणाचमनीयं, सुखवासं करपृष्टं ताम्बूलं च दत्त्वा, आवरण-पूजा, पूर्वादिचतुर्दिक्षु दलेषु, वासुदेव, संकर्षण, प्रद्युम्न, अनि-

रुद्राणां, स्थापनं पूजनं, आग्नेयादिकोणदलेषु, वराह-नृसिंह-वामनत्रिविक्रमाः स्थाप्याः पूज्याः, एषामष्टाक्षरेण पूजा गन्ध-पुष्पाभ्यां, वक्ष्यमाणानां स्वनामचतुर्थ्यां नमो मन्त्रेण । पुरतो गरुडं संस्थाप्य पूजनं, दक्षे चक्रं, वामे शंखं, गदां दक्षे, शार्ङ्गं वामे, दक्षिणे चेषुधी, खड्गं वामे, श्रियं दक्षे, पुष्टिमुत्तरे, पुरतो वनमालां, ततः श्रीवत्सकौस्तुभौ, पूर्वादिचतुर्दिक्षु, हृदयादीनि, कोणेष्वस्त्रं, अष्टदिक्षु, अध ऊर्द्ध्वं, इन्द्रादीन् ब्रह्मान्तान संस्थाप्य पूजनं, आवरणपूजां समाप्य मुद्रादर्शनं, पद्म, शंख, श्रीवत्स, गदा, गरुड, वाण, चक्र, शार्ङ्गाख्या, अष्टौ मुद्राः, ततः पुष्पाञ्जलिं दत्त्वा, अष्टाक्षरमन्त्रेणाष्टशतं अष्टाविंशतिं वा जपः, समर्पणं, स्तुति-प्रदक्षिण-नमस्काराः, पुनरर्घं दत्त्वात्मानं समर्प्य विसर्जनं ।

"गच्छ गच्छ परं स्थानं पुराण पुरुषोत्तम ! ।
यत्र ब्रह्मादयो देवा न विदुस्ते परं पदं" ॥

ॐ नमो नारायणाय नमः, क्षमस्वेति हृत्पद्मे संहरणं । ततः शिरसा प्रणम्य सागरप्रसादनं ।

"प्राणस्त्वं सर्वभूतानां योनिश्च सरितांपते ! ।
तीर्थराज ! नमस्तुभ्यं ! त्राहि मामच्युतप्रिय" ! ॥

ततो रामाय नमः, कृष्णाय नमः, सुभद्रायै नमः, सागराय-नमः । इति नमस्काराः, ततो ऽच्छिद्रावधारणं, इति स्नानं ।

"अर्चनं ये न जानन्ति हरेर्मन्त्रं यथोदितं ।
तेन ते मूलमन्त्रेण पूजयन्त्वच्युतं तदा" ॥

इति वचनात् उक्तपौराणिकवत् (१)मन्त्रज्ञाने अष्टाक्षरमूलमन्त्रेण यथोक्तोपचारैः पूजा । तदप्यावरणपूजा ऽनेनैव प्रकारेण क्रमोऽप्ययमेव, इति ब्रह्मपुराणोक्त-समुद्रस्नानविधिः ।

अथ मार्कण्डेयहृदस्नानविधिः, नरसिंहपुराणे, मार्कण्डेयं प्रति विष्णुवाक्यं,—

"इदं तीर्थं महाभाग ! त्वन्नाम्ना ख्यातिमेष्यति" ।

ब्रह्माण्डपुराणे,—

"मार्कण्डेयहृदं गत्वा नरश्चोदङ्मुखः शुचिः ।
निमज्जयेत्त्रिचतुरान् इमं मन्त्रमुदीरयेत् ॥
संसारसागरे मग्नं पापग्रस्तमचेतनं ।
त्राहि मां भगनेत्रघ्न ! त्रिपुरारे ! नमोऽस्तु ते ॥
नमः शिवाय शान्ताय सर्वपापहराय च ।
स्नानं करोमि देवेश ! मम नश्यतु पातकं ॥
नाभिमात्रे जले (२)स्नात्वा विधिवद्देवतापितॄन् ।
तिलोदकेन मतिमान् पितॄंश्चान्यांश्च तर्पयेत्" ॥

अन्यानपि करणतया येषां तर्पणमनावश्यकमित्यर्थः ।

"प्रविश्य देवतागारं कृत्वा तं त्रिः प्रदक्षिणं ।
मूलमन्त्रेण संपूज्य मार्कण्डेयस्य चेश्वरं ॥
अघोरेण च ये विप्राः प्रणिपत्य प्रसादयेत् ।
त्रिलोचन ! नमस्तेऽस्तु नमस्ते शशिभूषण ! ॥
त्राहि मां त्वं विरूपाक्ष ! महादेव ! नमोऽस्तु ते" ।

(१) मन्त्राज्ञाने । (२) स्थित्वा ।

मूलमन्त्रः पञ्चाक्षरः—

"मार्कण्डेयह्रदे त्वेवं स्नात्वा दृष्ट्वा च शंकरं।
दशानामश्वमेधानां फलं प्राप्नोति मानवः॥
शिवलोके वरान् (१)भुक्त्वा चेहलोके भवेत्पुनः।
शंकरं योगमासाद्य ततो मोक्षमवाप्नुयात्"॥

अथेन्द्रद्युम्नस्य सरः,—

"गत्वा तत्र शुचिर्धीमान् (२)आचम्य मनसा हरिं।
ध्यात्वोपस्थाय च जलमिमं मन्त्रमुदीरयेत्॥
अश्वमेधाङ्गसंभूत! तीर्थ! सर्वाघनाशन!।
स्नानं त्वयि करोम्यद्य पापं हर नमोऽस्तु ते॥
एवमुच्चार्य्य विधिवत् स्नात्वा देवानृषीन् पितॄन्।
तिलोदकेन चान्यांश्च संतर्प्याचम्य वाग्यतः॥
दत्त्वा पितॄणां पिण्डांश्च संपूज्य पुरुषोत्तमं।
दशाश्वमेधिकं सम्यक् फलं प्राप्नोति मानवः॥
सप्तावरान् सप्त परान् वंशानुद्धृत्य वैष्णवं।
(३)भोगं भुक्त्वा चिरं पश्चादिह मोक्षं लभेद्ध्रुवं"॥

तत्र क्रमः, तत्र गत्वाचमनं, हरिध्यानं, जलोपस्थानं तूष्णीं, मन्त्रेण स्नानं, तर्पणं, पिण्डदानं, श्रीपुरुषोत्तमपूजनं चेति, स्नानं प्रधानमन्यान्यङ्गानि।

श्वेतगङ्गायां, ब्राह्मे श्वेतं प्रति विष्णुवाक्यं।

(१) भूत्वा। (२) संस्मरन्। (३) लोकं।

"प्रासादस्य समीपे त्वं कुण्डं कारय सुव्रत!।
श्वेतगङ्गेति गास्यन्ति यावदाभूतसंप्लवं॥
कुशाग्रेणापि कौन्तेय श्वेतगाङ्गेयमम्बु च।
स्पृष्ट्वा स्वर्गं गमिष्यन्ति मद्भक्ता ये समाहिताः"॥

इति वचनात्। मज्जने महत् फलं गम्यते।

अथ गङ्गास्नानं—

"सकृत्तीर्थं निषेवेत गंगां चैव पुनःपुनः।
सर्वतीर्थमया गंगा (१)सर्वतीर्थमयो हरिः।
अवगाहनमात्रेण मानवानां सदैव हि॥
पापौघं निर्दहेत् गंगा तूलराशिमिवानलः॥
गच्छध्वं विबुधा गंगां ज्ञात्वा विश्वमशाश्वतं।
सुघोरेऽस्मिन् कलौ प्राप्ते मुक्तिर्वो वांछिता यदि"॥

तथा,—

"अहो किं बहुनोक्तेन गंगा सेव्या सदा नरैः।
नान्यत्संसारदुःखस्य नाशकं मोक्षकारकं॥
स्मृताभिलषिता दृष्टा पीता स्पृष्टावगाहिता।
या पावयति भूतानि कीर्त्तिता च दिने दिने॥
दन्तुव्रतसहस्रन्तु यः कुर्यात्कायशोधनं।
पिबेद्यश्चापि गगांम्भः समौ स्यातां न वा समौ॥
दृष्ट्वा जन्मकृतं पापं स्पृष्ट्वा जन्मत्रयार्जितं।
स्नानाद् जन्मशतोद्भूतं हन्ति गंगा कलौ युगे"॥

(१) सर्वदेवमयो।

तत्र गंगास्नाने मन्त्रः ।

"[१]विष्णुपादार्घ्यसंभूते ! गंगे ! त्रिपथगामिनि ! ।
धर्मद्रवीति विख्याते पापं मे हर जाह्नवि ! ॥
श्रद्धया भक्तिसंपन्ने श्रीमातर्देवि जाह्नवि ! ।
अमृतेनाम्बुना देवि ! भागीरथि ! पुनिहि मां" ॥

तथा,— "गौतमी जाह्नवी रेवा चतुर्थी च पुनः पुना ।
कावेरी गोमती कृष्णा ब्राह्मी वैतरणीति च ॥
[२]विष्णुपादार्घसंभूता गंगेह नवधा स्मृता" ।

इतिवचनात् [३]आसु गंगाशब्दप्रयोगस्य कार्यार्थत्वाद्गंगामन्त्र एतास्वपि प्रयोज्यः, गोदावर्य्यां तु ।

"गोदावरी जलस्पर्शाद् वातो यत्र प्रवर्त्तते ।
तद्देशवासिनां मुक्तिः किमु तत्तीरवासिनां" ॥

ततः स्नानमन्त्रः—

"त्र्यम्बकजटोद्भूते ! गौतमस्याघनाशिनि ! ।
सप्तधा सागरं [४]यान्ति गोदावरि ! नमोऽस्तु ते ॥
गोश्रोत्र-धाम्नि ! दिव्यन्ति गोमदामविहारिणि ! ।
गोभागकृतसंचारे ! गोदावरि ! नमोऽस्तु ते" ॥

वैतरण्यां विशेषः, महाभारते,—

"उपस्पृश्यैव भगवनस्यां नद्यां महामते[५] ! ।
मानुषादस्मि विषयादपेतः पुरुषर्षभ !" ॥

(१) विष्णुपादाग्र । (२) विष्णुपादाग्र । (३) नदीषु ।
(४) याति । (५) महामुने ! ।

इति युधिष्ठिरस्य लोमशं प्रति वाक्यं ।

तत्र मन्त्रः—

"अयातयामं सर्वेभ्यो भागेभ्यो भागमुत्तमं ।
देवाः संकल्पयामासुर्भयाद्रुद्रस्य शाश्वतं ॥
इमां गाथामनुस्मृत्य य इहोपस्पृशेन्नरः ।
देवयानस्तस्य पन्थाश्चाक्षुषैव प्रकाशते" ॥

कृष्णवेण्यां च;—

"सह्यपादोद्भवा देवी श्रीशैलोत्सङ्गगामिनी ।
कृष्णवेणीति विख्याता सर्वपापप्रणाशिनी" ॥

तत्र स्नानमन्त्रः—

"सह्यपादोद्भवे ! देवि कृष्णवेणीति विश्रुते ! ।
सर्वपापविशुद्ध्यर्थं स्नास्ये देवि तवाम्भसि ॥
प्रसीद मे देवि ! सदामरेश !
देवेश ! स्रष्टा[१] जगतां विमुक्त्यै ।
स्नानेन यस्या मलधौतपापः
प्राप्नोति विष्णोः पदमेव मर्त्यः ॥
ब्रह्मामृतानन्दरसेन पूर्णं
जलेन पूर्णामिव मेनिरेऽज्ञाः ।
तां त्वावगाह्यामि पिवामि कृष्णे !
देवानृषींस्तर्पयिष्ये पितॄंश्च" ॥

(१) स्रष्टा ।

नर्मदायां च,—

"आद्ये ! नमः पुण्यजले ! नमः सागरगामिनि ! ।
नर्मदे ! पापनिर्वारि ! नमो देवि ! वरानने ! ॥
नमोऽस्तु ते मुनिगणसिद्धसेविते
नमोऽस्तु ते ! [१]शंकरदेहनिःसृते ! ।
नमोऽस्तु ते धर्मभृतां वरप्रदे !
नमोऽस्तु ते सर्वपवित्रपाविनि" ॥

तत्र गंगासागरस्नानमन्त्रः,—

"त्वं देवि ! सरितां [२]नाथ ! त्वं देवि ! सरितां वरे ! ।
उभयोः सङ्गमे स्नात्वा मुञ्चामि दुरितानि वै" ॥

करतोयास्नानमन्त्रः,—

"करतोये ! सदा नीरे ! सरित् श्रेष्ठेति विश्रुते ! ।
[३]आप्लावयसि [४]गोत्राणां पापं हर नमोऽस्तु ते" ! ॥

कौशिकीस्नानमन्त्रः,—

"गाधिराजसुते ! देवि ! विश्वामित्रमुनेः स्वसः ।
ऋचीकभार्य्ये ! सत्तोये । पापं मे हर कौशिकि" ॥

भीमरथीमन्त्रः,—

"भीमखेदसमुद्भूते ! रथनेमिविनिसृते ! ।
सर्वपापप्रशान्त्यर्थं स्नास्ये देवि ! तवाम्भसि" ॥

---

(१) शंकरदेहनिर्गते । (२) मौश ।
(३) अप्लावयामि । (४) गोत्राणि ।

लौहित्यसमुद्रसंगमे,—

"ब्रह्मपुत्र ! महाभाग शान्तनोः कुलवर्द्धन ! ।
अमोघागर्भसंभूत ! पापं लौहित्य ! मे हर" ॥

तथा—

"देव्यास्त्रिंशत्सहस्रं जलधिगतनदीस्नानमन्योन्यतुल्य"मिति-वचनात् समुद्रगानदीस्नानं गायत्री-त्रिंशत्सहस्रजपफलकामिना कार्य्यं ।

"कृच्छ्रं देव्ययुतं चैव प्राणायामशतत्रयं ।
समुद्रगानदीस्नानं सममेतच्चतुष्टय"मिति ॥

दशप्रणवयुक्तं देव्ययुतं परं ।

यच्च,—

समुद्रगानदीतीरवासिनामभ्यासत्वात्तेषां स्नानं देव्ययुतसमं, अन्येषां त्रिंशत्सहस्रसममिति ।

भविष्यपुराणे,—

"भास्करायतनाभ्यासे यत्तोयं पुरतः स्थितं ।
सूर्य्यगङ्गेति तत्तोयं तत्र स्नात्वा दिवं व्रजेत्" ॥

तथा,—

"शिवलिङ्गसमीपस्था नद्यः सर्वाश्च भारत ! ।
वापीकूपतड़ागाश्च शिवतीर्था इति स्मृताः ॥
स्नात्वा तेषु नरो भक्त्या शिवतीर्थेषु मानवः ।
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः" ॥

एवमादिषु पृथगेव स्नानान्तरं, माध्याह्निकस्नानं तु चतुर्थभाग-

ऽतेन तीर्थस्नानेन प्रसंगात् सिध्यति, प्रातःसन्ध्योत्तरं तीर्थस्नानेन माध्याह्निकस्नानसिद्धिः, किं तु चतुर्थभागे पृथगेव कार्य्यं, प्रातः-स्नानकाले तु न तीर्थस्नानादेः काम्यस्नानान्तरस्य वा प्रसंगः ।

"सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत् कुरुते कर्म न तस्य फलभाग्भवेदि"ति ॥

सन्ध्यानुष्ठानात् पूर्वमनधिकारात्, यत्तु प्रातःस्नानकाल एव विशेषेण विहितं, माघस्नानं तस्य प्रातःकाल एव कालः सन्ध्यातः पूर्वमपि तदनुष्ठानं ।

यथा,— "प्रातः स्नात्वा मुनिश्रेष्ठाः! शिवतीर्थेषु मानवः ।
अश्वमेधफलं प्राप्य रुद्रलोकं च गच्छति" ॥

इत्यादावपि प्रातःसन्ध्यातः पूर्वं कालः ।

"प्रातःस्नाय्यरुणकिरणग्रस्तां प्राचीमवलोक्य स्नाया"दिति नित्यकाम्यसकलप्रातःस्नानोद्देशेनारुणोदयकालविधिः ।

यथा,—

य इष्ट्वा पशुना सोमेन यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेतेति नित्यकाम्यसोमयागानां कालविधिः । कार्त्तिकस्नाने तु यद्यपि विष्णुस्मृतौ प्रातःशब्दो नास्ति ।

तथापि,—

"कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन!" ।

इति मन्त्रलिङ्गात् ।

"तुलामकरमेषेषु प्रातःस्नायी भवेन्नरः ।
हविष्यभुक् ब्रह्मचारी सर्वपापैः प्रमुच्यते" ॥

इति वाक्ये वाक्यान्तरैः कार्त्तिकादिमासत्रयविहितानां व्रतानां तन्त्रेण फलसम्बन्धकथनार्थमिदं वाक्यं । मूलत्वात् कल्प्यते ।

तथाश्विनापरपक्षश्राद्धमेव कन्यागतापरपक्षश्राद्धमिति सौरमासेन व्यपदिश्यत इति वसन्ते वसन्ते ज्योतिषा यजेतेति वाक्ये ज्योतिष्टोमस्य ज्योतिःपदेनानुवादेन [१]निमित्तसम्बन्धवत्, अनुवादस्य गौणत्वेऽप्यदोषात्, न च संहतानां तुलादिमासानां व्रतसम्बन्धो मासस्य कालस्योद्देश्यत्वेन साहित्याविवक्षणात् ।

अन्यथा आकासा वैषु यत्स्नानमित्यादावपि पौर्णमासीचतुष्टयकालीन पृथक् स्नानविधिनापत्तेः, न चैतत् कस्यचिदिष्टं, अस्मिन् पक्षे सुतरां कार्त्तिकस्नानं प्रातःकालीनमिति, तत्रापि सन्ध्यातः पूर्वमधिकारः, काम्यस्नानानां सर्वेषां सन्ध्यारात्रिव्यतिरिक्ते ऽनुष्ठानमिति सर्वं रमणीयं, एवं स्नात्वा गृहागमनं, माध्याह्निककर्मान्तरं ।

याज्ञवल्क्यः,—

"प्रक्षाल्य तीर्थदेशं तु गत्वा स्वं धर्ममाचरेत्" ।

तथा—

"स्नावन्त्यादिस्वथाचम्य सोपानत्कोह्य संस्पृशन् ।
आगतः सोदपादस्तु यत्नेन शुचिरेव सः ॥
तेनोदकेन द्रव्याणि प्रोक्ष्याचम्य पुनर्गृहे ।
ततः कर्माणि कुर्वीत नित्यं वै यानि कानिचित्" ॥

(१) नित्य ।

द्रव्याणि पूजापंचयज्ञोपयुक्तानि ।

"पात्रादिरहितं तोयमुद्धृतं सव्यपाणिना ।
न तेन प्रोक्षणं कुर्यादस्त्रनिष्पीड़नेन च" ॥

शातातपः—

"नाधोवस्त्रैकदेशेन शुद्ध्यर्थमप आहरेत् ।
यदानीतं तु सव्येन प्रोक्षये[1]द्दक्षिणेन तु" ॥

अत्र प्रोक्षणमुपलक्षणं ।

पूजा पञ्चयज्ञ भोजनाद्यर्थमीदृशमेव जलमित्यवगन्तव्यं ।

विष्णुपुराणे तर्पणानन्तरं,—

"ततो गृहार्चनं कुर्य्यादभीष्टसुरपूजनं ।
जलाभिषेकपुष्पाणां धूपादीनां निवेदनैः" ॥

पद्मपुराणे,—

"द्विजं गां कांचनं स्पृष्ट्वा ततो विष्णुगृहं व्रजेत् ।
आश्रयस्तु ततः पूज्य प्रतिमां वापि पूजयेत्" ॥

नरसिंहपुराणे,—

"जले देवं नमस्कृत्य ततो गृहगतः पुनः ।
विधिना पुरुषसूक्तस्य ततो विष्णुं समर्चयेत्" ॥

एवंगतप्रातर्विष्णुपूजायां कृतायामपि पुरुषसूक्तेन मध्याह्ने पूजावश्यं कर्त्तव्या नित्यवद्विधानात् ।

तथाच शिष्टाः,—

"प्रातस्तु पूजयेद्विष्णुं पंचरात्रविधानतः ।

(१) — द्दर्शनेन ।

मध्याह्ने पूजयेद्विद्वान् विष्णु पुरुषसूक्तकैः" ॥

पुरुषसूक्तपूजाविधिस्तु नरसिंहपुराणोक्तो ग्राह्यः ।

नरसिंहपुराणे,—

"आनुष्टुभस्य सूक्तस्य, त्रिष्टुभे तस्य देवता ।
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥
आद्ययावाहयेद्देव मृचान्तपुरुषोत्तमं ।
द्वितीययासनं दद्यात् पाद्यं दद्यात् तृतीयया ॥
चतुर्थ्यार्घं प्रदातव्यं पंचम्याचमनीयकं ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या पीतवाससी ॥
यज्ञोपवीतमष्टम्यां नवम्यां गन्धमेव च ।
पुष्पं दद्यात् दशम्यां तु एकादश्यां तु धूपकं ॥
द्वादश्यां दीपदानं स्यात् त्रयोदश्यां निवेदनं ।
चतुर्दश्यां जलं[1] कुर्यात् पञ्चदश्यां प्रदक्षिणं ॥
षोड़शोद्वासनं कुर्यात् शेषकर्माणि पूर्ववत् ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकं ॥
षण्मासात् सिद्धिमाप्नोति देवदेवं समर्चयन् ।
संवत्सरेण तेनैव सायुज्यमुपगच्छति" ॥

अत्र शेषकर्माणि पूर्ववदिति नारसिंहे द्वात्रिंशाध्याये यानि काम्यानि घृतादिस्नानादीनि श्रूयन्ते, अन्यत्रापि कामनायां सत्यां कार्याणीत्यतिदिश्यन्ते, नत्वावाहना[2]द्यो तत्र यद्द्रव्यं श्रुतं तस्यातिदेशः, शेषकर्माणीत्यनेन उक्तषोड़शोपचारातिरिक्तकर्मणामेवाभि-

(१) चतुर्दश्याञ्जलिं । (२) नत्वावाहनाद्योः ।

ह्रितत्वात्, तेनात्र षष्ठ्या स्नानं कर्त्तव्यमित्युक्तं तज्जलेन कार्य्यं पापमुक्तिपूर्वकविष्णुलोकप्राप्तीच्छायां घृतेन स्नानं शंखभेरी-निनादादिसहितं षष्ठ्या ऋचा पृथक् कर्त्तव्यमित्यतिदिश्यते, एवमन्यदूह्यं ।

तथाहि द्वात्रिंशाध्याये श्रूयन्ते,—

"आगच्छ नरसिंहेत्यावाहनाचतपुष्पकैः ।
एतावतापि राजेन्द्र! सर्वपापैः प्रमुच्यते ॥
दत्वार्घमासनं पाद्यं स्नानमाचमनीयकं ।
देवदेवस्य विधिना स्वर्गलोके महीयते ॥
तोयेन स्नापयेद्भक्त्या नरसिंहं नराधिप! ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥
स्नाप्य दध्ना सकृद्विष्णुं निर्मलः प्रियदर्शनः ।
विष्णुलोकमवाप्नोति सेव्यमानः सुरोत्तमैः ॥
यः पुनर्नृहरेरर्घं मधुना स्नापयेन्नरः ।
अग्निपुरे स मोदित्वा पुनर्विष्णुपुरे वसेत् ॥
घृतेन स्नपनं यस्तु पर्वकाले विशेषतः ।
नरसिंहे ततः कुर्यात् शंखभेरीनिनादितं ॥
पापकञ्चुकनिर्मुक्तो विष्णुलोके महीयते ।
पञ्चगव्येन देवेशं स्नापयेत् योऽतिभक्तितः ॥
ब्रह्मकुर्चविधानेन विष्णुलोके महीयते ।
कुशपुष्पोदकैः स्नात्वा ब्रह्मलोकमवाप्नुयात् ॥
रत्नोदकेन सावित्रं वैरजं हेमवारिणा ।

नरसिंहन्तु संप्राप्य कर्पूरागुरुवारिणा ॥
इन्द्रलोके स मोदित्वा पश्चाद्विष्णुपुरं व्रजेत् ।
पुष्पोदकेन गोविन्दं स्नाप्य भक्त्या नरोत्तमः ॥
सावित्रं लोकमासाद्य विष्णुलोके महीयते ।
वस्त्राभ्यामच्युतं भक्त्या परिधाप्य विचित्रकं ॥
सोमलोके वसित्वा तु विष्णुलोके महीयते ।
कुंकुमागुरुश्रीखण्डकर्दमैरच्युताकृतिं ॥
आलेप्य भक्त्या राजेन्द्र! कल्पकोटिं वसेद्दिवि ।
मल्लिकामालतीजातीकेतक्यशोकचम्पकैः ॥
पुंनागवकुलैः पद्मैरुत्पलैर्जातिपुष्पकैः ।
तुलसीकरवीरैश्च पालाशावर्त्ती[१]कुब्जकैः ॥
एतैरन्यैश्च कुसुमैः प्रशस्तैरच्युतं नरः ।
अर्चयन् दशसुवर्णस्य प्रत्येकं फलमाप्नुयात् ॥
मालां कृत्वा यथालाभमेतेषां यः प्रयच्छति ।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥
दिव्यं विमानमास्थाय विष्णुलोके स [२]मोदते ।
नरकेशरिणं [३]भक्त्या विल्वपत्रैरखण्डितैः ॥
निश्छिद्रैः पूजयेद्भक्त्या तुलसीभिश्च भक्तितः ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥

(१) कुब्जलैः—। (२) महीयते। (३) दृष्ट्वा।

महिषाख्यं गुग्गुलं यः आज्ययुक्तं सशर्करं ।
धूपं ददाति राजेन्द्र! नरसिंहाय भक्तिमान् ॥
वायुलोकं समासाद्य विष्णुलोके महीयते ।
घृतेन तिलतैलेन दीपं यो ज्वालयेन्नरः ॥
ज्योतिष्मता विमानेन विष्णुलोके महीयते ।
हविःशाल्योदनं दिव्यमाज्ययुक्तं सशर्करं ॥
निवेद्य नरसिंहाय यावकं पायसं तथा ।
(१)समास्तु कुलसंख्याता यावत्यस्तावती नृप ॥
विष्णुलोके महाभोगान् भुञ्जानास्ते सवैष्णवः" ।

एवं देवगृहस्य समन्ताद्बलिदानं, (२)नैवेद्यविशेषेण लोकपालेभ्यः शान्तिकरं, प्रदक्षिणकरणं पृथ्वीप्रदक्षिणफलं, नमस्कारेण विष्णुलोकफलप्राप्तिः, स्तोत्रजपेन विष्णुलोकं, सन्ध्यायां गीतवाद्येन पर्वसु विशेषेण कामरूपता, गरुड़ध्वजदानाद्विष्णुलोकप्राप्तिः, मुकुटकटककेयूरादिसुवर्णाभरणै(३)रिन्द्रलोकः, पयस्विनी धेनुदानाद्गोसहस्रदानफलं। अत्र पुष्पमध्ये तुलसीकीर्त्तनं पुष्पफलं, अत्रोपक्रमे, "राजपुत्र! शृणुष्वेवं हरिपूजाविधिक्रम"मिति कीर्त्तनादुपसंहारे च इत्येवमुक्तं भृगुचोदितेन मया तवेहार्चनमच्युतस्येति पूजोपसंहारात्, सर्वेषां पृथक् पृथक् फलवतां पृथगेव पूजात्वं। नहि षोड़शोपचार, एवं पूजा ।

(१) समास्तण्डुल। (२) नैवेद्यशेषेण। (३) रुद्रलोकः।

किन्तु प्रीतिहेतुक्रिया मात्रं, तेन गृहसंमार्जनो लेपनादीनि गोदानादीन्यपि प्रीतिहेतुत्वात् पूजा ।

तदुक्तं भट्टैः, स्तुतेरपि हि पूजात्वादिति, नात्र पुरुषसूक्तपूजायामेवमादीनां गुणफलत्वमप्रकरणात्, नापि गुणविधिमात्रत्वेन फलश्रुतेरर्थवादत्वं, अव्यभिचरितक्रतुसम्बन्धाभावेन पूजागतस्यावाहनादेरनुपस्थितेः, अनेकगुणविधाने वाक्यभेदभयेन बलात्कर्मान्तरत्वे फलापेक्षयामुक्तिफलान्वयात् ।

तेन सधर्मकमिदमावाहनं, पुरुषसूक्तपूजायामावाहनमधर्मकं । तेनास्मादक्षतपुष्पादिधर्मान्तरं गृह्णातीति, एवं यान्यत्र पुष्पाण्यनुलेपनादीनि वा तान्येव पुरुषसूक्तपूजायामपि पुष्पदानविधिना अत्रत्य धर्मग्रहणात् शेषकर्माणि पूर्ववदित्यनेन तु कर्माण्येवातिदिश्यते, न द्रव्याणीति, कर्मपदेन द्रव्यलक्षणा वा मन्तव्या, द्रव्याणां वा क्रियायां कर्मत्वात् कर्मपदेनोपादानमिति, कल्पोक्तविधिना वा पुरुषसूक्तेन पूजयेत् ।

याज्ञवल्क्यकल्पे,—

चतुरस्रं परं कृत्वा चतुर्द्वारविभूषितं ।
तन्मध्ये विलिखेत्पद्मं कर्णिका केशरान्वितं ।
प्रणवेन (१)फड़न्तेन करौ संशोधयेत्ततः ।
दिग्बन्धनं ततः कुर्य्याद्विधिवद्भूतशोधनं ॥
प्रणवं प्लुतमुच्चार्य्य वीजं संचिन्त्य निर्दहेत् ।
तन्मध्यादूर्द्धरन्ध्रेण मरुता शोषयेत्ततः ।

(१) पञ्चकेन।

निर्दहेदग्निबीजेन प्लावयेद्वारुणेन च ॥
[१]एकार्णवमपर्य्यन्तं भावयेत् स चराचरं ।
ततोऽण्डं जलमध्यस्थं शुद्धकाञ्चन-सप्रभं ॥
वारुणेन तु संचिन्त्य तन्मध्ये चिन्तयेद्धरिं ।
फुल्लारविन्दवदनं पीतनिर्मलवाससं ॥
पङ्कजासनमध्यस्थं शुद्धजाम्बुनदप्रभं ।
केयूरकटकोपेतं हारकुण्डलमण्डितं ॥
सशंखचक्रं सस्मेरं मुकुटादुपशोभितं ।
संचिन्त्य बीजमात्मानं तं हृदिस्थं विचिन्तयेत् ॥
सोऽहमस्मीत्यभेदेन चिन्तयित्वात्मपूजनं ।
कृत्वा मुद्रात्रयं धृत्वा कुर्य्यान्न्यासं विधानतः ॥
आद्यामृचं न्यसेद्वामे द्वितीयां दक्षिणे करे ।
तृतीयां वामपादे तु चतुर्थीं दक्षिणे तथा ॥
पंचमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत् ।
सप्तमीं वामकट्यां तु दक्षिणस्यां तथाष्टमं ॥
नवमीं नाभिदेशे तु दशमीं हृदये तथा ।
एकादशीं कण्ठदेशे द्वादशीं वामबाहुके ॥
त्रयोदशीं दक्षिणे च मुखे चैव चतुर्दशीं ।
अक्ष्णोः पञ्चदशीं चैव षोड़शीं मूर्द्ध्नि विन्यसेत् ॥
एवं न्यासविधिं कृत्वा पश्चात् पात्रस्य शोधनं ।
अस्त्रेण क्षालयेद्विष्णोर्गायत्र्या जलपूरणं ॥

(१) एकैकार्णवपर्य्यन्तं ।

गन्धादि दत्त्वा दशधा बीजं तु प्रणवं न्यसेत् ।
मन्त्रन्यासं ततः कृत्वा प्रोक्षयेन्मण्डलान्तिकं ॥
अवगुण्ठ्य ततोऽस्त्रेण शंखमुद्रां प्रदर्शयेत् ।
हृदये श्रीधरं देवं गन्धाद्यैर्मानसैर्यजेत् ॥
पूजयेदासनं तत्र क्रमादाधारशक्तितः ।
आधारशक्तिं कूर्मं च अनन्तं क्षितिमण्डलं ॥
धर्मं ज्ञानं च वैराग्यमैश्वर्य्यमपि कोणतः ।
पूर्वतोऽधर्ममज्ञानमवैराग्यमनैश्वरं ॥
संपूज्याष्टदलं पद्ममर्कसोमाग्निमण्डलं ।
उपर्य्युपरि संपूज्य मध्ये तु पुरुषं यजेत् ॥
ध्येयः सदा सवितृमण्डलमध्यवर्त्ती ।
नारायणः सरसिजासनसंनिविष्टः ॥
केयूरवान् मकरकुण्डलवान् किरीटी ।
हारी हिरण्मयवपुर्धृतशंखचक्रः ॥
आद्ययावाहयेद्देवं पूर्वमुद्राः प्रदर्शयेत् ।
एतावन्तः प्रिया विष्णोर्वन्दनीयास्तु भो द्विजाः ।
एतावद्दर्शयेत्तिस्रः कृतकृत्यस्ततो भवेत् ॥
द्वितीययासनं दद्यात् पाद्यं दद्यात्तृतीयया ।
स्वदेहे विन्यसेद्देवे सूक्तेन पुरुषस्य तु ॥
चतुर्थ्यार्घ्यं ततो दद्यात् पञ्चम्याचमनीयकं ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या पीतवाससी ॥
यज्ञोपवीतमष्टम्या नवम्या गन्धमुत्तमं ।

पुष्पं दद्याद्दशम्यां तु एकादश्यां तु धूपकं ॥
द्वादश्यां दीपदानं स्यात् त्रयोदश्यां निवेदनं ।
पूर्ववत् स्नाननैवेद्ये वस्त्रेणाचमनं भवेत् ॥
गणेशं क्षेत्रपालं च नारदं गुरुमेव च ।
सर्वतः पूजयेद्विद्वान् मध्ये लोकेशपद्मयोः ॥
इन्द्रमग्निं यमं चैव नैर्ऋतं वरुणं तथा ।
वायुं कुवेरमीशानमनन्तं परमेष्ठिनं ॥
स्वासु दिक्षु ततोऽस्त्राणि नामभिः प्रणवादिभिः ।
सर्वतः पूजयेद्विद्वान् तत्सर्वं प्रणवे स्थितं ॥
देवं प्रणववीजेन संपूज्याञ्जलिभिस्त्रिभिः ।
जपेदष्टोत्तरशतं तन्नमोऽन्तं ततो द्विजाः ॥
गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत् कृतं जपं ।
सिद्धिर्भवतु मे देव! त्वत्-प्रसादादधोक्षज! ॥
एवं निवेद्य विधिवद्जपं श्रीपुरुषोत्तमे ।
षड़र्चं पुरतो जप्त्वा ऊर्द्धमर्द्धं ततो जपेत् ॥
विश्वक्सेनं तथैशान्यां प्रणवेनैव पूजयेत् ।
गन्धपुष्पादिभिः कृष्णं दंष्ट्रिणं (१)घोरदर्शिनं ॥
चतुर्दश्याञ्जलिं कुर्यात् पञ्चदश्यां प्रदक्षिणं ।
कृत्वा देवस्य पुरतः प्रणमेद्दण्डवत्स्थितौ ॥
ध्यायेन्मण्डलमध्यस्थं सकलं निष्फलं हृदि ।
अच्छिद्रमवधार्य्यान्ते क्षमस्वेति ततो वदेत् ॥

(१) घोररूपिणं ।

संहृत्य मण्डलाद्देवं षोड़श्यां प्रणवं पठेत् ।
नासाकर्षणयोगेन हृदि संस्थापयेत् प्रभुं ॥
आदित्यवर्णं पुरुषं पुण्डरीकनिभेक्षणं ।
भक्तिस्निग्धेन मनसा ध्यायेत् शापहरं हरिं ॥
योगमूर्त्तिं चतुर्वाहुं शंख-चक्र-गदाधरं ।
यो वा ध्यायेद्विभुत्यर्थमाप्नोति वसुमीप्सितं" ॥

अत्र वीजं संचिन्त्य निर्द्दहेदिति वीजं वायुवीजं यं संचिन्त्य मरुत्शोषयेदिति सम्बन्धः, निर्द्दहेदिति वक्ष्यमाणवह्निना दाहस्य शोषणसाध्यत्वदर्शनाय प्रथममुपात्तं, निर्दग्धं शोषयेदित्यर्थः, मध्यादूर्द्धरन्ध्रेणेति जीवमात्मानं हृदि संचिन्तयेदिति वक्ष्यमाणत्वान्मध्यात् सुषुम्णामार्गेण ऊर्द्धं ब्रह्मरन्ध्रेण जीवं द्वादशान्तं नयेदित्यत्र निर्णयेदिति पाठे स्फुटमेव जीवनयनचिन्तनं, रमित्यग्निवीजं, वं वारुणवीजं, सोऽहमस्मीति विष्णुरहमस्मीत्यर्थः आत्मपूजनमन्त्राभेदचिन्तनमेव मानसपूजाया वक्ष्यमाणत्वात्, मुद्रात्रयमात्रं विष्णोरसाधारणं श्रीवत्सकौस्तुभ-वैनतेय-मुद्रात्रयरूपं एतावन्तः प्रियाविष्णोरिति वक्ष्यमाणत्वात्, यदि तु तत्त्वसागर-संहितोक्तं सर्वदेवसाधारणं मुद्रात्रयं स्याद्विष्णोः प्रिया इत्यसंगतं स्यात् । तत्त्वसागरसंहितायां,—

"अञ्जलिः शिरसा रूपं हृदये सेव वन्दिनी ।
अङ्गुलीर्गोपयित्वा तु भ्राम्य संस्थापयेत् हृदि ।
प्रसाधनीति सिद्धैषा तिस्रो मुद्रा इमाः समाः" ॥

कुर्य्यान्न्यासविधानं तु इति मातृकान्यासकेशवादिन्यास-

भावनाचतुष्टयरूपन्यासास्तन्त्रान्तरोक्ताः सूचिताः, पूजाङ्गमन्त्रन्यासमाह ।

"आद्यामृचं न्यसेद्वाम"इत्यादिना विष्णोर्गायत्र्येति गायत्रीछन्दस्को वैष्णवो मन्त्रस्तद्विष्णोर्गायत्र्येति गायत्रीछन्दस्को वैष्णवो मन्त्रस्तद्विष्णोरितिग्राह्यः, गन्धादित्यादिशब्देन गन्धपुष्पाचतयवकुशाग्रतिलश्वेतसर्षपदूर्वाः, मन्त्रन्यासं ततः कृत्वेति उक्तस्य दशधा प्रणवजपस्यानुवादः, पूर्वोक्तविष्णुगायत्री वा मन्त्रः, पूजाङ्ग-पुरुषसूक्तमन्त्रो वा, प्रोक्षयेन्मण्डलान्तिकमिति, प्रोक्षणं शंखस्थजलस्य जलान्तरेण संस्कारार्थं, मण्डलान्तिकमित्यवगुण्ठन-स्वरूपकथनाय, मण्डलाकारेण शंखान्तिके अवगुण्ठ्येत्यर्थः, मण्डलं चान्तिकं च यथास्यादिति क्रियाविशेषणं, अर्घ्यसंस्कारानन्तरमर्घ्योदकेन पूजोपकरणप्रोक्षणं, तन्त्रान्तरसिद्धं कार्य्यं, यद्वार्घ्यसंस्कारस्यात्र कृतस्य दृष्टार्थत्वादर्थक्रमेण वा पाठक्रमबाधात् प्रोक्षयेन्मण्डलान्तिकमिति शंखमुद्रादर्शनानन्तरं सम्बध्यते, तत्र मण्डलं पद्मं तत्पर्य्यन्तं द्रव्यजातं सर्वमर्घ्यं संस्कृत्य प्रोक्षयेदिति सम्बन्धः, पूजयेदासनं तत्रेति, तत्र मानसपूजायां आधारादिक्रमेणासनपूजा कार्य्या, अर्थात् बाह्यपूजायामप्यनेनैव विधिना आसनपूजेति गम्यते, आसनं पूजयेदिति तत्रापि सम्बन्धात्, आवाहयेदिति तत्रापि सम्बन्धात् आवाहयेदिति हृदये विष्णुं ध्यात्वा नासाद्वारेणावाहनं, नासाप्रवेशेनोद्वासनस्य वक्ष्यमाणत्वात्, आसनपाद्यदानानन्तरं स्वदेहवदाद्यामृचं न्यसेद्वाम इत्यादिक्रमेण न्यासः, पूर्ववदिति, नारसिंहोक्तपुरुषसूक्तपूजादीत्यर्थः, पुरुषसूक्त

पूजात्वेन बुद्धिस्थत्वात्, पूर्वता लघुप्रकारत्वात्, लोकेशपद्मयोरिति कर्णिकायां लोकेशो विष्णुः, तद्वाह्ये दलानि, तयोर्मध्य इत्यर्थः, तेन दलमूले शक्रादयः, ततोऽस्त्राणि तदनन्तरं दलमध्येऽस्त्राणि वज्रादीनि स्वासु दिक्षु पूजयेदिति सम्बन्धः, षडृचं जप्त्वा ऊर्द्धमन्य जपेदिति स्तोत्रान्तरं सहस्रनामादिजपेदित्यर्थः, मध्याह्ने गोपालपूजायां ध्याने विशेषः ॥

॥ इति श्रीमहामहोपाध्यायाग्निचिद्वाजपेयि-नरसिंहविरचिते
नित्याचारप्रदीपे चतुर्थभागकृत्यं समाप्तम्
॥ श्रीशुभमस्तु, श्रीशुभमस्तु ॥

द्वितीयभागादारभ्य चतुर्थभागान्तः पुस्तकस्यैतस्य
द्वितीयभागः समाप्तः ॥

नित्याचारप्रदीपोद्धृत-प्रमाणग्रन्थानां ग्रन्थकृतां च अनुक्रमणी ।

नित्याचारप्रदीपस्य विषयानुक्रमणी ।

अ

आ

ब

भ

म

नित्याचारप्रदीपस्य द्वितीयभागादारभ्य चतुर्थभागान्तमशुद्धिशुद्धिनिर्घण्टः ।

अशुद्धं	शुद्धं	पृष्ठाङ्काः	पङ्क्त्याङ्काः
निश्रेयसकरः ...	निःश्रेयसकरः ...	२	१८
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	३	१
ऋण्यापकरणं ...	ऋण्यापाकरणं ...	३	१६
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	४	१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	५	१
आत्मकानापदि ...	आत्मज्ञानापदि ...	५	९
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	६	१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	७	१
सम्मार्गोऽपि ...	सन्मार्गोऽपि ...	७	१९
सम्मार्गस्य ...	सन्मार्गस्य ...	७	२०
सम्मार्गात्तु ...	सन्मार्गात्तु ...	७	२१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	८	१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	९	१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	१०	१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	११	१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	१२	१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	१३	१
अध्ययनाङ्गाणि ...	अध्ययनाङ्गानि ...	१३	१९
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	१४	१
नित्याचारपद्धतिः ...	नित्याचारप्रदीपः ...	१५	१
नित्याचारपद्धति; ...	नित्याचारप्रदीपः ...	१६	१
याज्ञ्यकल्क्यः ...	यज्ञ्यवल्क्यः ...	२९	१५
पांसु ...	पांशु ...	३१	६
ज्यैस्ठ ...	ज्यैष्ठ ...	३७	७
व्रह्माञ्जलिं ...	वद्धाञ्जलिं ...	४२	९
म्ठणमय ...	मृण्मय ...	४३	१४
लोकाच्चौति ...	लोगाच्चौति ...	४९	१५
यौगकिस्यापि ...	यौगिकस्यापि ...	७७	१७
मुखत्वहंसः ...	मुखत्वंहसः ...	९४	३

अशुद्धं	शुद्धं	पृष्ठाङ्काः	पंक्त्यङ्काः
परमेष्टी	परमेष्ठी	९४	१३
परमेष्टी	परमेष्ठी	९४	१८
अन्तच	अन्ते च	१०५	१०
होभेन	होमेन	१०७	८
संस्पृष्ठाः	संस्पृष्टाः	१०७	१५
दधिक्राव्नः	दधिक्राव्णः	१०९	३
गग्ध	गन्ध	१२०	११
पपरममेधावी	परममेधावी	१३२	२
त्राम्बक	त्र्यम्बक	१४०	१३
उत्म्टज्य	उत्सृज्य	१४६	११
इत्यभिघानात्	इत्यभिधानात्	१४८	१८
पुजाद्रव्य	पूजाद्रव्य	१५०	६
प्रस्कान्नऋषिः	प्रस्काण्वऋषिः	१५५	१७
इन्द्	इन्द्र	१५६	२
वक्तुमर्संसि	वक्तुमर्हसि	१५७	५
सर्वभूतेम्यो	सर्वभूतेभ्यो	१६०	७
नाप्नंय	नाप्नय	१६३	१५
परब्रह्म	परंब्रह्म	१६९	६
ऋषिभिर्देवकन्याभिः	ऋषिभिर्देवकन्याभिः	१७३	२२
मुञ्जमुञ्ज	मुञ्जमुंञ्जः	१७३	२२
चतुर्विंशति	चतुर्विंशति	१८७	७
म्टन्मय	म्टण्मय	१८९	२
पिष्टमयाश्वसुखे	पिष्टमयाश्वमुखे	१९१	५
सर्वंत्र	सर्वत्र	१९१	७
उत्तरफल्गुण्यां	उत्तरफल्गुन्यां	१९२	१८
इन्द्राग्नीदेवता	इन्द्राग्नीदेवते	१९३	११
परिजातपुष्पैः	पारिजातपुष्पैः	१९४	१६
चानूर	चाणूर	१९७	८
देशेपु	देशेषु	१९८	१८
अपामर्जन	अपामार्जन	२०३	१६
कृच्छ्रातिकृच्छ्रं	कृच्छ्रातिकृच्छ्रं	२०५	४

अशुद्धं	शुद्धं	पृष्ठाङ्काः	पंक्त्यङ्काः
वासेद्वयं च	वासोद्वयं च	२०५	५
प्रायस्चिचं	प्रायश्चित्तं	२२३	५
पुरुषमूक्तेन	पुरुषसूक्तेन	२२८	५
कांश्यदानेन	कांस्यदानेन	२३२	१४
कप्तेति	क्लृप्तेति	२५०	८
निर्धनोऽपि	निर्द्धनोऽपि	२५०	१५
अयज्ञीयं	अयज्ञीयं	२५२	११
तयोरनावृत्तित्वं	तयोरनापवृत्तित्वं	२५५	२०
ग्रीधरेण	श्रीधरेण	२६०	१७
तद्भूत्वा	तद्भुक्त्वा	२६५	१७
कुशादौ	कुसूलादौ	२६५	१८
प्रवृत्तिघर्म्मेण	प्रवृत्तिधर्म्मेण	२६६	२०
श्रद्धधानस्य	श्रद्दधानस्य	२६९	९
आत्मनीत्यर्थः	आत्मनीत्यर्थः	२६९	१४
राजमहिपी	राजमहिषी	२६९	२०
दादाद्यधनाभावे	दायाद्यधनाभावे	२७०	१९
स्व	च	२७१	५
प्रहिग्रहालाभे	प्रतिग्रहालाभे	२७३	१६
अर्द्धचारिणः	अर्द्धसीरिणः	२७८	१८
पानीयमाने	पानीयपाने	२८०	९
प्रतिग्टहीतृभेदेन	प्रतिग्रहीतृभेदेन	२९४	२
अध्यापनयाचनयोः	अध्यापनयाजनयोः	२९५	१२
भोजान्नता	भोज्यान्नता	२९६	२०
नाध्यपनान्तर्गतः	नाध्यापनान्तर्गतः	३०३	१९
त्र्ययम्बक	त्र्यम्बक	३०६	१०
६०९	३०९	३०९	१
संयाज	संयाज्य	३०९	१७
ना	न	३१४	१५
म्टन्मय	म्टण्मय	३१७	५
वृत्तिसङ्करनिषेषः	वृत्तिसङ्करनिषेधः	३२६	८
प्रच्यावितस्य	प्रच्युतस्य च	३२९	१०

अशुद्धं	शुद्धं	पृष्ठाङ्काः	पङ्क्त्यङ्काः
संप्रगृह्यन्	संप्रगृह्णन्	३३०	५
व्रताणि	व्रतानि	३३१	१९
निषेषवाक्यानां	निषेधवाक्यानां	३३२	१६
सस्यान्त	शस्यान्ते	३३६	८
नवसस्येष्ट्या	नवशस्येष्ट्या	३३६	८
पशुमोमैस्त्र	पशुसोमैस्त्र	३३६	१९
पक्वापक्वान्नन	पक्वापक्वान्नेन	३३७	६
मृन्मय	मृण्मय	३४५	१६
नित्यारप्रदीपः	नित्याचारप्रदीपः	३४७	१
प्रपाणकदाने	प्रपानकदाने	३४९	१३
वालक्रीड़णकदाने	वालक्रीड़नकदाने	३४९	१३
प्रपाणकदानं	प्रपानकदानं	३५०	१५
ज्यैष्ठे	ज्यैष्ठे	३५१	६
पिणाकिनं	पिनाकिनं	३५२	३
आर्य्यम्ने	आर्य्यम्णो	३५२	१३
च्छत्रनाशः	च्छत्रनाशः	३५३	४
क्रीड़णकदानं	क्रीड़नकदानं	३५३	४
धर्म्मणाच्छणं	धर्म्मलक्षणं	३५६	२२
चाग्निहोत्रिणि	चाग्निहोत्रिणो	३५७	५
स्वीजितः	स्त्रीजितः	३६०	२
मृन्मयात्	मृण्मयात्	३६८	११
मृरामयात्	मृण्मयात्	३६९	२३
षड़ठस्था	षड़ठस्ता	३७१	१७
षान्मासिको	षाण्मासिको	३७८	५
चतुःषष्ठि	चतुःषष्ठि	३७८	१४
कनिष्ठे	कनिष्ठे	३७८	१४
व्याधिनाशाय	व्याधिनाशाय	३७९	१७
गन्धर्वलोकावाप्तिः	गन्धर्वलोकावाप्तिः	३८१	१४
च्छिरण्यरेतसोर्विष्णो	च्छिरण्यरेतसोविष्णो	३८८	१२
भेषज्येति	भैषज्येति	३९४	३
कोशादारभ्यमच्युताय	कोशादारभ्याच्युताय	३९५	१३

अशुद्धं	शुद्धं	पृष्ठाङ्काः	पङ्क्त्यङ्काः
मातृपुजा	मातृपूजा	३९९	६
प्रविशेऽपि	प्रवेशेऽपि	३९९	१५
पायमचरु	पायसचरु	३९९	१६
नैर्ऋत्यादिन्तौशानान्तं	नैर्ऋत्यादीशानान्तं	४१०	७
तिलकालक्वतानना	तिलकालंकृतानना	४१३	५
अप्रसंगोदासीनाकर्त्तः	अप्रसंगोदासीनताकर्त्तः	४१६	९
विषमेकानिनं	विषमेकाकिनं	४२१	१७
खाद्यशोच	खाद्यशौच	४२४	५
आभिमुखेनावलोकनं	आभिमुख्येनानवलोकनं	४२५	२
नैर्हतिकः	नैर्ऋतिकः	४२५	१६
पुरुषस्तमजं	पुरुषंतमजं	४२७	१९
विरोधा	विरोधो	४२८	१९
मत्तिकं	नैमित्तिकं	४३१	२
करोत्वमले	करोत्वमले	४३७	१५
राचाभ्यङ्ग	गात्राभ्यङ्ग	४३८	११
वर्जान्य	वर्ज्यान्य	४३८	१६
चातुर्मास्येऽष्टौ	चातुर्मास्येऽष्टौ	४४८	१४
देवकीनवसूतिकां	देवकीं नवसूतिकां	४४८	१९
तपःप्राप्तिकामो	पदप्राप्तिकामो	४५०	१८
नःशब्दतासंपादनं	निःशब्दतासंपादनं	४५३	२२
दशमास्याऽस्त	दशमास्योऽच	४५४	३
जयस्वनादपुरःसरं	जयस्वनादिपुरःसरं	४५४	८
चत्	चेत्	४५८	१८
द्वादश्या	द्वादश्यां	४६०	१४
शास्त्रनवेच्छेत	शास्त्राण्यवेच्छेत	४६८	१२
न्त्वेनापि	न्त्वेन्नापि	४८३	१०
संपर्कणा	संपर्कोणा	४८५	३
प्रतिमादिशेत्	व्रतमादिशेत्	४८६	१५
विष्णुस्मृतौ	विष्णुस्मृतौ	४८७	२
याति	यान्ति	४८७	५
स्रूरैः	खुरैः	५१९	१०

अशुद्धं	शुद्धं	पृष्ठाङ्काः	पङ्क्त्याङ्काः
नैक्रोध्यानं	नैक्रोध्वानं	५२०	६
नपीतर्पणनिमित्तं	नदीतरणनिमित्तं	५२१	११
शंखखिखितौ	शंखलिखितौ	५२३	२
रपातपानीयैः	रपीतपानीयैः	५२३	६
परस्त्रिच्छायां	परस्त्रीछायां	५४०	१२
टद्वणो	तद्वणो	५४९	९
तैलेनाङ्ग	तैलेन नाङ्ग	५८३	१०
प्रमिद्धं	प्रसिद्धं	५८३	१३
मामान्यतो	सामान्यतो	५८३	१३
मार्षपस्य	सार्षपस्य	५८७	१४
सुवर्णन	सुवर्णेन	६०८	९
मंन्त्रण	मन्त्रेण	६१५	५
जीवपित्रक	जीवत्पितृक	६१५	८
वोढूः	वोढुः	६१६	१२
छान्दसः	श्छान्दसः	६१७	५
पुर्वं	पूर्वं	६२४	८
देवकरघर	देवकरधरा	६२५	४
ममह्यादितर्पणे	मातामह्यादितर्पण	६३०	१५
प्रयान्त्यास्तु	प्रयान्त्वास्तु	६३२	५
तदमङ्गते	तदसंगते	६३२	१६
स्नानवस्त्र	स्नानवस्त्रं	६३७	१९
ईत्यदं	इत्येवं	६३९	११
इन्द्राद्या	इन्द्राद्याः	६४०	२
द्यायोः	द्वयोः	६४३	१५
अग्निवरुणौदेवता	अग्निवरुणौदेवते	६४५	२
त्यचस्य	टचस्य	६४८	१७
प्रणव	प्रणवो	६४९	६
पात्र	पात्रं	६४९	२०
सागर	सगरं	६९५	२
ब्रह्मान्तान	ब्रह्मान्तान्	७०४	८
पूर्णां	पूर्णां	७०९	१८